ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)

प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग प्रकाशक

ब्रह्मसूत्रशांकरभाष्यमिदं टीकाभिरेकादशभिः सह भागेष्वष्टसु प्रकाश्यते। सर्वासां टीकानां क्रम एवं व्यवस्थापितः। भामती-ऋजुप्रकाशिका- भाष्यभावप्रकाशिका- प्रदीप-ऋजुविवरण- तत्वदीपन- वार्त्तिक- पञ्चपादिका-पञ्चपादिकाविवरण-श्रीकण्ठभाष्य-शिवार्कमणिदीपिकाख्याः।

एतासां सर्वासां टीकानां केचिदंशाः प्रकाशिता आसन् केचिच्चाप्रकाशिताः। ते सर्वेऽशाः इतस्ततः प्रकाशितेभ्यो ग्रन्थेऽभ्योऽप्रकाशितेभ्यो ग्रन्थेभ्यो वा यथासम्भवं संकलय्यात्र व्यवस्थापिताः। अधुनापर्यन्तं सर्वा एताः टीकाः सममेव प्रकाशिताः आसन्। परमधुना प्रतिवर्णकं टीकैका पूर्वं सामग्र्येण प्रकाशिता।

तदनन्तरं द्वितीया टीका प्रारब्धा। आशास्यते च वेदान्तविषयाब्धिं प्रविविक्षूणां शोधकानां कृते प्रयास एष समर्द्धिकरो भविता।

ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)

प्रो. योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग पब्लिशर्स

ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)

ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)

तृतीय खण्ड

भामती
ऋजुप्रकाशिका
भाष्यभावप्रकाशिका
प्रदीपः
ऋजुविवरणम्
तत्त्वदीपनम्
वार्त्तिकम्
पञ्चपादिका
पञ्चपादिकाविवरणम्
श्रीकण्ठभाष्यम्
शिवार्कमणिदीपिका

सम्पादकः

प्रो. योगेश्वरदत्तशर्मा (पाराशरः)

हिन्दू कालेज, दिल्ली विश्वविद्यालय

दिल्ली-110007

NAG PUBLISHERS

नाग पब्लिशर्स

11 ए. यू. ए. जवाहर नगर, दिल्ली-110007

This Publication has been brought out with the financial assistance from Rashtriya Sanskrit Sansthan, New Delhi.

नाग प्रकाशक
(१) 11ए/यू. ए. जवाहर नगर, दिल्ली-110007
टेलिफोन-2915883, 2517975, 3957440
(२) जलालपुर माफी (चुनार-मिर्जापुर) उ० प्र०

© प्रकाशक

ISBN: 81-7081-365-4 (set)
81-7081-428-6 (Vol III)

प्रथम संस्करण : १९९८

मूल्य :

श्री सुरेन्द्र प्रताप द्वारा नाग प्रकाशक 11 ए० यू० ए०, जवाहर नगर, दिल्ली 110007 द्वारा प्रकाशित तथा जी. प्रिंट. प्रोसेस, 308/2 शहजादा बाग, दयाबस्ती दिल्ली द्वारा 110035 द्वारा मुद्रित। अक्षरयोजक ए० आर० प्रिंटर्स, डी-102 न्यू सीलमपुर, दिल्ली-110053।

विषयनुक्रमणिका

(अ.१ , पा.१ , सू.२)

अथ जन्माधिकरणम्

शाङ्करभाष्यम्	१०९५-१०९६
भामती	१०९७-११००
ऋजुप्रकाशिका	११०१-११०८
पञ्चपादिकाविवरणम्	११०९-११२२
ऋजुविवरणम्	११२३-११३१
तत्त्वदीपनम्	११३२-११५५
प्रदीपः	११५६-११६९
पञ्चपादिका	११७०-११७३
वार्तिकम्	११७४-११८४
भाष्यभावप्रकाशिका	११८५-११८८
श्रीकण्ठभाष्यम्	११८९-११९१
शिवार्कमणिदीपिका	११९२-१२२४

(अ.१ , पा.१ , सू.३)

अथ शास्त्रयोनित्वात्

शाङ्करभाष्यम्	१२२५-१२२५
भामती	१२२६-१२२७
ऋजुप्रकाशिका	१२२८-१२३१
पञ्चपादिकाविवरणम्	१२३२-१२३७
ऋजुविवरणम्	१२३८-१२४१

तत्त्वदीपनम् १२४२-१२५२
वार्तिकम् १२५३-१२५६
भाष्यभावप्रकाशिका १२५७-१२५८
प्रदीपः १२५९-१२६६
पञ्चपादिका १२६७-१२६७
श्रीकण्ठभाष्यम् १२६८-१२६९
श्रीशिवार्कमणिदीपिका १२७०-१२९४

(अ.१, पा.१, सू.४)

अथ समन्वयाधिकरणम्

शाङ्करभाष्यम् १२९५-१३०४
पञ्चपादिकाविवरणम् १३०५-१३३९
ऋजुविवरणम् १३४०-१३९०
तत्त्वदीपनम् १३९१-१४४९
वार्तिकम् १४५०-१४९७
भाष्यभावप्रकाशिका १४९८-१५१०
प्रदीपः १५११-१५५९
भामती १५६०-१५८१
ऋजुप्रकाशिका १५८२-१६२०
पञ्चपादिका १६२१-१६३३
श्रीकण्ठभाष्यम् १६३४-१६३६
श्रीशिवार्कमणिदीपिका १६३७-१६६०

अथ जन्माधिकरणम्

जन्माद्यस्य यतः॥

ब्रह्म जिज्ञासितव्यमित्युक्तम्। किंलक्षणं पुनस्तद् ब्रह्मेति? अत आह भगवान् सूत्रकारः– ***जन्माद्यस्य यतः॥२॥*** इति।

जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः।

जन्म-स्थिति-भङ्गं समासार्थः।

जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च। श्रुतिनिर्देशस्तावत्–"**यतो वा इमानि भूतानि जायन्ते**" (तैत्ति० ३।१) इत्यस्मिन्वाक्ये जन्म-स्थिति-प्रलयानां क्रमदर्शनात्। वस्तुवृत्तमपि-जन्मना लब्धसत्ताकस्य धर्मिणः स्थिति-प्रलयसंभवात्। "अस्ये" ति प्रत्यक्षादिसंनिधापितस्य धर्मिण इदमा निर्देशः। षष्ठी जन्मादिधर्मसंबन्धार्था। यत इति कारणनिर्देशः।

अस्य जगतो नाम-रूपाभ्यां व्याकृतस्य,अनेक-कर्तृ-भोक्तृसंयुक्तस्य, प्रतिनियत-देश-काल-निमित्त-क्रिया-फलाश्रयस्य, मनसाऽप्यचिन्त्यरचनारूपस्य जन्म-स्थिति-भङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद् भवति, तद् ब्रह्मेति वाक्यशेषः। अन्येषामपि भावविकारणां त्रिष्वेवान्तर्भाव इति जन्म-स्थिति-नाशानामिह ग्रहणम्।यास्कपरिपठितानां तु "**जायतेऽस्ति**" इत्यादीनां ग्रहणे, तेषां जगतः स्थितिकाले संभाव्यमानत्वान्मूलकारणादुत्पत्ति-स्थिति-नाशा जगतो न गृहीताः स्युरित्याशङ्क्येत, तन्मा शङ्कीति योत्पत्तिर्ब्रह्मणः, तत्रैव स्थितिः प्रलयश्च त एव गृह्यन्ते। न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वाऽन्यतः प्रधानाद् अचेतनात्, अणुभ्योऽभावात्, संसारिणो वोत्पत्त्यादि संभावयितुं शक्यम्। न च स्वभावतः ; विशिष्टदेश-काल-निमित्तानामिहोपादानात्। एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वा-दिसाधनं मन्यन्त ईश्वरकारणिनः। ***ननु*** इहापि तदेवोपन्यस्तं जन्मादिसूत्रे, ***ननु***; वेदान्तवाक्यग्रथनार्थत्वात् सूत्राणाम्।

वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते। वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता। सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानु-मानमपि वेदान्तवाक्याविरोधि प्रमाणं भवद् न निवार्यते; श्रुत्यैव सहायत्वेनात्मनः तर्कस्याभ्युपेतत्वात्।

तथाहि–'श्रोतव्यो मन्तव्यः' (बृह० २।४।४) इति श्रुतिः 'पण्डितो मेधावी गान्धारानेवोपसंपद्येत, एवमेवेहाचार्यवान् पुरुषो वेद' (छान्दो० ६।१४।२) इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति। न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्, किंतु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणम् ; अनुभवावसानत्वाद् भूतवस्तुविषयत्वाच ब्रह्मविज्ञानस्य (१)। कर्तव्ये हि विषये नानुभवापेक्षाऽस्ति, इति श्रुत्यादीनामेव प्रामाण्यं स्यात्, पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य।

कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म, यथाऽश्वेन गच्छति, पद्भ्यामन्यथा वा, न वा गच्छतीति। तथा "अतिरात्रे षोडशिनं गृह्णाति" "नातिरात्रे षोडशिनं गृह्णाति" "उदिते जुहोति" "अनुदिते जुहोति" इति। विधिप्रतिषेधाश्चात्रार्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च। न तु वस्तु-एवम्, नैवम्, अस्ति, नास्तीति वा विकल्प्यते। विकल्पनास्तु पुरुषबुध्यपेक्षाः। न वस्तुयाथात्म्यज्ञानं पुरुषबुध्यपेक्षम्। किं तर्हि? वस्तुतन्त्रमेव तत्। नहि स्थाणावेकस्मिन् स्थाणुर्वा पुरुषोऽन्यो वेति तत्त्वज्ञानं भवति। तत्र पुरुषोऽन्यो वेति मिथ्याज्ञानम्। स्थाणुरेवेति तत्त्वज्ञानम्; वस्तुतन्त्रत्वात्। एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम्। तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव; भूतवस्तुविषयत्वात्। *ननु* भूतवस्तुत्वे (२) ब्रह्मणः, प्रमाणान्तरविषयत्वमेव, इति वेदान्तवाक्यविचारणानर्थिकैव प्राप्ता, न ; इन्द्रियादिविषयत्वे संबन्धाग्रहणात्। स्वभावतो विषयविषयाणीन्द्रियाणि, न ब्रह्मविषयाणि। सति हीन्द्रियविषयत्वे ब्रह्मणः, इदं ब्रह्मणा संबद्धं कार्यमिति गृह्येत। कार्यमात्रमेव तु गृह्यमाणम्–किं ब्रह्मणा संबद्धम्, किमन्येन केनचिद्वा संबद्धमिति न शक्यं निश्चेतुम्। तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि? वेदान्तवाक्यप्रदर्शनार्थम्। किं पुनस्तद् (३) वेदान्त वाक्यम्–यत् सूत्रेणेह लिलक्षयिषितम् ? "भृगुर्वै, वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति" वेदान्तइत्युपक्रम्याह–"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व। तद् ब्रह्मेति" (तैत्ति० ३।१)।

तस्य च निर्णयवाक्यम्"आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति' (तैत्ति० ३।६)। अन्यान्यप्येवंजातीयकानि वाक्यानि नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावसर्वज्ञ-स्वरूपकारणविषयाण्युदाहर्तव्यानि।।२।। इति द्वितीयं जन्माद्यधिकरणात्।।

भामती

तदेवं प्रथमेन सूत्रेण मीमांसारम्भमुपपाद्य ब्रह्ममीमांसामारभते- ***जन्माद्यस्य यतः***।। एतस्य सूत्रस्य पातनिकामाह- ***ब्रह्म जिज्ञासितव्यमित्युक्तम्। किंलक्षणं पुनस्तद्ब्रह्म?***।। अत्र यद्यपि ब्रह्मस्वरूपज्ञानस्य प्रधानास्य प्रतिज्ञया तदङ्गान्यपि प्रमाणादीनि प्रतिज्ञातानि ; तथाऽपि स्वरूपस्य प्राधान्यात् तदेवाक्षिप्य प्रथमं समर्थ्यते। तत्र यद्यावदनुभूयते, तत्सर्वं परिमितमविशुद्धमबुद्धं विध्वंसि, न तेनोपलब्धेन तद्विरुद्धस्य नित्य-शुद्ध-बुद्धस्वभावस्य ब्रह्मणः स्वरूपं शक्यं लक्षयितुम्। नहि जातु कश्चित् कृतकत्वेन नित्यं लक्षयति। न च तद्धर्मेण नित्यत्वादिना तल्लक्ष्यते; तस्यानुपलब्धचरत्वात्। प्रसिद्धं हि लक्षणं भवति, नात्यन्ताप्रसिद्धम्। एवं च न शब्दोऽप्यत्र प्रक्रमते; अत्यन्ताप्रसिद्धतया ब्रह्मणोऽपदार्थस्यावाक्यार्थत्वात्। तस्माल्लक्षणाभावान्न ब्रह्म जिज्ञासितव्यमित्याक्षेपाभिप्रायः। * तमिममाक्षेपं भगवान् सूत्रकारः परिहरति*-**जन्माद्यस्य यतः* इति।।** मा भूदनुभूयमानं जगत् तद्धर्मतया तादात्म्येन वा ब्रह्मणो लक्षणम्; तदुत्पत्त्या तु भविष्यति, देशान्तरप्राप्तिरिव सवितुर्व्रज्याया इति तात्पर्यार्थः। सूत्रावयवान् विभजते- ***जन्मोत्पत्तिरादिरस्येति***।। लाघवाय सूत्रकृता जन्मादीति नपुंसकप्रयोगः कृतः, तदुपपादनाय समाहारमाह- ***जन्म-स्थिति-भङ्गमिति***।। *''जन्मनश्चे'' त्यादिः-''कारणनिर्देशः'' इत्यन्तः संदर्भो निगदव्याख्यातः। *स्यादेतत्*-प्रधान-काल-ग्रह-लोकपाल-क्रिया-यदृच्छा-स्वभावाभावेषूपप्लवमानेषु सत्सु सर्वज्ञं सर्वशक्तिस्वभावं ब्रह्म जगज्जन्मादिकारणमिति कुतः संभावनेति? अत आह- ***अस्य जगत इति***। अत्र ***नाम-रूपाभ्यां व्याकृतस्य*** इति चेतनभावकर्तृकत्वसंभावनया प्रधानाद्यचेतनकर्तृकत्वं निरुपाख्यकर्तृकत्वं च व्यासेधति। यत्तु खलु नाम्ना रूपेण च व्याक्रियते, तच्चेतनकर्तृकं दृष्टम् ; यथा घटादि, विवादाध्यासितं च जगद् नाम-रूपव्याकृतम्। तस्माच्चेतनकर्तृकं संभाव्यते। चेतनो हि बुद्धावालिख्य नाम-रूपे-घट इति नाम्ना, रूपेण च कम्बुग्रीवादिना, बाह्यं घटं निष्पादयति। अत एव घटस्य निर्वर्त्यस्याप्यन्तः संकल्पात्मना सिद्धस्य कर्मकारकभावः-घटं करोतीति। *यथाहुः*-''बुद्धिसिद्धं तु न तदसत्'' इति। तथाचाचेतनो बुद्धावनालिखितं करोतीति न शक्यं संभावयितुमिति भावः। *स्यादेतत्*-चेतना ग्रहा लोकपाला वा नाम-रूपे बुद्धावालिख्य जगज्जनयिष्यन्ति, कृतम् उक्तस्वभावेन ब्रह्मणेति, अत आह- ***अनेककर्तृ-भोक्तृसंयुक्तस्येति***।। केचित् कर्तारो भवन्ति-यथा सूदर्त्विगादयः, न भोक्तारः। केचित्तु भोक्तारः-यथा श्राद्ध-वैश्वानरीयेष्ट्यादिषु पितृ-पुत्रादयः, न कर्तारः-तस्मादुभयग्रहणम्।

'देश-काल-निमित्त-क्रिया-फलानि' इतीतरेतद्वन्द्वः। देशादीनि च प्रतिनियतानि चेति विग्रहः। तदाश्रयो जगत्, तस्य। *केचित्खलु* प्रतिनियतदेशोत्पादाः-यथा कृष्णमृगादयः। केचित्प्रतिनियतकालोत्पादाः-यथा कोकिलारवादयः। केचित्प्रतिनियतनिमित्ताः-यथा नवाम्बुदध्वानादिनिमित्ता बलाकागर्भादयः। केचित्प्रति-नियतक्रियाः- यथा ब्राह्मणानां याजनादयः, नेतरेषाम्। एवं प्रतिनियतफलाः-यथा केचित्सुखिनः, केचिद्

दु:खिन:, एवं य एव सुखिनस्त एव कदाचिद् दु:खिन:। सर्वमेतदाकस्मिकापरनाम्नि यादृच्छिकत्वे च स्वाभाविकत्वे चासर्वशक्तिकर्तृकत्वे च न घटते; परिमितज्ञानशक्तिभिर्ग्रह-लोकपालादिभिर्ज्ञातुं कर्तुं चाशक्यत्वात्। तदिदमुक्तम्- ***मनसाऽप्यचिन्त्यरचनारूपस्येति***॥ एकस्या अपि हि शरीररचनाया रूपं मनसा न शक्यं चिन्तयितुं कदाचित्, प्रागेव जगद्रचनाया:, किमङ्ग पुन: कर्तुमित्यर्थ:। सूत्रवाक्यं पूरयति ***तद् ब्रह्मेति वाक्यशेष:***॥ स्यादेतत्-कस्मात् पुनर्जन्म-स्थिति-भङ्गमात्रमिहादिग्रहणेन गृह्यते, नतु वृद्धि-परिणामापक्षया अपीति? अत आह- ***अन्येषमपि भावविकारणां**=वृद्ध्यादीनां **त्रिष्वेवान्तर्भाव इति***॥ वृद्धिस्तावदवयवोपचय:। तेनाल्पावयवादवयविनो द्वितन्तुकादेरन्य एव महान् पटो जायत इति जन्मैव वृद्धि:। परिणामोऽपि त्रिविधो धर्म-लक्षणावस्थालक्षण उत्पत्तिरेव। धर्मिणो हि हाटकादेर्धर्मलक्षण: परिणाम: कटक-मुकुटादिस्तस्योत्पत्ति:। एवं कटकादेरपि प्रत्युत्पन्नत्वादिर्लक्षणपरिणाम उत्पत्ति:। एवमवस्थापरिणामो नव-पुराणत्वादिरुत्पत्ति:। *अँपक्षयस्त्ववयवह्रासो नाश एव। तस्माद् जन्मादिषु यथास्वमन्तर्भावाद् वृद्ध्यादय: पृथग् नोक्ता इत्यर्थ:। अथैते वृद्ध्यादयो न जन्मादिष्वन्तर्भवन्ति, तथाऽप्युत्पत्ति-स्थिति-भङ्गमेवोपादातव्यम्; तथा सति हि तत्प्रतिपादके ''यतो वा इमानि भूतानि'' इति वेदवाक्ये बुद्धिस्थीकृते जगन्मूलकारणं ब्रह्म लक्षितं भवति, अन्यथा तु ''जायतेऽस्ति वर्द्धते'' इत्यादीनां ग्रहणे तत्प्रतिपादकं नैरुक्तवाक्यं बुद्धौ भवेत्। तच्च न मूलकारणप्रतिपादनपरम्; महासर्गादूर्ध्वं स्थितिकालेऽपि तद्वाक्योदितानां जन्मादीनां भावविकाराणामुपपत्ते:, इति शङ्कानिराकरणार्थं वेदोक्तोत्पत्ति-स्थिति-भङ्गग्रहणमित्याह- ***यास्कपरिपठितानां त्विति***॥ *ननु*-एवमप्युत्पत्तिमात्रं सूच्यताम् , तन्नान्तरीयकतया तु स्थिति-भङ्गं गम्यत इति, अत आह- ***योत्पत्तिर्ब्रह्मण:** कारणादिति*॥ त्रिभिरस्योपादानत्वं सूच्यते। उत्पत्तिमात्रं तु निमित्तकारणसाधारणमिति नोपादानं सूचयेत्। तदिदमुक्तम्- ***तत्रैवेति***॥ **पूर्वोक्तानां** कार्य-कारणविशेषणानां प्रयोजनमाह- *न यथोक्तेति*॥ तदनेन प्रबन्धेन प्रतिज्ञाविषयस्य ब्रह्मस्वरूपस्य लक्षणद्वारेण संभावनोक्ता। तत्र प्रमाणं वक्तव्यम्। यथाहुर्नैयायिका:-''संभावित: प्रतिज्ञायां पक्ष: साध्येत हेतुना। न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हत:॥'' ''यथा च बन्ध्या जननी'' इत्यादिरिति। इत्थं नाम जन्मादिसंभावनाहेतु:, यदन्ये वैशेषिकादय इत एवानुमानादीश्वरविनिश्चयमिच्छन्तीति।

संभावनाहेतुतां द्रढयितुमाह- ***एतदेवेति***॥

चोदयति- ***नन्विहापीति***। एतावतैवाधिकरणार्थे समाप्ते वक्ष्यमाणाधिकरणार्थमनुवदन् सुहृद्भावेन परिहरति- ***न; वेदान्तेति***॥ वेदान्तवाक्यकुसुमग्रथनार्थतामेव दर्शयति- ***वेदान्तेति***॥ विचारस्या-ध्यवसानं सवासनाविद्याद्वयोच्छेद: ततो हि ब्रह्मावगतेर्निर्वृत्तिराविर्भाव:। तत् किं ब्रह्मणि शब्दादृते न मानान्तरमनुसरणीयम्? तथा च कुतो मननम्? कुतश्च तदनुभव: साक्षात्कार इति? अत आह- *सत्सु

तु **वेदान्तवाक्येष्विति** *। अनुमानं वेदान्ताविरोधि तदुपजीवि चेत्यपि द्रष्टव्यम्। शब्दाविरोधिन्या तदुपजीविन्या च युक्त्या विवेचनं मननम्। युक्तिश्चार्थापत्तिरनुमानं वा।।

स्यादेतत्–यथा धर्मे न पुरुषबुद्धिसाहाय्यम्, एवं ब्रह्मण्यपि कस्मान्न भवतीति? अत आह– *न **धर्मजिज्ञासायामिवेति** *।। **श्रुत्यादय इति** *।। श्रुतीतिहास-पुराण-स्मृतयः प्रमाणम्। अनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसाक्षात्कारः, तस्याविद्यानिवृत्तिद्वारेण ब्रह्मस्वरूपाविर्भावः प्रमाणफलम्। तच्च फलमिव फलमिति गमयितव्यम्। यद्यपि धर्मजिज्ञासायामपि सामग्र्यां प्रत्यक्षादीनां व्यापारः ; तथाऽपि साक्षान्नास्ति, ब्रह्मजिज्ञासायां तु साक्षादनुभवादीनां संभवः, अनुभवार्था च ब्रह्मजिज्ञासेत्याह– * **अनुभवावसानत्वात्** *।। अनुभवो ब्रह्मसाक्षात्कारः परमपुरुषार्थः; निर्मृष्टनिखिलदुःख-परमानन्दरूपत्वादिति। *ननु* भवतु ब्रह्मानुभवार्था जिज्ञासा, तदनुभव एव त्वशक्यः, ब्रह्मणस्तद्विष-यत्वायोग्यत्वादित्यत आह– ***भूतवस्तु-विषयत्वाच्च ब्रह्मविज्ञानस्य** *।।

व्यतिरेकसाक्षात्कारस्य विकल्परूपो विषय-विषयिभावः। *नत्वेवं धर्मज्ञानमनुभवासानम्; तदनुभवस्य स्वयमपुरुषार्थत्वात्, तदनुष्ठानसाध्यत्वात् पुरुषार्थस्य, अनुष्ठानस्य च विनाऽप्यनुभवं शाब्दज्ञानमात्रादेव सिद्धेरित्याह*कर्तव्ये हीत्यादिना*।। न चायं साक्षात्कारविषयतायोग्योऽपि; अवर्तमानत्वात्, अवर्तमानश्च; अनवस्थितत्वादित्याह- *पुरुषाधीनेति*।। पुरुषाधीनेति*।। पुरुषाधीनत्वमेव लौकिक-वैदिककार्याणामाह- *कर्तुमकर्तुमिति*। लौकिकं कार्यमनवस्थितमुदाहरति- *यथाऽश्वेनेति*।। लौकिकेनोदाहरणेन सह वैदिकमुदाहरणं समुच्चिनोति- ***तथाऽतिरात्र इति** *।। ''कर्तुमकर्तुमि'' त्यस्येदमुदाहरणमुक्तम्। कर्तुमन्यथा वा कर्तुमित्यस्योदाहरणमाह- ***उदित इति** *।। *स्यादेतत्*- पुरुषस्वातन्त्र्यात् कर्तव्ये विधि-प्रतिषेधानामानर्थक्यम्; अतदधीनत्वात् पुरुषप्रवृत्ति निवृत्त्योरिति, अत आह- ***विधि-प्रतिषेधाश्चात्रार्थवन्तः स्युः** *।। ''न गृह्णाती''ति प्रतिषेधः उदितानुदितहोमयोर्विधी। एवं नारास्थिस्पर्शननिषेधो ब्रह्मघ्नश्च तद्धारणविधिरित्येवंजातीयका विधि-प्रतिषेधा अर्थवन्तः। कुत इति? अत आह- *विकल्पोत्सर्गापवादाश्च*।। चो हेतौ। यस्माद् ग्रहणाग्रहणयोरुदितानुदित-होमयोश्च विरोधात् समुच्चयासंभवे तुल्यबलतया च बाध्य-बाधकभावाभावे सत्यगत्या विकल्पः। नारास्थिस्पर्शननिषेध-तद्धारणयोश्च विरुद्धयोरतुल्यबलतया न विकल्पः, किंतु सामान्यशास्त्रस्य स्पर्शननिषेधस्य धारणविधिविषयेण विशेषशास्त्रेण बाधः। एतदुक्तं भवति-विधि-प्रतिषेधैरेव स तादृशो विषयोऽनागतोत्पाद्यरूप उपनीतः, येन पुरुषस्य विधि-निषेधाधीनप्रवृत्ति-निवृत्त्योरपि स्वातन्त्र्यं भवतीति। भूते वस्तुनि तु नेयमस्ति विधेत्याह- ***न तु वस्त्वेवं नैवमिति** *।। तदनेन प्रकारविकल्पो निरस्तः। प्रकारिविकल्पं निषेधति- ***अस्ति नास्तीति** *।।

स्यादेतत्–भूतेऽपि वस्तुनि विकल्पो दृष्टः–यथा स्थाणुर्वा पुरुषो वेति, तत् कथं न वस्तु विकल्प्यत इति? अत आह- ***विकल्पनास्त्विति** *।। पुरुषबुद्धिः=अन्तःकरणम्, तदपेक्षा ***विकल्पनाः**=

संशय-विपर्यासाः। सवासनमनोमात्रयोनयो वा, यथा स्वप्ने, सवासनेन्द्रिय मनोयोनयो वा, यथा स्थाणुर्वा पुरुषो वेति स्थाणौ संशयः, पुरुष एवेति वा विपर्यासः ; अन्यशब्देन वस्तुतः स्थाणोरन्यस्य पुरुषस्याभिधानाद्, न तु पुरुषतत्त्वं वा स्थाणुतत्त्वं वापेक्षन्ते; समानधर्म-धर्मिदर्शनमात्राधीनजन्मत्वात्। तस्मादयथावस्तवो विकल्पना न वस्तु विकल्पयन्ति वाऽन्यथयन्ति वेत्यर्थः। तत्त्वज्ञानं तु न बुद्धितन्त्रम्, किंतु वस्तुतन्त्रम् ; अतस्ततो वस्तुविनिश्चयो युक्तः, न तु विकल्पंनाभ्य इत्याह- ***न वस्तुयाथात्म्येति***।।

एवमुक्तेन प्रकारेण भूतवस्तुविषयाणां ज्ञानानां प्रामाण्यस्य वस्तुतन्त्रतां प्रसाध्य, ब्रह्मज्ञानस्य वस्तुतन्त्रतामाह- ***तत्रैवं सतीति***।।

अत्र चोदयति- ***ननु भूतेति***।। यत् किल भूतार्थ वाक्यम्, तत् प्रमाणान्तरगोचरार्थतयाऽनुवादकं दृष्टम्-यथा नद्यास्तीरे फलानि सन्तीति; तथा च वेदान्ताः। तस्माद् भूतार्थतया प्रमाणान्तरदृष्टमेवार्थ-मनुवदेयुः। उक्तंच ब्रह्मणि जगज्जन्मादिहेतुकमनुमानं प्रमाणान्तरम्। एवं च मौलिकं तदेव परीक्षणीयम्, नतु वेदान्तवाक्यानि तदधीनसत्यत्वानि, इति कथं वेदान्तवाक्यग्रथनार्थता सूत्राणामित्यर्थः। परिहरति- *न ; **इन्द्रियविषयत्व इति***।। कस्मात् पुनर्नैन्द्रियविषयत्वं प्रतीच इति? अत आह- ***स्वभावत इति***।। अत एव श्रुतिः-''पराञ्चि खानि व्यतृणत् स्वयंभूस्तस्मात् पराङ् पश्यति नान्तरात्मन्'' इति। ***सति हीन्द्रियेति***।। प्रत्यगात्मनस्त्वविषयत्वमुपपादितम्। यथा च सामान्यतो दृष्टमप्यनुमानं ब्रह्मणि न प्रवर्तते, तथोपरिष्टान्निपुणतरमुपपादयिष्यामः। उपपादितं चैतदस्माभिर्विस्तरेण न्यायकणिकायाम्। न च भूतार्थतामात्रेणानुवादतेत्युपरिष्टादुपपादयिष्यामः। तस्मात् सर्वमवदातम्। श्रुतिः-''यतो वा'' इति जन्म दर्शयति। ''येन जातानि जीवन्ति'' इति जीवनं स्थितिम्, ''यत्प्रयन्ति'' इति तत्रैव लयम्। ***तस्य च निर्णयवाक्यम्*** अत्र च प्रधानादिसंशये निर्णयवाक्यम्-''आनन्दाद्ध्येव'' इति। *एतदुक्तं भवति*-यथा रज्ज्वज्ञानसहितरज्जूपादाना धारा रज्ज्वां सत्यामस्ति, रज्ज्वामेव च लीयते, एवमविद्यासहितब्रह्मोपादानं जगद् ब्रह्मण्येवास्ति, तत्रैव च लीयत इति सिद्धम्।।२।।

इति भामत्यां जन्माद्यधिकरणं समाप्तम्।

ऋजुप्रकाशिका

ब्रह्ममीमांसारम्भमुपपाद्येति।। ब्रह्ममीमांसारब्धव्यत्वमुपपाद्येत्यर्थः। *ननु*– ''अथाऽतो ब्रह्मजिज्ञासा'' इति सूत्रेण प्रथमेन ब्रह्मजिज्ञासाया एवोपपादनात् कथं तेन ब्रह्ममीमांसारब्धव्यत्वमुपपादितमिति चेत्, *उच्यते*; ''ब्रह्मजिज्ञासे'' त्यत्र 'साकाङ्क्षं वाक्यं पदं वाऽनर्थकमि'ति न्यायेनाऽऽकाङ्क्षोपशामकं पदं किञ्चिदध्याहर्तव्यम्। तत्राप्ययोग्यस्य पदस्याध्याहारानर्हत्वाद् योग्यकर्तव्येतिपदमध्याहर्तव्यम्। तत्र ब्रह्मजिज्ञासायाः कर्तुमशक्यत्वेन जिज्ञासापदेन ब्रह्मज्ञानसाधनीभूतब्रह्ममीमांसाविचारो लक्ष्यते, इति प्रथमसूत्रेण ब्रह्ममीमांसारब्धव्यत्वमुपपादितमिति द्रष्टव्यम्। *जन्माद्यस्य यतः*।। स्वयं ''जन्माद्यस्य यतः'' इति सूत्रस्य सामान्यतोऽवतारिकामुक्त्वा विशिष्य तस्य सूत्रस्य भाष्यकारोऽवतारिकामाहेत्याह– *एतस्य सूत्रस्येति*।। ''जन्माद्यस्य यतः'' इति सूत्रस्येत्यर्थः। अवतारिका=पातनिकाशब्दार्थः। *ननु*– ''ब्रह्म जिज्ञासितव्यमित्युक्तम्, किं लक्षणं पुनस्तद्ब्रह्मे'' त्यादिना ब्रह्मस्वरूपं ज्ञानमेवाक्षिप्य ''जन्माद्यस्य यतः'' इत्यादिना तदेव समाधीयते। तत्किमर्थम् ? प्रधानभूतब्रह्मस्वरूपज्ञानप्रतिज्ञया तदङ्गानां प्रमाणादीनामपि प्रतिज्ञातत्वादङ्गभूतप्रमाणान्येव प्रथममाक्षिप्य समाधीयन्तामित्याशङ्क्य निराकरोति– *यद्यपीत्यादिना समर्थ्यत इत्यन्तेन*।। यत् प्रधानं तदेव प्रथममाक्षिप्य समाधेयम् , नोपसर्जनम् ; प्रथमातिक्रमे कारणाभावादिति भावः। ''किंलक्षणं पुनस्तद् ब्रह्मे'' त्यत्र किंशब्द आक्षेपार्थः। आक्षेपाभिप्रायमेव दर्शयति– *तत्र यद्यावदनुभूयत इत्यादिना*।। यद् यल्लक्षयति तदेव तल्लक्षणं वाच्यम् ; तत्र किमनुभूयमानं जगद् ब्रह्म लक्षयति? किं वा नित्यत्व-शुद्धत्वबुद्धत्वादिधर्म? किं वा ''तत्त्वमसि'' इत्यादिशब्दः? तत्राद्यं निरस्यति– *यद्यावदनुभूयते तत्सर्वमित्यादिना लक्षयतीत्यन्तेन*।। द्वितीयं निरस्यति– *न च तद्धर्मेणेत्यादिना*।। ''नित्यत्वादिने'' त्यत्र शुद्धत्व-बुद्ध-त्वादिरादिशब्दार्थः। तस्य नित्यत्वादेरनुपलब्धत्वेऽपि लक्षणत्वम्। भवत्वित्यत आह– *प्रसिद्धं हीति*।। तृतीयं निरस्यति– *एवं च न शब्दोऽप्यत्र प्रक्रमत इति*।। *अत्र=ब्रह्मणि *अवाक्यार्थत्वादिति*।। तथा च न ब्रह्म बोध्यते, न लक्ष्यत इति भावः। आक्षेपाभिप्रायमुपसंहरति– *तस्मादिति*।। ''जन्माद्यस्य यतः'' इत्यादिना परिहार उक्तः, तत्र परिहाराभिप्रायं विशदयति– *मा भूदित्यादिना*।। धर्मतया न लक्षणं जगत् ; तस्य वस्तुतोऽब्रह्मधर्मत्वात्, नापि तादात्म्येन लक्षणं जगत्; जडस्य जगतोऽजडब्रह्मतादात्म्यायोगादित्यर्थः। ब्रह्म तच्छब्दार्थः। तथा च ''तदुत्पत्त्या त्वि'' त्यनेन जगदुत्पादकत्वं जगत्कारणत्वं ब्रह्मणो लक्षणमुक्तं भविष्यतीत्यर्थः। तत्र दृष्टान्तमाह– *देशान्तरेति*।। दृष्टान्तेऽपि तथैव लक्षणं योजनीयम्। ''जन्माद्यस्य यतः'' इति सूत्रे जन्मादीतिपदस्य व्युत्पत्तिः–जन्म=उत्पत्तिः, आदिरस्येति। जन्मेत्यस्य व्याख्या=उत्पत्तिरिति। 'उत्पत्तिरादिरस्ये'ति व्युत्पत्त्यन्तर्गतस्य 'अस्ये' त्यस्य स्थिति भङ्गद्वयमर्थः। भाष्ये–''तद्गुणसंविज्ञानो बहुव्रीहिः'' इत्युक्त्या जन्मनोऽपि संग्रह उक्तः ; अन्यथा स्थिति-भङ्गयोरेव संग्रहणमिति स्यात्।

ननु–सूत्रकृता 'जन्म-स्थिति-भङ्गा 'अस्य यतः' इति वक्तव्ये एकवचनपूर्वक ''जन्मादी''ति नपुंसकप्रयोगः किमर्थं कृत इति? अत आह–*लाघवायेति*।। *तदुपपादनाय=लाघवोपपादनाय। शङ्कते–*स्यादेतदिति*।। प्रधानं च कालश्च ग्रहाश्च लोकपालाश्च क्रिया च यदृच्छा च स्वभावश्चाभावश्च, ते तथोक्ताः ; तेषु जगत्कारणत्वेन शङ्क्यमानेषु=उपप्लवमानेषु सत्स्वित्यर्थः। निरुपाख्यं शून्यमभावशब्दार्थः। तेषां वक्ष्यमाणविधया जगज्जन्मादिकारणत्वासंभवात् सर्वज्ञं सर्वशक्तिसमन्वितं ब्रह्मैव जगज्जन्मादिकारणं वाच्यमित्यभिप्रेत्याह–*अत आहेति*।। ''नाम-रूपाभ्यां व्याकृतस्ये''ति जगाद्विशेषणबलादचेतनप्रधान-काल-क्रिया-निरुपाख्यकारणकत्वं जडव्यावर्तितमित्याह–*अत्र नाम-रूपाभ्यामिति*।। प्रधानादीत्यत्र काल-क्रिये आदिशब्दार्थः। *व्यासेधतीति*।। निषेधतीत्यर्थः। कथं व्यासेधतीति? अत आह–*यत्तु खल्विति*।। प्रधानादीनां चाचेतनत्वाद् व्यासेध इति भावः। यन्नाम-रूपाभ्यां व्याकृतम्, तत् चेतनकर्तृकमित्यत्र दृष्टान्तमाह–*यथा घटादीति*।। अस्तु घटादेर्नाम-रूपाभ्यां व्याकृतस्य चेतनकर्तृकत्वम् , जगतश्चेतनकर्तृकत्वे किमायातमिति? अत आह–*विवादाध्यासितमिति*।। तथा चेत्थमनुमानम्–विवादाध्यासितं जगत्, नाम-रूपाभ्यां व्याकृतम्, दृश्यत्वात् ; घटवदिति। तस्माद् जगतश्चेतनकर्तृकत्वमित्याह–*तस्मादिति*।।

तदेव निदर्शनपूर्वकं द्रढयति–*चेतनो हीति*।। नाम रूप बुद्धावालिख्येत्यन्वयः। कम्बुग्रीवादिना रूपेण चेत्यन्वयः। तत्रोपष्टम्भकमाह–*अत एवेति*। यत एव नाम-रूपे बुद्धावालिख्य चेतनो नाम-रूपाभ्यां व्याकरोति घटादीति; अत एवेत्यर्थः। एवं च सृष्टेः पूर्वं कारणात्मना स्थितं सदेव जगन्नामरूपाभ्यां करोति। नाम-रूपे मायावृत्त्याख्यबुद्धावालिख्य ब्रह्मेति सत्कार्यवादः। अनिर्वचनीयं प्रकृते सच्छब्देनोच्यते, न तु सत्यम् ; जगतो मिथ्यात्वेन सत्यत्वायोगात्। न च-असदेव व्याक्रियत इति-वाच्यम्; असतो बुद्धावालेखनायोगात्। नह्यसद् नरशृङ्गादि बुद्धावालिख्य व्याक्रियते ; बुद्धिसत्त्वेऽसत्त्वायोगाच्च। तत्र वृद्धसंमतिमाह–*यथाहुरिति*।। फलितमाह–*तथा चेति*।। तथा च जगतो नाचेतनप्रधानादिकर्तृकत्वमिति द्रष्टव्यम्। *ननु*–माऽस्तु तर्ह्यचेतनानां प्रधानादीनां जगत्कारणत्वम्, चेतनानां ग्रहलोकपालानां जगत्कारणत्वमस्तु, किं ब्रह्मणा ? इति शङ्कते–*स्यादेतदिति*। *उक्तस्वभावेनेति*।। सर्वज्ञत्व-सर्वशक्तिमत्त्वेनेत्यर्थः। ''**अनेककर्तृ-भोक्तृसंयुक्तस्ये**''ति जगद्विशेषणादीदृशजगन्निर्मातृत्वं न ग्रह-लोकपालानामित्याह-*अत आहेति*।। अनेककर्तृ-भोक्तृसंयुक्तत्वं जगत उपपादयति–*केचिदित्यादिना*।। सृज्यमानजगन्मध्य इति शेषः। तदुदाहरति–*यथेति*।। सूदर्त्विगादयः कर्तार एव परम्, न भोक्तार इत्याह–*भोक्तार इति*।। केचिद् भोक्तार एव, न कर्तार इत्याह–*केचिदिति*।। *यथेति*।। *वैश्वानरेष्ट्यादिष्विति*।। चतुर्थे चिन्तितम्–*''फलसंयोगस्त्वचोदितेन स्यादशेषभूतत्वात्*।। ''वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इत्युपक्रम्य ''यस्मिन् जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद

इन्द्रियावी पशुमान् भवति'' इति श्रूयते। तत्र संशयः-पूतत्वादि पितुः फलम्? उत पुत्रस्येति? तत्र फलस्य कर्तृगामित्वनियमाद् अन्यथा प्रेरणानुपपत्तेः पितुरेव तत्फलम्, इति प्राप्ते राद्धान्तः–'यस्मिन् जाते निर्वपति स पूतः' इति पूतत्वफलस्य जातगामित्वेनाम्नानात् फलभोक्तृत्वेनाचोदिते पितरि फलसंयोगो न स्यात् ; वचनस्य तं प्रत्यशेषभूतत्वात्। यत्तु फलभागिनो न प्रेरणेति, तन्न; पूतत्वादिगुणकपुत्रवत्तयैव प्रीत्युत्पत्तेः प्रेरणाकल्पनात्। अतः पुत्रगामिफलमिति।। अत्र ''अनेककर्तृ-भोक्तृसंयुक्तस्ये'' ति जगद्विशेषणाद् जगन्मध्यपतितजीवानां सृज्यकोटिनिविष्टत्वेन ग्रह-लोकपालानां जगत्कर्तृत्वायोग्यतोक्ता। ''मनसाऽप्यचिन्त्यरचनारूपस्ये'' त्यनेन जगतस्तान् प्रति कार्यत्वायोग्यतोक्ता। अत एव यदृच्छा-स्वभावयोरपि नैतादृशजगत्कारणत्वयोग्यतेति द्रष्टव्यम्। ''व्याकृतस्ये'' त्यनेन पूर्वमनभिव्यक्तस्य कारणात्मना स्थितस्य जगतोऽभिव्यक्त्यभिधानात् परमाणवः पूर्वमसद् द्व्यणुकादिकमारभन्त इति मतं निरस्तम्। *उभयग्रहणमिति* कर्तृ-भोक्तृग्रहणमित्यर्थः। केचित् कर्तारो भोक्तारश्चेत्युभयविधा भवन्ति, तदर्थं वोभयग्रहणम्।

इतरेतरद्वन्द्व इति।। देशश्च, कालश्च, निमित्तं च, क्रिया च, फलं च देश-काल निमित्त क्रिया-फलानीतीतरेतरद्वन्द्वः। तानि च तानि प्रतिनियतानि चेति विग्रह इत्यर्थः ; तेषामाश्रयस्येति योजना। तथा च केचित् प्रतिनियतदेशोत्पादाः ; केचित् प्रतिनियतकालोत्पादाः ; केचित् प्रतिनियतनिमित्ताः ; केचित् प्रतिनियतक्रियाः ; केचित् प्रतिनियतफला इत्यायातम्। तादृग्रूपाश्रयस्य जगतो न यादृच्छिकत्वम् , न वा स्वाभाविकत्वम् , न वा चेतनकर्तृकत्वम्, न वाऽसर्वज्ञाऽसर्वशक्तिकर्तृकत्वं संभवतीत्युक्तं भवति, तदेतत् सनिदर्शनमाह– *केचित् खल्वित्यादिना किमङ्ग पुनः कर्तुमित्यर्थ इत्यन्तेन*।। *ननु*–''यतो वे'' त्यादिश्रुतौ ''तद् ब्रह्मे'' ति वाक्यस्य विद्यमानत्वात् कथं भाष्यकृता 'तद् ब्रह्मे 'ति वाक्यशेषपूरणं कृतमिति? अत आह– *सूत्रवाक्यमिति*।। सूत्रे तत्पूरणम्, न श्रुतावित्यर्थः। *ननु*–''जन्माद्यस्य यतः'' इति सूत्रस्थेनादिग्रहणेन वृद्धिपरिणामापक्षयानामपि ग्रहणे वक्तव्ये तेन जन्म-स्थिति-भङ्गमात्रग्रहणं कथं कृतम्? इति शङ्कते– *स्यादेतदिति*।। वृद्धि-परिणामापक्षयानां जन्म-स्थिति-भङ्गेष्वेवान्तर्भावान्न तेषां पृथक्त्वेन ग्रहणमित्याह– *अत आहेति*।। प्रथमतो वृद्धेरुत्पत्तौ जन्मापरनाम्न्यामन्तर्भावं दर्शयति– *वृद्धिस्तावदित्यादिना*। ''अल्पावयवादि'' त्येतस्य स्वरूपकथनम्– *द्वितन्तुकादेरिति*।। इदमवयविन इत्यस्य विशेषणम्। *महान=अभिवृद्धः*। एवं वृद्धेरुत्पत्तावन्तर्भावमभिधाय परिणामस्य त्रैविध्यं दर्शयन्नेव तस्योत्पत्तावन्तर्भावं दर्शयति– *परिणामोऽपीति*।। धर्मपरिणामलक्षणः, लक्षणपरिणामलक्षणः ; अवस्थापरिणामलक्षणः। त्रिविधोऽपि परिणाम उत्पत्तिरेवेत्यर्थः। तदेतत् क्रमेण दर्शयति– *धर्मिणो हीति*।। *तस्य=कटक-मुकुटादेः*। *एवं कटकादेरपीति*।। *प्रत्युत्पन्नत्वम्=वर्तमानत्वम्। आदिपदाद् भविष्यत्वम्। एवंरूपः कटकादेर्यो लक्षणपरिणामः,

सोऽप्युत्पत्तिरित्यर्थः। *नवत्व-पुराणत्वादिरिति*।। कटक-मुकुटादेरिति शेषः। अस्यावस्थापरिणामस्योत्पत्तावन्तर्भावो दर्शितः। अथवा-स्थितौ वाऽस्यान्तर्भावो द्रष्टव्यः। अपक्षयस्य भङ्गापरपर्याये नाशेऽन्तर्भावं दर्शयति- *अपक्षयस्त्विति*।। उपसंहरति- *तस्मादिति*।। वृद्ध्यादीनां जन्मादिष्वन्तर्भावमङ्गीकृत्योक्तम्, सम्प्रति तदनङ्गीकारेऽपि जन्मादिसूत्रे जन्म-स्थिति-भङ्गमेवोपादातव्यम्, न वृद्ध्यादीत्याह- *अथैते इत्यादिना- उपादातव्यमित्यन्तेन*।। तदुपादाने किं भवतीति? अत आह- *तथा सति हीति*।। जन्मादिसूत्र आदिग्रहणेन जन्म-स्थितिभङ्गोपादाने सति हीत्यर्थः। *तत्प्रतिपादके=जन्म-स्थिति-भङ्गप्रतिपादके। जन्मादिसूत्रे जन्म-स्थिति-भङ्गमात्रानुपादाने जायते, अस्ति, वर्धते, इत्यादीनां भावविकारणामप्युपादानशङ्का स्यादित्याह- *अन्यथा त्विति*।। अन्यथेत्यस्य विवरणम्- *जायतेऽस्ति वर्धत इत्यादीनां ग्रहण इति*।। *तत्प्रतिपादकमिति*।। जायते, अस्ति, वर्धते, इत्यादिभावविकारप्रतिपादकमित्यर्थः। अस्तु, ततः किमिति? अत आह- *तच्चेति* नैरुक्तं वाक्यं चेत्यर्थः। कुतो न मूलकारणप्रतिपादनपरमिति? अत आह- *महाभूतसर्गादिति*।। नैरुक्तं वाक्यं तद्वाक्यशब्दार्थः। वृद्ध्यादिरादिशब्दार्थः। *उपपत्तेरिति*।। तथा च जगज्जन्म-स्थिति-भङ्ग-मूलकारणपरं तन्नैरुक्तवाक्यमित्यर्थः। तथा च वृद्ध्यादिभावविकारग्रहणे मूलकारणब्रह्मलक्षणं न स्यादिति शङ्का स्यादिति भावः। एतच्छङ्कानिराकरणार्थमेव-''यतो वा इमानि भूतानि जायन्ते'' इति वेदान्तवाक्योदित-जन्मस्थिति-भङ्गग्रहणमावश्यकमित्याहेत्याह- *इतिशङ्कानिराकरणार्थमित्यादिना*।। *भाष्ये-''मूलकारणादि''- त्यनन्तरं ब्रह्मण इति शेषः। *भाष्ये*-तन्मा शङ्कीतीति। गृह्यन्त इत्यन्वयः। *ते=उत्पत्ति-स्थिति-प्रलया इत्यर्थः। *ननु*-जगत उत्पत्ति-स्थिति-लयानां त्रयाणां ग्रहणं किमर्थम्? जगतो मूलकारणाद् ब्रह्मणः सकाशादुत्पत्तिमात्रं गृह्यताम् ; तावतैव ब्रह्मणो जगत्कारणत्वसिद्धेः, स्थिति-भङ्ग तु नान्तरीयकतया सिध्यत्वित्याशङ्कते- *नन्वेवमपीति।। भाष्ये*-''ब्रह्मणः'' इत्यनन्तरं ब्रह्मण इत्यस्य षष्ठ्यन्तत्वभ्रमं वारयन्नपेक्षितं पूरयति- *कारणादितीति*।। ब्रह्मण इति पञ्चमी। तथा च ब्रह्मणः कारणादित्यर्थः। *त्रिभिः=उत्पत्तिः-स्थिति-प्रलयैः। *अस्य=ब्रह्मणः। *ननु*-उत्पत्तिमात्रेणैवोपादानत्वं सूच्यताम्, नेत्याह- *उत्पत्तिमात्रं त्विति*।। त्रिभिरुपादानत्वसूचने गमकमाह- *तदिदमिति।। तत्रैव=ब्रह्मण्येव। तथा चोत्पत्ति-स्थिति-लयाधारत्वमुपादानत्वम्, इत्युपादानत्वसूचनाय त्रितयग्रहणमिति भावः। अत एवोक्तं भाष्ये- *ते गृह्यन्त इति*।। कार्य-कारणविशेषणानामिति*।। ''नाम-रूपाभ्यां व्याकृतस्ये'' त्यादीनि कार्यस्य जगतो विशेषणानि, सर्वज्ञ-सर्वशक्तित्वादीनि कारणस्य ब्रह्मणो विशेषणानीति द्रष्टव्यम्। *भाष्ये*-''प्रधानादि''-त्येतत् कालस्याप्युपलक्षणम्। *भाष्ये-' 'अभावादि''ति*।। निरुपाख्याच्छून्यादित्यर्थः। *भाष्ये*-''स्वभावतः'' इत्येतत् यदृच्छात इत्यर्थकम्। तत्र हेतुमाह-भाष्ये- *विशिष्टेति*।। प्रतिनियतदेश-कालनिमित्त-क्रियोपादानादित्यर्थः। तादृगाश्रयस्य जगतः स्वभावतो यदृच्छातो वाऽसंभव इति भावः। *लक्षणद्वारेणेति*।। जगज्जन्म-स्थिति-

भङ्गकारणत्वरूपलक्षणद्वारेणेत्यर्थः। *तत्र=ब्रह्मणि। *प्रमाणं वक्तव्यमिति*।। लक्षण-प्रमाणाभ्यां वस्तुसिद्धेर्लक्षणेन संभावितस्य वस्तुनः प्रमाणेन सिद्धेरिति भावः। तत्र सम्मतिमाह- *यथाहुरिति*।। लक्षणेन संभावितं यत्साध्यम्- तद्वत्त्वेन प्रतिज्ञातः पक्षो हेतुना लिङ्गेन साध्येतेत्यर्थः। लक्षणं विना केवलं हेतुभिरेव वस्तुसिद्धिमाशङ्क्याह- *न तस्येति*।। *तस्य=लक्षणेन संभावनाविरहितस्य नाध्यारोपोऽपीत्यर्थः। तत्र दृष्टान्तमाह- *यथा च बन्ध्येति*।। तथा च जगज्जन्मादिकारणत्वं ब्रह्मलक्षणं ब्रह्मसंभावनाहेतुरिति निगमयति- *इत्थं नामेति*।। तथाचेत्थंलक्षणेन संभावितस्य ब्रह्मणो हेतुनाऽनुमानप्रमाणेन सिद्धिः, अनुमानं तु इत्थम्-पूर्वोक्तविशेषणविशिष्टं जगत् सकारणकम् , जन्म-स्थितिसंहारवत्त्वात् ; घटादिवदिति।।

साक्षादिति।। ब्रह्मणो नित्यापरोक्षत्वेन तद्गोचरान्तःकरणवृत्तेः प्रत्यक्षानुभवरूपत्वात् तस्य च जिज्ञासायामुपयोगादिति भावः। *ननु* अनुभवे सति जिज्ञासाया वैयर्थ्यमिति शङ्कायां तत्राहेत्याह- *अनुभवार्था चेति*।। निर्विचिकित्सानुभवार्थेत्यर्थः। विचारप्राक्कालीनानुभवस्य तु जिज्ञासोपयोग इति भावः। ब्रह्मज्ञानस्यानुभवावसानत्वे ब्रह्मजिज्ञासाया अप्यनुभवावसानत्वमायातमेवेति भावः। अनुभवस्वरूपमाह- *अनुभव इत्यादिना परमपुरुषार्थ इत्यन्तेन*।। तत्र हेतुमाह- *निर्मृष्टेति*।। जिज्ञासाया ब्रह्मानुभवार्थत्वमङ्गीकृत्य, अनुभवस्याशक्यत्वं शङ्कते- *नन्विति*।। अशक्यत्वे हेतुमाह- *ब्रह्मण इति*।। ब्रह्मणो विषयितया ज्ञानविषयत्वायोग्यत्वादित्यर्थः। तथा च ब्रह्म तत्साक्षात्कारयोर्विषय-विषयिभाव एव नास्तीति भावः। तद्विषयत्वायोग्यत्वमसिद्धमित्याह- *अत आहेति*।। *ननु* उक्तं विषयीभूतस्य ब्रह्मणस्तद्विषयत्वायोग्यत्वाद् विषय-विषयिभावो नास्तीति, तत्राह- *व्यतिरेकसाक्षात्कारस्येति*।। व्यतिरेकपदं प्रपञ्चाभावपरम्। तथा च प्रपञ्चाभावोपलक्षित-ब्रह्मसाक्षात्कारस्य प्रपञ्चाभावरूपब्रह्मसाक्षात्कारस्य वेत्यर्थः। तस्य ब्रह्मणा सह विषय-विषयिभावो *विकल्परूपः=कल्पित इत्यर्थः। वास्तवविषय-विषयिभावाभावेऽपि कल्पितो विषयविषयिभावोऽस्तीति भावः। तस्यानुभवावसानत्वमुक्त्वा धर्मज्ञानस्य तन्नेत्याह- *नत्विति*।। तत्र हेतुमाह- *तदनुभवस्येति*।। धर्मानुभवस्येत्यर्थः। कथमपुरुषार्थत्वमिति? अत आह- *तदनुष्ठानेति*।। धर्मानुष्ठानेत्यर्थः। *ननु* धर्मानुष्ठानमपि धर्मानुभवसाध्यम्, तथा चायातं परम्परया धर्मानुभवस्यापि पुरुषार्थत्वमित्याशङ्क्य, अनुष्ठानस्यानुभवं विना शाब्दज्ञानादप्युपपत्तेर्न परम्परयाऽपि तस्य पुरुषार्थत्वमित्याशयवानाहेत्याह- *अनुष्ठानस्येति*।। धर्मसाक्षात्कारलक्षणानुभवमङ्गीकृत्य, शाब्दज्ञानादेवानुष्ठाननिर्वाहादनुभवापुरुषार्थतोक्ता, संप्रति धर्मस्य साक्षात्कारविषयत्वयोग्यतैव नास्तीत्याहेत्याह- *नचायमित्यादिना*।। अयम्=धर्मः। कर्त्तव्यं कार्यशब्दार्थः।

*अतदधीनत्वात्=विधि-प्रतिषेधानधीनत्वात्। उदाहृतेषु विधि-प्रतिषेधान् दर्शयति- *गृह्णातीत्यादिना*।। स्वयं विधि-प्रतिषेधौ दर्शयति- *एवं नारास्थीति*।। ''नारं स्पृष्टाऽस्थि सस्नेहं सवासा जलमाविशेत्'' इति

नाशास्थिस्पर्शननिषेध:, ''शिर:कपाली ध्वजवान् भिक्षाशी कर्म वेदयन्। ब्रह्महाद्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्*।। इति ब्रह्महन्तुः शशशिरसो नारास्थनो ध्वजत्वेन धारणविधि: कुतो हेतोरिति शङ्कायाम्–''विल्पोत्सर्गापवादाश्चे''त्युक्तम्, तत्र हेतूपन्यासो न स्फुरतीति, अत आह– *चो हेताविति*।। हेतुमेवोपपादयति– *यस्मादिति*।।

अतुल्यबलतया न विकल्प इति*।। न विकल्पश्चेत्, किं तर्हि? इति पृच्छति– *किंत्विति*।। बाध्य बाधकभावविधयेत्युत्तरयति– *सामान्यशास्त्रस्येति*।। तथा च–''उत्सर्गः'' इत्यस्य बाधकैकापोद्य इत्यर्थ:। उक्तसामान्य-विशेषशास्त्रस्थले विशेषशास्त्रस्यैव बाधकत्वाद् विकल्पस्यापवाद इति भाव:। यत्तूक्तं–पुरुषप्रवृत्तिनिवृत्त्यो-र्विधि-प्रतिषेधाधीनत्वाद् विधिप्रतिषेधानर्थक्यम्' इति, तत्राह- *एतदुक्तं भवतीति*।। *येन विधिप्रतिषेधोपनीतेन विषयेणेत्यर्थ:। स्वातन्त्र्येण कर्तुं समर्थोपि पुरुषो हिताहितोऽपायत्वमजानन् हिताहितोपायत्वबोधकविधि-निषेधसापेक्ष इत्यर्थ:। तथा च विधि-निषेधसार्थक्यमिति भाव:। *भूते वस्तुनि=परिनिष्ठिते सिद्धे वस्तुनि। *नैवमस्तीति*।। कर्तव्ये वस्तुनि यादृश्युक्ता विधा, तादृग्विधा भूते वस्तुनि नास्तीत्याहेत्यर्थ:। *अनेनेति*।। यस्त्वैवं नैवमिति न विकल्प्यत इत्यनेनेत्यर्थ:। *अस्ति नास्तीति*।। अस्ति, नास्तीति वा न विकल्प्यत इत्यनुषङ्ग:।

''विकल्पनास्तु पुरुषबुद्ध्यपेक्षा:'' इति भाष्यं व्याचष्टे– *पुरुषबुद्धिरन्त: करणमित्यादिना–अभिधानादित्यन्तेन*।। संशय-विपर्यासलक्षणा विकल्पना अन्त:करणसापेक्षा द्विविधा:–सवासनमनोमात्रयोनय:, सवासनेन्द्रिय-मनोयोनयश्चेति। तदुभयप्रकारं सनिदर्शनं दर्शयति– *सवासनेत्यादिना*।। उभयत्र वाशब्दश्चार्थ:।''स्वप्ने'' इत्यनन्तरं संशयो विपर्यासश्चेति शेष:। ''स्थाणावित्यत: प्राग् जाग्रदवस्थायामिति शेष:। ''विपर्यास:'' इत्यत्र हेतु:– *अन्यशब्देनेति*।। पुरुषशब्देनेत्यर्थ:।''अपेक्षन्ते'' इत्यनन्तरं विकल्पना: संशय-विपर्यासा इत्यनुषङ्ग:। कुतो नापेक्षन्त इति? अत आह-- *समानेति*।। संशये समानधर्मदर्शनं साधारणधर्मदर्शनम्, विपर्यये तु सादृश्यदर्शनमिति बोध्यम्। उपसंहरति-- *तस्मादिति*।। *अयथावस्तव:*।। यथावस्तुत्वं वस्त्वनुसारित्वं यासां नास्ति ता:, अयथावस्तव: ; तादृग्भूता विकल्पना वस्तुतत्त्वानपेक्षा: पुरुषबुद्धिमात्रसापेक्षा: सिद्धं वस्तुतत्त्वं न विकल्पयन्ति, नवाऽन्यथयन्तीत्यर्थ: ; संशया वा विपर्यया वा न वस्तुतत्त्वगोचरा इति यावत्। तथा च न वस्तुतन्त्रा विकल्पा:, किंतु बुद्धितन्त्रा एव, तत्त्वज्ञानं तु तद्विपरीतमित्याहेत्याह-- *तत्त्वज्ञानं त्विति*।। *तत:=तत्त्वज्ञानाद्। *भूतवस्तुविषयाणाम्=सिद्धवस्तुविषयाणाम् ; अकर्तव्यविषयाणामित्यर्थ:।।

*भूतार्थं वाक्यम्=भूतार्थप्रतिपादकवाक्यम्। *प्रमाणान्तरगोचरार्थतया=प्रमाणान्तरसिद्धार्थ-गोचरतयाऽनु वादकं दृष्टमित्युक्तम् तदुदाहरति-- *यथेति*।। अस्तु, प्रकृते किमायातम्? तत्राह-- *तथाच

वेदान्ता इति*।। विमता वेदान्ताः, प्रमाणान्तरसिद्धार्थगोचरतयाऽनुवादका भवितुमर्हन्ति, भूतार्थप्रतिपादकवाक्यत्वात्, यदेवं तदेवम् ; यथा ''नद्यास्तीरे पञ्च भूतानि सन्ति'' इति वाक्यम्, तथा चैते, एवमुपनयान्तानवयवान् मन्यमानो निगमयति--*तस्माद् भूतार्थतयेति*।। ''अनुवदेयुरि''त्यनन्तरं वेदान्ता इति शेषः। *ननु* ब्रह्मणः प्रत्यक्षप्रमाणायोग्यत्वात् कथं ब्रह्मप्रतिपादकवेदान्तानां प्रमाणान्तरदृष्टार्थकताऽनुवादकतोच्यते? इत्याशङ्क्य, ब्रह्मणि प्रत्यक्षप्रमाणाभावेऽप्यनुमान-प्रमाणमुक्तमित्याह-*उक्तं चेति*।। *मौलिकं तदेवेति*। ब्रह्मप्रतिपादकं मौलिकप्रमाणमेव परीक्षणीयमित्यर्थः। *तदधीनेति*।। उक्तविधया प्रमाणन्तराधीनसत्यत्त्वानीत्यर्थः। *कथमिति*।। सूत्राणां वेदान्तवाक्यग्रथनार्थता पूर्वोक्ता कथंचिदिति शङ्कार्थ इत्यर्थः। वेदान्तानां मानान्तरसिद्धब्रह्मप्रतिपादकत्वेनानुवादकत्वमाशङ्कितम्, तदनुपपन्नम् ; ब्रह्मणो मानान्तरविषयत्वं प्रत्यक्षविषयत्वममनुमानविषयत्वं वा वाच्यम् ; न च तत् संभवति ; ब्रह्मण इन्द्रियादिविषयत्व इदं कार्यं गृह्यमाणं ब्रह्मणा सम्बद्धमिति गृह्येत। तस्मात् सम्बन्धाग्रहणाद् नेन्द्रियविषयः यद्यप्यनुमानेन गृह्यते ब्रह्मेति वक्तुं शक्यम् ; तथाऽप्यनुमानमपि ''यतो वे''त्यादिवेदान्तमुपजीव्यैव प्रवर्तते, न स्वतः अतः स्वतो नानुमानविषयोऽपि ब्रह्मेति गूढाभिसन्धिः परिहरतीत्याह--*परिहरतीति*।।

''न ; इन्द्रियादिविषयत्वे संबन्धाग्रहणादि''ति भाष्ये पाठः। क्वचित्-**''न. इन्द्रियविषयत्वे सम्बन्धाग्रहणादि''ति** पाठः। सम्यगभिसन्धिमजानानः शङ्कते--***कस्मात् पुनर्नेन्द्रियादिविषयत्वं प्रतीच इति*।। ''कस्मात् पुनर्नेन्द्रियविषयत्वं प्रतीचः इति क्वचिद् वाचस्पत्ये** पाठः। स सम्यक्। अभिसन्धिमुद्घाटयन्नाहेत्याह-*अत आहेति*।। भाष्ये ***''न ब्रह्मविषयाणी''ति**।। ब्रह्मणोऽविषयत्वेन विषयत्वाभावादिति भावः। ब्रह्माभिन्नस्य प्रतीचोऽविषयत्वे श्रुतिमप्याह--*अत एव श्रुतिरित्यादिना*।। पराञ्चि खानि=पराचीनानि यानि खानि=इन्द्रियाणि व्यतृणत्=हिंसितवान्, तस्मात् पराङ् पश्यति लोकः, नान्तरात्मानमित्यर्थः। *उपपादितमिति*।। **''अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेरि''त्यत्रेत्यर्थः।**

ननु अनुमानप्रमाणमुक्तं ब्रह्मणि, तत्राह-*यथा च सामान्यत इति*।। *उपरिष्टात्=तर्कपादे*। *उपपादितं चैतदिति*। विमतम्, धीमत्कर्तृकम्, कार्यत्वात्, कुम्भवत्, इत्यनुमानाद् नेश्वरसिद्धिः ; धीमतो जीवस्याप्यदृष्टद्वारा जगत्कर्तृत्वेन जीवकर्तृकत्वे सिद्धसाधनात्। न च-उपकरणाभिज्ञकर्तृकत्वं साध्यम् ; जीवस्यातथात्वाद् न सिद्धसाधनमिति-वाच्यम् ; किं कतिपयोपकरणाद्यभिज्ञकर्तृकत्वम्? सर्वज्ञकर्तृकत्वं वा? नाद्यः ; पूर्वोक्तविधया जीवकर्तृकत्वेनैव सिद्धसाधनात्, अनेनानुमानेन सिध्यतो जगत्कर्तृः सर्वज्ञत्वासिद्धिप्रसङ्गाच्च। न द्वितीयः ; दृष्टान्ते साध्यवैकल्यात्, कुम्भकर्तुरसर्वज्ञत्वात्। न च-कुम्भकारोऽपि कुम्भोपकरणादि सर्वाणि जानात्येवेति--वाच्यमः ; कुम्भकारेण--'अयं कुम्भोऽनेन क्रेतव्यः' इत्यज्ञानात्। किं च जगत्कर्तुर्मनःसंयोगाधीनाया धियोऽयोगेन धीमत्कर्तृकत्वसाधने बाधः। न च--अमनस्कस्यापि जगत्कर्तुरीश्वरत्वादेव धीसंभव इति--वाच्यम् ; तर्हीश्वरत्वादेव धियं विनैव

जगन्निर्माणसंभवाद् धीमत्कर्तृकत्वस्यैव विलोपेन 'वृद्धिमिच्छतो मूलस्यैव छेद:' इति न्यायापात इति न्यायकणिकायामुपपादितमित्यर्थ:। *ननु ब्रह्मणि वेदान्तव्यतिरिक्तप्रमाणान्तराप्रवृत्तावपि ब्रह्मणो भूतार्थतया तत्प्रतिपादकत्वेन वेदान्तानामनुवादकतैवेत्य आह- *न च भूतार्थतेति*।। *उपरिष्टात्=समवायसूत्रे। जन्मादिसूत्रे ''यतो वे'' त्यादिवाक्यलक्ष्यं विषय इति भाष्य उक्तम्, तदर्थे श्रुति-सूत्रयोरैकार्थ्यं दर्शयति- *श्रुतिर्यतो वेतीति*।। अत्र जगज्जन्म-स्थिति-लयकारणत्वं ब्रह्मण: तटस्थं लक्षणमिति जन्मादिसूत्रेणोक्तम्, स्वरूपलक्षणपरत्वं चास्य सूत्रास्यास्तीति दर्शयितुम्-''तस्य वे''ति भाष्यं प्रवृत्तम्, तद् व्याचष्टे- *अत्र चेति*।। प्रधानादीनां जगत्कारणत्वसंशये तद्व्युदासपूर्वकं निर्णयवाक्यमित्यर्थ:। --नाम-रूपाभ्यां व्याकृतस्ये'' त्यादिजगद्विशेषणै: पूर्वे निर्णयेऽपि श्रुतितइह निर्णीयते। कारणं ब्रह्मानूद्य वाक्येनानन्दत्वविधानात् स्वरूपलक्षणसिद्धि:। आनन्द: सत्यादेरप्युपलक्षणार्थम् ; सत्यानन्दादेरपि ब्रह्मस्वरूपत्वात्। *ननु आनन्दादेर्ब्रह्मस्वरूपलक्षणत्वमुक्तम् , तत्र वक्तव्यम्-किमानन्दादिर्ब्रह्मणो भिन्न:? अभिन्नो वा? नाद्य:; आनन्दादेर्ब्रह्मणो भेदे ब्रह्मस्वरूपलक्षणत्वायोगात् , द्वितीये ब्रह्माभिन्नानन्दादिस्वरूपस्याखण्डस्य स्वरूपलक्षणवाक्याद् वाक्यार्थतया प्रमितिर्वक्तव्या। न च तत् संभवति ; गुणभूतपदार्थविशिष्टस्य प्रधानपदार्थस्य वा गुण-प्रधानपदार्थसंसर्गस्य वा प्रधानपदार्थद्वयसंसर्गस्य वा वाक्यार्थत्वादिति-चेत्, *उच्यते*; यत्र वाक्यार्थप्रमिते: पूर्वमनेकपदार्थप्रमिति:, तत्रान्यतरपदार्थविशिष्टत्वेनान्यतरपदार्थ:, अन्यतरपदार्थसंसर्गो वा वाक्यार्थत्वेन प्रतिपाद्योऽस्तु, यत्र तु वाक्यार्थप्रमिते: पूर्वमनेकपदार्थाप्रमिति:, तत्रान्यतरेणान्यतरो विशिष्टतया वा संसर्गितया वा न प्रमितियोग्य: ; विशिष्टप्रमितौ विशेषणप्रमिते: संसर्गप्रमितौ संसर्गिप्रमितेश्च त्वन्मते कारणत्वात्, किन्तु तत्र वाक्येनाखण्ड एव प्रमेय:। वाक्यादखण्डप्रमितौ च तत्रैव वाक्यस्य परिसमाप्तेर्न विशिष्टपरत्वम् , न संसर्गपरत्वं वा। न च-सत्यानन्दादिवाक्यस्थले सत्यत्वानन्दत्वादिविशिष्टानेकपदार्थप्रमितेर्विशिष्ट: संसर्गो वा तत्रापि वाक्यार्थ:, नाखण्ड इति-वाच्यम् ; सत्यत्वानन्दत्वादिविशिष्टस्य सत्यानन्दाद्यखण्डस्वरूपत्वेऽखण्डस्य वाक्यार्थत्वक्षति:, तदतिरिक्तत्वे तस्य मिथ्यात्वेन तद्गोचरप्रमित्ययोगाद् ''विशिष्टानेकपदार्थप्रमिति:'' इत्युक्तेरसङ्गति:। एवं चास्मिन् ज्योतिर्मण्डले ''कश्चनन्द्र:'' इति चन्द्रप्रातिपदिकाखण्डार्थमात्रप्रश्ने 'प्रकृष्टप्रकाशश्चन्द्र:' इत्युत्तरवाक्यं यथा प्रकर्षप्रकाशद्वाराऽखण्डचन्द्रमात्रार्थं प्रतिपादयति, एवं सत्यानन्दादिवाक्यमप्यखण्डमानन्दादिस्वरूपमर्थं प्रतिपादयतीत्यखण्ड एव वाक्यार्थ:। एतच्च **मत्कृतरत्नकोशप्रकाशिकायां** सम्यक् प्रपञ्चितं तत्रानुसन्धेयम्। *इति सिद्धमिति*।। एवं च यद् जगज्जन्म- स्थिति-लयकारणम् तदानन्दस्वरूपं ब्रह्मेति स्वरूपलक्षणपरतयाऽपि जन्मादिसूत्रं योजिवमिति द्रष्टव्यम्।

इति ॠजुप्रकाशिकायां जन्माद्यधिकरणं समाप्तम्।।

पञ्चपादिकाविवरणम्

जगज्जन्म-स्थिति-ध्वंसा यतः सिध्यन्ति कारणात्।

तत् स्वरूप-तटस्थाभ्यां लक्षणाभ्यां प्रदर्श्यते।।

वृत्तसङ्कीर्तनभाष्यस्यान्तर्णीतं विचारार्थोपादानेनार्थं कथयति- *ब्रह्म जिज्ञासितव्यमित्युक्त-मित्यादिना*।।

ननु ब्रह्मविचारप्रतिज्ञायां साधनादिविचाराणामप्रतिज्ञातत्वादसाध्यतेति, अत आह- *यदैवेदमित्युक्तमित्यादिना*।। *ननु* पञ्चानां विचाराणां प्रतिज्ञातत्वे किमिति स्वरूपमेव प्रथमं विचारः फलभूततया प्राधान्यादिति चेत्, न; साधनाद्यधीनत्वान्साध्यसिद्धेस्तेषामेव प्रथमं विचारः। क्रियतामिति, अत आह- *तत्र स्वरूपस्याभ्यर्हितत्वादिति*।। ब्रह्मप्रमाणं ब्रह्मयुक्तिर्ब्रह्मसाधनं ब्रह्मफलमिति विशिष्टविचाराणां ब्रह्म-विशेषणसापेक्षत्वाद् ब्रह्मस्वरूपनिर्णयस्य चानन्यापेक्षत्वात्, प्राधान्येन साध्यत्वाच्चेत्यर्थः।।

वृत्तं सङ्कीर्त्योत्तरेणाकाङ्क्षापुरःसरं सम्बन्धमाह- *किंलक्षणं तदिति*।। जिज्ञास्यपुरुषार्थब्रह्मस्वरूपप्रदर्शननिमित्तमाचार्यं पूजयति- *भगवानिति*।। *ननु* अस्येदं लक्षणमिदं वाऽनेन लक्ष्यमिति लक्ष्य-लक्षणयोरव्याप्त्यतिव्याप्तिपरिहारेणाविनाभावः प्रमाण-युक्तिव्यतिरेकेण न सिध्यति? तत्कथं स्वरूपलक्षणपरमेव सूत्रमिति? तत्राह- *युक्तिरपि लक्षणनिर्णयेऽर्थादिति*।। अपिशब्दात् प्रमाणमपीत्यर्थः। अत्र तु सूत्रितयोर्ब्रह्मणि प्रमाण-युक्त्योरध्यायद्वयेन निर्णयः क्रियत। *जन्मोत्पत्तिरित्यारभ्य तृतीयलिङ्गेत्यतः प्राक्तनः स्पष्टार्थः*।। *तद्गुणसंविज्ञान इति*।। विशेष्यैकदेशमेव विशेषणं कृत्वा समास इत्यर्थः। *ननु* एवमपि जन्म स्थितिभङ्गास्त्रयोऽपि विशेष्याः, तत्कथमेकत्वनिर्देश इति? अत आह-- *तृतीयलिङ्गेति*।। ज्न्मादीनामादिमध्यावसानमाक्षिपति- *ननु आदिरिति*।।

परिहरति- *जन्मनश्चादित्वमिति*।। भाष्यं व्याचष्टे- *यदनने सूत्रेणेति*।। *ननु* सर्वं जनित्वैव नश्यति, न किञ्चित्कालं तिष्ठति; स्वसत्ताप्रयुक्तत्वाद्विनाशस्येत्यत आह- *क्षणिकत्वनिराकरणादिति*।। *अतो जनित्वेत्यादिः स्पष्टार्थ*। *ननु* इदंशब्दः किञ्चिदेव सन्निहितं गमयति नाखिलं जगदित्यत आह- *तथाहि सर्वत्रेति*।। जन्मादीनां जगतश्च कः सम्बन्धः षष्ठ्या विवक्षित इति १ तदाह- *सर्व एवेति*।। *ननु* जगज्जन्मस्थिति-भङ्गं किंसम्बन्धितया लक्षणं भवति १ न तावत् काकवल्लक्ष्यसम्बन्धितया; जगदाश्रयत्वाद्धर्माणामिति, कारणसम्बन्धितयेत्याह- *यत इति कारणनिर्देश इति*।।

ननु जगजन्मादिकारणत्वमपि लक्षणान्तर्गतम्? आहोस्विल्लक्ष्यस्वरूपान्तर्गतम्? इति वक्तव्यम्। *ननु*। गृहस्य काकाधिकरणत्वं नाम धर्मः कस्मिन्नन्तर्भवति? लक्ष्य इति चेत् , काकाधिकरणत्वं च

गृहशब्दार्थः स्यात्। ततश्च काकविगमे गृहैकदेशभङ्गबुद्धिः स्यात्। लक्षणान्तर्गतमिति चेत् , कारणत्वमपि तथा। नहि नानाविधकार्यक्रियावेशात्मकत्वं तत्प्रसवशक्त्यात्मकत्वं वा जिज्ञास्यविशुद्धब्रह्मान्तर्गतं भवितुमर्हति। तस्माद् जगज्जन्मादिकारणत्वमेवोपलक्षणमिति।। *ननु* निमित्तकारणत्वमुपादानकारणत्वमुभयं वोपलक्षणत्वेनोच्यते? न तावन्निमित्तकारणत्वमेव ब्रह्मोपलक्षणम् ; जगदभिन्नस्योपादानकारणस्य भेदेनावस्थानाद् ब्रह्मशब्दस्य स्वार्थान्वयाभावप्रसङ्गात्। नाप्युपादानकारणत्वमुपलक्षणम् ; निमित्तकारणस्य सर्वज्ञस्य भेदेनावस्थानाद् --यतः सर्वज्ञात् सर्वशक्तेरि''ति व्यपदेशो न स्यात् ; उपादानकारणस्य लोकेऽचेतनत्वात्। ''सत्यं ज्ञानमनन्तमि''ति च स्वरूपलक्षणस्योभयत्रायोगात्। नाप्युभयकारणत्वं ब्रह्मोपलक्षणम् ; एकस्योभयकारणत्वे प्रमाणाभावात्। प्रमाणान्तरसिद्धं हि लक्षणमनधिगतलक्ष्यस्वरूपाधिगमायालम्। न तावदेकस्य जगन्निमित्तोपादानत्वमनुमानेनावगन्तुं शक्यम् ; दृष्टान्ते भेददर्शनात्। महाभूतपञ्चकव्यतिरिक्तेषु पदार्थेषु नानाविधनिमित्तोपादानदर्शनान्न तदनुवादेन ब्रह्म विधातुं शक्यम्। भूतपञ्चकनिमित्तोपादानत्वमेकस्याप्रसिद्धमिति, तत्राह- *प्रकृतित्वनिबन्धा पञ्चमीति*।। निमित्तत्वस्याप्युपलक्षणमेतत् ; उभयत्र पञ्चमीविधानात्। भूतपञ्चकस्य तावदेका प्रकृतिरनुमीयते ; सद्वस्त्वेकस्वभावानुगमात्।।

तथाहि--महाभूतानि, सद्वस्तुप्रकृतिकनि, सत्स्वभावानुरक्तत्वे सति, विविधविकारत्वात्; मृदनुस्यूतघटादिवत्। द्रव्यत्वाद्यभेदा अपि प्रकृतिस्वभावा एव सामान्यवदवभासन्ते, सद्वस्तु पुनः सर्वानुगमात्सर्वविकारप्रकृतिः। भौतिकानां च भूतोपादानत्वं दृश्यमानं मूलप्रकृत्यधीनतामेव सर्वस्य गमयति। अतः सर्वकार्योपादानमेकमेव लाघवात्, इति न्यायानुगृहीतानुमानेन सिद्धम्। तस्यैव च निमित्तकारणत्वमनुमानेन कल्प्यते। तथा चेदं जगत्, अभिन्ननिमित्तोपादानं भवितुमर्हति, प्रेक्षापूर्वजनितकार्यत्वात्; आत्मगतसुख-दुःख-राग-द्वेषादिवत्। न च घटादिष्वनैकान्तिकता; तत्राप्यभिन्ननिमित्तोपादानत्वकल्पनात्। अदृष्टादिनिमित्तभेदो दृश्यत इति चेत्, न; उपादानाधिष्ठात्रोरेवैकत्वानुमानात्। तस्मादनुमानेनैव प्रसिद्धमेकस्योभयकारणत्वं लक्षणत्वेन निर्दिश्यते। सृष्टिवाक्यप्रसिद्धं चैकस्योभयकारणत्वं लक्षणत्वेन निर्दिश्यते।।

'तत्र केचित्परिणामवादमवतारयन्ति। तैस्तत्र प्रमाणं वक्तव्यम्। सृष्टिश्रुतय इति चेत् , न ; तत्र परिणामशब्दाश्रवणात्। सत्यतोऽन्यथाभावः परिणामो ब्रह्मणोऽपि सत्यतः प्रपञ्चापत्तिं प्रतिपादयतीति चेत्, न ; तासु सत्यशब्दाश्रवणात्। स्वतःप्रामाण्यात् तथाभूतैव सृष्टिरिति चेत्? किमिदं तथाभूतत्वं नाम? सत्यत्वमिति चेत्, न ; 'मिथ्येदं रजतमि'ति विशिष्टेऽर्थे प्रमाणगम्ये स्वप्नसृष्टावपि सत्यबुद्ध्यभावात्। स्वोपाधौ स्वविषयाभावविरोधितेति चेत् , न ; मायात्मकत्वेऽपि समानम्। सृष्टेश्च स्वोपाधावभावव्यावृत्तत्वात् सर्वे च सोपाधिकधर्माः स्वाश्रयोपाधावबाध्यतया सत्या भवन्ति, सृष्टिरपि स्वरूपेण न बाध्यते, किन्तु परमार्थसत्यत्वांशेन।।

ननु मिथ्यासृष्टिविषयत्वे वाक्यस्याप्रामाण्यं स्यात्, *न तत्*; प्रमाणव्यापारानभिज्ञो देवानां प्रियः। प्रमाणं हि प्रमेयाभावं न सहते, नाप्रमेयाभावम्। न च सृष्टिश्रुतिः परमार्थसत्यतां प्रमिमीते; तदभिधानाभावात्। यथा 'घटः' इत्युक्ते भावाभावयोः साधारणोऽवभासते, अन्यतराभिधानाभावात्, तद्वत्। न हि स्वप्नविषया सृष्टिश्रुतिस्तत्सत्यतां प्रतिपादयति। प्रयोजनशून्यतया तात्पर्यहीनत्वाच्च न ब्रह्मणः प्रपञ्चापत्तिं प्रतिपादयति ; अनर्थहेतुत्वाच्च दुःख-तत्साधनपरिणामस्य। न च कर्मकाण्डस्य प्रत्यक्षादेर्वा सिद्धिः प्रयोजनम् ; जगन्नित्यतयाप्युपपत्तेः, सृष्टिश्रुत्यवगमात्प्रागेव सिद्धत्वाच्च। अभेदस्यापि सत्त्वादिरूपेण सिद्धतवान्न शब्दापेक्षेति चेत्, केयमतिव्याकुलता सर्वसंकरवादिनः। न हि नित्य-शुद्ध-बुद्ध-मुक्त-निरतिशायानन्द-प्रकाशमान-सर्वज्ञाऽद्वितीय-प्रत्यगात्मभूतं ब्रह्मावगमात् प्रागेव सिध्यति। किं तर्हि? सृष्टिश्रुतेः प्रयोजनम्। प्रत्यक्षादि सिद्धप्रपञ्चस्य ब्रह्मण्येवोत्पत्ति- विनाशवत्तयाऽन्यत्राभावमुपवर्ण्य, तत्रापि प्रतिषिध्य, मिथ्यात्वापादनेन प्रमाणान्तराविरुद्धतया- ऽद्वितीयब्रह्मस्वरूपसिद्धिः प्रयोजनम् ; तेनैकवाक्यत्वात् , अन्यथा शेषिविरोधात्। सृष्ट्याभासत्वाद् रजताभासवत् तज्ज्ञानस्याप्रामाण्यमिति चेत् , न ; सत्यरजतवन्मुख्यसृष्ट्यन्तराभावात् , तस्या एव मुख्यसृष्टित्वात् तज्ज्ञानवत् प्रामाण्यात्। "देवदत्तो व्याघ्रोऽभवत्" "माया ह्येषा मया सृष्टे"त्यादौ मिथ्याकार्येऽपि तद्भाव-सृष्टिशब्दयोः श्रवणात्।।

कुतः पुनः सत्य-मिथ्यासाधारण्यां सृष्टौ मिथ्यात्वे पक्षपातः? "नासदासीन्नो सदाऽऽसीत्तम आसीत्" "आसीदिदं तमोभूतम्" "मायां तु प्रकृतिमि"त्यादौ सदसद्विलक्षणानिर्वचनीयप्रकृतित्वश्रवणात् तदात्मकत्वाच्च विकारस्य "तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः। अविद्या पञ्चपर्वैषा प्रादुर्भूतता महात्मनः"।। इति स्मृतेः, तमोऽविद्या मायानां पर्यायत्वात्। तदेवं श्रुत्यवगतायां मिथ्यासृष्टौ सत्यत्वकल्पनायां श्रुतिबाधप्रसङ्गात्। तथा च 'अस्ति घटः' इत्यस्त्यर्थोपाधौ प्रतिपन्नस्य घटस्य तदुपाधावेव नास्तीति प्रत्यक्षेणैव बाधो दृश्यते, देशकालयोर्देशकालान्तराभावात्तयोर्द्वयोर्निरुपाधिकनिषेधात्, अस्त्यर्थस्यानुयायिनो निषेधाभावात्। अतो देश-काल-तदुपाधिघटानामस्त्यर्थे ब्रह्मस्वरूपे प्रतिपन्नोपाधौ प्रत्यक्षेणैव बाधान्मिथ्यैवेति सिद्धम्। अन्याभावविशिष्टवस्त्वन्तरज्ञानस्य प्रत्यक्षत्वात्।।

अनुमानमपि-सर्वे विकाराः, स्वानुस्यूत एकस्मिन् वस्तुनि परिकल्पिताः, प्रत्येकमेकस्वभावानुविद्धत्वे सति विभक्तत्वात् ; चन्द्रभेदवत्। जडत्वात्, कार्यत्वात् , भेदत्वात् ; रजतवत् , चन्द्रभेदवच्च। प्रतिपन्नोपाधावस्थूलादिवाक्यैः प्रतिषिध्यमानत्वात् ; देहात्मभाववत्। विरोधिकारणस्वभावानुपमर्देन विरोधिकार्यापत्तिलक्षणत्वात् ; मायाव्याघ्रवत्। प्रलयावस्थायां सह कालेन स्वोपाधौ शून्यत्वात्; देहात्मभाववत्।।

'अर्थापत्तिरपि-प्रपञ्चजन्म-विनाशावनुपपन्नौ तस्य मिथ्यात्वमन्तरेण; अमिथ्याभूतयोर्ब्रह्म-शून्ययोरजन्म-विनाशित्वात्। न च ब्रह्मज्ञानस्यापि प्रपञ्चज्ञानवन्मिथ्यात्वानुमानम् "तत्सत्यं स आत्मे" ति वचनविरोधात्। न चास्थूलादिवाक्यैः स्थूलादिभ्योऽन्यत्वमात्रमुच्यते; कार्य-कारणतादात्म्ये

सत्येवंप्रतिषेधानुपपत्तेः। यथा शुक्लायां गव्यन्यत्वविवक्षयाप्यशुक्ला गौरिति प्रतिषेधो न दृश्यते; तथा च प्रतिषेधे शुक्लतास्वरूपमात्रनिषेधदर्शनात्। तर्काप्रतिष्ठानान्न मिथ्यात्वानुमानमिति चेत्, न ; विचारशास्त्रानारम्भप्रसङ्गात्। शब्दमूलत्वाद् ब्रह्मणि न विरोधबुद्धिरिति चेत् , तर्हि-''असद्वा इदमग्र आसीत्'' ''सदेव सौम्येदमग्र आसीदि''त्यादिश्रुतिद्वयसामर्थ्यात् कारणस्य सदसत्त्वे स्याताम्। श्रुत्यर्थस्य तर्कागोचरत्वात् सर्वशक्तित्वाद् ब्रह्मणः सर्वमुपपन्नमिति चेत् , न ; ब्रह्मणि विरोधपरिहाराय विचारानारम्भप्रसङ्गात्। अत एवासत्यतापि ब्रह्मणः कदाचित् किं न स्यात्। तस्मात्प्रत्यक्षानुमानार्थापत्तिभिः प्रपञ्चमिथ्यात्वावगमात् प्रशान्तत्वाच्च ब्रह्मणो निष्प्रयोजना न सृष्टिश्रुतिर्विवर्त एवेति। न च सद्बुध्यनुगमविरोधः ; अधिष्ठानत्वात्तस्य। घटादिविशेषाणामेव मिथ्यात्वादिति सिद्धम्।।

लक्षणमनूद्य लक्ष्यस्वरूपं कथयितुमुत्तरं भाष्यमित्याह- *अस्य जगत इति*।। *ननु* न तावदिदं विशेषलक्षणम् ; प्रपञ्चजन्मादिकारणत्वस्य प्रपञ्चोपाधित्वात्, निरुपाधिकब्रह्मस्वरूपलक्षणकथनमन्तरेण सोपाधिकधर्मप्रतिपत्त्ययोगात् , नाप्युपलक्षणमेतत्; लक्ष्यस्य ब्रह्मशब्दार्थत्वायोगादवच्छेदादिति, तत्राह- *द्विविधं हि लक्षणमित्यादि*।। उपलक्षणत्वेऽपि नाद्वितीयस्वरूपलक्षणविरोधः ; यद्रजतमित्यभात् सा शुक्तिरितिवद् मिथ्याभूतेनापि प्रपञ्चकारणत्वेनोपलक्षणयोगात्। असाधारणसंबन्धो हि लक्षणनिमित्तम्-न लक्षणसत्यत्वम् ; काकादीनामसंबद्धानां गृहोपलक्षणत्वदर्शनादिति। *कार्यप्रपञ्चं केचिदिति*।।

अयमर्थः-नाम-रूप-कर्मात्मकमिति वेदान्तिनः। द्रव्य-गुण-कर्म-सामान्यात्मकमिति वार्तिककारीयाः। कार्य-कारण-योग-विधि-दुःखान्ताः पञ्चेति शैवाः। द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाः षडिति वैशेषिकाः। जीवाजीवास्रव संवर निर्जर बन्ध मोक्षाः सप्तेति क्षपणकाः। द्रव्य-गुण-कर्म-सामान्य विशेष-शक्ति पारतन्त्र्यनियोगा इत्यष्टौ प्राभाकराः। प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभासच्छल-जाति-निग्रहस्थानानि षोडशेति नैयायिकाः। ज्ञानेन्द्रिय-कर्मेन्द्रिय-भूत-तन्मात्र-महाभूत-मनोऽहङ्कारमहदव्यक्त-पुरुषा इति सांख्या इति। कस्तर्हि सिद्धान्तः? तदाह- * तद्व्युदासायेत्यादि *।। यद्यपि रूप्यत इति रूपेणेत्थंभूते जगद् व्याक्रियते। कथं नाम्ना रूपितमुत्पाद्यत इति? तत्राह- * *व्याक्रियमाणं हि वस्त्विति*।। *अयमर्थः*-लोके घटं चिकीर्षुः कुलालः प्रथमं घटशब्दविकल्पितं पृथु-बुध्नोदराकाररूपविकल्पितं च स्वबुद्धावाविर्भावयति, पश्चाद् यथाविर्भूतं घटशब्दालम्बनयोग्यं पृथु-बुध्नोदराकाररूपितं च घटं निर्वर्तयति। एवमेव मूलकारणमपि नाम-रूपाभ्यां स्वबुद्धाववविर्भूतमेव सर्वं पश्चाद्व्यनक्ति, इति नाम-रूपाभ्यामित्थंभूतं व्याकृतमित्युच्यते। ''अनेक-कर्तृ-भोक्तृसंयुक्तस्ये''त्यारभ्य नन्येऽपि परिणामादयो भावविकारा इत्यतः प्राक्तनः स्पष्टार्थः। *ननु* किमत्रोपलक्षितस्य ब्रह्मणः स्वरूपलक्षणमुच्यते। न च

स्वरूपलक्षणमन्तरेण कस्यचिद्वस्तुनः प्रतिपत्तिरस्ति। न च यत्र शाखाग्रं स चन्द्र इत्येतावता प्रकृष्टप्रकाशात्मप्रतिपत्तिमन्तरेण चन्द्रावगतिरस्ति। न तावत्सर्वशक्तित्वं ब्रह्मासाधरणलक्षणम् ; प्रधानादीनामप्यविशेषात् सर्वज्ञत्वमिति चेत्, न ; तस्य सर्वोपाधिकधर्मत्वान्निरुपाधिक-ब्रह्मस्वरूपाप्रतिपत्तिः॥

कथं चेदं सर्वज्ञत्वमिति वक्तव्यम्–न तावत्प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावप्रमाणैः सर्वं वेत्ति ; तेषामयुगपत्प्रवृत्तेः सर्वस्य च प्रत्यक्षाताहानात् , सत्स्वपि तेष्वस्माकं सर्वज्ञताऽभावात् इन्द्रियाणां च देश-कालवस्तुविप्रकृष्टार्थग्राहित्वाभावात्, संयुक्तसमवायात् संयुक्तसंयोगात् संयुक्तविशेषणतया वा सर्वार्थप्रत्यक्षत्वेऽस्माकमपि प्रसङ्गात्। मानसमपि ज्ञानमात्मनोऽन्यत्रेन्द्रियादिसापेक्षम्, इति सर्वं न मानसप्रत्ययगम्यम्। न च धर्मातिशयवशादपीन्द्रियैरयोग्यं वस्तु गृह्यते; मार्जारादिदृष्टीनामपि योग्यरूपादिष्वेवातिशयवत्त्वदर्शनात्। न च कृत्स्नपरिभावनासंस्काराजन्यं मानसं सर्वज्ञज्ञानं कृत्स्नार्थं ग्राहयति, प्रथमं कृत्स्नार्थग्रहणाभावे तत्र परिभावनाऽयोगात् तज्जन्यकृत्स्नग्राहिज्ञानायोगात्। परिभावनायाः प्रागपि कृत्स्नार्थग्रहणेऽस्माकमपि प्रसङ्गात्। अतीतानागत–वर्तमानार्थानामियत्तानवधारणाच्च सर्वग्रहणानुपपत्तिः। एतावदिदम्, नातः परमस्त्यज्ञातमित्यनवधारणात्। न च स्वरूपज्ञानेनैव सर्वज्ञता ; तस्य प्रदीपप्रभावदतीतानागतार्थग्राहित्वाभावात्। तस्मान्नास्ति सर्वज्ञ इति॥

उच्यते–सर्वस्य कर्तृत्वादेव वर्तमानस्वकार्यसर्वविषयज्ञता तावत् सिद्धा। एवं तत्तत्कालेऽतीतसर्वविषयावगमादनुभूतविषयाऽसंप्रमोषा स्मृतिः स्वमायापरिणामोपाधिरनावरणा सर्वविषया कल्प्यते। तथा सृष्टेः प्रागपि सृज्यमानपदार्थावधारणस्य कुलालादिषु दृष्टत्वाद् आगामिसर्वविषयज्ञानं स्वमायापरिणामोपाधि कल्प्यत इति युक्ता सर्वज्ञता। "यः सर्वज्ञः सर्वविदि"ति च जगत्कारणे सर्वज्ञपदप्रयोगात्सर्वज्ञानं प्रमीयत इति श्रुति–युक्तिभ्यां युक्ता सर्वज्ञता। *ननु* सोपधिकधर्मत्वान्न स्वरूपलक्षणमित्युक्तम्, *न*; अनेन सर्वज्ञशब्देन सर्वावभासक्षमं विज्ञप्तिमात्रमादित्यादिप्रकाशवद्-विषयोपाधिकं विज्ञानमेव ब्रह्मस्वरूपलक्षणं विवक्ष्यत इत्यविरोधः। *ननु* अन्येऽपीत्यादिः स्पष्टार्थः*॥

ननु निरुक्तवाक्यमेव मूलीकृत्य सूत्रेऽपि षड् भावविकारा गृह्यन्तामिति चोदयति– *ननु* षड् भावविकारा इति। *यास्कपरिपठितानामित्यादेः परिहारस्यायमर्थः–*आर्षेयस्य वाक्यस्य मूलप्रमाणं प्रत्यक्षम्, आगमो वा भवति ; अनुमानादेरस्माकमपि प्रवृत्तेर्वाक्यानपेक्षणात्। तत्र प्रत्यक्षमूलत्वे यास्कवाक्यस्य भौतिकधर्मा एव भावविकाराः प्रत्यक्षेणावगन्तुं शक्यन्ते , न महाभूतविषयाः। तत्र भौतिकविकारकारणे ब्रह्मणि गृह्यमाणे भूतपञ्चकमेव ब्रह्म गृहीतं स्यात् , श्रुतौ तु मूलप्रमाणानपेक्षत्वाद् यत्किञ्चिद्द्रवनधर्मवत् तस्य मूलकारणं ब्रह्म ग्रहीतुं शक्यत इति। किं च श्रुत्यर्थपरत्वात् सूत्राणां श्रुतिरेव जन्मादिसूत्रमूलमित्याह– *तदर्थनिर्णयार्थत्वादिति*॥

ननु भूत-भौतिकमूलकारणं न ब्रह्मेति प्रतिपत्तुं युक्तम् ; मायाया अपि मूलकारणत्वात्, ''मायां तु प्रकृतिमि''ति श्रुतेः। प्रक्रियतेऽनयेति प्रकृतिरिति करणमात्रं मायेति चेत् , न ; प्रकृतिशब्दस्योपादाने रूढत्वाद् व्युत्पादनायोगात्। ''आत्मन आकाशः'' इति प्रकृत्यन्तरश्रवणाद् व्युत्पाद्यत इति चेत् न ; तुल्यश्रुतित्वान्मायाप्रकृतित्वविरोधात् , निमित्तेऽपि पञ्चमीप्रयोगात्, दृश्यमानजाड्यानुसारेण च मायोपादानत्वनियमोपपत्तेः। ''इन्द्रोमायाभिरि''ति तृतीयैव श्रूयत इति चेत् , *सत्यम्* आत्मनो बहुत्वापत्तौ करणता भवति ; प्रपञ्चोपादानत्वे का हानिः , निरपेक्षप्रकृतिद्वयानुपपत्तिरिति चेत्, तर्हि परस्परविशिष्टतया द्विसूत्ररज्जुवत्प्रकृतिता स्यात्। अतो जगत्कारणे ब्रह्मणि मायाया अपि ब्रह्मत्वं लक्षितं स्यात्। *मायेति प्रजाऽभिधीयते। सा च ब्रह्मचैतन्यमेवेत्यविरोध इति चेत् , *न* ; अन्वय-व्यतिरेकविरोधात्। परिदृश्यमानहस्त्यश्व-रथादौ प्रतिपन्नोपाधौ बाधिते च वृद्धव्यवहारेऽन्वय-व्यतिरेकाभ्यां मायाशब्दः प्रयुज्यमानो दृश्यते। लोकसंवेदनविरोधाच्च। नहि प्रज्ञातिशयवन्तं मायाविनं वदन्ति। गर्हन्ति च विदुषि मायाशब्दप्रयोगम्। बुद्धिविषयत्वान्मायाशब्दस्य न ब्रह्मचैतन्यप्रज्ञाया प्रसङ्गः। स्वप्नादिविविधमायाकारप्रतिभासनाद्वा बुद्धेः कार्यवादिनो मायाशब्दस्योपचारात्करणे प्रयोग इत्यनवद्यम्। अपि च *''भूयश्चान्ते विश्वमायानिवृत्तिः*''मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते''''दैवी ह्येषा गुणमयी मम माया दुरत्यया'' माययाऽपहृतज्ञाना आसुरं भावमाश्रिताः।'' इति निवर्त्य तर्तव्यत्व-गुणमयत्वज्ञानावरणत्वलिङ्गाच्च न ब्रह्मचैतन्यं माया। बुद्धिरेव मायेति चेत् , न ; प्रकृतिशब्दविरोधात्। मन्त्रौषधादि मायेति चेत् , न ; दृश्यमानगन्धर्वनगरादौ मायाशब्दप्रयोगात्, मन्त्रौषधादौ तदप्रयोगात्। तथाऽपि जडात्मिका मायाशक्तिः पारमार्थिकीति चेत् , न ; ''नासदासीन्नो सदासीत्तम आसीदि''ति जगत्प्रागवस्थायाः सदसद्विलक्षणानिर्वचनीयत्वश्रवणात्। लोके च हस्त्यश्वरथादिषु व्यभिचारिषु मिथ्यावस्तुमात्रेऽनुयायिनि मायाशब्दप्रयोगात्।

''तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः।।'' इति मायाऽविद्ययोः सामानाधिकरण्याच्च। तस्मादनिर्वचनीयमायाविशिष्टं कारणं ब्रह्मेति प्राप्तम्, तत्राह– *अतो यदवष्टम्भो विश्वो विवर्तत इति*।। त्रैविध्यमत्र सम्भवति-रज्ज्वाः संयुक्तसूत्रद्वयवन्मायाविशिष्टं ब्रह्म कारणमिति वा , ''देवात्मशक्तिं स्वगुणैर्निगूढामि''ति श्रुतेर्मायाशक्तिमत्कारणमिति वा, जगदुपादानमायाश्रयतया ब्रह्म कारणमिति वेति। तत्र **विशिष्टपक्षे तथैव ब्रह्मत्वेनोपलक्षितस्य ज्ञानानन्दादिस्वरूपलक्षणेन मायानिष्कर्षाल्लक्षणद्वयेन विशुद्धब्रह्मसिद्धिः। उत्तरपक्षयोस्तु मायाया ब्रह्मपरतन्त्रत्वात्तत्कार्यमपि ब्रह्मपरतन्त्रं भवति ; यथांऽशुतन्त्रतन्त्वारब्धोऽपि पटोंऽशुतन्त्रः प्रतीयते। ततश्चोत्पद्यमानकार्यस्य यद् आश्रयोपाधि ज्ञानानन्दलक्षणं च , तद् ब्रह्मेति शुद्धब्रह्मलाभ इति, तदाह यदवष्टम्भ इति।**

केचित्तु—ब्रह्मैव जगदाकारेण परिणमते मृदिव घटाकारेणेति—वदन्ति, तद् व्यावर्तयति- *विश्वो विवर्तत इति*।। **एकस्य तत्त्वादप्रच्युतस्य पूर्वविपरीतासत्यानेकरूपावभासो विवर्तः। एकस्य पूर्वरूपपरित्यागेन सत्यरूपान्तरापत्तिः परिणामः**, तत्र ब्रह्म न विवर्तते, किंतु परिणमत एवेति तैस्तत्र प्रमाणं वक्तव्यम्। सृष्टिश्रुतेः परिणमत इति चेत्, सा खलु सृष्टिश्रुतिः ज्ञानानन्द-सत्य-निरवयवापरिच्छिन्न-ब्रह्मस्वरूपस्य पूर्वसिद्धस्य परित्यागेन जड-दुःख-मिथ्या-सावयवपरिच्छिन्नकार्यापत्तिं ब्रह्मणो ब्रवीति? आहोस्वित्पूर्वसिद्धरूपापरित्यागेनैव तद्विपरीतकार्यरूपापत्तिं ब्रह्मणो ब्रवीति? इति वक्तव्यम्। तत्र पूर्वपरित्यागे ब्रह्मस्वरूपोच्छेदात्कार्यमात्रमेव स्यात्। पुनः प्रलयावस्थायां ज्ञानानन्दादिरूपेण परिणमत इति चेत्, अनिर्मोक्षप्रसङ्गात्। "अज आत्मा महान् ध्रुवः" "न जायते चे" त्यादिश्रुतिविरोधश्च स्यात्। अथ पूर्वविपरीतब्रह्मस्वरूपापरित्यागेनैव कार्यरूपापत्तिं ब्रूयात् सृष्टिश्रुतिः, एवं तर्हि विवर्तं प्रतिपादयति ; शुक्तिकारजत-मायाव्याघ्रादिषु विवर्तस्य तल्लक्षणत्वात्। अथ सृष्टिश्रुतिः सृष्टिमात्रविषया, न पूर्वस्वरूपपरित्यागापरित्यागयोर्व्याप्रियत इति चेत्, तथाऽपि व्यवस्थित-ब्रह्मवाक्यैरेकवाक्यत्वात् ततत्स्वरूपापरित्यागेनैव कार्यरूपापत्तिं ब्रह्मणो ब्रुवाणा विवर्तमेव दर्शयतीत्यनवद्यम्।। योऽपि कश्चिदाह निरवयवमपि परिणमत इति। तथाहि—हेमद्रव्ये रुचकाकारेण परिणममाने तदवयवा अपि परिणमेरन् ? न वा ? इति वक्तव्यम्। यदि परिणमेरन्, तर्हि तदवयवा अपि तथा, इति निरवयवपर्यन्तः परिणामः स्यात्। अथ न परिणमेरन्, तर्ह्यवयवी न परिणमेत ; आश्रयविकारमन्तरेणाश्रितविकारायोगात्। तस्माद् यथा संयोगोऽवयव्येकदेशसमवेतः परम्परया निरवयवपरमाणुसंयोगपुरःसरः, तथा निरवयवपरिणामपुरःसरोऽवयविपरिणाम इति।।

स वक्तव्यः—कश्चायं परिणाम इति? यदि तावत् स्वावयवानां पूर्वसंयोगात् संयोगान्तरापत्त्या वाऽवयवान्तरसंयोगेन वा संमूर्छितावयवत्वं परिणामः, न तर्हि निरवयवे परिणामः ; स्वावयवाभावान्निरवयवस्य। न चावयवानां संयोगान्तरेण संमूर्छितत्वमन्तरेणावयविनः परिणामोऽवस्थान्तरं वाऽन्यथाभावो वा निरूपयितुं शक्यते। न च वस्तुनो वस्त्वन्तरसंयोगो वा परिस्पन्दो वा गुणान्तरोदयो वा परिणामः ; ब्रह्मणि तेषामभावात्। आकाशे च वस्त्वन्तरसंयोगिनि परिस्पन्दमाने च भ्रमरे लौहित्योदये च घटे द्रव्ये परिणामबुद्ध्यभावात्। अथ तदनुषक्तद्रव्यान्तरोत्पत्तिः परिणाम इति, तत्र किं हेमावयवानां रुचकरूपेणैव परिणामः? किं वा द्रव्यान्तररूपेण? न तावद् द्रव्यान्तररूपेण; तत्र रुचकद्रव्यातिरिक्तकार्यद्रव्यादर्शनात्, नापि रुचकाकारेणैव; तस्यावयविपरिणामत्वात्, अवयवानां च रुचकानुगमस्य रुचकानुगतावयव्यनुगमेनैवान्यथासिद्धत्वात्। न च रुचकावस्थाव्यतिरेकेण हेमावयवानामवस्थान्तराणि दृश्यन्ते येन परिणामभेदः स्यात्। न च संयोगभेद एवावयवपरिणाम इत्युक्तम्। न चावयवि द्रव्यं विना हेमावयवा रुचकाकारेण परिणमन्त इति युक्तम्; आरम्भवादप्रसङ्गात्।

अथादृश्यमानोऽप्यवयवपरिणामोऽवयविपरिणामानुपपत्त्या कल्प्यते ; आश्रयविकारमन्तरेणाश्रितविकारानुपपत्तेः, *नैतत्सारम्*; अवयविजन्म-विनाशयोरवयवानामपि तत्तन्त्राणां जन्म-विनाशप्रसङ्गात्, अवयविगमनेऽवयवानां गमनवत्। परिणामोऽपि भविष्यतीति चेत्, न; अवयविनि घटत्वजातिसमवायिन्यवयवानां घटत्वजातिसमवायाभावात्। *ननु* अवयवानामन्यथाभावमन्तरेण कथमवयविनोऽन्यथाभावः? न हि द्रव्यस्यावस्थान्तरद्रव्यान्तरापत्तिवद् नैल्यं गुणान्तरमापद्यतेऽवस्थान्तरं वा। न चावयविकार्यव्यतिरेकैणावयवानां कार्यं दृश्यत इत्युक्तम्। न हि पटे कार्यान्तरावभासेऽपि तन्तवोऽतन्त्वात्मनाऽवभासन्ते। पटकार्ये तन्त्वनुगमः स्वानुगतानुगमादन्यथासिद्ध इत्युक्तम्। किं च अवयविपरिणामोपाधावेवावयवपरिणामो दृष्टः, इति न निरुपाधिनिरवयवात्मपरिणामसिद्धिः॥ यत्तु निरवयवसंयोगवत्परिणाम इति, तत्रापि दृश्यमानोऽवयविसंयोगो न परमाणुसमवेतः; तद्गतरूपादिवदप्रत्यक्षत्वप्रसङ्गात्। नाप्यवयव्येकदेशसंयोगेन निरवयवे संयोगः कल्पयितुं शक्यते; अवयविन्येव जातिसमवायवदवयवसंयोगमन्तरेणावयविन्येव संयोगोपपत्तेः। अवयवानां संयोगानुगमस्यावयव्यनुगमेनान्यथासिद्धत्वात्। अवयवेष्वेव संयोगो नावयविनीति चेत्, न; अवयविभ्यामसंयुक्ताभ्यां कार्यान्तरानारम्भप्रसङ्गात्। तस्मादवयविन्येव संयोगो नावयवेषु। अवयविसमवाये संयोगस्य कृत्स्नवृत्तिता संयोगस्य प्राप्नोतीति चेत्, तर्हि निरवयवसंयोगेऽपि कृत्स्नवृत्तेः प्रचयाभावप्रसङ्ग इति। कथं पुनर्ब्रह्मणो निरवयवत्वलाभः? उच्यते; अवयवावयविनोः स्वयंप्रकाशत्वे सतीतरेतराविषयत्वान्न सावयवत्वं ब्रह्मणा स्वात्मन्यनुभवितुं शक्यम्। अन्यतरस्यास्वयंप्रकाशत्वेऽन्यतरेण वेद्यत्वाद् घटात्मनोरिव नांशाशिभावसिद्धिः। श्रुतिश्च "निष्कलं निष्क्रियं शान्तमि" ति क्रियावयवशून्यतामाह। नियन्तृत्वादिक्रियाऽपि श्रूयत इति चेत्, तर्हि परस्पर-विरोधे सति मायया तत्त्वातत्त्वव्यवस्था कल्पनीया॥ "मायाभिः पुरुरूप ईयते" इति प्रवृत्तेर्मायानिबन्धनत्व-श्रवणात् चेतनस्य सुषुप्ते पुरुषार्थत्वावगमाद् ब्रह्मणः स्वतः प्रवृत्तिप्रयोजनाभावाच्च विपरीतस्वरूपापरित्यागेन विपरीतकार्यापत्तेश्च विवर्त एवेति सिद्धम्॥

ननु जगदुत्पत्तिकारणत्वं न सिद्धवद् ब्रह्मलक्षणत्वेनोपादातुं शक्यम्, भूतपञ्चकस्य कार्यत्वासिद्धेः, भौतिकानां च भूतोपादानत्वादिति चोदयति- *ननु* श्रुतिनिर्दिष्टग्रहण इत्यादिना*॥ "उच्यते" इत्यादेः परिहारस्यायमर्थः। पृथिव्यप्तेजो-वायवो विवादपदानि, जन्मविनाशवन्तः पृथिव्यप्तेजो-वायु-बुद्धिगोचरत्वात्; एकदेशपृथिव्यप्तेजो-वायुवदिति। *ननु* प्रत्यनुमानमस्ति- पृथिव्यादयः, न जायन्ते, महाभूतत्वात्; आकाशवत्, आकाशश्च, न जायते, निरवयवद्रव्यत्वात्; आत्मवदिति विशेषतो दर्शनमेव बलीय इत्यनवद्यम्। "न यथोक्तविशेषणस्ये" त्यादिभाष्यतात्पर्यमाह- *युक्तिरपि ब्रह्मस्वरूपनिर्णयेत्यादिना*॥

अस्य जगत इत्यादि भाष्यं व्याचष्टे– *नान्यतः परपरिकल्पितात् प्रधानादेरिति *।। *अयमर्थः*–सर्व एव ह्याध्यत्मिका भावाः, सुख–दुःख–मोह–सामान्यप्रकृतिकाः, सुख–दुःख–मोहसामान्येन नियमेनान्वित–स्वभावत्वात् ; ये विकारा यदन्वितस्वभावास्ते तत्प्रकृतिका दृष्टाः, यथा मृदन्विताः शरावादयः। तथा सर्वे विकाराः, अविभक्तैकप्रकृतिकाः, परिमितानेकविकारत्वात् ; ये परिमितानेकविकाराः, तेऽविभक्तैकप्रकृतिकाः, यथा मृत्पिण्डप्रकृतिकाः शरावादयः, इति जगन्मूलकारणं प्रधानमनुमिमते सांख्याः। तथाऽणुवादिनश्चानुमिमते–सर्वं कार्यद्रव्यम् , स्वपरिमाणादणुतरपरिमाणसंयोग–सचिवसमानजातीयानेकद्रव्यारब्धम् , कार्यद्रव्यत्वात् ; यत्कार्यद्रव्यम् , तत्तथा, यथानेकद्रव्यारब्धः पटः, इति निरवयवपरमाणुपर्यन्तमनुमानप्रवृत्तेः परमाणवो मूलकारणमिति। तथा शून्यवादिनश्च–सर्वं कार्यम् , अभावपुरःसरं भवितुमर्हति, योग्यत्वे सत्यनुपलभ्यमानपूर्वावस्थत्वात् ; यथा परपरिकल्पित आत्मेति शून्यालम्बनत्वं सर्वत्र–वदन्ति। योगाः शैवाश्च–हिरण्यगर्भं पशुपतिं चागमसामार्थ्याज्जगत्कारणं कल्पयन्ति। तान् पक्षान् व्यावर्तयति– *नान्यतः परपरिकल्पितादित्यादिना *।।

तत्र प्रथमं तावत् प्रमाणपूरणं सम्भावयति– *अचेतनात्तावदित्यतः प्राक्तनेन ग्रन्थेन*। कथम्? सांख्यानुमाने तावत्सुख–दुःख–मोहान्वयो भावानामसंप्रतिपन्नः ; अन्तर्बहिर्भावेनोपलब्धेः। *स्यादेतत्*–सर्वे विकाराः, सुख–दुःख–मोहात्मकाः, चित्तोपरक्तत्वे सति तत्र तदाकारप्रतिभासहेतुत्वात् ; दर्पणोपरक्ततया मुखाकारप्रतिभासहेतुबिम्बवदिति भावानां सुख–दुःख–मोहान्वयोऽनुमीयत इति , न ; अन्तर्बहिर्भावभेदप्रत्यक्षविरोधात् , एकं च शब्दमुपलभमानानां प्रत्येकं सुख–दुःख–मोहत्रितयोपलम्भप्रसङ्गाच्च , अदृष्टेन च वस्तुसामर्थ्यनियमायोगात्, अतोऽसिद्धो हेतुः, अनैकान्तिकश्च; गुणसामान्यैरप्यप्रकृतिभिर्द्रव्याणां समन्वयात्। यत्तु परिमितत्वादिति, तत्रापि वस्तुतः परिमितत्वे हेतोर्गुण–पुरुषेष्वनैकान्तिकता। देश–कालपरिमितत्वे घट–हिम–काकादिषु प्रत्यक्षदृष्टभिन्न–प्रकृतिष्वनेकान्तः। वैशेषिकानुमानेऽपि स्वपरिमाणादणुतरपरिमाणारभ्यत्वे दीर्घविस्तीर्णदुकूलैः क्रियमाणरज्जुद्रव्यस्य ह्रस्वस्यापि कार्यत्वदर्शनादनैकान्तिको हेतुः, प्रत्यनुमानदुष्टश्च। न किञ्चिदपि कार्यद्रव्यम् , निरवयवद्रव्यसंयोगपुरस्सरम् , प्रचयात्मकत्वात्, यत् प्रचयात्मकम् , न तद् निरवयवद्रव्यसंयोगपुरस्सरम्, यथा घटः। शून्यानुमानेऽपि घटस्य पूर्वावस्था, प्रत्यक्षदृष्टा, मृदित्यनुपलभ्यमानपूर्वावस्थत्वात्, इत्यसिद्धो हेतुरिति। इदानीमर्थदूषणमभिप्रेत्याह–*अचेतनात्तावदचेतनत्वादेवेत्यादिना*।। मा भूदनीश्वरात् प्रधानाद् विचित्रकार्यरचना, परमाणुवादे तु पुनरधिष्ठातुरीश्वरस्य विद्यमानत्वात् तद्बुद्धिसामार्थ्यादेव विचित्रजगत्कार्यरचना भविष्यति, इत्याशङ्क्याह– *चेतनादपीत्ि*।। *अयमर्थः*–कुलालादिदृष्टान्तेनानुमीयमानस्येश्वरस्य शरीरेन्द्रिय–परिच्छिन्नज्ञानशक्तित्वात् तेनैव दृष्टान्तेन परिच्छिन्नज्ञानशक्तेश्च जगद्रचनानुपपत्तिः इति घटादिषु कर्तृद्वयप्रसङ्गाद् मूलकारणेऽपि तदनुमानमिति।।

यत्तु शून्यालम्बनं जगदिति, तत्राह– *अभावात्पुनरिति*।। न च निरुपाख्योपादानता जगतः ; सदन्वयादिति। किंच निरुपाख्यस्य कारणत्वे पूर्वकल्पस्य निरन्वयविनाशात् संस्काराभावात् पुनः सजातीयकार्योत्पादनियामकाभावाद् विशिष्टसंस्थानपश्वादिकामितयाऽनुष्ठितकर्मणां कल्पान्तरे तथाविधपश्वाद्यनुपपत्तेः, शब्दार्थ–सम्बन्ध–तद्व्यवहारिणां च ''नाकस्य पृष्ठे तं कालं दिवि सूर्य इव रोचते। ततः कृतयुगस्यादौ ब्रह्मपूतो महाशयाः। सर्वज्ञो धृतिमानृषिः पुनराजायते स्मरन्।।'' इत्यादिश्रुतिप्रतिपन्नानां निरन्वयविनाशात्, कल्पान्तरे पूर्वकल्पव्यवहारानुसन्धानेन व्यवहारप्रवृत्त्यभावाद् अपूर्वसङ्केते च, धर्मस्य प्रमाणान्तरागोचरत्वाद् गोपदार्थस्यापूर्वसाधनत्वं प्रमाय तत्र च गोशब्दं प्रयुज्य ''गवा यजेत'' इति वाक्यरचनानुपपत्तेश्च कर्म–तत्फल–तत्प्रमाणव्यवहारोच्छेद इत्याह– *अतीतकल्पसंस्काराभावादित्यादिना*।।

अत्र स्वभाववादी जल्पति–न कारणापेक्षमिदमुत्पद्यते। *ननु* स्वयमेव स्वस्य निमित्तमित्युक्तं भवति? किंवा निर्निमित्तमुत्पद्यत इति? निर्निमित्तमिति ब्रूमः। *ननु* तर्हि घटस्य भावाभावौ युगपत् स्याताम् ; क्रमकारिनिमित्तनिरपेक्षत्वात् , *उच्यते*; कारणस्य क्रमकारित्वं स्वभाव इति चेत्, स्वभाववादप्रसङ्गः, निमित्तान्तरसापेक्षत्वेऽनवस्थापातः। कालभेदेन क्रमकार्यवस्थेति चेत् , स कालक्रमः स्वाभाविकश्चेत् , स्वभाववादः, निमित्तान्तरापेक्षत्वेऽनवस्था। तस्मात् सर्वं कार्यं विचित्रं क्रमवर्ति च यथादर्शनं स्वभावेनैव जायत इति, तत्राह– *न स्वभावत इत्यादिना*।।

स्वतःसिद्धसामर्थ्यानामपि भावानां परस्परोपकार्योपकारकभावः प्रत्यक्षसिद्ध इत्यर्थः। *अत इत्युपसंहारः। *ननु* अनुमानेनैव यथोक्तविशेषणमीश्वरं तार्किका व्यवस्थापयन्ति, किं युक्तिसहितेनागमेनेति? अत आह– *एतदेवानुमानमित्यादिना*।। युक्तिर्हि संभावनाबुद्धिमात्रमुत्पादयति, अनुमानं पुनरर्थं निश्चापयति। व्याप्त्यनुपपत्त्याभास उदाहरणमात्रप्रदर्शनं युक्तिः, अव्यभिचारिणी व्याप्तिरनुमानम्। तत्र कुलालादिदृष्टान्तैर्न सर्वज्ञेश्वरकारणत्वं निश्चेतुं शक्यते ; विपरीतोदाहरणसंभवात् , किन्तु प्रमाणान्तरे सति कुलालादि–दृष्टान्तैः संभावयितुं शक्यते। अतो युक्तिरेवैषा। तत्राज्ञानादर्थनिश्चायकमनुमानं मन्यन्त इति। किं तदनुमानमिति? *उच्यते*–सर्वं कार्यम्, स्वरूपोपादानोपकरण–संप्रदान–प्रयोजन सामर्थ्यविषयविज्ञानवत्कर्तृकम् , विविधविन्यासकार्यत्वात् ; घटादिवत्, इति वैशेषिकानुमानम्। सांख्य–योगाः–ज्ञानैश्वर्य–शक्तयः क्रमेणोत्कृष्यमाणाः, क्वचित् सर्वविषयज्ञानैश्वर्य–शक्तिमति पर्यवस्यन्ति, तरतमभावेनोत्कृष्यमाणधर्मत्वात् ; परिमाणवत्–इत्यनुमिमते। नैयायिकास्तु–सर्वं कर्मफलजातम्, कर्म–तत्फल–तद्भोक्तृ–देश–कालादिविशेषविज्ञानवता प्रदीयमानम्, कर्मफलत्वात् ; सेवादिकर्मफलवत्–इत्यनुमिमते।।

तत्र वैशेषिकानुमाने जगतो बहुकर्तृत्व-परिच्छिन्नज्ञानैश्वर्यादिमत्कर्तृत्वानुमानेषूदाहरणसंभवाद् युक्तिमात्रमेतत्। योगानुमानेऽपि ज्ञानैश्वर्य-शक्तीनां क्वचित् काष्ठाप्रप्तिमात्रेऽनुमीयमाने लक्ष्यपदार्थविषयज्ञानादिषु पर्यवसानसिद्धेः कुतः सर्वज्ञत्वादिसिद्धिः? सर्वविषयज्ञानाद्यनुमाने गुरुत्व-राग-द्वेष-दुःख-भ्रान्त्यादिष्वनैकान्तिकता, इति युक्तिमात्रमेतत्। नैयायिकानुमानेऽपि कर्मफलस्य शरीरेन्द्रियादिमद्बहुदातृत्वदर्शनादेकेश्वरासिद्धेः श्रुतिप्रतिपन्न-सर्वकारण-सर्वज्ञ-सर्वेश्वर-सर्वफलदात्र-द्वितीयब्रह्मप्रतिपत्तावुदाहरणमात्रेण संभावनाबुद्धिहेतुत्वाद् युक्तिमात्रम्, इत्यज्ञानाद् किं तदिति निश्चायकमनुमानं मन्यन्ते।

ननु वाक्येषु सत्सु किमित्यनुमानप्रयास इति? अनुमानसिद्धार्थानुवादकत्वादित्याह- *जन्मादीति*।। *ननु* सूत्रेऽप्येतान्येवानुमानानि स्वातन्त्र्येणार्थनिश्चायकत्वेन सूत्रितानि, तत् कथमागमगुणभूतेयं युक्तिः? इति चोदयति- *नन्विहापि तदेवोपन्यस्तमित्यादिना*।।

परिहरति- *न वेदान्तवाक्यग्रथनार्थत्वादित्यादिना*।। किंचानुमानमात्रात् कारणसद्भवमात्रं सिध्यति, नाधिकम् , इह तु सत्य-ज्ञानानन्त-सर्वज्ञ-प्रत्यगात्मब्रह्मावगतिर्विवक्षिता। न चागममात्रेण सामान्य-मात्रविषयानुमानादेव विशिष्टार्थसिद्धिरित्याह- *समन्वयसूत्रप्रमुखोपात्तैरित्यादिना*।। न तर्हि युक्तिरत्र सूत्रिता ; आगमेनैव विशिष्टार्थसिद्धेरिति, तत्राह- *सत्सु त्विति*।।

न धर्मजिज्ञासायामि'' त्यादिः स्पष्टार्थः।। *श्रुतिः* पदान्तरनिरपेक्षः शब्दः। *लिङ्गम्* श्रुतस्यार्थस्यार्थान्तरेणाविनाभावः। अनेकपदसामर्थ्यं *वाक्यम्*।। वाक्यद्वयासामर्थ्यमारभ्याधीतविषयं *प्रकरणम्* क्रमवर्तिनां पदार्थानां क्रमवर्तिभिः पदार्थैर्यथाक्रमं सम्बन्धः *स्थानम्*।। संज्ञासामान्यं *समाख्या*।। *ननु* शब्देन ब्रह्मस्वरूपेऽवधारिते नानुभवेन कृत्यमस्ति। न च शब्दप्रमेयमनुभवितुं शक्यमिति, तत्राह- *अनुभवावसानत्वादित्यादिना*।।

ननु धर्मजिज्ञासायामित्यादिः स्पष्टार्थः*। किमिति धर्मस्यानुभवानपेक्षेति चोदयति- *कथमिति*।। धर्मस्यानुभवायोग्यत्वादनपेक्षितानुभवत्वाच्च न शब्दादन्यापेक्षेति दर्शयति- *कर्तव्यं हीत्यादिना*। *ननु* सिद्धस्वभावस्यानुभवयोग्यत्वेऽपि किमित्यनुभवोऽपेक्ष्यत इति? तत्राह- *इह तु सिद्धस्येति*।। *ननु* वेदप्रमेयत्वाविशेषान्मनन-निदिध्यासनानुभवेषु धर्मवद् ब्रह्मण्यपि मा भूदपेक्षा, ब्रह्मवद्वा धर्मेऽपि स्यादपेक्षेत्यत आह- *नहि कर्तव्य-सिद्धार्थनिष्ठयोरिति*।। अस्तु पुरुषेच्छावशनिर्वर्त्यत्वमपीति, तत्राह-ततो विधिप्रतिषेधेति*।। यजेत न भक्षयेदितिवद् ब्रह्मणो विधेयत्वं प्रतिषेध्यत्वं चेत्यर्थः। *विकल्पेति*।। ''व्रीहिभिर्यवैर्वेतिवद् ब्रह्म वा स्थाणुर्वेतीच्छाविकल्पः। *समुच्चयेति*।। षड्यागसमुच्चयः, इह ब्रह्म स्थाणुश्चेत्यर्थः। *उत्सर्गापवादेति*।। ''न हिंस्यात्सर्वा भूतानि'' ''अग्नीषोमीयं पशुमालाभेत''

''आहवनीये जुहोति''''पदे जुहोती''तिवत् सामान्यप्रतिपन्नब्रह्मणो विशेषेऽपवाद:। *बाधाभ्युच्चययेति*।। प्रकृतेरतिदिष्टानां कुशमयबर्हिषां विकृतावुपदिष्टशरमयबर्हिर्भिर्बाधवद् ब्रह्मणोऽपि क्वचिद् प्राप्तस्य पदार्थान्तरेण बाध:। प्राकृतानां पञ्चनारिष्टहोमानां वैकृतैरुपहोमै: समुच्चित्यानुष्ठानवद् ब्रह्मणोऽप्यतिदिष्टस्योपदिष्टेन समुच्चित्यानुष्ठानमभ्युच्चय:। ''पञ्च प्रयाजान् यजती'' तिप्रकृतेर्विकृतावतिदिष्टानां विकृतौ-''एकादश प्रयाजान् यजती'' त्युपदिष्टेन समुच्चित्यावृत्त्या षोडशप्रयाजानुष्ठानवद् ब्रह्मणोऽप्यतिदिष्टस्योपदिष्टेन समुच्चित्यानुष्ठानमभ्युच्चय:। *व्यवस्थितविकल्प इति*।। ''उदिते जुहोत्यनुदिते जुहोती''ति शाखाभेदेन व्यवस्थावत् क्वचिद् ब्रह्म भवति न भवतीति व्यवस्था। अस्त्वेवं धर्मसाम्यं ब्रह्मण इति चेत्। नेत्याह- *न वस्तुनीति*।। तदेव प्रपञ्चयति-तथाचैकस्मिन्निति*।। *अपर: परिचोदयतीत्यत: प्राक्तन: स्पष्टार्थ:*। पुनरनुमानवादिनश्चोदयन्ति- *ननु* भूतवस्तुविषयत्व इति* *ननु* अनुमानसूचनपरं सूत्रं न प्रतिभातीति, अत आह- *पूर्वसूत्रेणेति*।। ज्ञानानन्दप्रत्यग्भूतब्रह्मणश्चक्षुरादिना सामान्यमात्रविषयानुमानैश्च भूतवस्तुत्वेऽपि नानुभाव: कर्तुं शक्यत इति परिहरति- *नेन्द्रियादिविषयत्व इत्यादिना*।। *अत: इत्युपसंहार:*।।

ननु एवं सतीति स्पष्टार्थ:*।। *उच्यत इत्यादे: परिहारस्यायमर्थ:*-ज्ञानानन्द-सर्वज्ञ-प्रत्यगात्मभूते ब्रह्म निश्चापयितुमसमर्था अपि युक्तय: शब्दावगते ब्रह्मणि सामान्यद्वारेण संभावनाबुद्धिहेतवो भवन्ति। कथम्? जगदुपादानेऽद्वितीयशब्दावगते मृदादिदृष्टान्तैरुपादानव्यतिरेकेण कार्यस्यानिरूपणादद्वितीयता संभाव्यते। स्फटिकलौहित्यप्रतिबिम्ब रज्जुसर्प-घटाकाशदृष्टान्तैरात्मनि कर्तृत्वादेरारोपितत्वं जीवब्रह्मैक्यं ब्रह्मव्यतिरिक्तप्रपञ्च-स्वातन्त्र्याभावोऽसङ्गत्वद्वारेण विशुद्धाद्वितीयप्रत्यगात्मता च संभाव्यत इति। किं पुनस्तद् वेदवाक्यमिति भाष्यस्याक्षेपार्थमाह- *सर्वत्र वेदान्तवाक्ये ब्रह्मपदस्येत्यादिना*।।

*येषां वेदान्तवाक्यानामित्यादे: परिहारस्यायमर्थ: *-सत्य-ज्ञानानन्दप्रत्यगात्माद्वितीय-ब्रह्मपदार्थेऽप्रसिद्धेऽपि बृहत्त्वमात्रस्य प्रसिद्धत्वात् तदनुवादेन सन्निहितपदार्थसंसर्गसामर्थ्याद् विशिष्टब्रह्म प्रतिपत्तुं शक्यते, इति ब्रह्मप्रतिपादनपरं सत्यादिवाक्यम्, अर्थात्तदेव लक्षणम्, इति न सत्य-ज्ञानानन्द-ब्रह्मस्वरूपलक्षणस्य सिद्धानुवादप्रसङ्ग इति। *ननु* स्वाध्यायपाठक्रमेण नार्थप्रतिपत्ति:, किन्तु वैपरीत्येन ; 'प्रसिद्धानुवादेनाप्रसिद्धम्'. इति न्यायात्। तथा च कारणस्य प्रसिद्धत्वात् यस्मादाकाश: संभूत: स आत्मा सत्यं ज्ञानमनन्तं ब्रह्मेति वाक्यप्रवृत्ति: ; तथा यस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते, स सर्वज्ञ: सर्वविदिति ; तथा यस्मात्प्राणादि जायते, स दिव्यो ह्यमूर्त: पुरुष इत्यादि ; तथा यो भूतयोनि, तददृश्यमग्राह्यमित्यादि ; यस्मात्तेजोवदन्नानि जायन्ते, तत्सदद्वितीयमणिमा तत्त्वमसीत्यदिकारणमात्रानुवादेन

तद्विशेषः प्रतिपाद्यत इति, *सत्यम्*; अधिकारिज्ञानकर्तव्यताब्रह्मात्मप्रतिपादनानां क्रममभिप्रेत्येदमुक्तम्, तदाह– *तथैवोदाहरणमिति*।।

ननु जगत्कारणे नानात्वस्यापि प्रतिपत्तेः कथं तदनुवादेन ब्रह्म प्रतिपादनीयमिति चोदयति– *कथमिति*।। परिहरति– *पूर्वोक्तेनेत्यादिना*।।

अयमर्थः–जगत्कारणमात्रानुवादेऽपि तस्य नानात्वशङ्कायाम्-''यतः'' इत्येकत्वनिर्देशादेकत्वमपि प्रमीयते। *ननु* अनुवादे प्रमितिरनुपपन्ना, *न*; जगत्कारण एकत्वपुरोवादाभावादनुवादसामर्थ्यादेवैकत्वं प्रमीयते ; अन्यथाऽनुवादवैयर्थ्यात्। *ननु* एकत्वे ब्रह्मलक्षणे च प्रमीयमाणे वाक्यभेदः स्यात् *न*; एकत्वस्य ब्रह्मप्रतिपत्तिगुणभूततयैकवाक्यत्वात्। *अथवा*–एकत्वमपि लक्ष्यान्तर्गतमेव भवति, न लक्षणान्तर्गतम्। *तथाहि*–जगत्कारणमात्रानुवादेनैकं ब्रह्म विधीयत इति। ततः किमायातमिति? तदाह– *अर्थात्सर्वज्ञमिति*।। न संज्ञा-संज्ञिसंबन्धपरं वाक्यम्, किंत्वर्थप्रतिपादनपरम्। आर्थिकस्तु संज्ञा-संज्ञिसम्बन्ध इत्याह– *पुनस्तद्विजिज्ञासस्वेत्यादि*।। एकं सर्वज्ञं सर्वशक्ति सर्वतोऽनवच्छिन्नं च जगत्कारणम्, तच्च ब्रह्मशब्दाभिधेयमित्यर्थः।।

ननु निरुपाधिकब्रह्मस्वरूपकथनमन्तरेण सोपाधिकानां सर्वज्ञत्वादीनां कस्यचिद् धर्मतया प्रतिपत्तिर्न युक्ता, *तन्न*; 'यत् सुषिरं तदाकाशम्' 'प्रकृष्टप्रकाशश्चन्द्रः' इत्यादिवत् स्वरूपलक्षणमेव किंचिद् वक्तव्यम्। ब्रह्मशब्दाभिधेयमेव स्वरूपलक्षणमिति चेत्, न ; बृहत्त्व-धर्ममात्राभिधानात्। महान् घट इत्युक्ते महत्त्वस्य निरुपाधिर्घटो धर्मितया प्रतीयते, तथेहापि वक्तव्यं सच्छब्दाभिधेयं लक्षणमिति चेत् न ; महासामान्यमात्राभिधानात्। सन्नित्युक्ते घट इत्यवान्तरसामान्यव्यक्तिर्महासामान्यपर्यवसानत्वेनापेक्ष्यते, तथेहाप्यवान्तरसामान्यव्यक्तिर्वक्तव्या। विज्ञानमेव बृहत्त्वं-सर्वज्ञत्वादिधर्मवत्तया निरुपाधि ब्रह्मस्वरूपलक्षणमिति चेत्, न; तस्य सुख दुःख राग–द्वेषादिमहासामान्यत्वात् तस्याप्यवान्तरसामान्यव्यक्तौ पर्यवसानं वक्तव्यमिति, तदाह- *तस्य च निर्णयवाक्यमानन्दाद्ध्येवेति*।। आनन्द एव हि ब्रह्मत्व सर्वज्ञत्व कारणत्वादिधर्मवत्तया निरुपाधि ब्रह्मस्वरूपं निर्णीयते। तथाहि–''यत्र नान्यत्पश्यती'' यो वै भूमा तत्सुखमि''ति सुखस्यैव बृहत्त्वधर्मवत्तामाह। विज्ञानं तर्हि निरुपाधिकब्रह्मगुण इति चेत् किं विज्ञानानन्दयोः सामानाधिकरण्यं नीलोत्पलवद् गुण-गुणिभावात्? किं वा द्रव्यं घट इतिवत्परापरसामान्यभावादिति? न तावद् गुण-गुणीभावात् ; ''साक्षी चेता केवलो निगुर्णश्चे''ति श्रुतेः ''एकधैवानुद्रष्टव्यं नेह नानास्ती''ति च गुण-गुणिभावभेदप्रतिषेधात्, गुणस्य गुणिनोऽन्यत्वानन्यत्वाभ्यामनिरूपणात्।।

अत्र सर्वसङ्करवादी न निर्गुणं द्रव्यमस्तीति जल्पति। मा भून्निर्गुणं द्रव्यम्, ब्रह्म तु न द्रव्यम्; प्रमाणाभावात्। समवायिकारणत्वाद् द्रव्यमिति चेत्, न ; आरम्भवादानभ्युपगमात्। उपादानकारणत्वाद्

द्रव्यमिति चेत् , न ; गुणादीनामपि ग्रहणधर्मत्वादिधर्मोपादानत्वात्। न निर्गुणं वस्त्विति चेत्, अन्त्यगुणेष्वनेकान्तः। तस्मात्तत्त्वज्ञानप्रद्वेषमात्रमेतद् न निर्गुणं ब्रह्मेति। तस्माद् 'द्रव्यं घटः' 'सन् घटः' इतिवत्परापरसामान्यनिबन्धनं विज्ञानमानन्दमिति सामानाधिकरण्यम्। तस्माद् विज्ञानसामान्यालम्बनमानन्दविशेषो ब्रह्मेति। तत्र सर्वज्ञाद्वितीयत्वादिधर्माणां प्रपञ्चोपाधि- तयाऽनिर्वचनीयत्वान्न तैर्ब्रह्म सगुणं सद्वितीयं वा भवति। विज्ञानसामान्यमपि दुःख- रागादिप्रपञ्चोपाधितयाऽनिर्वचनीयं सद् ब्रह्मणि विज्ञानशब्दप्रवृत्तिमात्रहेतुर्भवति। विज्ञानगुणत्वाभावे न विज्ञानं ब्रह्मेति चेत् , न ; विज्ञानसामान्यालम्बनस्य विज्ञानव्यवहारगोचरत्वात् , विज्ञानप्रयुक्तार्थक्रियाकारित्वाच्च। सामान्यास्याभासत्वात् तदालम्बनं ब्रह्मज्ञानं मिथ्याज्ञानमिति चेत् , न ; मुख्यसामान्यान्तराभावात् , अस्यैव च मुख्यत्वात्। तस्माद्विज्ञानस्वभाव आनन्दो ब्रह्मेत्यानन्दस्यैव ब्रह्मतां प्रतिपादयति- *प्रसिद्धावद्योतकेनेत्यादिना*।। तस्मात् सर्वेषु वेदान्तवाक्येषु पाठव्यत्यासेन जगत्कारणमात्रानुवादेन तस्य ब्रह्मत्वं प्रतिपाद्यत इत्युपसंहरति- *तस्माद् ब्रह्मपर इति*।।

इति पञ्चपादिकाविवरणे जन्माद्यधिकरणं समाप्तम्।।

ऋजुविवरणम्

निजं निरन्तरं शान्तं स्फुरन्तं निर्विकल्पकम्। आनन्दमन्दिरं दूरे कल्पनाया गुरुं नमः।।

किमनेन सूत्रेण व्युत्पाद्यते? न तावल्लक्षणम् ; अनाकाङ्क्षित्वात्, ज्ञाते स्वरूपे लक्षणाकाङ्क्षा? अज्ञाते वा? नाऽज्ञाते ; किमस्य लक्ष्यस्य लक्षणमित्याकाङ्क्षानुदयात् , अस्येदं लक्षणमिति लक्ष्यलक्षणसंबन्धापरिज्ञानाच्च। नापि न ज्ञाते; वैयर्थ्यात्। किञ्च स्वरूपलक्षणं वोच्यते? तटस्थं वा? नाद्यः, जन्मादिकारणत्वस्य सप्रतियोगिकस्य स्वरूपत्वायोगात्, सविशेषत्वप्रसङ्गाच्च। नापि द्वितीयः ; स्वरूपलक्षणेन विना तटस्थलक्षणमात्रेण स्वरूपप्रतीत्ययोगात्, तस्य चाप्रतीतेः। अतिव्याप्तिश्च लक्षणस्य ; प्रधानादावपि जगत्कारणत्वस्य संभवात्, अतो नास्य लक्षणसूत्रत्वम्, तदभावे ''स्वरूपस्याभ्यर्हितत्वादि'' त्यादिस्वरूपपरत्वप्रतिपादनपरो ग्रन्थोऽसङ्गत इत्याशङ्क्य, सूत्रस्य तात्पर्यमाह- *जगज्जन्मेति*।। *ननु*-अस्य भाष्यस्यानेकार्थसं भवात्किमर्थमेवं व्याख्यायते? इत्याशङ्क्याह- *वृत्तसंकीर्तनभाष्यस्येति*।। अस्य वक्ष्यमाणार्थोपयोगादिति भावः। *ननु*-साध्यसिद्धिहेतुत्वं साधनस्योक्तम्, अतः ; कथं स्वरूपस्याभ्यर्हितत्वेन प्रथमविचार्यत्वम्? इत्याशङ्क्य व्याचष्टे- *ब्रह्मप्रमाणमिति*।। *ननु*-स्वरूपस्य प्रमाणापेक्षत्वमस्तीत्याशङ्क्याह- *ब्रह्मस्वरूपनिर्णयस्येति*।। व्यावृत्तेरित्यर्थः। *ननु*-प्रमाणलक्षणस्यैव निर्णायकत्वेन तत्सापेक्षत्वमनिष्टमित्याशङ्क्य, प्रकारान्तरेणाभ्यर्हितत्वं दर्शयति- *प्राधान्येनेति*।। अपिशब्देन स्वरूपसमुच्चयाशङ्काव्युदासायाह- *अपिशब्दादिति*।। *ननु*-अत्रैव प्रमाण-युक्त्योः सूचितत्वे तद्विषयमध्यायद्वयमनपेक्षितं स्यादिति, तत्राह- *अत्र तु सूत्रितयोरिति*।। कथं तदगुणसंविज्ञानपक्षे जन्मनस्समासार्थत्वम्? इत्याशङ्क्य व्याचष्टे- *विशेष्यैकदेशमेवेति*।। तस्य विशेषणस्य गुणस्य विशेष्यत्वेन संविद् ज्ञानं यस्मिन्निति विग्रहः। एकस्यैव विशेष्यत्व-विशेषणत्वविरोधं परिहरति- *एकदेशमिति*।। कथं समाहारप्राधान्यम्? इत्याशङ्क्योक्तम्- *तृतीयलिङ्गेति*।। प्रपञ्चस्यादिरनुक्तः कथमाक्षिप्यते? इत्याशङ्क्याभिप्रायमाह- *जन्मादीनामिति*।। कथं श्रुतिनिर्दिष्टत्वमात्रेण सूत्रे तदपेक्षते? इत्याशङ्क्य, तन्निवृत्तौ तात्पर्यमाह- *भाष्यं व्याचष्ट इति*।। जन्मादीनां लक्षणत्वमेव न संभवतीत्यभिप्रायेण चोदयति- *ननु जगज्जन्म-स्थिति-भङ्गमिति*।। जगद्गतानां लक्ष्यसंबन्धाभावादलक्षणत्वमिति भावः। कारणसंबन्धिनोऽपि लक्षणत्वं न संभवतीत्यभिप्रायेण चोदयति- *ननु जगज्जन्मादिकारणत्वमिति*।। लक्ष्यान्तर्गतत्वे जन्मादेर्लक्षणत्वायोगाद लक्षणान्तर्गतत्वेऽप्यसंभव एव ; कारणत्वस्य लक्षकत्वात्, किमिति कारणत्वं लक्ष्यं नेष्यते? इत्याशङ्क्याह- *न हि ननाविधेति*।। कथं तर्हि लक्षणसंबन्धिनो जन्मादेर्लक्षणत्वम्? इत्याशङ्क्योपलक्षणत्वादित्याह- *जगज्जन्मादीति*।। अथवाऽन्यतरवैयर्थ्यं परिहरति-

*तस्माज्जगज्जन्मादीति।। *ननु*-निमित्तकारणस्य भेदेनावस्थानेऽप्युपादानमपि तथैवाङ्गीक्रियत इत्याशङ्क्याह-*उपादानकारणस्येति*।। *ननु*-स्वरूपलक्षणसहकृतं ब्रह्मत्वं चेतनत्वं वा कस्मान्न गमयति? इत्याशङ्क्याह-*सत्यं ज्ञानमिति*।। *ननु*-लक्षणस्य प्रमाणत्वात्किं प्रमाणप्रसिध्या? लक्षणवैयर्थ्यप्रसङ्गात् यद्वा-किं प्रसिध्याऽपेक्षितम्? इत्यत आह-*प्रमाणान्तरसिद्धं हीति*।। एतदपि प्रसिद्धलक्षणमिति चेत् ; किमनुमानेन? शब्देन वा? न तावत्प्रथम इत्याह-*न तावदेकस्येति*।। कथं दृष्टान्ते भेददर्शनम्? सुखादेर्दृष्टान्तत्वेनोपादानात् , मैवम् ; तथाऽपि किं भूत-भौतिकजगत् पक्षीक्रियते? भूतमात्रं वा? प्रथमपक्षे त्वंशे बाधितविषयत्वमित्याह-*महाभूतपञ्चकव्यतिरिक्तेष्विति*।। *न तदनुवादेनेति*।। एकस्यैवोभयथा कारणत्वमनुवदितुं न शक्यते; अप्रसिद्धत्वादिति भावः।। द्वितीयपक्षे भौतिकेष्वनैकान्तिको हेतुर्गमक एव न भवति, अतो न तस्याप्यनुवाद इत्यभिप्रायेणाह-*भूतपञ्चकेति*।। तथा शब्दप्रसिद्धिपक्षेऽपीदमेवोत्तरम्-*महाभूतपञ्चकव्यतिरिक्तेष्विति*।। शब्दस्यापि ब्रह्मपरत्वाल्लक्षणांशेऽनुवादो वक्तव्यः। तत्र भौतिकेषूपादान-निमित्तयोर्भेददर्शनान्नैकत्वमनुवदितुं शक्यम् , भूतांशे प्रसिद्धत्वादेव नानुवाद इति भावः। कथमेकस्यार्थद्वयमिति? तदाह-*उभयत्रेति*।। *ननु*-एकस्योपादानत्वं निमित्तत्वञ्चाप्रसिद्धम्? इत्याशङ्क्य विवृणोति-*तथाहि महाभूतानीति*।। *ननु*-द्रव्यत्वाद्यनुगमेऽपि न तदुपादानत्वम् ; अतो नैकान्तिकमित्याशङ्क्याह-*द्रव्यत्वाद्यभेदा अपीति*।।

ननु-भौतिकेषु सद्वस्त्वनुगमेऽपि भूतोपादानत्वं दृश्यते, अतोऽनैकान्तिकम्, यद्येवं भूतकारणत्वमेव लक्षणं स्यादित्याशङ्क्याह-*भौतिकानाञ्चेति*।। भूतानुगतं सद्वस्त्वेवोपादानम् ; भूतानि तु द्वारमात्रमित्यर्थः। किमिति द्वारमात्रत्वम्? भूतानामेवोपादानत्वं कस्मान्न भवति? इत्याशङ्क्याह-*अतस्सर्वकार्योपादानमिति*।। अथवोभयस्योपादानत्वं कस्मान्न भवति? इत्याशङ्क्याह-*अतस्सर्वकार्योपादानमिति*।। पूर्वोक्तमनैकान्तिकत्वं परिहरति-*न च घटादिष्विति*।। बाधितविषयत्वमुक्तमनुवदति-*अदृष्टादिनिमित्तेति*।। श्रुतिप्रसिद्धपक्षेऽप्युक्तदूषणं परिहरति- *सृष्टिवाक्यप्रसिद्धं चेति*।। *ननु*-न मायात्मकत्वे समानत्वम् ; सोपाधिके व्यभिचारात्, इत्याशङ्क्याह-*सर्वे च सोपाधिका धर्मा इति*।। यद्वा--तन्मते न स्वोपाधावभावव्यावृत्तत्वमित्यस्यातिप्रसङ्गमाह-*सर्वं चेति*।। निषिद्धसृष्टेः कथं विषयाभावविरोधित्वमित्याशङ्क्याह-*सृष्टिरपि स्वरूपेणेति*।। सृष्टेः सत्यत्वाभावे तद्विषयश्रुतिविरोधस्स्यादिति चोदयति-*ननु मिथ्यासृष्टिविषयत्वमिति*।। कथमनभिज्ञत्वमित्याह- *प्रमाणं हीति*।। *ननु*-सत्यत्वस्य प्रमेयत्वात् तदभावं न सहत इत्याशङ्क्याह-*न च सृष्टिश्रुतिरिति*।। पदार्थस्यैव वाक्यार्थत्वादिति भावः। *ननु*-सदसत्त्वे विहाय प्रतीतिरेव न संभवेत् ; अतोऽनभिहितस्यापि प्रतीतिरङ्गीकर्तव्येत्याशङ्क्य, नेति दृष्टान्तमाह-*यथा घट इत्युक्त इति*।। *ननु*-पदस्य स्मारकत्वात् तस्य च सदसद्वस्तुसाधारणत्वम्, इह तु शब्दस्य प्रमाणत्वात् सत्यत्वेनैव प्रमातव्यमित्याशङ्क्य व्यभिचारं

दर्शयति– *न हि स्वप्नविषयेति*।। *ननु*–स्वप्नश्रुतेर्मिथ्याविषयत्वम् , तत्र हि तादृशकारणाभा-वात्सत्यविषयस्वयंज्योतिष्ट्वपरत्वेन तदप्रतिपादनम् , इह तु सृष्टिप्रतिपादनपरत्वेन तत्सत्यत्वमपि प्रतीयत इत्याशङ्क्याह– *प्रयोजनशून्यतयेति*।। यद्वा–''न तत्र रथा:'' इति स्ववाक्यशेषपर्यालोचनया स्वप्नश्रुतेर्मिथ्याविषयत्वम्, अत्र तु तादृशकारणाभावात्सत्यविषयत्वमित्याशङ्क्याह– *प्रयोजनशून्यतयेति*।। *ननु*–कर्मकाण्डस्य प्रत्यक्षादेस्सत्यवस्तुसापेक्षत्वेन तदपेक्षित– समर्पणमेव प्रयोजनमित्याशङ्क्याह– *न च कर्मकाण्डस्येति*।। कथं नित्यतयोपपत्ति:? कार्यत्वेनानित्यात्वात्, तस्य च शून्यविलक्षणतयोपादानमपेक्ष्यत इत्याशङ्क्याह– *सृष्टिश्रुत्यवगमादिति*।। प्रागेव तद्व्यवहारस्य सिद्धत्वादित्यर्थ:।। *अथवा*–प्रागेवानुमादिना सृष्ट्यवगमादिति*।। सप्रयोजनत्वाय सत्यविषयत्व-मित्यभिप्रायेण पृच्छति– *किं तर्हि सृष्टिश्रुतेरिति*।। *ननु*–अद्वैतश्रुत्या प्रतीयमानाद्वैतसिद्धि: कथं सृष्टिश्रुतिप्रयोजनम्? इत्याशङ्क्याह– *प्रमाणान्तराविरुद्धेति*।। प्रमाणान्तराविरुद्धाद्वैतसिद्धि: सृष्टिश्रुत्यधीनेति भाव:। *ननु*–अद्वैतश्रुतेर्विरोधशङ्कैव कथमिति? तदाह– *प्रत्यक्षादिप्रसिद्ध-प्रपञ्चस्येति*।। तर्हि प्रत्यक्षादिसिद्धत्वात्प्रपञ्चस्य कथमविरोध इति? तदाह– *मिथ्यात्वापादनेनेति*।। विषयमिथ्यात्वेन तदपि तथैवेति भाव:। कथं सृष्टिश्रुत्या प्रत्यक्षादिविषयमिथ्यात्वसिद्धिरिति? तदाह– *प्रत्यक्षादिसिद्धेति*।। निषेधसहकृता मिथ्यात्वं साधयतीति भाव:। तर्हि निषेधवाक्यैरेव मिथ्यात्वसिद्धे: किं सृष्टिश्रुत्या? *मैवम्*; निरुपाधिकनिषेधाभावात्, ब्रह्मणि निषेधे चान्यत्र सत्यत्वप्रसङ्गादिति। कथं प्रतीतिहानेनाप्रतीतपरत्वमिति? तदाह– *तेनैकवाक्यत्वादिति*।। कथं पृथक् समभिव्याहृतार्थप्रतीतावेकवाक्यत्वमिति? तदाह– *अन्यथा शेषीति*।। तस्यैव सप्रयोजनत्वादिति भाव:। *ननु*–ब्रह्मण एव तद्भावश्रुते: सृष्टिशब्दप्रयोगाच्च सत्यत्वमित्याशङ्क्याह– *देवदत्तो व्याघ्र इति*।। *ननु*–उदाहृतश्रुति–स्मृतिभ्यां तमसोऽनिर्वचनीयत्वं प्रतीयते, न मायाऽविद्ययोरित्याशङ्क्याह– *तमो मोह इति*।। *ननु*–देश–कालयोस्तदुपाधिके वाऽस्त्यर्थे निषेधो न निरुपाधिक इत्याशङ्क्याह– *देश–कालयोरिति*।। देश–कालयोर्निषेध उपाधिभूतदेशकालाद्यभावात् तयोर्निरुपाधिक-निषेधप्रसङ्गादित्यर्थ:। द्वितीयपक्षेऽपि देश–कालयोर्निषेधे तद्विशिष्टोपाध्यभावात् तयोर्निरुपाधिकेऽस्त्यर्थे निषेधादितरत्रापि तस्यैवोपाधित्वमनुगतोपाधिलाभादिति भाव:। *ननु*–उक्तदूषणमस्त्यर्थेऽपि समानमित्याशङ्क्याह– *अस्त्यर्थस्येति*।। उक्तप्रकारं सर्वत्रातिदिशति– *एवं सर्व इति*।। ब्रह्मणोऽप्रतीते: कथं तत्र निषेध:? इत्याशङ्क्याह– *सर्वभावप्रत्ययेति*।। *स्वरूपोपाधिरिति मृदाद्युच्यते, भूतलादि च। *ननु–अभावनिषेध्यव्यतिरेकेण तृतीयं न प्रतीयते, इत्याशङ्क्याह– *अन्याभावविशिष्टेति*।। 'जडत्वादि'ति चैतन्ये कल्पितत्वे हेतु:, 'कार्यत्वादि'त्यकार्ये, 'भेदत्वादि'त्यद्वैते कल्पितत्वे हेतु:। यद्वा–पूर्वं वस्तुविशेषे कल्पितत्वमुक्तम् , अत्र तु कल्पितत्वमात्रमिति विवेक:। *ननु*–प्रतिपन्नोपाधौ बाध एव मिथ्यात्वे हेतुरित्याशङ्क्यानुमानान्तरमाह– *प्रतिपन्नोपाधाविति*।। यद्वा–ब्रह्मण्येव कल्पितत्वेऽनुमानमाह–

प्रतिपन्नेति।। ब्रह्मकार्यस्य कथं प्रतिषेधः? इत्याशङ्क्य तद्योग्यत्वं साधयति- *विरोधिकारणस्वभावेति*।। विवर्तत्वसाधनं वा क्रियत इति भेदः। देशादीनामुपाधित्वेन मिथ्यात्वात् तदर्थम्, यद्वा- सर्वमिथ्यात्वेऽनुमानम्- *प्रलयावस्थायामिति*।। *ननु*-प्रतिषिध्यमानत्वमसिद्धम् ; अस्थूलादिति- वाक्यानामन्यप्रतिपादकत्वादित्याशङ्क्याह- *नचास्थूलादीति*।। अन्यत्रान्यत्वाभिप्रायेण प्रतिषेधा- दर्शनेऽप्यस्यान्यत्वाभिप्रायेण कथं निवृत्तिः कल्प्यते? इत्याशाङ्क्याह- *तथा च प्रतिषेध इति*।। *शब्दमूलत्वादिति*।। *अयमर्थः*-अद्वैतसिद्ध्यर्थं न मिथ्यात्वं साधनीयमिति। *ननु*-घटेऽस्त्यर्थः प्रतीयते, अतो घटमिथ्यात्वे तद्विरोध इत्याशङ्क्याह- *श्रुत्यर्थस्येति*।। *ननु*-ब्रह्मण एव परिणामसंभवात्कथं मिथ्यात्वसंभवः? इत्याशङ्क्याह- *प्रशान्तत्वादिति*।। "अस्य जगतः" इत्यनेन स्वरूपलक्षणकथनमि" त्युक्तम् , तदयुक्तम् ; लक्षणस्योक्तवाद् वैयर्थ्यात्स्वरूपलक्षणे ब्रह्मणोऽनुवाद्यत्वप्रसङ्गादित्या- शङ्क्याभिप्रायमाह- *लक्षणमनूद्येति*।। *ननु*-जन्मादिकारणत्वं तथाभूतलक्षणत्वेनानूद्यते? किं स्वरूपलक्षणत्वेन किं वा तटस्थलक्षणत्वेन? नाद्य इत्याह- *ननु न तावदिति*।। *ननु*'औपाधिकस्यापि तादात्म्यात्स्वरूपलक्षणत्वमिति, तत्राह- *निरुपाधिकब्रह्मेति*।। धर्मेण प्रतीत्यभावात्। यद्वा-धर्मस्यैव प्रतीतिर्न भवतीत्यर्थः। मिथ्याभूतस्य तादात्म्यमेव दुरवसेयम्, कथञ्चिद्विद्यमानेऽपि स्वरूपप्रतीतिसापेक्षत्वमिति भावः। द्वितीयपक्षे लक्षणत्वं निराकरोति- *नाप्युपलक्षणमिति*।। *अवच्छेदादिति*।।

भिन्नस्यैव लक्षणत्वादिति भावः।। सत्यस्यैव लक्षणत्वं दृष्टमित्याशङ्क्याह- *असाधारणसंबन्ध इति*।। आस्रवं कर्मोच्यते। संवरस्समाधिः। निर्जरस्तप इति। कथं पूर्वं विकल्प्य व्याकरणम्? धर्मिसहभावित्वाद्धर्मविकल्पस्येत्याशङ्क्याह- *अयमर्थ इति*।। भवतु कारणत्वं कूटस्थलक्षणम्, तदनूद्य स्वरूपलक्षणं कथ्यते इति यदुक्तम्, तदाक्षिपति- *ननु किमत्रेति*।। *ननु*- किं स्वरूपलक्षणकथनेन? तथा तटस्थेनैव प्रतीतिसिद्धेरित्याशङ्क्याह- *न च स्वरूपेति*।। प्रत्यक्षादिप्रवृत्तिमङ्गीकृत्य सर्वज्ञत्वं नास्ति ; सर्वापरोक्ष्यलक्षणत्वात्तस्येत्याह- *सर्वस्येति*।। *ननु*-सर्वं जानातीति ज्ञानमात्रमेवोच्यते, नापरोक्ष्यमित्याशङ्क्याह- *सत्स्वपीति*।। युगपत्प्रवृत्त्यभावं द्रढयति। यद्वा-युगपत्सर्वेन्द्रियप्रवृत्तावपि सर्वज्ञत्वाभावं दर्शयति- *इन्द्रियाणामिति*।। देशतो विप्रकृष्टो मेर्वादिः, कालतो विप्रकृष्टोऽतीतादिः स्वरूपतश्चरमादिः। संबन्धत्वमेवाविप्रकृष्टत्वम्, तदस्तीति वर्तमानसर्वग्रहणमित्याशङ्क्याह- *संयुक्तेति*।। *ननु*-धर्मातिशयान्मार्जारादिदृष्टीनामतिशयवत्त्वं दृश्यते, इत्याशङ्क्याह- *मार्जारादीति*।। *ननु*-मायापरिणामनिमित्तं सर्वविषयज्ञानं कल्प्यते, यद्वा-क्रमेण सर्वग्रहणात्परिभावनमित्याशङ्क्याह- *अतीतेति*।। अवधारणमप्यनेनैव भविष्यतीत्याशङ्क्याह- *एतावदिति*।। अनन्तत्वादवधारणं न संभवतीति भावः। कथमतीतसर्वविषयं ज्ञानमिति? तदाह- *असंप्रमोषा स्मृतिरिति*।। प्रमोषहेत्वभावादिति

भावः। कथमीश्वरस्य स्मरणम्? इत्याशङ्क्याह- *स्वमायेति*।। *ननु*-अज्ञाने विद्यमानेऽपि नास्माकमेतादृशस्मरणं दृश्यते, कथं तस्यापीत्याशङ्क्याह- *अनावरणेति*।। *ननु*-एवमपि संभावनामात्रं न निश्चय इत्याशङ्क्याह- *यः सर्वज्ञ इति*।। सर्वावभासक्षमत्वे कथमनौपाधिकमित्याशङ्क्याह- *आदित्यादीति*।। ''न कश्चिद्वस्तुनः'' इत्यनेनावस्थाविशेषाणां जन्मादियुक्तत्वाद्यन्तर्भाव इत्युक्तम्, तत्र जन्मादिकारणत्वेन भावविकाराणां जन्मादिसंभवात् तत्कारणे परिगृहीते जन्मादिष्वेवान्तर्भावः, न जन्मादितुल्यतेति भावः। *ननु*-जन्मादितुल्यतैव तेषाम्; जन्मव्यतिरेकेण जनिव्यापारादर्शनात्, अन्यथा जन्मादीनामपि जन्मादिप्रसङ्गात्, अतो नान्तर्भावः, नतु जन्मादिप्रभेदत्वेनान्तर्भावादनुपन्यास इत्याशङ्क्याह- *ननु षड् भावविकारा इति*।। *ननु*-भूतानामपि भावविकारसंभवात् कथं ''तन्मयानामेव ते संभाव्यन्ते'' इत्युक्तम्? इत्याशङ्क्याभिप्रायमाह- *यास्कपरिपठितानामित्यादेरिति*।। अतदुगुणसंविज्ञानः। यद्वा भाष्येऽपि तेषामेव जगतः स्थितिकाले संभव उक्तः, तेन सहानुपपत्तिं परिहरति- *अनुमानादेरिति*।। *अयमर्थः*-सूत्रस्यापि वाक्यमनपेक्ष्य तदेव मूलं भवेदिति। *न महाभूतविषया इति*।। अतीन्द्रियत्वादित्यर्थः। तर्हि यास्कद्वाराऽस्तु श्रुतिमूलत्वं सूत्रस्येत्याशङ्क्याह- *किञ्चेति*।। कथं माया करणमिति? तदाह- *मायान्त्विति*। तुल्यत्वेऽपि विरोधादन्यतरस्येहोपयोगसंभवान्मायाप्रकृतित्वहानमित्याह- *मायाप्रकृतित्वविरोधादिति*।। *ननु*-योगसंभव उक्त इति, तत्राह- *निमित्तेऽपीति*।। प्रकृतिशब्दस्योपादानमेव वाच्यम्; पञ्चम्यास्तु साधारणत्वादिति भावः। ब्रह्मण एव तद्भावापत्तिविरोधान्मायैवोपादानमिति कथं नियम इति? तदाह-दृश्यमानजाड्यानुसारेणेति*।। *इन्द्रो मायाभिरिति*।। अन्यत्र करणत्वश्रवणाद्वाक्यशेषन्यायेनात्रापि करणत्वमिति भावः।। वैलक्षण्येऽपि कार्य-कारणभावदर्शनान्न जाड्येन नियमः, अतो ब्रह्मणः कारणत्वाद्विरोध इति चोदयति- *निरपेक्षेति*।। *ननु*-अन्यत्र लोके प्रयोगेऽपि शब्दस्यानेकार्थत्वदर्शनादत्रापि प्रयोग इत्याशङ्क्याह- *लोकसंवेदनेति*।। न हि लोकसंवेदनमर्थान्तरं प्रतिषेधति, कथं तद्विरोधः? इत्याशङ्क्याह- *न हि प्रज्ञातिशयवत्त्वमिति*।। विद्यमानेऽर्थेऽप्यप्रयोग-दर्शनात्कथमेतावता विरोध इत्याशङ्क्याह- *गर्हन्ति चेति*।। *ननु* यास्कप्रयोगस्य लोकप्रयोगतुल्यत्वाद् ज्ञानवाचित्वमपीत्याशङ्क्याह- *बुद्धिविषयत्वाच्चेति*।। *ननु* बुद्धावपि ज्ञानरूपे प्रयोगः, तदिहास्तीत्यत्रापि प्रयोगः स्यादित्याशङ्क्य पक्षान्तरमाह- *स्वप्नादिविविधेति*।। अत्रोपचारनिमित्तं नास्तीति भावः। इदानीं यास्कप्रयोगसामर्थ्याद् ज्ञाने मुख्यत्वमौपचारिकत्वं वा मायाशब्दस्य; तथाऽप्ययं न चैतन्ये प्रयुक्त इत्याह- *अपि चेति*।। मन्त्रादौ प्रयोगादिति चेत् , तत्राह- *लोके चेति*।। *ननु* हस्त्यादिरूपस्य व्यभिचारेऽपि कार्यत्वमनुगतं विहाय मिथ्यावाचित्वं कथं निश्चीयत इति? तदाह- *तरत्यविद्यामिति*।। *ननु* उत्तरपक्षयोर्ब्रह्मणः कारणत्वमेव नास्ति, कथं लक्षणम? इत्याशङ्क्याह- *उत्तरपक्षयोरिति*।। तत्र ''ज्ञानानन्दे'' त्यादिविशेषणोपादानं कथञ्चिद् रूपमात्रपरित्यागस्य वक्तुं शक्यत्वान्न तावता परिणाम इति

दर्शयितुम्। *अनिर्मोक्षेति*।। प्रपञ्चसंबन्धस्यापरिहार्यत्वादित्यर्थः।। *ननु* प्रपञ्चसंबन्धेऽपि शास्त्रान्मुच्यत इत्याशङ्क्य, परिहारान्तरमाह- *अज आत्मेति*।।

व्यवस्थितब्रह्मवाक्यैरिति*।। अयमर्थः—व्यवस्थितिमजं नित्यं ब्रह्मेति प्रतिपादयन्ति वाक्यानीत्यर्थः।।

ननु।। भूतद्वारेण ब्रह्मणो जगत्कारणत्वम्, तच्च न संभवति; भूतानामकार्यत्वादिति चोदिते भूतानामेव जन्मादि दर्शनीयम्, नैकदेशानामित्याशङ्क्याभिप्रायमाह- *उच्यत इत्यादेरिति*।।

उत्तरग्रन्थेन पौनरुक्त्यमाशङ्क्याह- *न यथोक्तेति*।। *व्याचष्टे=अक्षरार्थं कथयतीत्यर्थः। अज्ञाते कल्पनाप्रकारे निराकरणानुपपत्तेस्तां दर्शयति- *नान्यत इत्यादिना*।।

''नान्यतः'' ''इत्यस्या'' ''चेतनत्वादि'' त्यनेन विषयभेदमाह- *तत्र प्रथमं तावदिति*।। *ननु*-नान्तरत्वप्रतीत्या सुखाद्यात्मकत्वं घटादीनाम्; विरोधात्, न घटादेस्सुखाद्यात्मकत्वासिद्धौ भेदो न च संभवतीति वाच्यम्; मानसद्भावादित्याह- *स्यादेतदिति*।। तदाकारप्रतिभासहेतुत्वे विवक्षिते प्रदीपादावनैकान्तिकोऽसिद्धश्च, तदर्थमाह- *तत्रेति*।। तथाऽपि तद्घटादिप्रतिभासहेतूपादान-मनैकान्तिकम्, तदर्थम्- *निमित्तोपरक्तेति*।। *ननु*-कथं बहिर्भावप्रतीत्या सुखाद्यात्मकत्वाभावः? विषयगतसुखाच्चित्तगतस्यान्यत्वेनापि संभवात्, यद्वा-औपाधिक्यन्यत्र प्रतीतिरित्याशङ्क्याह- *एकश्चेति*।। *ननु* अदृष्टवशादेकस्यैवोपलब्धिरित्याशङ्क्याह- *अदृष्टेन चेति*।। कथं रज्ज्वामनेकान्तिकत्वम्; दुकूलानामन्त्यावयवित्वेनारम्भकत्वादित्याशङ्क्य पारिभाषिकमप्यङ्गीकृत्याह- *प्रत्यनुमानेति*।।

ननु-ईश्वरस्य सर्वज्ञत्वेनाङ्गीकारादसिद्धो हेतुरित्याशङ्क्याभिप्रायमाह- *अयमर्थ इति*।। *ननु*-एकस्य कर्तृत्वेऽर्थात् सर्वज्ञत्वमपि भविष्यतीत्याशङ्क्याह- *घटादिषु चेति*।। निरुपाख्यस्यैवोपादानत्वं कस्मान्न भवतीत्याशङ्क्याह- *न च निरुपाख्येति*।। कथं सदन्वयेन निरुपाख्योपादानता निराक्रियते? काल्पनिकत्वेनाप्युपपत्तेः, 'अतीते' ति व्यर्थम्; पूर्वेणैवाभावहेतुत्वस्य निरस्तत्वात्, असिद्धश्च; उपादानत्वस्य संस्काराभावहेतुत्वाभावात्, तथा सत्युत्तरस्यापि सादृश्यं वक्तुं शक्यते, मा भूत् सादृश्यम्, कथं यादृच्छिकत्वम्; नियमाभावो वा? यथोत्पन्नेनैव नियमादिसिद्धेरित्या-शङ्क्यावतारयति- *किञ्च निरुपाख्यस्येत्यादिना*।। कथमतीतसंस्काराभावः? इत्याशङ्क्यो-पपादयति- *पूर्वकल्पस्येति*।। मा भूत् संस्कारः, ततः किमिति? तदाह- *सजातीयेति*।। अस्य हेतोः ''कर्मादिव्यवहारोच्छेदः'' इत्युत्तरेणान्वयः। मा भूत् सजातीयकार्योत्पादः, तथाऽपि कथं व्यवहारोच्छेदः? तादृशेनैव व्यवहारसिद्धेः, इत्याशङ्क्य कर्मतत्फलव्यवहारस्तावन्नोपपद्यत इत्याह- *विशिष्टसंस्थानेति*।। तथा गतागति-प्रभवागममूलकर्मतत्फलेष्वपि समानमिति भावः। भवतु कर्म-तत्फलव्यवहारोच्छेदः,

प्रमाणव्यवहारोच्छेद: कथमिति? अत आह- *शब्दार्थेति *।। अपूर्व एव व्यवहारो भवत्वित्याशङ्क्याह- *अपूर्वसङ्केते चेति *।। स्वभाववाद: शङ्कनीय एव न भवति; निर्बीजत्वात्, इत्याशङ्क्य, तन्मतं दर्शयति- *अत्र स्वभावेति *।। त्वत्पक्षेऽपि कथम्? निमित्तोपादानकारणसामर्थ्यस्य सह जन्यत्वादित्याशङ्क्याभिप्रायमाह- *स्वत:सिद्धसामर्थ्यानामिति *।। युक्तेरप्यनुवादत्वात्कथं मन्यन्त इत्युक्तम्? इत्याशङ्क्य, नेदममित्याह- *युक्तिर्हीति *।। *ननु *-युक्तेरपि हेतुपरत्वेन गमकत्वादनुमानवन्निश्चायकत्वमेवेत्याशङ्क्याह- *व्याप्त्यनुपपत्त्याभास इति *।। एवं सत्यप्यत्र युक्तिरेव सूत्रितेति कथं गम्यत इति? तदाह- *तत्र कुलालादीति *।। कथं तैरनुमानमित्युक्तमिति? तत्राह- *तत्राज्ञानादिति *।। वैशेषिकाद्युक्तानुमानानां मुख्यानुमानत्वमेवेत्यभिप्रायेण पृच्छति- *किं तदिति *।।

*ननु सूत्रेऽप्येतान्येवेति *।। अयं भाव:-''चोदनालक्षण:'' इत्यत्र यथा लक्षणस्यैव प्रमाणत्वम्, तथाऽत्रापीति। *ननु *-अनुमानेनापि कारणसिद्धे: कथं वेदान्तसूचकत्वं सूत्रस्येत्याशङ्क्याह- *किञ्चानुमानमात्रादिति *।। *पञ्च प्रयाजान् यजतीत्यादि *।। *ननु *-कथं प्रकृत-वैकृतप्रयाजेषु समुच्चित्यानुष्ठानमुच्यते? वैकृतवाक्ये प्रयाजानामविधेयत्वाद् भेदासंभवात् संख्यागुणो विधीयते। तत्र संख्याया: पृथक्त्वनिवेशित्वेन प्रत्येकं संबन्धाभावात्समुदायसंबन्धो वक्तव्य:। तत्राभ्यासं विना समुदायानुपपत्ते: प्राकृतानामेवाभ्यासेन संख्यापूरणमुक्तम्, तत्कथं समुच्चयस्योदाहरणम्? *सत्यम् *; प्राकृतक्रमानुरोधाय दण्डकलितवदावृत्तिं विहाय स्वस्थानविवृद्ध्यैव संख्यापूरणत्प्राकृतक्रम-वैकृतसंख्ययो: समुच्चयो विवक्षित:। ग्रन्थोऽप्येवं योज्य:-''एकादश प्रयाजान् यजती'' त्यत्र प्रकृतावुपदिष्टेन क्रमेण वैकृतसंख्याया: समुच्चित्यावृत्त्यानुष्ठानात् स्वस्थानविवृध्या षोडशप्रयाजानुष्ठानम्, षोडशल् निषेधे त्वेकादशानुष्ठानम्, अन्यथा प्राकृतक्रमानुरोधाय स्वस्थानविवृद्ध्यैव संख्यापूरणमसमञ्जसं भवेत्। प्राकृत-वैकृतप्रयाजयोरभेदनैव संख्याविरोधाद् अविरोधाभावात् स्वस्थानविवृद्धिन्याय:; ''प्रत्युध्रीयेत; ''अत्राप्यावृत्त्ये'' ति वदतेदमेव दर्शितम्; भेद आवृत्त्ययोगात्। एकस्यैव पुन: पुनरनुष्ठानमावृत्तिरित्युच्यते यत:। यद्वा-''मासमग्निहोत्रमि'' त्यत्रहोमान्तरविधानवदत्रापि प्रयाजान्तरविधानम्। न च रूपाभावादविधानम्; अतिदेशतो मन्त्रवर्णतश्च द्रव्यदेवतालाभात्, न चातिदेशत: प्राप्तिर्विधानपरिपन्थिनी। एवञ्च न प्रत्यभिज्ञानादविधानम्। न च समुच्चयासंभव:; अदृष्टार्थत्वात्। न च प्रयाजभेदादावृत्त्यसंभवात् संज्ञाया अभेदात् क्वचिद् द्रव्य-देवताऽभावाच्चौपचारिककर्मैक्यमङ्गीकृत्यावृत्तिशब्दप्रयोग: कृत:, अतिदेशतो रूपलाभद्योतनार्थं वचनस्य प्रयोग:। न च-प्रत्यभिज्ञानादविधानम्; कौण्डपायिने त्वनेकगुणविधानेन वाक्यभेदात् कर्मान्तरविधानमिति वाच्यम्; नाराशंसप्रभृतिषु संज्ञान्तरदर्शनेन प्रत्यभिज्ञाया असिद्धत्वात्। इतश्च प्रयाजभेद:; अनुमन्त्रणप्रकारदर्शनपरे वाक्ये ''प्राकृतैरादित:'' इति विशेषणसामर्थ्यात्प्रयाजानामप्राकृतत्वं प्रतीयते; इतरथाप्रयाजानामनुमन्त्राणाच्च प्राकृतत्वात्-''अनुमन्त्रणं प्राकृतैरि'' ति विशेषणमसमञ्जसं स्यात्। न

चानुमन्त्रणप्रकारभेदप्रदर्शनमेवानेन मन्त्रेण क्रियत इति युक्तं वक्तुम् ; अतिदेशेन सर्वेषु प्राकृतग्रहणव्यवच्छेदाद्यदर्शनात् , प्रयाजभेदे त्वनुमन्त्रणमात्रापेक्षायामतिदेशप्राप्तेर्न मन्त्रान्तरापेक्षेति दर्शयितुं प्राकृतग्रहणं युक्तम्। एवं समुच्चयमापाद्योदाहरणं दर्शितमिति द्रष्टव्यम्। यत्र वा समुच्चयस्तद्विषयोदाहरणम्। *ननु*-निःस्वभावत्वमुक्त्वा ''तथाचैकस्मिन्'' इत्यनेन ज्ञानस्य सम्यक्त्वमुक्तम्, तदसङ्गतमित्याशङ्क्याह- *तदेव प्रपञ्चयतीति*।। कथमिन्द्रियाविषयत्वम् ? स्वरूपेण ब्रह्मणः प्रत्यक्षत्वादित्याशङ्क्य, साभिप्रायमवतारयति- *ज्ञानानन्दप्रत्यगिति*।। ''उच्यते'' इत्यादिना युक्तेः संभावनाहेतुत्वमुक्तम, तदसंबन्धम् : ब्रह्मविषयत्वाभावेन तत्संभवहेतुत्वाभावात्, तथा निश्चायकत्वाभावाच्चेत्याशङ्क्य व्याचष्टे- *उच्यत इत्यादेरिति*।। सामान्यद्वारेणेत्यनेनैकविषयत्वमुक्तम्।।

ननु-ब्रह्मपदार्थस्य प्रमाणान्तराप्रसिद्धत्वात्तदुद्दिश्य लक्षणकथनं नोपपद्यत इत्याक्षिप्ते ''येषामि'' त्यनेनोदाहरणप्रदर्शने विवक्षा प्रदर्शिता, तथा कारणस्य प्रसिद्धत्वेन तत्र ब्रह्मशब्दप्रयोगादनवच्छिन्नस्य शब्दार्थत्वं गम्यत इत्युक्तम् , तदयुक्तम् : चोदितानन्वयदोषस्यापरिहृतत्वात् , अनुपपन्नत्वाच्च; ब्रह्मोद्देशेन हि लक्षणं वक्तव्यम् , उद्देशकपदार्थत्वाच्च तस्यैव प्रसिद्धिर्वक्तव्येत्याशङ्क्याभिप्रायमाह- *येषां वेदान्तवाक्यानामिति*।। निगमादिवशात्प्रतीतेरुक्तत्वात्सत्यादिरूपेणाप्रसिद्धेरप्रमितिरभिप्रेता ; अनिर्धारितविशेषसामान्यप्रसिद्धिरस्तीत्यर्थः। जिज्ञासाशब्दस्वारस्यादुत्तरानपेक्षत्वेन प्रसिद्धिरस्तीति तथोक्तम् , इह तु विशेष्यस्यान्यतो लाभात्पदार्थप्रमित्यपेक्षत्वात्तावन्मात्रप्रसिद्धिर्वक्तव्येति द्रष्टव्यम्। कथं तर्हि निर्धारितविशेषप्रमितिरिति? तदाह- *सन्निहितेति*।। *ननु*-सन्निहितानां स्वरूपलक्षणपरत्वात् कथं तत्र प्रमितिरिति? तदाह- *प्रतिपादनपरमिति*।। तर्हि स्वरूपलक्षणाभावः ; अनुवादकत्वाल्लक्षणस्य, इत्याशङ्क्याह- *अर्थादिति*।। *अयं भावः*-प्रमाणविधावुद्देश्यस्य प्रमाणसिद्धिमात्रमपेक्षितम् , नतु प्रमितिः। तदुक्तम्- *''धर्मे सामान्यतस्सिद्धे इति''*।। तथा यत्र त्वनूद्य प्रमाणरूपं विधीयते, तत्रानूद्यमानस्य प्रमाणान्तरात् प्रसिध्या प्रयोजनमाह-आहवनीयादिष्विति।। येषां वेदान्तवाक्यानामित्यादिग्रन्थमाक्षिपति- *ननु स्वाध्यायेति*।। अयमेवाभिप्राय इति कथं गम्यते? इत्याशङ्क्योत्तरग्रन्थसंवादमाह- *तदाहेति*।। *ननु जगत्कारण इति*।। प्रसिद्धं हि लक्षणम्, एकत्वञ्च न प्रसिद्धमिति भावः। ''एकत्वनिर्देशात्'' ''तदर्थमात्रस्य च विधित्सितत्वादि''ति च हेतुमात्रं निर्दिष्टम्, न साध्यम् ; न चास्योत्तरसाध्यान्वयासिद्धत्वाल्लक्षणत्वेन विधित्सितत्वायोगादित्याशङ्क्यावतारयति- *अयमर्थ इति*।। ''दध्ना जुहोती'' तिवदप्राप्तमेकत्वं प्रतीयत इति भावः। गुणवाक्ये विधेयान्तराभावाद् गुणपरत्वम् , इह तु विधेयान्तरभावात् कथमेकत्वप्रमितिः? इति चोदयति- *नन्वनुवाद इति*।। विधेयान्तरभावेऽप्येकत्वं विना कारणत्वमात्रस्य लक्षणत्वायोगात्कारणविषयानुमानवदत्र प्रमाणान्तराभावादत्रैव प्रतीयत इति परिहरति- *जगत्कारण इति*।।

अनुवादसामर्थ्यादिति।। अन्यपरवाक्ये प्रतीतिसामर्थ्यादित्यर्थः। *अनुवादेति*।। *वैयर्थ्यम्=प्रयोजनशून्यत्वमित्यर्थः।। *ननु*-उभयलक्ष्यत्वेऽपि वाक्यभेदस्समान इति, तत्राह- *तथाहीति*।। ''तत्र ब्रह्मशब्दप्रयोगादि'' त्यनेन संज्ञान्तरकथनं प्रतिभाति, तथा सति बृहत्यर्थानुगमो न भवेत् , ब्रह्मप्रतिपादकत्वञ्च न स्यादित्याशङ्क्य साभिप्रायमवतारयति- *न संज्ञा-संज्ञीति*।।

विज्ञानं तर्हीति।। नीलोत्पलवत्सामानाधिकरण्योपपत्तेर्न सामान्यव्यक्तिभाव इति भावः। *ननु*-अत्यन्तभेदनिवृत्तिपरं ''नेह नाने'' ति वचनमित्याशङ्क्याह- *गुणस्येति*।।

विज्ञानगुणत्वाभाव इति।। अयं भावः-सामान्यानां कल्पितत्वान्न तेन ज्ञानरूपतेति न गुणत्वं प्रयोजकमिति। *न विज्ञानेति*।। अयं भावः-सामान्याधारत्वमेव प्रयोजकम्, न सत्यसामान्याधारत्वम् ; सामान्याधारत्वे विद्यमानेऽपि तस्य सत्यत्वाभावापराधेन ज्ञानत्वाभावानुपलम्भादिति। यथा मिथ्यारजतसंभिन्नशुक्ते रजतव्यवहारगोचरत्वम्, तद्वदत्रापि, इति चोदयति- *सामान्यस्याभासत्वादिति*।।

इति ऋजुविवरणे जन्माद्यधिकरणं समाप्तम्।।

तत्त्वदीपनम्

श्रीमद्रत्नाचलोद्भूतबोधशैलसुरद्रुमम्। भजे संततसंतापनिर्वापणविचक्षणम्।।

किमेतत्सूत्रं स्वरूपलक्षणं प्रतिपादयति? उतोपलक्षणम्? नाद्यः ; कारणत्वस्य स्वरूपतानुपपत्तेः, नेतरोऽपि ; स्वरूपाद्बहिर्भूततया गमकस्योपलक्षणत्वात्स्वरूपलक्षणं वाच्यम् , न च तत्प्रतिपाद्यत इत्यसामञ्जस्यमित्याह- *जगदिति*।। आनन्दात्मकब्रह्मणो मायाविनः कारणत्वप्रतिपादकत्वा-दुभयपरत्वमस्येत्यर्थः। 'ग्रामो गन्तव्यः' इत्युक्ते गमनस्य यथा साध्यत्वम् , नान्यस्य ; तद्वदत्रापि प्रकृति-प्रत्ययार्थयोरन्यतरस्यासाध्यत्वमित्याशङ्क्याह- *वृत्तेति*।। प्रतीयमानस्यार्थस्य पुंतन्त्रत्वा-भावाद्विचारलक्षणया तत्कर्तव्यतापरं भाष्यमित्यर्थः। अथवा ज्ञानकर्तव्यतापरत्वस्याश्रितव्यत्वात् कथं शास्त्रं श्रोतव्यमित्यर्थाभिधानम्? इत्याशङ्क्याद्यपक्षाभिप्रायेणेत्याह- *वृत्तेति*।। लक्षणविचारस्य प्रतिज्ञाननुसारित्वमाशङ्कते- *ननु ब्रह्मेति*।। प्रतिज्ञातं प्रतिपाद्यं नाप्रतिज्ञातम्, ब्रह्मविचारश्च प्रतिज्ञातः, स एव प्रतिपाद्य इत्यर्थः।। किं तेषां मुखतोऽप्रतिज्ञातत्वम्? उतार्थात्? इति विकल्प्याद्याङ्गीकारेण द्वितीयं दूषयति- *अत आहेति*।। लक्षणविचारस्य प्रतिज्ञामाश्रित्य तस्य प्राथम्यमाक्षिपति- *ननु पञ्चानामिति*।।

प्राथम्यहेतुं शङ्कते- *फलभूततयेति*।। विचाराधीनशक्तितात्पर्यवद्वाक्योत्थज्ञानाधीना-विद्यानिवृत्तिविशिष्टतया ब्रह्मस्वरूपस्य फलत्वमित्यर्थः। फलत्वमप्रयोजकमित्याह पूर्ववादी- *न साधनेति*।। साधनाभावे साध्यानिष्पत्तेः साधनादेः प्राथम्यमित्यर्थः। साध्यस्य साधनाधीनत्वमङ्गीकृत्य साधनादिविचारस्य प्राथम्यं दूषयति- *अत आहेति*।। साधनादेः साध्यसिद्धिहेतुत्वात् तस्यैव प्राथम्यम्, न साधनस्येत्याशङ्क्याह- *ब्रह्मप्रमाणमिति*।। ब्रह्मज्ञानसाधनमित्यर्थः। *ब्रह्मफलमिति*।। ब्रह्मज्ञानफलमिति यावत्। विशिष्टविचारप्रतिपत्तेर्विशेषणब्रह्मप्रतिपत्तिसापेक्षत्वात् प्रथममस्य स्वरूपनिर्णय इत्यर्थः। स्वरूपनिर्णयस्यापि प्रमाणादिसापेक्षत्वमविशिष्टमित्याशङ्क्याह- *ब्रह्मस्वरूपेति*।। प्रमाणादिप्रति-पत्तेर्ब्रह्मप्रतिपत्तिसापेक्षत्ववन्निर्विशेषस्वरूपप्रतिपत्त्याख्यनिर्णयस्य न युक्त्यादिप्रतिपत्त्यपेक्षत्वमिति वैषम्यमित्यर्थः। स्वरूपविचारस्य प्राथम्ये हेत्वन्तरमाह- *प्राधान्येनेति*।। प्रमाणादिविचाराणां साध्यत्वमन्यार्थम्, न तथा ब्रह्मस्वरूपविचारस्येत्यर्थः। पूर्वोत्तरसूत्रयोरुत्थापकलक्षणः संबन्ध इत्याह- *वृत्तमिति*।। भगवत्प्रयोगस्यार्थमाह- *जिज्ञास्येति*।। ''उत्पतिं च विनाशं च भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति''। एष भगवच्छब्दार्थः। सूत्रस्य स्वरूपपरत्वमाक्षिपति- *नन्वस्येति*।। इदमस्य लक्षणमित्यव्याप्तिपरिहारेण लक्ष्यलक्षणयोरविनाभावः, इदमेवानेन लक्ष्यमित्यतिव्याप्तिपरिहारेणेति योजना। प्रमाणयुक्त्यभावोऽसिद्ध इत्याह- *तत्राहेति*।। युक्तिवदेव प्रमाणमपि लक्षणनिर्णयोपयोगि, तत्सूत्रणं कस्मान्नोक्तम्? इत्याह- *अपिशब्दादिति*।। प्रमाण-युक्त्योरत्र सूत्रण उत्तरग्रन्थवैयर्थ्यमित्याशङ्क्याह- *अत्रेति*।। वेदवाक्यानामन्यपरत्वयुदासेन

ब्रह्मण्येव तात्पर्यं समन्वयार्थः। प्रत्यक्षादिविरोधाद् वेदान्तानां ब्रह्मण्यप्रामाण्यमिति शङ्कायां तद्विरोधनिराकरणमविरोधार्थः। बहुव्रीहिर्द्विविधः-तदगुणसंविज्ञानोऽतद्गुणसंविज्ञानश्चेति। तत्रायं तद्गुणसंविज्ञान इत्युक्तं भाष्ये, तस्यार्थमाह- *विशेष्येति*।। 'लम्बकर्णो देवदत्तः' इत्यत्र देवदत्तैकदेशमेव विशेषणं कृत्वा देवदत्तो बोध्यते, स तदगुणसंविज्ञान इत्यर्थः। अतद्गुणसंविज्ञानबहुव्रीहेरनङ्गीकृतौ को हेतुः? इत्याशङ्क्योक्तं टीकाकृता-" *तदगुणेति*।। चित्रा गावो यस्य स चित्रगुरित्युक्ते न चित्रगवां समासार्थत्वम्, किंतु देवदत्तस्य, तथा चात्रातदगुणसंविज्ञानस्वीकारे स्थिति-भङ्गयोः समासार्थत्वम्, न जन्मन इत्यापद्यते, तथा च जन्मकारणमन्यत्, इति न जन्म-स्थिति-भङ्गकारणं ब्रह्म सिध्येदित्यर्थः। जन्म-स्थिति-भङ्गमित्येकवचनमाक्षिपति- *नन्वेवमपीति*। तद्गुणसंविज्ञानस्वीकारेऽपीत्यर्थः। "द्वेयकयोर्द्विवचनैकवचने" इति सूत्राद् द्वित्वविवक्षायां द्विवचनम् : एकत्वविवक्षायामेकवचनमिति न्यायविरोधादेकत्वनिर्देशानुपपत्तिरित्यर्थः। भिन्नेष्वपि तरुषु संहत्युपाधौ वनव्यपदेशवदत्रापि समाहारोपाधावेकवचनं युज्यत इति, अत आह- *अत आहेति*।। संहतिप्रधानत्वगमकमाह- *तृतीयेति*।। नपुंसकलिङ्गनिर्देशादित्यर्थः।।

"प्रपञ्चस्य को नामादिरि" त्यत्र किमुत्पत्तिः प्रतिषिध्यते? उत प्राधान्यम्? आद्ये प्रतिवचनस्याननुरूपत्वम्, द्वितीयेऽप्यनुक्तोपालम्भ इत्याशङ्क्य तात्पर्यमाह- *जन्मादीनामिति*।। पूर्वकालकोटिः प्रागभावः, तद्वत आदिर्भवति, प्रपञ्चस्य पूर्वकालकोटिविहीनत्वान्न तज्जन्म-स्थिति-भङ्गानामन्यतमस्य प्राधान्यमिति टीकार्थः। जन्मनश्चादित्वमिति चशब्दप्रयोगाद् हेत्वन्तरसमुच्चयार्थत्वं लक्ष्यते, न च तथा; तस्य प्रागनिर्दिष्टत्वात्, इत्याशङ्क्य शङ्काव्यावृत्तिश्चशब्दार्थ इत्याह- *परिहरतीति*।। श्रुतौ निर्देशः श्रुतिनिर्देश इत्यर्थः। श्रुतौ जन्मन आदित्वनिर्देशेऽपि सूत्रे तस्यादित्वं कस्मात्? इत्याशङ्कां परिहरिष्यन्नाह- *भाष्यमिति*।। "यतो वे" त्यादिवाक्यार्थनिरूपणायेदं सूत्रं प्रवृत्तम्, ततश्च श्रुतौ जन्मन आदित्वस्य निर्दिष्टत्वात् सूत्रेऽपि तथा भवितव्यम्; अन्यथा श्रुति-सूत्रयोरननुरूपतापातादिति टीकार्थः।।

जनित्वा स्थित्वा नश्यतीति न नियन्तुं शक्यमिति शङ्कते- *ननु सर्वमिति*। विद्युदादौ स्वसत्तालाभानन्तरं विनाशदर्शनादत्रापि तथात्वमिति न जन्म-स्थिति-भङ्गानां क्रम इत्यर्थः। प्रत्यभिज्ञाविरोधान्नैषा शङ्का समुत्तिष्ठतीत्याह- *अत आहेति*।। प्रकृतिप्रत्ययात्मकमेकं पदम्, तत्र प्रकृत्येदमा प्रत्यक्षादिसन्निधापितं जगन्निर्दिश्यत इत्युक्तम्, तदाक्षिपति- *नन्विदंशब्द इति*। 'अयं घटः' इत्यादाविदंशब्दस्य पुरोऽवस्थितवस्तुमात्रविषयत्वदर्शनादिदमः सकलजगत्परामर्शित्वमयुक्तमित्यर्थः। सर्वनाम्नः प्रसिद्धवस्तु-मात्रपरामर्शित्वं स्वभावः अपवादे त्वन्यथात्वमित्याशयेनाह- *अत आहेति*।। "अस्ये"त्यत्र प्रत्ययस्य संबन्धोऽर्थ इत्युक्तम्, तदाक्षिपति- *ननु जन्मादीनामिति*।। किं सतो जन्मादिसंबन्धः? उतासतः? नाद्यः ; जन्मनः प्राक् सत्त्वासंभवात्, सतो नाशानुपपत्तेश्च। नाप्यसतो जन्म-नाशादिसंभवः संभवी; नृशृङ्गवत्,

नापि स्थितिसंबन्धः ; तस्य भेदादिनाऽनिरूपणादिति चोद्यार्थः। अनिर्वचनीयत्वादस्मिन् मते सर्वोऽपि संबन्धः संभवतीत्याह- *तदाहेति*।। लक्षणनिरूपणार्थं सूत्रमित्युक्तम्। तत्र जन्मादिकं लक्षणम्? उत तत्करणत्वम्? इति विकल्प्याद्येऽपि निरूप्यमित्याह- *ननु जगज्जन्मेति*।। किं संबन्धिनो जन्मादेर्लक्षकत्वम्? उतासंबन्धिन इति किंशब्दार्थः। संबन्धित्वे लक्षकत्वमेवानुपपन्नमित्यभिप्रेत्य संबन्धपक्षं दूषयति- *न तावदिति*।। जगतो जन्मादेश्च स्वतोऽसंभवात्कारणाधीनत्वम् , ततश्च कारणत्वस्य लक्षणताश्रयणाज्जन्मादेर्लक्षणत्वनिरसनमित्याह- *कारणेति*।। कारणत्वस्यापि न लक्षणत्वं युज्यत इत्याह- *नन्विति*।। लक्षणान्तर्गतमित्युपलक्षणमित्यर्थः। न तावत् कारणत्वस्य लक्ष्यस्वरूपत्वम्; सप्रतियोगित्वात् , नापि लक्षणान्तर्गतत्वम्'; ब्रह्मणो निर्धर्मकत्वादिति काक्वा सूच्यते।। प्रतिबन्द्योत्तरं वक्तुं तामाह- *ननु गृहस्येति*।। अधिकरणस्य किं स्वरूपत्वम्? उतोपलक्षणत्वम्? इतिकिंशब्दार्थः। आद्यमनूद्य दूषयति- * लक्ष्य इत्यादिना*।। *न हीति* ।। * क्रियावेशात्मकत्वम्= क्रियाश्रयत्वमित्यर्थः कारणत्वस्य न ब्रह्मलक्षणत्वम् ; तस्य निर्धर्मकत्वात्, इत्युक्तमुपसंहारव्याजेन निरस्यति *तस्मादिति*।। ''आत्मन आकाशः संभूतः'' इत्यादिना ब्रह्मणः कारणत्वप्रतिपत्तेरित्यर्थः। प्रकारान्तरेण लक्षणमाक्षिपति- *ननु निमित्त*। उपादानकारणस्य निमित्तकारणाद् भेदेनावस्थानाद् ब्रह्मशब्दस्य स्वार्थान्वयाभावप्रसङ्गादिति संबन्धः। न केवलमुपादानकारणपृथक्त्वाद् ब्रह्मशब्दार्थसंभवः, किं तु कार्यस्यापि पृथग्भावादित्याह *जगदिति* । द्वितीयं दूषयति- *नापीति*।। निमित्तकारणस्य पृथग्भावेऽपि ब्रह्मणः सर्वज्ञत्वादिरूपत्वाद् व्यपदेशसंभव इत्याशङ्क्याह- *उपादानेति*।। पक्षद्वयेऽपि साधारणं दूषणमाह- *सत्यं ज्ञानमिति*।। ''निमित्तत्वेऽनन्तमि'' त्यनुपपन्नं स्यात् ; उपादानस्य पृथग्भावात् , तथा केवलोपादानत्वेऽप्यनन्ततानुपपत्तिस्तुल्या ; निमित्तस्य पृथग्भावात्। तथा ज्ञानमिति चानुपपन्नम् ; उपादानस्य चेतनत्वादित्यर्थः। तृतीयं दूषयति- *नापीति*।। उभयकारणात्वस्य लक्षणतया प्रमाणत्वात् तत्र प्रमाणाभावो न दोषायत्याशङ्क्याह- *प्रमाणान्तरेति*-।। प्रमाणान्तरधिगतं गन्धवत्त्वादिकं पृथिव्यादिकं लक्षयति: अन्यथाऽऽश्रयासिद्धेरित्यर्थः तर्हि सिद्धमेव लक्षणमस्त्वित्याशङ्क्य, किमनुमानतः सिद्धम्? उतागमात्? नाद्य इत्याह-प्रमाणान्तराधिगतं गन्धवत्त्वादिकं पृथिव्यादिकं लक्षयति; अन्यथाऽऽश्रयासिद्धेरित्यर्थनः। *तावदिति*।। घटादौ निमित्तोपादानयोर्भेदोपलम्भात् सपक्षाभाव इत्याह- *दृष्टान्त इति* । किं भूत-भौतिकपक्षीकारेणाभिन्ननिमित्तोपादानत्वं साध्यते ? उत भूतमात्रं पक्षीकृत्य? नाद्य इत्याह- *महाभूतेति*।। निमित्तोपादानभेदग्राहिप्रत्यक्षादि- विरोधान्नेत्थमनुमानमुदेतीत्यर्थः। किं चाभिन्ननिमित्तोपादानस्या-प्रामाणिकत्वान्न तदनुवादेन ब्रह्मप्रतिपादनमित्याह- * न तदिति*।। न द्वितीय इत्याह- *भूतेति*।। भूतपञ्चकस्य कार्यत्वेनाभिन्ननिमित्तोपादानत्वं नानुमेयम् ; भौतिकेषु व्यभिचारादित्यर्थः। नाप्यागमात् तत्सिद्धिः ; उभयकारणत्वसाधकागमानुपलब्धेरिति। द्रष्टव्यम्।। टीकायामुपादानमात्रमुपलक्षणमुक्तमिति प्रतिभातीत्याशङ्क्याह- *निमित्तत्वस्यापीति नान्यनिबन्धनेति*।। नान्यनिबन्धनैवेत्यर्थः पञ्चम्या

उपादानार्थत्वे न निमित्तार्थत्वम्, निमित्तार्थत्वे नोपादानार्थत्वमित्याशङ्क्याह- *उभयत्रेति*।। ''जनिकर्तुः प्रकृतिरि'' ति सूत्रे प्रकृतौ, '' हेताविं'' ति एकस्य निमित्ते पञ्चम्या विधानं लक्ष्यत इत्यर्थः । एकस्य निमित्तोपादानत्वमप्रसिद्धमिति न लक्षणमित्युक्तं निरस्यति- *भूतेति*।। सद्वस्त्वनुगममात्रेण कथमेकप्रकृतिकत्वमनुमीयते? जीवादौ व्यभिचारादित्याशङ्क्याह- *तथाहीति*।। महाभूतानि, स्वानुगतोपादानानि, भावत्वे सति विकारत्वात; घटादिवदिति विवक्षितम्। प्रध्वंसव्यावृत्त्यर्थम्- '' भावत्वे सती'' त्युक्तम्। आत्मव्यावृत्त्यर्थम्- *विकारत्वादि'' ति।। विकारत्वमुपपादयितुम्- '' विविधे'' त्युक्तम्। *विविधत्वम्*=विभक्तत्वमित्यर्थः किं तदनुगतमुपादानमिति वीक्षायां ' सन् घटः' सन् पटः इति सदनुरक्ततया घटादेः प्रतीयमानत्वात् सदेवानुगममुपादानमित्यभिप्रायेण सद्वस्तुप्रकृतिकानीत्युक्तमाचार्येणेति द्रष्टव्यम्।।

सत्त्ववद् द्रव्यत्वादीनामप्यनुगतानां तत्रोपलम्भात् किमत्रोपादानमिति न ज्ञायते, तदर्थमाह- * द्रव्यत्वादीति*।। द्रव्यत्वादय एवाभेदा द्रव्यत्वाद्यभेदा न भिद्यन्त इत्यभेदाः, अनुवृत्ता इत्यर्थः। द्रव्यत्वावान्तरजातीयपृथिवीत्वादिकमादिशब्दार्थः। द्रव्यत्वादीनामपि विभक्तत्वात् समानधिकृतत्वोपलम्भाच्च न पृथगनुगतिर्युज्यते, किंतु तदध्यस्ततयेत्यर्थः। सत्तासामान्यस्यापि व्यभिचारित्वादनुपादानत्वमिति शङ्कां निरस्यति *सद्वस्त्विति*।। सच्छब्देन न पराभिमतं सामान्यं विवक्षितम् , किन्तु सद्द्रव्यम् , सन्तो गुणाः, सन्ति कर्माणि, सत्त्वं सत् , विशेषाः सन्तः सन् समवायः, इत्यादिरूपेण सर्वत्र प्रथमानः सच्छब्दार्थः, तच्चोपादानमित्यर्थः। भौतिकानां भूतोपादानताया अनुभवसिद्धत्वात्सद्वस्तु सर्वप्रकृतिरिति कथमुक्तम्? इत्याशङ्क्य, भूतानां सदुपादानतया सदात्मकत्वाद् भौतिकानामपि सत्प्रकृतिकत्वमस्खलितमित्याह- *भौतिकानामिति* ।। व्यावृत्तस्य कारणत्वकल्पनायां गौरवम् , इतरत्र लाघवम्, अतोऽप्येकमेवोपादानमित्याह *अत इति*।। भवत्वेकस्य सकलोपादानत्वम् ; तथाऽपि कथमभिन्ननिमित्तोपादानत्वम्? तत्राह- *तस्येति।। प्रेक्षा पूर्व कारणमंस्येति प्रेक्षापूर्वम्, तच्च जनितं चेति प्रेक्षापूर्वजनितम्। जनितपदं तु स्पष्टीकरणार्थम्। प्रेक्षापूर्वमसिद्धमिति शङ्कां निराकर्तुम्- '' कार्यत्वादि'' त्युक्तम्। घटादिषु व्यभिचारमाशङ्क्याह- *न चेति*।। मृदाद्यवस्थचैतन्यस्योपादानत्वात् कुलालाद्यवस्थचैतन्यस्य निमित्तत्वात् तयो श्चैक्यान्न व्यभिचार इत्यर्थः। सुखाद्युत्पत्तावात्मोपादानम्, अदृष्टादि निमित्तम्, ततश्च साध्यविकलो दृष्टान्त इति शङ्कते- * अदृष्टादीति* ।। अदृष्टादिलक्षणनिमित्तस्यात्मलक्षणोपादानाद भेद इत्यक्षरार्थः। साध्यशब्दार्थानभिज्ञो भवानित्याह- *नोपादानेति*।। अभिन्नोपादानाधिष्ठातृकत्वस्य साध्यत्वान्न साध्यवैकल्यमित्यर्थः। अनुमानस्य निरवद्यतासाधनफलमाह- *तस्मादिति* ।। न केवलमनुमानादुभयकारणत्वसिद्धिः, किंतु श्रुतितोऽपीत्याह- * सृष्टीति* '' तदात्मानं स्वयमकुरुत'' बहु स्यां प्रजायेये'' त्यादिवाक्यादुपादानत्वम्। ''तदैक्षते'' तीक्षणपूर्वकस्त्रष्टृत्वश्रवणादधिष्ठातृत्वं च लक्ष्यत इत्येकस्योभयकारणत्वं सिद्धमित्यर्थः। परिणामिनः

क्षीरादेरचेतनत्वदर्शनादुपादानस्याधिष्ठातृत्वं विरुद्धमित्येकदेशिमतमुत्थापयति- *अत्रेति*। ब्रह्मणः परिणामित्वस्यैवासिद्धेर्न विरोध इत्याह- *तैरिति*।। प्रमाणाभावान्न परिणामित्वमित्यर्थः प्रमाणाभावोऽसिद्ध इति शङ्कते- *सृष्टीति* ।। किं तत्र मुखतः परिणामप्रतिपत्तिः ? उतानुपपत्त्या ? इति विकल्प्याद्यं प्रत्याह- *न तत्रेति* ।। द्वितीयमनुवदति- *सत्यत इति* ।। विवर्तव्यावृत्त्यर्थम्- *सत्यत इति* विशेषणम्। '' तदात्मानं स्वयमकुरुत'' सच्च त्यच्चाभवदि'' त्याद्याः श्रुतयो ब्रह्मणो वस्तुतो जगदापत्तिं कथयन्तीत्यर्थः। उदाहृतश्रुतिषु ब्रह्मणोऽन्यथाभावमात्रं प्रतीयते, न वस्तुतः, अन्यथाभावमात्रं विवर्तपक्षेऽपि संगच्छत इत्याह- * न तास्विति*।। अश्रवणमप्रयोजकमिति शङ्कते- *स्वत इति*। वेदान्तास्तावत्प्रमाणम्, प्रमाणत्वं च सम्यगनुभवसाधनत्वम् , ततश्च वेदान्तगम्यसृष्टेस्त थाभूतत्वमाश्रयणीयम्, इतरथा तेषामप्रामाण्यापातादित्यर्थः। विकल्पासहत्वात् तथा भूतत्वमेव न निरूपणपथमवतरतीत्याह-* किमिदमिति* ।। तथाभूतत्वं नाम किं सत्त्वम्? आहो स्वोपाधौ नास्तिताविरोधित्वम्? इति किंशब्दार्थः। आद्यमनुवदति- * सत्यत्वमिति*।। प्रमाणगम्यस्य व्यभिचारित्वान्नैवमित्याह- * न मिथ्येति*।। विशिष्टेऽर्थे इति*।। मिथ्यात्वविशिष्टरजत इत्यर्थः। इतोऽपि न प्रमाणगम्यन्त्वं सत्यत्वमित्याह- *स्वप्नेति*।। ''अथ रथान् रथयोगान् पथः सृजते- इति स्वाप्नसृष्टेः श्रौतत्वेऽपिः सत्यत्वाभावादित्यर्थः। द्वितीयमनुवदति स्वोपाधाविति*।। स्वोपाधौ=स्वाधिष्ठाने इति यावत्। सृष्टेर्मायाविलासत्वेऽप्येवंविधसत्यत्वसंभवान्न परिणाम-सिद्धिरित्याह-* न मायेति*।। साम्यमेवाह-*सृष्टेरिति*।। इतोऽपि न स्वोपाधौ नास्तिताविरोधितया सत्याः स्वयं स्युरित्यर्थः।*स्वाश्रयोपाधाविति*।। स्वाश्रये स्फटिकादिलक्षणे धर्मिणि सति=जपाकुसुमलक्षणे उपाधौ सतीत्यर्थः। '' नेति ने'' त्यादिना ब्रह्मणि निषिद्धायाः सृष्टेः कथं तत्रास्तिताविरोधित्वम्? इत्याशङ्क्याह- *सृष्टिरपीति*।। प्रतिभासविरोधाद् न स्वरूपनिषेधो युक्त इत्यर्थः। निषेधश्रुतेस्तर्हि का गतिरित्याह-* किं त्विति* ।। ब्रह्मणो यादृशं सत्त्वम्, तादृशसत्त्वाभावो विषय इत्याह- *परमार्थेति* ।। सृष्टेः सत्यत्वाभावेऽसद्विषयत्वेन सृष्टिश्रुतेरप्रामाण्यापत्तिरिति शङ्कते-* ननु मिथ्येति*।। अरजतं रजततया यद् बोधयति तदप्रमाणम् , न सद्रजतबोधोऽपीति प्रसिद्धम्। तथा च श्रुतिः सत्यां सृष्टिमसत्यतया बोधयन्त्यप्रमाणं स्यात्, न त्वसत्यं तथा बोधयन्तीत्याशयवानाह- *न च प्रमाणेति*।। अनभिज्ञत्वं स्पष्टयति- *प्रमाणमिति*।। फलितं दर्शयति- *न चेति*।। सदसत्त्वं विना प्रतीति त्वानुपपन्नेत्याशङ्क्याह- *यथेति*।। यदि घटपदेनैव तदस्तित्वं बोध्यते, घटोऽस्तीति पौनरुक्त्यं स्यात्, यदि घटपदं नास्तितामेव ब्रूयात्, तदा घटोऽस्तीति व्याघातः, घटो नास्तीति पौनरुक्त्यं च । तथा च कीर्तितं धर्मकीर्तिना-

''घटोऽस्तीति न वक्तव्यं सन्नेव हि घटो यतः। नास्तीत्यपि न वक्तव्यं विरोधात्सदसत्त्वयोः।।'' इति।

तथा च घट इति साधारणाकारप्रतिपत्तिवत् , सृष्टेरपि तथा प्रतिपत्तिं को निवारयेदित्यर्थः।

प्रमाणगम्यत्वं न सत्यत्वप्रयोजकम्: स्वाप्नसृष्टौ व्यभिचारादित्युक्तमयुक्तम्, तस्या अपि प्रमाणागम्यतया सत्यत्वादिति मन्वानं प्रत्याह- *न हीति *।।" अथ रथान् रथयोगान् पथ: सृजते" इति सृष्टे:' श्रवणेऽपि न सत्यत्वम्, " न तत्र रथा:" इत्यादिवाक्यात्प्रत्याक्षाच्च बाधादित्यर्थ:। स्वप्नसृष्टिश्रुते: स्वयंज्योतिष्ट्वपरत्वाद् न सत्यतायां प्रामाण्यमित्याशङ्क्य, तात्पर्यवैधुर्यमत्रापि सममित्याह- *प्रयोजनेति *।। न केवलं सृष्टे: फलराहित्यम्, किं त्वनर्थोऽपीत्याह- *अनर्थेति *।। प्रपञ्चसृष्ट्यभावे कर्मकाण्डस्य प्रत्यक्षादेश्च प्रामाण्यं न स्यात् , अस्ति च प्रामाण्यमिति सृष्टे: सत्यत्वमित्याशङ्क्याह- *न चेति *।। मीमांसकमतावष्टम्भेन प्रामाण्यं समर्थयते-जगदिति *।। जगदुत्पत्त्यादे: श्रुत्यादिप्रसिद्धत्वान्नित्यत्वमयुक्तम्, तथा च प्रत्यक्षादिप्रमाण्यानुपपत्त्या सृष्टिश्रते: सृष्टिपरत्वमित्याशङ्क्याह- *सृष्टीति *।। सृष्टिश्रुत्या य: सृष्ट्यवगम:, तं विनाऽपि सृष्टे: सिद्धत्वान्न तत्र शब्दप्रामाण्यमित्यर्थ:। सृष्टेरन्यत: सिद्धत्वाद् यथा न शास्त्रप्रतिपाद्यत्वम्, तद्वदभेदस्यापीति शङ्कते- *अभेदस्यापीति *।। अप्रमेयत्वमादि — शब्दार्थ:। सोपहासमुत्तरमाह- *केयमिति *। व्याकुलतामेवाह- *न हीति *।। अध्ययनविध्युपात्ततया सृष्टिश्रुतेरानर्थक्यासंभवात्परमार्थविषयत्वं वक्तव्यमित्याह- *किं तर्हीति *।। परमार्थप्रपञ्चविषयत्वं विनापि सृष्टिश्रुते: साफल्यमित्याह- *प्रत्यक्षादीति *।। सृष्टिश्रुतेरद्वितीयसिद्धि: प्रयोजनमिति संबन्ध:। श्रुत्यैव तत्सिद्धे: किं सृष्टिश्रुत्या? इत्याशङ्क्याह–प्रमाणान्तरेणेति *।। सृष्टिश्रुतेर्विरोधनिरासद्वारा तत्प्रयोजनत्वम् , इतरस्य तु साक्षादित्यर्थ:। विरोधशङ्कायां तन्निरास:, सैव कथमिति ? अत्राह- *प्रत्यक्षादीति *।। कथं तर्हि विरोधनिरास:? तत्राह– *मिथ्यात्वेति *।। मिथ्यात्वापादनं वा कथमिति ? अत्राह- *ब्रह्मण्येवेति *।। "यतो वे" त्यादिना वाक्येन जगदुत्पत्ति-स्थितिविनाशानां ब्रह्मतन्त्रत्वं तावत्प्रतीयते। तथाच मृद्व्यतिरेकेण घटाद्यसत्त्ववद् ब्रह्मव्यतिरेकेण जगन्न स्यात्। न च तत्रापि सत् स्यात्; कूटस्थासङ्गस्वरूपविरोधात्। ततश्च प्रतिपन्नोपाधौ निषेधप्रतियोगित्वाद् जगतो मिथ्यात्वमित्यर्थ:।

अद्वितीयसिद्धिस्तत्प्रयोजनमित्यत्र किं गमकम्? तत्राह- *तेनेति *।। उपक्रमोपसंहारपर्यालोचनया सृष्टिश्रुत्यैकवाक्यात् तत्फलमेव फलमित्यर्थ:। भवत्वेकवाक्यत्वं परमार्थविषयत्वं च, तत्राह- *अन्यथेति *।। परमार्थविषयत्वेऽ द्वैतप्रमित्यनुपपत्ते: सृष्टिश्रुतेर्मिथ्याविषयत्वमित्यर्थ:। सृष्टेराभासत्वे रजताभासवत् तद्विषयश्रुत्युत्थज्ञानस्याप्रामाण्यमिति शङ्कते- *सृष्टीति *।। किममुख्यत्वमात्रमाभासत्वम्? उत मिथ्यात्वम्? नाद्य इत्याह- *न सत्येति *।। नापि द्वितीय: ; स्वप्नसञ्जातकामिनीदर्शनवत् प्रामाण्यसंभवादित्यर्थ:। प्रपञ्चस्यासत्यत्वे " सच्च त्यच्चे" ति तद्भाव वचनम्, "इदं सर्वमसृजते" ति सृष्टिवचनं चानुपपन्नं स्यादित्याशङ्क्य, तयोरन्यथासिद्धिमाह- *देवदत्त इति *।। सृष्टिश्रुतौ सत्त्वशब्दाश्रवणवन्मिथ्या- शब्दस्याश्रवणान्न मिथ्यात्वमपीति शङ्कते-कुत: पुनरिति *।। श्रुत्यन्तर-पर्यालोचनया प्रपञ्चमिथ्यात्वप्रतिपत्ते: सृष्टिश्रुतिरसत्यविषयेत्यध्यवसीयत इत्याह- *नासदिति *।। कारणस्य मिथ्यात्वेऽपि जगति किमायातम्? इत्यत्राह- *तदात्मकत्वादिति *।। कारणत्वेन निर्दिष्टतमसो

ज्ञाननिवर्त्याविद्यासामानाधिकरण्यादपि मिथ्यात्वमित्याह- *तदात्मकत्वादिति *।। कारणत्वेन निर्दिष्टतमसो ज्ञाननिवर्त्याविद्या सामानाधिकरण्यादपि मिथ्यात्वमित्याह- *तम इति *।। तमो-मोहादिशब्दैर-विद्याऽस्मिता-राग-द्वेषाभिनिवेशाः संगृह्यन्ते। क्वचित् तमसः कारणत्वम्, क्वचिदविद्यादेरिति कारणवैलक्षण्यमित्याशङ्क्याह- *तमोऽविद्येति *।। मिथ्यात्वे प्रमाणसद्भावात् सत्यत्वे तदभावान्न परिणामसिद्धिरित्युपसंहरति- * तदेवमिति *।। न केवलं मिथ्यात्वे श्रुतिः प्रमाणम्, किन्तु प्रत्यक्षं चेत्याह- *तथा चेति *।। अस्त्यर्थ एवोपाधिरस्त्यर्थोपाधिस्तस्मिन्नित्यर्थः। प्रतिपन्नोपाधौ निषेध्यत्वे मिथ्यात्वम्, तच्च घटेऽप्यस्तित्वोपाधौ प्रतिपन्नस्य तस्मिन्निषेधाद् इदमि प्रतिपन्नरजतस्य तत्र निषेधवदित्यर्थः एकदेशकालसंर्गितया प्रतिपन्न घटस्य देश-कालान्तरसंसर्गो निषिध्यते, न स्वरूपमित्याशङ्क्याह- *देश-कालयोरिति *।। 'देशो नास्ति' कालो नास्ति' इत्ययं प्रतिषेधः किं देशाद्युपाधौ? अस्त्यर्थोपाधौ वा? नाद्यः; देशान्तरा द्यभावात्। नच-तत्राप्युपाधिविशिष्टतया भेदसंभव इत्यपि; उपाधिनिषेधेऽप्यस्य न्यायस्य साम्यात् , उपाध्यन्तरकल्पनायां चानवस्था स्यादित्यर्थः। *निरुपाधिकनिषेधादिति *।। देशाद्यनुपहितास्त्यर्थनिषेधादित्यर्थः। द्वितीये देशादेर्मिथ्यात्वं स्यादित्यर्थः। रजतनिषेधोत्तरकालमियं शुक्तिरितीदमः प्रतिपत्तेरिदमि निषेधो युक्तः, न च तथा घटनिषेधोत्तरकालमस्त्यर्थोपाधिः, इति सोऽपि निषेध्य इत्याशङ्क्याह- *अस्त्यर्थस्येति *।। निषेधाभावे हेतुमाह- * अनुयायिन इति *।। भवत्वस्त्यर्थनिषेधः, तथाऽपि कथं ब्रह्मणि प्रतिषेधः? तत्राह- * अत इति *।। तावेवोपाधी येषां ते तदुपाधयः, ते च घटा श्चेति तदुपाधिघटाः तेषामित्यर्थः ;। उक्तन्या-यमन्यत्रप्यतिदिशति- *एवमिति *। अभावस्य षष्ठप्रमाणगम्यत्वात् कथं प्रत्यक्षत्वम्? इत्याशङ्क्य, धर्मिणः प्रत्यक्षतया तद्विशेषणत्वेनाभावोऽपि प्रत्यक्ष इति तार्किकमतमनुसृत्याह- *अन्याभावेति *।। सर्वे विकारा इति *।। विमता इत्यर्थः। परिकल्पिता इत्युक्ते शून्यवादिनः सिद्धसाध्यता, तदर्थं 'वस्तुनी'त्युक्तम्। व्यावृत्तज्ञानेषु विषयस्य कल्पितत्वाङ्गीकाराद् बौद्धं प्रत्यर्थान्तरता ; तदर्थमाह- *एकस्मिन्निति *।। एतावत्युक्ते यस्मिन् कस्मिंश्चित्परिकल्पिततया सति परिकल्पितत्वासिद्धिः, तदर्थम् ,- ''स्वानुस्यूते'' इति। प्रत्येकमेकस्वभावानुविद्धत्वाद् विभक्तत्वाच्चेति हेतुद्वयम्। वनस्वभावानुविद्धतरुव्यावृत्त्यर्थम्- ''प्रत्येकमि''ति विशेषणम्। न हि प्रत्येकं तरुषु वनमिति मतिः ; किन्तु मिलितेष्वित्यर्थः। विभक्तत्वं च धर्मिसत्तासमानसत्ताकभेदवत्त्वमित्यर्थः। *चन्द्रभेदवदिति *।। चन्द्रविशेषवदित्यर्थः। तत्र हेत्वन्तरमाह- *जडत्वादिति *।। भेदमिथ्यात्वमभिधाय भेदमिथ्यात्वे हेतुमाह- *भेदत्वादिति *।। हेत्वन्तरमाह- *प्रतिपन्नेति *।। विमतम् , मिथ्या, प्रतिपन्नौपाधौ निषिध्यमानत्वात् ; देहात्मभाववत्। असिद्धिं निरस्यति- *अस्थूलेति *।। 'अहं मनुष्यं:' इत्यहंप्रत्ययालम्बने प्रतिपन्नस्य देहात्मभावस्य 'नाहं मनुष्यः' इति तत्रैव निषेधाद् न साधनवैकल्यमित्यर्थः। अनुमानान्तरमाह- *विरोधीति *।। विमतम् , सदसद्विलक्षणम्, विवर्तत्वात्, मायाव्याघ्रादिभाववदिति विवक्षितं हेतुस्वरूपं विरोधीत्यनेन ग्रन्थेन विवृतमित्यर्थः। प्रलयाङ्गीकारवादिनं प्रत्यनुमानान्तरमाह- *प्रलयेति *।। स्वोपाधौ शून्यत्वं समर्थयते- *

प्रलयावस्थायामिति*।! अत्र च कार्यमात्रं धर्मि; अन्यथाऽन्यतरासिद्धिप्रसङ्गात्। कथं तर्हि काले निषेध:? इत्याशङ्क्याह- *सह कालेनेति*।। अविद्यावस्थायां कालसत्त्वेऽपि तन्निवृत्तौ निवृत्तिरित्यर्थ:। अर्थापत्तिं प्रमाणयति- *अर्थापत्तिरपीति*।। मिथ्यात्वे प्रमाणमित्यनुषङ्ग:। तामेवाह- *प्रपञ्चेति*।। मिथ्यात्वमन्तरेणानुपपन्नौ जन्म-विनाशौ मिथ्यात्वं गमयत इत्यर्थ:। अन्यथोपपत्तिं निरस्यति- *अमिथ्येति*।। प्रत्यक्षानुमानागमार्थापत्तिभि: प्रपञ्चो मिथ्येत्युक्तम्, तत्र ज्ञानत्वाविशेषात् प्रपञ्चज्ञानवद् ब्रह्मज्ञानस्यापि मिथ्यात्वमापतेदित्याशङ्क्याह- *न चेति*।। किं तस्य स्वरूपमिथ्यात्वं साध्यते? उत विषयमिथ्यात्वम्? आद्येऽप्यागन्तुकं ज्ञानं धर्मि? उत अनागन्तुकम्? आद्यस्त्वङ्गीक्रियत इत्यभिप्रेत्य परिशिष्टपक्षद्वयं प्रतिक्षिपति- *तत्सत्यमिति*।। तत्-ब्रह्म, सत्यम्=अवितथस्वरूपम् , आत्मान्यत्वात् ; घटादिवत्। वैतथ्याशङ्कां निरस्यति- *आत्मेति*।। अस्थूलादिवाक्येन स्वयं प्रपञ्चो निषिध्यत इत्युक्तमयुक्तम् ; तस्य स्थूलादिव्यतिरेकप्रतिपादनपरत्वादित्याशङ्क्याह- *न चेति*।। किमात्यन्तिकान्यत्वं प्रतिपाद्यते? उत कथञ्चिदिति विकल्प्याद्यं प्रत्याह- *कार्येति*।। द्वितीयं प्रत्याह- *यथेति*।। एवंविधोऽपि प्रतिषेध: क्वचिद् दृश्यत इत्याशङ्क्याह- *तथा चेति*।।

तर्ककुशलेनैकेनोत्प्रेक्षितमप्यपरेण नाङ्गीक्रियते, ततश्च मिथ्यात्वानुमानस्याप्रतिष्ठितत्वम्? उत तर्कविशेषस्य? तत्र द्वितीयाङ्गीकारेणाद्यं दूषयति- *न विचारेति*।। न तर्कं प्रदर्शयितुं विचारशास्त्रं प्रवृत्तम्, किन्तु परोत्प्रेक्षिततर्काणामद्वैतश्रुतिविरोधादाभासत्वद्योतनायेति शङ्कते- *शब्देति*।। तर्कमन्तरेण श्रुत्यर्थव्यवस्थाऽसंभवात् तर्कोऽपि वक्तव्य इत्याह- *तर्हीति*।। सदसत्त्वे एकस्य विरुद्धे इत्याशङ्क्याह- *श्रुत्यर्थस्येति*।। श्रौतेऽर्थे विरोधशङ्काया एवानुदयादित्यर्थ:। सदसत्त्वप्रसञ्जनमिष्टमिति शङ्कते- *सर्वेति*।। अस्मिन् पक्षे विरोधनिराकणं निष्फलं स्यादित्याह- *न ब्रह्मणीति*।। तर्कमन्तरेणाप्यर्थसिद्ध्यङ्गीकारे ब्रह्मण आत्यन्तिकासत्त्वं प्रसज्येतेत्याह- *अत एवेति*।। प्रकृतमुपसंहरति- *तस्मादिति*।। इतिपदपरामृष्टं हेतुमाह- *प्रत्यक्षेति*।। ब्रह्मण: कूटस्थत्वादपि न तात्त्विकपरिणामसिद्धिरित्याह- *प्रशान्तत्वादिति*।। फलविधुरत्वादपि न तस्य सत्यत्वं प्रतिपाद्यमित्युक्तं स्मारयति- *निष्प्रयोजनेति*।। विवर्तशब्देन विवर्तविषयत्वं विवक्षितमिति द्रष्टव्यम्। 'सन् घट:' इति प्रत्यक्षेण घटस्य सत्त्वप्रतीते: कथं मिथ्यात्वम्? इत्याशङ्क्याह- *न चेति*।। अपुरोवर्तिनोऽपि रूप्यस्य पुरोवर्तितया भानवद् घटादेरपि सति समारोपितत्वात् सदात्मना प्रतिभानमविरुद्धमित्यर्थ:। विशेषमिथ्यात्वे सदपि मिथ्या स्यात् ; 'निर्विशेषं न सामान्य' मिति न्यायादित्याशङ्क्य, सत्ताया: सामान्यरूपत्वानङ्गीकृतेर्मैवमित्याह- *घटादीति*।। स्वरूपलक्षणं कथयितुम्- "अस्य जगत:" इत्यादिभाष्यमित्युक्तम्, तदनुपपन्नम् ; उक्तस्यैव लक्षणस्य तत्र प्रतिपत्ते:, इत्याशङ्क्याह- *लक्षणमिति*।। जगत्कारणत्वस्य लक्षणत्वासंभवात् तदनुवादो व्यर्थ इति शङ्कते- *नन्विति*।। किमेतत्स्वरूपलक्षणम्? उतोपलक्षणमिति विकल्प्याद्यं दूषयति- *न तावदिति*।। प्रपञ्चोपाधित्वादिति*।। प्रपञ्चसापेक्षत्वादित्यर्थ:। भवतु कारणत्वस्य सापेक्षत्वम्, तथाऽपि

कथं न विशेषलक्षणम्? तत्राह– *निरूपाधिकेति*।। सापेक्षस्य निरपेक्षस्वरूपत्वासंभवात्तद्धर्मत्वं वक्तव्यम्, न च स्वरूपप्रतीतिमन्तरेण धर्मप्रतिपत्तिर्युक्तेति लक्षणान्तरं वाच्यमित्यर्थः। द्वितीयं दूषयति– *नापीति*।। तटस्थलक्षणस्य सत्यत्वे लक्षणत्वानुपपत्तिः ; लक्ष्य-लक्षणयोः परस्परव्याघातात्, लक्षणस्यासत्यत्वे बाष्पादिवद् गमकत्वानुपपत्तिरित्यर्थः *ननु*–''तस्माज्जगज्जन्मादिकारणत्वमुपलक्षणमित्यत्रोप-लक्षणमित्युक्तत्वाद्विकल्पे तद्दूषणानुपपत्तिरिति–चेत् , *मैवम्* ; उपलक्षणस्यापि सावद्यत्वं दर्शयितुं पुनर्विकल्पादेः संभवादिति द्रष्टव्यम्। कारणत्वस्य सत्यत्वे चोपलक्षणत्वानुपपत्तिरिति वक्तव्यमिति यदुक्तम्, तत्राह– *उपलक्षणत्वेऽपीति*।। विरोध इत्यत्रासत्यत्वादित्यनुषङ्गः। असत्यत्वे कारणत्वस्य लक्षणत्वं न संभवति, असत्यस्य लक्षणत्वादृष्टेरिति शङ्कां निरस्यति– *यद्रजतमिति*।। यद्रजतमभादित्यत्र पुरोवर्तिद्रव्यस्य रजततया भानमेव सत्यं शुक्तिलक्षणम्, न रजतमित्याशङ्क्याह– *असाधारणेति*।। न च–संबन्धः सत्यत्वं चेत्युभयमपि प्रयोजकमिति–शङ्क्यम्; संबन्धे सति सत्यत्वाभावापराधेनालक्षणत्वादृष्टेः। ज्ञानं लक्षकमित्येतच्च निरूपणीयम्–ज्ञानमात्रं लक्षकम्? उतार्थविशेषितम्? नाद्यः ; अतिप्रसक्तेः। द्वितीये मिथ्याभूतस्य लक्षकत्वासिद्धिरित्यर्थः। अचेतनकर्तृकत्वव्यासेधार्थम्–''नाम-रूपाभ्यां व्याकृतस्ये''त्युक्तं भाष्यकृता, तस्यायमर्थः–घटादिव्याक्रियाया नाम-रूपगर्भविकल्पपूर्विकाया दृष्टत्वाद् जगद्व्याक्रियाया अपि तथात्वं कल्प्यते, इति चेतने भावकर्तृकत्वमास्थेयमिति। ''नाम-रूपाभ्यामि''ति विशेषणं परकीयप्रक्रियानिरासार्थमि''त्युक्तम्, काऽसौ परकीयप्रक्रिया? स्वप्रक्रिया वा कथम्? इति शङ्कायामाह– *कार्यप्रपञ्चमिति*।। ''नाम-रूपकर्मात्मकमि''त्यत्र नाम-रूपशब्दाभ्यां शब्दार्थौ कथ्येते, तयोः संबन्धः कर्मशब्दार्थः। गुणवद द्रव्यम्, सामान्यवानचलनात्मकः समवायिकारणताविधुरो गुणः, संयोग-विभागयोरनपेक्षकारणं कर्म, नित्यमेकमनेकसमवेतं सामान्यमिति चत्वारि तत्त्वानि वार्तिककारीयाणाम्। कार्यं महदादि, कारणमीश्वरः, संयोगः समाधिः, विधिस्त्रिषवणस्नानादिः, दुःखान्तो मोक्षः नित्यद्रव्येष्वेव ये वर्तन्ते, विशेषाः, नित्यः संबन्धः समवायः। जीवश्चेतनः, अजीवोऽचेतनः परमाण्वादिः, ज्ञानोत्पादनद्वारा पुरुषं विषय आस्रावयतीतीन्द्रियप्रवृत्तिरास्रवः, इन्द्रियप्रवृत्तिं संवृणोतीति शम-दमलक्षणा प्रवृत्तिः संवरः, नितरां जरयति कल्मषमिति तप्तशिलारोहणादिर्निर्जरः, बन्धः कर्मक्षयः, मोक्षः सततोर्ध्वगमनम्। पारतन्त्र्यं समवायः, प्रमासाधनं प्रमाणम्, प्रमाविषयः प्रमेयम् , अनवधारणज्ञानं संशयः, उद्देश्यं पयोजनम्, व्याप्तिवेदनस्थानं दृष्टान्तः, प्रामाणिकत्वेनाभ्युपगमः सिद्धान्तः, अवयवाः प्रतिज्ञादयः व्याप्तबलादनिष्टप्रसञ्जकस्तर्कः, तर्कपूर्वस्तत्त्वाध्यवसायो निर्णयः, वीतरागकथा वादः, प्रत्येकसाधनवती विजिगीषुकथा जल्पः, स्वपक्षस्थापनविधुरा विजिगीषुकथा वितण्डा, अहेतवो हेतुवदाभासमाना हेत्वाभासाः, विपरीतार्थकल्पनोपपत्त्या वचनविघातश्छलम्, स्वव्याघातकमुत्तरं जातिः, कथकाशक्तिसूचकं निग्रहस्थानम्। ज्ञानेन्द्रियं त्वक्चक्षुर्नासिका-जिह्वा-श्रोत्रलक्षणम् , कर्मेन्द्रियं वाक्पाणि-पाद-पायूपस्थाख्यम्, तन्मात्रशब्देन शब्द-स्पर्श-रूप-रस-गन्धाः कथ्यन्ते, महाभूतानि पृथिव्यादीनि,

महत् प्रकृतेराद्यं कार्यम्, अव्यक्तं प्रकृतिः, पुरुष आत्मा। कस्तर्हि प्रामाणिकः पक्षः इत्याह– *कस्तर्हीति*।। ''तन्नाम-रूपाभ्यामेव व्याक्रियते''ति श्रुत्यनुसारित्वाद् नाम-रूपात्मकं तत्त्वमित्याह– *तदाहेति*।। कर्मपदाभिधेयस्य शब्दार्थसंबन्धस्य संबन्धान्तर्भावमङ्गीकृत्य नामरूपाभ्यामित्युक्तम्। उत्पद्यमानस्याभिधेयत्वाद् रूपात्मनोत्पत्तिमङ्गीकृत्य नाम-रूपात्मनोत्पत्तिमाक्षिपति– *यद्यपीति*।। तृतीयार्थमाह– *इत्थंभूतमिति*।। अथवेत्थंभूतमिति दृश्यमित्यर्थः। नामात्मनोत्पत्तौ प्रमाणाभावादिति द्रष्टव्यम्। आधुनिकस्य कार्यस्य स्वनामगर्भविकल्पव्याकृतिपूर्वकत्वेऽप्याद्यकार्ये कथं तत्सिध्यति? इत्याशङ्क्याह– *अयमर्थ इति*।। *विकल्पितमिति*।। विशेषितमित्यर्थः। कारणत्वं तटस्थलक्षणमित्यङ्गीकृत्य स्वरूपलक्षणमाक्षिपति– *नन्विति*।। किं सर्वशक्तित्वं स्वरूपलक्षणम् ? उत सर्वज्ञत्वम्? अथ वोभयत्वम्? इति किंशब्दार्थः। स्वरूपलक्षणापेक्षायां तज्जिज्ञासा स्यात्, सैव कुतः? इत्याशङ्क्याह– *न चेति*।। तर्हि उपलक्षणमेव स्वरूपलक्षणम् , तत्राह– *न च यत्रेति*।। चन्द्रस्वरूपप्रतिपत्त्यभाव उपलक्षणेनापि तत्प्रतिपत्त्यदर्शनादित्यर्थः। एवं प्रश्नप्राप्तिमभिधायाद्यं दूषयति– *न तावदिति*।। द्वितीयमुत्थाप्य दूषयति– *सर्वज्ञत्वमिति*।। *सर्पोपाधिकत्वादिति*।। सर्वापेक्षधर्मत्वात् सर्वज्ञत्वस्येत्यर्थः। तृतीयोऽप्येतेनापास्त इति। इतोऽपि न सार्वज्ञ्यं स्वरूपलक्षणमित्याह– *कथं चेति*।। किं षड्भिः प्रमाणैः सर्वं जानातीति सर्वज्ञः? उत प्रत्यक्षेण नाद्य इत्याह– *न तावदिति*।। किं युगपत् प्रत्यक्षादिना सक्रमेण? नाद्य इत्याह– *तेषामिति*।। अचिन्त्यमहिम्नीश्वरे प्रत्यक्षादीनां युगपत् प्रवृत्तिमाशङ्क्याह– *सर्वस्येति*।। क्रमपक्षं दूषयति– *सत्स्वपीति*।। किं चित्प्रत्यक्षेण जानाति, किंचिल्लङ्गेन, किंचिदितरेण, इत्येवं प्रत्यक्षादिप्रवृत्तावपि न यथाऽस्माकं सार्वज्ञ्यम्, तथेश्वरस्यापीत्यर्थः। प्रत्यक्षेणेश्वरो जानातीत्यत्रापि वाच्यम्–किं बाह्यप्रत्यक्षेण सर्वं जानाति? उतान्तरेण? आहो साक्षिणेति? तत्राद्यस्तावदसङ्गत इत्याह– *इन्द्रियाणामिति*।। ईश्वरस्य सर्वं सन्निहितम्–किञ्चत्संयोगेन, किञ्चित् संयुक्तसमवायेन, किञ्चिदन्यथेत्याशङ्क्याह– *संयुक्तेति*।। द्वितीयं प्रत्याह– *मानसमिति*।। *आत्मनोऽन्यत्रेति*।। आत्मनस्तद्धर्माच्चान्यत्रेत्यर्थः। बहिः परतन्त्रं मनः ; अन्यथाऽस्माकमपि तेन सर्वदर्शित्वं स्यादित्यर्थः। इन्द्रियमात्रस्य विप्रकृष्टार्थाग्राहित्वेऽपि विशिष्टस्येन्द्रियस्य विप्रकृष्टग्राहित्वमुचितमित्याशङ्क्याह– *न चेति*।। तथाचोक्तम्–

''यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्। दूरात्सूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता।।'' इति।

किं च सहकारिवशादपि नेश्वरस्याशेषग्रहणम् ; धर्मलक्षणसहकार्यभावादित्यभिसन्धिः। अस्मच्चक्षुष आलोकसहकृतस्यैव रूपग्रहणयोग्त्वेऽपि मार्जारादिचक्षुष आलोकनिरपेक्षस्य यथा रूपग्राहकत्वम्, तथाऽस्मदयोग्यमीश्वरो जानातीत्याशङ्क्याह– *मार्जारेति*।। अखिलपरिभावनासंस्कारसहकृतं मनः सर्वग्राहकमित्याशङ्क्याह– *न चेति*।। भावनाऽपि किं ज्ञाते? उताज्ञाते? न तावदज्ञात इत्याह– *प्रथममिति*।। आद्यं प्रत्याह– *परिभावनाया इति*।। इतोऽपि न कृत्स्नपरिभावनेत्याह–

अतीतेति।। अनवधारणमेवाह– *एतावदिति*।। *अनवधारणादिति*।। अवधारणयोग्यताभावादित्यर्थः। तृतीयं दूषयति– *न चेति*।। प्रदीपः स्वसंसृष्टं यथा ग्राहयति, न भविष्यदादि, तथाऽऽत्मस्वरूपस्यापि वर्तमानमात्रसंसर्गित्वात् तद्ग्राहित्वमित्यर्थः। बाह्येन्द्रियेण मनसा वा ब्रह्मणः सर्वदर्शित्वं यद्यपि न घटते; तथाऽपि स्वरूपज्ञानेन सर्वदर्शित्वं घटत इत्याह सिद्धान्ती– *उच्यत इति*।। स्वरूपज्ञानस्य संसृष्टवर्तमानमात्रग्राहित्वाद् न सर्वग्राहित्वमित्युक्तं निरस्यति– *सर्वस्येति*।। चैतन्योपाधिभूता अखण्डसत्त्वप्रधाना माया वर्तमानसकलविषयाकारेण परिणमते, तस्मिन् परिणामे प्रतिबिम्बितं चैतन्यं सर्वं पश्यति ; आध्यासिकसंबन्धात्, ततश्च वर्तमानसकलविषयत्वं सिद्धमित्यर्थः। *ननु*– एवमप्यतीतविषयज्ञानाभावात् कथं सर्वदर्शित्वम्? तत्राह– *एवमिति*।। स्मृतिमूलत्वेनाभिमतानुभवस्य नित्यत्वात् कथं तत्संस्कारोत्थस्मृत्युपपत्तिः? इत्याशङ्क्याह– *स्वमायेति*।। स्वमायायाः परिणामः स्वमायापरिणामः, स उपाधिर्यस्याः, सा तथोक्ता। चैतन्यस्य विषयदर्शने हेतुत्वात्तदुपाधित्वम्। मायापरिणामप्रतिबिम्बितं चैतन्यं स्मृतिशब्देनाभिलप्यते। वर्तमानकाले मायापरिणामावच्छिन्नचैतन्यस्य विषयसाधकत्वात् परिणामनाशे तदवच्छिन्नचैतन्यस्यापि नाशात् संस्कारसहकृता मायाऽतीतविषयाकारेण परिणमते, तस्मिन् परिणामे प्रतिबिम्बितं चैतन्यं सर्वं पश्यतीत्यतीतसर्वदर्शित्वमित्यर्थः। अस्मदादिष्वनुभूतविषयस्य नियमेनानुपलब्धिवदनुपलब्धिमाशङ्क्याह– *अनुभूतेति*।। असंप्रमोषे हेतुमाह– *अनावरणेति*।। ''पश्यत्यचक्षुः स शृणोत्यकर्णः'' ''स्वाभाविकी ज्ञानबलक्रिया च'' 'त्याद्यागमादनावरणज्ञानत्वं निश्चीयत इत्यर्थः। आगामिसर्वविषयत्वमुपपादयति– *तथेति*।।

ननु संभावनामात्रमेतत् , न च प्रमाणं पश्याम इत्याशङ्क्याह– *यः सर्वज्ञः सर्वविदिति*।। सामान्यरूपेण सर्वज्ञत्वं विशेषरूपेण सर्ववित्त्वम्। सर्वज्ञत्वस्य सप्रतियोगिकत्वान्न स्वरूपत्वमित्युक्तमनुवदति– *ननु सोपाधिकेति*।। सोपाधिकत्वमसिद्धमित्याह– *नानेनेति*।। अनेन सर्वज्ञशब्देन च विज्ञप्तिमात्रं विवक्षितमिति संबन्धः। कर्तृत्वमत्रोपचरितम्, न मुख्यमित्याह– *मात्रमिति*।। सप्रतियोगिकत्वं निरस्यति– *अविषयेति*।। प्रकाशस्य स्वभावत्वेऽपि यथा सविता प्रकाशत इति व्यपदेशः, तद्वदित्यभिप्रायेणाह– *आदित्यादीति*।। ज्ञप्तेर्निष्प्रतियोगिकत्वे कथं सकलदर्शित्वम्? तत्राह– *सर्वेति*।। ज्ञप्तिर्ज्ञानमिति व्युत्पत्त्यङ्गीकाराद् न ज्ञानं सप्रतियोगिकं यद्यपि; तथाऽपि विषयस्य संसर्गे भासकमादित्यवत्, ततः सकलदर्शित्वाभिधानं युक्तमित्यर्थः। आनन्दस्यापि स्वरूपत्वात् कथं न स्वरूपद्वयम्? इत्याशङ्क्याह– *विज्ञानमिति*।। आनन्द-ज्ञानयोरभेदाद् न स्वरूपद्वयप्रसक्तिरित्यर्थः। अथवा– सर्वज्ञशब्देनाविषयोपाधिकं यद्विज्ञानम्, तदेव ब्रह्मस्वरूपलक्षणं विवक्ष्यत इति संबन्धः। ज्ञानेनेति ज्ञानस्य सप्रतियोगिकत्वप्रतिपत्तेर्न स्वरूपत्वमित्याशङ्क्य, करणव्युत्पत्त्यनङ्गीकरणान्नैवमित्याह– *विज्ञप्तीति*।। षण्णां विकाराणां न सूत्रे ग्रहणं युक्तम् ; तन्मूलश्रुतौ तेषामप्रतिपत्तेः, इत्याशङ्क्य, श्रुतिमूलत्वमसिद्धमित्याह– *ननु निरुक्तेति*।। स्थितेर्जन्मोत्तरकालत्वात् कथं जगतः स्थितिकाले

जन्मादिसंभावना भाष्यकृतोक्ता? इत्याशङ्कायामुक्तम्– *पृथिव्यप्तेजःस्वित्यादि*।। तत्र भौतिकवद्भूतानामपि जन्मादिसंभवात् तद्धेतुत्वेन ब्रह्मकल्पनेत्याशङ्क्य, भूतमात्रकारणत्वेन तत्कल्पनम्? उतोभयकारणत्वेन? उभयथाऽप्यसंभव इति दर्शयति– *यास्कपरिपठितानामिति*।। सूत्रमूलं यास्कवाक्यम्। यदनुमानादिमूलमिष्यते, तदेवास्य सूत्रस्य मूलमस्तु, किमनुमानादिमूलनिरुक्तवाक्यस्य मूलकल्पनया? इत्यर्थः। तस्मादाद्यः परिशिष्यत इत्याह– *तत्रेति*।। भूतानामपि विकारसंभवात् तदधिगमोऽपि प्रत्यक्षेण किं न स्यादिति? अत्राह– *न महाभूतेति*।। अपञ्चीकृतभूतानामतीन्द्रियत्वान्न तद्विकारा अस्मिन्प्रत्यक्षतां भजेरन्निनत्यर्थः। तर्हि प्रत्यक्षयोग्यविकाराणामेव ग्रहणम्, तत्राह– *तत्रेति*।। भूतोत्पत्त्यादीनां प्रत्यक्षयोग्यत्वात् कथं त्वन्मतेऽपि तत्कारणविषयसूत्रप्रणयनम्? इत्याशङ्क्याह– *श्रुताविति*।। अस्मिन्मते सूत्रमूलायाः श्रुतेरपौरुषेयत्वादनपेक्षत्वमित्यर्थः। सूत्रस्य यास्कवाक्यमूलत्वे हेत्वन्तरमाह– *किञ्चेति*।। किं सर्वेषां सूत्राणां यास्कवाक्यमूलत्वम्? उतास्यैव? नाद्य इत्याह– *श्रुत्यर्थेति*।। उत्तरसूत्रेषु श्रुतिवाक्यानामेवोदाहृत्य विचार्यमाणत्वात् तन्मूलत्वमित्यर्थः। द्वितीयं दूषयति– *श्रुतिरेवेति*।। श्रुतेरनन्यापेक्षत्वात्तन्मूलत्वकल्पनया चैकरूप्यम्; इतरथा कस्यचित्सापेक्षमूलत्वम्, कस्यचिदन्यथात्वमिति वैरूप्यं स्यादित्यर्थः। उपलक्षणस्यातिव्याप्तिं शङ्कते– *ननु भूतेति*।। अभिन्ननिमित्तोपादानत्वस्य ब्रह्मलक्षणत्वाद् मायायाश्चाधिष्ठातृत्वाभावात् कथमतिव्याप्तिः? इत्यपि न वाच्यम्; उपादानत्वमात्रं लक्षणमित्यादायातिव्याप्तेः शङ्क्यमानत्वादित्यर्थः।।

मूलकारणत्वमेव कथं मायायाः? तत्राह– *मायां त्विति*।। प्रकृतिशब्दोऽन्यथाऽपि घटत इति शङ्कते– *प्रक्रियत इति*।। 'रूढिर्योगमपहरती'त्युत्सर्गः, अपवादात्त्वन्यथात्वमिति शङ्कते– *आत्मन इति*।। निरपेक्षप्रकृतिद्वयानुपपत्तेः प्रकृतिशब्दस्य करणपरत्वमित्यर्थः। श्रुत्योर्दौर्बल्ल्य-प्राबल्यनिमित्तभावाद् न प्रकृतिशब्दोऽन्यथयितुं शक्यत इत्याह– *न तुल्येति*।। प्रकृतिश्रुत्यनुरोधेन पञ्चम्येव कस्माद् नान्यथा व्याख्यायते? इत्यत्राह– *मायेति*।। 'सावकाश-निरवकाशयोर्निरवकाशं बलवदि'ति न्यायात् प्रकृतिशब्दस्य च सावकाशत्वात् स एवान्यथाक्रियत इत्याशङ्क्य, सावकाशत्वमितरत्रापि तुल्यमित्याह– *निमित्तेऽपीति*।। एवं श्रुत्योः साम्यमभिधाय प्रकृतिश्रुतौ विशेषमाह– *दृश्यमानेति*।। समानजातीययोरुपादानोपादेयभावनियमात् चिदचितोश्च विजातीयत्वादुपादानोपादेयभावानुपपत्तेर्माया-जगतोस्तत्त्वनिश्चय इत्यर्थः। श्रुत्यन्तरे मायायाः करणत्वप्रतिपत्तेः प्रकृतिशब्दोऽपि करणपर इति शङ्कते– *इन्द्र इति*।। न च–मायाया एकत्वात् तत्र बहुवचनानुपपत्तिरिति–शङ्क्यम्; अवस्थाभेदापेक्षया तदुपपत्तेः। न च विजातीययोरात्म-जगतोरुपादानोपादेयतानुपपत्तिः; गोमय-वृश्चिकादेर्विजातीयत्वेऽपि तथाभावदृष्टेरित्यर्थः। तृतीयाश्रवणमात्रमङ्गीकरोति– *सत्यमिति*।। तर्हि मायायाः मरणत्वादनुपादानत्व-मित्याशङ्क्याह– *आत्मन इति*।। "आत्मनि विज्ञाते सर्वमिदं ज्ञातं स्यात्" बहु स्यां प्रजायेये"त्याद्यनेकवाक्यपर्यालोचनयाऽऽत्मन उपादानत्वप्रतिपत्तेस्तद्विरुद्धं मायाया उपादानत्वमित्याशयेन

शङ्कते– *निरपेक्षेति*।। बहूनां तन्तूनां पटं प्रत्युपादानत्वं दृष्टम्, ततो विशेषमाह– *निरपेक्षेति*।। यथा द्वयोः सूत्रयोरेकरज्जुद्रव्यं प्रत्युपादानत्वम्, तथा माया-ब्रह्मणोरपि मिलितयोरुपादानत्वे न किंचिदवद्यमस्तीत्याह– *तर्हीति*।। मायाया उपादानत्वप्रतिपादनफलमाह– *अत इति*।। ब्रह्मोपादानवादिमते मायाशब्दः प्रज्ञायां वर्तते? उत बुद्धौ? आहो मन्त्रादौ? अथवाऽन्यत्र? इति विकल्प्याद्यमुत्थापयति– *मायेति*।। ''माया प्रज्ञा तथा मेधे''त्यत्र मायाशब्दस्य प्रज्ञापरत्वेनाम्नानादित्यर्थः। तर्हि प्रज्ञायामेवातिव्याप्तिरित्याशङ्क्याह– *सा चेति*।। ''प्रज्ञानं ब्रह्मेत्यादिश्रुतेरित्यर्थः। मायाशब्दस्य प्रज्ञापरत्वमन्वय-व्यतिरेकविरुद्धमित्याह– *नान्वयेति*।। कौ तावन्वय-व्यतिरेकाविति? अत्राह– *परिदृश्यमानेति*।। प्रतिपन्नोपाधिबाधिते स्वप्नप्रपञ्च इत्यर्थः। इतोऽपि न माया प्रज्ञेत्याह– *लोकसंवेदनेति*।। विरोधं व्यनक्ति– *तर्हीति*।। प्रज्ञावति मायाशब्दप्रयोगस्य निन्द्यमानत्वादपि न प्रज्ञापरत्वमित्याह– *गर्हन्तीति*।। मायाशब्दस्य प्रज्ञापरत्वेऽपि न ब्रह्मप्रज्ञापरत्वमित्याह– *बुद्धीति*।। ''मनो महान्मतिर्ब्रह्मा भूर्बुद्धिः ख्यातिरीश्वरः। माया प्रज्ञे''त्यत्र हैरण्यगर्भबुद्धिपर्यायत्वेन मायाशब्दस्मरणादित्यर्थः। मायाशब्दस्य बुद्धौ रूढिमाश्रित्योक्तम्, संप्रति तस्यामप्युपचारात् प्रयोग इत्याह– *स्वप्नेति*।। इतोऽपि न ब्रह्मचैतन्यवाची मायाशब्द इत्याह– *अपि चेति*।। द्वितीयमुत्थापयति– *बुद्धिरेवेति*।। बुद्धेरनुपादानत्वान्न तत्रातिव्याप्तिरित्यभिसन्धिः।

किं बुद्धिशब्दः परिणामपरः? उत परिणामिपरः? उभयथाऽप्यसंभव इत्याह– *न प्रकृतीति*।। *कार्यत्वेनोभयोरपि प्रकृतित्वायोगात् प्रकृतिशब्दसमानाधिकृतस्य मायाशब्दस्य न बुद्धिपरत्वमित्यर्थः। तृतीयमनुवदति– *मन्त्रेति*।। अन्वय-व्यतिरेकविरोधान्न मन्त्रादेर्मायाशब्दवाच्यत्वमित्याह– *न दृश्यमानेति*।। तुरीयेऽपि तदन्यत् किं परमार्थसत्? उतानिर्वचनीयम्? इति विकल्प्याद्यमवतारयति– *तथापीति*।। मायाशक्तेः परमार्थत्वात् शक्ति-शक्तिमतोश्चाभेदान्नाति-व्याप्तिरिति शङ्कार्थः। परमार्थत्वमसिद्धमित्याह– *न नासदिति*।। प्रागवस्थाया अनिर्वचनीयत्वेऽपि न तद्विषयो मायाशब्दः संभवेत्, हस्त्यश्व-रथादिषु तत्प्रयोगादित्याशङ्क्याह– *लोक इति*।। ज्ञाननिवर्त्याविद्यासामानाधिकरण्यादपि न माया सत्यमित्याह– *तरत्यविद्यामिति*।। यस्मिन परमेश्वरे हृदि निवेशिते योगी कार्यरूपेण विततां मायां तरति, तस्मै नम इति संबन्धः। द्वितीये तत्रातिव्याप्तिर्दुर्वारेत्युपसंहरति– *तस्मादिति*।। अतिव्याप्तिशङ्कया: कः समाधिः? इत्याशङ्क्य मतभेदं दर्शयति– *त्रैविध्यमिति। अत्रेति*।। जगत्कारण इत्यर्थः। त्रैविध्यमेवाह– *रज्ज्वा इति*।। संयुक्तसूत्रद्वयं रज्ज्वा यथोपादानम्, तथा मायाविशिष्टं ब्रह्म कारणमित्येकः पक्षः। पक्षान्तरमाह– *देवात्मेति*।।*स्वगुणैः=सत्त्वरजस्तमोलक्षणैरित्यर्थः। पूर्वत्र माया-ब्रह्मणोः समप्राधान्यम्, अत्र तु ब्रह्मणः प्राधान्यम्, मायायाश्चोपसर्जनत्वमित्यर्थः। सकलजगदाकारेण विवर्तमानमायाधिष्ठातृत्वं ब्रह्मलक्षणमिति पक्षान्तरमाह– *जगदुपादानेति*।। एवं मतभेदमभिधायातिव्याप्तिं निरस्यति– *तत्रेति*।। भवतु परतन्त्रत्वम्,

ततः किमिति? अत आह– *ततश्चेति*।। आश्रयोपाधीति*।। आश्रयस्याज्ञानस्य सत्ताहेतुरित्यर्थः। विवर्तत इत्येतद्व्यावर्त्यां शङ्कामाह– *केचित्त्विति*।। परिणाम-विवर्तयोर्भेदासिद्धौ ब्रह्मविवर्तो विश्वं न परिणाम इति कथमुक्तम्? इत्याशङ्क्याह– *एकस्येति*।। पूर्वस्वभावे स्थिते कथं तद्विपरीतरूपावभास इति? अत्राह– *असत्येति*।। भवत्वेवं भेदः, ततः किमिति? अत आह– *तत्रेति*।। किं विवर्तस्य प्रामाणिकत्वम्? उत परिणामस्य? इति विमर्शार्थः। परिणाम एव प्रामाणिक इत्याह– **सृष्टीति।। श्रुत्यर्थमेव विविच्य ब्रूहीत्याह– *सा खल्विति*।। पूर्वरूपपरित्यागं विना रूपान्तरापत्त्यभावं दर्शयितुं ''ज्ञानानन्दे''त्यादि विशेषणम्। ज्ञानानन्दादेः स्वभावत्वात् त्यागानुपपत्तिरित्यर्थमभिप्रेत्य पक्षान्तरमाह– *आहोस्विदिति*।। आद्यं प्रत्याह– *तत्रेति*।। वस्तु स्यादिति*।। मुक्तौ कार्यरूपाभावात् शून्यताप्रसक्तिरिति शेषः। रुचकस्य स्वस्तिकाकारपरिणामवत् कार्यस्य ज्ञानाद्याकारेण परिणामान्न शून्यताप्रसक्तिरिति शङ्कते– *सृष्टीति*।। स्वस्तिकस्यापि पुनरन्यथाभाववदानन्दादिरूपस्याप्यन्यथाभावशङ्का दुष्परिहारेत्याह– *अनिर्मोक्षेति*।। अन्यथाभावस्य निमित्ताधीनत्वाद् मुक्तौ च निमित्ताभावात् कथमन्यथात्वशङ्का? इत्याशङ्क्य, परिणाम एवानुपपन्न इत्याह– *अज आत्मेति*।। द्वितीयमनुवदति– *अथेति*।। तर्हि, अस्मदिष्टसिद्धिरित्याह– *एवं तर्हीति*।। विवर्तवाचकपदाभावात्कथं तत्प्रतिपादकत्वं श्रुतेः? इत्यत आह– *शुक्तिकेति*।। *तल्लक्षणत्वादिति*।। पूर्वरूपापरित्यागेन रूपान्तरापत्तिलक्षणत्वाद्विवर्तस्येत्यर्थः। सृष्टिश्रुतेः सृष्टिमात्रोपक्षीणत्वान्न विवर्तसिद्धिरिति शङ्कते– *अथेति*।। वाक्यान्तरपर्यालोचनया सृष्टेविवर्तत्वनिश्चय इत्याह– *तथापीति*।।

व्यवस्थितब्रह्मवाक्यैरिति।। कूटस्थत्व-नित्य-निरवयवत्वादिप्रतिपादकवाक्यैरित्यर्थः।। निरवयवस्यापि परिणामित्वोपलम्भाद् ब्रह्मणोऽपि परिणामित्वमिति योऽपीति*।। सावयवमृदादेः स्वपरिणामोपलम्भात्कथं निरवयवस्यापि परिणामः? तत्राह- *तथाहीति*।। उक्तमर्थं सदृष्टान्तमुपसंहरति- *तस्मादिति*।। परिणामो दुर्निरूप इत्याह- *स वक्तव्य इति*।। किं पूर्वरूपे स्थिते परिणामः? उत नष्टे? न तावदाद्यः ; तथाभावविरोधात्, द्वितीये पूर्वस्य नष्टत्वात् कस्य परिणामः? किं मूर्च्छितावयवत्वं परिणामः? आहो वस्त्वन्तरसंयोगः? उत परिस्पन्दः ? उत गुणान्तरोदयः? किंवा पूर्वरूपानुषक्तद्रव्यान्तरोदयः? इति वाच्यम्। आद्येऽपि किं स्वावयवानां संयोगान्तरापत्त्या संमूर्च्छितावयवत्वम्, उतावयवान्तरसंयोगेन? इति विकल्प्योभयमप्यनूद्य दूषयति- *यदि तावदित्यादिना*।। अस्मिन्पक्षेऽवयविनः परिणामासिद्धिश्चेत्याह- *न चावयवानामिति*।। अवयवानां संयोगान्तरेण तत्संमूर्च्छितत्वम्, तदन्तरेण परिणामो निरूपयितुं न शक्यत इति योजना। परिणामावस्थान्तरादिशब्दाः पर्याया इति द्रष्टव्यम्। द्वितीय-तृतीय-चतुर्थान्निरस्यति- *न चेति*।। प्रतिज्ञातार्थे हेतुमाह- *ब्रह्मणीति*।। तत्रैव हेत्वन्तरमाह- *आकाश इति*।। पञ्चममुत्थापयति- *अथेति*।। उपादानकारणं तच्छब्दार्थः। हेम्नि द्रव्यान्तरोदयसंदर्शनात् तस्य परिणामित्वेऽपि तदवयवपरिणामः कीदृश इति वचनीयमित्याह- *तत्र

किमिति*।। अन्त्यं दूषयति- *न तावदिति*।। आद्यं दूषयति- *नापि रुचकेति*।। रुचकस्योभयपरिणामित्वं किं न स्यात्* तत्रोभयानुगमदर्शनात्, इत्याशङ्क्याह- *अवयवेति*।। रुचकेऽनुगमनम्, तस्येत्यर्थः। रुचकेऽनुगतो योऽयं हेमावयवी, तस्मिन्नवयवानामनुगमादु रुचकेऽनुगमप्रतिभास इत्यर्थः। अवस्थान्तरप्राप्तिरेव परिणाम इति शङ्कां निरस्यति- *न च रुचकेति*।।

संयोगभेद एव परिणाम इत्याशङ्क्याह- *न चेति*।। संयोगे सत्यप्याकाशे परिणामबुद्ध्यदर्शनादित्यर्थः। रुचकस्यावयवपरिणामत्वमित्याशङ्क्याह- *न चेति*।। अवयवपरिणामस्य प्रत्यक्षतोऽसिद्धावप्यनुपपत्त्या तत्कल्पनमिति शङ्कते- *अथेति*।। अनुपपत्तिं स्पष्टयति- *आश्रयेति*।। विकल्पासहत्वान्नैतदित्याह- *नैतत्सारमिति*।। किमाश्रितविकल्पमात्रस्याश्रयविकारपुरःसरत्वम्? उत विकारविशेषस्य? नाद्य इत्याह- *अवयवीति*।। वस्तुतोऽवयवानामवयव्यनधीनत्वेऽपि प्रतिभासमाश्रित्य तत्तन्त्राणामित्युक्तम्। द्वितीयमनुवदति- *अवयवीति*।।

जन्म-विनाशव्यतिरिक्तो योऽवयविविकारः, स आश्रयविकारपुरःसर इत्यर्थः। घटावयवेषु घटत्वजातिसमवायं विनाऽप्यवयविनि तद्भाववत् परिणामोऽपि किं न स्यात्? इत्याह- *नावयविनीति*।। अवयवावयविनोरभेदाद् अवयविपरिणामावस्थायामवयवेष्वपि परिणाम आश्रयणीय इति शङ्कते- *नन्ववयवानामिति*।। अन्यथोपपत्त्या दूषयति- *जातीति*।। दृष्टान्तं विवृणोति- *न हीति*।। अनुपलब्धश्चावयवपरिणाम इत्याह- *न चेति*।। अदर्शनमेव स्पष्टयति- *नहीति*।। *कार्यान्तरावभास इति*।। पटसाध्यरज्जुद्रव्यलक्षणकार्यान्तरावभास इत्यर्थः। *अतन्त्वात्मनेति*।। अन्यथाभावाख्य-कार्यात्मनेत्यर्थः। तन्तूनां पटसाध्यरज्जुद्रव्येऽनुगमादर्शनाद् रज्जुद्रव्यमेव तत्कार्यमित्या-शङ्क्यान्यथासिद्धिमुक्तां स्मारयति- *पटकार्य इति*।। अवयवानां पृथक् परिणाममङ्गीकृत्य ब्रह्मणः परिणामं दूषयति- *किंचेति*।। निरुपाधिकत्वमुपपादयति- *निरवयवेति*।। अवयविसंयोग पुरःसरत्वादव-यवि-परिणामस्यावयवपरिणामपुरःसरत्वमित्युक्तमनुवदति- *यत्त्विति*।। अलक्तकनिष्ठारुणिम्नः स्फटिके भानवत् संयोगो वस्तुतोऽवयवसमवेतः सन्नवयविनि भातीत्युच्यते? किं वा तत्र संयोगान्तरमुत्पाद्य तेनेति? तत्राद्यं दूषयति- *तत्रापीति*।। द्वितीयं दूषयति- *नापीति*।। पट-रज्ज्वोः संयोगसमवायेऽवयवानामपि संयोगित्वं दृष्टमित्याशङ्क्याह- *अवयवानामिति*।। अवयवानामवयव्यनुगमेन हेतुना संयोगानुगमयान्यथासिद्धत्वादिति योजना। अवयविसंयोगेऽवयवानामपि संयोगित्वभानं संयोगानुगमः, तस्येत्यर्थः। संयोगस्याव्याप्यवृत्तित्वादवयवनिष्ठ एव संबन्ध इति शङ्कते- *अवयवेष्विति*।। कार्योदयान्यथानुपपत्त्या संयोगस्यावयविनिष्ठत्वमाश्रयणीयमित्याह- *नावयविभ्यामिति*।। अवयविवृत्तित्वे बाधकं शङ्कते- *अवयविसमवाय इति*।। अववविन्यारम्भकातिरिक्तावयवास्वीकारादित्यर्थः। *ननु* अनुपपत्तिरत्रापि समेत्याह- *तर्हीति*।। निरवयवे परिणामानुपपत्तिश्चेत्, तर्हि ब्रह्मापि सावयवमेष्टव्यम् ; अन्यथा "तदात्मानं स्वयमकुरुते" त्यादेरसंभवादिति शङ्कते- *कथं पुनरिति*।।

विकल्पासहत्वान्नैतदित्याह- *उच्यत इति *।। किमवयवावयविनोरुभयोरपि स्वप्रकाशत्वम्? उतान्यतरस्य? नाद्य इत्याह- *अवयवेति *।। द्वितीयं दूषयति- *अन्यतरस्येति।। श्रुतिविरोधादपि नांशांशिभाव इत्याह- *श्रुतिश्चेति *।। श्रौतत्वात् क्रियादिविधुरताया अभ्युपगमश्चेत्, तर्हि तत एव क्रियादिमत्त्वमप्येष्टव्यमिति शङ्कते- *नियन्तृत्वादीति *। ''यः पृथिवीमन्तरो यमयती''ति नियन्तृत्वं श्रूयते। ''पादोऽस्य विश्वा भूतानि'' ''चतुष्पादष्टशफः'' इत्यादौ सावयवत्वमित्यर्थः।। सक्रियत्व-निष्क्रियत्वादिप्रतिपादकश्रुत्योर्विरुद्धत्वाद् यथार्थत्वानुपपत्तेरकस्यास्तात्त्विकविषयत्वमिति व्यवस्थाऽऽस्थेयेत्याह- *तर्हीति *।। तत्त्वं क्रियावत्त्वम्, अतत्त्वं क्रियाशून्यत्वम्। मायया क्रियावत्त्वादि, वस्तुतस्तद्वैपरीत्यमित्यर्थः।। वैपरीत्यं किं न स्यादिति? अत्राह- *मायाभिरिति *।। क्रियावत्त्वाद्यभ्युपगमे प्रयोजनाभावादितरत्र प्रयोजनसंभवादपीत्थमेव व्यवस्थेत्याह- *चेतनस्येति *।। इतोऽपि न परिणामः प्रतिपाद्यत इत्याह- *विपरीतस्वरूपेति *।। ''तत्सृष्ट्वा तदेवानुप्राविशदि''त्यत्र सर्गोत्तरकालं प्रवेशः श्रूयते, परिणामपक्षे पूर्वरूपस्य नष्टत्वात् कस्य निर्दिश्येतेत्यर्थः। **''योऽपि कश्चिदि''त्यारभ्ये''ति सिद्धमि''त्यतः प्राक्तनग्रन्थः प्रक्षिप्त इति केचित्।।**

पृथिव्याद्युत्पत्त्याद्यदर्शनान्न पृथिव्यादिकारणत्वं लक्षणमित्युक्तं टीकायाम्, तदनुपपन्नम्; पृथिव्याद्यात्मकस्य घटादेरुत्पत्त्यादिदर्शनादित्याशङ्क्य तात्पर्यमाह- *नन्विति *।। तर्हि भौतिककारणत्वं लक्षणमित्यत्राह- *भौतिकानामिति *।। भूतानां कार्यत्वाभावे चोद्ये तत्रैव कार्यत्वं प्रदर्शनीयम्, नान्यत्रेत्याशङ्क्य तात्पर्यमाह- *उच्यत इत्यादेरिति *।। पृथिवी, जन्म-विनाशवती, पृथिवीत्वात्; एकदेशपृथिवीवत्। एवमबादिषु प्रयोगो द्रष्टव्यः। हेतुं साधयितुं बुद्धिगोचरत्वादित्युक्तम्। प्रत्यनुमानविरोधं शङ्कते- *ननु प्रत्यनुमानमिति *।। साध्यविकलो दृष्टान्त इत्याशङ्क्याह- *आकाश इति *।। घटादिव्यावृत्त्यर्थम्- ''निरवयवे''त्युक्तम्। गुणादिव्यावृत्त्यर्थम्- ''द्रव्यत्वादि''ति। आकाशनित्यत्वानुमानस्य श्रुतिविरुद्धत्वं साधनवैकल्यं च दृष्टान्तस्य स्पष्टमित्युपेक्ष्य दूषणान्तरमाह- *सत्यमिति *।। प्रत्यनुमानसद्भावोऽङ्गीकृतश्चेत्, तर्हि उत्पत्त्यादिकारणं न सिध्यतीत्याशङ्क्याह- *महाभूतत्वादिति *।। सामान्य-विशेष-विषयशास्त्रयोर्विशेषशास्त्रं बलीयः, सामान्यशास्त्रं दुर्बलमिति न्यायाद् विशेषस्योत्पत्त्याद्यनुमानस्य बलीयस्त्वम्। तथा चोक्तम्-प्रसिद्धावयवं यत्स्याद्विशेषे च प्रतिष्ठितम्। तत्साध्याङ्कसामान्यदृष्टाच्च बलवत्तरम्।।

बाधः सामान्यशास्त्रस्य विशेषविषयाद् यथा। अनुमानान्तरैरेवमनुमानस्य साधनम्।। इति।

''अस्य जगतः'' इत्युत्तरग्रन्थेन पौनरुक्त्यं निरस्यति- *न यथोक्तेति *।। अक्षरव्याख्यानकथनपर उत्तरो ग्रन्थ इत्याह- *अस्येति *।। अस्य जगत इत्यनेन भाष्यं व्याचष्ट इत्यन्वयः। ''अस्य जगतः''। इत्यत्र ''न यथोक्तविशेषणस्ये''त्यादिभाष्याक्षरव्याख्यानं क्रियते, अत्र तु तात्पर्यं कथ्यत इत्यपौनरुक्त्यमित्यर्थः।

परकल्पनाप्रतिपपत्तौ तन्निरसनं सुकरमिति तत्कल्पनामाह- *नान्यत इति*।। सुख-दुःख-मोहात्मकमनुगतं सामान्यपदवेदनीयं यद्वस्तु, सा प्रकृतिर्येषां ते तथोक्ताः। यद् यदन्वितम्, तत् तत्प्रकृतिकमित्युक्ते संयोगाद्यन्वितघटादिषु व्यभिचारः, तदर्थम्- *नियमेनेति*।। अनुमानान्तरमाह- *तथेति*।। "एकप्रकृतिकाः" इत्युक्ते ब्रह्मप्रकृतिकतया सिद्धसाधनत्वम्, तदर्थम्- *अविभक्तेति*। संसृष्टत्वमविभक्तशब्देन विवक्षितमित्यर्थः। तावत्युक्ते संसृष्टपरमाणुप्रकृतिकतया सिद्धसाध्यत्वम्, तदर्थम्- *एकेति*। परिमितत्वादनेकत्वाद्विकारित्वाच्चेति हेतुत्रयम्। विवादाध्यासितं कार्यद्रव्यम्, स्वपरिणामदणुपरिमाणारब्धम्, कार्यद्रव्यत्वात्; संमतवदिति विवक्षितम्। संयोगस्यासमवायिकारणत्वं दर्शयितुम्- "संयोगसचिवे"ति।। विजातीयस्यानारम्भकत्वमाह- *समानजातीयेति*।। अनेकेषामारम्भकत्वे नियममाह- *अनेकेति*।। गुणादिव्यावृत्त्यर्थम्- *द्रव्यत्वादिति*।। नित्यद्रव्यव्यावृत्त्यर्थम्- *कार्येति*।। तथाऽपि कथं परमाणुकारणवादः? तत्राह- *निरवयवेति*।। "अनुपलभ्यमानपूर्वावस्थत्वादि"त्युक्त आत्मनि व्यभिचारः, तदर्थम्- *योग्यत्वे सतीति*।। पौनरुक्त्यं निरस्यति- *तत्र प्रथममिति*।। उत्तरत्र प्रमेयदूषणं कथ्यत इत्यपौनरुक्त्यम्। प्रमाणदूषणप्रकारं पृच्छति- *कथमिति*।। घटादयो बाह्यत्वेन, सुखादयस्त्वान्तरत्वेनेत्यसिद्धिरित्यर्थः। सुखाद्यात्मतायाः प्रामाणिकत्वाद्भेदोपलम्भो विभ्रम इति शङ्कते- *स्यादेतदिति*।। स्वाभिव्यञ्जकोपाधौ तदाकारप्रतिभासहेतुत्वादिति हेत्वर्थः। असिद्धिनिरासार्थम्- "स्वाभिव्यञ्जके"ति विशेषणम्। प्रत्यक्षविरोधादनुमानमेव नोत्तिष्ठतीत्याह- *नान्तर्बहिरिति*।। न च प्रत्यक्षस्य भ्रान्तत्वाद् बाधकत्वं शङ्क्यम् ; बाधकप्रत्ययवेद्यत्वं भ्रान्तित्वम्। न च बाधकप्रत्यय उपलभ्यते। न चास्मादनुमानाद् बाधः ; परस्पराश्रयप्रसङ्गादित्यर्थः। विपक्षबाधकतर्क-पराहतश्च हेतुरित्याह- *एकमिति*।। एकैकस्य त्रयात्मकत्वेऽपि यदुपलब्धिहेतोरदृष्टस्योद्बोधः, तस्योपलम्भः, नेतरस्येति व्यवस्थामाशङ्क्याह- *अदृष्टेनेति*।। वस्तुनि प्रतीयमानेऽपि तदभिन्नसुखाद्यदृष्टाभावान्नोपलभ्यत इति न वक्तव्यम् ; वस्तुनोऽप्यनुपलम्भापातात्, अदृष्टव्यतिरिक्तपुष्कलकारणे सत्यदृष्टाभावेन कार्याभावादर्शनाच्च नादृष्टस्य नियामकत्वमित्यर्थः। द्वितीयानुमानस्यादृष्टत्वे सिद्धे "तदन्वितत्वादि"ति हेतोरसिद्धिस्तदवस्थेत्याह- *अत इति*।। *गुणसामान्यैरिति*।। नील-पीतादिगुणैर्घटत्वा- दिसामान्यैश्चेत्यर्थः। "परिमितत्वादि"त्यत्र किं वस्तुतः परिमितत्वम्? आहो देशतः? उत कालतः? नाद्य इत्याह- *तत्रापीति*।। द्वितीय-तृतीयौ दूषयति- *देश-कालेति*।। घटादिषु परिमितत्वं वर्तते, न चैकप्रकृतिकत्वम् ; घटस्य मृदुपादानकत्वात् , हिमकरकादेश्चोदकोपादानत्वाद् द्वितीय-तृतीयहेतोरप्यत्रैव व्यभिचारः स्पष्ट इत्युपेक्षितम्। दुकूलयोरन्त्यावयवित्वान्न रज्जुद्रव्यारम्भकत्वम् , किन्तु संयोगमात्रमिति नानैकान्तिकत्वमिति चेत् , मैवम् ; पटस्यापि तन्तुसंयोगमात्रत्वम् , न कार्यान्तरत्वमित्यपि प्रसक्तेरित्यर्थः। आत्मनि सिद्धसाध्यत्वं निराकरोति- *कार्येति*।। गुणादिकं व्यावर्तयति- *द्रव्यमिति*।। प्रचयात्मकत्वात्सावयवत्वादित्यर्थः।।

संयोगपुरःसरत्वं पूर्वपक्षिणोच्यते, तस्य प्रतिषिध्यमानत्वान्न दिक्कालादिसंयोगपुरस्सरत्वाभावेन सिद्धसाध्यत्वमित्यर्थः। सर्वं कार्यम्, अभावपुरुस्सरम्, इत्यत्र किं घटादेरपि धर्मित्वम्? उत तद्व्यतिरिक्तस्य? इति विकल्प्याद्यं प्रत्याह- *शून्यानुमान इति*।। नापि द्वितीयः; क्वचित् सत्कारणत्व इतरत्रापि तदनुमानसंभवादित्यर्थः। ''प्राधानादेरचेतनत्वादि''त्यादेरचेतनकारणवादस्य निरस्तत्वात्पौनरुक्त्य-मित्याशङ्क्याह- *इदानीमिति*।।

चेतनकारणतायाः सिद्धन्तिनोऽपि संमतत्वात् कथं निरसनम्? इत्याशङ्क्याह- *मा भूदिति*।। ''परिच्छिन्नत्वादि''त्यत्र किं देशतः परिच्छिन्नत्वं विवक्षितम्? उत कालतः आहो वस्तुतः? प्रथम-द्वितीययोर्हेत्वसिद्धिः, नापि तृतीयः; वस्तुतः परिच्छन्नस्याप्यधिष्ठातृत्वोपपत्तेः। ततश्च ''परिच्छिन्नत्वादि'' त्येतदसङ्गतमित्याशङ्क्य तात्पर्यमाह- *अयमर्थ इति*।। इतोऽपि नाधिष्ठात्रोश्वरवादी युक्त इत्याह- *घटादिष्विति*।। विवादाध्यासितम्, द्विकर्तृकम्, कार्यत्वाद्; घटादिवत्। न च जीवेश्वरकर्तृद्वयाङ्गीकारादिष्टापत्तिरिति-वच्यम्; घटादौ जीवेश्वरकर्तृकत्वस्य तदतिरिक्तकुलालादि-कर्तृकत्वस्य च दृष्टत्वात् पृथिव्यादावपि कर्तृत्रयप्रसङ्गात्। न चात्रोत्कर्षसमत्वं शङ्क्यम्; अव्याप्तधर्मप्रसङ्गस्योत्कर्षसमत्वात्। न चात्र तथात्वम्; घटादेः कर्तृत्रयव्याप्तत्वादित्यर्थः। निरुपाख्यत्वान्न शून्यस्य कारणत्वमित्युक्तम्, तदयुक्तम्; निरुपाख्यकारणवादिनं प्रति ''निरुपाख्यत्वादि''ति हेत्वभिधानायोगादित्याशङ्क्याह- *न चेति*।। यद् यदनुविद्धम्, तत् तदुपादानं घटादेश्च निरुपाख्यानन्वितत्वान्न शून्योपादानत्वमित्यर्थः। इतोऽपि न जगच्छून्योपादानमित्याह- *किञ्चेति*।। निरुपाख्यस्य कारणत्वे कर्म-तत्फल-तत्प्रमाणव्यवहारोच्छेद इति संबन्धः। तत्र हेतुमाह- *पूर्वकल्पस्येति*।। मा भूत् सजातीयकार्योत्पाद इति मन्वानं प्रत्याह- *विशिष्टेति*।। इतोऽपि न निरुपाख्यकारणवाद इत्याह- *शब्दार्थेति*।। शब्दार्थ-संबन्ध-तद्व्यवहारिणां निरन्वयविनाशात् प्रमाणव्यवहारोच्छेद इति संबन्धः। तद्व्यवहाराणां सत्त्व एव किं मानमिति? अत्राह- *नाकस्येति*।। मेरुपृष्ठादेरुपरीत्यर्थः। *तं कालम्=आकर्मक्षयादित्यर्थः। *ब्रह्मपूत इति*।। वेदपूत इत्यर्थः। ब्रह्मभूत इति पाठे विराड्भावमापन्न इत्यर्थः। *स्मरन्निति*।। प्राक्तनशब्दार्थसंबन्धाभावेऽप्यपूर्व एव शब्दार्थसंबन्धः संकेत्यत इति शङ्कां निरस्यति- *अपूर्वेति*।। प्रधानादीनां कारणत्वं न चेत् स्वभावः, कारणसापेक्षत्वं नियन्तुं शक्यते, सामग्र्यां व्यभिचारादित्यर्थः। विकल्पासहत्वात्स्वभाववादोऽपि न युक्तिसह इत्याह- *ननु स्वयमेवेति*।। कर्तृ-कर्मविरोधात् स्वस्य निमित्तत्वानुपपत्तेर्नाद्यो युज्यते। नान्त्योऽपि; कार्यस्यानुत्पत्तिप्रसङ्गादित्यभिसन्धिः।

अन्तिमं पक्षमाश्रित्याह पूर्ववादी- *निर्निमित्तमिति*।। निरपेक्षत्वेन कार्यजन्माश्रयणेऽति-प्रसङ्गादित्याशङ्क्याह- *ननु तर्हि घटस्येति*।। न च- युगपद् भावाभावप्रसञ्जनमिष्टमित्यपि-शङ्क्यम्; विरोधात्, प्रवृत्तिनिवृत्त्ययुक्तेश्चेत्यर्थः। विकल्पासहत्वान्न हेतुवादोऽपीत्याह- *उच्यत इति*।। किं

सदसत्प्रसञ्जनमात्रमेतत्? उत सहेतुकत्वं सिषाधयिषितम्? नाद्य: ; अनुभवविरोधादित्यभिप्रेत्य द्वितीयं दूषयति- **कारणस्येति* द्वितीयं पक्षमादाय शङ्कते- *कालभेदेनेति**।। कालभेदस्य स्वाभाविकत्वात् पूर्वापरीभूतकाले क्रमापेक्षया कार्यजननम्। न च काले चोद्यमवतरति; तस्य नित्यत्वादित्यर्थ:। कालस्य नित्यत्वेऽपि तस्य पूर्वापरीभाव: स्वाभाविक:? उत सहेतुक:? नाद्य इत्याह- *स कालेति*।। द्वितीयं प्रत्याह- *निमित्तान्तरेति*।। नचानवस्थाप्रसञ्जनमिष्टमित्यपि शङ्क्यम्; निमित्तभेदस्यानुभवबाधितत्वादित्यर्थ:। त्वत्पक्षे क्रमकार्योदयस्याकस्मिकत्वमित्याशङ्क्य, तत्रापि स्वभाव एव हेतुरित्याह- *तस्मादिति*।। एवं सोपपत्तिकं स्वभाववादमभिधाय तदुत्तरत्वेनोत्तरग्रन्थमवतारयति- *तत्राहेति*।। तैलाद्यर्थिनां देशादिनिमित्तापेक्षादर्शनान्न स्वभावतो जन्मेत्युक्तम्, तत्रेदं विवेक्तव्यम्-किमसमर्थस्यान्यापेक्षा? उत समर्थस्य? आद्ये न सहकार्यपेक्षयाऽपि कार्यकरत्वम् ; शिलाशकलादेरुदकादिसहकृतस्यापि कार्यकरत्वादर्शनात्, द्वितीये सहकार्यपेक्षैवानुपपन्नेत्याशङ्क्य द्वितीयपक्षमादाय समाधत्ते- *स्वत:सिद्धेति*।। किञ्च प्रतिज्ञातेऽर्थे हेतुरुपन्यस्यते? उत न? आद्ये निर्हेतुकत्वादक्षति:, द्वितीये ज्ञातार्थासिद्धिरिति द्रष्टव्यम्। प्रधानादीनां कारणत्वासंभवाद् ''यतो वे''त्यादिवाक्यालोचनयेश्वर: कारणमित्युक्तम्, तदाक्षिपति- *नन्वनुमानेनेति*।। विवदाध्यासितं कर्म, प्रयत्नाधारजम्, कर्मत्वात्; संमतवदित्यनुमानादीश्वरसिद्धे: कृतं वाक्येनेत्यर्थ:। युक्त्यनुमानयोर्भेदासिद्धेर्नायं विभाग: साधुरिति, अत्राह- *युक्तिरिति*।। एतदेव कुत इति? अत आह- *व्याप्तीति*।। व्याप्त्याभासादनुपपत्त्याभासादुदाहरणमात्रदृष्टेश्च संभावनाबुद्धिजन्मेत्यर्थ:। अस्त्वेवं भेद:, प्रकृते तु किमायातमिति? अत्राह- *तत्रेति*।। तर्हि लोक-वेदयोरुदाहरणादिदर्शनं वृथेत्याशङ्क्याह- *किन्त्विति*।। कथं तर्ह्यनुमानगी:? तत्राह- *तत्राज्ञानादिति*।। अनुमानस्वरूपे ज्ञाते तस्याभासत्वं ज्ञायते, तदेव कथम्? इति शङ्कते- *किं तदिति*।। व्यावर्त्त्यं दर्शितमिति नात्रोच्यते। आद्यानुमानस्यानिश्चायकत्वं तावदाह- *तत्र वैशेषिकेति*।। प्रासादादेर्बहुकर्तृकत्वं तावद् दृश्यते, ततश्च तद्वद् जगतोऽपि बहुकर्तृकत्वं स्यात्। न च लाघवादेककर्तृकत्वं जगत: शङ्क्यम् ; निमित्तोपादानैक्यस्यापि तत एव प्रसक्तेरित्यर्थ:। यथाश्रुतसाध्याङ्गीकारे दृष्टान्तस्य वैकल्यं स्यात् , ततश्च ज्ञानादिशक्तय:, क्वचित्काष्ठां प्राप्ता:, सातिशयत्वात् ; संमतवदिति वक्तव्यम्। तत्र किं काष्ठाप्राप्तिमात्रमनुमीयते? उत परकाष्ठाप्राप्तिरिति वक्तव्यम् , तत्राद्यस्तावदसङ्गत इत्याह- *योगानुमान इति*।। यथाश्रुतसाध्याङ्गीकारे परकाष्ठाप्राप्त्यनुमाने दूषणमाह- *सर्वविषयेति*।। सेवादिफलस्य शरीरादिमद्दातृपूर्वकत्वं दृष्टम् , इति सर्वस्यापि कर्मफलस्य शरीरादिमद्दातृकत्वलक्षणविपक्षबाधकतर्कपराहतो हेतुरित्याह *नैयायिकेति*।। कथं तर्हि त्वन्मतेऽपि युक्तीनां सर्वज्ञसाधकत्वम्? तत्राह- *श्रुपिप्रतिपन्नेति*।। फलितं दर्शयति- *इत्यज्ञानादिति*।। एतत्सर्वं हृद्यभिसन्धायोक्तम्- *मन्यन्त इति*।। ईश्वरसाधनवाक्यप्रतिपत्ते: कथं तदाक्षेपस्तार्किकाणामिति शङ्कते- *ननु वाक्येष्विति*।। न वाक्यस्वरूपं निराक्रियते, किन्तु तत्प्रामाण्यमित्याह- *अनुनमिति*।।

संभावनाबुद्धिहेतुत्वेनाऽनुमानोपन्यासस्याङ्गीकारात्। ''नन्विहापी''ति चोद्यमनर्थकमित्याशङ्क्य, तात्पर्यमाह- *ननु सूत्र इति*।। वाक्यानामप्यनुमानरूपत्वाद् वेदान्तवाक्यग्रथनार्थत्वादित्येतन्ना-दिष्टमित्याशङ्क्य, प्रतिज्ञाद्यवयवानुपलब्धेर्नानुमानत्वमित्यभिप्रायेणाह- *परिहरतीति*।। वेदान्तानामनुमानसिद्धानुवादकत्वं यदुक्तम्, तदप्यसङ्गतमित्याह- *किञ्चेति*।। *अनुमानमात्रादिति*।। आगमासहकृतादित्यर्थः। तथाऽपि कथं वाक्यस्यानुवादकत्वम्? तत्राह- *इह त्विति*।। षड्विधतात्पर्यलिङ्गैर्वेदान्तानां सत्यादिरूपे ब्रह्मणि तात्पर्यं निश्चीयत इत्यर्थः। भूतस्य प्रमाणान्तरगम्यत्वाद् ब्रह्मणोऽपि प्रमाणान्तरगम्यत्वम्, अत्राह- *न चेति*।। इन्द्रियायोग्यत्वेन विशेषतोदृष्टस्या-प्रसरात्सामान्यतोदृष्टस्य च कारणमात्रविषयत्वाद्विशिष्टं ब्रह्मागमैकगम्यमित्यर्थः। ब्रह्मावगतेरनुमानानिर्वृत्तत्वे तत्सूत्रणमनर्थकमिति शङ्कते- *न तर्हीति*।। अनुमानस्वातन्त्र्यमेव निरस्यते, न सहकारित्वमित्याह- *तत्राहेति*।।

श्रुत्यादिस्वरूपमाह- *श्रुतिरिति*।। शब्दः श्रुतिरित्युक्ते वाक्ये व्यभिचारः, तदर्थम्- *पदेत्यादि*।। ''पदान्तरानपेक्षः'' इत्युक्ते धूमस्यापि श्रुतित्वं स्यात्, तदर्थमाह- *शब्द इति*।। ''ऐन्द्र्या गार्हपत्यमुपतिष्ठते''इत्यत्र तृतीयाश्रुत्या ''कदाचन स्तरीरसीत्यैन्द्र्या गार्हपत्योपस्थाने विनियोगः प्रतीयत इति श्रुतेर्विनियोग इत्यर्थः। लिङ्गस्वरूपं दर्शयति- *लिङ्गमिति*।। श्रुतिसामर्थ्यं लिङ्गमिति यावत्। ''बर्हिर्देवसदनं दामी''त्यत्र बर्हिर्लवनलक्षणार्थस्य श्रुतिप्रतिपन्नस्यानुपपत्त्या तत्प्रकाशनसमर्थाया ऋचो बर्हिर्लवने विनियोगः प्रतीयते, इति श्रुतिकल्पनया लिङ्गस्य विनियोजकत्वमित्यर्थः। वाक्यस्वरूपमाह- *अनेकेति*।। लिङ्गव्यावृत्त्यर्थम्- 'अनेके'ति विशेषणम्। आकाङ्क्षाद्यनुरोधेनानेकपदानां विशिष्टैकार्थप्रतिपादकं वाक्यमित्यर्थः। ''इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते'' इति ब्राह्मणवाक्यादश्वरशनादाने मन्त्रस्य विनियोगः प्रतीयत इत्यर्थः। प्रकरणस्वरूपमाह- *वाक्यद्वयेति*।। प्रतिपन्नवाक्यभावानां पदानां वाक्यान्तराभिसंबन्धः प्रकरणमिति यावत्। वाक्यान्तराभिसंबन्धे हेतुमाह- *आरभ्याधीतेति*।। प्रयोजनाकाङ्क्षया संबन्ध इत्यर्थः। ''दर्श-पूर्णमासाभ्यामि''ति तृतीयाश्रुत्या दर्श-पूर्णमासयोः करणत्वे प्रतिपन्ने करणस्य चेतिकर्तव्यताकाङ्क्षायां प्रधानवाक्यस्य समिदादिसंबन्धः, समिदादिवाक्यस्य फलविधुरस्य तदाकाङ्क्षायां प्रधानवाक्येन संबन्ध इति प्रकरणविनियोग इत्यर्थः। स्थानस्वरूपमाह- *क्रमवर्तिनामिति*।। दर्श-पूर्णमासप्रकरणे कानिचित्कर्माण्युपांशुयाजप्रभृतीनि ''दधिरसी''त्यादयः केचन मन्त्राश्च समाम्नायन्ते, तत्र कर्मणः क्रमेण यो मन्त्रः समाम्नातः, तेन तस्य संबन्ध इति स्थानरूपक्रमप्रमाणाद् मन्त्रविशेषाणां क्रमविशेषस्य च संबन्धः। तथा काम्येष्टीनां याज्यानुवाक्यानां च मन्त्राणां क्रमात् संबन्ध इत्यर्थः। सामाख्यास्वरूपमाह- *संज्ञेति*।। यथा-आध्वर्यवसंज्ञानां मन्त्राणामाध्वर्यवसंज्ञे कर्मणि संज्ञासाम्येन विनियोग इति।।

धर्मेऽनुभवाद्यनपेक्षावद् ब्रह्मण्यप्यनपेक्षां शङ्कते- *ननु शब्देनेति*।। असंभवी चानुभव इत्याह- *न च

शब्देति*।। धर्मस्य शब्दप्रमेयस्य यथाऽनुवादयोग्यत्वम्, तद्वदस्यापीत्यर्थः। वैषम्येणोत्तरयति- *तत्राहेति*।। सिद्धत्वेन ब्रह्मणोऽनुभवयोग्यत्वात् तदनुभवं विना पुरुषाकाङ्क्षाऽनिवृत्तेश्चानुभव एव व्यर्थ इत्यर्थः। अनुभवमन्तरेणाप्याकाङ्क्षाया निवृत्तिर्दृष्टा धर्मजिज्ञासायाम्, तद्वदत्रापीति साम्यमाशङ्क्यानुष्ठानद्वारा धर्मस्य पुमर्थसाधनत्वादनुष्ठानस्य च ज्ञानमात्रेण संभवान्नानुभवापेक्षा, अत्र नैवम् ; तद्वैपरीत्यादित्येवंरूपौ चाक्षेप-परिहारौ स्पष्टावित्याह- *ननु धर्मेति*।।

कर्तव्ये हि विषय इति।। अत्र हेतुगर्भविशेषणमुक्तमजानानः शङ्कते- *किमिति धर्मस्येति*।। अभिसन्धिं विवृणोति- *धर्मस्येति*।। साध्यकस्वभावत्वाद्धर्मस्य साक्षात्कर्तुमयोग्यत्वमित्यर्थः। ज्ञानमात्रादेव धर्म इव ज्ञेयनिश्चयलक्षणपुरुषार्थसिद्धेः तत्साक्षात्करणं वृथेति शङ्कते- *ननु सिद्धस्वभावस्येति*।। साक्षात्कारमन्तरेणाप्यनुष्ठानसंभवाद्धर्मे साक्षात्कारानपेक्षत्वम् , इह त्वपरोक्षत्वम्, अस्यापरोक्षज्ञानं विना निवृत्त्यनुपपत्तेस्तदेष्टव्यमित्याह- *तत्राहेति*।। कर्म-ज्ञानकाण्डयोः कार्यपरत्वसाम्यादनुभवादावपि साम्यमिति शङ्कते- *ननु वेदेति*।। कार्यपरत्वमसिद्धमित्याह- *न हीति*।। अनिष्टपर्यवसायित्वं दर्शयितुं प्रश्नमुत्थापयति- *अस्त्विति*।। व्यवस्थितविकल्पादवैषम्यमाह- *इतीच्छेति*।। उत्सर्गापवादयोरुदाहरणान्तरमाह- *आहवनीय इति*।। ''आहवनीये जुहोती''त्यु त्सर्गः, 'पदे जुहोती 'त्यपवादः, अश्वस्य पदविन्यासदेशे जुहोतीत्यर्थः। *प्रकृतेरिति*।। प्रकृतौ श्रुतानां कुशमयबर्हिष 'प्रकृतिवरदा विकृतिः कर्तव्ये 'त्यतिदिष्टानाम्। विकृतावुपदिष्टशरमयबर्हिषां निरवकाशत्वादित्यर्थः। अभ्युच्चयमुदाहरति- *प्राकृतानामिति*।।

विध्यादिप्रसक्तेरनिष्टपर्यवसायित्वं दर्शयितुं प्रश्नमुत्थापयति- *अस्त्विति*।। सिद्धत्वान्नैवमित्याह- *नेत्याहेति*।। पौनरुक्त्यं व्यावर्तयति- *तदेवेति*।। विचारमन्तरेणासंभावना- निवृत्त्यसंभवात् कथं विचारानर्थक्यमित्याशङ्क्यानुमानान्तर्भूतत्वाद् वाक्यं न पृथग्विचारणीयमित्याह- *पुनरनुमानवादिन इति*।। प्रतिज्ञाद्यप्रतिपत्तेः कथमनुमानसूचकं सूत्रमित्याशङ्कते- *नन्वनुमानेति*।। सद्रूपेण ब्रह्मणो मानान्तरविषयत्वान्नेन्द्रियादिविषयत्वमित्यादिग्रन्थोऽसमञ्जस इत्याशङ्क्याह- *ज्ञानानन्देति*।। युक्तीनां ब्रह्मविषयत्वाभावात् तत्र कथमसंभावनाबुद्धिहेतुत्वमभिहितम्? इत्याशङ्क्याह- *उच्यत इत्यादेरिति*।। सामान्यद्वारेण संभावनाबुद्धिहेतुत्वप्रकारं पृच्छति- *कथमिति*।। तत्प्रकारमेवाह- *जगदिति*।। किंशब्दस्य प्रश्ने क्षेपे च साधारणस्य क्षेपार्थतामाह- *किं पुनरिति*।। ब्रह्मणस्तावन्न पदार्थत्वम् ; अगृहीतसंबन्धत्वात्, नापि वाक्यार्थत्वम् ; पदार्थस्यैव पदार्थान्तरसंसृष्टत्वेन वाक्यार्थत्वाद् , ब्रह्मणश्चापदार्थत्वा- न्नैवमित्याक्षेपग्रन्थार्थः। उक्तचोद्यस्य-''येषामि'' त्यादिना परिहारात् प्रतिवचनस्य प्रश्नाननुसारित्व- माशङ्क्याह- *येषामिति*।। किं ब्रह्मपदार्थस्य विशेषतोऽप्रसिद्धत्वम् ? उत सामान्यतः ? इति विकल्प्याद्यमङ्गीकरोति- *सत्यज्ञानेति*।।

द्वितीयं दूषयति- *बृहत्त्वमात्रस्येति*।। संनिहितपदार्थसंसर्गसामर्थ्यादिति*।। सत्य-ज्ञानादिपदार्थ-संसर्गसामर्थ्यादित्यर्थः। प्रमाणान्तरप्रसिद्धस्य गन्धवत्त्वादेर्लक्षकत्वं दृष्टम् , तथा च सत्य-ज्ञानानन्दादेरपि लक्षणत्वात्प्रमाणान्तरसिद्धत्वं वक्तव्यम् , ततश्च सत्यादिवाक्यं न प्रमाणमित्याशङ्क्याह- *अर्थादिति*।। प्रतिपन्नं सकलानात्मवर्गाद् ब्रह्मणि व्यावृत्तबुद्धिं जनयति। प्रमाणान्तरागोचरत्वेऽपि सत्यादेर्लक्षकत्वं युज्यत इत्यर्थः। ''येषां वेदान्तवाक्यानामि'' त्यादिटीकामाक्षिपति- *ननु स्वाध्यायेति*।। ''अग्निहोत्रं जुहोति'' ''यवागूं पचती''त्यादौ पाठक्रमस्याप्रयोजकत्वादित्यर्थः। ''समिधो यजती''त्यादौ पाठक्रमस्य प्रयोजकत्वं दृष्टमित्याशङ्क्य, प्रस्तुते वैषम्यमाह- *प्रसिद्धेति*।। तथा च स्वाध्यायपाठक्रमेण ''भृगुर्वै वारुणिः'' ''यतो वा इमानी''त्यादिवाक्यस्य ब्रह्मप्रतिपादकत्वं भाष्यकृतोदाहृतम् , तच्च तद्व्याख्यानं चासमञ्जसमितीतिशब्दार्थः। 'प्रसिद्धानुवादेनाप्रसिद्धं प्रतिपाद्यते'इत्येतदङ्गीकरोति- *सत्यमिति*।। तर्हि भाष्य-टीकयोरनुपपत्तिः, अत्राह- *अधिकारीति*।।

मुमुक्षुणा ब्रह्मज्ञानं कर्तव्यमित्युक्ते किं तद् ब्रह्मेत्याकाङ्क्षायां तल्लक्षणोक्तेरवसरः, ततश्चाकाङ्क्षाक्रमेण ''भृगुर्वै''-इत्यादिवाक्यं प्रथमं विचारितम्, ''यतो वा'' इत्यादिवाक्यमनन्तरमित्यर्थः। पटादीनामनेकतन्त्वाद्युपादानदर्शनाद् यज्जगत्कारणं तद् ब्रह्मेति प्रतिपत्तुमशक्यम्; व्याघातादिति शङ्कते- *ननु जगत्कारण इति*।। अनवच्छिन्नस्य ब्रह्मशब्दार्थत्वात् कारणस्य व्यावृत्तत्वाद् व्याघात इत्यर्थः। ऐकग्रन्थ्यशङ्कां निरस्यति- *परिहरतीति*।। ''प्रसिद्धानुवादेनाप्रसिद्धं प्रतिपाद्यते''इति न्यायाद् ''यतो वा'' इत्यादिवाक्यस्य कारणप्रतिपादकस्यानुवादकत्वम् ; तथा च कथं प्रमापकत्वाभिधानमित्याशङ्क्याह- *जगत्कारणेति*।। जगत्कारणमात्रानुवादेऽपि तस्यैकत्वं प्रमीयत इति संबन्धः। अपिरवधारणे। *प्रमीयत एवेति*।। ''यतो वे''त्यकवचननिर्देशान्न कारणत्वं निश्चेतुं शक्यम् ; तसिल्प्रत्ययस्य बहुत्वैकत्वसाधारणत्वादित्याशङ्क्याह- *नानात्वेति*।। ''येन जातानि जीवन्ती''ति वाक्यशेषात् तसिल्प्रत्ययस्यैकत्वविषयत्वं निर्धार्यत इत्यर्थः। यच्छब्दस्य प्रसिद्धानुवादित्वान्नैकत्वप्रमितिहेतुत्वमिति शङ्कते- *नन्वनुवाद इति*।। किं प्रत्ययार्थस्यैकत्वादनूद्यमानत्वम्? उत कारणमात्रस्य? इति विकल्प्याद्यं दूषयति- *न जगत्कारण इति*।। द्वितीयं प्रत्याह- *अनुवादेति*।। प्रकृत्या कारणमनूद्य प्रत्ययेन तस्यैकत्वं प्रमीयत इत्यर्थः। सामर्थ्यमेवाह- *अन्यथेति*।। अनवच्छिन्नं ब्रह्म निरूपयितुं जगत्कारणत्वलक्षणमनूदितम्, इतरथा विधेयासिद्धेरनुवादस्य नैष्फल्यं स्यादित्यर्थः।। एकत्वं ब्रह्मरूपं चेत्युभयं न प्रमेयम्, वाक्यभेदप्रसङ्गादिति शङ्कते- *नन्वेकत्व इति*।। स्वतन्त्रस्यार्थद्वयस्याप्रमेयत्वान्नैतदित्याह- *नैकत्वस्येति*।। यज्जगज्जन्मादिकारणं तदेकमित्यवान्तरवाक्येन प्रतिपाद्यम्, यदेकं कारणम्, तत्सत्यानन्दरूपमिति प्रतिपादनान्न वाक्यभेद इति वाक्यार्थः। विधान्तरेण वाक्यभेदाभावमाह- *अथवेति*।। एकत्वस्यात्मधर्मत्वात् कथं लक्षणान्तर्गतत्वम्? इत्याशङ्क्याह- *तथाहीति*।। भेदाभावोपलक्षितं

स्वरूपमेकमित्युच्यत इत्यर्थः। *ननु*-तथाऽपि ''तदु ब्रह्म''ेति कथम्? प्रधानस्यापि तादृक्त्वादिति शङ्कते-*तत इति*॥

ईक्षणपूर्वकस्रष्टृत्वश्रवणात् कारणस्य चेतनत्वम्, सर्वेक्षितृत्वाच्च सर्वज्ञत्वमित्याशयेनाह-*तदाहेति*॥ ब्रह्मशब्दप्रयोगमात्रेण कथं जगत्कारणस्यानवच्छिन्नत्वनिश्चयः? संज्ञा-संज्ञिसंबन्धपरत्वाद् ब्रह्मशब्दप्रयोगस्येत्याशङ्क्याह-*न संज्ञेति*॥ संबन्धप्रतिपादने फलाद्यभावादित्यर्थः। किंपरं तर्हीदं वचनम्? इत्याशङ्क्याह-*किन्त्वर्थेति*॥ उपक्रमादिकारणस्यानवच्छिन्नत्वप्रतिपत्तेर्न संज्ञामात्रत्वं ब्रह्मपदस्येत्यर्थः॥

ब्रह्मशब्दादनवच्छिन्नत्वप्रतिपत्तेः कथमसंज्ञात्वमिति? अत्राह-*आर्थिक इति*॥ ''पुनस्तदि''त्यादेरयमर्थः-इतोऽपि प्रधानादिविलक्षणपरं लक्षणवाक्यमित्याह-*पुनरिति*॥ ''तद्विजिज्ञासस्वे''त्यत्र जिज्ञास्यत्वोपादेशादित्यध्याहारः। जगत्कारणस्य जिज्ञास्यत्वोपदेशादनवच्छिन्नस्वभावं जगत्कारणमित्यर्थः। ब्रह्मशब्दप्रयोगोऽप्यमुमेवार्थं गमयतीत्याह-*अनूद्येति*॥ तत्पदेन जगतकरणमनूद्य, ब्रह्मेति जगत्कारणे ब्रह्मपदप्रयोगादित्यर्थः। एतावता कथं विलक्षणप्रतिपत्तिः? तत्राह-*बृहत्यर्थेति*॥ ''अस्ति तावद् ब्रह्म''ेत्यत्र सर्वज्ञत्वादेरपि ब्रह्मपदात्प्रतिपत्तिरभ्यभायि, अत्र त्वनवच्छिन्नमात्रप्रतिपत्तिरुच्यत इति विरोधः, तत्राह-*एकमिति*॥ अनवच्छिन्नशब्दस्योपलक्षणार्थत्वान्न विरोध इत्यर्थः। सर्वज्ञत्वादेः स्वरूपलक्षणत्वासंभवात् स्वरूपलक्षणं वक्तव्यम्, न च निरूपयितुं शक्यत इत्याह-*ननु निरुपाधिकेति*॥ सर्वज्ञत्वादेः सप्रतियोगित्वान्न स्वरूपत्वमित्यर्थः॥

ब्रह्मत्वं स्वरूपलक्षणमिति शङ्कते-*ब्रह्मेति*॥ बृहत्त्वस्य धर्मिसापेक्षत्वादन्यद्धर्मिस्वरूपं वक्तव्यमित्याह-*न बृहत्त्वेति*॥ *निरुपाधिर्घट इति*॥ निरपेक्ष इत्यर्थः। स्वरूपलक्षणान्तरमाशङ्कते-*सच्छब्देति*॥ सच्छब्दस्य महासामान्यवाचित्वात् तात्पर्यावसानाय व्यक्तिस्वरूपापेक्षणात् तद्वक्तव्यमित्याह-*न महासामान्यमिति*॥ विज्ञानव्यक्तिर्महासामान्यव्यञ्जिकेति शङ्कते-*विज्ञानमिति*॥ सुख-दुःखादीनामपि ज्ञानभेदत्वेन गुरुणाऽभ्युपगमत्वाद् ज्ञानत्वस्य-महासामान्यत्वम्, ततश्च तद्व्यञ्जकं वक्तव्यमित्याह-*न तस्येति*॥ आनन्दस्य सर्वज्ञत्वादिधर्मव्यक्तित्वान्नैतच्चोद्यमित्याह-*तदाहेति*॥ ''आनन्दाद्ध्येवे''त्यत्रानन्दस्य कारणत्वं प्रतीयते, न ब्रह्मस्वरूपमिति शङ्कायामाह-*आनन्द एवेति*॥ निरपेक्षोपादानद्वयानुपपत्त्याऽऽनन्दो ब्रह्मैवेत्यर्थः। श्रुतितोऽप्यानन्दो ब्रह्मेत्याह-*तथाहीति*॥ आनन्दस्य ब्रह्मस्वरूपत्वे ज्ञानस्य गुणत्वमाश्रयणीयम्, स्वरूपद्वयानुपपत्त्येति शङ्कते-*विज्ञानमिति*॥ ज्ञानानन्दयोरितरेतरमभेदाद् ज्ञानस्वरूपत्वं युक्तस्वरूपत्वं युक्तमिति प्रतिपादयितुं विचारमारभते-*किं विज्ञानेति*॥ इतोऽपि न गुण-गुणिभावनिबन्धनं

सामानाधिकरण्यमित्याह- *गुणस्येति*।। गुण-गुणिनोर्भिन्नत्वे घटादिवदु गुण-गुणिभावः, अनन्यत्वे घटं प्रति घटस्येव गुण-गुणिभावासंभवः, अन्यत्वानन्यत्वं तु दुर्निरूपमित्यर्थः।।

निर्गुणत्वमुक्तमसहमानः शङ्कते- *अत्र सर्वेति*।। द्रव्यस्य गुणवत्त्वनियमात् ; इतरथा द्रव्यत्वक्षतिः। तथा च प्रयोगः। ब्रह्म, गुणवद्, द्रव्यत्वात्, संमतंवदित्यर्थः। असिद्ध्योन्तरयति- *मा भूदिति*।। प्रमाणाभावोऽसिद्ध इति शङ्कते- *समवायिकारणत्वादिति*।। ब्रह्म, द्रव्यम्, समवायित्वात्, संमतवदिति। असिद्धो हेतुरित्याह- *नारम्भेति*।। यत्, स्वसमवेतद्रव्यारम्भकम्, तत् समवायिकारणम् ; ब्रह्मणश्चानारम्भकत्वादसिद्धिरित्यर्थः। हेत्वन्तरमाशङ्कते- *उपादानेति*।। व्यभिचारेण दूषयति- *न गुणादीनामिति*।। द्वित्वादिरादिशब्दार्थः। तार्किकमुद्रानङ्गीकारवादिनः शङ्कामुद्भावयति- *न निर्गुणमिति*।। किं सर्वेषां गुणानां गुणवत्त्वम्? उत केषांचित्? आद्ये गुणानवस्था, अनुपलब्धिविरोधश्चेत्यभिप्रेत्य द्वितीयं दूषयति- *अन्त्यगुणेष्विति*।। तस्माद् द्वितीयः पक्ष परिशिष्यत इत्याह- *तस्माद् द्रव्यमिति*।। 'द्रव्यं घटः' इत्युक्ते घटव्यक्तेर्द्रव्यत्वालम्बनत्ववद् विज्ञानत्वसामान्यालम्बनमानन्द इत्यर्थः। सर्वज्ञत्वादिधर्मक आनन्दविशेषो ब्रह्म चेति, तर्हि सगुणत्वं सद्वितीयत्वं च दुर्वारमित्यत्राह- *तत्र सर्वज्ञेति*।। प्रपञ्चोपाधिकतयेति।। प्रपञ्चप्रतियोगितयेत्यर्थः। समारोपितसर्वज्ञत्वादिव्युदासेन चिन्मात्रस्य लक्ष्यमाणत्वान्न तेन सगुणत्वं सद्वितीयत्वं चेत्यर्थः। विज्ञानशब्दप्रवृत्तिनिमित्तस्य विज्ञानत्वस्य सत्त्वेऽद्वितीयत्वं व्याहन्येत, असत्त्वे न विज्ञानशब्दप्रवृत्तिनिमित्तत्वमित्याशङ्क्याह- *विज्ञानसामान्येति*।। न च-अनिर्वचनीयत्वेऽपि तस्य विज्ञानशब्दप्रवृत्तिनिमित्तत्वादिभाव इत्यपि-वाच्यम् ; यद्रजतमभात् सा शुक्तिरितिवद् मिथ्याभूतस्यापि शब्दप्रवृत्तिनिमित्तत्वादित्यर्थः। विज्ञानशब्दवाच्यस्यानिर्वचनीयत्वेन ब्रह्मगुणत्वम्, ततश्च तत्सामानाधिकरण्यानुपपत्तिरिन्युक्तमनुभाषते- *विज्ञानेति*।। ''खण्डो गौरि''त्यादौ गुण-गुणिभावाभावेऽपि यथा सामानाधिकरण्यम्, तद्वदत्रापीत्याह- *न विज्ञानेति*।।

औपाधिको वाऽयं विज्ञानशब्द इत्याह- *विज्ञानप्रयुक्तेति*।। सामानाधिकरण्यस्य जातिनिबन्धनत्वमुक्तमाक्षिपति- *सामान्यस्येति*।। किं गौणत्वमाभासत्वम्? उत समारोपितत्वम्? नाद्य इत्याह- *मुख्येति*।। द्वितीये विज्ञानस्य समारोपितत्वेऽप्यज्ञानविरोधित्वाल्लक्षणया विज्ञानशब्दप्रयोग इत्याह- *तस्मादिति*।। न केवलमेकस्यामेव शाखायां कारणानुवादेन ब्रह्म प्रतिपाद्यते, किं तु सर्वत्रापीत्याह- *सर्वेष्विति*।।

इति तत्त्वदीपने जन्माद्यधिकरणं समाप्तम्।।

प्रदीपः

लक्षण-प्रमाणाभ्यां हि वस्तुसिद्धिः। जिज्ञास्यतया प्रतिज्ञाते च ब्रह्मणि लक्षणं प्रमाणं च निर्देशमर्हति। न ह्यन्यथा तद् विचारपदमर्हति। लक्षणन्तु द्विविधम्-तटस्थलक्षणं स्वरूपलक्षणमिति। सर्वथाऽज्ञायमानं हि वस्तु प्रथमतस्तटस्थलक्षणेनाऽऽपाततः, अनन्तरं स्वरूपलक्षणेन प्रतिपद्यते-यथा 'शाखाग्रे चन्द्रः', 'प्रकृष्टप्रकाशश्चन्द्रः' इति। तत्र तटस्थलक्षणेनात्यन्तविजातीयव्यावृत्तिमात्रं क्रियते, सदृशविजातीयव्यावृत्तिस्तु स्वरूपलक्षणेन। तथा च यल्लक्षणं स्वाश्रयभिन्नजातीयबहुपदार्थसाधारणम्; यथा शाखाग्रं नक्षत्रचन्द्रसाधारणम्, तदसाधारणलक्षणान्तरोपस्थापनपर्यन्तं न स्वलक्ष्यनिर्णायकम्, न वा वस्तुगत्या लक्ष्यगतं च भवति, तदेव तटस्थलक्षणमिति किञ्चिद्रूपेण वस्तूपस्थापनपूर्वकमज्ञातवस्तुनिर्णायकं प्रकरणं सर्वमपि यत्र विचारपादमर्हति, न तु तल्लक्षणवाक्यमात्रम्, तत्सर्वं तटस्थलक्षणरूपस्य सूत्रस्य विषय इति वक्तव्यम्। तथाच स्वप्रतीतिदशायां बहुसाधारणतया प्रतीयमानः सामान्यतो लक्ष्यस्वरूपमात्रोपस्थापकश्च धर्मस्तटस्थलक्षणम्। लक्ष्यसम्बन्धस्तु तस्य कल्पितोऽपि न दोषाय। यथा च शाखा चन्द्रस्य विशिष्टसम्बन्धाभावेऽपि तटस्थलक्षणम्। प्रकृष्टप्रकाशो हि चन्द्रं नक्षत्रादिव्यावृत्तं निष्कृष्य ज्ञापयति, स्वयं न नक्षत्रादिव्यावृत्त इति सर्वविदितमिदम्। ब्रह्म तु जिज्ञास्यं न तटस्थलक्षणेन, न वा स्वरूपलक्षणेन लक्षयितुं शक्यम्। वेदान्तवाक्यानि हि जगत्कारणं ब्रह्म प्रतिपादयन्ति जीवव्यतिरिक्तमेव तत्प्रतिपादयन्ति, न तु तदभिन्नम्। जीवो हि किंचिज्ज्ञो न कथमपि, ''यः सर्वज्ञः सर्ववित्'' इत्यादिवाक्यप्रतिपाद्यतामर्हति। *एतेन*।''सत्यं ज्ञानमनन्तं ब्रह्मे''ति वाक्यगम्यसत्त्वचित्त्वादिकमपि न ब्रह्मलक्षणमिति-*व्याख्यातम्*; एतद्वाक्योपात्तमेव हि ब्रह्मस्वरूपमुपरितनेषु वाक्येषु गुहानिहितत्वेनान्नमयादिरूपत्वेन च वर्ण्यते। अन्नमयादिस्तु जीवात्मैव, न परमात्मेति तेषामपि जीवस्वरूपलक्षणत्वमेव भवति, न जीवाभिन्नब्रह्मस्वरूपलक्षणत्वम्। तथा च जीवलक्षणस्य ब्रह्मणि, ईश्वरलक्षणस्य जीवे चाविवक्षाया एवावगतत्वात् किमपि लक्षणं नात्र संभवतीत्याक्षेपसङ्गत्योत्तरसूत्रप्रवृत्तिं सूचयति-*किंलक्षणकमिति*।। *तद् ब्रह्म* जीवाभिन्नं ब्रह्मेत्यर्थः।

सत्यं ''यः सर्वज्ञः सर्वविदि'ति वाक्येन सर्वज्ञ एव जगत्कारणमिति प्रतिपाद्यते; ''सत्यं ज्ञानमि'ति वाक्यगम्यसत्त्वचित्त्वादि चात्ममयादिपदवाच्यजीवात्मधर्म एव प्रतीयते, तथापीदमेवात्रालोचनीयम्-यत् सर्वज्ञत्वमीश्वरस्यान्नमयादित्वं च जीवस्य, किं तत् पारमार्थिकम्? उतौपाधिकम्; आद्ये ब्रह्मणि ज्ञानानन्दाद्याश्रयत्वमेव, न तु ज्ञानानन्दादिरूपत्वम्, द्वितीये तु ज्ञानानन्दादिरूपत्वम्। *एतेन*-जीवस्वरूपमपि-*व्याख्यातम्*।।

किमत्र युक्तम्? सर्वज्ञत्वं पारमार्थिकमिति मतमेव। न हि ''यः सर्वज्ञः'' इति वाक्यप्रकरणे तदौपाधिकत्वं कथमप्यवगच्छाम इति हि शङ्कितुराशयः। इदन्तु प्रतिभाति-सर्वज्ञत्वादि न परमार्थिकम्,

किन्त्वौपाधिकमेवेति; ''सत्यं ज्ञानमि' ति ज्ञानरूपं हि ब्रह्म प्रक्रम्य कथमन्यथा ''तस्माद्वा एतस्मादात्मन आकाशः संभूतः'' इति ज्ञानस्वरूपमात्रस्य कारणत्वमुक्तमुपपद्यते। तत्किं ज्ञातुरेव कर्तृत्वं लोके दृष्टमिति ज्ञानपदमत्रत्यमन्यथा नेयम्? उत कर्तृत्वं कारणत्वं वाऽऽत्मनः कल्पितमेव, न पारमार्थिकमिति, कार्यमुखेन ज्ञायमानं ब्रह्म ज्ञानरूपमेवेति सर्वज्ञपदमेवान्यथा नेयम्? अयमेवात्र निष्कर्षः-यदि कारणवाक्यानां ज्ञानधर्मिसमर्पण एव तात्पर्यम्, ''यः सर्वज्ञः'' इत्यादिवाक्यमेव च मुख्यं लक्षणवाक्यम्, तर्हि सर्वज्ञकारणतापक्ष एव युक्तः, जीवव्यतिरिक्तं च ब्रह्म वेदान्तवाक्यसमधिगम्यम्। यदि तु न मुख्यं लक्षणवाक्यम्, तर्हि तु कारणस्य ज्ञानस्वरूपपर्यवसानपक्ष एव युक्तः, जीवाभिन्नं च ब्रह्म वेदान्तवाक्यसमधिगम्यमिति। किमत्र सूत्रकारो मन्यते? कारणत्वमन्नादिसाधारणं तटस्थलक्षणतत्त्वाऽऽनन्दस्वरूपबोधनार्थमेव वेदान्तेषु विवक्षितम्, न तु तात्पर्यत इत्येव सूत्रकारो मन्यते; अन्यथा हि कथं ''यः सर्वज्ञः'' इत्यादिलक्षणवाक्यं न सूत्रितम्। सर्वज्ञो हि सूत्रकारो ''यः सर्वज्ञः'' इत्यादि वाक्यम्, मन्यामहे, कारणवाक्यानां स्वार्थे तात्पर्यभ्रमो बहूनां भ्रममपसारयितुं नात्र संगृह्णाति, किन्तु जन्मादिवाक्यमेव। अनेन हि सर्व भृगुवल्लीप्रकरणमुपस्थापितं भवति। भृगुवल्ली हि ब्रह्मवल्लीव्यख्यानरूपा। ब्रह्मवल्ली तु ब्रह्मस्वरूपं ''यो वेद निहितं गुहायामि''ति गुहानिहिताभिन्नं निर्दिश्यान्नस्यैव ब्रह्मणः कार्यं परामृशति-''तस्माद्वा एतस्मादात्मन आकाशः संभूतः'' इति।। कथं च जीवाभेदः सत्यज्ञानादिरूपस्य ब्रह्मणः? इति शङ्कावारणार्थम्-''अन्नात् पुरुषः'' इत्याद्यारभ्यान्नमयाद्यात्मस्वरूपं निष्कृष्य बोधयति। तथा च कार्य-कारणयोरभेदाच्छरीरोपहितमन्नोपहितम्, किं बहुना? स्थूल-सूक्ष्मशरीरोपहितं जीवस्वरूपं तत्कारणसूक्ष्मभूतोपहिताभिन्नमिति जीवब्रह्माभेदो न बाधितः। तदेवं कारणोपहितं ब्रह्म किं ज्ञानाद्याश्रयं धर्मिरूपम्? उत ज्ञानानन्दादिरूपमात्रमिति निर्णयार्थमेव तु भृगुवल्ली प्रवृत्तेति, तत्र-''आनन्दो ब्रह्मेति व्याजानात्'' इत्यानन्दरूपतयैव ब्रह्मस्वरूपपर्यवसानस्य व्यवस्थापनाद् विशदं भृगुवल्ली ज्ञानमात्रात्मस्वरूपवादं तस्य च वस्तुगत्या प्रत्यगभिन्नब्रह्मवाद एव पर्यवसानं च गमयति, इति भृगुवल्लीप्रकरणस्यात्र लक्षणतया संग्रहात् प्रत्यभिन्नब्रह्मतावादमेव सूत्रकारो मन्यत इति सूचयन्नाह-*अत आह भगवान् सूत्रकार इति*।। *जन्माद्यस्य यत इति*।। एतेन-कारणवाक्यानां सर्वेषां भृगुवल्लीस्थकारणवाक्यैकवाक्यतया प्रवृत्तिरिति-ज्ञापनात् ''कारणत्वमपि ब्रह्मणः स्वरूपलक्षणमेव, नतु तटस्थलक्षणमि''ति शङ्काऽप्यनवसरेति- *सूचितम्*।।

त्रिपदमिदं सूत्रम्-जन्मादि, अस्य, यत इति। *अस्य=जगतः, *जन्मादि-उत्पत्त्यादि *यतः=यद्धेतुकम्, तद्ब्रह्मेति वाक्यार्थाद् जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणमिति सूचितम्। यथा चैतत् तटस्थलक्षणमेव, न तु स्वरूपलक्षणम्, तथा भाष्य एवोपरिष्टात् सूचयिष्यते। अनेन सूत्रेण 'अस्य' पदस्य 'यतः' पदस्य 'जन्म' पदस्य च साक्षात् प्रकृतिमात्त्रेण वा विषयवाक्यगतानां तेषां पदानामुपस्थापनद्वारा

जिज्ञास्यब्रह्मलक्षणतया-''यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ती''ति वाक्यं परामृश्यते। इदं च वाक्यं भृगुवल्ल्यां पञ्चकृत्वोऽभ्यस्यत इति किंपर्ययगतं तदत्र विवक्षितम्? इत्यत्र विनिगमनाविरहात् तेन वाक्येनोपक्रान्तं सर्वं प्रकरणमत्र विषयवाक्यतया विवक्ष्यते। तथा च जगत्कारणत्वमुखेनैतत्प्रकरणप्रतिपाद्यानन्दस्वरूपत्वं जिज्ञास्यब्रह्मस्वरूपलक्षणम्। इदं हि प्रत्यगभेदं विना ब्रह्मणि न संभवति? इति जिज्ञास्यं ब्रह्म प्रत्यगभिन्नं नित्य-शुद्ध-बुद्ध-मुक्तस्वभावमेव, न तु जगत्कारणत्वादिविशिष्टम्। तथा चाध्यारोपापवादन्यायेन वेदान्तसारसंग्रहणपरमेवेदं सूत्रम्। अनेन च सर्वोऽपि वेदान्तसारः ''अथातो ब्रह्मजिज्ञासा'', ''जन्माद्यस्य यतः'' इति सूत्रद्वयार्थसंग्रहात्मक इति फलति। सति चैवं ब्रह्मणः कारणत्वं कल्पितम्, न पारमार्थिकमिति स्वीकारादविद्यापरिणामात्मकस्यैव प्रपञ्चस्य ब्रह्मविवर्तत्वमपीति वा, अविद्या निमित्तम्, ब्रह्म विवर्तोपादानमात्रमिति वा निष्कर्षः पर्यसवन्नः।।

जन्मादिपदं सूत्रगतमवयवशो विभजते-*जन्मेति*।। ''उत्पत्तिरि''ति जन्मपदविवरणम्। जन्मादिरस्येति बहुव्रीहिसमास इति योजना। बहुव्रीहिसमासो द्विविधः-तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च। तस्य समासस्य गुणानामवयवानामप्यन्यपदार्थवत् क्रियान्वयार्थं विज्ञाने तद्गुणसंविज्ञानबहुव्रीहिः, अन्यथा त्वपरः। विवक्षातश्चास्य समासस्य निर्णयः-कुत्रचित् चित्रगुमानयेति वाक्यस्य चित्रगोभिः साकमानयनविवक्षायां प्रयोगो भवति, कुत्रचिच्चं नेति हि वस्तुस्थितिः। न हि समवायसम्बन्धेन गुणपदार्थस्यान्यपदार्थेनान्वयस्थले 'लम्बकर्णमानये' त्यादावेव तद्गुणसंविज्ञानबहुव्रीहिरिति वैयाकरणनियमः समादरमर्हति। तथा च जन्मपदार्थस्य स्थित्यादिभिः साकं समवायसम्बन्धेनानन्वयेऽपि तद्गुणसंविज्ञानबहुव्रीहिरत्र युज्यत एव। यद्यप्यत्रापि जन्मादिपदार्थसमुदायेन जन्मनः समवायसम्बन्धोऽपि न बाधितः, तथाऽपि प्रकृते पृथक् तद्गुणसंविज्ञानबहुव्रीहिव्यवस्थापनात् समुदायाविवक्षया, प्रत्येककारणतालक्षणतावादोऽपि भाष्यकारैः सूच्यत इव। इममेव सूचितं पक्षमादाय सिद्धान्तलेशसंग्रहे जन्मादिप्रत्येकलक्षणतावादाभिप्रायेण नव ब्रह्मलक्षणानीत्यादि विवेचितम्।।

वस्तुस्थितिस्तु-लक्षणत्रयविवक्षणे ब्रह्मत्रितयशङ्का स्यादिति त्रितयकारणत्वमेकं लक्षणमित्येव युक्तम्। अत एव-''यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ती''ति वाक्यत्रये यच्छब्दत्रयेऽपि ''तद्ब्रह्मे''ति वाक्यशेष एक एव तच्छब्द उपपद्यते; अन्यथा प्रत्येकलक्षणत्वे तच्छब्दत्रयमत्रापद्येतेत्यभिप्रायेणाह- ***जन्म-स्थिति-भङ्गं समासार्थ इति***।। ''जन्मादी'' त्येकवचननिर्देशात् समुदितरूपेण लक्षणत्वं विवक्षितम्, न केवलमेतावतैव, किन्तु एकस्यैव ''यतः'' इति यच्छब्दस्य निर्देशेनापीति भावः। *ननु*-त्रितयकारणत्वेऽवश्यविवक्षणीये जन्मन एवादित्वनिर्देशः सूत्रे किन्निबन्धनः? इत्याशङ्क्याह- ***जन्मनश्चेति***।। श्रुत्यर्थसंग्रहात्मकत्वात् सूत्रस्य श्रुतिनिर्देशमनुसृत्य वस्तुस्थितिमनुसृत्य च तथा निर्देश इति भावः। वस्तुस्थितिमेवोपपादयति- ***जन्मनेति***।। अस्यपदेन

श्रुतिगतेदंपदार्थपरामर्शात् तस्य च भूतविशेषणत्वेन तत्र प्रत्यक्षोपस्थापितभूतमरत्वम्। सति चैवं ''तस्माद्वा एतस्मादात्मन आकाशः संभूतः'' इति श्रुत्येकवाक्यताऽपि ''यतो वे''ति वाक्यस्य सूच्यते, इति प्रत्यगभिन्नं ब्रह्मैवात्र लक्ष्यमिति ज्ञाप्यते। *इदमा* ''यतो वे''ति वाक्ये विशेषेनाप्यत्र विशेष्यपरित्यागेन सूत्रे प्रयोगाद् विशेष्यपर्यन्तपरत्वादस्यपदघटकेनेदंशब्देन प्रत्यक्षसन्निधापितस्य धर्मिणो विशेष्यस्य परामर्श इति भावः। यद्यपि सर्वेषां भूतानां न प्रत्यक्षसन्निधापितत्वमिति नेदंशब्देन विशेषणं सर्वभूतसाधारणं भवति; तथाऽपि भूम्ना छत्रिन्यायेन प्रत्यक्षादिसन्निधापितानां निर्देशो नानुपपन्नः। अमुमेवार्थ सूचयितुम्-''प्रत्याक्षीदी''त्यादिपदम्। *ननु*-प्रत्यगभिन्नं ब्रह्म यदि जगतः कारणम्, तर्हि पूर्वोक्तप्रकारेणाभिन्ननिमित्तोपादानमित्येव वक्तव्यम्। इदं च ब्रह्मण एव प्रपञ्चभावः, इति कार्यत्वं कारणत्वं चेति कल्पनेनैव भवति। तत्र च परिणामिकारणत्वे ब्रह्मणोऽपि जन्मसम्बन्धः स्यादिति विकार्यत्वापत्तिरित्याशङ्कायां जन्मसम्बन्धो जगत एव विवक्षितः, न तु ब्रह्मणोऽपीत्याह-*षष्ठीति*।। **प्रत्यक्षादिसन्निधापितस्येत्यनुषङ्गाद्** जगत एव जन्मसम्बन्धः न निर्धर्मकस्य ब्रह्मण इति भावः। अयं च भावः, ***जन्मादिधर्मेति*** धर्मपदप्रयोगेण सूच्यते।।

ननु-''यतो वा इमानि भूतानि जायन्ते'' इति श्रुतौ ''यतः'' इति प्रकृतावेव पञ्चमी; ''जनिकर्तुः प्रकृतिरि''ति प्रकृतावेव पञ्चम्याः साधुत्वज्ञापनात्। प्रकृतित्वं च कर्तृभिन्नस्यैव मृदादौ दृष्टम्, इति पातञ्जलमतानुसारेणेश्वराधिष्ठितप्रकृतिपरिणामवाद एव श्रौत इति गम्यते; अथवा जीवसन्निधानमात्रेण प्रकृतिः परिणमते, इति सांख्यमतमेवात्र श्रौतं प्रतीयते, न तु चेतनं प्रत्यगभिन्नं वा ब्रह्मेति, अत आह- ***यत इति कारणनिर्देश इति***।। ''जनिकर्तुः प्रकृतिरि''ति सूत्रस्यापादानसंज्ञाविधायकत्वाद् अपादानसंज्ञाप्रयुक्तपञ्चमीविवक्षास्थल एव प्रकृतित्वमात्रं पञ्चम्या विवक्ष्यते। हेतावपि पञ्चमीविधानाद् हेत्वर्थे .पञ्चमीविवक्षायान्तु नायं नियमः, किन्तु कारणमात्रनिर्देशः। तच्च कारणत्वं यथायोगं केवलप्रकृतित्वपरित्यागेन प्रकृतित्वनिमित्तत्वोभयरूपं वा? अथवा केवलनिमित्तत्वमात्रं वा भवितुमर्हति। प्रकृते तूभयविधमपि विवक्ष्यत इति न पूर्वोक्तमतद्वयस्य, ब्रह्मणःकेवलनिमित्तकारणत्वमात्रम्, परमाण्वादिकमेव समवायिकारणमिति न्यायवैशेषिकमतयोश्चावसर इति सूच्यते। अत एव-''आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते'' इति कारणस्यानन्दरूपत्वं बोधितमुपपद्यते। अनेन हि-कारणतिरिक्तो न भोक्ता, नवा कर्तेति सूच्यते। आनन्दभोक्ता हि यद्यपरः स्यात्, तर्हि तत्रैव कारणश्रुतेः पर्यवसानं भृगुवल्ल्या अनुपपन्नम्। ततश्च निमित्तकारणमपि स एवेति सूचितम्। इममेवार्थं मनसि निधायोक्तम्- ***कारणनिर्देश इति***।। कारणत्वसामान्यविवक्षा, न प्रकृतित्वमात्रविवक्षेत्यर्थः। *ननु*-जनिधातुयोगे विशिष्य प्रकृतिमात्रविवक्षायामेव पञ्चमीप्रयोगस्य व्यवस्थापनाद् ''यतो वा इमानि भूतानि जायन्ते'' इति वाक्ये कथमुक्तनियमपरित्यागः? तथा च प्रधानादिकारणवाद एवात्र विवक्षित इत्याशङ्क्य, ''इमानि भूतानी''ति

व्याकृतकार्यप्रपञ्चस्य प्राणिमात्रस्य च कार्यत्वनिर्देशात् केवलाचेतनकारणत्वस्य नात्र संभव इति सूचयन् सूत्रार्थं निष्कृष्य प्रतिपादयति- ***अस्य जगत इति***॥ अस्येत्यस्य विवरणं जगत इति। जगतो विवरणम्-''नाम-रूपाभ्यां व्याकृतस्ये'' त्यादि रचनारूपस्ये''त्यन्तम्। *यतः इत्यस्य विवरणम्-''**सर्वज्ञादित्यादि-कारणादि**'' त्यन्तम्। जन्मादीत्यस्य विवरणम्- ''**जन्म-स्थिति-भङ्गमिति**। भवतीत्यादि तु वाक्यशेषः सौत्रवाक्यस्य पूरणार्थमध्याहृत इति योजना।।

अत्र कारणस्य सर्वज्ञत्वसर्वशक्तित्ववर्णनेन जीवकारणत्वं व्युदस्यते। अनेन च जीवाभिन्नस्य ब्रह्मणः कारणत्वविवक्षायामपि न जैवेन रूपेण कारणत्वम्, किन्त्वैश्वरेणैव रूपेणेति सूच्यते। सत्यपि च जैवेनैश्वरेण च रूपेण भेदे स्वरूपत एवाभेदविवक्षणान्न कोऽपि दोषः, अनेन च 'यतो वे''ति वाक्यं कारणतया जीवमेव गोचरयति; तत्त्वमसीति ब्रह्माभेदस्य तत्र वर्णनेन कारणवाक्यानां सर्वेषां जीवपरत्वावगमात्। सति चैवं जीवस्याहमर्थस्यासन्दिग्धत्वाद्विचारो न कर्तव्य इति पूर्वपक्षनिरासः सूच्यते। *अयमाशयः*-सत्यं जीव-ब्रह्मणोरभेदं वेदान्तवाक्यानि गमयन्ति; परन्तु न तद् जैवेन रूपेण किन्तु स्वरूपचैतन्यमात्रेण, कारणत्वेन रूपेण चैतन्यमीश्वरपदव्यपदेशस्यैवार्हमिति सर्वज्ञत्वादिविशिष्टमपि रूपं न जैवमिति। तथा च तटस्थलक्षणलक्ष्यतया तत्पदवाच्यतयाऽपि च न जीवो वेदान्तेषु बोध्यत इति सिद्धान्तः पर्यवसन्नः; सति चैवं जीवस्वरूपमीश्वरस्वरूपं वाऽऽपाततो वेदान्तवाक्याधिगतं न मुख्यब्रह्मशब्दार्थ इति भृगुवल्लीप्रकरणप्रतिपाद्यं तद्विचारैकसमधिगम्यमिति, न ब्रह्मविचारानावश्यकत्वाक्षेपस्यात्रावसरो वर्तते।। *ननु*-''यतो वे''ति वाक्यतो न जैवेन रूपेण ब्रह्मणः कारणत्वम्, किन्त्वैश्वरेणैव रूपेणेति कथमवगम्यते? नह्यत्र सर्वज्ञादिपदं वर्तत इत्यत आह- ***अनेककर्तृ-भोक्तृसंयुक्तस्येति***॥

केचन कुत्रचन कर्तार एव; यथा जातेष्ट्यादौ पित्रादयः, अथवा लेके सेनादयः। केचन तु भोक्तार एव; यथा श्राद्धे पित्रादयः, लोके च राजादयः। केचन च कर्तारो भोक्तारश्च; यथा ज्योतिष्टोमादिषु कर्तारः, लोके च स्वबलेन स्वक्रिययैव च प्रभवः। एतादृशाश्च बहवः प्रपञ्चे वर्तन्त इति, ''इमानि भूतानी''ति भूतपदेन सर्वेषामेव तेषामपि कार्यकोटौ प्रवेशो गम्यते। न च जैवरूपेण कार्यस्यैव ब्रह्मणस्तेनैव रूपेण कारणत्वमपीति, रूपान्तरेणैव कारणत्वमिति विशदमवगम्यते। तत्तु रूपम्-''यः सर्वज्ञः सर्वविदि''ति वाक्यान्तरसमधिगम्यमिति। वाक्यान्तरैकवाक्यतामपि मत्त्वा भाष्ये ''यतः'' इति ''सर्वज्ञात् सर्वशक्तेरि''ति च विवृतमिति न कोऽपि दोषः। अनेन च-''यः सर्वज्ञः'' इत्यस्यैव तत्पदवाच्यार्थसमर्पणविधया ''यतो वे'' त्यनेनोपसंहारः, न तु तेन सह ''यतो वे''त्यस्यापीति पूर्वोक्तमेव स्फुटीकृतं भवति। यद्यपि भूतपदस्य पञ्चभूतान्येव मुख्योऽर्थः, तथापीमानि पदैकवाक्यतया प्रत्यक्षयोग्यम्, किं बहुना? दृश्यं कार्यमात्रमुपस्थापितम्। जीवा अपितु-''एतस्मादात्मनः सर्वे आत्मानः समुच्चरन्ती''ति वाक्यात् कार्यतयाऽवगम्यन्ते। जीवानादित्ववादोऽविद्योपहितो जीव इति पक्षाभिप्रायेणाऽथवा प्रवाहतोऽनादित्वेनेति

न विरोधः। भूतपदकृत्यं ''यतो वे''ति वाक्ये जीवकारणत्वनिरास इति तु सारांशः। इमानिपदकृत्यन्तु व्याकृतानां भूतानामुपस्थानपनद्वारा व्याकरणशक्तिमतश्चेतनस्यैव कारणत्वम्, नत्वचेतनस्य प्रधानस्य परमाणूनां स्वभावस्याभावस्य वेति सूचनमेवेति सूचयन् इमानिपदविवक्षितानि जगद्विशेषणानि निर्दिशति- *नामरूपाभ्यां व्याकृतस्येति*।। अतो **''नाम-रूपाभ्यां व्याकृतस्ये''** त्यनेनाचेतनकारणतावादनिरासः। **''प्रतिनियतदेश-काल-निमित्त-क्रिया-फलाश्रय-स्ये''**ति स्वभाव-कारणतानिरासः। **''मनसाऽप्यचिन्त्यरचनारूपस्ये''**ति समष्टिजीवरूपहिरण्यगर्भकारणतानिरासः। *प्रतिनियतेति*।। किञ्चित्कार्य प्रतिनियतदेशकम्, देशविशेष एवोत्पद्यते; यथा कृष्णमृगादि। किञ्चित्प्रतिनियतकालकम्; यथा कोकिलारावादि। किञ्चित्प्रतिनियतनिमित्तकम्; यथा बलाकागर्भादि। किञ्चित् प्रतिनियतक्रियकम्; यथा 'ब्राह्मणानामेव ज्योतिष्टोमादि। किञ्चित्तु प्रतिनियतफलकम्-यथा केचित्सुखिनः, केचिद्दुःखिनः, इति देशविशेषम्, कालविशेषम्, निमित्तविशेषम्, क्रियाविशेषम्, फलविशेषं चाश्रितानि बहुविधानि कर्माणि दृश्यन्त इति।। ''जायते, अस्ति, वर्धते, परिणमते, अपक्षीयते, नाश्यति'' इति यास्कपरिपठितानां मध्ये परिणामस्य जन्मनि, वृद्धेः सत्तायां जन्मनि वा, अपक्षयस्य च नाशेऽन्तर्भावाद् जन्मादित्रयकारणत्वेन तत्कारणत्वस्याप्यर्थत एव सिद्धिरित्याह- ***अन्येषामिति***।। ***भावविकाराणामिति***।। परिणाम-वृध्यपक्षयानामित्यर्थः। *ननु*-तर्हि जन्मादिषट्कारणत्वमेव कथमत्र न विवक्षिताम्? तथाचैतत्सूत्रमपि निरुक्तमूलकमेव, न वेदान्तवाक्यमूलकमिति शङ्कायामाह- *यास्कपरिपठितानान्त्विति*।। यास्कमुनिर्हि स्थितिकालीनान् भूतानामेव विकारान् निरुक्ते संगृह्णाति, इति निरुक्तमूलकत्वे सत्रस्यादिकारणे सन्दोहो न निवृत्तः स्यात्, एवं जीवकर्तृत्वेऽपि जन्मादिकारणत्वोपपत्त्या सूत्रकारणामहमर्थजीवविज्ञास्यतायामेव तात्पर्यं पर्यवस्येदिति प्रत्यगभिन्नब्रह्मजिज्ञास्यताऽनुपपन्ना स्यादिति भावः।। **''न यथोक्तविशेषणस्ये ''त्यादिभाष्यम्- ''नाम-रूपाभ्यां व्याकृतस्येत्या''**दिविशेषणप्रयोजनपरमिति पूर्वमेव सूचितम्। अत्र *प्रधानादित्याद्यभावाद्वा इत्यन्तं* दृष्टान्तार्थम्, ''संसारिणो'' वेति प्रकृतसिद्धान्तनिरसनीयपूर्वपक्षार्थमिति विवेकः। ''प्रतिनियते''ति विशेषणव्यावर्त्यपक्षमाह- *न च स्वभावत इति*।। *ननु*-जगत्कारणत्वं सर्वज्ञं ब्रह्म विहायान्यत्र नास्तीति वर्णने नोपपन्नम्; यतः कुलालादिनानाजीवसाधारणम्, जीवसमष्टिहिरण्यगर्भसाधारणं वा तत्, इत्याशङ्काम्-न केवलं वेदान्तिनः, किन्तु वैशेषिकादयोऽप्यनुमानप्राधान्यवादिनः जगत्कारणत्वमुक्तविधेश्वरस्यैवासाधारणं मन्यन्ते, इति नान्यत्रोक्तलक्षणस्य संभवनालेशोऽपि; अन्यथा क्षित्यङ्कुरादिकम्, सकर्तृकम्; कार्यत्वात्, इत्यनुमानस्यापि जीवकर्तृकत्वं नानाजीवसमष्टिरूपहिरण्यगर्भकर्तृकत्वं वाऽऽदयार्थान्तरमापद्येत, इति नान्यत्रास्य संभावनामात्रमपि, किन्तु ब्रह्मण्येवास्य संभावनेत्यभिप्रायेण परिहरति- ***एतदेवेति***।। *ईश्वरकारणिनः=ईश्वरमेव कारणं मन्यमाना वैशेषिकादयः। *एतदेव=जगत्कारणत्वमेव।

संसारिव्यतिरिक्तेश्वरसाधनरूपमनुमानं मन्यन्ते। संभावनामात्रस्यानुमानत्वव्यपदेशो वैशेषिकाणां विभ्रमनिबन्धन इति भावः। अत्रायमनुमानप्रयोगः-ईश्वरः, संसारिव्यतिरिक्तः, जगत्कारणत्वात्; व्यतिरेकेण कुलालादिवदिति। तद्यदि जगत्कारणत्वं जीवसमष्टिधर्मोऽपि स्यात् तर्हि तत्र व्यभिचारादिदमुक्तविधेश्वरसाधकमेव न स्यादिति जगत्कारणत्वं ब्रह्मलक्षणमिति युक्तमेव। तथा च न केवलं ''यतो वे''त्यादि वेदान्तवाक्यमेव जगत्कारणे ब्रह्मणि प्रमाणम्, किन्तु तदविरोध्यनुमानमपीति, ब्रह्म जगत्कारणमित्यस्मिन्नंशे वैशेषिकादिमतसाम्यमपि वर्तत इति भावः।।

ननु-यदि वैशेषिकमताद् वेदान्तमतस्याविशेषः, तर्हि सूत्रकारैरपि संसारिव्यतिरिक्तेश्वर-साधनमनुमानमेवात्र सूत्रितम्, न तु वेदान्तवाक्यार्थः, इति कथमिदं सूत्रं तटस्थलक्षणविधया प्रत्यगभिन्नब्रह्मलक्षकम्? इति प्रत्यगभिन्नब्रह्मजिज्ञास्यतावादोऽसंभवदुक्तिकः, किन्तूपास्यसगुण-ब्रह्मजिज्ञास्यतावाद एवोचित इत्यभिप्रायेण शङ्कते- ***नन्विहापि तदेवेति*।।** *इह=ब्रह्ममीमांसायाम्। *जन्मादिसूत्रे=''जन्माद्यस्य यतः'' इति सूत्रे। अपिशब्दस्यानेनान्वयाद् जन्मादिसूत्रेऽपीत्यर्थः। *तदेव* संसारिव्यतिरिक्तेश्वरसाधनमनुमानमेव। तथाच नाद्वैतसिद्धिरिति निगूढो भावः। उक्तमाक्षेपं निरस्यति-*नेति*।। सत्यं ''यतो वा इमानि भूतानि जायन्ते'' इत्यादिवाक्यानि संसारिव्यतिरिक्तेश्वरास्तित्वसाधनमनुमानं चैकार्थान्येव। परन्त्वियान् विशेषः-यत्, अनुमानमिदं वैशेषिकाणां पर्यवसितबोधजनकम्, ''यतो वे'' त्यादिवाक्यन्तु न पर्यवसितबोधजनकम्। इदं हि अवान्तरवाक्यमेव, न प्रधानवाक्यम्। तथाचापर्यवसितबोधकालिकीं दशां ''यतो वेत्यादिवाक्यजातस्य गृहीत्वाऽनुमानसाम्यं विवक्षितम्, नतु स्वप्रधानवाक्यैकवाक्यतादशां गृहीत्वाऽपि। तदाहि-''यतो वे'' त्यादिवाक्यं स्थूलारुन्धतीन्याये प्रथममियमरुन्धतीति वाक्यमिववाविवक्षितार्थमेव भवतीति तटस्थलक्षणपरमेव। तथा चानुमानस्य तटस्थलक्षणस्य च संसारिव्यतिरिक्तेश्वरसाधनत्वमात्रेण कथमद्वैतासिद्धिः। अद्वितीयं हि ब्रह्म कारणवाक्यप्रतिपाद्यमिति नायमद्वैतसिद्धान्तः। कारणवाक्यमुखेन तत्पदार्थोपस्थापनपूर्वकं प्रत्यगभिन्नब्रह्मस्वरूपबोधकवेदान्तवाक्यसमधिगम्यं ह्यद्वैततत्त्वमद्वैतिनो मन्यन्ते। सति चैवमवान्तरतात्पर्यविषयेऽर्थे वैशेषिकादिभिः साम्येऽपि महातात्पर्यविषयेणार्थेन तैरसाम्यात्, प्रत्युत विरोधाच्च, न वैशेषिकानुमानमेवात्र सूत्रकारेण जिज्ञास्यब्रह्मोपस्थापकतया विवक्षितम्, किन्तु भृगुवल्लीप्रकरणं सर्वमपीति वक्ष्यमाणं मनसि निधाय, वेदान्तवाक्यमूलकमेव सूत्रम्, वेदान्तवाक्यानि च वक्ष्यमाणान्यभिन्ननिमित्तोपादानं प्रत्यगभिन्नं ब्रह्मैव प्रतिपादयन्तीति, न पूर्वोक्तायाः शङ्काया अवसर इत्याशयेनाह- ***वेदान्तवाक्यग्रथनार्थत्वादिति*।।** *ननु*-कथं वेदान्तवाक्यानामेव ब्रह्ममीमांसा-यामुपक्षेपो नानुमानादीनामपि? ब्रह्ममीमांसा हि प्रारभ्यमाणा स्वोपकरणतया तर्कमपि समादत्त इति हि-''**वेदान्तवाक्यमीमांसा तदविरोधितकार्यकरणा** निःश्रेयसप्रयोजना प्रस्तूयते'' इति

जिज्ञासाधिकरणोपसंहारभाष्ये व्यक्तम्। तद् यत्रानुमानस्य नावसरः उपास्यहिरण्यमायत्वादौ, तत्र वेदान्तवाक्यान्येव समालेच्यन्ताम्, जगत्कारणस्वरूपे त्वनुमानस्याप्यस्त्यवसरः अविरोधश्च वेदान्तवाक्यैर्वर्तते, इति कथं। नानुमानस्यैवात्र नोपक्षेप इत्यत आह- *वाक्यार्थेति*।।

अयं भावः- यदि जगत्कारणस्वरूपमात्रमेव वेदान्तवाक्यप्रतिपाद्यम् न तदतिरिक्तरूपबोधने वेदान्तानां तात्पर्यम्, तर्हि वेदान्तवाक्यमात्रमूलतावादोऽप्रयोजनः, यदितु वेदान्तवाक्यानि स्वरूपान्तरमेव पारमार्थिकं ब्रह्मणः प्रतिपादयन्ति, तर्हिं तु जिज्ञास्यं ब्रह्मानुमानगम्यमेवेत्यस्य वादस्य वेदान्तवाक्यविरुद्धत्वान्नात्रानुमानोपक्षेपो विकल्पसहः। वस्तुस्थितिस्तु- जिज्ञास्यं ब्रह्म नानुमानगम्यम्। व्यक्तीकरिष्यते चेदमुपरिष्टात्। केवलं तत्त्वमसीतिमहावाक्यजन्य एव हि ब्रह्मसाक्षात्कारो मोक्षस्य साधनम्। न चानुमानजन्य; साक्षात्कारः । तथाच न जिज्ञास्यं ब्रह्मानुमानमूलकमत्रोपक्षेप्तुमर्हतीति भावः।। *ब्रह्मावगतिः=ब्रह्मसाक्षात्कारः। तथाच साक्षात्कर्तव्यं ब्रह्मानुमेयमिति विरुद्धमिति भावः। तदेवाह- ***नानुमानादिप्रमाणान्तरनिर्वृत्तेति***।। *ननु* एवं सति पूर्वापरविरोधः, यतः-''एतदेवानुमानं संसारिव्यतिरेक्तेश्वरास्तित्वसाधनं मन्यन्ते''इत्यनुमानगम्यं जगत्कारणं ब्रह्मेति निरूप्यानुपदमेवास्मिन् जगत्कारणतया ब्रह्मलक्षणपरे सूत्रे ''नानुमानोपन्यासः'' इति वर्ण्यते, इत्यत आह- ***सत्स्विति***।। ***जन्मादिकारणवादिष्विति***।। तत्पदवाच्यार्थसमर्पणपरावान्तरवाक्यार्थनिर्णय एवानुमानापेक्षा, जन्मादिसूत्रन्तु नावान्तरवाक्यार्थनिर्णयार्थमेव सूत्रितम्, किन्तु मुख्यब्रह्मनिर्णयार्थमपीति, अंशतोऽनुमानापेक्षावर्णन एव पूर्वतनग्रन्थसन्दर्भस्य तात्पर्याद् मुख्यार्थेऽनुपयोगेन 'सूत्रमनुमानमूलकमेवेति न युक्तमि'त्युत्तरग्रन्थतात्पर्याच्च न पूर्वापरिविरोधः; यतो यस्मिन्नंशे वाच्यार्थनिर्णयेऽविरोधः, तत्र तर्कोऽप्युपयुज्यते, यत्र तु मुख्यार्थे विरोधः, तत्र तर्को नोपयुज्यत इति भावः। सति चैवं जगत्कारणत्वाद्यंशस्यानुमानगम्यत्वादेव वेदान्तवाक्यानां न तत्र मुख्यप्रामाण्यसंभवः, इति तत्पदवाच्यार्थो न वेदान्तार्थः, किन्तु लक्ष्यार्थ एवेति निष्कर्षोऽपि सिद्धयति।।

ननु-सगुण ईश्वरोऽप्नुमानगम्यो वैशेषिकाणां न वेदान्तवाक्यैरपि बोध्यते, वेदान्तवाक्यानि ह्यभिन्ननिमित्तोपादानं ब्रह्म बोधयन्ति; न चैतदनुमानेनावगन्तुं शक्यते। तथा च सगुणमपि ब्रह्म जगत्कारणं वेदान्तमात्रावगम्यमिति, न प्रत्यगभिन्नब्रह्मलक्षणमेवोक्तसूत्रमिति युज्यते। तथाहि-ब्रह्म, नानुमानगम्यम्, वेदार्थत्वात्; धर्मवद् इत्याशङ्क्य, मुख्यं ब्रह्म यदि पक्षः, तर्हि सिद्धसाधनमिति वक्ष्यन् गौणब्रह्मपक्षतायां नोक्तानुमानस्य प्रसर इति सूचयितुं मन्तव्यतयाऽनाम्नायमानत्वमुपाधिं ब्रह्मणो मन्तव्यत्वाम्नातप्रदर्शनेन सूचयति-***श्रुत्यैव चेति***।। सत्यधर्मे दृष्टान्ते न मन्तव्यत्वनिर्देशः, इति साध्यव्याप्तिरपि, ब्रह्मजिज्ञासायान्तु=जिज्ञास्यब्रह्मणि तु न साधनव्याप्तिरित्याह- ***न धर्मजिज्ञासायामिवेति***।। व्यधिकरणदृष्टान्तोऽयम्। धर्मजिज्ञासापदं ब्रह्मजिज्ञासापदं च 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति न्यायेन जिज्ञास्यधर्मपरं तादृशब्रह्मपरं चेति मन्तव्यम्। तथाच जगत्कारणांशेऽनुमेयत्वेऽपि न विरोध इति

भावः। श्रुत्यतिरिक्तप्रमाणापेक्षा ब्रह्मणि युक्ता, न धर्मे, इत्यत्र युक्त्यन्तरमप्याह- ***अनुभवावसानत्वादिति***॥ ज्ञानमात्रेण फलोपयोगित्वादित्यर्थः। फलजनकं हि ब्रह्मज्ञानं साक्षात्काररूपमेवेति, प्रत्यगभेदपक्षविरोधिशङ्कानां प्रपञ्चमिथ्यात्वासंभवादिपराणां निरासार्थमनुमानाद्यपेक्षाऽपि वर्तते। अत एव **"श्रोतव्यो मन्तव्यः" इति मननविधिरुपपद्यते।** तथाच ब्रह्म, प्रमाणान्तरापेक्षसाक्षात्कारविषयः, भूतवस्तुत्वात्; घटादिवदिति सत्प्रतिपक्षानुमानबाधितं पूर्वोक्तं वेदार्थत्वेन ब्रह्मप्रमाणान्तराविषयत्वानुमानमिति भावः। ज्ञानमात्रेण फलोपयोगित्वन्तु न धर्मस्य वर्तत इति दृष्टान्तवैषम्यसूचनद्वारा ज्ञानमात्रेण फलानुपयोगित्वेन सोपाधिकत्वमपीति सूचयन्नाह- ***कर्तव्ये हीति***॥ *नानुभवापेक्षा= न साक्षात्कारापेक्षाऽस्ति; यतोऽनुष्ठानमात्रेण फलसाधनत्वम्, अनुष्ठानं च परोक्षज्ञानमात्रेण भवति। अनुष्ठिते च कर्मणि साक्षात्कारयोग्यत्वेऽपि यागादीनां गोदोहनादीनां वा न साक्षात्कारद्वारैव फलसाधनत्वमिति न साक्षात्कारापेक्षेति भावः। ***श्रुत्यादीनामेव प्रामाण्यम्***॥ यागादिस्वर्गसाधनत्वं हि न प्रत्यक्षगम्यम्। अदृष्टद्वारैव फलसाधनत्वेन तस्य च साक्षात्कारायोग्यत्वेन यागादिधर्मत्वं श्रुत्येकसमधिगम्यम्। तथा च यागप्रत्यक्षत्वेऽपि तद्धर्मत्वं श्रुत्येकसमधिगम्यभिति भावः। *ननु* ब्रह्मवत् धर्मोऽपि ज्ञानमात्रेण फलोपयोगि भवत्विति शङ्कायामाह- ***पुरुषाधीनात्मलाभत्वाच्चेति***॥ अनुष्ठानेन हि कर्तव्यस्य यागादेः स्वरूपसिद्धिः, न तु ततः पूर्वम्, इति ब्रह्मवदनुभवसाधनत्वे भूतवस्तुत्वेऽपि चानुष्ठानवैयर्थ्यमापद्येतेति भावः। धर्मस्य साध्यत्वमेव, न तु सिद्धत्वमितीममर्थं लौकिकवैदिकदृष्टान्तमुखेनाह- ***कर्तुमिति***॥ लौकिकं वैदिकं च कर्म कर्तुं शक्यम्, अकर्तुं शक्यम्; कर्तुं शक्यमन्यथा कर्तुं शक्यमिति कर्तुमित्यस्यावृत्त्या वाक्यमिदं योजनीयम्। यत्तु कर्तुमकर्तुंच शक्यम्, तत् पुरुषाधीनात्मलाभम्, न तु सिद्धम्। लौकिकं कर्म कर्तुमकर्तुमन्यथा कर्तुं च शक्यं निदर्शयति- ***यथाऽश्वेनेति***॥ अश्वेन गच्छति, न गच्छति इति, कर्तुं शक्यमकर्तुं शक्यमिति प्रदर्शनार्थम्। पद्भ्यां गच्छति, अन्यथा (रथादिनेतिशेषः) वेति कर्तुमन्यथा कर्तुमिति प्रदर्शनार्थम् तथाच वाक्यद्वयं कर्तुमकर्तुं शक्यमिति प्रदर्शनार्थम्, अपरं वाक्यद्वयं कर्तुमन्यथा कर्तुं शक्यमिति प्रदर्शनार्थमिति चत्वारि वाक्यान्यत्र विवक्षितानि। लौकिककर्मवद् वैदिकं कर्मापि कर्तुमकर्तुं शक्यम्, अकर्तुमन्यथा कर्तुं शक्यमिति प्रदर्शनार्थं तत्रापि वाक्यचतुष्टयं वाक्यद्विकरूपं विधि-निषेधाद्यात्मकं संगृह्णाति- ***अतिरात्र इति***॥ अत्रा''तिरात्रे षोडशिनं गृह्णाती''ति वाक्याद्विकेन कर्तुमकर्तुं च वैदिकं कर्म शक्यमुदाहरति। ''उदिते जुहोति'', इति वाक्यद्विकेन कर्तुं शक्यमन्यथा वा कर्तुं शक्यमुदाहरति। यत्रावश्यकर्तव्यताऽवगता, तत्रान्यथाकरणस्यापि सति विधावसरोऽस्ति, नत्वेवं ब्रह्मणि वर्तते, इति ब्रह्मधर्मवैलक्षण्यमर्थसिद्धमेवेति भावः। *ननु*॥-वैकल्पिकानां कर्मणां भवतु पुरुषाधीनात्मलाभत्वम्, नित्यानान्तु कर्मणामवश्यकर्तव्यानां न पुरुषाधीनात्मलाभत्वमित्याशङ्क्य, वैकल्पिकदृष्टान्तेन नित्यानामपि कर्मणां पुरुषाधीनात्मलाभत्वमेवेति प्रदर्शनार्थमाह- ***विधिप्रतिषेधाश्चेति***॥ तथाच ज्येतिष्टोम-कलञ्जभक्षणादयोऽपि, पुरुषाधी-

नात्मलाभाः, विधि-प्रतिषेधविषयत्वात्, वैकल्पिकादिवदित्यनुमानप्रयोगोऽत्र विवक्षितः। असति च पुरुषाधीनात्मलाभत्वे नित्यकर्मादेर्विधिवैयर्थ्यमापद्येत । तथाच यथा विधि-प्रतिषेधा अपि विकल्पोत्सर्गापवादा इव सार्थकाः स्युः, तथा व्यवस्थापनं पुरुषाधीनात्मलाभत्वमन्तरा कर्मणां नोपपद्यते, इति न किमपि कर्म सिद्धं ब्रह्मवदिति निष्कर्षः। *विकल्पोत्सर्गापवादाश्चेति*।। चशब्द इवार्थकः। स्युरित्याशंसायां लिङ् न तु संभावनायाम्। यदि पुरुषाधीनात्मलाभत्वं कर्मणां स्यात्, तर्हीत्यध्याहारेण वाक्यं योजनीयम्। विकल्पादिस्थले नित्यस्थले च कर्मणि पुरुषस्वातन्त्र्यं समानमेव। इयान्विशेषः–विकल्पस्थले करणाकरणयोः फलविशेषः, नित्यस्थले तेषां करणे गुणः, अकरणे तु प्रत्यवाय इति। सर्वथा तु नित्यमपि कर्म पुरुषेच्छां विना नात्मानं लभते; अन्यथाऽकरणेऽपि प्रत्यवायानापत्तेरिति भावः। भामत्यां तु–ग्रहणाग्रहणादेः पुरुषस्वातन्त्र्ये कथं न विधिवैयर्थ्यम्, यतो विध्यभावेऽपि विकल्पो भविष्यतीत्याशङ्क्य समाधनार्थसू– ***विधिप्रतिषेधाश्चेति***।। सत्यं विधिद्वयस्थले विधि-प्रतिषेथस्थले च पुरुषस्वातन्त्र्यं वर्तते? तथाऽपि तदुपस्थापनेन विधीनां साफल्यमिति न दोष इत्याह– ***विकल्पोत्सर्गापवादाश्चेति***।। विकल्पोत्सर्गापवादरूपत्वेन सत्यपि स्वातन्त्र्ये साफल्यमिति भाव इति विवृतम्। तथा च कर्तुमकर्तुमन्यथा वा कर्तुं शक्यत्वेऽपि विकल्पस्थले ज्ञानद्वयमपि प्रमैव कर्मणीति भावः। *ननु*–यदि विकल्प्यमानत्वमात्रं पुरुषाधीनात्मलाभत्वप्रयोजकम्, तर्हि वस्तुन्यपि विकल्पस्य दर्शनाद् ब्रह्मणि पुरुषाधीनात्मलाभत्वप्रसङ्गः, इति धर्मावैलक्षण्यात् कथं ब्रह्मणि प्रमाणान्तरप्रवृतिः? इत्याशङ्क्याह– ***न तु वस्त्वेवमिति***।। वस्तु ''एवम्'' ''नैवमि''ति न विकल्प्यते, वस्तु ''अस्ति'' 'नास्ती'ति वा न विकल्प्यत इति योजना। तत्र प्रथमेन वाक्येन करणान्यथाकरणात्मकविकल्पो निरस्यते, द्वितीयेन तु करणाकरणरूपो विकल्पः। यथा हि स्वरूपतो विशिष्य सम्यग् ज्ञायमानमेव कर्म सत्यपि निषेधेऽबाधितं सदेव विकल्प्यते, एवं वस्तुनि स्वरूपतो विशिष्य ज्ञायमाने सत्यपि निषेधेनाबाधितं सद् न विकल्प्यत इति भावः। तथाच प्रमात्मकःविकल्पविषयत्वमेव पुरुषाधीनात्मलाभत्वप्रयोजकमिति न धर्मावैलक्षण्यं ब्रह्मण इति निष्कर्षः। विधितन्त्रेष्वेव हि विकल्पप्रमा, नान्यत्र।। *ननु*–दृश्यन्ते वस्तुन्यपि, परन्तु न ते विधितन्त्राः, किन्तु सवासनबुद्धितन्त्राः, इति विधितन्त्रविकल्पविषयत्वेनैव धर्मवैलक्षण्यसाधनान्न दोष इत्याह– ***विकल्पनास्त्विति***।। संशय-विपर्यासादिरूपास्तु। पुरुषबुद्धिः=सवासनमन्तःकरणम्। तथा चैतेषां विकल्पानां प्रमाणानधीनानां न प्रमात्वम्, यतो न वस्तुतत्त्वमपेक्षन्त इमे विकल्पा इति भावः। पुरुषबुद्ध्यपेक्षत्वेऽपि कथं वस्तुविकल्पानां न प्रामाण्यमिति? अत आह– ***न वस्तुयाथात्म्यज्ञानमिति***।। अबाधितवस्तुज्ञानं वस्तुतत्त्वमेवापेक्षते, न तु सवासनमन्तःकरणम्। यस्य हि शीतोष्णादिवासनैव नास्ति, तस्येन्द्रियसंपर्कमात्रेण विनापीच्छां तज्ज्ञानं भवतीत्यनुभवसिद्धमिति संशयज्ञानं न हि तत्त्वज्ञानमिति योजना। 'पुरुषोऽन्यो वे'त्यत्रान्यो वेत्यस्यैव विवरणम्–पुरुषो वेति, ज्ञानान्तरविवक्षा। *ननु*–संशयज्ञाने स्थाणोरपि प्रतीयमानत्वे तदंशे प्रमात्वस्य विद्यमानत्वात् कथं न संशयज्ञानं प्रमेति? अत आह–विकल्पज्ञानं

मिथ्याज्ञानमेव, इति नेदं विरुद्धमिति भावः। एमतत्प्रकरणस्थमंशभेदेन प्रमात्वाप्रमात्वपक्षमादायैव वेदान्तपरिभाषादावेकस्मिन् ज्ञाने प्रत्यक्षत्व-परोक्षत्वादिकं विवरणमतानुसारेण प्रतिपादितम्। भामतीमतेऽपि तु नेयं प्रक्रिया विरुद्धेति तु निष्कर्षः। प्रकृतमुपसंहरति–**तत्रैवं सतीति** *॥ *तत्र=कर्म-ब्रह्मज्ञानयोः। *एवं सति=कर्म पुरुषतन्त्रम्, भूतवस्तुज्ञानं तु वस्तुतन्त्रमिति स्थिते सति। ब्रह्मज्ञानमपि वस्तुतन्त्रमित्यादि निगदव्याख्यातम्। तथाच कर्मण इव ब्रह्मणः श्रुत्येकगम्यत्वस्याभावाद् जगत्कारणे ब्रह्मण्यनुमानप्रमाणस्याप्यवसरो न दृष्ट इति पर्यवसन्नमिति निष्कर्षः॥

एतावता प्रपञ्चेन ब्रह्मणः प्रमाणान्तरविषयत्वयोग्यत्वसाधनेन जगत्कारणे ब्रह्मणि वेदान्तविरोध्यनुमानप्रमाणप्रवृत्तेरप्यौचित्यं व्यवस्थापितम्, सति चैवमाशङ्का समुदेति–यत् अनुमानाविरोधेन किं वेदान्तप्रामाण्यम्? उत वेदान्ताविरोधेनानुमानप्रामाण्यमिति? तत्राद्ये मूलकारणमनुमानमेव "जन्माद्यस्य यतः" इति सूत्रेणोपक्षिप्यत इति वेदान्तानामपि जगत्कारण एव पर्यवसानम्, न तु प्रत्यगभिन्ने ब्रह्मणि। द्वितीये तु वेदान्तावान्तरतात्पर्यविषयमेवानुमानं गोचरयति, न तु मुख्यतात्पर्यविषयमिति, सर्वांशे नानुमानप्रमाणप्रवृत्तिः सूत्रकाराभिमता प्रतीयते। किमत्र युक्तमिति शङ्कायामनुमानप्राधान्यवादी शङ्कते– ***ननु भूतवस्तुत्व इति** *॥

ज्योतिष्टोमादिवाक्यानि हि धर्मस्य प्रमाणान्तराविषयत्वात्–'अर्थं बुध्वा शब्दरचनेति न्यायस्य तत्राप्रसरादपौरुषेयाणीति युक्तम्, वेदवाक्यमीमांसैव च धर्ममीमांसेति। वेदान्तवाक्यानि तु प्रमाणान्तरेणार्थमुपलभ्य रचितत्वकल्पनासंभवात् पौरुषेयाणि, इति मूलप्रमाणपरीक्षाया एव युक्तत्वाद् वेदान्तवाक्यविचारणाऽयुक्ता निष्प्रयोजना चेति भावः। ***तत्र पुरुषोऽन्यो वेति** *॥ संशयज्ञाने कोट्यन्तरज्ञानमेव पुरुषबुद्ध्यपेक्षम्, नतु स्थाणुकोटिज्ञानमपीति तदंश एव विकल्पनात्वाद् *अनर्थिकैव प्राप्तेति*॥ अनुमानेनैव ब्रह्मस्वरूपस्य निर्णीतत्वादिति शेषः। वेदान्तानामनुवादमात्रत्वम्, न स्वतः प्रामाण्यमिति निष्कर्षः। सत्यमनुमानसिद्धजगत्कारणस्वरूपमात्र एव वेदान्तानां तात्पर्ये वेदान्तविचारोऽनर्थक एव, परन्तु नेयं वस्तुस्थितिः; वेदान्तवाक्यानि हि कारणस्वरूपमनूद्य तस्यैव निर्विशेषस्वरूपत्वबोधनार्थमेव प्रवृत्तानि, न तु कारणस्वरूपमात्रबोधनेन निराकाङ्क्षाणि। तत्तु स्वरूपं नानुमानप्रमाणस्य प्रत्यक्षप्रमाणस्य वा कथमपि विषयः। तद्यदि वाच्यार्थप्रतीतिमात्रमनुमानमूलमभिप्रेयते, तर्हि तु नेयमनिष्टापत्तिः; यतस्तत्र न मुख्यं तात्पर्यमर्थवादानामिव वाच्यार्थेषु। यथाच प्रमाणान्तरप्राप्तार्थबोधकानामपि–"अग्निर्हिमस्य भेषजमि"त्यादिनां नाप्रामाण्यम्, तथा देवताधिकरणभामत्यां व्यक्तम्। व्यक्तीकरिष्यते चेदं समन्वयसूत्रभाष्योपक्रमेऽपि। तथा चानुमानाद्यनुगृहीतांशानां बोधनार्थं वेदान्तवाक्यानामपेक्षितत्वेऽपि तेषामर्थं बुद्ध्वा शब्दरचने'ति न्यायेन पौरुषेयत्वसाधनासंभवात् 'जन्माद्यस्य यतः' इति सूत्रेण भृगुवल्ल्याः सर्वस्या एव विषयवाक्यत्वविवक्षणात्,

तया च सर्वथा प्रत्यगभिन्नब्रह्मस्वरूपस्यैव प्रतिपादनाच्च न वेदान्तवाक्यविचारोऽनर्थक इत्यभिप्रायेण समाधत्ते– *नेति*।। निर्विशेषं हि ब्रह्म साध्यहेतुसम्बन्धाद्यभावान्नानुमानगम्यं वेदान्तगम्यमात्मतत्त्वमिति नशब्देन विवक्ष्यते। तदेवाह– ***इन्द्रियादिविषयत्वे सम्बन्धाग्रहणादिति***।। तथाच हेतु-साध्ययोः साहचर्यरूपव्याप्तिग्रहाभावात् पक्षधर्मताज्ञानाभावाच्च न निर्विशेषे ब्रह्मण्यनुमानप्रमाणं प्रवर्तत इति भावः। ***विषयविषयाणीति***।। अनेन–''पराञ्चिखानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्नि''ति वाक्यमुपस्थाप्यते। ततश्च ज्ञेयं ब्रह्म प्रत्यगभिन्नमित्यपि सूच्यते, इति न प्रत्यगभिन्नं ब्रह्म जगत्कारणतयाऽनुमानगम्यं भवतीति भावः। अनेन भाष्यसन्दर्भेण संसारिव्यतिरिक्तस्यापीश्वरस्य कारणत्वं नानुमानगम्यमिति न विवक्ष्यते; यतो जीवाद्यजन्यं क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वादित्यनुमानेन सगुणेश्वरसाधने न व्याप्तिग्रहादिसंभव इति। तथा च भाष्यकारणां वेदान्ताविरोधितर्केणेश्वरानुमानसाधनं न पूर्वापरविरुद्धम्। तदयं निष्कर्षः–ब्रह्म द्विविधम्–सगुणम्, यद्वेदान्तवाक्यावान्तरतात्पर्यविषयः, निर्विशेषम्– यद् वेदान्तवाक्यमुख्यतात्पर्यविषयः। सगुणोपस्थापनद्वारा निर्गुणपर्यवसायित्वाद् निर्विशेषांशे चानुमानप्रसराद् नानुमानमूलानि सर्वाणि वेदान्तवाक्यानि, ''जन्माद्यस्य यतः'' इति सूत्रं वेति। इदमेवाभिप्रेत्याह– ***तस्माज्जन्मादिसूत्रमिति***।। यस्माद् नानुमानगम्यं मुख्यं ब्रह्मैवात्र जिज्ञास्यमुपक्षेप्यम्, तस्मात्।। *ननु*---**श्रुतिनिर्देशस्तावत्**–''यतो वा **इमानि भूतानि जायन्ते**'' इति भाष्ये प्रकृतविषयवाक्यम् ''यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति'' इति वाक्यजातमिति ज्ञापितम्। तत्र च सगुणमेव बोध्यत इति भवतामपि मतम्। सति चैवं कथं जन्मादिसूत्रं निर्विशेषब्रह्मपर्यन्ताभिप्रायम्? इति गूढाभिप्रायः शङ्कते– ***किं पुनस्तद् वेदान्तवाक्यमिति***।। निर्विशेषब्रह्मपर्यवसायि वेदान्तवाक्यजातं किं सूत्रकारेण विवक्षितमिति शङ्कया ह्ययं भावो गम्यते–यत्, सूत्रकारा हि विषयवाक्यमपि प्रायेण सर्वत्र सूचयन्ति। अत्रापि तु यदि तत्सूच्यते, तर्हि ''यतो वा इमानी''त्यादिवाक्यजातमेव विवक्ष्यत इति वक्तव्यम्। सति चैवम्–''आनन्दो ब्रह्मेत्यादिवाक्यानां सूत्रेणानुपस्थापनात् कथं निर्विशेषमपि सूत्रारूढम्? इति चेत्, सर्वाऽपि भृगुवल्ली सूत्रे लिलक्षयिषितेति, न शङ्काऽवसर इत्याह– ***भृगुर्वै वारुणिरित्यादिना–संविशन्तीत्यन्तेन***।। अत्र ''तस्य च निर्णयवाक्यमि''त्यनेन ''यतो वे'ति वाक्यमानन्दस्वरूपपर्यवसानं विनाऽनिर्णायकमेवेति सूचनाद् ''यतो वेति''। वाक्यस्य कारणस्वरूपेऽवान्तरं तात्पर्यमेवेति सूच्यते। युक्तं चैतत्– अत एव हि ''तपसा ब्रह्म विजिज्ञासस्वे''त्यानन्दस्वरूपबोधपर्यन्तं पुनःपुनर्विचारोपदेश उपपद्यते।।

ननु सूत्राणां न्यायविशेषमात्रनिर्णयार्थत्वात् सर्वाणि कारणवाक्यानि प्रकृतसूत्रविषय इति वक्तव्यम्। सति चैवं–''यः सर्वशः सर्वविदि''त्यादिवाक्यानामपि विषयवाक्यत्वे तेषां संसारिव्यतिरिक्तेश्वरपरत्वमेव युक्तमिति कथं कारणवाक्यानि सर्वाणि प्रत्यगभिन्नब्रह्मस्वरूपपराणीति? अत आह– ***अन्यान्यप्येवंजातीयकानीति***।। ''सदेव सोम्येदमग्र आसीदे'ति ''तदैक्षते''त्यादिना कारणं

सर्वज्ञादिरूपमुपक्षिप्य "एकमेवाद्वितीयमि"ति द्वितीयनिषेधद्वारा प्रत्यगभिन्नस्वरूपचैतन्य एव पर्यवस्यति। "अथ परा यथा तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादं नित्यं विभुं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीरा;" इति वाक्यं भूतयोनिमनूद्यद्रेश्यत्वाद्युपन्यासेन "यः सर्वज्ञः सर्वविदि"ति वाक्यमपि तद्वाक्यघटकभूतयोनिस्वरूपोपस्थापनद्वारा न सगुणमात्रपर्यवसायि, किन्तु निर्विशेषपर्यवसारयेवेति गमयति।।

तदेवं गुणोपसंहारन्यायेन सर्वेषामपरेषामपि कारणवाक्यानां वाच्यार्थसमर्पणेन तत्तदवान्तरतात्पर्यमेव स्वीकर्तव्यमिति न कोऽपि दोष इति भावः। अन्यथा तु संसारिव्यतिरिक्तेश्वरकारणपरत्वे सर्वेषां वेदान्तानामनुवादत्वापत्त्या न वेदान्तानां मूलप्रमाणत्वमापद्येतेति, भाष्यकाराः–ब्रह्मणो जीवभेदे वेदान्तवाक्यानि पौरुषेयाणीति न्यायमत एव प्रवेशापत्तिः, सूत्रकारास्तु द्वितीयाध्याये न्याय-वैशेषिक-सांख्य-पातञ्जलादिमतनिरासान्न तन्मतानुसारिण इति न तन्मतस्यानुगुणाः–इति ज्ञापयन्ति। *एतेन*–ब्रह्मसूत्राणां जीवभिन्नब्रह्मबोधन एव स्वारस्यमिति वादा न सूत्रारूढा इति– *शाप्यते*।। यद्यप्यनेन सूत्रेण सूत्रकाराः–ब्रह्मणो जीवाभेदसंभवोपयोगि कारणत्वं न विशदं सूत्रयन्ति; तथाऽपि समन्वयाध्यायान्ते–"प्रकृतिश्च प्रतिज्ञावृष्टान्तानुपरोधात्" इति सूत्रेणाभिन्ननिमित्तोपादानं तत् सूचयन्ति। तच्च प्रत्यगभेदं विना ब्रह्मणो नोपपद्यते, इति जिज्ञास्यं ब्रह्मप्रत्यगभिन्नमेव, सगुणं तु ब्रह्म संसारिव्यतिरिक्तं जिज्ञास्यमपि न वेदान्तवाक्यावान्तरतात्पर्याविषयोऽपीति निष्कर्षः। ***इति जन्माद्यधिकरणमिति***।। अत्रेदं विषयादिपञ्चकम्–तद्यथा–भृगुवल्ली विषयः, किं सा जीवं जीवातिरिक्तमीश्वरं वा कारणं प्रतिपादयति? उत प्रत्यगभिन्नं ब्रह्मेति संशयः। जीवो जगत्कारणतया भृगुवल्लीप्रतिपाद्यः; ब्रह्मवल्लीगतानन्दमयसमानपर्यायत्वात्, "आनन्दो ब्रह्मेति व्यजानादि"त्यत्रानन्दमयपदमिवानन्दपदमपि जीवपरमेव युक्तम्; तत्रैव कारणवाक्यानां पर्यवसानस्यौचित्यादिति पूर्वपक्षः। अथवा–आनन्दवाक्यस्य मयडपरित्यागेन प्रवृत्तस्य जीवातिरिक्तविषयत्वस्यैवौचित्येऽप्यानन्दपदबोध्यं ब्रह्म जीवातिरिक्तमेव; तत्रैव ह्यनुमानेनाप्येकवाक्यता भवति। भूतवस्तुत्वाद्धि ब्रह्मणः प्रमाणान्तरगम्यत्वमावश्यकमिति वेदान्तवाक्यान्यनुमानमूलकान्येवेति युक्तम्। सति चैवं न प्रत्यगभिन्नब्रह्मस्वरूपजिज्ञासेति फलमिति पूर्वपक्षान्तरम्। सिद्धान्तस्तु–पूर्वोक्तप्रकारेण निर्विशेषब्रह्मणेऽनुमानाविषयत्वाद् वेदान्तानामनुमानानपेक्षयैव प्रामाण्याच्च प्रत्यगभिन्नं ब्रह्मैव जगत्कारणत्वादिलक्षणमुखेन प्रतिपाद्यमिति, प्रत्यगभिन्नब्रह्मजिज्ञासासिद्धिरिति। शास्त्राध्याय-पाद-सङ्गतयः पूर्ववदेव। अनन्तरा त्वाक्षेपसङ्गतिरिति सूचितमेव।।

अत्र "भृगुर्वै वारुणिः" इत्यारभ्य "सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता" इत्यन्तं विषयवाक्यतया विवक्षितम्। उपक्रमोपसंहारयोरभिन्ननिमित्तोपादानस्यैव विषयस्य प्रथमाध्याय उपस्थापनात् सूक्ष्मचिदचिच्छरीरकं ब्रह्मैव वेदान्तमुख्यतात्पर्यविषय इत्यत्र सूत्रकाराणामाशयोऽवगन्तुं न शक्यते, इति

शरीरि ब्रह्मैव विषय इति वादो न सूत्रारूढः। जगत्कारणत्वं चेदं प्रकृतित्वरूपमपीति स्पष्टं सूत्रे बोधनात् पूर्वोक्तरीत्या केवलनिमित्तकारणत्वे जिज्ञासादिवैयर्थ्यापाताच्च नैयायिकादिमतस्य श्रीमदानन्दतीर्थाचार्य-मतस्य च न सौत्रत्वम्। ब्रह्मपरिणामवादः सूत्रारूढो वा न वेति विषयस्तु–''प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्,'' ''परिणामात्'', तदनन्यत्वमारम्भणशब्दादिभ्यः,'' कृत्स्नप्रसक्तिर्निरवयवत्व-शब्दकोपो वा'' इत्यादिसूत्रभाष्यावसरे विशिष्य समालोचयिष्यते।। सामन्यतस्तु प्रकृताधिकरणोपसंहारे विवरण एव तन्मतस्य निरसनाद् न सोऽपि वादः सूत्रारूढ इति सूच्यते।।

यत्तु श्रीभाष्ये–''ये तु निर्विशेषं वस्तु जिज्ञास्यमिति वदन्ति, तन्मते ''ब्रह्मजिज्ञासा'' ''जन्माद्यस्य यतः'' इत्यसङ्गतं स्यात्। निरतिशयं ब्रह्मेति निर्वचनात्, तच्च ब्रह्म जगज्जन्मादिकारणमिति वचनाच्च। एवमुत्तरेष्वपि सूत्रगणेषु सूत्रोदाहृतश्रुतिगणेषु चेक्षणाद्यन्वयदर्शनात् सूत्राणि सूत्रोदाहृतश्रुतयश्च न तत्र प्रमाणम् तर्कश्च साध्यधर्माव्यभिचारिसाधनधर्मान्वितवस्तुविषयत्वान्न निर्विशेषे ब्रह्मणि प्रमाणम्। 'जगज्जन्मादिभ्रमो यतः, तद्ब्रह्मे'ति स्वोत्प्रेक्षापक्षेऽपि न निर्विशेषवस्तुसिद्धिः। भ्रममूलमज्ञानम्, अज्ञानसाक्षि ब्रह्मेत्यभ्युपगमात्। साक्षित्वं हि प्रकाशमानतयैवोच्यते, प्रकाशत्वं जडाद् व्यावर्तकं भवति। तथाच सति सविशेषत्वम्। तदभावे प्रकाशतैव न स्यादिति श्रुति-सूत्रादीनां नाद्वैतमते स्वारस्यमिति– *प्रतिपादयन्ति*, तत्र पूर्वोक्तप्रकारेण निर्विशेषत्मस्वरूपेऽपि ''बृहत्वात् बृंहणत्वाच्चात्मैव ब्रह्मेति गीयते'' इत्युक्तरीत्या ब्रह्मशब्दनिर्वचनसंभवात् ''जन्माद्यस्य यतः'' इत्यादिसूत्र-तदुदाहृतश्रुतीनां तत्पदवाच्यार्थ-जगत्कारणतायामेव तात्पर्यस्य प्रतिपादनेन तर्कस्यापि सगुणविषयत्वस्यैव भाष्य एव व्यवस्थापनेन च जन्मादिसूत्र-तद्विचारणीयश्रुतिवाक्यानामवान्तरतात्पर्यमादायैव जगत्कारणत्वव्यवस्थापनेन निर्विशेषस्य कारणत्वानुमानगम्यत्वादीनामनङ्गीकारात्, जगज्जन्मादीनां बाधितत्वं पर्यवसानतो वाक्यान्तरगम्यमेवात्र विवक्ष्यते, न तु जगज्जन्मादिभ्रमाधिष्ठानत्वं ब्रह्मलक्षणमिति ''जन्मादिभ्रमो यत'' इति विवरणस्यास्मदनभिमतत्वाच्च, नोक्तानां दूषणानामवसरः। न हि वाच्यार्थेऽपि कारणत्वं बाधितमित्यस्माकं सिद्धान्तः, किन्तु बाधितस्यापि स्वाधिष्ठानज्ञापकत्वेन तटस्थलक्षणत्वं न विरुद्धमित्येव 'यदिदं रजतमभात् सेयं युक्तिरि'त्यादिवाक्येन बोध्यते, न तु शुक्तिलक्षणं रजतमिति। न हि तटस्थलक्षणलक्ष्यमाणं तेन लक्षणेन परमार्थतः सधर्मकं कुत्रापि दृष्टम्। साक्षित्वमप्यज्ञानोपहितचैतन्यत्वमन्तःकरणोपहितचैतन्यत्वं वेति न शुद्धचैतन्यमद्वैतमते साक्षिपदार्थः, इति ब्रह्मसविशेषत्वापादनमिदं निरवकाशमेव। यथाच जगज्जन्मादिकारणत्वं स्वरूपलक्षणमेव, न तटस्थलक्षणमिति श्रीमध्वसम्प्रदायान-ुसारितात्पर्यचन्द्रिका-सिद्धान्तोऽनवसरः, तदीयमधिकरणशरीरं चानुपपन्नम्। सर्वथा तु नाद्वैतिनामधिकरणद्वयमपि निर्विशेषब्रह्मावादविरोधीति दिक्।

इति ब्रह्मसूत्रशाङ्करभाष्यटिप्पणे प्रदीपं जन्माद्यधिकरणं समाप्तम्।

पञ्चपादिका

ब्रह्म जिज्ञासितव्यमि''त्युक्तम् इति ब्रह्मज्ञानकामेनेदं शास्त्रं श्रोतव्यमित्युक्तम्।

'यदैवेदमित्युक्तम्, तदैव ब्रह्मणो लक्षणं प्रमाणं युक्तिः साधनं प्रयोजनमिति सर्वं व्याख्येयत्वेन प्रतिज्ञातम्। तत्र स्वरूपस्याभ्यर्हितत्वात् तत् प्रथमं वक्तव्यम्–किंलक्षणं पुनस्तद् ब्रह्मेति, अत आह भगवान्– ***जन्माद्यस्य यत इति*।।**

युक्तिरपि लक्षणनिर्णयेऽर्थात् सूत्रितैव ***जन्म=उत्पत्तिः, आदिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिरिति*** पदच्छेदः पदार्थः पदविग्रह इत्येतत् त्रितयमपि व्याख्यानाङ्गं संपादयति। तद्गुणसंविज्ञाने प्रयोजनमाह– ***जन्म-स्थिति-भङ्गं समासार्थ इति*।।** तृतीयलिङ्गनिर्देशात् संहतिप्रधानं समासार्थः। *ननु* आदिः पूर्वकालकोटिमतो भवति, तदभावे प्रपञ्चस्य को नामाऽऽदिः? इत्याशङ्क्याह– ***जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं चेति*।।** यदनेन सूत्रेण लक्षितं ब्रह्म, तत्स्वरूपकथनपरं वाक्यम्। तत्रादौ जन्म निर्दिष्टमिति तस्यादित्वम्। वस्तुस्वभावापेक्षमपि। नहि प्रलीय तिष्ठति। स्थित्वा वा जायते। नापि जनित्वैव प्रलीयते ; क्षणिकत्वनिराकरणात्। अतो जनित्वा स्थित्वा प्रलीयते। एवमादिरयं प्रपञ्चः। ''अस्य'' इति भाष्येण पदभागस्येदमः प्रकृतिमात्रस्यार्थनिर्देशः। तथाहि–सर्वनाम प्रक्रमादिकारणान्तरबलेन कतिपयाभिधेयपरम् , तदभावे स्वमहिम्ना प्रमाणविषयमात्राभिधायकम्, तेनाह– ***प्रत्यक्षादिसन्निधापितस्य धर्मिण इदमा निर्देश इति*।। *षष्ठी जन्मादिधर्मसम्बन्धार्थेति*।** सर्व एवेह सम्बन्धः संभवति, न तद्विशेष आदरणीय इति कथयति। ***यत इति कारणनिर्देश इति*** प्रकृतित्वनिबन्धना हि पञ्चमी, नान्यनिबन्धनेति दर्शयति।।

अस्य जगतः इत्यादिना भाष्येण लक्ष्यस्य ब्रह्मणः स्वरूपलक्षणं कथयितुमुपक्रमते। द्विविधं हि लक्षणम्–उपलक्षणं विशेषलक्षणं च। तत्रेदं लक्षणं प्रपञ्चधर्मत्वात् पृथग्भूतमेवं कारणमुपलक्षयति न विशेषणत्वेन। अतः पृथक् स्वलक्षणकथनम्। ***नाम-रूपाभ्यां व्याकृतस्येति*।।** कार्यप्रपञ्चं केचित् स्वप्रक्रियानुसारेण विभजन्ति, तद्व्युदासाय प्रसिद्धार्थानुवादश्रुतिबलेन द्वैराश्यं कृत्वाऽऽह– ***नाम-रूपाभ्यामिति*।।** इत्थंभावे तृतीया। व्याक्रियमाणं हि वस्त्वभिधेयरूपं स्वनामगर्भं विकल्पपूर्वमेव व्याक्रियत इति स्वसंवेद्यमेतत्। *अनेककर्तृ-भोक्तृसंयुक्तस्येति* कर्तृत्व-भोक्तृत्वमपि नामरूपात्मकत्वात्प्रपञ्चानुयायीति दर्शयति– ***प्रतिनियत-देश-काल-निमित्त-क्रियाफलाश्रयस्येति*।।** प्रतिकर्म फलोपभोगे नियतो देशः–स्वर्गफलस्य मेरुपृष्ठम्, ग्रामादिफलस्य भूमण्डलम्। कालोऽपि–स्वर्गफलस्य देहापातोर्ध्वम्, पुत्रफलस्य बालभावात्। निमित्तमपि–उत्तरायणादिमरणमस्य।

मनसाऽप्यचिन्त्यरचनारूपस्येति।। न ह्यर्वाग्दर्शी क्वचिद्बहिर्लोकसन्निवेशप्रकारमध्यात्मं च प्रतिनियतार्थक्रियासमर्थावयवशिराजालसन्निवेशं निरूपयितुमपि समर्थः, किं पुनर्विरचयितुम्।। ***जन्म-स्थिति-भङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद् भवति, तद् ब्रह्मेति वाक्यशेष इति*** साकाङ्क्षस्य सूत्रवाक्यस्याकाङ्क्षितपदपूरणम्, उपलक्षितब्रह्मस्वरूपं लक्षणं च दर्शयति।।

ननु अन्येऽपि परिणामादयो भावविकाराः सन्ति, ते किमिति न संगृह्यन्ते? इत्याशङ्क्याह-***अन्येषामपीति***।। न क्वचिद्वस्तुनो ह्यवस्थाविशेषो विनाशरहितः, नाप्यनिर्वृत्तजन्मनोऽस्थितस्वभावस्य विनाशः। अतस्त्रिष्वेवान्तर्भावान्न पृथगुपन्यासस्तेषाम्। *ननु*-षड् भावविकारा इति नैरुक्ताः। तेषां ग्रहणेऽन्तर्भावोक्तिप्रयासोऽपि परिहृतः स्यादित्याशङ्क्याह-***यास्कपरिपठितानां तु जायतेऽस्तीत्यादीनामिति***।। पृथिव्यप्तेजःसु जगद्रचनारूपस्थितेषु तन्मयानामेव ते सम्भाव्यन्ते। ततस्तद्ग्रहणे तेषामेव ब्रह्मत्वेन लक्षितत्वाशङ्का स्यात्, न च तद्युक्तम्; अतः सूत्रार्थवत्त्वाय श्रुतिनिर्दिष्टा एवोत्पत्त्यादयो गृह्यन्ते; तदर्थनिर्णयार्थत्वात्सूत्राणाम्। अतो यदवष्टम्भो विश्वो विवर्तते प्रपञ्चः, तदेव मूलकारणं ब्रह्मेति सूत्रार्थः।।

ननु-श्रुतिनिर्दिष्टग्रहणे सूत्रमर्थशून्यं स्यात्; न हीमां पृथिवीं जायमानां पश्यामः, नापो न तेजः, कथं सिद्धवल्लक्षणत्वेनोपादीयेतेति? *उच्यते*-तेजसस्तावदरणिनिर्मथनादिषु दृश्यते जन्म, इन्धनापाये विनाशः। अपामपि चन्द्रकान्तादिषु जन्म, क्रमेण च शोषः। पृथिव्या अप्यवयवसंयोग-विभागदर्शनात् तन्निमित्तौ जन्म-विनाशावनुमीयेते। दृश्येते चाद्याऽप्यवयवसंयोग-विभागकृतौ पृथिव्येकदेशस्य जन्म-विनाशौ। वाय्वाकाश-काल-दिशामपि ''यावद्विकारं तु विभागो लोकवदि''ति वक्ष्यमाणेन न्यायेन स्त एव जन्म-विनाशौ। ***न यथोक्तविशेषणस्येत्यादिना*** भाष्येण युक्तिरपि ब्रह्मस्वरूपनिर्णयायानेनैव सूत्रेण तन्त्रेणावृत्त्या वा ***जन्माद्यस्य यतः*** सम्भवतीति सूत्रितेति दर्शयति। ***अस्य जगतो नाम-रूपाभ्यां व्याकृतस्येत्याद्य***भिहितविशेषणचतुष्टस्य, **यथोक्तविशेषणमीश्वरं मुक्त्वेति**=सर्वज्ञं सर्वशक्तिं विहाय ***नान्यतः***=परपरिकल्पितात्प्रधानादेरचेतनात्, चेतनादपि परिच्छिन्नज्ञानक्रियाशक्तेः संसारिणो हिरण्यगर्भादुत्पत्त्यादि **सम्भावयितुमपि शक्यम्***।।

अचेतनात्तावदचेतनात्वादेवानुपपन्नम्। चेतनादपि; परिच्छिन्नज्ञान-क्रियाशक्तित्वात्। अभावात् पुनर्नाचेतनत्वादेव केवलादनुपपत्तिः, अपितु निरुपाख्यत्वादतीतकल्पसंस्काराभावात्, पूर्वकल्पैकरूपो वर्तमानोऽपि कल्प इति प्रमाणाभावात्, सर्व एव व्यवहारो यादृच्छिक इति न क्वचित् कश्चिन्नियमोऽभविष्यत्। ***न च स्वभावतः, विशिष्टदेश-काल-निमित्तोपादानादिति***।। स्वभावो नामान्यानपेक्षा। तेनापेक्षैवानुपपन्ना, कुतो नियमसम्भवः? अतो युक्त्याऽपि वस्त्वन्तरस्य कारणत्वसम्भावनानिराकरणेन पारिशेष्यात्पूर्वोक्तविशेषण ईश्वर एव कारणमिति सिद्धम्।।

एतदेवानुमानमिति।। येयं युक्तिरभिहिता-यथोक्तविशेषणमीश्वरं मुक्त्वा नान्यतो जगतो जन्मादि सम्भवतीति, एतदेव स्वतन्त्रमनुमानमीश्वरसिद्धौ सर्वज्ञत्व-सर्वशक्तित्वसिद्धौ च तस्य प्रमाणम्, किं वेदवाक्यैः? इतीश्वरकारणिनः=कणादप्रभृतयो मन्यन्ते।

जन्मादिसूत्रलक्षितान्यपि वाक्यानि "यतो वा इमानि भूतानि जायन्ते" इत्यादीनि परार्थानुमानवाक्यसमानि दृश्यन्त इति वदन्तः। ***नन्विहापि तदेवोपन्यस्तमिति***।। यथा धूमविशेषस्यागरुसम्भवत्वम्, तथा प्रपञ्चसन्निवेशविशेषस्य सर्वज्ञत्वादिगुणकारणकत्वमिति। ***न वेदान्तवाक्यग्रथनार्थत्वात् सूत्राणामिति***।। सत्यं तदेवोपन्यस्तमुपकरणत्वेन, न तत्र तात्पर्यम्, तात्पर्यन्तु वेदवाक्यग्रथने। तदेव प्रपञ्चयति- ***वेदान्तवाक्यानीति***।। समन्वयसूत्रप्रमुखोपात्तैः शब्दशक्त्यनुसारिभिर्न्यायैर्वाक्यानां ब्रह्मणि **तात्पर्याध्यवसाननिर्वृत्ता ब्रह्मावगतिर्नानुमानादिप्रमाणान्तर-निर्वृत्ता। सत्सु तु वेदान्तवाक्येषु तदविरोध्यनुमानमपि प्रमाणं भवन्न निवार्यते; श्रुत्यैव सहायत्वेन तर्कस्याप्यभ्युपेतत्वात्*।। तथाहि**-"श्रोतव्यो मन्तव्यः" इति श्रुत्या यथा श्रवणं ब्रह्मावगतिहेतुरनूद्यते, तथा मननस्यापि सिद्धवदनूद्यमानत्वात्। तथाऽपरा श्रुतिः-**"पण्डितो मेधावी"**त्यादिः-**"आचार्यवान् पुरुषो वेदे"ति पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति।** यदाचार्येण श्रुत्यनुसारिणा स्फटिकादिनिदर्शनेन शिष्येभ्यः प्रत्ययदार्ढ्यापादनम्, तदाचार्यवान् पुरुषो वेदेत्यनूद्यते। ***न धर्मजिज्ञासायामिवेत्यादिना*** युक्तिसाहाय्यापेक्षणे कारणमाह। ***श्रुत्यादय इति***।। श्रुतिः पदान्तरनिरपेक्षः शब्दः। आदिशब्देन लिङ्ग-वाक्यादयः शब्दप्रकारा गृह्यन्ते।

न त एव ब्रह्मणि प्रमाणम्, किन्त्वनुभवादयोऽपि। तत्र हेतुमाह- ***अनुभवावसानत्वाद भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्येति***।। सिद्धे वस्तुनि सम्भवत्यनुभवः, तदवसाना आकाङ्क्षानिवृत्तिर्यतः। *ननु* धर्मजिज्ञासायां विनाऽप्यनुभवेन शब्दशक्त्यनुसरणमात्रेणैव निराकाङ्क्षं फलपर्यन्तं ज्ञानं भवति, न तर्कगन्धमप्यपेक्षते, तथेहापि स्यात्; प्रमाणत्वाविशेषाद्वेदान्तवाक्यानाम्, इत्याशङ्क्य विशेषमाह- ***कर्तव्ये हि विषय इत्यादिना* ब्रह्मज्ञानमपि वस्तुतन्त्रमेव भूतवस्तुविषयत्वादित्यन्तेन भाष्येण।।** कथम्? कर्तव्यं हि कर्तव्यत्वादेवासिद्धस्वभावं नानुभवितुं शक्यमिति न तदाकाङ्क्षा, इह तु सिद्धस्य साक्षाद्रूपेण विपर्यासगृहीतस्य सम्यग्ज्ञानेन साक्षात्करणमन्तरेण न मिथ्याज्ञानोदयनिवृत्तिः; द्विचन्द्रादिषु तथा दर्शनात्। तर्हि कर्तव्य-सिद्धार्थनिष्ठयोः प्रमाणत्वसाम्यादवबोधनप्रकारेऽपि साम्यम्। यदि स्यात्, पुरुषेच्छावशनिष्पाद्यत्वमपि स्यात्। ततो विधि-प्रतिषेध-विकल्प-समुच्चयोत्सर्गापवाद-बाधाभ्युच्चय व्यवस्थितविकल्पादयोऽपि प्रसज्येरन्। न वस्तुनि युक्तमेतत्; निःस्वभावत्वप्रसङ्गात्। तथाचैकस्मिन् वस्तुनि स्थाणुः पुरुषो वेति विकल्पः, न वैकल्पिकद्रव्यत्यागवद् सम्यग्ज्ञानं भवति स्थाणुरेवेति निश्चितैकार्थता परमार्थे। यतो वस्तुस्वभावपरतन्त्रं सिद्धवस्तुज्ञानम्, न ज्ञानपरतन्त्रं वस्तु। यदि स्यात्, शुक्तिरजतमपि तथा

स्यात्। कर्तव्यज्ञानं पुनर्वैपरीत्येऽपि सम्यगेव; ''योषा वाव गौतम अग्निरि'' त्यादिषु दर्शनात्। ***तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव भूतवस्तुविषयत्वात्*।** अतो युक्तो युक्तेरनुप्रवेशः, अनुभवापेक्षा च नेतरत्र।।

अपरः परिचोदयति- ***ननु भूतवस्तुविषयत्व इत्यादिना*।।** अयमभिप्रायः-भूतत्वाद् युक्तेरपि चेदनुप्रवेशः, तथा सति किं वेदवाक्यैर्विचारितैः? यथाहुरीश्वरकारणिनः, तथा भवतु पूर्वसूत्रेण प्रतिज्ञानिर्देशोऽनेन च हेत्वभिधानमिति। उत्तरमाह- ***नेन्द्रियादिविषयत्वे सम्बन्धाग्रहणादित्यादिना*।।** इन्द्रियाणि प्रपञ्चमात्रं गृह्णन्ति, न तत्कारणम्। यदि तद्ग्रहणमपि स्यात् , नानुमानोपन्यासेन कृत्यमस्ति। सामान्यतोदृष्टमपि न प्रमाणमतीन्द्रिये ब्रह्मणि, अत उपसंहरति-**तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थम्, किं तर्हि? *वेदान्तवाक्यप्रदर्शनार्थमिति*** युक्तिमपि तदुपकरणां तदर्थानुभवप्रयोजनां सूचयतीत्युक्तम्।।

नन्वेवं सति कथं युक्तिरब्रह्मविषया सती तद्विषयाणां वाक्यानामुपकरणं भवति? *उच्यते*-ब्रह्मपरेषु मृदादिदृष्टान्तैर्युक्तय उपन्यस्यन्ते। ताश्च विधि-प्रतिषेधवाक्ययोः प्रवर्तकत्व-निवर्तकत्वाकाङ्क्षि-तस्तुति-निन्दार्थवादवत् स्वरूपवाक्यस्य फलपर्यन्तापेक्षितसम्भावनार्थवादतां प्रतिपद्यमानास्तत्र श्रुतिसाहाय्ये वर्तन्त इत्युच्यते। ***किंपुनस्तद् वेदवाक्यं यत् सूत्रेणेह लिलक्षयिषितमिति*।।** सर्वत्र वेदान्तवाक्य ब्रह्मपदस्याप्रसिद्धत्वान्न स्वार्थं विशेष्यत्वेन विशेषणत्वेन वा वाक्यार्थे समर्पयितुमलमित्याक्षिपति। येषां वेदान्तवाक्यानां येन संनिवेशक्रमेण ब्रह्मप्रतिपादने समन्वयः स्वाध्यायपादे स्थितः, तल्लक्षणार्थं सूत्रद्वयमिति।

तथैवोदाहरणमाह- ***भृगुर्वै वारुणिरिति*।** अथशब्दोपात्तन्यायेन प्रथमसूत्रस्योदाहरणम्-''यतो वा इमानि भूतानी''ति जन्मादिसूत्रस्य। कथम्? पूर्वोक्तेन न्यायेन पृथिव्यादीनां जन्मादिदर्शनात् तत्कारण एकत्व-नानात्वयोरन्यतरावगमे प्रमाणाभावाद् बुद्धिमत्कारणपूर्वतामात्रे प्रतिपन्ने ''यतो वा इमानी''ति कारणस्यैकवचननिर्देशात्तदर्थमात्रस्यैव विधित्सितत्वादर्थात्सर्वज्ञं सर्वशक्ति जगत्कारणमिति कारणविशेषो वाक्यादवगम्यते। पुनस्तद्विजिज्ञासस्वेत्यनूद्य तद् ब्रह्मेति तत्र ब्रह्मशब्दप्रयोगाद् बृहत्यर्थान्वयेन सर्वतोऽनवच्छिन्नस्वभावं जगत्कारणं ब्रह्मपदार्थ इति गम्यते।

***तस्य च निर्णयवाक्यमानन्दाद्ध्येव खल्विति*।।**

प्रसिद्धावद्योतकेन हिशब्देन संयुक्तमानन्दावद्योतकमुपपद्यते। अनानन्दात्मके हि जगत्कारणे ब्रह्मशब्दप्रयोगो न युज्यते। न हि तस्योपेक्षणीये विषये स्वार्थप्रक्षेपेण वृत्तिः समञ्जसा। तस्माद् ब्रह्मपरे वाक्ये जन्मादिधर्मजातस्योपलक्षणत्वाद् ब्रह्मसंस्पर्शाभावात् सर्वज्ञं सर्वशक्तिसमन्वितं परमानन्दं ब्रह्मेति जन्मादिसूत्रेण ब्रह्मस्वरूपं लक्षितमिति सिद्धम्।।

इति पञ्चपादिकायां जन्माद्यधिकरणं समाप्तम्।।

वार्तिकम्

उत्तराधिकरणमवतारयन् पूर्वसूत्रार्थमनूद्य तेन तस्याक्षेपिकीं सङ्गतिं दर्शयति- ***ब्रह्म जिज्ञासितव्यमित्युक्तम्। किंलक्षणं पुनस्तद्** ब्रह्मेतीति*।। तथाहि-सङ्गतिर्नाम पूर्वापरवाक्यैकवाक्यताप्रयोजकाकाङ्क्षाजनकज्ञानविषयविशेषः। सा चाधिकरणानामवान्तर-प्रयोजकरूपभेदात् षड्विधा भवति।

उपोद्घातोऽथ दृष्टान्तः प्रसङ्गश्चापवादिकी। प्रत्युदाहरणाक्षेपाविति सा षड्विधा मता।।

प्रवृत्तं हृदये कृत्वा पूर्वं तद्धेतुचिन्तनम्। यदुपोद्घातमाहुस्तं तच्च पूर्वमवादिषम्।।

पूर्वदृष्टञ्च सिद्धान्तं कृत्वा साधर्म्यमात्रतः। प्रत्याख्यानमाहुर्यद् दृष्टान्तं सङ्गतिं बुधाः।।

या जातिरुच्यते न्याये प्रतिदृष्टान्तसंज्ञिनी। सर्वत्र सुलभा चेयं सङ्गतिः पण्डितैर्मता।

स्मृताऽनुपेक्षायोग्यत्वं प्रसङ्गं पण्डिता विदुः। सा च देवाधिकरणे दर्शनीया प्रयत्नतः।।

सामान्यन्यायसंसिद्धो बलवद्भिरपोद्यते। प्रमाणैः सोऽपवादः स्यादपशूद्रे च सा मता।।

यद्ययं यदभिप्रेतो न भवेदिति मन्यसे। भवताऽभिमतोऽर्थोऽपि न भवेत् सा क्रियासमा।।

प्रत्युदाहरणञ्चैतद्या मदुक्ता क्रियासमा। सर्वत्र प्रविशेत् साऽपि सङ्गतिर्जातिरूपतः।।

पूर्वसिद्धान्तमाक्षिप्य प्रवर्तेत यदोत्तरम्। आक्षेपसङ्गतिः साऽत्र विज्ञेया पण्डितोत्तमैः।।

एवं सङ्गतिषड्विध्यं विज्ञेयं सर्वतन्त्रगम्।

ननु-कार्यावसराकारणभादयोऽपि भवन्ति सङ्गतयः, तत् कथं षाड्विध्यमेव सङ्गतीनां प्रदर्श्यत इति चेत् , न; षाड्विध्यप्रदर्शनेनैव तासामप्यर्थात् प्रदर्शनात्। कथम्? कारणप्रतिपादनं ह्युपोद्घातः, तस्मिन् प्रदर्शितेऽर्थात् तत्कार्येण सह तस्य कार्य-कारणभावसङ्गतिर्लभ्यते। एवमुक्तान्यतरसङ्गतिज्ञानजनिता-काङ्क्षाप्रतिरुद्धाकाङ्क्षाणामनवसरदर्शनात्, प्रतिबन्धनिरूपणेनैव प्रतिबद्धस्यावसरस्यार्थान्निरूपणम्, इति। यथा, अत्रैवाक्षेपसङ्गतिजनितया ब्रह्मलक्षणाकाङ्क्षयाऽप्रतिरुद्धत्वाद् न विचारावसरः, निवृत्तायां तस्याम्-''तत्तु समन्वयादि''त्यारभ्य प्रवर्तिष्यते। सेयं ''तत्तु समन्वयादि''त्यस्य पूर्वेणावसरसङ्गतिः। एवमन्यत्राप्यूह्यम्। तस्मात् षाड्विध्यप्रदर्शनेनैव हेतुहेतुमद्भावावसरादयोऽप्यर्थात्प्रदर्शिताः, इति न पृथक् प्रदर्श्यन्ते। कथं प्रकृत आक्षेपः? उच्यते, यद् भवता प्रत्यज्ञायि ब्रह्म जिज्ञासितव्यमिति, तद् न युक्तम्; ब्रह्मलक्षणासम्भवात्। उद्दिष्टं लक्षितञ्च वस्त्वत्र प्रमाणमस्ति? न वा? इति परीक्ष्यते। नह्यनुद्दिष्टं लक्षयितुं शक्यते; उद्दिश्य लक्षणविधानात्, नह्यलक्षितं परीक्षितुम्; गगनारविन्दस्येव बुद्धावनुल्लिखितस्य लक्षणशून्यस्य प्रमाणजिज्ञासानुपपत्तेः। तथाचोक्तं वात्स्यायनेन न्यायभाष्यकृता-''त्रिविधा च शास्त्रस्य प्रवृत्तिः-उद्देशः,

लक्षणम्, परीक्षा चे''ति; अन्यथा शास्त्रत्वव्याघातात्। तत्रोद्देशो नाम=नाममात्रेण वस्तुसङ्कीर्तनम्। तच्च प्रथमसूत्रे ब्रह्मपदेन कृतम्। *ननु*-लक्षणमपि तन्निर्वचनात् सिद्धमेव, सत्यम्; तदेवासम्भवित्वेनाक्षिप्यते। कथमसम्भवः? *उच्यते*;-लक्षणं नामासाधारणो धर्मः, यथा गोः सास्ना। तद्वचनञ्च लक्षणशास्त्रमाहुर्लक्षणविदः। तत्र यद्युद्दिष्टस्य ब्रह्मणो नामनिर्वचनबलात् प्रत्यक्षज्ञानगम्यत्वादयोऽसाधारणा धर्माः सन्ति ब्रह्मणि, तर्हि वस्तुपरिच्छेदेन ब्रह्मत्वव्याघातादलक्षणमेतत्। अथ न सन्ति, तथाऽपि स्वरूपासिध्याऽसंभव्येव। सेयमुभयथा पाशारज्जुः। अतो बन्ध्यापुत्रवदसम्भवि ब्रह्मलक्षणम्। तद् यथा वन्ध्यापुत्रस्य सत्वे स्वाश्रयबन्ध्यैव नास्ति, कस्याः पुत्रः स्यादिति वन्ध्यापुत्रत्वमेव तस्यासम्भवि, स्वरूपासत्वे च सुतरामिति, तद्वत्। *ननु*-ब्रह्मस्वरूपव्याघाताद् मा भूद्धर्मलक्षणमेतत्, स्वरूपलक्षणन्तु भविष्यति। तथा च न व्याघात इति-चेत्, न; तस्य धर्मादिलक्षणाविनाभवित्वात्। त्रिविधं हि वस्तुलक्षणम्-धर्मलक्षणम्, स्वरूपलक्षणम्, उपलक्षणं चेति। तानि च परस्पराविनाभूतानि दृष्टानि। तद् यथा-घटे घटत्वं धर्मलक्षणम्: कम्बुग्रीवादिमती व्यक्तिः स्वरूपलक्षणम्, जलाहरणादिकार्यमुपलक्षणम्। एवं सर्वत्र। नहि निर्धर्मस्यार्थक्रियाशून्यस्य वा स्वरूपमुपपद्यते; बन्ध्यापुत्रस्यापि स्वरूपलाभप्रसङ्गात्। नच ब्रह्मणः स्वरूपाविनाभाविधर्मार्थक्रिययोरन्यतरस्यापि सम्भवोऽस्ति; ब्रह्मत्वव्याहतेरित्युक्तत्वात्। तस्मान्नास्ति ब्रह्मणो लक्षणम्। तद्भावाच्च बन्ध्यापुत्रवदजिज्ञास्यमिति प्राप्तम्। तदेतदभिप्रेत्याह- ***किंलक्षणं पुनस्तद् ब्रह्मेति***॥ तामिमामाशङ्कां सूत्रोपात्तन्यायेन परिहर्तु सूत्रमवतारयति- ***अत आह भगवान् सूत्रकारो जन्माद्यस्य यत इतीति***॥ 'भगवानि'ति विशेषणेन सूत्रकारस्य शिष्याशयाभिज्ञतां दर्शयति; ''उत्पत्तिं च विपत्तिञ्च भूतानामागतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति।।'' इति स्मृतेः। भगवत्वं च तस्य सर्वपुराणप्रसिद्धम्। तथा चाह पराशरः-''कृष्णद्वैपायनो व्यासः साक्षान्नारायणो ह्यसौ। को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत्।।'' इति।। अनेन सूत्रेण ब्रह्मणो जगत्कारणत्वरूपोपलक्षणे न्यायः सूच्यते। सर्वज्ञत्वादिरूपधर्मलक्षणे तु ''शास्त्रयोनित्वादि''त्युत्तरसूत्रेण। तेन ब्रह्मणोऽप्युपलक्षण-धर्मलक्षणयोः सत्वान्न वन्ध्यापुत्रस्येव ब्रह्मशब्दनिर्वचनबललभ्यस्वरूपलक्षणाद्यसम्भवः। *ननु*-कथं न सम्भवः? यत उपलक्षण-धर्मलक्षणयोः सत्वे वस्तुपरिच्छेदादुक्ताखण्डवस्तुस्वरूपस्य व्याहतेरित्युक्तत्वादिति-चेत्, *सत्यम्*; तयोः पारमार्थिकत्वे स्यादेव ब्रह्मस्वरूपस्य व्याहतिः, शुक्तौ रजतवदविद्याकल्पितत्वेन नायं दोषः। नह्यविद्याकल्पितं रजतं स्वाधिष्ठानं शुक्तिस्वरूपमुपलक्षयदपि शुक्तिस्वरूपमन्यथयति, भिनत्ति वा। *एतेन* सत्ययोरेव घटादिषु धर्मोपलक्षणत्वदर्शनात्, कथमसत्ययोर्जगत्कारणत्व-सर्वज्ञत्वयोर्ब्रह्माधिष्ठितत्वं स्यात्-*इत्यपास्तम्*; दर्शनासिद्धेश्च। न हि घटादिषु घटत्वादिधर्मः सत्यः कुत्रचिन्निरूपयितुं शक्यते। निर्विकल्पकं हि स्वतो घटादिस्वरूपमिति सर्वतन्त्रसिद्धान्तः। तच्च सत्यमित्यपि। *ननु*-विज्ञानवादि-शून्यवादिभ्यां बहिः पदार्थानङ्गीकरणात् कथं घटादिस्वरूपं सत्यमिति

सर्वतन्त्रसिद्धान्ततयोपादीयते? *नैष दोष:*; ब्रह्मवादिनेव ताभ्यामपि घटादिस्वरूपानपलापात्, परन्तु ब्रह्मव्यतिरेकेणेव विज्ञान-शून्यस्वरूपव्यतिरेकेण पृथक् तत्स्वरूपं नास्तीत्यभ्युपगम इत्यन्यदेतत्। सर्वथाऽपि निर्विकल्पकं सत्यञ्च स्वतो घटादिस्वरूपमिति सर्वतन्त्रसिद्धम्।

तच्च घटत्वादिभिर्धर्मैर्विकल्प्यत इत्यपि सर्वतन्त्रसिद्धम्। न च तद् विकल्पितं रूपं सत्यम्; अन्योपाधिकृतत्वेन द्विचन्द्रादिवद् मिथ्यात्वात्। अन्योपाधित्वेऽपि स्वधर्मोपाधित्वान्न मिथ्येति चेत्, न; औपाधिकत्वस्यैव लाघवान्मिथ्यात्वप्रयोजकत्वात्, स्वधर्मकृतस्य रजतादिरूपस्वधर्मकृतशुक्त्यादिविकल्पे व्यभिचाराच्च। सत्य: स्वधर्मो विवक्षित इति चेत्, न; तस्याद्याप्यसिद्धे:। सिद्धे हि विकल्पितरूपस्य सत्यत्वे सत्य: स्वधर्म: सिध्यति। तच्चेत् सत्यधर्माधीनसिद्धि: स्यात्, कथं नान्योन्याश्रयो दुर्वार: स्यात्? अबाधाद् विकल्पितरूपं सत्यमिति चेत्, न; शुक्तित्व-रजतत्वयोरिवैकस्मिन् युगपद् विकल्पाविकल्परूपयोरसम्भवेन निर्वाहादबाधासिद्धे:। न च-एवमविकल्परूपस्यैव बाध: किं न स्यादिति-वाच्यम्; तस्य विकल्पाधिष्ठानत्वादनिरपेक्षत्वाच्च शुक्तिवदबाधानुपपत्ते:, विकल्पस्यैव वैपरीत्याद्रजतवदबाधोपपत्ते:। इतश्च सविकल्परूपस्य मिथ्यात्वम्; वाचारम्भणत्वात्, विकारत्वात्, संहतत्वाच्च। न च विकारत्वं निर्विकल्पे व्यभिचारि; तस्य विकारत्वे प्रमाणाभावात्। न हि निर्विकल्पकं घटादि जगत्स्वरूपं जायत इति किञ्चित् प्रमाणमस्ति; व्याघाताच्च। यद्धि जायते, तत् संहतमेव भवति। न च निर्विकल्पकं भवति संहतम् ; विरोधादिति व्याघात:। वाचामगोचरत्वादपि न निर्विकल्पमुत्पद्यते; कार्यस्य वाग्गोचरत्वनियमात्। तथा च श्रुति: ''वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्''इति। निर्विकल्पस्य तु शक्तिग्रहासम्भवाद् न तद्गोचरत्वम्। अत एव वृद्धा आकृतौ शब्दशक्तिं ब्रुवते; विकल्पत्वादाकृते:। धर्मिणो भेदाभेदाभ्यामनिरूपणादपि न धर्मा: पारमार्थिका:। तस्मादविद्याकल्पिता एव धर्मिणि निर्विकल्पक एकस्मिन् ब्रह्मणि घटत्वादयो धर्मा इति सिद्धम्। एवमर्थक्रियाकारित्वमपि सर्वत्र काल्पनिकम्; निर्विकल्पके परमार्थतस्तदसम्भवात्। विस्तरेणैतदविरोधे दर्शयिष्याम:। तस्मात् सर्वत्र धर्मोपलक्षणयो: कल्पितत्वात्, तत्सत्यत्वदर्शनासिद्धेर्ब्रह्मण्यप्यविद्याकल्पिते एव धर्मोपलक्षणे अविरोधाद् भविष्यत:। तथा च तदुभयकल्पनाधिष्ठानतया ब्रह्मस्वरूपलक्षणसिद्धि:, इति न काचिदनुपपत्ति:। तत्र ब्रह्मणस्तटस्थलक्षणं जगत्कारणत्वं यत्, तदस्मिन् सूत्रे प्रतिपाद्यते, धर्मलक्षणं तु सर्वज्ञत्वादि यत्, तद्वक्ष्यमाणसूत्रे प्रतिपादयिष्यते।।

ननु-किमिति धर्मलक्षणं परित्यज्य प्रथममुपलक्षणं प्रतिपाद्यते? *नैष दोष:*; एतत्सिद्ध्यधीनत्वात् सर्वज्ञत्वादिसिद्धे:। अनेन पूर्वोत्तराधिकरणयो: कार्य-कारणभावसङ्गतिरपि सिद्धा भवति। *ननु* अनेन सूत्रेण ब्रह्मण उपलक्षणे को वा न्याय: सूत्रित:? *उच्यते*; इदं जगत् , सोपादानम् , सकर्तृकं च, जन्मादिमत्वात् ; घटवदिति न्याय:। न च जन्मादिमत्वमसिद्धम् ; एकदेशे तद्दर्शनेन सर्वत्र तदनुमानात्। यो ह्येकदेशेनोत्पत्त्यादिमान् दृष्ट:, स सर्वोऽपि सर्वात्मनोत्पत्त्यादिमान् भवतीत्यपि दृष्टम् , यथा घटादि। इदं

च जगदेकदेशेनोत्पत्त्यादिमद् दृष्टम्, इति सर्वात्मनाप्युत्पत्त्यादिमद् भवतीत्यनुमीयते; अव्यभिचारदर्शनात्। *ननु* अनेन न्यायेन किं प्रमाणमनुग्राह्यते? *उच्यते*; ''यतो वा इमानि भूतानि जायन्ते; येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशान्ति। तद्विजिज्ञासस्व तद् ब्रह्मे''त्यादि शास्त्रम्; श्रुत्यनुकूलन्यायसूचकत्वात् सूत्रस्य, स्वतन्त्रन्यायसूचनानुपपत्तेः। न चास्मिन्नर्थे न्यायस्य स्वातन्त्र्यं सम्भावयितुमपि शक्यते; परकल्पितप्रधानाद्यादायाप्यर्थान्तरत्वसंभ्भवात्, श्रुत्यनुकूलत्वे तु श्रुत्या यस्येदं लक्षणमुच्यते, तदेव न्यायस्य विषय इति नार्थान्तरतागन्धोऽप्यस्ति।।

ननु-कस्येदं लक्षणमुच्यते? न तावत् शुद्धस्य; तत्र जगत्कारणत्वाभावात्, कल्पितस्यापि तस्य तत्र सत्वे शुद्धत्वव्याघातात्, परस्पराध्यासाङ्गीकारात्। अथ सोपाधिकस्य? न; तस्याब्रह्मत्वात्, तल्लक्षणस्यानाकाङ्क्षितत्वाच्च; अतः पुनरप्यसम्भवीदं ब्रह्मलक्षणं प्राप्तमिति-चेत्, *न*; अज्ञातस्य सर्वान्तर्यामिणो जिज्ञास्यतया लक्षणाभिधानात्। यद्धि जिज्ञास्यमधिकारिणा, तल्लक्षणमाकाङ्क्ष्यते। अतस्तदेवाभिधातव्यम्। जिज्ञास्यञ्च सर्वान्तर्यामितया व्यवस्थितमज्ञातं ब्रह्म; ज्ञाते तस्मिन् किमयं भोक्तुरात्मा न वेति संशयाभावाज्जिज्ञासानुपपत्तेः। अत एव भाष्यकारः ''ब्रह्म जिज्ञासितव्यमित्युक्तम्, किंलक्षणं पुनस्तदु ब्रह्मे''ति जिज्ञास्यलक्षण एवाकाङ्क्षां दर्शयामास। *न च*-एतावता ब्रह्मलक्षणमेतन्न भवतीति-वाच्यम्; तस्यैवाज्ञातस्य स्वरूपविज्ञापनार्थमेतल्लक्षणकरणात्। कथम्? धर्मिज्ञानाधीनं हि निरूपणं तस्य; तस्य धर्मिज्ञानसाध्यत्वात्। तच्च न धर्मिज्ञानमात्रम्। किं तर्हि! धर्मितावच्छेदकावच्छिन्नधर्मिज्ञानम्:; पक्षतावच्छेदकावच्छेदेन साध्यसामानाधिकरण्यस्य निरूप्यमाणत्वात्, तंदवच्छेदकस्य निरूपणात् पूर्वं ज्ञानापेक्षणात् ; अन्यथा पक्ष एव साध्यसिद्धिनियमो न स्यात्। निरूपणधर्मितावच्छेदकं तु प्रकृते जगज्जन्मादिकारणत्वमेव; अन्यूनानतिरिक्तवृत्तित्वात्। अत एव ब्रह्मणो विशेषस्वरूपास्पर्शित्वात् तटस्थलक्षणमेतदित्याहुर्वृद्धाः। *ननु*-एतदवच्छेदेन विशेषस्वरूपसाधनात् कथं तदस्पर्शित्वमस्येति-चेत्, *नैष दोषः*; साध्यदशायां खलु तदवच्छेदकत्वमभ्युपगम्यते, न सिद्धदशायाम्, संशयादिवत् तद्विरोधेन तत्कालं तस्यानवस्थितेः। अतो युक्तं ब्रह्मणो जगत्कारणत्वस्य सत्यज्ञानानन्दादिस्वरूपास्पर्शित्वमिति। अक्षरार्थस्तु सूत्रस्य भाष्यव्याख्यानेन प्रदर्श्यते- ***जन्म=उत्पत्तिः, आदिरस्येति तदुगुणसंविज्ञानो बहुव्रीहिरिति*।। द्विविधो हि बहुव्रीहिः**-तदुगुणसंविज्ञानाऽतद्गुणसंविज्ञानश्चेति। तत्र विगृह्यमाणपदार्थस्यान्यपदार्थोपसर्जनतया समासार्थेऽन्तर्भाव्य विज्ञानं यत्र भवति, स तद्गुणसंविज्ञानो बहुव्रीहिर्नाम भवति। तद्यथा-लम्बकर्णो देवदत्त इति। तमनन्तर्भाव्य ज्ञानं यत्र, सोऽतद्गुणसंविज्ञानः-यथा चित्रगुर्देवदत्त इति। प्रकृते च जन्मपदार्थमन्तर्भाव्यैव समासार्थविज्ञानाद् भवति तद्गुणसंविज्ञानो बहुव्रीहिः। अतद्गुणसंविज्ञाने तु स्थिति-भङ्गयोरेव समासार्थत्वाद् नाभिमताभिन्ननिमित्तोपादानत्वरूपब्रह्मलक्षणसिद्धिः। कथम्? तदुच्यते? यदि तावद् व्याकृतजगत्स्थिति-भङ्गहेतुत्वं ब्रह्मलक्षणं विदध्यात्, तदा

तन्निमित्तत्वविवक्षायामदृष्टादौ, उपादानत्वविवक्षायां तु परकल्पितप्रधानादावतिव्याप्तं स्यात्, उभयरूपहेतुत्वविवक्षायामपि मिलितयोरदृष्ट-प्रधानयोर्ब्रह्मत्वप्रसक्तिः। न च-निमित्तत्वमत्र कर्तृत्वं विवक्षितम् , येन नोक्तातिव्याप्तिरिति-वाच्यम् ; स्थिति-प्रलययोः कर्तृनिमित्तत्वादर्शनात्तद्विवक्षानुपपत्तेः।। न हि घटादेरुत्पत्तौ कुलालादितन्त्रत्वे दृष्टेऽपि स्थिति-प्रलययोस्तत्तन्त्रत्वं दृष्टम्, येन तद्धेतुत्वमात्रात् तत्कर्तृत्वलाभः स्यात् ; अप्रामाणिकत्वेनासम्भवप्रसङ्गात्। तस्मात् तल्लाभार्थं जन्मग्रहणं कर्तव्यम् ; तस्य कर्तृनियतत्वदर्शनेनासम्भवासम्भवात्। न च-एवमप्यसम्भवीदं लक्षणम्; घटाद्युत्पत्तौ कर्तृतन्त्रत्वे दृष्टेऽप्यभिन्नकर्त्रुपादानत्वस्यादर्शनादिति-वाच्यम्; तत्र तददर्शनेऽपि लूतातन्त्वादिषु तद्दर्शनाददर्शनासिद्धेः। अस्तु तर्हि जगदुत्पत्तिहेतुत्वमेव तल्लक्षणम् ; न; तावता परकल्पिततटस्थेश्वरेऽतिव्याप्त्यपरिहारात्। न च-उत्पत्तिहेतुत्वमित्यनेन कर्तृत्वोपादानत्वयोर्लाभान्नातिव्याप्तिरिति-वाच्यम् ; एकस्य पदस्य युगपदुभयार्थोपस्थापकत्वानुपपत्तेः। न च-सामान्यशब्दत्वादुभयोपस्थापकत्वमविरुद्धमिति-वाच्यम्; सामान्यस्यापि वाक्ये विशेषार्थमादायैव पर्यवसानात्। एवं तर्हि-**उत्पत्ति-प्रलययोरेव ग्रहणमस्तु; ताभ्यामेव कर्तृत्वोपादानत्वयोलाभि दिति-चेत् , सत्यम्; तथाऽपि विज्ञान-शून्यवादिनोर्विज्ञान-शून्ययोरतिव्याप्तमेतल्लक्षणं स्यात्; तद्वारणार्थं** स्थितिग्रहणस्यावश्यकत्वात्। विज्ञानवादि-शून्यवादिभ्यां क्षणिकविज्ञान-शून्ययोर्जगत्कर्तृत्वोपादानत्वाङ्गीकारेऽपि तत्स्थितिहेतुत्वानङ्गीकारात्, असम्भवाच्च। न हि क्षणिकविज्ञानं स्वकार्यस्य स्थितिहेतुः सम्भवति; तत्काले स्वस्यैवासत्वात्; अन्यथा क्षणिकत्वव्याघातात्। कार्यस्यापि विज्ञानस्य क्षणिकत्वेन स्थित्यनङ्गीकाराच्च। अत एव न शून्यमपि तद्धेतुः; असत्त्वाच्च शून्यस्य, कार्यस्यान्तर्यामितया सत्वहेतुत्वानुपपत्तेः। अस्तु तर्ह्युत्पत्ति-स्थितिहेतुत्वं ब्रह्मलक्षणम्, न; परकल्पिततटस्थेश्वरेऽतिव्याप्तेस्तद्वारणार्थं प्रलयग्रहणोपपत्तेः। *ननु*-तटस्थेश्वरस्यापि परैर्लयहेतुत्वमङ्गीकृतम्, तत् कथं तेन तद्वारणमिति-चेत्? *नैष दोषः*; अधिकरणतया लयहेतुत्वस्य विवक्षितत्वात्। न च कालेऽतिव्याप्तिः; अविद्यात्मसम्बन्धमन्तरेण सर्वकार्याधिकरणकालानङ्गीकारात्। नह्यनुपादाने कार्यं लीयते। तथा च श्रुतिः ''यत्प्रयन्त्यभिसंविशन्ती''ति। अतो लयहेतुत्वेनोपादानत्वस्य विवक्षितत्वाद् न तटस्थेश्वरेऽतिव्याप्तिः। तस्मात् लक्षणसिध्यर्थमुत्पत्त्यादित्रितयस्य विवक्षितत्वात् प्रागभिहितम्-**''तद्गुणसंविज्ञानो बहुव्रीहिरि''ति।** *ननु*-तद्गुणसंविज्ञानपरिग्रहेऽपि न त्रितयं लभ्यते; जन्मादीत्येकवचनपरिग्रहात्, स्थितिहेतुत्वस्यैवादिपदार्थत्वात्, प्रलयस्यापि तदन्तर्भावे द्विवचनपरिग्रहापत्तेः। तद्ग्रहेऽपि न त्रितयलाभः; उत्पत्तिस्थित्योरेव लाभात्। तथा चातिव्याप्तिस्तदवस्थैवेति, नेत्याह- ***जन्म-स्थिति-भङ्गं-समासार्थ इति*।।** ''जन्मादी''ति नपुंसकलिङ्गनिर्देशात् समाहारद्वन्द्वार्थान्यपदार्थे बहुव्रीहिः। तथा चैकवचनसत्वेऽपि द्वयोरन्यपदार्थत्वाविरोध इत्याशयः।। तथाऽपि जन्मन आदित्वं किमिति सूत्रकृता निर्दिष्टम्? यतः सन्तत्यारूढानां जगज्जन्म-स्थिति-भङ्गानां घटीयन्त्रन्यायेनानादित्वात् किं कस्यादिः स्यादिति? तत्राह- ***जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षञ्चेति*।।** चस्त्वर्थत्वेना-

शङ्कानिवृत्यर्थः। सत्यम् ; अनादित्वाद् नास्ति तेषां क्रमः। न हीदं प्रथमं जगद् जातमस्ति, येन तत्पूर्व स्थिति-प्रलययोरभावाद् जन्मनस्तदादित्वमवधार्येत; अनादिजगत्प्रवाह- प्रतिपादकश्रुति- न्यायविरोधापत्तेः। *एतेन*-स्थिति- प्रलययोरादित्वम्- *प्रत्याख्यातम्*।। तथाऽपि सूत्रकृता यद् जन्मन आदित्वं निर्दिष्टम्, तत् समिदादीनामिव सूत्रविषयश्रुतिपाठापेक्षम्। न च-तत्पाठक्रमस्य पूर्वोक्तरीत्या बाधात् त्यागो युक्त इति-वाच्यम्; वस्तुवृत्तापेक्षत्वेनाबाधात् त्यागानुपपत्तेः। वस्तु च लोके घटादि जनित्वा स्थित्वा नश्यतीति दृष्टम्, न वैपरीत्येन, नवा स्थित्वा जनित्वा नश्यतीति। तस्मादनादित्वेन क्रमनियमासम्भवेऽपि वस्तुवृत्तदर्शनानुसारेण श्रुतिनिर्देशाधीनक्रमनियमोपपत्तेरुपपद्यते जन्मन आदित्वम्-इति।। तदेतद् दर्शयति- *श्रुतिनिर्देशस्तावदित्यादिना*।। श्रुतिनिर्देशस्तावदादौ जन्मनो भवति। तत्र हेतुः-'' *यतो वा इमानि भूतानि जायन्ते'' इत्यस्मिन् वाक्ये जन्म-स्थिति-प्रलयानां क्रमदर्शनादिति*।। तत्र बीजमाह- ***वस्तुवृत्तमपि जन्मना लब्धात्मकस्य धर्मिणः स्थिति-प्रलयसम्भवादिति** *।। यद्यपि सत्कार्यवादिनां जन्मनः पूर्वमपि कार्य लब्धात्मकमेवास्ति; तथाऽपि लोकदृष्ट्याऽलब्धात्मकत्वमित्यतोऽनादिप्रवाहरूढानामपि तेषां जन्मन आदित्वम्, न स्थिति-प्रलययोरित्याशयः।। ''अस्ये''- तिपदस्य प्रातिपदिकार्थमाह- *अस्येति प्रत्यक्षादिसन्निधापितस्य धर्मिणो निर्देश इति*।। सर्वनाम्नो हि बुद्धिस्थमात्रे शक्तिः। यत्रोपपदाप्रक्रमादि तत्सङ्कोचकमुपलम्यते, तत्र तद्वशाद् द्रव्यादिशब्दवत् सामान्यवाचकमपि सर्वनाम बुद्धिस्थविशेषेऽवधार्यते, नान्यथा; सर्वनामत्वव्याघातात्, प्रकृते तूपपदप्रक्रमादितत्सङ्कोचकाभावादविशेषेण प्रत्यक्षादिभिः षड्भिः प्रमाणैस्तदाभासैश्चोपस्थापितं बुद्धौ सन्निधीयमानं प्रपञ्चमात्रमिदमा निर्दिश्यते। *एतेन*-इदमः सन्निकृष्टाभिधायित्वात्, सर्वस्याकाशादिप्रपञ्चस्यासन्निकृष्टत्वात् कथमिदमा निर्देशः स्यात्? *इति- *अपास्तम्*; इन्द्रियासन्निकर्षेऽपि बुद्धिसन्निकर्षात्। अत एवात्यन्तपरोक्षेऽपि धर्मादौ-अयं धर्मः सर्वेषां भूतानामस्त्वि''त्यादीदमा निर्देशः श्रुतौ दृष्टः। लेकेऽपि 'देवदत्तस्येयमिच्छा' 'देवदत्तस्यायं धर्मः' इति। अस्ति च तदेकदेशेषु पृथिव्यप्तेजःस्विन्द्रियसन्निकर्षोऽपि; तावतैव माषराशिवत् सङ्घातप्रत्यक्षत्वोपपत्तेर्जगतः संहतत्वादिदमा निर्देशाविरोधात्। अत एव विषयवाक्येऽपि-''इमानि भूतानी''त्युक्तम्। न चैवं सूत्रेऽप्यमीषामिति बहुवचननिर्देशो युक्तः; सूत्रत्वव्याघातादिति। तदिदमुक्तम्-प्रत्यक्षादिसन्नि**धापितस्य धर्मिणः। इदमा निर्देश इति** *।। धर्मिणं जन्मादेर्धर्मस्येति शेषः।। विभक्त्यर्थ दर्शयन् तस्याः पूर्वसूत्रवदत्र विशेषपरत्वं वारयति- ***षष्ठी जन्मादिधर्मसम्बन्धार्थेति** *।। प्रातिपदिकार्थस्येति शेषः। जन्मादिना जगतः सर्वसम्बन्धसम्भवात्, पूर्ववत् तद्विशेषविवक्षायां प्रमाणाभावादित्याशयः। तसेरर्थान्तरपरत्वं वारयति- ***यत इति कारणनिर्देश इति** *।। अर्थान्तरस्यायोग्यत्वादनाकाङ्क्षणाच्च जन्मादिनाऽन्वयानुपपत्तेरित्याशयः। एवं विग्रहादिपूर्वकं पदार्थानुक्त्वाऽऽकाङ्क्षितपदपूरणेन वाक्यं योजयंस्तदर्थमाह- ***अस्य जगतो नाम-रूपाभ्यां व्याकृतस्यानेककर्तृ-भोक्तृसंयुक्तस्य प्रतिनियतदेश-काल-निमित्त-क्रिया-फलाश्रयस्य**

मनसाऽप्यचिन्त्य- रचनारूपस्य जन्म-स्थिति-भङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणाद्भवति, तद्ब्रह्मेति वाक्यशेष इति*।। ''नाम-रूपाभ्यां व्याकृतस्ये''त्यनेन द्वैराश्यं कृत्वा प्रपञ्चं विशेषयन् वादिभिः परिकल्पितपदार्थपरिभाषाः प्रतिक्षिपति। द्रव्य-गुण-कर्मेत्यादिषट्पदार्थादिपरिभाषाणां लोकवेदबहिर्भूतत्वेन 'नदी'-'वृध्यांदे'वत् स्वकपोलकल्पितत्वाद् नाम-रूपसंज्ञयोश्च श्रुतिसिद्धत्वात्, ''तन्नाम-रूपाभ्यां व्याक्रियत'' ''आकाशे वै नाम-रूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म'' तिश्रुतेः। ''नामरूपाभ्यामि'' तीत्थंभावे तृतीया। नामरूपात्मनेत्यर्थः; अव्याकृतदशायामिदं नामेदं रूपमिति व्यवहारानास्पदत्वात्। ''अनेककर्तृ-भोक्तृसंयुक्तस्ये''त्यनेन कर्तृत्व-भोक्तृत्वयोरपि प्रपञ्चान्तःपातित्वं दर्शयति। यथाचैतत्, तथा पूर्वमेवाध्यासभाष्ये प्रदर्शितम्। **''प्रतिनियतदेश-काल-निमित्त-क्रियाफलाश्रयस्ये''त्यनेन** क्रिया-तत्फलयोः प्रतिनियतदेश-काल-निमित्तानि दर्शयन् स्वभाववादं निराकरोति। तन्निराकरणं च लक्षणस्यास्यासम्भवित्ववारणार्थम्; अन्यथा स्वतो जगदुत्पत्तेः कारणापेक्षाया अभावात्, ''यतः'' इत्यनेनान्वयानुपपत्तेर्लक्षणासम्भव एव स्यात्। कथं तन्निराकरणम्? इत्थम्-स्वतः कारणनिरपेक्षात्, भावः=उत्पत्तिः स्वभाव इति हि स्वभाववादिमतम्। न च क्रिया-तत्फलयोः स्वत उत्पत्तौ प्रतिनियत-देश-काल-निमित्तापेक्षा तस्या युज्यते; तदपेक्षत्वे स्वत उत्पत्तिव्याघातात्। दृश्यते च तयोः स्वोत्पत्तौ तदपेक्षा। तथाहि-क्रिया तावत् चतुर्विधा-विहिता, प्रतिषिद्धा, अविहिता, अप्रतिषिद्धा चेति। तत्र विहिता तावद् दर्श-पूर्णमासादिक्रिया। ''समे यजेते'' त्यादिश्रुतेः प्रतिनियतः समादिदेशः। ''प्रातरह्नो वै देवानामि''त्यादिश्रुतेः प्रतिनियतः प्रातरादिकालः। ''यावज्जीवं दर्श-पूर्णमासाभ्यां यजेते''त्यादिश्रुतेर्जीवनादि निमित्तं प्रतिनियतम्-इति। एवमन्यत्राप्यूह्यम्। *प्रतिषिद्धा-ब्रह्महत्यादिः। तत्रापि तद्धननयोग्यदेश-कालापेक्षा, तन्निमित्तक्रोधाद्यपेक्षा च। *अविहिता-भोजनादिः ; रागपरिप्राप्तत्वात्। तत्रापि नियतलिप्त-सायं-प्रातः-काल-निमित्तापेक्षा। अप्रतिषिद्धा च-जीवनहेतुकदेहावयवादिचेष्टा; तस्या अपि प्रतिनियतदेश-काल-निमित्तापेक्षत्वात्, अन्यथा वृथाचेष्टात्वेन निषिद्धत्वापत्तेः। क्रियाफलमपि त्रिविधम्-जात्यायुर्भोगलक्षणं विशिष्टदेश-काल-निमित्तापेक्षं भवति। तद्यथा-विहितफलस्य स्वर्गादेः प्रतिनियतमेर्वादिपृष्ठदेश-मरणोत्तरकाल-प्रारब्धक्षयादिनिमित्तापेक्षा। एवमन्यत्राप्यूह्यम्। तस्मान्न स्वभाववादो युक्तः। प्रतिनियतानि देश-काल-निमित्तानि ययोः क्रिया-तत्फलयोः, ते प्रतिनियतदेश-काल-निमित्तक्रियाफले; तदाश्रयस्य तदात्मकस्येत्यर्थः। *एतेन*-अचेतनकारणवादोऽपि निराकृतो-द्रष्टव्यः; अचेतनस्यानभिज्ञत्वेन प्रतिनियतदेश-काल-निमित्तापेक्षक्रियाफलात्मक-जन्मादिहेतुत्वानुपपत्तेरिति। **'मनसाऽप्यचिन्त्यरचनारूपस्ये''**त्यनेन जीवकर्तृत्वं वारयति। यो हि यस्य कर्ता भवति, स तदुपादान-तन्निमित्त-तदाकारविन्यासाभिज्ञो दृष्टः, यथा गृहरथादेः स्थपत्यादिः। न च-जीवोऽसर्वज्ञत्वात् स्वकीयशरीररचनामपि मनसाऽपि विचिन्तयितुं शक्नोति-इत्यंभूतोऽयं मम

शरीरसन्निवेश इति, किं पुनः कर्तुमिति? एवं स्थितेऽतिदूरमेवैतत्-यत् तादृशानन्तभेदभिन्नस्यानीश्वरेण मनसाऽप्यचिन्त्यरचनारूपस्य जगता विन्यासं स करिष्यतीति। पूर्वमनुक्तं ''यतः'' इत्यस्य प्रतिपदिकार्थ लक्ष्यतावच्छेदकावच्छिन्नतया दर्शयति- ***सर्वज्ञात् सर्वशक्तेरिति***।। सर्वज्ञत्वेन निमित्तत्वं प्रातिपदिकार्थस्य व्यवच्छिन्नत्ति, सर्वशक्तित्वेन चोपादानत्वमिति विभागः, तेनाभिन्ननिमित्तोपादानत्वं भगवतः सिद्धं भवति। *ननु*-सर्वज्ञत्वादेर्धर्मलक्षणत्वं वक्तव्यम्, तत् कथं लक्ष्यतावच्छेदकं तदिति-चेत्, *नैष दोषः*; धर्मलक्षणस्यैव सर्वत्रोपलक्ष्यतावच्छेदकत्वात्। यद्यपि जगज्जन्मादिकारणत्वमपि भवति भगवतो धर्मः; तथाऽपि तस्य जगन्निष्ठजन्मादिघटितत्वात्, जन्माद्येकैककाले त्रितयकारणत्वाभावाच्चैकैककारणत्व-स्यातिव्यापकत्वादित्युक्तत्वात्, काकवदुपलक्षणमेवैतत्, न विशेषणलक्षणम्। सर्वज्ञत्वादिकं तु त्रिषु कालेषु भावाद्विशेषणलक्षणमिति समञ्जसम्। अस्तु वा जगज्जन्मादिकारणत्वमपि ब्रह्मणो धर्मलक्षणम्; तन्निष्ठधर्मत्वात्, घटरूपादिवत् सर्वदाऽसत्वेऽपि विशेषणत्वाविरोधात्; तथाऽपि जगज्जन्माद्येवोपलक्षणं भविष्यति; कार्यनिष्ठधर्मत्वेन व्यधिकरणत्वात्, कारणचिद्रूपत्वेनोपलक्षणम्; चित्वाच्च तस्योपलक्षणत्वोपपत्तेरिति। *ननु*-जगतो जन्म-स्थिति-भङ्गलक्षणविकाराश्चेद्ब्रह्मणः कारणस्य लक्षणम्, ततो विशेषेण जनि-स्थितिविपरिणाम-वृद्ध्यपक्षय-विनाशरूपाः षडेव तद्विकारा उपलक्षणत्वेनोपादातुमुचिताः, न त्रय एव, तत्परित्यागे कारणाभावात्; तथाच निरुक्तकारवत् सूत्रकारेणापि जन्मादीत्यनेन षण्णामपि भावविकाराणां ग्रहणाद् ''जन्म-स्थिति-भङ्गं समासार्थः'' इति व्याख्यानमनुचितमिति केचित्, तन्न; जन्म-स्थितिभङ्गानामेवेहसूत्रे ग्रहणं युक्तम्, न विपरिणाम-वृद्ध्यपक्षयाणामपि; तेषामेष्वन्तर्भावेणार्थलभ्यत्वात्, जन्मनि स्थितौ वा विपरिणाम-वृद्ध्योरन्तर्भावः, लये स्थितौ वाऽपक्षयस्य। *ननु*-किमित्यन्तर्भावेण तद्ग्रहणम्? न यास्कवत् पृथगिति-चेत्, *न*; वैषम्यात्। अत्र हि श्रुत्यर्थसङ्ग्रथनार्थत्वात्सूत्राणामित्युक्तम्। श्रुतौ तु त्रयाणामेवोपन्यासः-''यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ती''ति। किमत्र कारणम्? त्रितयेनैवाव्यभिचारितया ब्रह्मलक्षणसिद्धेरित्युक्तत्वादधिकग्रहणवैयर्थ्यात्, यास्केन तु देहादिभावेषु प्रत्यक्षादिप्रमाणान्तरपरिदृष्टजन्मादिषड्विकारा वैराग्यार्थ तेषु प्रदर्श्यन्त इति भिन्नविषयत्वाद्वैषम्यम्। न च तेऽत्र ग्रहीतुमपि शक्यन्ते; तथा सति तेषां जगत्स्थितिकालेऽपि देहादिभावेषु दर्शनात् तद्धेतुभूतपृथिव्यादिभूतेषु लक्षणातिव्याप्तेर्मूलकारणपरिग्रहानुपपत्तेः। अतो ब्रह्मणो मूलकारणाद् जगतो या जनिः, या च स्थितिः, यश्च प्रलयो ''यतो वे''त्यादौ श्रुताः, त एवात्र ब्रह्मोपलक्षणतया परिगृह्यन्ते, नान्ये। न च-तदपि कुत्रचिदतिव्यापकमिति-शङ्क्यम्; न हि यथोक्तविशेषणचतुष्टयविशिष्टस्य जगतः सर्वज्ञं सर्वशक्तिसमन्वितं भगवन्तं त्यक्त्वाऽन्यतः प्रधानादेरचेतनाद् जीवाद्वाऽनीश्वरात् स्वभावाद्वोत्पत्यादि सम्भावयितुं शक्यत इत्याह- ***अन्येषामपि भावविकाराणामि''त्यादिना, ''न च स्वभावतः; विशिष्टदेशकालनिमित्तोपादानादि''त्यन्तेन भाष्येण***।। विशिष्टानि देश-काल-निमित्तोपादानानि

यस्य स्वभावस्य तस्मादित्यर्थ ; । तेषु विद्यमानेषु स्वभावाद् भवतीति व्याघाताद् वक्तुमप्यशक्तेरित्याशयः। *एतेन*–आद्यस्य जन्म यतो भवति, तद् ब्रह्मेति सूत्राक्षरयोजनाऽपि– *प्रत्याख्याता*।। ''आद्यस्ये''ति पदेन हिरण्यगर्भग्रहे तत्कारणापञ्चीकृतभूतेष्वतिव्याप्तेः। सर्वकार्यप्रपञ्चग्रहेऽपि तज्जन्ममात्रस्य पूर्वोक्तरीत्याऽन्यतोऽपि परकल्पितात्सम्भवादतिव्याप्तेरावश्यकत्वात्–इति।। तदनेन प्रकारेण सूत्रस्याक्षरार्थो दर्शितः।।

संप्रति तस्य तात्पर्यार्थं परमतवैलक्षण्येन दर्शयितुं तन्मतमनादेयत्वेनोपन्यस्यति– ***एतदेवेति***।। यदेतत् सूत्रकारेण जगज्जन्मादिरूपं ब्रह्मण उपलक्षणमभिहितम् तदेव श्रुतिनिरपेक्षं संसारिव्यतिरिक्तेश्वरस्यास्तित्व–सर्वज्ञत्वादिसाधनमनुमानं भवति? इति तटस्थेश्वरकारणिनो नैयायिकादयो मन्यन्ते, तेषामभिमानमात्रम् न प्रमाणेनाध्यवसितम्; धर्मवत् प्रमाणान्तराविषयत्वाद् ब्रह्मण इत्यभिप्रायः। *ननु* सूत्राणां परार्थानुमानरूपत्वात् तस्य च ब्रह्मविषयत्वात् कथं न ब्रह्म प्रमाणान्तराविषयः? कथं वा श्रुतिनिरपेक्षं सत् तदनुमानं न ब्रह्मास्तित्वसाधकम्? सापेक्षत्वेऽनुवादत्वात् तत्प्रमाणत्वव्याहतेरित्यभिप्रेत्याशङ्कते– ***नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्र इति***।। *तदेव= अस्मदभिप्रेतं श्रुतिनिरपेक्षं ब्रह्मविषयमनुमानमित्यर्थः। *ननु* ''यतो वा इमानि भूतानि जायन्ते'' इत्यादिश्रुतिरपि तद्विषया दृष्टा, *सत्यम्*; ''वायुर्वै क्षेपिष्ठा देवते''त्यादेः प्रत्यक्षप्राप्तानुवादकत्ववत् तस्या अनुमानसिद्धब्रह्मानुवादकत्वं भविष्यति; 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायात्, *सत्यं परार्थानुमानरूपाणि सूत्राणि*, परन्तु तानि न ब्रह्मविषयाणि; ब्रह्मणः प्रमाणान्तरविषयत्वस्य वक्ष्यमाणत्वात्। किं तर्हि? उपक्रमोपसंहारादिलिङ्गोपस्थापनद्वारैकार्थत्वावधारणेनैकवाक्यताविषयाणि वेदान्तवाक्यानाम्। तथा चोक्तम्–'अर्थैकत्वादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यादिति परिहरति– ***न; वेदान्तवाक्यग्रथनार्थत्वात् सूत्राणामिति***।। वेदान्तवाक्यानां ग्रथनम्=एकवाक्यता, सैवार्थो येषां तानि, वेदान्तवाक्यग्रथनार्थानि, तद्भावः, तत्वम्; तस्मादित्यर्थः। संग्रहवाक्यं विभजते– ***वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्त इति***।। *ननु*–ब्रह्म जिज्ञासूनां सूत्रोपात्तन्यायेन ब्रह्मविचार एव युक्तः, न वेदान्तवाक्यविचार इति, नेत्याह– ***वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्तेति***।।

अनुमानादिप्रमाणान्तराविषयत्वं तु ब्रह्मणः समन्वयसूत्रे वक्ष्यते। तथा च यथा स्वर्गेप्सूनां साक्षात् तत्कर्तव्यतानुपपत्तौ तत्साधनं यागादि कृत्वा कृतकृत्यता, एव ब्रह्म जिज्ञासूनां साक्षात्प्रमाणतर्काविषयत्वाद् ब्रह्मणो विचारानुपपत्तौ तदवगतिसाधनं श्रुतिप्रमाणं विचार्यैव कृतकृत्यता, इति च काचिदनुपपत्तिरित्याशयः। अत एव यदुक्तमनुमानेन ब्रह्मास्तित्वं प्रतिपाद्यते, श्रुतिस्तु तदनुवादिकेति, तत्र वैपरीत्यादित्याह– ***सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु तदर्थग्रहणदार्ढ्यायानुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवन्न निवार्यत इति***।। ***प्रमाणम्*** तर्कत्वेन श्रुत्यर्थावधारणानुकूलं भवेदित्यर्थः। तत् कुत इति?

अत आह- ***श्रुत्यैव तर्कस्याभ्युपेतत्वादिति***॥ स्वसहायत्वेनाङ्गीकृतत्वादित्यर्थः। तदङ्गीकारं श्रुतेर्दर्शयति- ***श्रोतव्यो मन्तव्य इति श्रुतिरित्यादि***॥ श्रुतिरितिपदं ''पुरुषो वेदेत्य'' तोऽनन्तरमप्यनुषञ्जनीयम्। *ननु*-यथा धर्मः श्रुति-लिङ्ग-वाक्यादिभिरेव श्रौतैः प्रमाणैर्जिज्ञास्यते, कुतः? अपूर्वत्वेन प्रमाणान्तरागोचरत्वाद्धर्मस्य, एवं ब्रह्माप्यपूर्वत्वाविशेषेण तैरेव जिज्ञास्यताम्? न तत्र पुरुषबुद्धिलक्षणमननाद्यपेक्षा; मननादिश्रुतेश्च ब्रह्मज्ञानस्तुतिमात्रपरत्वेनाप्युपपत्तेरित्याशङ्क्य, धर्मब्रह्मणोर्भूतत्वाभूतत्वकृतविशेषेण तज्जिज्ञासयोरपि वैषम्यादुपपद्येते तदपेक्षानपेक्षे इत्युपपादयति- ***न धर्मजिज्ञासायामिवेत्यादिना***॥ *अनुभवः=प्रत्यक्षम्। आदिशब्देनानुमानादि गृह्यते। *यथा सम्भवमिति*॥ अनुभवस्य जिज्ञास्यब्रह्मस्वरूपे व्यापारः, अनुामनादेश्च तद्विपक्षकोटिनिराकरण इति। तत्र हेतुः- ***अनुभवावसानत्वात्,.भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्येति***॥ यद्धि लोकेऽनुभवयोग्यं भूतं वस्तु जिज्ञास्यते, तस्येष्यमाणं विज्ञानमनुभवावसानं यावद् जिज्ञासोर्नोत्पद्यते, तावदाकाङ्क्षाया अनुपरमाद् जिज्ञासितमेव तद्भवतीति, तावत् तैस्तैः प्रमाणैर्जिज्ञास्यते, यावन्निराकाङ्क्षमनुभवावसानं विज्ञानं भवतीति दृष्टम्, यथा पुत्रादि प्रियं वस्तु, ब्रह्मापि भूतमुपलब्धियोग्यञ्च। अत इष्यमाणतद्विज्ञानस्यानुभवावसानत्वाद्भूतवस्तुविषयत्वाच्च यथासम्भवं यथाव्यापारं चास्ति प्रमाणान्तरोपक्षेत्यर्थः। दृष्टान्ते तद्व्यतिरेकं साधयति- ***कर्तव्ये हीत्यादिना***॥ *ननु* कर्तव्यविषये जिज्ञासाया अप्यनुभवविषयत्वं किं न स्यात्? असम्भवान्नैवमित्याह- ***पुरुषाधीनात्मलाभत्वाच्च* कर्तव्यस्येति**॥ चकारोऽवधारणार्थः। जिज्ञासानन्तरं हि पुरुषप्रवृत्तेस्तदात्मलाभः; अतो जिज्ञासाकाले वस्तुनोऽसत्वात् तदनुभवासम्भवान्न तस्यास्तदवसानत्वमित्याशयः। पुरुषाधीनात्मलाभमेव कर्तव्यस्योपपादयति- ***कर्तुमकर्तुमित्यादि***॥ ***विधि-प्रतिषेधाश्चात्रेति***॥ *अत्र=कर्तव्यस्य पुरुषाधीनात्मलाभत्वे सतीत्यर्थः। विधयस्तावत्-''यावज्जीवमग्निहोत्रं जुहोती''त्यादयः। प्रतिषेधाः-''न कलञ्जं भक्षयेदि''त्यादयः। विकल्पः=''अतिरात्रे षोडशिनं गृह्णाति''''नातिरात्रे षोडशिनं गृह्णातीत्यादिः। उत्सर्गः=''आहवनीये जुहोती''त्यादिः। अपवादः ''पदे जुहोतीत्यादिः। *''**एवं नैवमिति*** वस्तुनः प्रकारविकल्पाभावः प्रदर्श्यते। ***अस्ति नास्तीति*** स्वरूपविकल्पाभाव इति। *ननु* वस्तुन्यपि कर्तव्य इव विकल्पो दृष्टः; यथा स्थाणौ-'स्थाणुर्वा पुरुषो वे'ति, नेत्याह- ***विकल्पनास्त्विति***॥ यद्वा- *ननु* यथा क्रियाया विकल्पादिरूपत्वेन पुरुषतन्त्रत्वाद् तज्जिज्ञासाऽनुभवावसाना, एवं वस्तुज्ञानस्यापि स्थाणुर्वा पुरुषो वेत्यादिविकल्परूपत्वदर्शनेन पुरुषबुद्धितन्त्रत्वान्नानुभवावसानत्वमिति, नेत्याह- ***विकल्पनास्त्विति***॥ तत्राज्ञानस्योपाधित्वात्, संशयस्य तत्वज्ञानभिन्नत्वादित्याशयः। भवतु, ततः किमिति? अत आह- ***तत्वैवं** सतीति*॥ ब्रह्मज्ञानस्य भूतवस्तुविषयत्वात् स्वविषयसम्भावनार्थमस्ति प्रमाणान्तरापेक्षा। तथा च श्रुत्यर्थावधारणानुकूलतयैव सूत्रकारेण जन्मादिसूत्रे न्यायः सूत्रितः, न स्वातन्त्र्येण ब्रह्मविषयप्रमाणतयेत्यभिप्रायः। एवमाशयमविद्वान् श्रुतत्वेन ब्रह्मणः प्रमाणान्तरविषयत्वमभिहितमिति भ्रान्तो

व्याघातमाशङ्कते- *नन्विति*।। निर्विषयत्वादित्याशयः। यद्वा- *ननु* ब्रह्मज्ञानस्य भूतवस्तुविषयत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेव प्राप्नोति, न वेदान्तविषयत्वम्; सर्वस्य वेदस्य कर्तव्यमात्रविषयत्वात्, तथा च ब्रह्मज्ञानाय वेदान्तवाक्यविचारणाऽनर्थिकैव प्राप्तेति शङ्कते- ***नन्विति***।। प्रमाणान्तरविषयत्वासम्भवाद् ब्रह्मणो वेदान्तविषयत्वमेवेति परिहरति- ***नेत्यादिना***।। *ननु* यथा पक्षे धूममात्रग्रहादनुमितिर्न तत्र तत्सम्बन्धग्रहापेक्षा, एवं ब्रह्मकार्यग्रहात् तदनुमितिर्न विरोत्स्यत इति, नेत्याह- ***कार्यमात्रमेवेति***।। धूमस्यापि महानसे वह्निसम्बन्धग्रहाद् नागृहीतविशेषसम्बन्धं कार्यं कारणविशेषं निश्चाययितुं शक्नोति, सामान्यतस्तत्सम्भावनाहेतुस्तु भवत्येवेत्याशयः। यथा च वेदान्तानां भूतवस्तुविषयत्वमेव, न कार्यविषयत्वम्, तथा वक्ष्यते। प्रकृतमुपसंहरति- ***तस्मादिति***।।

ननु यस्य विषयसंभावनार्थं न्यायप्रदर्शनद्वारा ग्रथनमनेन सूत्रेण क्रियते, किं पुनस्तद् वेदान्तवाक्यम्? इति पृच्छति- ***किं पुनरिति***।।

पठति- ***भृगुर्वै वारुणिरित्यादि***।। *ननु*-अनुमानवदेतदपि वाक्यं तत्समानताविषयत्वेन सामान्यविषयत्वात् न कारणविशेषनिश्चायकमिति-चेत्, *नैष दोषः*; ''अक्ताः शर्करा उपदधाती''ति वत्, वाक्यशेषबलादस्य तद्विशेषनिश्चायकत्वोपपत्तेरित्याह- ***तस्य च निर्णयवाक्यमिति***।।

चोऽवधारणार्थः। *तस्यैव*=''यतो वा'' इत्यादिवाक्योपात्तकारणस्यैवेत्यर्थः।

इति वार्तिके जन्माद्यधिकरणं समाप्त।।

भाष्यभावप्रकाशिका

तदेवं प्रथमसूत्रेण वेदान्तमीमांसारम्भमुपपाद्य तामारभते-"*जन्माद्यस्य यत इति*।।" एतत्सूत्रस्य पातनिकामाह- ***ब्रह्मेति*।।** ब्रह्मज्ञानकामेनेदं शास्त्रं श्रोतव्यमित्युक्तम्, जिज्ञासापदस्यान्तर्णीत-विचारोपलक्षकत्वं ज्ञानेच्छोपक्षेपेण स्वार्थापरित्यागेनाङ्गीकृत्येति भाव:।। यद्यपि प्रधानस्य जिज्ञास्यत्वेन प्रतिज्ञया तदङ्गान्यपि प्रमाणादीनि प्रतिज्ञातानि; तथाऽपि स्वरूपस्य प्राधान्यात् तदेव प्रथमं विचार्यमित्यभिप्रेत्याह- ***किंलक्षणमिति*।।** पदच्छेद: पदार्थकथनं पदविग्रह इति व्याख्यानाङ्गं त्रितयमपि संपादयति- ***जन्मोत्पत्तिरिति*।। *तद्गणसंविज्ञान इति*।।** विशेष्यैकदेशमेव विशेषणं कृत्वा समास इत्यर्थ:। तद्गुणसंविज्ञाने प्रयोजनमाह- ***जन्म-स्थिति-भङ्गमिति*।।** नपुंसकलिङ्गनिर्देशात् संहार-स्थितिप्रधानं धर्मजातं विवक्षितमिति द्रष्टव्यम्।।

ननु आदौ कथं जन्मन आदित्वमिति? अत आह- ***जन्मनश्चेति*।।** एतत्सूत्रलक्षितवाक्ये जन्माऽऽदौ निर्दिष्टं यस्मात्, यस्माच्च वस्तुनो वृत्तं स्वभावोऽपि जनित्वा स्थित्वा प्रलीयत इत्येवंभूत:, अलब्धात्मकस्य जन्मना स्थिति-प्रलययोरसंभवात्, अतो जन्मन आदित्वमित्यर्थ:। "अस्ये" ति सूत्रपदस्य प्रातिपदिकार्थ निर्दिशति- ***अस्येति*।।** सङ्कोचकरणाभावात्प्रत्यक्षादिसन्निधापितं समस्तं गृह्यत इत्यर्थ:। *ननु* जन्मादीनां जगतश्च क: संबन्ध:? इत्यपेक्षायां सर्व एव संबन्ध: संभवतीत्याह- ***षष्ठीति*।।** *ननु*-जन्मादि लक्ष्यसंबन्धितया लक्षणं न भवति; जगदाश्रयत्वात्तेषाम्, इत्याशङ्क्य, कारणसबन्धित्वाद् लक्षणमित्याह- ***यत इति*।।** प्रकृतौ पञ्चमीविधानाद् "यत:" इति प्रकृतिग्रहणमिति भाव:। *ननु* प्रधान-काल-लोकपाल-यदृच्छा-स्वभावादिषु जगत्कारणेषु संभाव्यमानेषु जगज्जन्माकारणं ब्रह्मेति कथं संभाव्यते, इत्याशङ्क्य जगत्कारणत्वमुपलक्षणमुपपादयन् स्वरूपलक्षणं कथयति- ***अस्य जगत इति*।।** कार्यप्रपञ्चस्य बाह्याभ्यन्तरादिभेदेनानेकधा विकल्पितत्वात् श्रुतिसिद्धं स्वसिद्धान्तं द्वैराश्यं कृत्वाऽऽह- ***नाम-रूपाभ्यामिति*।।** इत्थंभावे तृतीया। घटादौ स्वनामरूपगर्भ विकल्पपूर्विका व्याक्रिया स्वसंवेद्या; अतो जगत्कार्यस्यापि तथाभावादचेतनाभावकर्तृकत्वं न संभवतीति भाव:। तर्हि चेतना भावरूपाश्च ग्रहा लोकपाला अन्येऽपि वा जीवा नाम-रूपे बुद्धावालिख्य जगज्जनयिष्यन्ति, किं ब्रह्मणेति? अत आह ***अनेककर्तृ-भोक्तृ-संयुक्तस्येति*।।** केचित्कर्तारोऽपि सूदर्त्विगादयो न भोक्तार:। केचिद्भोक्तारोऽपि श्रोत्रिया श्राद्धादौ, वैश्वानरीयेष्ट्यादौ च पुत्रादयो न कर्तार:; तस्मादुभयग्रहणम्। तदेवं कर्तृत्व-भोक्तृत्वमपि नाम-रूपात्मकत्वात् कार्यप्रपञ्चान्तर्गतमिति जीवकर्तृकत्वमपि निरस्तम्। व्यवहितफलत्वात् कर्मफलस्यैश्वर्यप्रदातृतानुमानात् कर्मफलात्मकं जन्म नाकस्मिकम्, नवा स्वभावस्य कर्तृत्वमित्याह- ***प्रतिनियतेति*।।** प्रतिनियतानि देश-काल निमित्तानि यस्य क्रियाफलस्य तदाश्रयस्य। तथाहि-*प्रतिनियतो देश: स्वर्गफलस्य कर्मणो मेरुपृष्ठम्, ग्रामादिफलस्य भूमण्डलम्। *कालोऽपि* स्वर्गफलस्य देहपातादूर्ध्वम्, पुत्रफलस्य बालभावात्। *प्रतिनियतं निमित्तम्-उत्तरायणादिमरणं स्वर्गादिफलस्य। *अथवा*-देश-काल-निमित्त-क्रिया-फलानीतीतरेतरद्वन्द्व:। देशादीनि च तानि

प्रतिनियतानि च, तानि देशादीनि च विग्रह:; तदाश्रयो जगत्, तस्य। तथाहि- *प्रतिनियतदेशजन्मान:* कृष्णमृगादय:; *प्रतिनियतकालोत्पादा:* कोलिकारावादय:; *प्रतिनियतनिमित्ता:* नवाम्बुदनादसंभवा बलाकागर्भवत्त्वादय:; *प्रतिनियतक्रिया:* ब्राह्मणानां याजनादय:; *प्रतिनियतफलम्* ब्रह्मलोके सुखम्, नरके दु:खमिति। तदित्थंरूपस्य जगत आकस्मिकत्वं स्वाभाविकत्वं वा जीवकर्तृकत्वं वा न युक्तमिति भाव:।। विचित्रकार्यत्वाच्च जगतो विशिष्टविज्ञानवत्कर्तृकत्वं चित्रादिवदनुमातुं शक्यमित्याह- ***मनसाऽपीति*।।** एकस्यापि शरीरस्य रचनायां विविधसिराजालांदिसन्निवेशविशिष्टतया रूपं मनसा न शक्यं चिन्तयितुम् , दूरे जगद्रचनाया:; तत्कथमसर्वज्ञ: कुर्यादित्यर्थ:। ''सर्वज्ञादि'' त्यादिना स्वरूपलक्षणमाह। सूत्रवाक्यं पूरयति' ***तद्ब्रह्मेति*।।** *ननु* अन्येऽपि परिणामादयो भावविकारा: सन्ति, ते किमित्यादिग्रहणेन न गृह्यन्त इति! अत्राह- ***अन्येषामपीति*।।** वस्त्ववस्थाविशेषानामपि जन्मादिव्यतिरेकानिरूपणानां त्रिष्वेवान्तर्भाव इत्यर्थ:।। यद्यपि वृद्ध्यादयो जन्मादिषु नान्तर्भवन्ति; तथाऽपि जन्म-स्थिति-भङ्गमेवोपादातव्यम्, तथा सति तत्प्रतिपादके ''यतो वा इमानि भूतानि'' इति वेदान्तवाक्ये बुद्धिस्थे कृते, जगज्जन्म-स्थिति-भङ्गकारणतया ब्रह्म लक्षितं भवति; अन्यथा तु 'जायते' इत्यादीनां ग्रहणे निरुक्तवाक्यमेव बुद्धिस्थं भवेत्। तच्च न मूलकारणप्रतिपादनपरम्; महाभूतसर्गादूर्ध्वं स्थितिकाले तद्वाक्योक्तानां ''जायतेऽस्ती'' त्यादीनाम् भावविकाराणामुपपत्ते:। अत उक्तशङ्कानिराकरणार्थं वेदोक्तानां जन्मादीनामेव ग्रहणमित्याह- ***यास्केति*।।** अथवा-पौरुषेयवाक्यस्य मूलप्रमाणापेक्षत्वात्, अनुमानादेस्तन्मूलत्वेनास्यास्माकमपि प्रवृत्तेस्तद्वाक्यानपेक्षणात्, प्रत्यक्षमूलताङ्गीकारे भौतिकधर्मविकाराणामेव प्रत्यक्षेणावगन्तुं शक्यत्वात्, आकाशादिमहाभूतस्य समस्तस्य ब्रह्मकर्तृकस्य प्रत्यक्षेण श्रुतिं विना ग्रहीतुमशक्यत्वात्, भौतिकविकारकारणे माहभूतपञ्चक एव ब्रह्मबुद्धि: स्यात्; अत: श्रुतिनिर्दिष्टा एव जन्मादयो गृह्यन्त इत्याह- ***यास्केति*।।** *ननु* एवमप्युत्पत्तिरेव सूच्यताम्, तन्नान्तरीयकतया तत्स्थिति-भङ्गं ज्ञास्यत इत्यत आह- *योत्पत्तिरित्यादि*।। उत्पत्तिमात्रं निमित्तकारणादपि संभवति, ततस्त्रिभिरस्योपादानत्वं सूच्यते; अनुपादाने स्थिति-लयासंभवादिति भाव:। कारणत्वे या युक्तिरनेन सूत्रेण सूत्रिता, तामाह- *ननु यथोक्तेति*।। ''नाम-रूपाभ्यां व्याकृतस्ये'' त्याद्यभिहितविशेषणचतुष्टयस्येत्यर्थ:। ***यथोक्तविशेषणमिति*।।** सर्वज्ञं सर्वशक्तिकमित्यर्थ:। ***प्रधानादिति*।।** सर्वे विकारा:, सुख-दु:ख-मोहसामान्यप्रकृतिका:, तदन्वितस्वभावत्वात्; ये विकारा यदन्वितस्वभावास्ते तत्प्रकृतिका दृष्टा:, यथा मार्तिका: शरावादय:। *तथा*-सर्वे विकारा:, अविभक्तैकप्रकृतिका:, परिमितत्वात्, अनेकत्वात्, विकारत्वाच्च; शरावादिवदिति सांख्या:-प्रधानमनुमिमते। *अणुवादिनश्च* सर्वं कार्यं द्रव्यम्, स्वपरिमाणादणुतरपरिमाण-संयोगसचिव-समानजातीयानेकद्रव्यारब्धम्, कार्यद्रव्यत्वात्; घटादिवदिति, निरवयवपरमाणुपर्यन्तमनुमानप्रवृत्ते: परमाणवो मूलकारणमिति- *कल्पयन्ति*।। *शून्यवादिनश्च*-सर्वं कार्यम्, अभावपुरस्सरम्, योग्यत्वे सत्यनुपलभ्यमानपूर्वावस्थत्वात्; यदेवं न भवति, न तदेवम्, यथा

परकल्पित आत्मेति- *मन्यन्ते*।। *योगिनश्च*-हिरण्यगर्भं संसारिणमागमसामर्थ्याद् जगत्कारणम्-कल्पयन्ति, तान् व्यावर्तयति- ***संभावयितुमिति***।। अयं भावः-अन्तर्बहिर्भावभेदेन सुख-दुःख-मोहानां घटादिविकाराणां च प्रत्यक्षेण भेदग्रहणादेरेकपदार्थोपलम्भे चैकस्यैव सुखाद्यात्मत्वेन युगपद् ग्रहणप्रसङ्गात्, अदृष्टेन च वस्तुसामर्थ्यनियमायोगादसिद्धः सांख्यानां हेतुः, अनैकान्तिकश्च; शौक्ल्यादिगुणैर्घटादीनां परापरसामान्यैश्च द्रव्याणामप्रकृतिभिरप्यनुमानात्। परिमितत्वस्य च न हेतुत्वम्; वस्तुतः परिमितत्वाङ्गीकारे पुरुषेष्वनेकान्तः। देश-कालाभ्यां परिमितत्वाङ्गीकारे च करकादिषु प्रत्यक्षदृष्टभिन्नप्रकृतिष्वनेकान्तः। अनेकत्वहेतुश्च पुरुषेष्वनेकान्तः। अथानेकत्वसंख्यागुणत्वं हेतुः, अथापि सत्त्वाभावेऽनेकान्तः। विकारत्वहेतुरपि घट-करकादिष्वनेकान्तः। अणुवादिनोऽपि दीर्घविस्तीर्णोर्णादुकूलैः क्रियमाणरज्जुद्रव्यस्य भास्वरस्यापि कार्यत्वदर्शनादनेकान्तो हेतुः। शून्यवादिनोऽपि घटस्य पूर्वावस्था स्यात् ''प्रत्यक्षोपलब्धे''त्यसिद्धो हेतुः। आगमस्तु हैरण्यगर्भादीनां वेदविरोधादप्रमाणमिति स्वभाववादिमतं व्यावर्तयति- ***न च स्वभावत इति***।। अयं भावः-स्वभावादुत्पद्यत इति किं स्वयमेव स्वस्य निमित्तमित्युच्यते? किं वा निर्निमित्तमुत्पद्यत इति? आद्ये आत्माश्रयता, द्वितीये पटस्य भावाभावौ निर्निमित्तत्वाविशेषाद् युगपत् स्याताम्। स्वतस्सिद्धसामर्थ्यानां च भावानां परस्परोपकार्योपकारकभावस्य प्रत्यक्षसिद्धत्वादन्यनिरपेक्षस्वभावस्य न कारणत्वमिति। तदनेन प्रबन्धेन जगत्कारणे ब्रह्मणि संभावना, उत्तरत्र प्रमाणमुक्तम्। यथाहुः-

''संभवितः प्रतिज्ञायां पक्षः साध्येत हेतुना। न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हतः''।। इति।।

इदानीमिममेव संभावनाहेतुमन्येऽनुमानरूपतया निश्चयहेतुं मन्यन्त इति संभावनाहेतुतां दर्शयितुमाह- ***एतदेवेति***।। येयं युक्तिरभिहिता, ''न यथोक्तविशेषणस्ये''त्यादि, एतदेव स्वतन्त्रमनुमानम्, जगत्कारणपरवेदवाक्यानि च परमार्थानुमानसमानीति मन्यन्ते, तदनुपपन्नम्; संभावनामात्रबुद्धिहेतुत्वाद् निश्चायकत्वानुपपत्तेः। ''उदाहरणदर्शनं युक्तिः, अव्यभिचारिणी च व्याप्तिरनुमानमिति विभागात्, अत्र च व्याप्तेरभावादिति भावः।।

ननु- सूत्रेऽप्यनुमानमेवोपन्यस्तम् तत्कथमाह-मानानुगुणभूतेयं युक्तिः? इति चोदयति- ***नन्विहापीति***।।

परिहरति- ***न वेदान्तेति***।। विचारस्याध्यवसानं नाम शब्दज्ञानानुसारिभिर्न्यायैर्ब्रह्मणि वेदान्तानां तात्पर्यनिश्चयः, **तन्निर्वृत्ता ब्रह्मावगतिः**, ब्रह्मसाक्षात्कार इत्यर्थः। *एतदुक्तं भवति*-अनुमानमात्रात् कारणसद्भावमात्रं सिध्यति, नतु सत्यज्ञानादिलक्षणं ब्रह्म; न च कारणस्यैकत्वम्। तदवगतिश्चेह विवक्षिता नागमं विना सिध्यतीति।।

ननु-तर्हि शब्दादेव ब्रह्मावगतेर्मननविधानं युक्तिसूत्रं वाऽनर्थकं स्यादित्यत आह- ***सत्स्विति***।। **श्रुत्यैव तर्कस्य स्वसहायत्वेन स्वीकृतत्वात्**।। तथाहि-कुतः तर्कोऽपेक्ष्यते? इत्यत्राह- ***श्रोतव्य इति***।।

आत्मनः=स्वस्या इत्यर्थः। युक्तिसाहाय्यापेक्षणे करणमाह- ***न धर्मजिज्ञासामिवेति***॥ ''श्रुत्यादयः'' इत्यादिग्रहणेन लिङ्ग-वाक्य-प्रकरणस्थान-समाख्या गृह्यन्ते। श्रुतिः=पदान्तरनिरपेक्षः शब्दः। लिङ्गम्=श्रुतस्यार्थान्तराविनाभावः। अन्यान्याकाङ्क्षे सन्निधियोग्यतावन्ति पदानि वाक्यम्। वाक्यद्वयसामर्थ्यमारभ्याधीतविषयं प्रकरणम्। क्रमवर्तिनां पदार्थानां क्रमवर्तिभिः पदार्थैर्यथाक्रमं संबन्धः=स्थानम्। संज्ञासाम्यम्=समाख्या॥

अपरे तु ''श्रुत्यादयः'' इति श्रुतीतिहास-पुराण-स्मृतयो गृह्यन्त इत्याचक्षते। अनुभवोऽन्तःकरणवृत्तिभेदो ब्रह्मसाक्षात्कारः फलतः, तत्र हेतुमाह- ***अनुभवावसानत्वादिति***॥ अनुभवं विनाऽकाङ्क्षाया अनिवृत्तेरित्यर्थः। नचैतदशक्यानुष्ठानविषयमित्याह- ***भूतवस्तुविषयत्वादिति***॥ *ननु* -अनुभवनिरपेक्षफलपर्यन्तज्ञानजनकत्वदर्शनात् कर्मवाक्यानाम्, ब्रह्मवाक्यानामपि तथाभूतज्ञानजनकत्वम्; वेदप्रमाणत्वाविशेषात् स्यात्, इत्याशङ्क्य विशेषमाह- ***कर्तव्ये हीति***॥ धर्मस्याननुभवोऽयोग्यत्वात् तदनुष्ठानस्य च विनाप्यनुभवं शाब्दज्ञानमात्रादेव सिद्धेर्नास्त्यनुभवापेक्षेति भावः। अनवस्थितस्वभावत्वाच्चानुभवायोग्यं कर्मेत्याह- ***पुरुषाधीनेति***॥ पुरुषाधीनत्वमेव लौकिक-वैदिककर्मणामाह- *कर्तुमकर्तुमिति*॥ तत्र लौकिकमुदाहरति- ***यथाऽश्वेनेति***॥ लौकिकेनोदाहरणेन सह वैदिकमुदाहरणं समुच्चिनोति- ***तथाऽतिरात्र इति***॥ ''कर्तुमकर्तुमि''त्यस्योदाहरणमुक्तम्। कर्तुमन्यथा वा कर्तुमित्यस्योदाहरणमाह- ***उदित इति***॥ अयं व्यवस्थितविकल्पः। व्रीहिभिर्वा यवैर्वेतीच्छाविकल्पः। अस्त्वेवं धर्मसाम्यं ब्रह्मण इति, नेत्याह- *न त्विति*॥ *ननु*-दृश्यन्ते वस्तुन्यपि विकल्पा इति, तत्राह- ***विकल्पना इति***॥ *ननु*-साम्यग्ज्ञानाधीनत्वाद्वस्तुनः, तस्य च पुरुषाधीनत्वाद् वस्त्वपि पुरुषाधीनमिति, नेत्याह- ***न वस्त्विति***॥

तदेव दृष्टान्तेन प्रपञ्चयति- ***नहीति***॥ उक्तन्यायं सर्वत्र प्रसारयति- *एवमिति*॥ दार्ष्टान्तिकं निगमयति- ***तत्रेति***॥ अतोऽनुभवापेक्षा, युक्त्यनुप्रवेशश्च सिद्ध इति भावः। कथं न प्रत्यक्षगम्यमिति? अत्राह- ***इन्द्रियेति***॥ नानुमानादिगम्यतेत्याह- *संबन्धेति*॥ तत् प्रपञ्चयति- ***स्वभावत इति***॥ मा भूदेवं प्रत्यक्षता, अनुमेयता तु किं न स्यादिति? अत आह- *सति हीति*॥ *ननु*-किं ब्रह्मसंबन्धमिदं कार्यमिति ग्रहणेन? कार्यमेव परिदृश्यमानं ब्रह्मावगमयिष्यतीति, नेत्याह- ***कार्यमात्रमिति***॥

''**भृगुर्वै वारुणिरिति***॥ यद्यपि ''भृगुर्वै वारुणिरि''ति वाक्यं पूर्वसूत्रस्यैवोदाहरणम्; तथाप्येतत्सूत्रोदाहरणवाक्यादौ पाठादत्रैवोदाहरत्। ''इत्युपक्रम्याहे''ति च पृथक् कुर्वतैतदेव सूचितम्। ब्रह्मस्वरूपलक्षणपरं वाक्यमाह- ***तस्य चेति***॥

एवमन्यत्रापि जगत्कारणानुवादेन सर्वज्ञमानन्दरूपं ब्रह्म प्रतिपाद्यत इत्याह- ***अन्यान्यपीति***॥

इति भाष्यभावप्रकाशिकायां जन्माद्यधिकरणं समाप्तम्॥

श्रीकण्ठ भाष्य

इहोद्दिष्टस्य ब्रह्मणो यन्निश्चायकं तल्लक्षणं किमित्याकाङ्क्षायां तल्लक्षणाभिधायकं द्वितीयाधिकरणमवतारयति भगवान्सूत्रकारः-

॥ जन्माद्यस्य यतः ॥२॥

ज्ञाते लक्ष्ये लक्षणवैयर्थ्यादज्ञाते तदाकाङ्क्षानुपपत्तेः कथमत्र ब्रह्मणो लक्षणकथनप्रसङ्ग इति न शङ्कनीयम्। अध्यायनादापाततो ज्ञाते ब्रह्मणि तद्योगात्। जन्मादि अस्य यतः सूत्रपदच्छेदः। जन्मादिकं जन्मस्थितिप्रलयतिरोभावानुग्रहरूपं कृत्यमस्य चेतनाचेतनसम्मेलनसमरसीभूतस्य प्रपञ्चविलासस्य यतो यस्मात्तद्ब्रह्मे ति शेषः। ''यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मे'' ति। ''प्रधानक्षेत्रज्ञपतिर्गुणेशस्संसारमोक्षस्थितिबन्धहेतुः।'' ''सत्यं ज्ञानमनन्तं ब्रह्म'' ''ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः॥'' इत्यादिवाक्यं विषयः। अत्र जगतो जन्मादिकं ब्रह्मणो लक्षणतया सम्भवति न वेति सन्देहः। न सम्भवति सम्बन्धाभावात्। किं च 'आनन्दो ब्रह्मेति व्यजानादि'त्यत्रानन्दस्य जगज्जन्मादि लक्षणं पर्यवस्यति। अन्यत्र 'सदेव सौम्येदमग्र आसीदि' ति सतो जगत्कारणत्वमवगम्यते। सत्यं ज्ञानमनन्तं ब्रह्मे' ति ज्ञानमेवापरिच्छिन्नं जगत्कारणं ब्रह्मेत्येकत्र विज्ञायते। अपरत्र च 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवल'इति शिवशब्दवाच्यं वस्तु कारणत्वेन सकलपूर्वभावि ब्रह्मेति विज्ञायते। अत्रानन्दादीनां ब्रह्मत्वे विकल्पो वा समुच्चयो वा विकल्पे श्रुतहान्यादिदोषप्रसङ्गोऽव्यवस्था च। व्यवस्थितिविकल्पेऽपि ब्रह्मानेकत्वप्रसङ्गः। समुच्चयपक्षे तेषां धर्मरूपत्वान्निखिलजगन्निर्माणोपायज्ञानविशेषविशिष्टब्रह्मत्वासम्भवः। अपि च 'मायां तु प्रकृतिं विद्या' दितिश्रुतिर्मायाया अचेतनाय जगत्कारणत्वमभिधत्ते तदेव युक्तम्। ब्रह्मणो ज्ञानरूपस्य जगत्कारणत्वे तस्य विकारापत्त्या 'निष्कलं शान्त' मित्यादिश्रुतिभङ्गप्रसङ्गः। अतस्सर्वथाऽपि ब्रह्मणो जगत्कारणत्वादि लक्षणमभिधातुमशक्यमित्येवमादौ पूर्वपक्षविक्षेपे प्राप्ते ब्रूमः। यद्यपि जन्मादेर्जगन्निष्ठत्वेन ब्रह्मण्यसम्बन्धः। तथापि ताटस्थ्येन लक्षणत्वं युज्यते। यत् सर्वज्ञत्वादिविशिष्टमष्टाभिधानाधिकरणं शिवतत्त्वं तदेव जगत्कारणं ब्रह्मेत्युच्यते। आनन्दादीनामत्रैव धर्माणां पर्यवसानं भवति। सर्वज्ञत्वं नित्यत्प्तत्वमनादिबोधत्वस्वतन्त्रत्वमलुप्तशक्तिमत्त्वमनन्तशक्तिमत्त्वं चेत्येतानि सर्वज्ञत्वादीनि। नित्यापरोक्षानपेक्षितबाह्यकरणनिष्कलङ्कानुभवविषयनिखिलवस्तुत्वमिह सर्वज्ञत्वम्। 'यस्सर्वज्ञस्सर्वविधस्य ज्ञानमयं तप' इत्यादिभिरिदं ब्रह्मणस्सिद्धम्। अनेन सकलचेतनबहुविधकर्मफलभोगानुकूल-तत्तच्छरीरनिर्माणोपायसामग्रीविशेषज्ञं ब्रह्म निमित्तं भवति। निरस्तसमस्तोपप्लवकलङ्कनिरतिश-यानन्दपरिपूर्णत्वमिह नित्यतृप्तत्वम्। अत एव 'आनन्दो ब्रह्मे' ति । यः खलु 'अन्योन्यतर आत्माऽऽनन्दमय'

इति प्रस्तुत्य 'सैषानन्दस्य मीमांसा भवती' त्यारभ्य अभ्यासान्निरतिशयानन्दशिरस्कत्वेन 'स एको ब्रह्मण आनन्द' इति निरूपितः। परब्रह्मधर्मत्वेन च स एव 'आनन्दो ब्रह्मे'-ति प्रचुरत्वाद्ब्रह्मत्वेनोपचर्यते। तादृशानन्दभोगरसिकं ब्रह्म नित्यतृप्तमित्युच्यते। ब्रह्मणो मनसैव महानन्दानुभवो, न बाह्यकरणद्वारा। तथा हि श्रुतिः 'आकाशशरीरं ब्रह्म। सत्यात्मप्राणारामं मन आनन्दम्। शान्तिसमृद्धममृतम्' इति। आकाशत इत्याकाशः प्रकाशश्चिदम्बरमुच्यते। न भूताकाशः विशेषाभावत्। निखिलजगदण्डषण्डबुद्बुदनिकुरुम्ब-जलधिस्थानीया परप्रकृतिरूपा परमशक्तिर्हि चिदम्बरमुच्यते। तत्स्वरूपं ब्रह्म आकाशशरीरम्। परप्रकृतित्वं चिदाकाशस्य 'सर्वाणि ह वा इमानि श्रुतानि आकाशादेव समुत्पद्यन्ते। आकाशं प्रत्यस्तं यन्ति। आकाशो ह वै नामरूपयोर्निर्वहिता' इत्यादिश्रुतिद्धिम्। सत्यात्म सत्तारूपम्। प्राणारामं यस्य तत्प्राणारामम्। मनआनन्दं मनस्येवानन्दो यस्य न बाह्यकरणे तन्मनआनन्दम्। अत्राप्यानन्द इति चिदंबरप्रकृतिरुच्यते। तथा च श्रूयते 'कोह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनन्दो न स्या' दिति। शान्तिसमृद्धं शिवतासम्पन्नम्। अमृतमनादिमुक्तम्। अत्र सच्चिदानन्दरूपपरमाकाशरूपं ब्रह्म स्वरूपानन्दं मनसैवानुभवति बाह्यकरणनिरपेक्षमिति सिद्धं 'मनआनन्द' मित्यनेन। इदमेव ज्ञापकं ब्रह्मभावमापन्नानां मुक्तानां निरतिशयस्वरूपानन्दानुभवसाधनं बाह्यकरणनिरपेक्षमन्तःकरणमस्तीति। अतो बाह्यकरणनिरपेक्षेण शुद्धबोधशक्तिरूपेण मनसा स्वरूपानन्दमनन्तमनुभवद्ब्रह्म नित्यतृप्तम्। न तस्य कदापि बाह्यसांसारिकसुखलवापेक्षा भवतीत्यर्थः। तस्सिद्धनिरतिशयज्ञानवत्त्वमनादिबोधत्वम्। यस्वरूपानन्दानुभवसाधनमन्तःकरणं ज्ञानं तदनादिसिद्धमेव। अतोऽनादिबोधं ब्रह्म संसारनिवर्तकस्य ज्ञानस्यानादिसिद्धत्वान्नित्यनिवृत्तसंसारदोषं 'शान्तिसमृद्धममृत' मिति श्रूयते। अन्यप्रेष्यताकार्पण्यरहितत्वेन स्ववशीकृतस्वेतरसकलवस्तुत्वं स्वातन्त्र्यम्। 'ज्ञाज्ञौ द्वावजावीशानीशौ। भोक्ता भोज्यं प्रेरितारं च मत्वा।' विद्याविद्ये ईशते यस्तु सोऽन्य' इत्यादिषु ब्रह्मणो जडाजडप्रपञ्चप्रेरकत्वेन स्वतन्त्रत्त्वं सिद्धम्। सर्वविषयस्वातन्त्र्येण ब्रह्मणस्सर्वकर्तृत्वसिद्धिः। स्वाभविकशक्तिमत्त्वमलुप्तशक्तिमत्त्वम्। तथा हि श्रवणं 'पराऽस्य शक्तिर्द्विविधैव श्रूयते। ब्रह्मणस्सर्वकर्तृत्वसिद्धिः। स्वाभाविकी ज्ञानबलक्रिया चे'त्यादि। चिदचित्प्रपञ्चरूपशक्तिविशिष्टत्वं स्वाभाविकमेव ब्रह्मणः कदाचिदपि न निर्विशेषत्वमित्यनेन सिद्धम्। अपरिच्छिन्नशक्तिविशिष्टत्वमनन्तशक्तिमत्त्वम्। अनन्ताभिरेव शक्तिभिर्जगतो जनकं शासकं च ब्रह्म भवति। तथा हि श्रूयते 'एक एव रुद्रो न द्वितीयाय तस्थुः।' तुरीयमियं लोकमीशत ईशनीयुर्जननीयुर्यस्सर्वांल्लोकानीशत ईशनीभिर्जननीभिः परमशक्तिभि' रित्यादि। अनन्तशक्तिमत्त्वाद्ब्रह्मणोऽपरिच्छिन्नप्रपञ्चसमवायिकारणत्वं सिद्ध्यति। अष्टाभिधानाधिकरणमिति भवशर्वेशानपशुपतिरुद्रोग्रभीममहादेवाभिधानाष्टकस्याधिकरणं वाच्यं परं ब्रह्म। अस्य सकलशब्दवाच्यत्वेऽपि परभावबोधकत्वेन मुख्यतया भवादिशब्दाभिधेयत्वेन नान्यशब्दाभिधेयत्वाभावप्रसङ्गः। सर्वत्र सदा भवतीति भवशब्दवाच्यं ब्रह्म।

भूधातोस्सत्तार्थकत्वात्सर्वत्रानुवर्तमानं सद्रूपं ब्रह्मेति विज्ञायते। तथा हि श्रुतिः'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'सत्यात्मप्राणारामं मन आनन्दं' 'सन्मह' इत्यादि। 'सन्घटः' 'सन्पट' इति सर्ववस्तुष्वनुगतवृत्त्या सद्रूपस्य ब्रह्मणस्सर्वोपादानत्वं सिद्ध्यति। मृदुपरक्तं हि घटादिकं मृदुपादानकमिष्यते। ततस्सद्रूपं ब्रह्म भवशब्दवाच्यं भवति। शर्वशब्देन 'शृहिंसाया' मिति धात्वर्थवशात् सकलसंहर्तृ ब्रह्म प्रतिपाद्यते। 'तस्मादुपसंहर्त्रे महाग्रासाय वै नमः' 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः' इति सर्वसंहर्तृ ब्रह्म श्रूयते। निरुपाधिकपरमर्यविशिष्टत्वादीशानशब्दवाच्यं ब्रह्म 'य इमाँल्लोकानीशत ईशानीभि'रिति श्रवणात्। **ईश्वरस्येशि** तव्यापेक्षतया पशुपतिशब्दवाच्यं ब्रह्म। तथा हि श्रूयते 'एषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदा' मित्यादि। पाशसम्बन्धेन पशुत्वव्यवहारात् पशुग्रहणात्पशुपाशद्वयं च गृहीतं भवति। अनेन चिदचिन्नियामकं ब्रह्मेति विज्ञायते। संसाररुग्द्रावकत्वाद्रुदशब्दवाच्यं ब्रह्म। 'तरति शोकमात्मवि'दिति श्रवणात्। परतेजोभिरनभिभवनीयत्वादुग्रशब्दवाच्यत्वं ब्रह्मणः। 'न तत्र सूर्यो भाति न चन्द्रतारक' मिति श्रवणात्। नियामकत्वेन निखिलचेतनभयहेतुतयाभीमशब्दाभिधेयं ब्रह्म। 'भीषास्माद्वातः पवत' इत्यादिश्रुतेः। महत्त्वेन दीव्यमानतया महादेव इत्युच्यते शिवः। तथाऽथर्वशिरसि। 'अथ कस्मादुच्यते महादेवः यस्सर्वान्भावान्परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेव' इति। निरस्तसमस्तसंसारकलङ्कतया निखिलमङ्गलाधारतया शिवतत्त्वं यदवगम्यते तदुक्तस्भावतया सकलजगज्जन्मादिकारणं भवति। तत्र तादृशमहिम्नि जगदुभयकारणत्वसम्भवात्। तदेतादृशमहत्त्वाद्ब्रह्मेत्युच्यते। तदेव शिवशब्दवाच्यमानन्दादिधर्माश्रयतया सिद्धम्। अत आनन्दीनां विकल्पादिचिन्तानिरर्थिका। 'मायां तु प्रकृतिं विद्या'दिति मायायाः प्रकृतित्वमीश्वरात्मिकाया एव 'मायिनं तु महेश्वर' मिति वाक्यशेषात्। सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणं स्थूलचिदचिद्विशिष्टं तत्कार्यं भवति। अतो जगज्जन्मादिलक्षणं ब्रह्मेति सिद्धान्तः ॥ इति जन्माद्यधिकरणम् ॥ २ ॥

श्रीशिवार्कमणिदीपिका

सङ्गतिं प्रदर्शयन्नुत्तराधिकरणमवतारयति-**इहेति।** पूर्वाधिकरणे ब्रह्मणस्सर्वात्मना परिच्छेद्यत्वासम्भवेऽपि लक्षणमुखेनेतरव्यावृत्ततया परिच्छेद्यत्वं सम्भवतीत्युक्तवतस्सिद्धान्ति-नस्तत्परिच्छेदकत्वेनाभिमतं यल्लक्षणं तन्न सम्भवतीत्यर्थकेन 'ब्रह्मणो यन्निश्चायकं तल्लक्षणं कि' मित्यनेनाक्षेपिकी पूर्वाधिकरणसङ्गतिर्दर्शिता। उद्दिष्टस्येति ब्रह्मविशेषणेनोद्देशानन्तरं लक्षणकथ- नस्यावसर इत्यवसररूपा तत्सङ्गतिर्दर्शिता। ननु, उद्देशो नाममात्रेण वस्तुसङ्कीर्तनमिति नैयायिका:। न चात्र प्रथमसूत्रे ब्रह्मणो नाममात्रेण सङ्कीर्तनम्। किन्तु तस्य विषयत्वप्रयोजनत्वज्ञापनोपयोगि, जिज्ञासाकर्मत्वं प्रतिपादयन्त्या षष्ठ्यापि परामर्शोऽस्ति। अतो न ब्रह्मण उद्दिष्टत्वोक्तिर्युक्तेति चेन्न। लुप्तषष्ठ्यर्थस्यापि नाम्नैव लक्षणीयतया नामातिरिक्तेनात्र ब्रह्मसङ्कीर्तनाभावेन 'नाममात्रेण सङ्कीर्तन' मित्युद्देशलक्षणस्याक्षतेः। नैयायिकानामेव तु 'प्रमाणप्रमेये'त्यादिसूत्रे प्रमाणादीनामुद्दिष्टत्वव्यवहारो न सङ्गच्छते। तेषां निःश्रेयसहेतुज्ञानकर्मत्वेन श्रूयमाणषष्ठ्या प्रतिपादनात्। यदि तु 'नाममात्रेणे' ति मात्रपदेन नञिवयुक्तन्यायसाम्यात् नामसदृशेन प्रातिपदिकान्तरेण सङ्कीर्तनं व्यवच्छिद्यते तावतापि 'प्रमाकरणं प्रमाण' मित्यादिलक्षणवाक्यान्तर्गतप्रमाणादिनाम्ना सङ्कीर्तने उद्देशलक्षणातिव्याप्तिनिवर्तनस्य फलस्य सिद्धेरित्युच्येत तदा 'ब्रह्मजिज्ञासे' त्यत्र लुप्तषष्ठ्येव स्मृता स्वार्थं प्रपिादयतीति पक्षावलम्बनेऽपि ब्रह्मणो नोद्दिष्टत्वहानिः। अथ मात्रपदेन न नामातिरिक्तशब्दमात्रस्य नापि प्रातिपदिकरूपस्य व्यवच्छेदो विवक्षितः। किं त्वर्थगत्या ज्ञानविषयत्वातिरिक्तधर्मवैशिष्ट्यसमर्पकशब्दस्येति प्रमाणादीनामेवोद्दिष्टत्वं सिद्ध्यति न ब्रह्मण इति चेन्न। विनिगमनाविरहणेच्छाविषयत्वातिरिक्तधर्मवैशिष्ट्यसमर्पकशब्दव्यवच्छेदस्तेन विवक्षित इति ब्रह्मण एवोद्दिष्टत्वं लभ्यते न प्रमाणादीनामिति वैपरीत्यस्यापि वक्तुं शक्यत्वात्। लाघवानुसरणे तु ज्ञानेच्छासाधारण्येन विषयत्वातिरिक्तेत्येव निवेशयितु युक्तम्। ब्रह्मजिज्ञासे' त्यत्रेष्यमाणज्ञानविषयत्वस्यैव ब्रह्मण्यन्वय इत्यङ्गीकारे तु ज्ञानविषयत्वनिवेशेऽपि 'ब्रह्मण उद्दिष्टत्वलाभस्य न क्षतिः। वस्तुतो विषयत्वस्य ज्ञानविषयत्वस्य वा निवेशने 'यदर्थमधिकृत्य प्रवर्तते तत्प्रयोजनं' लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः' 'यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरण-सिद्धान्त 'इत्यादिलक्षणसूत्रगतस्य नाम्ना लक्ष्यनिर्देशस्योद्देशत्वापत्तेस्तदुभयमपि न निवेशयितुं युक्तम्। अथैवं कल्प्यते 'नाममात्रेणे' त्यत्र न करणे तृतीया किं त्वित्थंभावे। तथा च नाम्नैव प्रकारेण यद्वस्तुनः सङ्कीर्तनं न तु नामसमर्पितप्रवृत्तिनिमित्तेन प्रकारेण तदुद्देश इति लक्षणार्थः। प्रवृत्तिनिमित्तमपहाय नाममात्रविशेषितवस्तुप्रतिपत्त्यर्थस्योद्देशस्य प्रयोजनाकाङ्क्षायां तदर्थविशेषानभिज्ञतया तद्व्यवहाररहितस्य श्रोतुस्तद्व्यवहारसिद्ध्यर्थं लक्षणाभिधित्सया तज्जिज्ञासोत्पादनस्य प्रयोजनत्वावगत्या लक्षणजिज्ञासाजननोद्देश्यकं नामविशेषितपदार्थाभिधानमुद्देश इति लक्षणार्थः पर्यवस्यति। एवं च गौतमीयेषु

'सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् सव्यभिचारविरुद्धप्रकरणसमसाध्य-समातीतकाला हेत्वाभासा:' इत्यादिषूद्देशसूत्रेषु सर्वतन्त्रादिनामभिस्तत्तन्नामका: केचित्सिद्धान्तविशेषादय इत्येव श्रोतु: प्रतिपत्ति:। 'सर्वतन्त्राविरुद्ध: स्वतंन्त्राधिकृतोऽर्थ: सर्वतन्त्रसिद्धान्त:'। 'समानतन्त्रासिद्ध: प्रतितन्त्रसिद्ध: प्रतितन्त्रसिद्धान्त' इत्यादिलक्षणसूत्रश्रवणानन्तरमेवायमेवंलक्षणलक्षित: सिद्धान्त विशेष: सर्वतन्त्रसिद्धान्त इत्यादिव्युत्पत्तिग्रहपूर्वकं तेन तेन शब्देन व्यवहार: प्रवर्तते। 'प्रमाणप्रमेये' त्यादिसूत्रेऽपि प्रमाणादिशब्दैर्न प्रसिद्धार्थस्य ग्रहणमस्ति। प्रमाणशब्दे ल्युट्प्रत्ययस्य कारणाधिकरणाद्यनेकार्थसाधारण्येन प्रसिद्धार्थ स्यैवाव्यवस्थितत्वात् करणार्थेऽप्यालोकादिसाधारण्येन चक्षुरादीनामेव प्रमाणतया ग्रहणालाभात् प्रमेयादिशब्दानामपि प्रमाविषयाद्यर्थकानामात्मशरीरादिषु द्वादशसु व्यवस्थित्यभावाच्च। अतो गौतमीयेषूद्देशेषु नामविशेषितैव सर्वत्र वस्तुन: प्रतिपत्तिरित्यस्ति लक्षणानुगति:। 'ब्रह्मजिज्ञासे' त्यत्र तु ब्रह्मणो न नामविशेषिततया प्रतिपत्ति: किं तु स्वरूपतो गुणतश्च बृहत्त्वेन प्रवृत्तिनिमित्तेन। अन्यथा प्रथमसूत्रेण ब्रह्मणो जीवान्यत्वासिद्ध्या तदधीननिर्णयस्य प्रयोजनस्य ततो निर्णयालाभात्। न च ब्रह्मलक्षणवर्णनात्प्रागेव ब्रह्मशब्दार्थावधारणे व्यवहारस्तल्लक्षणस्य प्रयोजनं न स्यादिति वाच्यम्। स्वरूपतो गुणतश्च बृहत्त्वस्य ब्रह्मशब्दप्रवृत्तिनिमित्तस्य जगत्कारणत्वस्य ब्रह्मलक्षणस्य च मन्त्रार्थवादादिभि: प्रशस्यमानेषु बहुषु देवताविशेषेषु शङ्किततया तेषां मध्ये किं ब्रह्मेत्यनवधारणप्राप्तौ लक्षणसूत्रस्य देवतान्तरेभ्यो लक्षणव्यावर्तनेनेतरव्यावृत्तशिवैकान्तिकब्रह्मत्वव्यवस्थापनार्थत्वात् तदुपजीवनेन 'ब्रह्मविदाप्नोतिपर' मित्यादिषु ब्रह्मशब्देन शिव एव ग्राह्य इत्येवं प्रकारेण व्यवहारार्थत्वाच्च। अत एव चात्र व्यावृत्तिपूर्वकमेव व्यवहारप्रयोजनसिद्धिरित्यनुनिष्पादितया व्यवहारो न प्रयोजनमित्यभिप्रेत्य प्रथमसूत्रभाष्ये ब्रह्मलक्षणेनेतरव्यावृत्तिसिद्धिर्दर्शिता। न च वाच्यमुद्देशलक्षणे मा भूत् नामविशेषितत्वविशेषणमिति। तदभावे त्रिविधास्य शास्त्रस्य प्रवृति: उद्देशो लक्षणं परीक्षा चेति शास्त्रप्रवत्तेस्त्रैविध्यसङ्कीर्तनस्याप्युद्देशत्वापत्ते:। तज्जन्यायां विधात्रयजिज्ञासायां वस्तुतस्तदन्तर्गतलक्षणविषयत्वस्यापि सत्वात्। न च 'लक्षणमात्रविषये' ति विशेषणीयम्। एवमपि 'ब्रह्मजिज्ञासे' त्यत्र ब्रह्मसङ्कीर्तने उद्देशत्वासिद्धे: तत्र तृतीयाधिकरणप्रभृतिनिरूपयिष्यमाणप्रमाणजिज्ञासाजननार्थत्वस्यापि सत्त्वात्। अत एव 'अथातो धर्मजिज्ञासे' त्यत्र धर्मसङ्कीर्तने स्वरूपप्रमाणोभयजिज्ञासाजननार्थत्वमस्तीति को धर्म: कथंलक्षणक इति जिज्ञासाद्वयमपि दर्शितम्। न च लक्षणत्वप्रकारकत्वं जिज्ञासायां विशेषणमुपादेयम्। असाधारणध-र्मत्वप्रकारकत्वापेक्षया नामप्रकारकत्वस्य लघुत्वात्। विशेषणयोर्घटितघटकभावाभावेन भिन्नविशेष्यविशेषणत्वेन चोपस्थितिलाघवाभावेऽपि वस्तुलाघवसत्त्वात् उद्देशपदप्रवृत्तिनिमित्त-रूपलक्षणविचारे वस्तुलाघवस्याप्यादरणीयत्वात्। न चैवमतिलाघवान्नाम्ना वस्तुप्रतिपत्तिमुद्दिश्योच्चा-रणमुद्देश इत्येतावदेव लक्षणं स्यादिति वाच्यम्। विदितचैत्रपुत्रलक्षणं तन्नाममात्रजिज्ञासुं प्रति मैत्रनामा चैत्रपुत्र

इति वाक्यास्याप्युद्देशत्वापत्तेः। न च नाममात्रेण न तु तदतिरिक्तप्रकारेणापीति विशेषणीयम्। पदार्थमात्रोद्देशके प्रमाणादिसूत्रे तेषां तत्त्वज्ञानविषयत्वेनापि विशेषणात्। विदितसामान्यलक्षणं प्रति विशेषोद्देशमात्रे विशेषोद्देशकेषु 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी'त्यादिसूत्रेषु प्रमितिजनकत्वादिनापि विशेषणाच्चोद्देशमात्रे लक्षणस्यासम्भवापत्तेरिति एतदपि न युक्तम्। संशयप्रयोजनाद्युद्देशेष्वव्याप्तेः। प्रमाणादिसूत्रेऽपि संशयादिशब्दानां लोकप्रसिद्धार्थपरत्वेन तेषां प्रवृत्तिनिमित्तसमर्पकत्वसम्भवात्। न चाप्रसिद्धानामुद्देशे नामविशेषितप्रतिपत्तिरिति तत्सहपाठमात्रात्प्रसिद्धानामपि तथानियमः। अविदितविष्णुमित्रं प्रति देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिति प्रयोगे व्यभिचारात् न च तत्र देवदत्तयज्ञदत्तवदत्रापि संशयादिषु लक्षणाकाङ्क्षाकथने न स्यातामिति वाच्यम्। परीक्षितिव्यविशेषसद्भावेन परीक्षाधर्मितया लक्षणानुवादोपपत्तेः लक्षणविप्रतिपत्तिनिरासार्थत्वोपपत्तेश्च तस्मान्नामविशेषितत्वमपहाय लक्षणत्वप्रकारत्वं जिज्ञासायां विशेषणं कार्यमिति न ब्रह्मण उद्दिष्टत्वनिर्देशे काचिदनुपपत्तिः। अथापि स्याल्लक्षणत्वप्रकारकजिज्ञासाजननोद्देश्यकवस्तुसङ्कीर्तनमुद्देश इति वक्तव्यम्। न तु लक्षणत्वप्रकारक-जिज्ञासाजनकवस्तुसङ्कीर्तनमात्रमुद्देश इतिं प्रमाकरणं प्रमाणमिन्द्रियजन्यं ज्ञानं प्रत्यक्षमित्यादिवाक्येषु प्रमाणादिलिलक्षयिषयोच्चरितेषु प्रमेन्द्रियादिसङ्कीर्तनस्याविदितप्रमादितत्त्वं प्रति तज्जिज्ञासाजनकत्वेन तदुद्देशत्वापत्तेः न च ब्रह्मजिज्ञासासूत्रे ब्रह्मसङ्कीर्तनं लक्षणजिज्ञासाजननार्थं किं तर्हि विषयप्रयोजनप्रतिपादनार्थमित्येतदपि प्रमाणाद्युद्देश प्रतिबन्धैव निरस्तम्। तदपि हि विषय-प्रयोजनप्रतिपादनार्थमेव। तद्यदि लक्षणजिज्ञासाजनानार्थमपि इदमपि तथास्तु। अपि चात्र ब्रह्मसङ्कीर्तनस्य लक्षणानुसारेणानुद्देशरूपत्वेऽपि किं तद्ब्रह्म यज्जिज्ञास्यमित्युद्देशकार्यलक्षणजिज्ञासाजनकत्वं तावदस्ति इष्ट्यनङ्गस्यापि गोदोहनस्येव तदङ्गचमसकार्यजनकत्वम्। तथा च गुरुमतानुसारेण गोदोहनप्रयोगयुक्ताया इष्टेः किञ्चिदङ्गवैकल्येऽपि तत्कार्योपकारशालितवात्समग्राङ्गव्यवहारवदनुद्देशेऽपि ब्रह्मण उद्देशकार्यलक्षणाकाङ्क्षाशलित्वादुद्दिष्टत्वर्दिशः। तदाकाङ्क्षानुसारेणावसरसङ्गतिश्चोपपद्यत इत्यास्तां विस्तरः। नन्वेवमप्यवसरसङ्गतिरित्येतन्नोपद्यते जन्मादिसूत्रस्य लक्षणधर्मिकतत्सम्भवासम्भवपरीक्षार्थत्वेन लक्षणप्रदर्शनार्थत्वाभावात्। अत एव लक्षणाभिधाय्यधिकरणमिति पूर्वपक्षसिद्धान्तशाल्यधिकरणरूपत्वं भाष्ये प्रदर्शितम्। तदनुसारेण च किंशब्दः प्रागाक्षेपार्थतया व्याख्यातः। यदि च तस्याक्षेपार्थत्वं न स्यात्तदानीमवसरसङ्गतिरेव स्यान्नाक्षेपसङ्गतिरिति। उच्यते जन्मादिसूत्रं श्रुतिसिद्धं लक्षणं प्रदर्श्य तत्सम्भवासम्भवपरीक्षासूचनार्थं न तु तदप्रदर्श्य केवलं परीक्षार्थम्। तत्र कण्ठतो लक्षणस्यैव प्रदर्शनान्न्यायशास्त्रे द्वितीयाध्यायगतप्रमाणादिपरीक्षासूत्रजातव्यतिरेकेण प्रथमाध्यायगततल्लक्षण-सूत्रजातवदिह ब्रह्मलक्षणप्रदर्शनार्थस्यान्यस्य सूत्रस्याभावाच्च। तथा च लक्षणप्रदर्शनांशेनावसरसङ्गतिः तदाक्षेपांशेनाक्षेपसङ्गतिश्चेत्युभयमुपपद्यते। न च वाच्यं लक्षणप्रदर्शनमात्रपरमिदं सूत्रं न तु तत्सम्भवासम्भवविचारपरमपि। जैमिनिना प्रत्यक्षसूत्रादिभिरिव बादरायणेनापि न विलक्षणत्व (ब्र०-

२-१-४) सूत्रादिभिर्लक्षणपरीक्षायाः प्रवर्तयिष्यमाणत्वात्। तथा चावसरसङ्गतिरेवोपपद्यते नाक्षेपसङ्गतिरिति। श्रुत्यप्रदर्शितधर्मलक्षणप्रदर्शनामात्रे चोदनासूत्रस्य पर्यवसानसम्भवेऽपि 'यतोवे' त्यादिश्रुतिप्रदर्शितब्रह्मलक्षणानुवादमात्रे जन्मादिसूत्रस्य पर्यवसानासम्भवेन लक्षणोपपादकन्याय-सूचनार्थत्वस्यावश्यवक्तव्यत्वात्। भाष्यकृताप्यधिकरणमवतारयतीति वाक्येनाधिकरणं प्रवर्तयतीत्यर्थकेन लक्षणसम्भवासम्भवविचारस्य सूत्रार्थत्वेनावतारित्वाच्च। 'न विलक्षणत्वा' दि (ब्र०-२-१-४)सूत्रैस्तु विधान्तरेण परीक्षा करिष्यते। अतो युक्तं पूर्वाधिकरणेन सङ्गतिद्वयम्। वेदान्तार्थविचाररूपतयाशास्त्रसङ्गतिः कारणवस्तुविषयतया द्विकसङ्गतिः कारणवस्तुविषयवाक्यसमन्वयार्थतयाऽध्यायसङ्गतिः स्पष्टब्रह्मलिङ्गवाक्यविषयतया पादसङ्गतिश्च स्फुटत्वाद्भाष्ये न प्रदर्शिता।। * ।। जन्माद्यस्य यतः।। 2 ।। द्विविधो लक्षणदोषः लक्षणसामान्यदोषः तत्तल्लक्षणविशेषदोषश्च। तत्र लक्षणसामान्ये तद्दोषनिराकरणेन लब्धोन्मेषे विशिष्य ब्रह्मलक्षणमुदाहृत्य तस्य दुष्टत्वादुष्टत्वचिन्तनमवकाशं लभत इत्यभिप्रेत्य लक्षणसामान्यदोषं तावन्निराकर्तुमुद्भावयति-**ज्ञात इत्यादिना**। ननु लक्ष्यज्ञानार्थो न लक्षणप्रश्नः येन ज्ञाते लक्ष्ये लक्षणवैयर्थ्यमज्ञाते प्रश्नमूलतद्बुभुत्सानुपपत्तिः स्यात् किं तु लक्षणज्ञानार्थः। न हि व्याप्त्याकाङ्क्षादिलक्षणप्रश्नः तत्स्वरूपज्ञानार्थ इति वक्तुं शक्यम्। ततः प्राग्व्याप्त्याकाङ्क्षादिपरिज्ञानाभावे बालाङ्गनादिसाधारणस्य धूमाद्वह्न्यनुमानस्य शब्दादर्थप्रत्ययस्य चासम्भवप्रसङ्गात्। तस्माल्लोके कश्चन्द्र इत्यादिप्रश्नः किंलक्षणश्चन्द्र इत्येवमादिरूपेण लक्षणविषयः। प्रकृष्टप्रकाशश्चन्द्र इत्याद्युत्तरमपि लक्षणज्ञापनार्थं न तु लक्षणमुखेन लक्ष्यज्ञापनार्थमित्याशङ्कानुपपत्तेरिद्वि। **कथमत्रेति**। लक्षणसामान्ये लब्धोन्मेषे हि विशिष्य कस्यचिल्लक्षणप्रस्तावो युज्यते नान्यथेति भावः। आपाततो ज्ञातस्य लक्षणस्य निश्चयो लक्षणस्य प्रयोजनमिति न तद्वैयर्थ्यम्। नापि लक्ष्यबुभुत्सानुपत्तिरिति शङ्कितस्य लक्षणसामन्यदोषस्य परिहारं सूचयन्प्रकृतलक्ष्ये ब्रह्मण्यापातज्ञानमुपपादयति-**अध्ययनादिति**। अयमाशयः। लक्षणेन लक्ष्यज्ञानमेव सर्वत्र लक्षणकथनस्य मुख्यं प्रयोजनम्। लक्षणज्ञानं तु तदुपयोगितया लक्ष्यते ज्ञाप्यतेऽनेनेति करणार्थल्युडन्तस्य लक्षणशब्दस्य ज्ञापक एव प्रसिद्धिप्राचुर्यात् ज्ञाप्ये तथा प्रसिद्ध्यभावात्। 'अनुर्लक्षणे' (पा०-१-४-८४-) 'लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः' (पा०-१-४-९०) 'इत्थंभूतलक्षणे' (पा०-२-३-२१-) इत्याद्यभियुक्तव्यवहारेषु हि ज्ञापक एव लक्षणश्शब्दः प्रसिद्धतरः। नन्वापातज्ञानस्यापि धर्मिणि निश्चयरूपत्वान्न तत्र स्वरूपेण निश्चयो लक्षणेन कर्तव्यः। रूपान्तरेण चेत्तत्किं रूपान्तरमिति चेदुच्यते। क्वचिच्छब्दविशेषवाच्यत्वं क्वचित्तत्तत्प्रवृत्तिनिमित्तासाधारणधर्मः। क्वचिदुभयं निर्धारणीयम्। तत्र 'प्रकृष्टप्रकाशश्चन्द्र' इति लक्षणेन चन्द्रे चन्द्रपदवाच्यत्वं निर्धारणीयम्। तथा हि। वियति ज्योतिर्मण्डलमुदीक्षमाणस्यास्ति कश्चिच्चन्द्रप्रातिपदिकस्यार्थः। स चास्मिन्ज्योतिर्मण्डले वर्तत इत्येतावदवगतवतोऽस्मिन्ज्योतिर्मण्डले कश्चन्द्र इति पृष्टवतस्तदभिज्ञोपदिष्टेन लक्षणवाक्येन चन्द्रस्वरूपं वा तत्र चन्द्रत्वं वा न ज्ञापनीयम्। नक्षत्रादिस्वरूपवच्चन्द्रस्वरूपस्य तत्समानवित्तिवेद्यायाः

प्रकाशसंस्थानविशेषाभिव्यंङ्ग्यायाश्चन्द्रत्वजातेश्च प्रत्यक्षत्वात्। यद्यपि चन्द्रे चन्द्रशब्दोल्लेखी चंन्द्रत्वे चन्द्रत्वशब्दोल्लेखी वा प्रत्ययो न जायते। तयो: शक्तिग्रहाधीनत्वात्। तथापि वस्तुतश्चन्द्रत्वशब्दवाच्ययोर्व्यक्तिजात्योरनिवार्यं प्रत्यक्षम्। एवं चन्द्रस्य नक्षत्रादिभ्यो व्यावृत्तिरपि प्रत्यक्षैव। अचन्द्राद्व्यावृत्तोऽयमित्येवंरूपा तु व्यावृत्तिधीस्तदा न भवति। तस्या: प्रकृष्टप्रकाशविषयचन्द्रशब्दवाच्यत्वग्रहाधीनत्वात्। ननु वस्तुतो यश्चन्द्रत्वजातिविशिष्ट: स चन्द्रशब्दवाच्य इति प्रागेवाप्तवाक्यादिनावगतवतश्चन्द्रत्वजातिं च व्यक्तिविशेषे पश्यत: प्रकृष्टप्रकाशवाक्यमनपेक्ष्य तत्र चन्द्रशब्दवाच्यत्वनिर्णयो भवितुमर्हतीति सोऽपि न लक्षणफलमिति चेन्न। प्रकृष्टप्रकाशाभिव्यङ्ग्यायां दृश्यमानजातौ चन्द्रत्वशब्दशक्तिग्रहवतस्तन्निर्णयसम्भवेऽपि तद्रहितस्य निर्णयासम्भवात्। न हि प्रकृष्टप्रकाशपदशक्तिग्रहरहितस्य वस्तुत: प्रकृष्टप्रकाशं चन्द्रं पश्यतोऽपि 'प्रकृष्टप्रकाशश्चन्द्र'इत्युपदिष्टलक्षणस्यापि तत्र चन्द्रशब्दवाच्यत्वधीर्जायते। तस्मात्प्रकृष्टप्रकाशवाक्येन चन्द्रे चन्द्रपदवाच्यत्वमंत्र निर्धारणीयम्। यथा 'गोसदृशो गवय' इत्यादिवाक्येन गवये गवयशब्दवाच्यत्वम्। अत एवाङ्गुलीनिर्देशेन 'अयं चन्द्रशब्दवाच्य' इति बोधितस्य प्रयोजनान्तरार्थं प्रकृष्टप्रकाशवाक्यापेक्षा न दृश्यते। चन्द्रे चन्द्रत्वजातिं चन्द्रशब्दवाच्यत्वं च जानन् द्वितीयायामेव तिरोहितस्य चन्द्रस्य नक्षत्रसमानाकारकोटिमात्रदर्शनेन घटे शरावादिसमानाकारैकदेशदर्शनेन घटत्वमिव तत्र चन्द्रत्वमनिर्धारयन्तं प्रति कथितेन 'शाखाग्रं चन्द्र' इति लक्षणेन तत्र चन्द्रत्वरूपासाधारणधार्मो निर्धारणीय:। प्रकृतलक्ष्ये तूभयं निर्धारणीयम् तथा हि 'ब्रह्मविदाप्नोति पर' मित्यादिवाक्याध्ययनादानापाततस्तावदिदमवगम्यते। अस्ति किञ्चिद्ब्रह्मप्रातिपदिकस्य वाच्यं बृहत्त्वार्थानुगमात् स्वरूपतो गुणतो विभूतितश्च निरतिशयमहिमशालीति। तत्किं ब्रह्मेति श्रुतिष्वन्वेषणे मन्त्रार्थवादादिप्रसिद्धमहिमातिशयेषु हरिहरहिरण्यगर्भेन्द्रचन्द्रवह्निसूर्यादिष्वनि- र्धारणेन ब्रह्मबुद्धि: प्रसजति पतिंवराया: कन्याया इव स्वयंवरमण्डपसमागतेषु बहुषु राजकुमारेषु दूरे दृश्यमानेष्वाप्तमुखाकर्णितानेकगुणस्वाभिमतवरबुद्धि:। तत्राप्तदर्शितेन स्पृहणीयेन स्वाभिमतवरलक्षणे पुरुषविशेषे स्वामितवरबुद्धिरिव 'यतो वे'त्यादिब्रह्मलक्षणेन श्रीमति साम्बशिवे ब्रह्मबुद्धिर्व्यवतिष्टते। अयमेव निरतिशयमहिमशालिब्रह्मशब्दवाच्यश्च न तु सृष्टिप्रलयविषयबहुवाक्यावगतसृज्यसंहार्यभावा इतरे देवताविशेषा इति। यद्यप्येवं लक्षणवाक्यश्रवणमात्रेण 'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवल:। अजात इत्येव कश्चिद्भीरु: प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मा पाहि नित्य' मित्याद्यौपनिषद्वाक्यनिकुरुम्बप्रदर्शितलक्षणानुगमसम्भावन: शिव एव ब्रह्मेत्यवगति: संभवति। तथैव पूर्वाधिकरणे अथशब्दव्याख्यानावसाने दर्शितम्। तथाप्यसाववगतिर्न स्थिरीभवति। 'सदेव सोम्येदमग्र आसीत्' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' हिरण्यगर्भ: समवर्तताग्रे' 'एको ह वै नारायण आसीत्' इत्यादिवाक्यैर्लक्षणस्य बहुषु प्रतीयमानत्वात्। अतो जगत्कारणं ब्रह्म सत् ज्ञानमानन्दो हिरण्यगर्भो हरो हरिर्वेत्यादिरूपे संशये सच्चिदानन्दरूप: शिव एव जगत्कारणं ब्रह्मेति लक्षणस्य

शिवैकान्त्यव्यस्थापनाय जन्मादिसूत्रसूचितन्यायावलम्बनमधिकरणं प्रवर्तयिष्यते। नन्वेकस्मिन्धर्मिणिं विरुद्धनानाप्रकारकं ज्ञानं संशय इति नैयायिकानां घण्टाघोषः। कथमिह नानाधर्मिषु ब्रह्मत्वरूपैकधर्मप्रकारकः संशय उदाह्रियते। उच्यते। एकत्रानेकधर्मप्रकारकसंशयवदनेकत्रैकधर्मप्रकारकोऽप्यस्ति संशयस्सकलजनसिद्धः। यथास्मिन्समाजे मित्रायाः पतिर्वर्तत इत्यवगतवतस्तस्याः पतिरयमयं वेति संशयः। नैयायिकोक्तलक्षणासङ्गृहीतत्ववात्तथाभूतः संशयो नाङ्गीकर्तुं युक्त इति चेन्न। तान्त्रिककल्पितलक्षणानुसारेण लोकप्रसिद्धलक्ष्यत्यागायोगात्। अन्यथा 'विरुद्धैकप्रकारकानेकविशेष्यकः संशय' इति लक्षणकल्पनेन तदसङ्गृहीतमयं स्थाणुः पुरुषो वेति ज्ञानं संशयो न भवतीत्यभ्युपगन्तारं को वारयेत्। नन्वनेकधर्मगतमेकधर्मिनिष्ठतानर्हत्वं विरुद्धत्वं तदेकत्र धर्मे न सम्भवतीति चेन्न। एकधर्मगतमनेकनिष्ठतानर्हत्वं विरुद्धत्वं तदनेकत्र धर्मे न सम्भवतीत्यपि वक्तुं शक्यत्वात् एकत्र स्थाणुत्वपुरुषत्वे विरुद्धे इतिवदनेकत्रैकभार्यापतित्वं विरुद्धमित्यप्यनुभवस्य तुल्यत्वात्। यदि विरुद्धत्वमनेकगतं वक्तव्यमिति नियमः। अनेकत्रैकभार्यापतित्वं विरुद्धमिति व्यवहारस्यैकस्या भार्याया अनेकः पतिर्विरुद्ध धर्मिविरोधे पर्यवसानं स्थाणुत्वपुरुषत्वयोरेकवृत्तित्वं विरुद्धमिति व्यवहारस्येवेत्यङ्गी क्रियते। तथाप्येकप्रकारकविरुद्धानेकविशेष्यंक ज्ञानं संशय इति लक्षणकल्पनेन स्थाणुपुरुषादिसंशयोऽपलप्येत। तस्मादनुभवसिद्धद्विविधसंशयसङ्ग्रहाय विरुद्धानेकैकवैशिष्ट्यावगाहि ज्ञानं संशय इति लक्षणं कल्पनीयम्। विरोधोऽत्र न सहानवस्थानलक्षणः किं त्वेकसम्बन्धाभावः। एकाधिकरणसम्बन्धाभावरूपात्सहानवस्थानादस्य लघुत्वात्। अयं च विरोधो धर्मिणोरेकधर्मसम्बन्धाभावरूपो धर्मयोरेकाधिकरणसम्बन्धभावरूप इति द्विविधेऽपि संशयेऽनुगत एव। न चैवमपि प्रतिनियतगुणकर्मादिधर्मानाधिकरणतया विरुद्धयोर्घटयोर्घटत्ववैशिष्ट्यावगाहिनि समूहालम्बनेऽतिव्याप्तिः। लक्षणप्रविष्टैकसम्बन्धाभावरूपस्य विरोधस्य विवक्षितत्वात्। न चैवमप्यनेकस्यैकेन यत्सम्बन्धाभावस्तदन्यसम्बन्धावगाहिनि 'मित्रा पत्युर्भ्रातुश्च हितैषिणी' ति ज्ञानेऽतिव्याप्तिः। यत्सम्बन्धाभावो विरोधः तदवगाहित्वस्य विवक्षितत्वात्। वस्तुतस्तु सर्वमिदं लक्षणं न युक्तम्। अविरोधिनोर्विरोधभ्रमजन्ये 'वृक्षः पनसो वे'ति संशयेऽव्याप्तेः। विरोधिनोरविरोधिभ्रमजन्ये 'वृक्षोऽयं भल्लूकश्चे' ति विपर्ययेऽतिव्याप्तेश्च। न च लक्षणे वस्तुतो विरुद्धत्वं न विशेषणं किं तु भासमानविरोधत्वमिति वाच्यम्। पीतत्वशङ्खत्वे विरुद्धे इत्यवगच्छतो दोषवशाज्जायमाने पीतशङ्खविभ्रमे तथाप्यतिव्याप्तेः। ननु, तस्मिन्नेव ज्ञाने भासमानत्वं विरोधे विशेषणम्। पीतशङ्खविभ्रमे तयोर्विरोधो न भासते किं तु तटस्थज्ञानान्तर एव। वस्तुतःपीतत्वशङ्खत्वयोर्विरोधेऽपि दोषवशान्मम शङ्खः पीतो भासत इति व्यवहारः तटस्थज्ञानविषयस्यैव विरोधस्यानुवाद इति चेन्न। पीतशङ्खविभ्रमोदयकाले विरोधाभाससत्त्वे तदुपनीततया पीतशङ्खविभ्रमेऽपि विरोधाभानस्य निवारयितुमशक्यत्वात्। अन्यथा संशयस्थलेऽपि तटस्थज्ञान एव विरोधो भासते न संशय इति कल्पनापत्त्यालक्षणस्याऽसम्भवप्रसङ्गात्। किं च' धूमवानयं पर्वतो यदि

निर्वह्निस्स्यान्निर्धूम:स्या'दिति तर्केऽप्यतिव्याप्ति:। अपि च 'परस्परविरुद्धस्थाणुत्वपुरुष- त्ववानय'मिति लौकिकानामाहार्यभ्रमे 'प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता। अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक्चारदृगप्यवर्तते'तिकाव्यश्लोकजन्ये विरोधाभासतन्मूलोत्प्रेक्षालङ्कारोपयोगिनि विरुद्धधर्मैरिति विशेषणबललब्धविरुद्धत्वावगाहिनि मित्रजित्त्वादभावविगतचारदृक्त्ववानयमित्याहार्यज्ञाने च विरोधाभानस्य कथञ्चिदप्यपलपितुमशक्यत्वा- दतिव्याप्तिरनिवार्या। न चानाहार्यत्वमपि लक्षणे विशेषणम्। लौकिकानां स्थाणुत्वेनावगत एव स्थाणु: पुरुषो वेत्याहार्यसंशये 'जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नता: किं कनिष्ठ: किमु ज्येष्ठा घटीयन्त्रस्य दुर्जना' इति काव्यश्लोकजन्ये काव्यशोभोपयोगि न्याहार्यसंशये चांव्याप्ति:। परस्परविरुद्धस्थाणुत्वपुरुषत्व- वानयमिति शब्दजन्यज्ञानेऽतिव्याप्तिश्च । किं च विरुद्धानेकविषयकज्ञानस्य संशयत्वे धर्म्यंशेऽपि तस्य ज्ञानस्य संशयत्वापत्ति: । विरुद्धानेकविषयत्वावच्छेदेन संशयत्वमित्यभ्युपगतावेकैककोट्यंशे संशयत्वाभावापत्ति:। ननु, तर्हि परस्परप्रतिक्षेपरूपत्वाकारार्थावगाहि ज्ञानं संशय इति लक्षणमस्तु । तथाहि अस्त्याहार्यानाहार्यसाधारण्येन संशयेष्वेतल्लक्षणं तेषु स्थाणुश्चेदयं न पुरुष: पुरुषश्चेदयं न स्थाणुरित्येवमादिरूपेण परस्परप्रतिक्षेपप्रतीते: न चैतल्लक्षणमुदाहृतेष्वाहार्यभ्रमेष्वस्ति । तेषु स्थाणुत्वपुरुषत्वादीनां समुचच्यावभासेन परस्परप्रतिक्षेपाप्रतीते:। नन्वेवमपि परस्परप्रतिक्षेपकस्थाणुत्व- पुरुषत्वनित्याहार्यभ्रमेऽतिव्याप्ति: । व्रैहपुरोडाशा यवपुरोडाशा वेष्टि: कार्या बृहत्पृष्ठो रथान्तरपृष्ठो वा सोमयाग: कार्य इति विकल्पितसाधनद्वयावच्छिन्नकर्मविषयशास्त्रार्थोपदेशवाक्यार्थजन्यज्ञाने चातिव्याप्तिरिति चेन्न । सर्वात्मना परस्परप्रतिक्षेपावगाहित्वस्य लक्षणे विवक्षितत्वात्। उदाहृताहार्यभ्रमे तस्मिन्नेव धर्मिणि स्थाणुत्वपुरुषत्वयो: समुचच्यस्यापि प्रतीते: । अत एव तज्जन्यव्यवहारे नास्ति वाकारप्रयोग: । समुच्चयं विना प्रतिक्षेपमात्रमवगाहमानस्यैव ज्ञानस्य तत्प्रयोगहेतुत्वात् । यद्यपि विकल्पितसाधनद्वयावच्छिन्नकर्मव्यवहारे वाकारप्रयोगोऽस्ति। तथापि तस्मिन्नेवेष्ट्यादौ धर्मिणि प्रयोगान्तरे यवादिप्राप्तिमनिरुध्य ब्रीह्यादिप्राप्तिमत्प्रयोगमात्रे यवादिप्रतिक्षेप इति न सर्वात्मना तत्तद्धर्मिणि परस्परप्रतिक्षेप: । न हि 'व्रीहिभिर्यवैर्वा यष्टव्य' मिति विकल्पोदेशे व्रीहयो यवान्यवाश्च व्रीहीन्सर्वात्मना यागात्प्रतिक्षिपन्ति । तथासत्यस्य शास्त्रस्यानिर्णायकत्वेनाननुष्ठापकत्वेन वाऽप्रामाण्यप्रसङ्गात् । तस्माद्विकल्पवाक्येषु वाकारस्य तस्मिन्धर्मिणि सर्वात्मना प्रतिक्षेपो नार्थ: । किंतु तस्मिन्धर्मिणि प्रयोगान्तरे तत्प्राप्तिमनिरुध्य तत्तत्प्रयोगे प्रतिक्षेप:। उभयमपि वाकारार्थ: प्रयोगबलादवसीयते । अत एव व्रीहिभिर्यवैर्वा यष्टव्यमिति सन्देहेन पृष्टवन्तं प्रति ब्रीहिभिर्यवैर्वा यष्टव्यमिति प्रश्नसमानाकारमेव वाक्यं निर्णायकं प्रश्नमूलसन्देहनिवर्तकमनुष्ठापकं च दृश्यते। प्रश्नवाक्ये वाकारस्तस्मिन्धर्मिणि सर्वात्मना पक्षान्तरप्रतिक्षेपार्थ:। उत्तरवाक्ये तस्मिन्धर्मिणि प्रयोगविशेषावच्छिन्ने तत्प्रतिक्षेपार्थ इति विशेषसद्भावात्। यदंशे परप्रतिक्षेपरूपवाकारार्थावगाहित्वं तदंशे संशयत्वमिति न धर्म्यंशे संशयत्वस्य नाप्येकैककोटौ संशयत्वाभावस्य च प्रसङ्ग:।

परप्रतिक्षेपकत्वरूपवाकारार्थावगाहित्वमात्रं तु न संशयलक्षणम्। 'विधिर्वा स्यादपूर्वत्वाद्वादमात्रमनर्थक' मित्यादि (जै० १-२-१९)सूत्रवाक्यजन्ये 'औदुम्बरो यूपो भवती' त्यादीनामर्थवादत्वप्रतिक्षेपक -वाकारार्थावगाहिनि ज्ञाने ऽतिव्याप्ते:। किं त्वनेकगतं सर्वात्मना परस्परप्रतिक्षेपमवगाहमानं ज्ञानं संशय इत्येव लक्षणम् तथाभूतस्य ज्ञानस्य संशयत्वं तु परप्रतिक्षेपरूपवाकारार्थावगाहिन्ये-कैकांशेऽपीत्येतावान्विशेष:। परस्परप्रतिक्षेपस्त्वनेकध- र्मिकसंशयेऽनेकस्य धर्मिण: एकधर्मवत्त्वेऽनेककोटिकसंशये त्वनेकस्य धर्मस्यैकधर्मनिष्ठत्व इति विशेष इति। इदमपि लक्षणं न युक्तम्। व्रीहिभिर्यवैर्वा इष्टिप्रयोग: कर्तव्य इति सन्देहेन पृष्टवन्तं प्रति पक्षद्वयेऽपि साद्गुण्यसम्भवमभिप्रेत्य प्रयुक्तेन 'व्रीहिभिर्यवैर्वायं प्रयोग: कर्तव्य' इति वाक्येन जनिते 'मयेदानीं गन्तव्यं स्थातव्यं वे' ति संशयेन पृष्टवन्तं प्रति पक्षद्वयेऽपि फलाविशेषमभिप्रेत्य प्रयुक्तेन 'गच्छ वा तिष्ठ वे' ति वाक्येन जनिते 'चैत्र: श्यामो गौरो वे' ति सन्देहेन पृष्टवन्तं प्रति तत्र श्यामत्वगौरत्वान्यतरनिर्धारणं मम नास्तीत्यभिप्रेत्य प्रयुक्तेन 'स श्यामो गौरो वेति नाहं वेदे' ति वाक्येन जनिते तादृशालोकरीत्यनुसारेण 'को हि तद्वेद यद्यमुष्मिंल्लोकेऽस्ति वा न वे' त्याद्यर्थवादवाक्येन जनिते संशयत्वं निर्वक्तुं शक्यमित्यभिमानिनं प्रति तद्दुदूषयिषया प्रयुक्तेन 'संशयत्वं जातिर्वोपाधिर्वे'ति वाक्येन जनिते च ज्ञाने तथाप्यतिव्याप्ते: । किं च सर्वेषामेतेषां लक्षणानां तत्तल्लक्षणवाक्यजन्यज्ञानेष्वतिव्याप्ति:। ननु, चैकस्मिन्धर्मिणि विरोधिनानाप्रकारकमित्यादिलक्षण-वाक्यजन्यज्ञानेषु ज्ञानगतं विरोधिनानाप्रकारकत्वादिकं प्रकार: न त्वर्थगतं तत्तद्विशेषणवैशिष्ट्यमिति नास्ति लक्षणवाक्यजन्यज्ञानानां विशेष्यगततत्तद्वैशिष्ट्यविषयत्वरूपं तत्त- त्प्रकारकत्वमिति चेन्न। प्रकारत्वस्य वैशिष्ट्यघटितत्या ज्ञानगततत्तत्प्रकारकत्व- भानेऽर्थगततत्तद्वैशिष्ट्यभानस्यावर्जनीयत्वेन तत्तत्प्रकारकत्वस्यापि सत्त्वात्। तस्मादनवधारणज्ञानं संशय' इति वृद्धनैयायिकोक्तं लक्षणं युक्तम्। अनवधारणत्वं च ज्ञानस्य ज्ञेयेन विषयविषयिभावसम्बन्धा- वान्तरविशेष: । न तु विषयकृत: कश्चिद्विशेष: । यथा 'दण्डी पुरुष' इति ज्ञानस्य दण्डेन प्रकारप्रकारिभाव:। पुरुषेण विशेष्यतद्वद्भावश्च । न हि तद्व्यतिरेकण दण्डपुरुषंयोगा इति समूहालम्बनात् 'दण्डी पुरुष' इति विशिष्टज्ञानस्य कश्चिद्विशेषो लभ्यते। दण्डगतवैशिष्ट्यप्रतियोगित्वस्य पुरुषगतवैशिष्ट्यानुयोगित्वस्य च विषयीकरणं विशिष्टज्ञाने ततो विशेष इति चेन्न । दण्डपुरुषदण्डप्रतियोगिकपुरुषानुयोगिकसंयोगा इति समूहालम्बने तस्यापि सत्त्वात् । सम्बन्धतावच्छेदकसंयोगत्वादिप्रकारेण सम्बन्धविषयत्वं समूहालम्बने तं विना स्वरूपेण सम्बन्धविषयत्वं विशिष्टज्ञान इति तस्य ततो विशेष इति चेन्न । 'दण्डसंयुक्तपुरुषस्कन्धसंयुक्तदण्डश्चैत्र' इति विशिष्टज्ञाने सम्बन्धावच्छेदकप्रकारेणापि सम्बन्धविषयत्वस्य सत्त्वात् स्वरूपेण वैशिष्ट्यविषयत्वस्य 'दण्डी पुरुष:' 'पुरुषे दण्ड' इति ज्ञानयोरविशेषेण तावता तयो: परस्परवैलक्षण्यासिद्धेश्च । ननु, ज्ञेयज्ञानसम्बन्धा-विशेषकृतविशेषणविशेष्यव्यवस्थया विशिष्टज्ञानसमूहालम्बनयोरुदाहृतविशिष्टज्ञानयोश्च

वैलक्षणयसिद्धावपि दीर्घबाहुर्बाहुदैर्घ्यवानिति विशिष्टवैशिष्ट्यज्ञानयोर्वैलक्षण्यं न सिद्ध्येत्। ज्ञानद्वयस्यापि बाहौ दैर्घ्ये च प्रकारप्रकारिभावसम्बन्धाविशेषादिति चेन्न । येन ज्ञानेन प्रकारप्रकारिभावसम्बन्धेन विषयीक्रियमाणे यस्मिन्विशेषणत्वं भासते तत्र ज्ञाने तत्तस्य विशेषणमिति व्यवस्थाङ्गीकारात्। विशेषणत्वं तु विशेष्यगतवैशिष्ट्यप्रतियोगित्वं साक्षाद्विशेषणनिरूपितसम्बन्धविशेषो वेत्यन्यदेतत् । ननु, विशिष्टज्ञाने विशेषणागतविशेषणत्वस्यापि भानाङ्गीकारे तत एव समूहालम्बनव्यावृत्तेः किं विशेषणे ज्ञानसम्बन्ध–विशेषकल्पनयेति चेन्न। दण्डपुरुषदण्डगतपुरुषविशेषणत्वानीति समूहालम्बनवैलक्षण्याय तस्याप्यावश्यकत्वात्। न च विशेषणतात्वावच्छेदेन विशेषणत्वविषयत्वं समूहालम्बने तदनवच्छेदेन तद्विषयत्वं विशिष्टज्ञान इति ततो विशेषो वाच्यः। दण्डविशेषणकश्चैत्र इत्यादिविशिष्टज्ञाने तदवच्छेदेनापि विशेषणत्वविषयत्वसत्त्वात्। तस्माद्दीर्घबाहुर्बाहुदैर्घ्यवानिति विशिष्टज्ञानयोर्वैलक्षण्यसिद्धये तत्तद्विशेषणत्वविषयताकृत इव विशिष्टज्ञानसमूहालम्बनयोर्वैलक्षण्यसिद्धये प्रकारप्रकारिभाव इव ज्ञानज्ञेयसम्बन्धकृत इव विशिष्टज्ञानसमूहालम्बनयोर्वैलक्षण्यसिद्धये प्रकारप्रकारिभाव इव ज्ञानज्ञेयसम्बन्धकृतोऽपि विशेषोऽङ्गीकर्तव्य एव । यद्यपि न्यायमते ज्ञानस्य ज्ञेयेन स्वरूपमेव सम्बन्धः। तथापि स्वरूपसम्बन्ध एव विशाषस्तैरगत्याभ्युपगन्तव्यः । घटाभावस्य घटेन प्रतियोग्यनुयोगिभावरूपस्वरूपसम्बन्धः भूतलेनाधाराधेयभावरूप इतिवत्। एवं च ज्ञानस्यानवधारणत्वं 'स्थाणुः पुरुषो वे' त्यादिज्ञानेष्वनेकधर्मविषय इव 'अयमयं वा चन्द्र' इत्यादिज्ञानेष्वनेकधर्मविषयेऽप्यनुभूयत इति लक्षणानुगमादनेकधर्मिविषयोऽपि संशयो युक्त एव । अतो युक्तमुक्तम् **'अध्ययनादापाततो ज्ञाते ब्रह्मणि तद्योगादिति'**। 'ब्रह्मविदाप्नोति पर' मित्यादिवाक्याध्ययनात् सामान्यतो निरतिशयबृहत्त्वेनावगते ब्रह्मणि मन्त्रार्थवादादिप्रसिद्धहरिहरादिदेवताविशेषाणां मध्ये 'अयमयं वा ब्रह्मे ति विशिष्य सन्दिग्धे सति सकलदेवतान्तरव्यवच्छेदेन शिव एव ब्रह्मेति निर्णयार्थस्य लक्षणस्य युक्तत्वादित्यर्थः। अत्र केचिदाद्यस्य सर्गादौ प्राथमिकस्य हिरण्यगर्भस्य जन्म यतो भवति 'यो ब्रह्माणं विदधाति पूर्व' मिति श्रुतेस्तद्ब्रह्मेति सूत्रार्थमाहुस्तन्निरासं हृदि निधाय सूत्रपदविभागं दर्शयति–**जन्मादीति** तद्गणसंविज्ञानबहुव्रीहिणा कृत्यपञ्चकं ग्राह्यमित्याह–**जन्मादिकमिति** । जन्मप्रलयावुपत्तिनाशौ प्रसिद्धौ स्थितिर्जन्मप्रलययोर्मध्ये प्रपञ्चस्यावस्थानम्। तिरोभावः संसारिवर्गस्य नित्यसिद्धज्ञानक्रियाशक्त्या–द्यावरणं सकलसांसारिकानर्थमूलभूतबन्धाख्यम्। अनुग्रहस्ततो मोक्ष इत्येतानि परमे श्वरस्य सृष्टिपालनसंहारतिरोधानानुग्रहरूपस्वव्यापारसाध्यानि प्रपञ्चधर्मरूपाणि पञ्चकार्याणि । यद्यप्यनुग्रहः परमे श्वरधर्मः तथाप्यत्रानुग्रहशब्देन तत्साध्या संसारिवर्गधर्मरूपा बन्धनिवृत्तिर्लक्षणीया । प्रपञ्चधर्मजन्मादिसाहचर्यात्। यद्वा 'मुच्यते वत्सः स्वयमेवे'त्यत्र वत्सस्येवानुग्रहशब्दितमोचन–व्यापारकर्मणः संसारिणः पक्वमलतया तीव्रभक्तिवैराग्यादियुक्ततया च सौकर्यातिशयेन कर्तृत्वविवक्षया तत्कर्तृकैर्जन्मादिभिस्सहानुग्रहस्य पाठः। ननु, जन्मादिपञ्चकस्य प्रपञ्चकर्तृकत्वमात्रमिह न विवक्षितम्।

किं तु प्रपञ्चधर्मत्वम्। अत एव प्रपञ्चधर्मेण जन्मादिना ब्रह्मणः सम्बन्धाभावात्तस्य ब्रह्मलक्षणत्वासम्भवमाशङ्क्यान्यनिष्ठस्यापि तटस्थलक्षणंत्व सम्भवतीति समाधास्यते। एवं च परमेश्वरधर्मानुग्रहणं प्रति कर्मणः कर्तृत्वविवक्षायामप्यनुग्रहस्य प्रपञ्चधर्मत्वालाभात् जन्मादिसहपाठो न युक्त इति चेत् । उच्यते । सर्वत्र कर्मकर्तुः स्वव्यापारं प्रत्येव कर्तृत्वविवक्षा न तु स्वव्यापारानुकूलं कर्तृव्यापारं प्रति। अत एवोक्तं कैयटेन-'लुनातिस्तावद्द्विधा भवनोपसर्जने द्विधा भावने वतर्त । लुनाति केदारं देवदत्तः द्विधाभावं, तद्द्विधा भावयतीयत्यर्थः। यदा तु केदारस्य सौकर्यातिशयविवक्षायां देवदत्तव्यापारो न विवक्ष्यते तदा द्विधाभवनमात्रे लुनातिर्वर्तते । अनेकार्थत्वाद्धातूनाम्। भिन्ना एव वा धातवो भिन्नार्थाः। सारूप्यात्तु तत्त्वाध्यवसायः। तत्र द्विधा भवने केदारस्य कर्तुः 'कर्मवत्कर्मणा तुल्यक्रिय' इति (पा० ३-१-८७) कर्मकार्याण्यतिदिश्यन्ते। तेन 'लूयते केदारः स्वयमेवे' त्यादयः प्रयोगा उपपद्यन्त इति। एवमिहाप्यनुगृह्णातिः कृतार्थीभवनोपसर्जने कृतार्थीभावने वर्तते। अनुगृह्णाति भक्तं परमेश्वरः। कृतार्थीभवन्तं कृतार्थीभावयतीत्यर्थः। यदा तु भक्तस्य सौकर्यातिशयविवक्षायां परमेश्वरव्यापारो न विवक्ष्यते तदा कृतार्थीभवनमात्रेऽनुगृह्णातिर्वर्तते। एवं चात्रानुग्रहस्य प्रपञ्चधर्मत्वमप्युपपद्यत इति। मुक्तिमुमुक्षुत्वादीनां जीवधर्मत्वेन निरूढव्यवहारसिद्धानां जीवधर्मत्वमपि ह्येवमेवोपपादनीयम् । य 'द्यात्मनात्मानमुद्धरे'दिति स्मृतेः स्वबन्धनिवृत्त्यनुकूलस्वव्यापारः स्वकर्मकमोक्तृव्यापारत्वेन विवक्ष्यत इति कल्प्येत तर्हि स एवात्र प्रपञ्चधर्मोऽनुग्रहो विवक्षितोऽस्तु। बन्धनिवृत्तिवत्तस्यापि सर्वानुग्राहकपरमेश्वरप्रसादाधीनत्वेन परमेश्वरकार्यत्वात्- ननु, अनाद्यावरणरूपस्य तिरोभावस्य कथं परमेश्वरकर्तृकत्वम् । उच्यते । अनादित्वेऽपि तस्य तत्कर्तृकत्वं युक्तम् । तथाहि-सर्वज्ञत्वेन सर्वेषां संसारिणां दुःखं जानतः सर्वशक्तिकत्वेन सर्वानपि तान्युगपदेव मोक्तुं शक्तस्य परमेश्वरस्य शिवशङ्करादिनामख्यापिता सर्वभूतविषयिणी करुणा निरुपाधिः परदुःखप्रहाणेच्छारूपा तेषामनादिभवसञ्चितनानाविधदुःखजनककर्मवृन्दसामर्थ्यं परिभूय सर्वानर्थमूलावरणोच्छेदपूर्विकामात्यन्तिकदुःखनिवृत्तिं तेषां युगपदेव कथं न कुर्यात्। यदि तस्य तत्तत्कर्मानुवर्तनस्वभावतया तेषां सकलकर्मबृन्ददाहकस्वविषयसाक्षात्कारोदयपर्यन्तं तेषु सहजकरुणोन्मेषविरोधिततदावरणानुवृत्तिसङ्कल्पो न स्यात् । अतस्तथाभूतसङ्कल्पावश्यंभावे तदधीनानुवृत्तिकस्यावरणस्य यस्मिन्सत्यग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चासत्त्वं तत्तज्जन्यमिति लक्षणानुसारेण तस्य तज्जन्यत्वसिद्धौ परमेश्वरकर्तृकत्वमपि तस्य सिद्ध्यति। कार्यानुकूलसङ्कल्पवत्त्वस्यैव कर्तृलक्षणत्वात्। किंच ज्ञानक्रियाशक्त्यावरणं न स्वरूपतोऽनादिसंसारदशायां मध्ये मध्ये तत्तदर्थविषयतदाविर्भावशबलत्वात्। न हीदानीमपि जीवानां सर्वात्मना ज्ञानक्रियाशक्त्योरावरणमस्ति। न वा कदाचिदाविर्भूतयोः किञ्चिदर्थविषयज्ञानक्रियाशक्त्योरामोक्षमनावरणमस्ति। अनादौ जन्मप्रवाहे सुरनरपशुपक्षिसरीसृपादिजातिभेदोन्मिषज्ज्ञानक्रियाशक्तिव्यवस्थादर्शनात्। तस्मात्स्वरूपतः सादेस्तत्तिरोभावप्रवाहस्य परमेश्वरकार्यत्वं युक्तमेव। तथाप्यासंसारमावृतानां मुक्तिकाल एवाविर्भविष्यतां सत्यसङ्कल्पत्वादिगुणानामावरणमनादीति तेषां

तत्कार्यत्वं न युक्तमिति चेत्। तेषामपि युक्तमेव। तेष्वेकैकस्य तपोविशेषसाध्यतया संसारिफलत्वेनाविर्भावतिरोभावयोः सम्भवेन तेषामप्यासंसारमावृतत्वासिद्धेः । तथाहि-योगशास्त्रे 'स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमात् भूतजय'इति (पातं०४३-सू०) सूत्रेण पृथिव्यादिपञ्चभूतगतस्थूलाद्यर्थवत्त्वान्तधर्मपञ्चकविषयसंयमस्य तद्विषयधारणाध्यानसमाधिरूपस्य भूतजयः फलत्वेन वर्णितः। स च भूतजयोऽणिमाद्यष्टैश्वर्यरूपः स्वेच्छाकीनभौतिकसृष्टिसंहाराद्युपयोगिसत्यसङ्कल्पतासिद्धिपर्यन्तो वैयासिकभाष्ये व्याख्यातः। एवमापस्तम्बसूत्रेऽपि 'अथापि सङ्कल्पसिद्धयो भवन्ति' (आ०घ २-९-२३-६ सू०) 'यथा वर्षे प्रजादानं दूरे दर्शनं मनोजवता यच्चान्यदेवं युक्त' (आ०घ०२-९-२३-७सू-) मिति ज्ञानप्रधानानामूर्ध्व- रेतसामाश्रमाणां ज्ञानफलसत्यङ्कल्पशालित्वमुत्कर्षमाशङ्क्य 'स्यात्तु कर्मावयवेन तपसा वा कश्चित्सशरीरोऽन्तवन्तं लोकं जयति सङ्कल्पसिद्धिश्च स्यात् न तु तज्ज्यैष्ठ्यमाश्रमाणा'मिति (आ०घ०२-९-२४-१४) सूत्रेण गृहस्थैरपि कर्मविशेषादिना सत्यसङ्कल्पत्वं सम्पादयितुं शक्यमिति ब्रह्मज्ञानप्रधानानामाश्रमाणां तत्प्रयुक्तोत्कर्षो निराकृतः। तथा योगशास्त्रे 'परिणामत्रयसंयमाद- तीतानागतज्ञानम्' (पातं०यो०-३ विभूतिपा०१६सू०) 'शब्दार्थप्रत्ययानामितरेतराध्यासात्स- ङ्करस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्' (१७सू०)'संस्कारसाक्षात्कारात्पूर्वजातिज्ञानम्' (२८सू०)'प्रत्ययस्य परचित्तज्ञानम्' (१९सू.)'प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्' (२४सू०)'भुवनज्ञानं सूर्ये संयमात्' (२५सू०)'चन्द्रे तारकाव्यूहज्ञानम्'। (२६सू०)'ध्रुवे तद्गतिज्ञानम्'। (२८सू०)'नाभिचक्रे कायव्यूहज्ञानम्'(२७सू०)'क्षणतत्क्रमयोस्सम्बन्धसंयमाद्विवेकजं ज्ञान'(५१सू०)मिति सूत्रैस्तत्तद्विषयसंयमफलत्वेनास्मदाद्यसम्भावितज्ञानशक्तिविलासाविर्भावो दर्शितः। तथा च योगशास्त्रे 'ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः'। (४६सू०)'ततो मनोजवित्वं विकरणभावः प्रधानजयश्चे'ति(४७सू०) सूत्रैरिन्द्रियग्रहणाद्यर्थवत्त्वान्तधर्मपञ्चकसंयमादिन्द्रियज- यमुक्त्वा ततः प्रधानजयान्ता सिद्धिरुक्ता ।'प्रधानजयश्च सर्वप्रकृतिविकारवशित्व' मिति वैयासिकभाष्ये व्याख्यातम्। तेन सर्वप्रकृतिकार्यवशित्वस्य पाप्मजरामरणशोकक्षुत्पिपासाहेतुभूत- प्रकृतिकार्यविशेषवशित्वस्यापि सिद्ध्या तद्वश्यत्वाप्रसक्तेः 'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सो विपिपास' इति परिगणितानां मुक्तिकालभाव्याविर्भाववतामपहतपाप्मत्वादीनामपि संयमविशेषफलत्वं सिद्ध्यति। विशिष्य च 'कण्ठकूपे क्षुत्पिपासानिवृति' (पातं०यो०पा०३-२९सू०)रित्यादिसूत्रैः कण्ठकूपादिसंयमफलत्वेन विजिघत्सत्वादयो दर्शिताः। आगमेषु च पिशाचरक्षोयक्षगन्धर्वेन्द्रचन्द्रप्रजापतिचतुर्मुखानां पार्थिवाप्यतैजसनाभसमानसाहकङ्कारिकबौद्धै श्वर्याणि प्रत्येकमष्टगुणान्युत्तरोत्तरेषां पूर्वपूर्वैश्वर्याष्टकसहितानि तत्तज्जन्मप्रापकपुण्यफलानि प्रपञ्चितानि। किं बहुना। व्याघ्रादीनां क्रोधलोभादिना मनुष्यादिहनने पाप्मानुदयोऽप्युक्तरीत्या तत्तज्जातिप्रापककर्मविशेषकृतापहत-

पाप्मत्वाद्याविर्भावप्रयुक्त एव तस्मात्सत्यसङ्कल्पत्वादितिरोधानस्यापि परमेश्वरकार्यत्वं युक्तम् । किं च सर्वमेतत्तिरोधानं न मलाख्येनाञ्जनेनानादिनापि सदेकरूपेण कृतं, किं तु नयनपटलवत कालक्रमेण परिणतिं प्राप्नुवता। तथा च तत्तत्कालभवपरिणतिविशेषविशिष्टेनाञ्जनेन क्रियमाणमावारकविशेषकृतविशेष-वदनित्यमेव। अपि च तिरोधानं नाञ्जनेनैव कृतम्। किं तु सर्गकाले देहद्वयाकारपरिणतया प्रलये सूक्ष्मावस्थां प्राप्तया मायया तत्तज्जात्यायुर्भोगप्रापककर्मभिश्च कृतम् । तत्र कर्माणि स्वरूपत एवानित्यानि। मायापि स्थूलसूक्ष्मावस्थाविशेषवैशिष्ट्येन स्थूलावस्थायामपि तत्तद्देहविशेषवैशिष्ट्येन चानित्येति तत्तदावरकविशेषानित्यत्वकृतं तदाहितविशेषस्यावरणस्यानित्यत्वमनिवार्यमिति तस्य परमेश्वरकार्यतायां न काचिदनुपपत्तिः । अत एव तृतीयाध्याये 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययाविति (ब्र०३'२-४) सूत्रेण जीवस्य सत्यसङ्कल्पादेः संसारदशायां परमेश्वरसङ्कल्पात्तिरोधाने प्रतिपादिते कथमनादेस्तिरोधानस्य परमेश्वराधीनत्वमित्याशङ्कानिवृत्तये 'देहयोगाद्वा सोऽपी'ति तदनन्तर (ब्र०३-२-५)सूत्रेण सर्गकाले तत्तद्देहाकारपरिणतमायाकृतस्य प्रलयकाले सूक्ष्मावस्थमायाकृतस्य च तिरोधानस्य तिरोधायक-विशेषकृत-विशेषणनवनत्वावश्यंभावो दर्शितः । केचित्तु मलीमसेषु विषयेषु हेयत्वावरणं तिरोभाव इत्याहुः । तदपि वस्त्राच्छादितघटस्येव न विषयवर्गस्य तदाच्छादनकृतमावरणमिति युज्यते। द्रष्ट्रावारकमलमायाकर्मव्यतिरेकेण दृश्यावारककल्पनायां प्रमाणाभावत्। किं तु विषयगतहेयत्वप्रतीत्यभावनिर्वाहकं द्रष्ट्राच्छादनमेव तथा व्यवहृतमिति नार्थतो भेदः । अन्ये तु जीववर्गस्य स्वस्वानुगुणभोगादप्रच्युतिस्तिरोभावस्ततोऽप्रच्यावनं 'स्वसंस्कारोचिताद्भोगादप्रच्यावः शरीरिणाम् । प्रोक्तं संरक्षणं नाम न्यायेन परिपालन'मित्यादिग्रन्थेषु संरक्षणादिशब्देन प्रसिद्धं तिरोभावनमित्याहुः । एतस्मिन्पक्षे तिरोभावस्यानित्यत्वं सूपपादमेव। तिरोभावशब्दस्य तस्मिन्नर्थे वृत्तिः परं दुरुपपादा 'अन्तर्धाने तिर्यगर्थे तिर इत्यव्ययं भवे' दिति नैघण्टुकप्रसिद्धार्थमध्ये कस्यचिदर्थस्याग्रहणात्। अपरे तु प्रलये चेतनाचेतनप्रपञ्चस्य सूक्ष्मावस्थापत्तिस्तिरोभाव इत्याहुः। तस्मिन्पक्षे तिरोभावस्यानित्यत्वं तिरोभावशब्दस्य प्रसिद्धार्थपरत्वं च सूपपादमेव। सूत्रकारस्य तत्राभिप्रायस्तु दुरुपपादः । सूत्रकारो यान्प्रपञ्चधर्मापरमेश्वराधीनानग्रे व्यवहरति ते जन्मादीत्यादिशब्देन विवक्षिता इत्युपपादनीयम्। अत एव भाष्यान्तरगृहीतजन्मस्थितिभङ्गव्यतिरेकेण तिरोभावानुग्रहावप्यत्र भाष्ये गृहीतौ । 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्यया'विति (ब्र०३-२-४) सूत्रे तिरोभावस्य तन्मूलबन्धसहितस्य बन्धाविपर्ययरूपमोक्षस्य च परमेश्वरसङ्कल्पाधीनत्वेन व्यवहारदर्शनात्। न च तत्र तिरोभावः प्रलयकालभवसूक्ष्मावस्थापत्तिरूपः । किं त्वाजानसिद्धसत्यसङ्कल्प-त्वाद्यावरणरूप एव । अयं दोषः पूर्वयोरपि पक्षयोस्तुल्यः । तस्मात्सूत्रकारविवक्षितस्य तिरोभावस्यानित्यत्वेन परमेश्वराधीनत्वं प्रागुक्तप्रकारेणैवोपपादनीयम् । ननु, स्थितिः कथं परमेश्वरकार्येषु परिगण्यते । सृष्टं यावन्न संहरति तावत्तस्य स्थितेः स्वत एव सिद्धेः । यदि हि संहर्तान्यः प्रसक्तः स्यात्तदा संहारे प्रवृत्तस्य तस्य

निवारणं कार्यमति राज्यस्थितौ राज्ञ इव प्रपञ्चस्थितावीश्वरस्यापेक्षा स्यात्। परमेश्वरः स्वयं यावन्न सञ्जिहीर्षति तावत्तस्य नान्यो नाशकः प्रसज्यते । सत्यम् । घटादिस्थितौ कुलालादिकर्त्रपेक्षाभावेऽपि मृदाद्युपादानापेक्षास्त्येव । परमेश्वरः प्रपञ्चस्योपादानमपीति प्रपञ्चस्थितौ तदपेक्षा केन वा वार्यते । तत्सङ्कल्पापेक्षामप्युपपादयामः। समानकालजन्मनोरल्पाधिककालावस्थायित्वलक्षणमस्ति स्थितिवैषम्यम्। तदिदं स्थितिहेत्वदृष्टवैषम्यकृतं वाच्यम्। तत्र चेतनयोः स्थितिवैषम्यं स्वस्वादृष्टवैषम्यकृतम् । अचेतनयोस्तु तद्भोक्त्रदृष्टवैषम्यकृतमिति विशेषः । तददृष्टद्वयं तज्जन्यकार्यगताल्पाधिककालावस्थितेः परमेश्वरसङ्कल्पापेक्षा। किं च जन्मवतः प्रपञ्चस्य यावन्नाशं स्थितिरुह्यमानजलकुम्भस्य स्थितिर्देवदत्तस्येव परमेश्वरस्य धारणव्यापारमपेक्षते । स च व्यापारो जन्मवदिदं यावन्नाशमित्थं तिष्ठत्वित्याज्ञारूपस्य सङ्कल्प एव । 'एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः द्यावापृथिव्यौ विधृते तिष्ठत' इत्यादिश्रुतेः । 'अक्षरमम्बरान्तधृतेः'(ब्र० १-३-१०) 'सा च प्रशासना' दिति (ब्र०१-३-११) सूत्रयोस्तथैव प्रतिपादयिष्यमाणत्वाच्च । केचित्तु प्रपञ्चान्तर्गतचेतनाचेतनपदार्थानां परमेश्वरनियुक्तस्वस्वकार्यकरणेन मर्यादायामवस्थितिः स्थितिरित्याहुः । साप्यत्र स्थितिशब्देन सङ्ग्राह्यैव । 'एतस्यैवाक्षरस्य गार्गि प्रच्योऽन्या नद्यः स्यन्दन्तेश्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्याः यांयां च दिशामन्वेति । एतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवाः दर्वी पितरोऽन्वायत्ताः' 'भीषास्माद्वातः पवते' 'भीषोदेति सूर्य' इत्यादिश्रुतेः कूर्मपुराणवायुसंहितादिगतनियोगाध्यायवचनबृन्दाच्च 'परात्तु तच्छ्रुतेः' (ब्र०२-३-४०) अन्तर्याम्यधिदैवादि' (ब्र०१-२-१८)ष्वित्यधिकरणयोः सर्वस्यापि चेतनाचेतनव्यापारस्य परमेश्वरप्रेरणाधीनत्वस्य व्यवस्थापयिष्यमाणत्वाच्च । तस्मात्सौत्रेण जन्मादिशब्देन परमेश्वरकर्तृकं जन्मादि प्रपञ्चधर्मपञ्चकं ग्राह्यमिति युक्तमेव । एकवचनं जन्मादीनां समुदायोपलक्षणम् । न त्वेकैकमिति ज्ञापनार्थम्। लक्षणं भवितुमर्हति । अनतिप्रसङ्गात् । जगद्वाचित्वा (ब्र०-१-४-१६) दित्यधिकरणे च श्रुतजन्ममात्रकारणत्वस्य 'अक्षरमम्बरान्तधृते' (ब्र० १-३-१८) रित्यधिकरणे स्थितिकारणत्वमात्रस्य 'अत्ता चराचरग्रहणा' (ब्र०१-२-९)दित्यधिकरणे प्रलयकारणत्वमात्रस्य 'तन्निष्ठस्य मोक्षोपदेशा'दिति (ब्र०१-१-७) सूत्रे मोक्षकारणत्वमात्रस्य च ब्रह्मलिङ्गतयोपन्यासाच्च । तथापि जन्मादीनामन्यतमकारणत्वस्य लक्षणतयोक्तौ तदितरकारणवस्त्वन्तरसत्त्वशङ्कया लक्षणीयस्य ब्रह्मणो निरतिशयं बृहत्त्वं न सिध्येत्। अतस्तद्ब्रह्मेति शेषाध्याहारलब्धलक्ष्यपरब्रह्मशब्दसमर्पितनिरतिशयबृहत्त्वरूप लक्ष्याकारविपरीताबृहत्त्वशङ्काव्यवच्छेदेन सप्रयोजनं समुदायस्य लक्षणीकरणम् । एवं जन्मादि समुदायस्य लक्षणत्वमभिप्रेत्यैव 'यतो वे'त्यादिलक्षणवाक्ये' 'तद्ब्रह्मेति 'सकृल्लक्ष्यनिर्देशः कृतः। तत्प्रदर्शितं कारणत्वं ब्रह्मलक्षणं सिद्धं कृत्वा तेन प्रसिद्धसृज्यभावेन्द्रादिव्यावृत्त्या मन्त्रार्थवादादिप्रसिद्धमहिमसकलदेवतामध्ये किं देवतारूपं ब्रह्मेति संशयनिवृत्तावपि श्रुत्यन्तरश्रुतजगत्कारणहरिहरादिमध्ये किंदेवतारूपमिति संशयानिवृत्तेः। तथा संशयानां ब्रह्मातिस्तत्वमात्रं जानतां केषाञ्चिद्विमर्शप्रदर्शके 'ब्रह्मवादिनो वदन्ती' त्युपक्रम्य प्रवृत्ते 'किं

कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठा । अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थे'ति मन्त्रे -किं कारणं ब्रह्मे'ति विमर्शवाक्येन सामान्यतः प्रदर्शितं कारणत्वं तत्प्रपञ्चनपरैः पञ्चभिर्वाक्यैः पञ्चकृत्यकारितारूपत्वेन विवृतम् । तत्र हि 'कुतस्म जाता'इत्यादिभिस्त्रिभिर्वाक्यैर्जन्मस्थितिप्रलयकारित्वमुच्यत इति स्पष्टमेव । 'केनाधिष्ठिताः सुखेतरेषु वर्तामह' इति वाक्येन बन्धकारित्वमुच्यते । 'सुखेतरे'ष्वित्यस्य द्वन्द्वसमासेन सुखदुःखात्मकेष्वित्यर्थपरतया पञ्चमीतत्पुरुषेण वैषयिकसुखस्यापि दुःखपक्षे निक्षेपात्केवलदुःखरुपेष्वित्यर्थपरतया वा तथाभूतेषु जन्मप्रवाहेष्वित्यत्र पर्यवसानम् । 'ब्रह्मविदो व्यवस्थे'त्यनेन 'केने'ति पदानुषङ्गवता बन्धनिवृत्तिकारित्वमुच्यते। ब्रह्मविदः ब्रह्मस्वरूपनिर्धारणपूर्वकतत्साक्षात्कारवतः पुरुषस्य व्यवस्था सकलदुःखनिवृत्तिपूर्वकनिरतिशयानन्द प्राप्तिलक्षणा विशिष्टावस्थातस्य केवलं सुखमेव न तु कदाचिदपि दुःखमिति व्यवस्था वा, ब्रह्मज्ञानफलात्कर्मफलादिव कदाचिदपि प्रच्युतिर्नास्तीत्येवंभूता मर्यादा वा केन कारणभूतेन पुरुषधौरेयेण कृतेति तदर्थः । ननु लक्षणं लक्ष्यस्येतरभेदसाधने शब्दविशेषवाच्यत्वसाधाने वा हेतुतयोपयुज्यते। हेतौ च व्यभिचारवारकमेव विशेषणं निवेश्यं नान्यदिति नैयायिकानां मर्यादा । कथमिह लक्ष्याकारविपरीताकारशङ्काव्यवच्छेदप्रयोजनकं विशेषणं लक्षणे निवेश्यते । उच्यते । हेतौ व्याप्तिग्रहौपयिकं विशेषेण निवेश्यमिति नियमः । हेतुविशेषणानां व्याप्यतावच्छेदकघटकतयोपयोगात् । न तु व्यभिचारवारकमेव विशेषणे निवेश्यमिति नियमः । तथा सति परिभाषामात्रत्वापत्तेः रूपादिषु पञ्चसु मध्ये रूपस्यैव व्यञ्जकद्रव्यत्वादिहेतौ मध्यान्तविशेषणस्य व्यभिचारावारकत्वेऽप्यप्रसिद्धिवारकतया तत्सम्पादितप्रसिद्धिकहेतुनिष्ठव्याप्तिग्रहौपयिकतामात्रेण सार्थकत्वाभ्युपगमाच्च। न च मनसि व्यभिचारवारणार्थस्यावधारणस्य मध्यान्तविशेषणं विना स्वरूपालाभेन व्यभिचारवारणाशक्त्या तदपि विशेषणं तल्लाभसम्पादनद्वारा व्यभिचारवारणप्रयोजनकमेवेति वाच्यम् । स्वरूपालाभो ह्यवधारणस्य हेत्वप्रसिद्ध्यापादकतयैव नान्यथा । तथात्वेऽपि तस्य व्यभिचारवारणशक्तिर्न हीयते। न हि हेत्वप्रसिद्ध्यापादकं विशेषणं साध्याभाववति स्वं विशिष्टहेत्वनुसन्धानं न निरुणद्धि । ननु, रूपादिष्वित्यादिहेतोरमयर्थः । रूपेतरविशेषगुणाव्यञ्जकत्वे सति रूपव्यञ्जकत्वादिति । तथा च सत्यन्तं मनसि व्यभिचारवारकं नात्र किञ्चिदप्रसिद्धिवारकमिति चेत् न । यथा श्रुतहेतावप्यप्रसिद्धिवारकतया व्याप्तिग्रहौपयिकत्वेन विशेषणसार्थकत्वसमर्थनसम्भवे परिभाषामात्रसमर्थनार्थमर्थान्तर-कल्पनस्यायुक्तत्वात् तथार्थान्तरकल्पनेऽपि विशेषणगुणशिषणस्य हेत्वप्रसिद्धिवारणं विना फलान्तराभावाच्च । यदि तु , विशेषगुणविशिष्टप्रतियोगिकाभावस्तदविशिष्टप्रतियोगिकाभावादन्य इति विशिष्टाभावघटितहेतुनिष्ठव्याप्तिग्रहौपयिकतया तद्विशेषणं सार्थकम्। प्रतियोगितावच्छेदक-प्रकारकप्रतियोगिभावस्तदविशिष्टज्ञानमन्तरेणाभावविशेषोपस्थितेरसम्भवादित्युच्येत तदा व्याप्तिग्रहौपयिक-तयैव विशेषसार्थकत्वमभ्युपगतमिति घट्टकुटिप्रभातवृत्तान्तः । एतेन रसाव्यञ्जकत्वे सति

रूपव्यञ्जकत्वादिति तस्य हेतोरर्थ इत्यपि शङ्का निरस्ता। तत्रापि रसविशेषणस्य हेतुप्रद्धिसम्पादनेन हेतुशरीरविनिष्टोभावोपस्थितिसम्पादनेन वा व्याप्तिग्रहोपयुक्ततयैव सार्थकत्वस्य समर्थनीयत्वात्। एवं शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वमिन्द्रियत्वमिति लक्षणे भागासिद्धिवारकं शब्देतरविशेषणं विशिष्टाभावघटितहेतुनिष्ठव्याप्तिग्रहौपयिकतया वा श्रोत्रवृत्तिमनस्संयोगरूपहेतुनिष्ठ-व्याप्तिग्रहौपयिकतया वा सार्थकं नैयायिकैरङ्गीकृतमित्यादिर्भूयानस्य विषय:। एवं हेतुविशेषणानां व्याप्तिग्रहौपयिकतया साफल्ये स्थिते सत्येतदधिकरणव्युत्पादयिष्यमाणन्यायत: शिवैकान्तिकेन ब्रह्मलक्षणेन हेतुना शिवस्य पुर्वोक्तरीत्या निरतिशयबृहत्त्वरूपे ब्रह्मत्वे तत्प्रवृत्तिनिमित्तकब्रह्मशब्दवाच्यत्वे वा साधनीये यदि जन्मकारणत्वमात्रं तत्र हेतूक्रियेत तदा जन्मकारणत्वस्य स्थित्याद्युपयोगिज्ञानक्रियाशक्ति-प्रयोजकत्वाभावात् स्थित्यादिकारणभूतेश्वरान्तरसद्भावशङ्कानिवर्तकत्वाभावाच्च ततो निरतिशयबृहत्त्वादिकं न सिद्ध्येत्। अतस्तत्सिद्ध्यनुकूलव्याप्तिविरोध्यप्रयोजकत्वादिशङ्कानिरासेन तथाभूतव्याप्तिग्रहोपयोगितया जन्मादिसमुदायस्य लक्षणीकरणमिति न कस्यापि वैयर्थ्यशङ्कावकाश:। एवं जन्ममात्रस्य लक्षणीकरणे निरतिशयबृहत्त्वरूपलक्ष्याकारो न सिध्येदित्यपरितोषादेवाद्यस्य हिरण्यगर्भस्य यतो जन्मेति सूत्रव्याख्यानमुक्तमिति सूचयितुं प्राक्सूत्रपदविभागो दर्शित:। ननु, 'यतो वे' त्यादिलक्षणकथनं नानुमानविधया ब्रह्मत्वप्रतिपत्त्यर्थम्। किं तु यतो भूतानि जायन्ते तद्ब्रह्मेति शब्दविधयैव। ततश्च व्याप्तिग्रहविरोध्यप्रयोजकत्वशङ्कानिरसनस्यानपेक्षिततत्वात् जन्मादिसमुदायस्य लक्षणीकरणं निष्फलम्। अनेकत्र सांशयिकस्य ब्रह्मत्वस्य जगज्जन्ममात्रेणापि शाखाग्रेण चन्द्रशब्दवाच्यत्वस्येव क्वचिद्विशेषे निर्धायितुं शक्यत्वादिति चेदुच्यते। यदि मन्त्रार्थवादादिप्रसिद्धमहिम्नां देवानां मध्ये को देवो निरतिशंयबृहत्त्वशाली यज्ज्ञानात् 'ब्रह्मविदाप्नोति पर'मित्यादिषु महाफलं श्रूयत इति जिज्ञासोर्देवविशेषं ब्रह्मत्वनिर्धारणं केवलं शब्दविधया चिकीर्षितमभविष्यत् तदानीमयं देवो ब्रह्मेति विशिष्यैव निरदेक्ष्यत: प्रतिपत्तिलाघवात्। जन्मादिरूपलक्षणमुखेन तन्निर्धारणे तल्लक्षणं शिवनारायणादिषु बहुषु श्रूयमाणं न निर्धारणक्षममिति शङ्कानिरासार्थमेतत्सूत्रनिरूपणीयदृढन्यायावगत्यपेक्षासत्त्वेन प्रतिपत्तिगौरवात्। तस्मा' द्यतोवे 'त्यादिश्रुतौ गुरूपायेनापि लक्षणेन लक्ष्यनिर्धारणात्तत्र सकृदेव लक्ष्यनिर्देशात् तल्लक्षणानुवादके श्वेताश्वतरमन्त्रे कारणत्वस्य पञ्चकृत्यकारित्वरूपतया विवृतत्वाच्च शब्दविधया चिकीर्षितमपि ब्रह्मनिर्धारणमनुमानरूपयोपपत्त्या तात्पर्यविषयतापादनेन दृढीकर्तुं जन्मादिसमुदायस्यैव लक्षणीकरणे श्रुतेस्तात्पर्यमित्यवसीयते। अतो युक्तं सूत्रे 'जन्मादी'त्येकवचनेन समुदायस्य लक्षणत्वसूचनम्। तत्र नपुंसकनिर्वाहार्थं भाष्ये कृत्यमिति बहुव्रीहिलभ्यान्यपदार्थप्रदर्शनम्। एवं सौत्रं जन्मादिपदं व्याख्यातम्। अथास्येति पदं व्याख्येयम्। तज्जन्मादिर्धर्मिपरमिति स्पष्टमेव। तद्यदि चेतनवर्गमात्रपरं तदानीमचेतनवर्गजन्मादिकारणवस्त्वन्तरशङ्कानिराकरणाभावत् लक्षणतो निरतिशयबृहत्त्वं न सिध्येत्। यदि चेतनाचेतनात्मकसर्वकार्यपरं तदा तिरोभावानुग्रहयोर्बन्धमोक्षरूपतया चेतनैकान्तिकयो' र्यतोवे'

त्यादिविषयवाक्ये जीवनरूपतयोक्तायाः स्थितेश्च तत्रानन्वयः स्यात् । 'यतो वा इमानि भूतानी' ति भूतशब्दस्य 'न हिंस्यात्सर्वा भूतानी' त्यादिप्रयोगात् प्राणिनिकाये रूढत्वेन प्रपञ्चस्य भवनक्रियायोगिकार्यमात्रे योगस्य कल्पनीयत्वेनास्वारस्यादित्याशङ्क्य विशेषयति-**चेतनेति** । चेतनाचेतनयोः सम्मेलनं शरीरिशरीरभावेन सम्बन्धः तेन समरसीभूतस्य विशिष्टात्मनैकीभावं प्राप्तस्येत्यर्थः । अनेनैतदुक्तं भवति । सर्वमप्यचेतनं कार्यं द्रव्यं सुरनरतिर्यक्स्थावररूपस्य भूतग्रामकस्य शरीरमेव । न ततोऽतिरिक्तं किञ्चिदस्ति । शरीरस्थ तद्धर्माणां गुणक्रियादीनां जन्मादीनि परम्परासम्बन्धेन शरीरिण्यपि व्यपदिश्यन्ते 'यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवती 'त्यादिश्रुतिषु चैत्रस्य पुत्रो जातः स कृशो नीलः स्थूलो गौरो जातः सञ्चाराभिलापादिक्रियावान् जातः इत्यादिलौकिकव्यवहारेषु च। एवं च 'यतो वे'त्यादिवाक्ये भूतशब्दोदितेषु स्वस्वशरीरविशिष्टेषु चेतनेषु शरीतत्तद्धर्मजन्मादयः शरीरादिद्वारकसम्बन्धेन सर्गाद्यकालभवतत्तद्भोगाद्यनुगुणचिच्छक्तिविकासादिरूपास्तदीय-जन्मादयस्तद्द्वारकसम्बन्धेन च व्यपदिश्य लक्षणीक्रियन्ते । अतो न काचिदनुपपत्तिरिति । ननु, 'इमानि भूतानी 'ति विषयवाक्ये बहुवचननिर्दिष्टानां जन्मादिधर्मिणां सूत्रे किमर्थमेकवचनेन निर्देश इति जिज्ञासायां तत्प्रयोजनं विशेषणमुखेन दर्शयति-**प्रपञ्चविलासस्येति** ।। प्रपञ्चो विलास इव प्रपञ्चविलासस्तस्य लीलाकृतमन्दस्मितादि वदयत्नपूर्वकस्य प्रपञ्चस्येत्यर्थः। एवं चास्येत्येकवचनमेककार्यवत्परमेश्वरं प्रत्यत्नसाध्योऽयं विचित्रानन्तकार्ययुक्तः प्रपञ्च इत्येतत्सूचनार्थमित्ययत्नसाध्यत्वलक्षकेन विलासशब्देन दर्शितं भवति। तेनापि परमेश्वरस्यापरिच्छेद्यानन्तशक्तिमत्त्वरूपमहिमविशेषसिद्धिः । एवमस्येति पदं व्याख्यातम् । यत इति पदं व्याख्येयम् । तल्लक्षणीकृतजन्मादिप्रपञ्चसम्बन्धित्वेत लक्ष्यनिर्देशकमिति स्पष्टमेव । अत्रेयं शङ्कोन्मिषति । तसिल्प्रत्ययोऽत्र जनिकर्तृप्रकृतिरूपापादानपञ्चम्यन्तान्न भवति । जनिकर्तुः प्रपञ्चस्यात्र षष्ठ्यन्तपदेन जन्माद्युपसर्जनतया निर्दिष्टस्य 'यतो वा इमानि भूतानि जायन्त' इति मूलश्रुताविव यच्छब्दनिर्ष्टिकारणसम्बन्धित्वेनान्वयाभावात् । 'जनिकर्तुः प्रकृति 'रिति (पा०१-४-३०) सूत्रे जनिकर्तृविशेषणस्य यत्र जनिकर्तुः कार्यतयान्वयो न तु जनेः तत्रैवापादानसंज्ञेत्येतदर्थताया वाच्यत्वात् । अन्यथा तद्वैयर्थ्यात् । प्रकृतिशब्दस्योपादानरूपकारणविशेषवाचितया तत एव तत्कार्यस्याक्षेपतो लाभसम्भवात् । अथोच्येत प्रकृतिशब्दः स्वभावविषययैव शक्त्या मृत्स्वभावो घट इत्यादिव्यवहारात्कार्यस्वभावरूपेषूपादानेषु प्रयुज्यते। क्लृप्तशक्त्या प्रयोगनिर्वाहे शक्त्यन्तरकल्पनानुपपत्तेः। तथा सति कार्यस्य प्रकृतिस्वरूपं कारणमित्येतावत्तत्र प्रयोक्तव्यं स्यादिति चेत् । सत्यम् । तथापि लोके वेदे च निरूढया प्रकृतिपदमात्रस्य तत्र प्रयोगः न्यायशास्त्रव्यवहारे कार्यं प्रति समवायिनि कारणे समवायिपदमात्रस्येव । पाणिनिना तु 'प्रकृति 'रित्येतावति सूत्रे कृते विवक्षितार्थः स्पष्टो न भवतीति जायमानस्य स्वभावरूपं यत्कारणं तस्यापादानसंज्ञा विधीयत इत्यर्थस्पष्टीकरणाय 'जनिकर्तु' रति विशेषितम्। अत एव 'तदर्थं विकृतेः प्रकृता 'विति (पा०५-१-१२) सूत्रे विकृतिपदसन्निधानेन

प्रकृतिपदस्योपादानपरत्वं लभ्यतामित्येतदर्थमेव विकृतिग्रहणं कृतम् । एवं जनिकर्तृविशेषणमन्यथैवार्थवदिति नैतद्युक्तम्। अत्र कारक इत्यधिकारतः कारकाणां मध्ये यतस्वभावरूपं कारकमित्यर्थलाभे सति कस्य स्वभावरूपमित्याकाङ्क्षायां कार्यस्य स्वभावरूपमित्यर्थपर्यवसानेन कारणावान्तरविशेषभूतोपादानपरत्वाधिगतिसम्भवात् यथाकथञ्चिदत्र 'जनिकर्तुः' प्रकृतिरिति(पा०१-४-३०) सूत्रेणापादानसंज्ञासमर्थनेऽपि जन्मकारण इव जगत्स्थितिप्रलयादिकारणेष्वपादानसंज्ञाविधानाभावेनापादानपञ्चम्यन्तस्य स्थित्यादिभिरन्वयाभाव-प्रसङ्गाच्च । 'यत' इत्यस्यापादानपञ्चम्यन्तत्वाभ्युपगमे निमित्तान्तरशङ्कानिरासाभावेन ततो लक्ष्यस्य निरतिशयबृहत्त्वासिद्धेश्च । अथोच्येत हेतुपञ्चम्यन्तादिह तसिल्प्रत्ययोऽस्तु तद्धेतुत्वं सङ्कोचे कारणाभावान्निमित्ततयोपादानतया च विवक्षितमिति ततो निरतिशयबृहत्त्वसिद्धिरप्युपद्यत इति । नैतदपि युक्तम्। 'विभाषा गुणेऽस्त्रिया'(पा०२-३-२५सू.)मिति गुण एव हेतौ पञ्चमीविधानेन द्रव्ये ब्रह्मणि हेतौ पञ्चम्यसम्भवादितीमां शङ्कां निराकर्तुं व्याचष्टे-**यतो यस्मादिति**। 'पुत्रात्प्रमोदो जायत' इत्यादिप्रयोगदर्शनात् 'विभाषा गुणेऽस्त्रियामिति (पा०२-३-२५) सूत्रे विभाषेति योगाविभागेनागुणवचनेभ्योऽपि हेतौ पञ्चमी समर्थनीयेति भावः।। 'हेता' विति (पा०२-३-२३)सूत्रविहितहेतुतृतीयान्तादप्यत्र तसिल्प्रत्यय उपपद्यते। 'इतराभ्योऽति दृश्यत' (पा०५-३-१४ सू.) इति तृतीयान्तादपि तद्विधानादित्यपि द्रष्टव्यम्। सूत्रस्यापेक्षितं पूरयति**तद्ब्रह्मेति शेष इति** । यत्पदाक्षिप्ततत्पदाध्याहारेण पूर्वसूत्रगतब्रह्मपदानुषङ्गेण पूर्वसूत्रे प्रथमान्तब्रह्मपदाभावात् संयजत्रैरङ्गानी 'त्यत्र 'गच्छन्ता 'मिति पदस्येव प्रथमान्तब्रह्मपदस्याप्यध्याहारेण वेदं शेषपूरणम् । एवं प्रदर्शितस्य लक्षणस्य पूर्वपक्षसिद्धान्ताभ्यां शिवैकान्त्यव्यवस्थापनार्थम् अधिकरणशरीरप्रदर्शनाय विषयवाक्यमुदाहरति-**यतो वेति**। नन्वत्रापादानपञ्चमीतस्तसिल्प्रत्यय इत्यभ्युपगन्तव्यम्। न तु सूत्र इव हेतुपञ्चमीतः। उपपदविभक्तितः कारकविभक्तेर्बलीयस्त्वात् । तद्वदिह 'जनिकर्तुः प्रकृति 'रिति (पा०१-४-३०)सूत्राप्रवृत्तिशङ्कानवकाशात् । न च वाच्यं यत इत्यनुवादस्य प्रापकवाक्यसापेक्षत्वात् 'तदैक्षत बहु स्यां प्रजायेयेति' 'तत्तेजोऽसृजते 'त्यादिप्रापकवाक्यानुसारेण निमित्तोपादानसाधारण्याय हेतुपञ्चम्यत्र । वाच्येति । अनुवादो ह्यनूद्यमानार्थस्य प्रापकमपेक्षत इत्येव नियमः। न तु पुरोवादप्राप्तं सर्वं यथाकथञ्चिच्छब्दस्य सामर्थ्यमाश्रित्यानुवादनीयमिति नियमः । न चात्र सूत्र इव तृतीयान्तात्तसिलिति पक्षान्तरं वक्तुं शक्यम्। येनापादाने तृतीयाभावात्कारकविभक्तिबलीयस्त्वन्यायाप्रवृत्तेः हेतुतृतीयैव स्यादिति शङ्क्येत । 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त 'इति वाक्ये प्राचीनेष्वन्नादिवाक्येषु च यत इति स्थाने पञ्चमीदर्शनेनात्रापि पञ्चम्यन्ततावगमात् । तृतीयान्तत्वाभ्युपगतावुपपदविभक्त्याश्रयणं स्यादिति कारकविभक्तिबलीयस्त्वेनापि पञ्चम्यन्ततावगमाच्च । तथा च विषयवाक्ये निमित्तान्तरशङ्कानिरासाभावाल्लक्ष्यस्य निरतिशयबृहत्त्वं लक्षणतो न सिद्ध्यतीति चेन्न। लक्षणतो निरतिशयबृहत्त्वसिद्ध्ययर्थमेव दुर्बलस्यापि हेतुपञ्चम्यन्तत्वस्याश्रयणोपपत्तेः। अन्यथा

लक्षणकथनवैयर्थ्यप्रङ्गात्तस्य लक्ष्यगतनिरतिशयबृहत्त्वसिद्ध्युपयोग्यनुमानरूपोपपत्तिप्रदर्शनैक-फलकत्वस्य प्राक्समर्थितत्वात् वाक्यवैयर्थ्याच्च पदमात्रे क्लिष्टगत्याश्रयणस्य न्याय्यत्वात् । अत एव' एकादश पशोरवदानानि तानि द्विरवद्यती 'तिवाक्यवैयर्थ्याय 'यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्ये 'त्यत्र वपाग्रहणस्य पाशुकहविर्मात्रोपलक्षकत्वमाश्रितम्। ननु लक्षणकथने तन्निर्णायकादिषु च जन्मवाक्ये पञ्चमी जीवनवाक्ये तृतीया च व्यवस्थया दृश्यते । सा व्यवस्थार्थव्यवस्थामन्तरेण नोपपद्यते। अतस्तेषु तृतीयानां हेत्वर्थत्वात्पञ्चमीनामपादानार्थत्वमभ्युपगन्तव्यमिति चेन्न । तृतीयानां करणार्थत्वोपपत्तेः। 'न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितावि 'ति श्रुत्यन्तरे ब्रह्मणः प्राणिनां जीवने प्राणवाय्वाद्यपेक्षयातिशयितसाधकत्वरूपस्य साधकतमत्वस्य प्रतिपादनात् । ननु , तथापि विषयवाक्ये जन्मादिपञ्चकं नोपात्तमिति श्रुतिसूत्रयोर्नानुगुण्यमिति चेन्न । 'प्रयन्ती' त्यनेन लयप्रतिपादकेन दैनन्दिनप्रलयवदात्यन्तिकलयरूपस्य मोक्षस्यापि सङ्ग्रहात् 'अभिसंविशन्ती 'त्यनेन अभितस्स्वपन्तीत्यर्थकेन तिरोभावस्य प्रतिपादनाच्च विषयवाक्यस्यापि कृत्यपञ्चकविषयत्वात् । **प्रधानेति** । 'स विश्वजिद्वि श्वकृदात्मयोनिः कालकालो गुणी सर्वविद्यः' । इति मन्त्रस्य पूर्वभागः । आत्मयोनिः स्वयम्भूः आत्मनां योनिर्वा । कालकालः कालस्य क्षणादिनिचयस्य वैवस्वतस्य वा नियन्ता। गुणी सत्यसंकल्पत्वादिकल्याणगुणसंपन्नः । सर्वा विद्याऽस्येति सर्वविद्यः सर्वविद्याधिष्ठाता । ईशानस्सर्वविद्याना 'मितिश्रुतेः । प्रधानक्षेत्रज्ञयोः प्रकृतिपुरुषयोः पतिः पालकः । गुणेशस्त्रैगुण्यनियन्ता। संसारस्सन्ततं सरणमिह परत्र च गतागतम् । तेन जन्मप्रलययोर्ग्रहणम् । बन्धस्तिरोभावः । सूत्रे कृत्यपञ्चकं गृहीतमित्यस्य यत इति पञ्चम्या हेत्वर्थकत्वस्य च स्पष्टीकरणार्थं विषयवाक्यान्तरोदाहरणम् । अनपायगुणद्वारकं तथाभूतविग्रहद्वारकं च स्वरूपलक्षणमप्यनेन सूत्रेण विवक्षितमिति दर्शयितुं 'सत्यं ज्ञान"मृतं सत्य' मिति मन्त्रयोरुदाहरणम् । अत्र जन्मादिकं ब्रह्मणो लक्षणं भवितुमर्हति न वेति तत्प्रयोजनसम्भवासम्भवाभ्यां संशये पूर्वः पक्षः नैतद्ब्रह्मणो लक्षणं भवितुमर्हति अतन्निष्ठत्वात् । लक्षणस्य हि लक्ष्यगतकिञ्चिच्छेषसिद्धिः प्रयोजनम् । तत्र च प्रयोजनं लक्षणे हेतुतयोपयुज्यते इतीष्यते । न चातन्निष्ठं तन्निष्ठसाध्यसिद्धावुपयुज्यते । विशिष्य च ब्रह्मलक्षणस्येदं वस्तु ब्रह्मेति श्रृङ्गग्राहिकया वस्तुविशेषब्रह्मत्वनिर्धारणं प्रयोजनमियष्यते । न चैतल्लक्षणं तन्निर्धारणं जनयितुमीष्टे । यतश्श्रुतिवाक्येषु क्वचिदानन्दः क्वचित्सत् क्वचिज्ज्ञानं क्वचिच्छिवः कारणत्वेन वर्ण्यते । तेषु किं ब्रह्मेति सर्वसाधारणकूटसाक्षिणानेन लक्षणेन निर्धारणीयम् । न च सर्वेषामेतेषामव्यवस्थितविकल्पेन व्यवस्थितविकल्पेन समुच्चयेन वा जगज्जन्मादिकारणत्वमिति तथैवैतेषां ब्रह्मत्वमपि स्यादिति वाच्यम् । अव्यवस्थितविकल्पे श्रुतहान्यादिदोषापत्तेः । तथाहि यदा तावदानन्दशास्त्रस्य प्रामाण्यमभ्युपगम्यते तदा 'सदेव सोम्येद 'मित्यादिशास्त्रश्रुतं सदादीनां कारणत्वं हातव्यमिति सदादिशास्त्राणामपौरुषेयत्वेन प्राप्तस्य प्रामाण्यस्य परित्यागो दोषाभावादप्राप्तस्याप्रामाण्यस्य स्वीकारश्चेति तेषु दोषद्वयमापतति । यदा

पुनस्सदादिशास्त्राणामन्यतमं प्रमाणमभ्युपाम्यते तदा तत्र प्राक्स्वीकृताप्रामाण्यपरित्यागः परित्यक्तप्रामाण्यस्वीकारश्चेति तत्र दोषद्वयमापततीत्येवं प्रतिशास्त्रं प्रतीतप्रामाण्यपरित्यागाप्रतीताप्रामाण्यकल्पनारूपदोषद्वयं पर्यायान्तरे कल्पिताप्रमाण्यपरित्यागपरित्यक्तप्रामाण्यस्वीकाररूपं दोषद्वयं चेति चत्वारश्चत्वारो दोषाः प्रादुष्युः। तस्मादत्यन्तबाधादपि पापीयान्विकल्पः। अत्यन्तबाधे हि यद्वाक्यं दुर्बलत्वेनावधारितं तत्प्रबलविरुद्धत्वात्स्वार्थात्सर्वथैव प्रच्यावितं सदर्थसङ्कोचं वृत्त्यन्तरं वा समासाद्य निर्वृणुयादेव। न त्वव्यवस्थितजयपराजयपर्यायप्राप्तिमदसमाप्यमानसमरसमबलनरपतिद्वयन्यायेन क्लेशानुवृत्तिमनुभवेत्। न वा श्रोतॄन्समबलयोद्धनरपतिद्वयविषयवासिजनानिवान्यतरसमाश्रयणसन्देहसमुद्रतरङ्गः परम्परानिमज्जनेन क्लेशयेत्। नचैवंभूतयोरेव व्रीह्यियववाक्ययोर्विकल्पोङ्गीकृतः तथेहापि स्यादिति शङ्कनीयम्। अनुष्ठेयार्थेष्वैच्छिकप्रयोगभेदेनोभयानुग्रहात् कथञ्चिदव्यवस्थापरिहारसम्भवेऽप्यत्र सिद्धे वस्तुनि तत्परिहारासम्भवात्। तस्मादव्यवस्थितविकल्पस्तावदिह न सम्भवति। कल्पभेदादिना व्यवस्थितविकल्पाभ्युपगमे तु 'एकमेवाद्वितीयं' 'द्यावाभूमी जनयन्देव एक' इत्यादिश्रुतिविरुद्धब्रह्मानेकत्वप्रसङ्गः। आनन्दादयः समुच्चिताः कारणमित्येवंरूपसमुच्चयपक्षेऽप्ययं दोषस्तुल्यः। अधिकश्च ब्रह्मनामैकमत्यासम्भवो दोषः। तेषां धर्मसमुच्चयः कारणमित्यपि पक्षो न युज्यते। अचेतनस्य तस्येक्षापूर्वकस्त्रष्टृत्वाद्यसम्भवात्। एवमभिन्ननिमित्तोपादानत्वरूपतयाभिमते लक्षणे कर्तृत्वरूपनिमित्ततांशस्यानन्दादिष्विदंतया ब्रह्मनिर्धारणरूपप्रयोजनपर्यवसायित्वाभावाल्लक्षणानुप्रवेशो न युज्यते। उपादानतांशस्य त्वसम्भवादेव स न युज्यते। 'मायां तु प्रकृति' मिति श्रुतौ मायाया जगदुपादानत्वश्रवणात्। न च 'आत्मन आकाशस्संभूत' इत्यादिष्वपादानविषयपञ्चमीश्रुत्यादिभिः ब्रह्मणोऽप्युपादानत्वं प्रतिपाद्यत इति वाच्यम्। ज्ञानादिरूपस्य ब्रह्मणः तद्विलक्षणप्रपञ्चोपादानत्वासम्भवेन निर्विकारत्वश्रुतिविरोधेन च पञ्चम्यादीनां हेतुत्वाद्यर्थान्तरपरत्वात्। तस्माद्यदि कर्तृत्वरूपनिमित्तत्वं लक्षणं यदि वा बहूनामानन्दादीनामैकमत्यासम्भवेन निमित्तत्वायोगात् तन्तूनामिव बहूनामुपादानत्वसम्भवाच्चोपादानत्वं लक्षणं यदि वा निरतिशयब्रह्मत्वसिद्ध्यर्थं मिलितमुभयं लक्षणं सर्वथापि जगत्कारणत्वं लक्षणं न सम्भवति। अत एवानन्दरूपत्वं सद्रूपत्वं ज्ञानरूपत्वमुमासहायत्वविरूपाक्षत्वादिविशिष्टविग्रहशालित्वमित्येवमाद्यपि लक्षणं भवितुं नार्हति। विकल्पसमुदायदोषानतिक्रमादेव। स्यादेतत् सज्ज्ञानमानन्दः शिव इत्येतेषां नास्ति भेदः। 'सदेव सोम्ये' दमित्यादिश्रुतिप्रतिपन्नस्य सत एव जगत्कारणस्य तत्तच्छास्त्रान्तरानुसारेण छागपशुन्यायाच्चेतनतया प्रचुरानन्दतया शिवरूपदेवताविशेषतया च पर्यवसानात्। अतोऽत्र विरोधाभावान्न विकल्पसमुच्चयदूषणशङ्कावकाश इति चेत्। स्यादेतदेवं यद्यत्र विरोधो न स्यात्। अवधारणविरोधात्तु नात्र च्छागपशुन्यायोऽवतरति। तथा हि-'सदेव सोम्येदमग्र आसीत्' 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते-' 'न सन्न चासच्छिव एव केवल' इतिसदानन्दशिवकारणवाक्येषु तावदवधारणानि छागपशुन्यायेन

परस्परसम्प्राप्तानां रूपान्तराणां व्यवच्छेदेनैव सप्रयोजनानि वाच्यानि । अन्यथा तद्वैयर्थ्याच्छ्रुतिशैलीमनुविदधानेषु कल्पसूत्रे 'ध्वाज्यहविरूपांशुयाजः पौर्णमास्यामेव भवती'त्यादिवाक्येष्ववधारणस्य कल्पसूत्रान्तरस्थसमानप्रकरणप्राप्तामावास्याकालोपसंहारशङ्काव्यवच्छेदेनैवार्थवत्त्वस्य दृष्टत्वाच्च शिव एवेति वाक्ये सद्रूपताव्यवच्छेदः कण्ठतोऽपि कृतो दृश्यते । तथा बृहदारण्यकोपनिष'द्यस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेद' इत्यादिना 'अयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानी'त्यन्तेन सर्वकारणं वस्तूपक्षिप्य 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघनः एवैवं वा अरे अयमात्मा अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे'ति तस्य प्रज्ञानैकरूपत्वप्रतिपादनस्य कारणवाक्यान्तरप्राप्तरूपान्तरव्यवच्छेदपरत्वमवधार्यते। कारणवाक्यान्तरेषु तदन्यकारणवाक्यप्राप्तरूपान्तरव्यवच्छेदकावधारणदर्शनात् । तेनान्येषामपि ज्ञानकारणवाक्यानां कारणं ज्ञानैकरूपमित्यत्र तात्पर्यमवसीयते । न च शाखाभेदेनोदितानुदित होमव्यवच्छेदेऽपि साध्यरूपस्याग्निहोत्रस्यैक्यवत्सद्ज्ञानानन्दशिवविषयकारणवाक्यभेदेन परस्परधर्मव्यवच्छेदे सिद्धरूपस्य कारणस्यैक्यमुपपद्यते । तस्मान्न कारणवाक्येषु छागपशुन्यायावतारः। अस्तु वा ज्ञानानन्दपर्यन्तस्तन्नयायावतारः । शिवपर्यन्तस्तु न सम्भवति । 'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।' 'एको ह वै नारायण आसीन्न ब्रह्मा नेशान'इत्यादीनां विशेषान्तरविषयाणामपि कारणवाक्यानां सत्त्वेन तेषां सत्यज्ञानादिवाक्यानां च क्व विषये पर्यवसानं भवत्वित्यत्र विनिगमानविरहात्। तस्माद्ब्रह्मणो लक्षणं न सम्भवतीति । इत्थं संशयप्रदर्शनपूर्वकं पूर्वपक्षं प्रापय्य सिद्धान्तयितुं प्रतिजानीते-**अत्र जगतो जन्मादिकमित्यादिना एवमादौ पूर्वपक्षविक्षेपे प्राप्ते ब्रूम इत्यन्तेन** । अतन्निष्ठत्वेन तल्लक्षणत्वासम्भवं तावत्परिहरति-**यद्यपीति** । असम्बन्धो धर्मधर्मिभावसम्बन्धाभावः । **ताटस्थ्येनेति** । यथा शाखाग्रस्य चन्द्रलक्षणं तद्वदिति भावः । ननु, शाखाग्रं नानुमाने स्वयं हेतुभावेन तल्लक्ष्यगतकिञ्चिद्विशेषप्रतीतावुपयुज्यते। किं तु कस्मिन् गगनप्रदेशे चन्द्रो वर्तत इत्यजानतः तज्जिज्ञासया पृष्टवतो गगने सर्वत्र चक्षुर्विक्षेपक्लेशो माभूदिति देशविशेषे चक्षुर्नियमनमात्रे तदुपयुज्यते । तत्र यदि प्रागवगतचन्द्रं तस्य प्रदेशविशेषवर्तित्वमात्रं जिज्ञासमानं प्रतीदं लक्षणकथनं तदा तस्य चक्षुर्नियमानन्तरं प्रत्यक्षेण जायमानं प्रदेशविशेषवर्तित्वज्ञानमेव फलम् । यदि प्रागनवगतचन्द्रमसि ज्योतिर्मण्डलेऽस्ति चन्द्रशब्दवाच्य इत्येतावदवगत्य तं विशिष्य जिज्ञासमानं प्रतीदं लक्षणकथनं तदा चक्षुर्नियमनं सति शाखोर्ध्वदेशे चन्द्रसमीपस्थितनक्षत्रादिसाधारण्येन चन्द्रे दृश्यमानेऽप्ययं चन्द्रशब्दवाच्य इति निश्चयोदयासम्भवात्तत्र 'प्रकृष्टप्रकाशश्चन्द्र' इत्यादिस्वरूपलक्षणमपि वक्तव्यमिति तन्मुखेन जायमानं चन्द्रशब्दवाच्यत्वनिर्धारणं फलमिति विशेषः । उभयथापि शाखाग्रं इति तटस्थलक्षणकथनं चक्षुर्नियमनमात्रे व्याप्रियते । न तु साक्षाल्लक्ष्यविशेषज्ञापने। लोके तस्य तटस्थलक्षणत्वव्यप्रदेशो 'वृक्षं प्रति विद्योतते विद्यु'दित्यत्र वृक्षस्य व्याकरणे लक्षणत्वव्यपदेशश्च प्रमाणान्तरव्यवधानेनापि लक्ष्यविशेषज्ञाने

फलपर्यवसानमस्तीत्येतावता । एवं च शाखाग्रस्य लक्ष्यगतविशेषसाधने हेतुत्वाभावात् ताद्धर्म्याभावेऽपि लक्षणत्वं भवतु नाम । जन्मादिसमुदायस्य लक्ष्यगतनिरतिशयबृहत्त्वसिद्धौ हेतुभावेनैवोपयोग इति तस्य कथं ताद्धर्म्याभावे लक्षणत्वमुपपद्यत इति चेदुपपद्यत एव। निमित्तोपादानसाधारणहेतुहेतुमद्भावसम्बन्धेन जन्मादिकस्य लक्षणीकरणात् । तेन सम्बन्धेन तस्य व्यभिचाराप्रसङ्गात् । धूमादीनामपि तेन तेन सम्बन्धविशेषेणैव व्याप्तेरुपपादनीयतवात् । जन्मादिकारणत्वस्य लक्षणीकरणे ताद्धर्म्यमपि लभ्यते किमनेन प्रयासेनेति चेन्न । तस्य लक्षणीकरणेऽपि सम्बन्धान्तरेण तस्य ब्रह्मान्यवृत्तितया व्यभिचारवारणाय सम्बन्धविशेषविवक्षावश्यंभावे लाघवात् जन्मादिकस्यैव सम्बन्धविशेषेण लक्षणीकर्तुं युक्तत्वादित्यभिप्रायः। एवं लक्षणसामान्यप्रयोजनासम्भवशङ्का निराकृता । अथ विशिष्य ब्रह्मलक्षणस्य विवक्षितं प्रयोजनं न सम्भवतीत्युपन्यस्तां शङ्कां परिहर्तुमुपक्रमते-**यदित्यादिना** । शिवो निरतिशयबृहत्त्वशाली । जगज्जन्मादिसमुदायादिहेतुभावेन प्रकृतलक्षणस्य विशिष्य विवक्षितमपि प्रयोजनं सम्भवति । बहुषु कारणत्वप्रतिपादकवाक्यानां मुख्यार्थासम्भवेन किञ्चिद्विषयाणामेव तेषां मुख्यार्थपरत्वे वक्तव्ये किंविषयवाक्यानां तद्युक्तमिति तत्र न्यायगवेषणायां शिवस्य पञ्चकृत्यकारित्वोपपादकसर्वज्ञत्वादिरूपषडङ्गप्रसिद्ध्यया जन्मादिकारणत्वतदुपपादकप्रवृत्तिनिमित्तकभवादिनामाष्टकाभिधेयत्वप्रसिद्ध्या च तद्विषयाणामेव कारणवाक्यानां यथाश्रुतार्थपरत्वस्य न्याय्यत्वावधारणात् जन्मादिकारणत्वोपपादकगुणजातस्य तत्र क्लृप्ततया तदाक्षेपानपेक्षणेन बुद्धिलाघवात् जन्मादिकारणत्वादिप्रवृत्तिनिमित्तकनामाष्टकसंवादाच्चेत्याशयेन 'सर्वज्ञत्वादिविशिष्टमष्टाभिधानाधिकरण'मिति विशेषणद्वयमुपन्यस्तम्। शिवशब्दप्रवृत्तिनिमित्तपर्यालोचनयाप्युक्तार्थसिद्धिमभिप्रेत्य, तेन विशेष्यनिर्देशः कृतः । शिव एव तत्त्वं शिवतत्त्वम् । तत्त्वशब्देनात्र कालत्रयवर्ति शाश्वतं वस्तूच्यते । अत एव 'ब्रह्म वेदा ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वत'मिति प्राचीननानार्थकोशार्थसङ्ग्रहके 'वेदस्तत्त्वं तपो ब्रह्मे'त्यमरकोशे शाश्वतज्ञानशब्दस्थाने तत्त्वशब्दप्रयोगः। एवं चात्र तत्त्वशब्दप्रयोगेन शिवस्य 'न सन्न, चासच्छिव एव केवल' इति मन्त्रोक्तसर्गाद्यकालावस्थायित्वप्रदर्शनेन कारणवाक्यान्तरेभ्यः प्रबलेन तेनापि जगत्कारणत्वस्य शिवैकान्त्यसिद्धिरिति सूच्यते। एवं षडङ्गनामाष्टकशिवशब्दप्रवृत्तिनिमित्तयदातमोमन्त्रप्राबल्यपर्यालोचनयासच्चिदानन्दरूपतापि छागपशुन्यानेन शिव एवावतरतीत्याह-**आनन्दादीनामिति** । एवं 'यत्सर्वज्ञत्वादिविशिष्ट'मित्यादिना सङ्क्षिप्तमर्थजातं प्रपञ्चेनोपपादयति-**सर्वज्ञत्वमित्यादिना 'अत आनन्दादीनां विकल्पादिचिन्ता निरर्थिके' त्यन्तेन ग्रन्थसन्दर्भेण**। तत्र सर्वज्ञत्वादिषट्कं प्राणिनिकायस्य तत्तदनुष्ठितकर्मज्ञानानुसारेण वैषम्यनैर्घृण्ये विनानादिकालप्रवृत्तपञ्चकृत्यकर्तृतायामुपयुज्यते। यः खलु सृज्यपालनीयसंहार्यतिरोभावनीयानुग्राह्यजातमशेषविशेषसंहितमनादिसिद्धेन बोधेन सदा प्रत्यक्षमनुभवति तदनुकूलानाद्यसङ्ख्येयशक्तिशाली च भवति । सर्वं च प्रपञ्चमधितिष्ठति स्वयं

निरतिशयानन्दनित्यतृप्ततया स्वतस्सिद्धतत्त्वावबोधोपहतभक्ता भक्तविषयरागद्वेषोन्मेषतया च स्वार्थपरार्थप्रयुक्तसृष्ट्यादिवैषम्यनैर्घृण्यर- हितश्च भवति स एवास्य प्रपञ्चस्योक्तविधया पञ्चकृत्यानि कर्तुं शक्नोति। अलुप्तशक्तिकत्वमनंतशक्तिकत्वं च प्रपञ्चोपादानभावेऽप्युपयुज्यते। भाष्ये सर्वज्ञतादिषु कस्यचित्क्वचिदुपयोगवर्णनं यथार्हमन्यत्राप्युपयोगस्योपलक्षणम्। एवं नामाष्टके शिवशब्दे च यथासम्भवं जन्मादिकारणत्वतदुपपादकप्रवृत्तिके भाष्यकृतं कस्यचित्कयाचिद्व्युत्पत्त्या प्रवृत्तिनिमित्तप्रदर्शनं व्युत्पत्त्यन्तरेण सम्भवतां प्रवृत्तिनिमित्तान्तराणामप्युपलक्षणम्। अत्र व्याख्येयांशव्याख्यान-पूर्वककमपेक्षितार्थानाविष्कुर्मः। ननु आनन्दो ब्रह्मे' तिश्रुतिरानन्दस्य वैषयिकसुखन्यायप्राप्त-दुःखमिश्रणराहित्यरूपं निरस्तसमस्तोपप्लवकलङ्कत्वं निरतिशयत्वं च न प्रतिपादयति। नाप्यानन्दवत्त्वं ब्रह्मणः प्रतिपादयति। किं तु तस्यानन्दरूपत्वमेवेत्याशङ्क्य पूर्वसन्दर्भानुसारेणोदाहृतश्रुतेस्तथा-भूतानन्दवद्ब्रह्मेत्यर्थे पर्यवसानं दर्शयति-**यः खल्वित्यादिना। प्रस्तुत्येति**। 'अन्योऽन्तर आत्मानन्दमयः। तस्य प्रियमेव शिर 'इत्यादिर्प्रियमोदाद्यात्मकसुखविशेषरूपशिरःपक्षाद्यवयवयुक्तत्वेनानन्दमयं प्रस्तुत्येत्यर्थः। तेन सैंधवखिल्ये लवणरसविरोधिनो रसान्तरस्येवानन्दमये प्रियमोदादिरूपसर्वावयवयुक्ते सुखविरोधानो दुःखस्यानुप्रवेशो नास्तीत्याद्यविशेषणार्थसद्भावस्सूचितः। 'निरतिशयशिरस्कत्वेनाभ्यासा' दित्यनेन द्वितीयविशेषणार्थो दर्शितः। 'ब्रह्मण आनन्द 'इति श्रुतिभागोदाहरणेन आनन्दस्य ब्रह्मधर्मत्वं दर्शितम्। ननु, ब्रह्मधर्मस्तथाभूतानन्दः कथमिह वाक्ये ब्रह्मेति व्यपदिश्यत इत्याशङ्क्य 'तद्गुणसारता' दिति वक्ष्यमाणन्यायेनाभेदोपचारादित्याह-**प्रचुरत्वाद्ब्रह्मत्वेनोपचर्यत इति**। सर्वज्ञत्वनिरुक्ता 'वनपेक्षितबाह्यकरणे 'ति करणे बाह्यत्वविशेषणेन सूचितं ब्रह्मणो मनस्सद्भावमिहानन्दानुभवोपयोगितया निरूपयति-**मनसैवेति । न बाह्येति** । स्रक्चन्दनादिविषयसुखानुभववद्बाह्यकरणं परम्परयापि नापेक्षत इत्यर्थः। नन्वाकाशशब्दः प्रसिद्धिप्राचुर्याद्भूताकाशपरस्स्यादित्याशङ्क्याह-**विशेषाभावादिति**। सर्वप्रपञ्चशरीरकस्य भूताकाशशरीरप्रतिपादनमात्रेण न कश्चिदतिशयो वर्णितो भवतीत्यर्थः। प्रसिद्धभूताकाशरूपाम्बरव्यतिरेकेण किमिदं चिदम्बरं नामेत्याकाङ्क्षायामाह-**निखिलेति**। सकलप्रपञ्चपरिणामिनी परमेश्वरस्य चिच्छक्तिश्चिदम्बरमुच्यत इत्यर्थः। **तत्वस्वरूपमिति**। स एवाकाशः स्वरूपं घटस्य घटत्ववत्स्वरूपनिरूपकधर्मोऽस्येति बहुव्रीहिः। चिच्छक्तिः परमेश्वरस्य जगद्व्यापारे छेदने कुठारवत्करणभूतैव केवलं न तु प्रपञ्चप्रकृतिरिति केचिदाहुः तन्निरासार्थमाह-**परप्रकृतित्वमिति। यस्य** सा परमा देवी शक्तिराकाशसंज्ञिता। अनन्तैश्वर्ययोगात्मा महेशो दृश्यते हि स' इति कौर्मवचने चिच्छक्तेराकाशसंज्ञास्तित्ववर्णनादुदाहृतश्रुत्योराकाशशब्दः चिच्छक्तिपर इति भावः। **सत्तारूपमिति**। सर्वत्र प्रपञ्चे सत्सदित्यनुगतप्रत्ययविषयतया स्फुरन्ती सर्वप्रकृतिभूता सैव चिच्छक्तिस्सत्ता। सा रूपमस्येति बहुव्रीहिः। 'सत्यात्मे 'ति श्रुतौ सत्यशब्देन 'सच्च त्यच्चाभव 'दिति श्रुतेस्सत्त्यदात्मक-सकलप्रपञ्चाकारपरिणामिनी तदनुगतसत्तारूपा चिच्छक्तिरुच्यते। सत्तारूपमित्यर्थतस्तद्व्याख्यानम्।

सकलाधारभूतेति । प्राणशब्दस्य गौणप्रवृत्तिनिमित्तोक्तिः । प्राणवायुर्हि सर्वेषां भूतानां शरीरस्येन्द्रियाणां चाधारः । मा मोहमापद्यथ अहमेवैतत्पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य धारयामी'ति प्राणसंवादे वागादीन्प्राणान्प्रति मुख्यप्राणवचनाच्चिच्छक्तिः समुख्यप्राणस्य सर्वस्यापि प्रपञ्चस्याधारभूतेत्यस्मामतिशयितप्राणगुणवत्त्वेन ताच्छब्द्यमिति भावः । **मनस्येवानन्दो न बाह्यकरण इति** । शरीरे सुखमितिवदौपचारिकः सप्तम्याधिकरणत्त्वनिर्देशः । **को ह्येवान्यादिति** । अननं प्राणवायुव्यापारः प्राणनं चक्षुरादिव्यापारः । यद्वा अननं सांसारिकसुखानुभवः प्राणनमापवर्गिकसुखानुभवः तदुभयमपि परमाकाशरूपरशक्त्यानन्दाधीनमेव । सांसारिकसुखानामुपाधितिरोधानकृताविर्भावतारतम्य-शालितल्लेशविशेषरूपत्वात् तस्यैव परमानन्दस्य मुक्त्यनुभाव्यसुखत्वाच्च । 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुजीवन्ती'ति 'स एको ब्रह्मण आनन्द' इति 'श्रोत्रियस्य चाकामहतस्ये'ति च श्रवणात्। शिवतासम्पन्नं नित्यनिर्धूतनिखिलदोषमनादिमुक्तं नित्याविर्भूतसत्यसङ्कल्पत्वादिमङ्गल्यगुणगणम्। 'आकाशशरीर' मित्यादिश्रुतिव्याख्यानं प्रकृते सङ्गमयति-**अत्रेति** । प्रसङ्गा' न्मनआनन्द'मितिलिङ्गानुगतं मुक्तानां मनस्सद्भावं दर्शयति-**इदमेवेति** । मुक्तेर्ब्रह्मसाम्यरूपत्वात् ब्रह्मणो मनस्यानन्दानुभवो मुक्तानामपि तथाभावे लिङ्गमिति भावः। भट्टभास्करेणापि यजुर्वेदारण्यकभाष्ये 'मनआनन्दमिति' वाक्यमित्थमेव व्याख्यायोक्त' मिदमेव लिङ्गं मुक्तात्मनामीश्वरस्य च मनोविशेषोऽस्तीत्यत्रे'ति। नित्यतृप्तत्वस्य स्वार्थप्रयुक्तसृष्टिवैषम्यप्रसक्त्य भावसिद्धावुपयोगमाह-**न तस्य कदापीति**। अनादिबोधस्य परार्थप्रवृत्तिसृष्टिवैषम्यापाद-करागादिदोषाभावसिद्धावुपयोगमाह-**अतो ऽनादिबोधमिति** । 'ज्ञाज्ञौद्वा'विति 'भोक्ता भोज्य'मिति 'विद्याविद्ये'इति च श्वेताश्वतरोपनिषदि पशुपाशपतिनिर्णायकानां मन्त्राणामेकैकः पादः । ज्ञाज्ञौ सर्वज्ञकिञ्चिज्ज्ञौ द्वावजौ सनातनौ । ईशानीशौ नियन्तृनियम्यौ । भोक्ता भोज्यं पशुः पाशश्चेति द्वयं तयोः प्रेरकं परमेश्वरं च मत्वा ब्रह्मभावमेतीत्युत्तरत्रान्वयः । यस्तु विद्याविद्ये पशुपाशौ ईशते ईष्टे । विकरणव्यत्ययो वचनव्यत्ययो वा । स ताभ्यामन्यः । **इत्यादिष्विति** । आदिशब्देन 'क्षरं प्रधानममृताक्षरो हरः क्षरात्मनापीशते देव एकः ।' 'वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च ।' 'प्रधानक्षेत्रज्ञपतिर्गुणेश' इत्यादिमन्त्रभागसङ्ग्रहः । **शक्तिविशिष्टत्वं स्वाभाविकमेवेति** । उक्तं हि कूर्मपुराणे-किं तत्परतरं तत्वं का विभूतिर्जनार्दने'ति पृष्टवन्तमिन्द्रद्युम्नं प्रति भगवता 'परात्परतरं तत्त्वं परब्रह्मैकमव्ययम् । नित्यानन्दं स्वयंज्योतिरक्षरं तमसः परम् । ऐश्वर्यं तस्य तन्नित्यविभूतिरिति गीयत ।।' इति । **एको रुद्र इति** । एक एव रुद्रः द्वितीयाय द्वितीयस्तत्संदृशः । प्रातिपदिकार्थे छान्दसश्चतुर्थीप्रयोगः । न तस्थुः न तस्थौ । छान्दसः बहुवचनम् । इमं लोकं। शुद्धमिश्राशुद्धाध्वरूपं लोकत्रयम् । तुरीयमुक्तलोकत्रयापेक्षया चतुर्थम् 'अध्वनामध्वपते श्रेष्ठस्याध्वनः पारमशीये'ति सर्वाधिकारिप्रेप्सनीयत्वेन श्रुतिसिद्धमध्वनां मध्येऽतिश्रेष्ठस्य शुद्धाध्वनोऽप्युपरि स्थितं परमाकाशरूपं परमपदं च । ईशते इष्टे । ईशनीयुः ईशनानुकूलेच्छाशक्तिमान् । जननीयुः जननानुकूलेच्छाशक्तिमान् । ईशनमैश्वर्यम् । जननं जनयितृत्वम् । जनेर्ण्यन्ताल्ल्युट् । ईशनमात्मन

इच्छति जननमात्मन इच्छतीत्यर्थयोः 'सुप आत्मनः क्यजि'(पा०-३-१-८-सू०)ति क्यचि 'क्याच्छन्दसी'(पा०३-२-१८०-सू०)त्युप्रत्यये च रूपद्वयसिद्धिः । 'न छन्दस्यपुत्रस्ये'ति (पा०-७-४-३५-)सूत्रेण 'क्यचि चे'ति(पा०-७-४-३३-सू०)प्राप्तस्य ईत्वस्य निषेधस्तु न भवति सर्वविधीनां छन्दसि विकल्पितत्वात् । ईशनीभिः ईशनकारिणीभिः जननीभिः जननकारिणीभिः । पूर्वोदाहृतश्रुतावीशानजननानुकूलेच्छाशक्तिमत्त्वमुक्तम् । इह तदनुकूलक्रियाशक्तिमत्त्वमिति भेदः । नन्वष्टाभिधानाधिकरणमिति किमुच्यते । सन्ति हि शम्भुशङ्करादीन्यन्यान्यपि शिवस्य नामानि । किं बहुना। 'इमा रुद्राय स्थिरधन्वने गिर'इति श्रुतिः प्रत्यक्षादिसन्निधापितसकलशब्दवाच्यत्वं शिवस्य प्रतिपादयति । आश्वलायनोऽपि शिवं प्रस्तुत्याह-सर्वाणि ह वा एतस्य नामधेयानी'ति। तस्मादिदमनुपपन्नमित्याशङ्क्याह- **अस्य सकलशब्देति। परभावबोधकत्वेनेति** । विशिष्य जन्मादिकारणत्वतदुपपादकगुणबोधा- कत्वेनेत्यर्थः। इदमुपलक्षणम् । भवादिनामाष्टकस्य आपस्तम्बीयानां मन्त्रेष्वाम्नानेनापस्तम्बसूत्रे ईशानबलौ बोधायनाश्वलायनसूत्रयोः शूलगवहोमे बोधायनसूत्रे महादेवस्य प्रतिष्ठाविधौ नित्यपूजाविधौ प्रदोषपूजाविधौ च होमतर्पणार्चनेषु विनियोगवर्णनेन च मुख्यत्वं द्रष्टव्यम् । तथा च 'षट्त्रिंशदहो वा एष यज्ञो यद्द्वादशाह'इति श्रुतेः षट्त्रिंशताहोभिः साध्यस्यापि क्रतोर्द्वादश सौत्यान्यहानि मुख्यानीति यथा द्वादशाह इति व्यपदेशः तथैवात्राष्टाभिधानाधिकरणमित्युक्तिरिति भावः । **सर्वत्र सदेति** । यद्यपि भवशब्दस्य पचाद्यच्प्रत्ययान्तस्य भवनकर्तृमात्रे शक्तिः तथापि 'तत्र भव' (पा०-४-३-५३-सू०) इति व्याकरण इव पद्मभवादिनामस्विव च भवनाधिकरणविशेषसमर्पकोपपदादिसङ्कोचकाभावत् सर्वत्र सदा भवनमर्थो लभ्यत इति भावः । अस्त्वेवं तथापि भवशब्दस्य परभावबोधकत्वं कथं सिद्ध्यतीत्याशङ्क्य 'सदेव सोम्येदमग्र आसी'दिति श्रुतजगत्कारणसमर्पकसच्छब्दपर्यायत्वप्राप्तेरित्युपपादयति-**सर्वत्रानुवर्तमानमित्यादिना**। भवशब्दस्ताव- द्भूधातोरस्तिधातोर्वा पचाद्यच्प्रत्ययान्त इत्युभयथापि सत्तार्थकत्वाविशेषात्तस्यास्तिधातोः शत्रन्तस्य सच्छब्दस्य चैकार्थ्यमस्तीति भावः । कारणवाक्यान्तरश्रुतसत्यशब्दस्य 'सत्ये साधौ च सच्छब्द' इति भारतोक्तेः सच्छब्दपर्यायत्वात्तदैकार्थ्यमपि लभ्यत इत्यभिप्रायेण 'सत्यं ज्ञानं''सत्यात्मे' तिश्रुत्योरुदाहरणम् । न केवलं सच्छब्दभवशब्दयोः शक्तिपर्यालोचनयैकार्थ्यम् । किं तु 'सदेव सोम्येदमग्र आसी' दितिवाक्यश्रुतसच्छब्दस्य 'पुरुषो वै रुद्रः' 'सन्मह' इति श्रुत्यन्तरे शिवपर्यवसायित्वस्य कण्ठतः प्रदर्शितत्वादपि शिवनाम्नो भवशब्दस्य तदैकार्थ्यमित्यभिप्रायेण 'सन्महं' इति श्रुत्युदाहरणम् । ननु, भवशब्दस्य त्रैकालिकसद्रूपवस्तुवाचित्वमुक्तम् ।

सच्छब्दस्तु सर्गाद्यकालमात्रावस्थायिसद्रूपवस्तुवाची । 'आसी'दिति लङाख्यातस्य भूतार्थवाचित्वात्। न च जगदुपादानस्य सतो यावज्जगदनुवृत्तेरपेक्षितत्वात्तस्य सर्गाद्यकालमात्रावस्थायित्वमयुक्तमिति वाच्यम्। घटशरावादिरूपापन्ने मृत्पिण्डे पिण्डरूपस्येव प्रपञ्चरूपापन्ने सति सद्रूपस्य निवृत्तिसम्भवात् । अत एव

'इदं घटशरावादिकं पूर्वेद्युर्मृत्पिण्ड एवासी'दिति लोकव्यवहारसमानैव 'सदेव सोम्येदमग्र आसी'दिति वाक्यच्छाया दृश्यते । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीय' मित्येकस्यैव सतः सर्गाद्यसमयेऽवस्थानोक्त्या तस्य भवशब्दोक्तस्य सतश्चैक्यं सिद्ध्यति । अन्यथा सर्गाद्यसमये सद्द्वयावस्थानप्रसङ्गादिति चेदेवं तर्हि भवशब्दस्यैव त्रैकालिकसद्रूपवस्तुवाचित्वं त्यक्तव्यमापद्यते । उपपत्तिसहस्रेणापि व्यावृत्तानुवृत्तसत्ताविशिष्टयोरैक्यसमर्थनायोगात् । 'एकमेवे'ति श्रुत्यनुसारेण भवशब्दस्य सङ्कोचन्यायमात्रप्राप्तरूपविशेषवाचित्वस्य त्यक्तुमशक्यत्वादित्यत आह-**सन्घटइति** । यथा मृद्घटो मृच्छराव इत्यादिव्यवहारान्मृद्रूपानुवृत्त्या मृदो घटशरावाद्युपादानत्वं तथा 'सन्घटस्सन्पट' इत्यादिव्यवहारात् सद्रूपानुवृत्त्यैव ब्रह्मणः सर्वोपादानत्वम् । न तु मृत्पिण्डरूपस्येव तस्मिन्सद्रूपस्य निवृत्तिरस्ति । 'आसी'दिति प्रयोगस्तु अविभक्तभूतभौतिकनामरूपकेवलसद्रूपाभिप्रायेण । यथा 'पूर्वेद्युरिदं घटशरावादिकं सर्वं मृदेवासी'दिति व्यवहारो घटशरावादिनामरूपविभागरहितकेवलमृद्रूपाभिप्रायेणेति भावः । 'भवत्यस्मात्सर्व'मिति भवशब्दव्युत्पादने तु जगत्कारणत्वं ततो वाच्यवृत्त्यैव लभ्यते । 'ॠदोरप्' (पा०-३-३-५७सू०) इत्यप्प्रत्ययस्य बहुलग्रहणादपादानार्थेऽपि वृत्तिसम्भवात्। यद्यपि' श्रिणीभुवोऽनुपसर्ग'(पा०-३-३-२४-सू०)इति विधानादनुपसर्गाद्भूधातोः घञ्प्रत्ययेन भाव्यम्। तथाप्यस्त्यादेशाद्भुवोऽयं'मृदोर' (पा०-३-३-५७-सू०)बित्यप्प्रत्यय उपपद्यते। 'श्रिणीभुव'इति (पा०-३-३-२४-)सूत्रे श्रिणीसाहचर्येण भूधातोरेव ग्रहणमित्यवगमात् । किञ्च बहुलग्रहणादेव भूधातोरप्ययं प्रत्यय उपपद्यते । णीञ्धातोरेव यतो नय इति रूपसिद्धिः । उभयथापि भवशब्दस्य भवत्यस्मात्सर्वमित्यर्थग्रहणे न कदाचिदनुपपत्तिः । तथैव हरिवंशे कृष्णकृतशिवस्तोत्रे तस्यार्थवर्णनं कृतम्। 'भूतं यस्माज्जगदत्यन्तवीर त्वत्तोऽव्यक्तादक्षरादक्षरेश । तस्मादाहुर्भव इत्येव भूतं सर्वे श्वराणां महतामप्युदार'मिति । 'कृगृशॄदृभ्यो व' इति श्रृधातोर्वप्रत्ययान्तः शर्वशब्दः सङ्कोचकाभावन्यायेन' तस्मादुपसंहर्त्र'इत्यादिश्रुत्यन्तरसंवादेन च सकलसंहर्तृवाचक इत्यर्थः । **निरुपाधिकेति** । स्थेशभासपिसकसोवरच्' (पा०३-२-१७५ सू.) इति ताच्छील्यार्थविहितवरच्प्रत्ययान्ते-श्वरशब्दसमानार्थ ईशानशब्दः 'ताच्छील्यवयोवचनशक्तिषु चानश् (पा० ३-२-१२९सू.)इति सूत्रविहितचानश्प्रत्ययान्तः स्वाभाविकमसङ्कुचितं शिवस्यैश्वर्यमाचष्ट इति भावः । तदैश्वर्यस्य सकलचेतनाचेतनविषयत्वं पशुपतिनाम्नापि सिद्ध्यतीयत्याह-ईश्व**रस्येति**। ननु, तेन पशुशब्दोक्तचेतनविषयत्वमैश्वर्यस्य सिद्ध्यति न त्वचेतनविषयत्वमपीत्याशङ्क्याह-**पशुग्रहणादिति** । -ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य शूलिनः । पशवः परिकीर्त्यन्ते संसारवशवर्तिनः । तेषां पतित्वाद्देवेशः शिवः पशुपतिः स्मृतः । मलमायादिभिः पाशैस्स बध्नाति पशून्पतिः । स एव मोचकस्तेषां भक्त्या सम्यगुपासितः । चतुर्विंशतितत्वानि मायाकर्मगुणा अमी । विषया इति कथ्यन्ते पाशा जीवनिबन्धनाः। ब्रह्मादिस्तम्बपर्यन्तान्पशून्बध्वा महेश्वरः । पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकम् ।।' इति हि पुराणेषु

श्रूयते। अनेनैतत्सिद्धं भवति। पशुपतिनामान्तर्गतः पशुशब्दो न गवाश्वादिप्रसिद्धपशुवाची। नापि 'प्रमथेऽपि पशुः पुमा'नति निखण्ट्वनुसारेण प्रमथवाची। किन्तु ब्रह्मादिस्थावरान्तसकलचेतनवाची। 'येषामीश' इति मन्त्रे द्विपाच्चतुष्पाद्ग्रहणमपि सकलचेतनोपलक्षणम्। तद्वाचित्वं च न शक्त्या। किंतु गवाश्वमहिषादयस्तत्स्वामिभिः पाशैराबध्य स्ववशीकृत्य वाहनदोहनादिकर्मस्विव सर्वेऽपि चेतनाश्शिवेन मलमायादिभिः पाशैराबध्य स्ववशीकृत्य स्वाराधकरूपतया यथा कथञ्चित्स्वाराधनोपयोगितया वा स्वकीयेषु तत्तद्वस्तुसामर्थ्याधीनेषु कार्येषु विनियुज्यन्त इत्यनेन सादृश्येन गौण्या वृत्त्येति। एवं च पश्वधिष्ठानं पाशाधिष्ठानाधीनमिति तदुक्त्यैव पाशाधिष्ठानमप्यर्थतो लभ्यत इति भावः। **संसारेति**। रुजं द्रावयतीत्यस्मिन्नर्थे रुद्रशब्दो 'रुग्दुःखं दुःखहेतुत्वात्तद्रावयति नः प्रभुः। रुद्र इत्युच्यते तस्माच्छिवः परमकारण'मिति पौराणिकैर्व्युत्पादितः पृषोदरादिः। उत्पूर्वाद्गमेरुद्गमेरुद्गच्छति उत्तरो भवतीत्यस्मिन्नर्थे 'ऋज्रेन्द्राग्रवज्रे'त्यादिना रन्प्रत्ययान्ततया निपातितः उग्रशब्दः श्रेष्ठवाची। अत एव हि 'उग्रोऽस्युग्रोऽह सजातेषु भूयास'मिति मन्त्रे जातिश्रैष्ठ्याशंसाविषये स्वस्मिन्नुग्रशब्दः प्रयुक्तः। इह तु सङ्कोचकाभावात् 'यस्मात्परं नापरमस्ति किञ्चित्' न तत्समश्चाभ्यधिकश्च दृश्यत' इत्यादिश्रुतिप्रतिपन्नपरभावबोधकसर्वोत्तरत्वपरः। यद्यप्यनेन नियामकान्तरानियम्यत्वं कारणान्तराकार्यत्वमभिभावकान्तरानभिभवनीयत्वमित्यादि सर्वं सिद्धयति। तथापि तस्य सर्वस्योपलक्षणतयैकमुदाहरति- **परतेजोभिरिति**। भीमादयोऽपादान इति (पा०-३-४-७४-सू.) निपातितो भीमशब्दोऽपि 'भीषास्माद्वातः पवत' इत्यादिश्रुतिप्रतिपन्नपरभावबोधकनियन्तृत्वप्रयुक्तमहाभयहेतुत्वपर इत्याह- **नियामक त्वेनेति। महत्त्वेनेति**। मानुषानन्दादिहैरण्यगर्भानन्दपर्यन्तसांसारिकभावापेक्षयोत्कृष्टेस्वात्मानन्दानुभवे विषये दीव्यति रमत इति देवः इति सप्तमीसमासोऽत्र महादेवशब्देन विवक्षितः। 'आन्महतस्समानाधिकरणजातीययोः' (पा०-६-३-४६)इति सूत्रस्य 'अष्टन आ विभक्तौ'(पा०-७-२-७४)इत्यात्वप्रकरणं विहायान्यत्र प्रणयना'न्महत आ'दिति सूत्रयितव्ये 'आन्महत'इति सूत्रणाच्च तत्र यथेष्टं योगविभाग इष्यते। तेनात्र महच्छब्दस्य देवशब्देन सामानाधिकरण्याभावेऽप्येकादशाष्टाकपालयोरिवात्वम्। एवं चानन्यत्र भावो विषयशब्दार्थ इति विषयसप्तमीमहिम्ना तुच्छान् सांसारिकान् सर्वान्भावान्परित्यज्य महति स्वात्मानन्दानुभव एव रमत इत्येतावानर्थो महादेवशब्दस्य लभ्यते। स्वात्मानन्दानुभवस्य महत्पदेन निर्देशश्च तन्महत्त्वस्येतरपरित्यागे हेतुत्वमभिप्रेत्येति द्योतयितुं महत्त्वेनेति तृतीयान्तनिर्देशः देवनताच्छील्यं देवशब्दार्थमभिप्रेत्य दीव्यमानतयेति शानच् प्रत्ययान्तप्रयोगः। **आत्मज्ञानयोगैश्वर्यइति**। आत्मविषयं ज्ञानमात्मज्ञानं स्वात्मानन्दानुभवः तेन योगो नित्यसम्बन्धः तदेकैश्वर्यं महाविभूतिः तत्र महीयते रमत इत्यर्थः। धातूनामनेकार्थत्वा 'न्मही पूजाया' मिति कण्ड्वादिधातोर्देवनमर्थमङ्गीकृत्य तेन देवशब्दार्थप्रदर्शनं कृतम्। यद्वा।

महादेवशब्दान्तर्गतस्य महच्छब्दस्य शिवे वृत्तौ तत्प्रवृत्तिनिमित्तप्रदर्शनपरेयमाथर्वशिरसी श्रुतिः। 'पूज्यते यः सुरैर्नित्यं महांश्चैव प्रमाणतः। धातुर्महीति पूजायां महादेवस्ततस्स्मृत 'इति साम्बपुराणोक्तिश्च। एवं 'भवाय देवाय स्वाहे'त्यादिमूर्त्यष्टकमन्त्राम्नाने 'महते देवाय स्वाहे'ति पाठेन महादेवशब्दान्तर्गतस्य महच्छब्दस्यापि शिववृत्तितावगत्या प्रकृतभाष्ये तद्गतप्रवृत्तिनिमित्तप्रदर्शनौचित्यात्। ततश्च श्रुतौ 'महीयत' इत्येतावदेव महच्छब्दप्रवृत्तिनिमित्तप्रदर्शनपरम्। महीयते तदभिज्ञैः पूज्यत इत्यर्थः। 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्चे'ति सूत्रेण पूज्यत इत्यर्थे महच्छब्दो निपातितः। किंभूत इत्ययमभिज्ञैः पूज्यत इत्याकाङ्क्षायां तुच्छान्विषयान्परित्यज्य स्वात्मानन्दानुभवे निविष्टोऽयमेवं स्वशैलीप्रकटनार्थमेव वस्त्रमाल्याभरणानुलेपनादिकं विहाय चर्मास्थिदामभुजगभस्मादिकं धारयतीति तच्चरितरहस्याभिज्ञैः पूज्यत इति दर्शयितुं श्रुतौ महतीत्यन्ते निविष्ट इत्यध्याहार्यम्। अयमर्थो भागवतेऽपि शिवं प्रस्तुत्य वर्णितः-'हसन्ति यस्याचरितं हि दुर्भगाः स्वात्मन्रतस्याविदुषः समीहितम् यैर्वस्त्रमाल्याभरणानुलेपने श्वभोजनं स्वात्मतयोपलालितम्॥ यस्यानवद्यं चरितं मनीषिणो गृणन्त्यविद्यापटलं बिभित्सवः। यत्पादपद्मं महतां मनोऽलिभिर्निषेव्यते ब्रह्मरसासवार्थिभि'रिति। एवं च 'महत्त्वेन दीव्यमानतयेऽति भाष्यं महच्छब्ददेवशब्दयोः समानाधिकरणसमासस्थयोः परस्परनिरपेक्षप्रवृत्तिरनिमित्तप्रदर्शनार्थं व्याख्येयम्॥ **निरस्तेति**। शाम्यन्त्यस्मिन्दोषा इत्यर्थे 'सर्वनीघृष्वरिष्वलष्वशिवपट्वप्रह्वेष्वा'इति(औणा०)सूत्रे शमिधातोर्वन्प्रत्ययेन इत्वमलोपाभ्यां च शिवशब्दो निपातितः समस्तसांसारिकदोषराहित्यवाची। **निखिलेति**। निखिलानि शिवशब्दवाच्यानि मङ्गल्यान्यस्य सन्तीति मत्वर्थीयाच्प्रत्ययान्तः शिवशब्दः सकलमङ्गल्यगुणवत्त्ववाची। **तदुक्तस्वभावतयेति**। तत्प्रकृतं शिवतत्त्वं जगत्कारणत्वोपपादकसर्वज्ञत्वसर्वशक्तिकत्वादिगुणस्वभावतया सृष्टिवैषम्यनैर्घृण्यापादकदोषरहितस्वभावतया च जगदुभयकारणं भवितुमर्हतीति कृत्वा परस्परविरुद्धानेककारणवाक्यसमवायेऽपि तदेव जगज्जन्मादिकारणमङ्गीकर्तुं युक्तमित्र्थः। **तदिति**। तच्छिवतत्त्वमेतादृशमहत्त्वात्सर्वज्ञत्वादिकमङ्गषट्कमष्टाभिधानप्रवृत्तिनिमित्तजातमित्येवंप्रकारान्महत्त्वाकारणत्वात्कारणत्वापकलिङ्गात् जगज्जन्मादिकारणत्वरूपब्रह्मलक्षणयोगीति तदेव 'ब्रह्मविदाप्नोति पर'मित्यादिश्रुतिषु ब्रह्मेत्युच्यत इत्यर्थः। अत्र पूर्वपक्षे 'यदा तमस्त'दिति मन्त्रोदाहरणात् सिद्धान्ते शिवतत्त्वमिति तत्रत्याशिवशब्देन व्यवहारात्तत्त्वशब्देन तदुक्ततमोमात्रावशिष्टकालविशेषावस्थायित्वप्रतिपादनात्, एतादृशशब्देनैवंप्रकारवाचिना 'तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी'ति तदुत्तरार्धप्रतिपादिताक्षरशब्दप्रवृत्तिनिमित्तसवितृवरेण्यत्वबहुभवनसङ्कल्परूपजगत्कारणत्वाक्षेपकलिङ्गान्तरसङ्गाच्च सर्वज्ञत्वादिषट्काष्टाभिधानप्रवृत्तिनिमित्तसद्भावरूपस्य सर्वकारणवाक्यानां शिवे पर्यवसानोपपादकस्य न्यायजातस्यानुग्रह्यं प्रमाणं सर्वेषां कारणवाक्यानां शिवे पर्यवसानमाहत्य प्रतिपादयितुमेव प्रवृत्तो 'यदा तमो'मन्त्र इति सूचितं भवति। तमिमं भाष्यसूचितमर्थं स्पष्टीकुर्मः। 'यदा

तम' इति पूर्वार्धेन तमोऽवशेषाङ्कितं कालमनूद्य तत्कालवर्ती शिव इति विधीयते। तेन 'तमो वा इदमेकमास' "तत्परेणेरितं विषमत्वं प्रयाति' 'प्रजापतिर्वा इदमेक आसीत्" नाहरासीन्न रात्रिरासीत्" सोऽस्मिन्नंधे तमसि प्रासर्पत्" नासदासीन्नो सदासीत्तदानीं' 'तम आसीत्तमसा गूढमग्रेप्रकेत' 'इत्यादिषु तत्पुरोवादेषु तथाभूतकालविशेषावस्थायिकारणवस्तुसमर्पकाणां परप्रजापत्यादिशब्दानां शिवे पर्यवसानं दर्शितं भवति। तृतीयपादेन मुण्डकादिश्रुतकारणवाक्येषु कारणवस्तुसमर्पकाणामक्षरादिपदानामादित्यमण्डलवर्तिनि पुरुषे कारणत्वाक्षेपकलिङ्गं सर्वान्तर्यामित्वमुवपर्णयन्त्याः गायत्र्याश्च तस्मिन्पर्यवसानं दर्शितम्। चतुर्थपादेन 'तदैक्षत बहु स्यां प्रजायेये 'ति' स ईक्षत लोकान्नु सृजा 'इति' सोऽकामयत बहु स्यां प्रजायेये 'ति 'तपसा चीयते ब्रह्मे 'ति च स्त्रष्टुरादिसृष्टिपूर्वकालीन स्त्रष्टव्यवस्तुजातालोचनं प्रतिपादयतां छान्दोग्यादिश्रुतकारणवाक्यानां तत्र पर्यवसानं दर्शितम्। एवं सर्वेषां कारणवाक्यानां शिवे पर्यवसानं प्रतिपादयितुं प्रवृत्तेनानेन मन्त्रेण शिव एव जगत्कारणं ब्रह्मेत्यवसीयते। एतेन 'यदा तम' इति मन्त्रो न स्वयं कारणस्य तमसः प्रापकः। 'यदे 'ति कालविशेषप्राप्तानुवादात्। प्राप्तिश्च' अव्यक्तमक्षरे लीयते अक्षर तमसि लीयते तमःपरे देव एकीभवती 'ति सुबालोपनिषद्वाक्येन। तत्र च परशब्दो नारायणपरः, 'एष आत्मापहतपाप्मा दिव्यो देव एको नारायण' इति तत्र श्रवणात्। ततश्च नारायणाधिष्ठितस्य तमसः प्रापकं श्रुत्यन्तरमिह पुरोवाद इति तदरोधादनुवादमन्त्रश्रुततमोऽधिष्ठातृपरः शिवशब्दो नारायण एव वर्तयित्व्य इति निरस्तम्। भवत्येव 'यदा तम' इत्यनुवादः न तु सौबलवाक्यमेव पुरोवादः। अन्येषामप्यनूद्यमानार्थप्रापकवाक्यानां सत्त्वात्। नाप्यस्मिन्मन्त्रे 'तन्न दिवे' त्यादिरप्यनुवादः। तद्वृत्तयोगेन तत्काले कस्य चिद्विधेयताप्रतीतेः। विधेयश्च तत्र न दिननिशाविभागाभावः सदसदात्मकप्रपञ्चाभावो वा। 'नाहरासीन्न रात्रिरासी 'दिति 'नासदासीन्नो सदासी 'दिति च पुरोवादत एव तयोः प्राप्तेः। नहि किंचिदनूद्य किञ्चिद्विधातुं प्रवृत्तं वाक्यमनुवादायावश्यापेक्षितात्पुरोवादादेव प्राप्तेऽर्थे पर्यवस्यत्साफल्यमश्नुवीत। अतस्तत्रापि, 'नदिवे' त्यादिरनुवादः। एवं च शिवशब्दोऽपि यदि कथञ्चिदौत्सर्गिकार्थपरतां हित्वा पुरोवादविशेषप्राप्ते नारायणे पर्यवस्येत् तदा 'यदा तमस्त 'दिति किञ्चिद्विधातुमुद्यम्यार्धपथे स्थितं वाक्यं किं विधेयमासाद्य विश्राम्यतु। न हि तस्य नारायणवृत्तित्वे पुरोवादादप्राप्तं कंचित् विधानार्हं तदर्थं पश्यामः। तस्मात्परमते वाक्यमेव तावद्वैयर्थ्यं प्राप्नुयात्। अतस्तत्तत्पुरोवादश्रुततमोऽधिष्ठातृपरं ब्रह्मप्रजापतिनारायणादिसकलशब्दार्थनिर्धारणेदम्परैतद्विधिबलात् सौबालश्रुत्याम्नातस्य नारायणनाम्न एव शिवे पर्यवसानं स्यात्। न तु वैपरीत्यम्। ननु, शिवशब्दस्य नारायणे क्षेमंकरत्वादियोगेन वृत्तिः सम्भवति। 'पन्थानःसन्तु ते शिवाः" पावको अस्मभ्यं शिवो भवे 'त्यादिलौकिकवैदिकव्यवहारेष्वन्यत्रापि तस्य योगेन प्रयोगदर्शनात्। नारायणशब्दस्य तु नारमयनमस्येत्यादियोगेन शिवे वृत्तिर्न सम्भवति। केवलयोगे णत्वासिद्धेः। 'पूर्वपदात्संज्ञायामग' इति (पा० ८-४-३)सूत्रतः संज्ञाशब्दतयैव तत्र णत्वस्योपपादनीयत्वात् तस्य शिवनामत्वाभावेन तत्र तत्संज्ञाशब्दत्वेन णत्वस्योपपादयितुमशक्यत्वादिति चेत्। यदि तस्य शिवनामत्वं नास्ति

तदा विष्णुनाम्न एव तस्य भावितदवस्थोपलक्षिते सर्गाद्यसमयवर्तिनि शिवे लक्षणया वृत्तिः स्यात् घटं करोतीति वाक्य इव घटशब्दस्य भाविघटावस्थापलक्षिते मृत्पिण्डे । न तु तस्य शिवे योगो न सम्भवतीत्येतावता शिवशब्दस्य नारायणपरत्वं स्यात् । मन्त्रवाक्यवैयर्थ्यापत्तेरुक्तवात् योगाद्रूढिपूर्वकलक्षणाया एवाभ्यर्हितत्वाच्च । यदि तु 'सर्वाणि ह वा एतस्य नामधेयानी'त्याश्वलायनस्मरणात् , 'नामानि तव गोविन्द यानि लोके महान्ति च। तान्येव मम नामानि नात्र कार्या विचारणे'ति हरिवंशे शिववचनेन विष्णुनाम्नामन्येषां च प्रकृष्टप्रवृत्तिनिमित्तानां नाम्नां 'घनसारश्चन्द्रसंज्ञ' इति वचनेन चन्द्रनाम्नां कर्पूरनामत्ववत् शिवनामत्वस्य विधानात्, कूर्मपुराणे-"वशित्वादप्यवश्यत्वादीश्वरः परिभाषितः। ऋषिः सर्वगतत्वेन हरिः सर्वगुणायुतः। अनुत्पादाच्च पूर्वत्वात्स्वयंभूरिति स स्मृतः। नारा अप्ययनं यस्मात्तेन नारायणः स्मृतः। हरः संसारहरणाद्विभुत्वाद्विष्णुरुच्यते। भगवान्सर्वविज्ञानादवनादोमिति स्मृतः। सर्वज्ञः सर्वविज्ञानात्सर्वः सर्वमयो यतः। शिवः स निर्मलो यस्माद्विभुः सर्वगतो यतः" ।। इति साक्षादेव नारायणशब्दस्य शिवनामसु निर्वचनाच्च, तन्नामत्वपीष्यते तदा न कश्चिच्छङ्कावकाशः। न च नारायणशब्दस्य विष्ण्वैकान्तिकत्वमस्ति। 'एकार्णवे तदा तस्मिन्नष्टे स्थावरजङ्गमे । तदा समभवद्ब्रह्मा सहस्राक्षः सहस्रपात् । सहस्रशीर्षा पुरुषो रुक्मवर्णो ह्यतीन्द्रियः । ब्रह्मा नारायणाख्यस्तु सुष्वाप सलिले तदा । इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति । ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययम् । आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ता यस्मात्तेन नारायणः स्मृतः ।' इति कूर्मपुराणे विरिञ्चनामत्वेनापि तन्निर्वचनदर्शनात्। न च तत्र क्वचित्कल्पविशेषे वैरिञ्चमप्यधिकारं निर्वर्तयन्विष्णुरेव ब्रह्मेत्युक्तः, अग्रे तस्य पृथिव्युद्धरणार्थवराहरूपपरिग्रहोक्तेरिति वाच्यम् । पृथिव्युद्धरणानन्तरं वाराहरूपं परित्यज्य कौमारसर्गपर्यन्तं जगत्सृष्टिं कृतवतस्तस्यैव 'मुमोह मायया सद्यो मायिनः परमेष्ठिन' इति मोहप्राप्तिमुक्त्वा 'तं बोधयामास सुतं जगन्मायो महामुनिः । नारायणो महायोगी योगिचित्तानुरञ्जनः ।।' इति तज्जनकस्य भगवतो नारायणस्योपदेशात् तस्य मोहनिवृत्तिप्रदिपादनात्, अग्रे च तस्य नारायणनाभिपद्मादाविर्भावं पुनरपि मोहप्राप्तिं तस्य नारायणोपदेशेन मोहनिवृत्तिं 'कथं स भगवाञ्जज्ञे ब्रह्मा लोकपितामहः । अब्जजो भगवानीशस्तन्नो वक्तुमिहार्हसी'ति प्रश्नोपक्रमेण 'अवाप्यसंज्ञां गोविन्दात्पद्मयोनिः पितामह' इत्यन्तेन प्रबन्धेन प्रतिपाद्य तस्य प्रजासृष्टिसामर्थ्यसिद्ध्यर्थं ततश्चर्यां ततो रुद्राविर्भावादिकं च रुद्रान्तर्धानपर्यन्तमुक्त्वा' सोऽपि योगं समास्थाय ससर्ज विविधं जगत् । नारायणाख्यो भगवान्यथापूर्वं प्रजापति'रिति पुनः स्रष्टुं तस्मिन् विरञ्च एव नारायणनामत्वानुवाददर्शनाच्च विरिञ्चस्य वाराहरूपपरिग्रहोक्तिरपि न विरुध्यते । 'आपो वा दमग्रे सलिलमासीत्तस्मिन्प्रजापतिर्वायुर्भूत्वाचरत्स इमामपश्यत्तां वराहो भूत्वाहरत्तां विश्वकर्मा भूत्वा न्यमार्ट् साप्रथत सा पृथिव्यभवत्तत्पृथिव्यै पृथिवीत्वं तस्यामश्राम्यत्प्रजापतिः स देवानसृजते' त्यादिश्रुतौ प्रजापतिशब्दोक्तस्य विरिञ्चस्य वाराहरूपपरिग्रहप्रतिपादनात् । एवं "ब्रह्मा नारायणाख्योऽसौ ससर्ज भगवान्यथा । नारायणाख्यो

भगवान्ब्रह्मा लोकपितामहः । ''इत्यादिविष्णुपुराणप्रदेशेषु 'तस्मादण्डादभूत्स्रष्टा शिवात्मा चतुराननः । सर्वलोकस्य निर्माता ब्रह्मा विश्वसृजो पतिः । स चाप्सु शयनादेव शिवात्मा स्वेच्छया चिरम् । नारायणाख्यामभजच्छक्तिरूपः प्रजापतिः ।' इत्याश्वलायनधर्मशास्त्रे स्मृतिपुराणान्तरेषु च विरिञ्चस्य नारायणनामत्ववर्णनं द्रष्टव्यम् । तस्मात् 'यदा तम' इति मन्त्रगते शिवपदे विष्णुविषयत्वशङ्कानवकाशात् सर्वेषां कारणवाक्यानां शिवे पर्यवसानं प्रतिपादयन्मन्त्रोऽयमिहानुग्राह्यप्रमाणत्वेन विवक्षित इति युक्तमेव । एवं श्वेताश्वतरशाखिनां मन्त्रोपनिषदुपक्रमेऽपि 'ब्रह्मवादिनो वदन्ति । किं कारणं ब्रह्म कुतस्स्म जाता' इत्यादिना केषाञ्चिद्ब्रह्मवादिनामृषीणां जगतः पञ्चकृत्यकारणभूतं ब्रह्म किंदेवतात्मकमिति संशयमुपक्षिप्य जगतोऽकारणकत्वस्य कालाद्यन्यकारणकत्वस्य वोपपत्तेः ब्रह्म जगज्जन्मादिकारणमित्येतदेवासिद्धमिति संशयस्य निरालम्बनत्वप्रसङ्गपरिहाराय तैरेव कृतं जगदकारणकत्वान्यकारणकत्वपक्षद्वयनिरासं 'कालस्स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् । संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतो'रिति मन्त्रेण प्रदर्श्य स्वतस्तन्निर्णयाशक्तानां ब्रह्मविद्याधिदेवतायाः परशक्तेरम्बिकायाः प्रसादादेतन्निर्णयो भविष्यतीत्यभिप्रायेण तां ध्यायतां तत्साक्षात्कारं 'ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढा'मित्यर्धेनोपन्यस्य 'यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक'इत्यादिना तस्याः प्रसादात्कालादिसकलावान्तरकारणाधिष्ठातारं परमकारणं महादेवमपश्यन्नित्येतदर्थप्रतिपादनात् सोऽपि सन्दर्भोऽत्रानुग्राह्यप्रमाणतयानुसन्धेयः । तत्र यद्यपि 'यः कारणानी'त्यादिमन्त्रे 'तमपश्यन्नि'ति पूर्वक्रियानुषङ्गवति सकलकारणाधिष्ठातारं कारणमपश्यन्नित्येतावदेव प्रतीयते न तु शिवं तथाभूतकारणमपश्यन्निति । तत्र शिववाचकपदाभावात् । तत्रापि 'क्षरं प्रधानममृताक्षरं हरः क्षरात्मना विशते देव एकः । संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं हरते विश्वमीशः' 'विश्वाधिको रुद्रो महर्षिः,' 'तस्मात्सर्वगतः शिवः,' 'मायिनं तु महेश्वरं' 'तमीशानं वरदं देवमीड्य' मित्याद्यनन्तरसन्दर्भो यावदुपनिषत्समाप्ति हरेशरुद्रशिवमहेश्वरेशानादिशिवासाधारणनामभिरेव जगत्कारणस्य निर्देशदर्शनात् 'यः कारणानी'ति मन्त्रस्य शिवमेव जगत्कारणमपश्यन्नित्यस्मिन्नर्थे तात्पर्यमुन्नीयते । एवमेव सङ्क्षेपेणोपबृंहितं कूर्मपुराणे 'समेत्य ते महात्मानो मुनयो ब्रह्मवादिनः । वितेनिरे बहून्वादानात्मविज्ञानसंश्रयान् । किमस्य जगतो मूलमात्मा वाऽस्माकमेव हि । कोऽपि स्यात्सर्वभूतानां हेतुरीश्वर एव च । इत्येवं मन्यमानानां ध्यानकर्मावलम्बिनाम् । आविरासीन्महादेवी गौरी गिरिवरात्मजा । निरीक्षितास्ते परमेशपत्न्या तदन्तरे देवमशेषहेतुम् । पश्यन्ति शम्भुं कविमीशितारं रुद्रं बृहन्तं पुरुषं पुराण'मिति । अत्र 'किमस्य जगतो मूल'मित्यनेन' कुतस्स्म जाता' इत्येतदर्थो दर्शितः। 'आत्मावास्माकमेव ही'त्यनेन 'जीवाम केने'त्यादिसकलसंशयार्थः सङ्गृहीतः । आत्मशब्दस्याधिष्ठातृपरत्वात् । 'कोऽपि स्या'दित्यर्धेन 'कालस्स्वभाव' इत्यादिमन्त्रप्रतिपादितकालकारणत्वादिवादनिराससामर्थ्यसिद्धसर्वकारणत्वसर्वेश्वरत्वविशिष्टब्रह्मरूपसंशयधर्मिसम्प्रतिपत्तिरुपन्यस्ता। शिवपुराणेऽप्यम्बिकामाहात्म्यं प्रस्तुत्य

प्रपञ्चेनोपबृंहितम् । 'मुमुक्षया पुरा केचिन्मुनयो ब्रह्मवादिनः । संशयाविष्टमनसो विमृशन्ति यथातथम् । किं कारणं कुतो जाता जीवामः केन वा वयम् । क्व चास्माकं सम्प्रतिष्ठा केन वाधिष्ठिता वयम् । इह वर्तामहे शश्वत्सुखेष्वन्येषु वाऽनिशम् । अविलङ्घ्या च विश्वस्य व्यवस्था केन वा कृता । कालस्स्वभावो नियतिर्यदृच्छा नात्र युज्यते । भूतानि योनिः पुरुषो योगो वैषां परेऽथवा । अचेतनत्वात्कालादेश्चेतनत्वेऽपि चात्मनः । सुखदुःखाभिभूतत्वादनीशत्वाद्विचार्यते । ते ध्यानयोगानुगताः प्रापश्यंच्छक्तिमैश्वरीम् । पाशविच्छेदिकां साक्षान्निगूढां स्वगुणैर्भृशम् । तया विच्छिन्नपाशास्ते सर्वकारणकारणम् । शक्तिमन्तं महादेवमपश्यन्दिव्यचक्षुषा । यः कारणान्याशेषाणि कालात्मसहितान्यपि । अप्रमेयोऽनया शक्त्या साकमेकोऽधितिष्ठती'ति एवं श्वेताश्वतरोपनिषदाम्नातस्य 'यदातमो'मन्त्रस्य तदुपक्रमस्य च तात्पर्यमस्माभिः शिवतत्त्वविवेके शैवकर्णामृते च प्रपञ्चेनोपपादितं तत्रैवानुसन्धेयम् । एतेनेदं निरस्तम् । जगत्कारणं वस्तु 'सदेव सोम्येदमग्र आसीत्' 'ब्रह्म वा इदमग्र आसीत्' 'आत्मा वा इदमेक एवाग्र आसी'दित्यादिकारणवाक्येषु सद्ब्रह्मात्मशब्दैरुत्तरोत्तरं विशेषपर्यवसायिभिः सद्रूपं बृहच्चेतनं चेत्येतावत्पर्यन्तबुद्धिगृहीतम् 'एको ह वै नारायण आसी'दित्यादिष्वनितरसाधारणेन नारायणशब्देन निर्देशात् छागपशुन्यायेन नारायण एवेति निश्चीयत इति सर्वेषां कारणवाक्यानां शिवे पर्यवसानं साक्षादेव प्रतिपादयति मन्त्रे अस्मदादीनामिव पूर्वमृषीणां सञ्जातं जगत्कारणं ब्रह्म किंदेवतात्मकमिति संशयं प्रदर्श्य स्वयं निर्णेतुमशक्नुवन्तस्ते ध्यानयोगप्रसादितपरमेश्वरीकटाक्षमहिम्ना शिव एवेति निश्चयं लेभिर इति प्रतिपादयति मन्त्रजाते च जाग्रति क्षुद्रबुद्धिकल्पितन्यायसञ्चारेणान्यत्र पर्यवसानासम्भवात् । 'यदा तमो'मन्त्रादिगतशिवादिशब्दानां वृत्त्यन्तरेण शिवान्यपरत्वे तदविरोधेन सर्वेषां कारणवाक्यानां तत्र पर्यवसानं सम्भवतीति चेन्न। 'यदातमो' मन्त्रगतस्य शिवशब्दस्य नारायणवृत्तित्वे मन्त्रवाक्यवैयर्थ्यापत्तेरुक्तत्वात् 'क्षरं प्रधानममृताक्षरं हरः' इत्यादिमन्त्रेषु श्रुतानां हरादिशब्दानामपि जगत्कारणधर्मिकस्ववाच्यतदितरदेवता-विशेषकोटिकसंशयप्रदर्शनानन्तरं निर्णयवाक्ये श्रुतानाम् 'अयं स्थाणुः पुरुषो वे'ति संशयानन्तरम्' अयं पुरुष एवे'ति निर्णयवाक्ये श्रुतस्य पुरुषशब्दस्येव व्यवच्छेदनीयायां प्रतिकोटौ वृत्त्ययोगात् । न च क्वचित्क्वचित्कारणवाक्ये नारायणशब्दस्याभ्यासदर्शनेन तात्पर्यवत्त्वावगमात् तस्यापि वृत्त्यन्तरं न युज्यत इति वाच्यम् । कारणे बहुशोऽभ्यस्तस्यापि तस्य तद्विषयप्राणाकाशशब्द वद्वृत्त्यन्तरकल्पनसहिष्णुत्वेनान्यथा-सिद्धत्वात् । किं च 'वेदार्थो यः स्वयंजातस्तत्राज्ञानं भवेदपि। ऋषिभिर्निश्चिते तस्मिन्का शङ्का स्यान्महात्मन' इति बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति। इतिहासपुराणाभ्यां वेदं समुपबृंहये'दिति च स्मरणात् पुराणादिषु ऋषिभिर्निश्चित एव वेदार्थोऽभ्युपगन्तव्यः। तत्र श्वेताश्वतरोपनिषदुपक्रमार्थनिर्णायकानि कूर्मपुराणादिवचनानि प्रागुदाहृतानि । तदनन्तरस्यापि' संयुक्तमेतत्क्षरमक्षरं चे'त्यादेरुपनिषत्समाप्तिपर्यन्तस्य तत्सन्दर्भस्यार्थनिर्णायकः शिवपुराणे पशुपाशपतिनिर्णयाध्याये दृश्यते । एवं च यद्यपि विष्णुपुराणादिश्रुतसृष्टिवाक्येषु कारणस्य नारायणनामभिरपि

निर्देशो दृश्यते । तथापि शब्दतोऽर्थतः क्रमतश्च तत्तदुपनिषत्सन्दर्भस्पर्शीन्युपबृंहणानि प्रबलानीति तैरेव तत्तदर्थनिर्णयो युक्तः । न चोपबृंहणानुसारेण शिवविषयकारणवाक्यानां तद्विरोधिाकारणवाक्यान्तरेभ्यः प्राबल्यमुपबृंहणानामुपबृंहणीयशब्दार्थक्रमस्पर्शित्वेन तद्विरुद्धपुराणान्तरादिभ्यः प्राबल्यमिति प्राबल्यसिद्धौ परस्परापेक्षणादन्योन्याश्रयः शङ्कनीयः । वनसिंहन्यायेन प्राबल्यसिद्धौ परस्परापेक्षणस्यादोषत्वात् । एतेनेयमपि शङ्का निरस्ता । शिवविषयकारणवाक्यानां सर्वज्ञत्वादिषाड्गुण्याष्टाभिधान-प्रवृत्तिनिमित्तरूपन्यायोपस्कृततया यत्प्राबल्यमुक्तं तन्न सङ्गच्छते । 'ज्ञानमप्रतिपन्नस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टय'मिति हिरण्यगर्भे 'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणै' रिति । नारायणे च कारणत्वोपपादकसंज्ञासार्वइत्यादेः पुराणेषु प्रतिपादनोपलम्भात् हिरणयगर्भादीनामपि जगज्जन्मादिकारणत्वतदाक्षेपकधर्मप्रवृत्तिनिमित्त-कनामसद्भावाच्च । हिरण्यगर्भस्य हि स्रष्टा विधाता विश्वसृड्विधिः वेधा विरिञ्च इति नाम्नां जगन्निर्मातृत्वं प्रवृत्तिनिमित्तम् । आत्मभूः स्वयंभूरितिनाम्नोर्जगन्मूलकारणत्वोपपादकं स्वयं जनिराहित्यं विश्वात्मनाम्नोर्जगदुपादानत्वोपपादकं सार्वात्म्यं लोकेशप्रजापतिनाम्नोः स्थितिहेतुत्वोपपादकं सर्वैश्वर्यं 'द्रुहिदक्षिभ्यामिनजि'ति द्रुह्यति धातोरिनजन्तस्य द्रुहिणनाम्नः सर्वसंहर्तृत्वं परमेष्ठिनाम्नः परमपदावस्थायित्वं शम्भुनाम्नः आनन्दरूपत्वं सर्वानन्दयितृत्वं वा । किं बहुना । ब्रह्मनाम्नो निरतिशयबृहत्त्वं प्रवृत्तिनिमित्तम्। विष्णोरपि वासुदेवनाम्नो वसस्त्यस्मिन्सर्वमिति वस्यति छिनत्ति सर्वमिति वासयति छादयति सर्वजीवानित्यर्थेषु 'वस निवासे''वसुछेदने' 'वस आच्छादन' इति धातुभ्यो बहुलग्रहणादुण्प्रत्यये सति निष्पन्नस्य वासुशब्दस्य देवशब्दस्य च समानाधि- करणसमासपदरूपस्य सर्वभूतस्थितिसंहृतितिरोधानकर्तृत्वं प्रवृत्तिनिमित्तम् । विष्णुनाम्नः सर्वत्र व्याप्तत्वं स्वभूनाम्नो जनिराहित्यमच्युतनाम्नः क्षरणराहित्यं प्रवृत्तिनिमित्तमित्यादि दृश्यते । तस्मात्पुराणप्रतिपन्नं सार्वइत्यादिकं भवादिनामप्रवृत्तिनिमित्ततया लब्धमिन्द्रनामप्रवृत्तिनिमित्ततुल्यं लिङ्गजातं च न शम्भोः परभावनिर्णायकत्वेन श्रुत्यनुग्राहकमिति उपबृंहणीयोपबृंहणयोरिव मानतर्कयोपि परस्परमनुग्राह्यानुग्राहकभावेन च वनसिंहन्यायविषयतया वनानुप्रविष्टसिंहस्य तदननुप्रविष्टसिंहादिव स्वतः प्रबलमुदाहृतमन्त्रोपनिषन्मन्त्रजातं प्रमाणमनुप्रविष्टस्य शिवे सार्वज्ञ्यादेस्तदननुप्रविष्टाद्देवतान्तरे श्रुतात्सार्वज्ञ्यादितः प्रबलत्वेन तत्साम्यापादनायोगात्। न च शिवस्य श्रुतस्य सार्वज्ञ्यादिकं पुराणमात्रप्रसिद्धं 'ज्ञः कालकालो गुणी सर्वविद्यः' तदादिमध्यान्तविहीनमेकम् । विभुं चिदानन्दमरूपमद्भुत' मित्यादिश्रुतिष्वपि विशिष्य शिवस्य सार्वज्ञ्यादिप्रसिद्धिसत्त्वात् । न चेन्द्रशब्द 'इदि परमैश्वर्य' इति धातोर्निष्पन्नः । येन तत्साम्यं भवादिनाम्नामापद्येत । नामप्रवृत्तिनिमित्ततः परभावसिद्धावीश्वरमहेश्वरनाम्नः शिवादिन्द्रमहेन्द्रनामा शक्रोऽधिकः स्यादिति वाऽऽपद्येत । 'ऋज्रेन्दाग्रवज्रे' त्यादिसूत्रेण हीन्द्रशब्दः 'ञिइन्धी दीप्ता' वितिधातोरिध्यते ब्रह्मतेजोभिरित्यर्थे तत्पूर्वानिवृत्तरन्प्रत्यान्तो निपातितः । न तु 'इदि परमैश्वर्य'इति

धातोरिन्दतीत्यर्थे। ततो रन्प्रत्ययविधानेनैव रूपसिद्धिसम्भवे निपातनप्रयोजनाभावात् अत एवैतत्सूत्रवृत्ताविन्दतिधा तोरिन्द्रशब्दनिपातनमुक्त्वा 'वृधिवपिभ्यां र 'न्निति पूर्वसूत्रे इन्दतिधातोरपि ग्रहणेन रूपसिद्धिसम्भवे निपातनप्रयोजनं नास्तीत्यस्वारस्यादिध्यते तेजोभिरितीन्द्र इति इन्धिधातोर्निपातमाश्रितम्। एवं 'ब्रह्म हि देवेभ्यो विजिग्य' इति तलवकारिणामुपनिषद्युक्तेन प्रकारेणासुरविजयसमयेषु ब्रह्मतेजोभिरिध्यमानः शक्रो महासुरस्य वृत्रस्य वधे नितरां तैरिद्धो जात इति महेन्द्र इत्युच्यते । अत एव श्रूयते । 'महान्वा अयमभूद्यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्व'मिति। तस्मादुक्तन्यायानुगृहीतस्वतः प्रबलमन्त्रोपनिषन्मन्त्रजात-बलाच्छिव एव जगत्कारणमित्येतदुपपन्नमिति। अवधारणादिबलात् सदानन्दज्ञानानां भेदानापाद्य तेषां विकल्पेन समुच्चयेन वा कारणत्वमनुपपन्नमिति यच्छङ्कितं तदप्येवं सति नावकाशं लभत इत्याह-**तदेवेति** । यत्सर्वज्ञत्वनित्यतृप्तत्वाद्याश्रयतया प्रतिपन्नं तदेव सामान्यतः सकलमङ्गल्यगुणवत्त्वप्रतिपादकस्य शिवशब्दस्यापि वाच्यमिति तस्य सामान्यतो विशेषतश्च ज्ञानानन्दादिधर्माश्रयत्वसिद्धेस्तत्र कारणवाक्यश्रुतान्यवधारणानि न शाखान्तरगतकारणवाक्यश्रुतरूपान्तरव्यावर्तनार्थानि । किं 'त्वानन्दाध्द्येवे' त्यवधारणं स्थूलारुन्धतिन्यायेन ब्रह्मणि क्रमेण पूर्वप्रतिपन्नानान्नादिविज्ञानान्तररूपाणां व्यावर्तकं 'सदेवे' त्ववधारणमिदानीं पृथिव्यादिषु दृश्यमानस्य स्थूलरूपस्य सर्गाद्यसमये व्यावर्तकम् प्रज्ञानघनवाक्यं त्वत्युज्ज्वलस्य रत्नस्यान्तर्बहिश्च प्रभयेव ब्रह्मणः प्रज्ञानगुणेन व्याप्तिप्रतिपादकं न कस्यापि ब्रह्मणि व्यावर्तकम् । अतो नावधारणा**दिविरोध**ोऽपीति भावः । मायैवोपादानमिति शङ्कां निरस्यति। **मायाया इति**। सत्यं मायोपादानमिति ब्रह्माप्युपादानमेव । अपृथक्सिद्धकार्यावस्थाश्रयत्वरूपं हि मायाया उपादानत्वं समर्थनीयम् । तत्समर्थ्यमानमेव ब्रह्मपर्यन्तमायाति। नित्ययोगे खलु मायिनमिति मायाशब्दादिनिप्रत्ययः । ततश्च मायायाः ब्रह्मापृथक्सिद्धयैव तदपृथक्सिद्धायाः कार्यावस्थाया अपि ब्रह्मापृथक्सिद्धिस्सिद्ध्यति । एवं च यद्यपि ब्रह्माश्रया माया वियदाद्यचेतनरूपेण परिणमति ब्रह्माश्रया तदाश्रयजीवाश्रया च चिच्छक्तिज्ञानादिरूपेण । न तु ब्रह्म केनाप्याकरेण परिणमति । तथापि तथा तथा परिणममानानां मायादीनां ब्रह्मैवायुतसिद्धाश्रयत्वपर्यवसानभूमिरिति ब्रह्मपर्यन्तमुपादानत्वमायातीति भावः । ननु, यद्येवं कार्यावस्थाश्रयत्वरूपमुपादानत्वमिष्यते तदा यथा मृदो भाविघटावस्थाश्रयभूतायाः पिण्डावस्थाविशिष्टत्वेन कारणत्वेऽपि घटावस्थाविशिष्टत्वेन कार्यत्वमपि । एवं ब्रह्मणः सर्गाद्यसमस्ये सूक्ष्मचेतनाचेतनविशिष्टत्वेन कारणत्वेऽपि स्थूलचेताचेतनाचेतनविशिष्टत्वेन कार्यत्वमपि स्यादित्याशङ्क्याभ्युपगमेन परिहरति-सूक्ष्मेति । एवं व्यक्तिविशेषव्यवस्थितब्रह्मत्वनिर्धारण- रूपप्रयोजनपर्यवसायित्वाज्जगज्जन्मादि ब्रह्मलक्षणमित्येतदुप-पन्नमित्यधिकरणार्थमुपसंहरति-अत इति । एवं तटस्थलक्षणव्यवस्थितौ तदुपलक्षितस्य गुणविग्रहविशेषरूपं स्वरूपलक्षणमपि व्यवतिष्ठत इति शिवार्कमणिदीपिका भावः ।। इति जन्माद्यधिकरणम् समाप्तम् ।। २।।

अथ शास्त्रयोनित्वात्।।

जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्, तदेव द्रढयन्नाह शास्त्रयोनित्वादिति*।।

महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य, प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म। न हीदृशस्य शास्त्रस्यस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः संभवोऽस्ति।

यद्यद् विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात् संभवति, यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि, स ततोऽप्यधिकतरविज्ञान इति प्रसिद्धं लोके।

किमु वक्तव्यमनेकशाखाभेदभिन्नस्य देव- तिर्यङ्-मनुष्य-वर्णाश्रमादिप्रविभाग हेतो ऋर्ग्वेदाद्याख्यस्य सर्वज्ञानाकर स्याप्रयत्नेनैव लीलान्यायेन पुरुषनिःश्वासवद् यस्माद् महतो भूताद् योनेः संभवः, "अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदः (बृह॰ 2/4/10।) इत्यादिश्रुतेः तस्य महतो भूतस्य निरतिशयं।

सर्वज्ञत्वं सर्वशक्तिमत्त्वं चेति।

इति शास्त्रयोनित्वाधिकरणे प्रथमवर्णकम्।।

अथवा-यथोक्तमृग्वेदादि शास्त्रं योनिः कारणं प्रमाणस्य ब्रह्मणो यथावत् स्वरूपाधिगमे। शास्त्रादेव प्रमाणाद् जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्याभिप्रायः। शास्त्रमुदाहृतं पूर्वसूत्रे-"यतो वा इमानि भूतानि जायन्ते" इत्यादि। किमर्थं तर्हीदं सूत्रम्? यावता पूर्वसूत्र एवैवंजातीयकं शास्त्रमुदाहरता शास्त्रयोनित्वं ब्रह्मणो दर्शितम्, उच्यते-नात्र पूर्वसूत्राक्षरेण स्पष्टं शास्त्रस्यानुपादानाज्जन्मादि केवलमनुमानमुपन्यस्तमित्याशङ्क्येत, तामाशङ्कां निवर्तयितुमिदं सूत्रं प्रववृते- *शास्त्रयोनित्वादिति*।।३।।

इति तृतीयं शास्त्रयोनित्वाधिकरणम्।।

भामती

सूत्रान्तरमवतारयितुं पूर्वसूत्रसंगतिमाह-**जगत्कारणत्वप्रदर्शनेनेति**।। न केवलं जगद्योनित्वादस्य भगवतः सर्वज्ञता, शास्त्रयोनित्वादपि बोद्धव्या।

शास्त्रयोनित्वस्य सर्वज्ञतासाधनत्वं समर्थयते-* **महत ऋग्वेदादेः शास्त्रस्येति** *।। चातुर्वर्ण्यस्य चातुराश्रम्यस्य च यथायथं निषेकादिश्मशानान्तासु ब्राह्ममुहूर्तोपक्रमप्रदोषपरिसमापनीयासु नित्य-नैमित्तिक काम्यकर्मपद्धतिषु च ब्रह्मतत्त्वे च शिष्याणां शासनात् **शास्त्रम्**=ऋग्वेदादि। अत एव महाविषयत्वाद् महत्। न केवलं महाविषयत्वेनास्य महत्त्वम्, अपि त्वनेकाङ्गोपाङ्गोपकरणतयाऽपीत्याह- ***अनेकविद्यास्थानोपबृंहितस्य***।। पुराण-न्याय-मीमांसादयो दश विद्यास्थानानि, तैस्तया तया द्वारोपकृतस्य। तदनेन समस्तशिष्टजनपरिग्रहेणाप्रामाण्यशङ्काऽप्यपाकृता। पुराणादिप्रणेतारो हि महर्षयः शिष्टाः, तैस्तया तया द्वारा वेदान् व्याचक्षाणैस्तदर्थं चादरेणानुतिष्ठद्भिः परिगृहीतो वेद इति।।

न चायमनवबोधकः, नाप्यस्पष्टबोधयकः येनाप्रमाणां स्यादित्याह- ***प्रदीपवत्सर्वार्थावद्योतिनः***। सर्वमर्थजातं सर्वथाऽवबोधयन् नानवबोधकः, नाप्यस्पष्टवोधक इत्यर्थः। अत एव *सर्वज्ञकल्पस्य= सर्वज्ञसदृशस्य। सर्वज्ञस्य हि ज्ञानं स**र्वविषयम्**, शास्त्रस्याप्यभिधानं सर्वविषयमिति सादृश्यम्। तदेवमन्वयमुक्त्वा व्यतिरेकमाह- ***नहीदृशस्येति***।। सर्वज्ञस्य गुणः सर्वविषयता, तदन्वितं शास्त्रम्; अस्यापि सर्वविषयत्वात्।

उक्तमर्थं प्रमाणयति- ***यद्यद्विस्तरार्थं शास्त्रं यस्मात्पुरुषविशेषात् संभवति, सः= पुरुषविशेषः*** ***ततोऽपि*** शास्त्रात् ***अधिकतरविज्ञानः*** इति योजना अद्यत्वेऽप्यस्मदादिभिर्यत्समीचीनार्थविषयं शास्त्रं विरच्यते, तत्रास्माकं वक्तृणां वाक्याद् ज्ञानमधिकविषयम्। नहि ते तेऽसाधारणधर्मा अनुभूयमाना अपि शक्या वक्तुम्। न खल्विक्षु-क्षीर गुडादीनां मधुररसभेदाः शक्याःसरस्वत्याऽप्याख्यातुम्। विस्तरार्थमपि वाक्यं न वक्तृज्ञानेन तुल्यविषयमिति कथयितुं विस्तरग्रहणम्।

*सोपनयं निगमनमाह- ***किमु वक्तव्यमिति***।। वेदस्य यस्माद् महतो भूताद् योनेः संभवः तस्य महतो भूतस्य ब्रह्मणो निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं च किमु किमु वक्तव्यमिति योजना। ***अनेकशाखेति***। अत्र चानेकशाखाभेदभिन्नस्येत्यादिः संभव इत्यन्त उपनयः। तस्येत्यादि सर्वशक्तित्वं चेत्यन्तं निगमनम्। ***अप्रयत्नेनैवेति***। ईषत्प्रयत्नेन, यथाऽलवणा यवागूरिति। देवर्षयो हि महापरिश्रमेणापि यत्राशक्ताः, तदयमीषत्प्रयत्नेन लीलयैव करोतीति निरतिशयमस्य सर्वज्ञत्वं सर्वशक्तित्वं चोक्तं भवति।

*अप्रयत्नेनास्य वेदकर्तृत्वे श्रुतिरुक्ता- ***अस्य महतो भूतस्येति***।। येऽपि तावद् वर्णानां

नित्यत्वमास्थिषत, तैरपि पद-वाक्यादीनामनित्यत्वमभ्युपेयम्। आनुपूर्वीभेदवन्तो हि वर्णाः पदम्। पदानि चानुपूर्वीभेदवन्ति वाक्यम्। व्यक्तिधर्मचवानुपूर्वी न वर्णधर्मः ; वर्णानां नित्यानां वर्णानां विभूनां च कालतो देशतो वा पौर्वापर्यायोगात्। व्यक्तिश्चानित्या? इति कथं तदुपगृहीतानांवर्णानां नित्यानामपि पदता नित्या? पदानित्यतया च वाक्यादीनामप्यनित्यता व्याख्याता। तस्मान्नृत्तानुकरणवत् पदाद्यनुकरणम्। यथाहि यादृशं गात्रचलनादि नर्तकः करोति, तादृशमेव शिक्ष्यमाणाऽनुकरोति नर्तकी, न तु तदेव व्यनक्ति, एवं यादृशीमानुपूर्वीं वैदिकानां करोत्यध्यापयिता, तादृशीमेवानुकरोति माणवकः, नतु तामेवोच्चारयति; आचार्यव्यक्तिभ्यो माणवकव्यक्तीनामन्यत्वात्। तस्मान्नित्यवर्णवादिनां लौकिक-वैदिकपदवाक्यादिपौरुषेयत्वेऽविवादः, केवलं वेदवाक्ये पुरुषस्वातन्त्र्यास्वातन्त्र्ये विप्रतिपत्तिः। यथाहुः-"**यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता**" तत्र सृष्टि-प्रलयमनिच्छन्तो जैमिनीया वेदाध्ययनं प्रत्यस्मादृशगुरु-शिष्यपरम्परामविच्छिन्नामनादिमाचक्षते। वैयासिकं तु मतमनुवर्तमानाः श्रुति-स्मृतीतिहासादिसिद्धसृष्टिप्रलयानुसारेणानाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्यापि परमात्मनो नित्यस्य वेदानां योनेरपि न तेषु स्वातन्त्र्यम्; पूर्वपूर्वसर्गानुसारेण तादृशतादृशानुपूर्वीविरचनात्। तथाहि-यागादिब्रह्महत्यादयोऽर्थानर्थहेतवो ब्रह्मविवर्ता अपि न सर्गान्तरे विपरियन्ति। नहि जातु क्वचित् सर्गे ब्रह्महत्याऽर्थहेतुः अनर्थहेतुश्चाश्वमेधो भवति। अग्निर्वा क्लेदयति। आपो वा दहन्ति, तद्वत्। यथाऽत्र सर्गे नियतानुपूर्व्य वेदाध्ययनमभ्युदयः निःश्रेयसहेतुः, अन्यथा तदेव वाग्वज्रतयाऽनर्थहेतुः, एवं सर्गान्तरेष्वपि, इति तदनुरोधात् सर्वज्ञोऽपि सर्वशक्तिरपि पूर्वपूर्वसर्गानुसारेण वेदान् विरचयन् न पुरुषास्वातन्त्र्यमात्रं चापौरुषेयत्वं रोचयन्ते जैमिनीया अपि तच्चास्माकमपि समानम् ; अन्यत्राभिनिवेशात्। नचैकस्य प्रतिभानेऽनाश्वास इति युक्तम्। नहि बहूनामप्यज्ञानां विज्ञानां वाऽऽशयदोषवतां प्रतिभाने युक्त आश्वासः। तत्त्वज्ञानवतश्चापास्तसमस्तदोषस्यैकस्यापि प्रतिभाने युक्त एवाश्वासः। सर्गादिभुवां प्रजापति-देवर्षीणां धर्म-ज्ञान-वैराग्यैश्वर्यसंपन्नानामुपपद्यते तत्स्वरूपावधारणम्, तत्प्रत्ययेन चार्वाचीनानामपि तत्र संप्रत्ययः, इत्युपपन्नं ब्रह्मणः शास्त्रयोनित्वम्, शास्त्रस्य चापौरुषेयत्वम्, प्रामाण्यं चेति।

इति श्रीवाचस्पतिमिश्रकृतौ भामत्यां शास्त्रयोनित्वाधिकरणे प्रथमं वर्णकं समाप्तम्।

वर्णकान्तरमारभते- *अथवेति*। पूर्वेणाधिकरणेन ब्रह्मस्वरूपलक्षणासंभवशङ्का व्युदस्य लक्षणसंभव उक्तः, तस्यैव तु लक्षणस्यानेनानुमानत्वाशङ्कामपाकृत्यागमोपदर्शनेन ब्रह्मणि शास्त्रं प्रमाणमुक्तम्। अक्षरार्थस्त्वतिरोहितः॥३॥

इति भामत्यां शास्त्रयोनित्वाधिकरणे द्वितीयं वर्णकं समाप्तम्।

ऋजुप्रकाशिका

''शास्त्रयोनित्वात्'' इति सूत्रं जन्मादिसूत्रानन्तरं प्रवृत्तम्, तत्र जन्मादिसूत्रेण का सङ्गतिः? इति वीक्षायां तेन सङ्गतिमाहेत्याह- *सूत्रान्तरमिति*।। **''सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्''** इति भाष्यम्। असर्वज्ञस्य जगत्कारणत्वासंभवादिति भावः।*भाष्ये*-तदेव=सर्वज्ञत्वमेव।। *ननु*-उक्तविधया जगत्कारणत्वेन जगद्योनित्वेन ब्रह्मणः सर्वज्ञत्वसिद्धौ शास्त्रयोनितया सर्वज्ञत्वप्रतिपादनेन ? इत्याशंक्य, न केवलं जगद्योनित्वेनैव सत्त्वम् , किन्तु शास्त्रयोनित्वेनापीत्यभ्युच्चयार्थं तदित्यभिप्रेत्याह- *न केवलमिति*।। अस्तु शास्त्रयोनित्वम् , तावताऽपि कथं सर्वज्ञत्वम्? इत्याशङ्क्य, शास्त्रयोनित्वस्य सर्वज्ञत्वसाधकत्वं समर्थयत इत्याह *शास्त्रयोनित्वस्येति*।। *ननु* सूत्रसन्दर्भस्यैव शास्त्रत्वात् कथं भाष्ये- ''ऋग्वेदादेः शास्त्रस्ये'' त्युक्तम् ? इत्याशङ्क्य, शासनाच्छास्त्रमिति व्युत्पत्त्यग्वेदादेः शास्त्रत्वमस्तीत्याह- *चातुर्वर्ण्यस्येत्यादिना-शासनाच्छास्त्रमृग्वेदादीत्यन्तेन* ।। केषां शासनम्? तत्राह-शिष्याणामिति*।। कुत्र विषये शासनं शिष्याणाम्? तत्राह- * नित्यनैमित्तिक-काम्यकर्मपद्धतिषु ब्रह्मतत्त्वे चेति*।। नित्य नैमित्तिक-काम्यकर्म पद्धतीर्विशिनष्टि- * ब्राह्ममुहूर्तोपक्रमेति*।। पुनः कीदृग्भूताः कर्मपद्धतयः? इति वीक्षायां ता एव प्रकारान्तरेणापि विशिनष्टि-*यथापथं निषेकादिश्मशानान्तास्विति*।। निरुक्तकर्मपद्धतीनां सम्बन्ध्यपेक्षायामाह-*चातुर्वर्ण्यस्य चातुराश्रम्यस्य चेति*।। एवं शासनात् शास्त्रत्वमृग्वेदादेरुक्त्वा, भाष्ये-''महतः'' इत्यादिना ऋग्वेदादेर्महत्वमप्युक्तम्, तदप्यत एवेत्याह-अत एवेति*।''अत एवे'' त्यस्य विवरणम्- *महाविषयत्वादिति*। *अस्य=ऋग्वेदादेः। ''अनेकविद्यास्थानोपबृंहितस्य'' इत्येतद् व्याचष्टे- *पुराणेति*।। *पुराणन्याय- मीमांसा-धर्मशास्त्राणि षड्ङ्गानि च दश विद्यास्थानानि, तैस्तया तया द्वारोपकृतस्येति*।। अयमर्थः-दशविद्यास्थानैर्यत्र यत्र यथा यथोपकर्तव्यः, तेन तेन प्रकारेणोपकृतस्येत्यर्थः। ''अनेकविद्यास्थानोपबृंहितस्ये'' त्यनेन महत्त्वं दर्शितम्। अनेनान्या शङ्काऽप्यृग्वेदादेर्निरस्तेत्याह- *।। विशिष्टस्वरूपमाह- ततः किमिति ? अत आह-* तैरिति*। *परिगृहीत इति*।। तथा च न वेदेऽप्राणाण्यशङ्कालेशोऽपीति भावः।

*अयम्=वेदः। सर्वज्ञसादृश्यं दर्शयति- *सर्वज्ञस्य हीति*।। *शास्त्रस्यापि=ऋग्वेदादिलक्षण शास्त्रस्यापि। सर्वज्ञगुणं दर्शयन् तदन्वितत्वं शास्त्रस्य दर्शयति- *सर्वज्ञस्य गुणः सर्वविषयतेति*।। कथमिति? अत आह-- *अस्यापीति*।। शास्त्रस्यापीत्यर्थः। तथा चेदृशस्य शास्त्रस्यासर्वज्ञादसंभवादेव व्यतिरेकः। एवं चान्वय-व्यतिरेकाभ्यामीदृशशास्त्रकारणं ब्रह्मासर्वज्ञमेवेत्यभिप्रायः। तदेव सप्रमाणकं विशदयतीत्याह- *उक्तमर्थमिति*।। भाष्यं शिष्यबुद्धिसौकर्याय योजयति- *यद्यद्विस्तरार्थं शास्त्रं यस्मादित्यादिनेति*।। योजनेति*। प्रसिद्धं लोक इति योजना। लोके प्रसिद्धमित्युक्तम् लोकप्रसिद्धमुदाहरति भाष्ये- *व्याकरणादीति।। ज्ञेयैकदेशार्थे व्याकरणादि यतः पाणिन्यादेर्भवति, पाणिन्यादिस्ततो

व्याकरणादेरधिकतरज्ञान इति लोके प्रसिद्धमित्यर्थः। अमुमर्थं विशेषतोऽप्याह- *अद्यत्वेऽपीति *।। आधुनिकत्वेऽपीत्यर्थः। *वाक्यात्=विरच्यमानशास्त्रात्मकाद्वाक्यात्। *ननु* यद्यदनुभूयते, तत् सर्वं विरच्यते; तथा च वक्तॄणां ज्ञानस्य विरच्यमानवाक्यात् समानविषयतया कथमधिकविषयत्वमिति? अत आह- *नहीति *।। अनुभूयमानानां वक्तुमशक्यत्वेमेव स्फुटयति- *न खल्विति *।। ''मधुररसभेदाः'' इत्यनन्तरम्- ''अनुभूयमानाः'' इति शेषः। भाष्ये- ''विस्तरार्थं शास्त्रमित्युक्तम्, तत्र विस्तरपदस्य प्रयोजनमाह- *विस्तरार्थमपि वाक्यमिति *। विमतः, सर्वप्रकाशनशक्तिमत ऋग्वेदादेशशास्त्रस्य योनिः, ततोऽप्यधिकतरविज्ञानवत्प्रणेतृत्वात्, स ततोऽप्यधिकतरविज्ञानः; यथा व्याकरणादिप्रणेता पाणिन्यादिः, इति प्रतिज्ञाद्युदाहरणान्तानवयवान् सिद्धवत्कृत्य सोपनयं निगमनममाहेत्याह *सोपनयमिति * ।। तत्रापि भाष्यं योजयति- *। *सर्वेति *। *ननु* वेदस्य निःश्वसिततुल्यत्वेऽपि निःश्वसितवदीषत्प्रयत्नसापेक्षत्वेन भाष्ये- ''अप्रयत्नेने''ति कथमुक्तमिति? अत आह- *ईषत्प्रयत्नेनेति *।। यद्यप्यप्रयत्नस्य ब्रह्मणः प्रयत्नलेशोऽपि नास्त्येव; तथाऽपि मायावृत्त्यात्मके क्षणवन्मायावृत्त्यात्मकस्य तस्य संभवे बाधकाभावा एवेति द्रष्टव्यम्। ईशत्प्रयत्नसाध्यत्वे दृष्टान्तमाह -*यथाऽलवणा यवागूरितीति* ।। ईषत्प्रयत्नसाध्यत्वमेवार्ग्वेदादिशास्त्रस्य दर्शयति- * देवर्षयोऽपीति *।। अयम्=ईश्वरः। *अस्य=ईश्वरस्य, ब्रह्मरूपस्य। *ननु* वेदस्य परमपुरुपब्रह्मजन्यत्वे सकर्तृकत्वेन सापेक्षत्वात् सापेक्षत्वलक्षणमप्राणाण्यं स्यादिति-चेत्, *तत्र वक्तव्यम्*- किं सापेक्षत्वं पुरुषनिर्वर्त्यत्वमात्राद्वा? अभिनवानुपूर्वीविरचनाद्वा ? मानान्तरोपलब्धार्थविषयकवचनरचनाद्वा? एकपुरुषकर्तृकत्वप्रतिभानेनानाश्वासाद्वा? नाद्यः; वर्णनित्यतावादिनस्तवापि मते पदवाक्याद्यात्मकस्य वेदस्य भावरूपस्यानित्यतया कृतकत्वेन पुरुषनिर्वर्त्यताया अवश्याभ्युपेतव्यत्वादित्यभिप्रेत्याह- *येऽपि तावदिति *।। कथमभ्युपेतव्यम्! तत्राह- * आनुपूर्वीति *।। ततः किमिति ? अत आह- *व्यक्तिधर्मश्चेति।। अभिव्यक्तिर्व्यक्तिशब्दार्थः। कुतो न वर्णधर्मः? तत्राह- *वर्णानामिति *।। तथा चानुपूर्व्याः पौर्वापर्यलक्षणत्वेन वर्णधर्मत्वायोग इति भावः। अस्त्वानुपूर्व्या व्यक्तिधर्मत्वम्, तावताऽपि कथं पदवाक्यानामनित्यतालाभ इति? अत आह- * व्यक्तिश्चानित्येति *।। *तदुपगृहीतानाम्=अभिव्यक्तानामित्यर्थः। ''कथमि'' त्येतन्नित्येत्यनेने सम्बध्यते। कथं नित्या ? न नित्या, किं त्वनित्यैवेत्यर्थः। पदानित्यत्वे वाक्यानित्यत्वं तत एवं व्याख्यातमित्याह- * पदानित्यतया चेति *।। द्वितीये क्रमवत्त्वमात्रमभिनवत्वम्? विसदृशक्रमत्वं वा? आद्यपक्षो भवद्भिरप्यङ्गीकृतः, चरमस्तु नास्माभिरपि स्वीकृत इत्याह- *तस्मान्नृत्तेति *।। दृष्टान्तमुपपादयति- *यथाहीति *।। *नत्विति *।। नर्तकी नर्तकानुकृतसदृशमनुकरोति पदम्, नतु नर्तकानुकृतमेवानुकरोति, नर्तकचेष्टातो नर्तकीचेष्टाया अन्यत्वादिति भावः। दार्ष्टान्तिकमुपपादयति- *एवमिति *।। *अध्यापयिता=आचार्यः। *नतु तामेवेति *।। अध्यापकोच्चारितानुपूर्वीमेव माणवको नोच्चारयतीत्यर्थः। तत्र हेतुमाह- *आचार्यव्यक्तिभ्य इति *।। उपसंहरति- *तस्मादिति *। कुत्र तर्हि तेषां विवादः? तत्राह- *केवलं

वेदवाक्य इति*।। *विप्रतिपत्तिः=विवाद इत्यर्थः। अत एवं वेदवाक्ये पुरुषस्य स्वातन्त्र्यमेव निराक्रियते, न पौरुषेयत्वम् ; परमपुरुषजन्यन्वलक्षणपौरुषेयताया अङ्गीकारादिति भावः। तत्र संमतिमाह-* यथाहुरित*।। पौरुषेयत्वत्रादिनो जैमिनीयास्तु परं वेदे सृष्टिं प्रलयं च नेच्छन्ति। *ननु* वेदस्य तन्मतेऽनादित्वे कथं वेदाध्ययनं प्रत्यस्मादृशगुरुशिष्यपरम्परेति? अत आह-*अत्रेत्यादिना*।। *अनादिमिति*। प्रवाहानादिमित्यर्थः। मानान्तरोपलब्धार्थविषयकवचनरचनात् सापेक्षत्वमिति यस्तृतीयः कल्पः, सोऽनभ्युपगमनिरस्त इत्याह-*वैयासिकं त्विति*।। *न तेषु स्वातन्त्र्यमिति*।। वेदेषु स्वातन्त्र्यं नेत्याचक्षत इत्यर्थः। तथा च न सापेक्षत्वम् ; मानान्तरोपलब्धार्थविषयकवचनान्मम भातोऽयमर्थ एतस्य स्फुरत्वित्येवं बुद्धिपूर्वकं परमपुरुषेण वेदस्याविरचनात्, किंतु निःश्वासवद् वेदस्य निर्गतत्वादिति भावः। *ननु* परमात्मनो वेदेषु स्वातन्त्र्याभावे तत्तत्सर्गेषु वेदस्यानुपूर्वीभेदः स्यादिति, अत आह-* पूर्वपूर्वेति*।। *ननु* वेदानामविद्योपहितब्रह्माविवर्तताया उक्तत्वेन यादृच्छिकत्वापत्तौ पूर्वपूर्वसर्गानुपूर्व्यनुसारेणैवोत्तरोत्तरसर्गानुपूर्वीविरचनं कुतः? व्युत्क्रमस्यापि संभवात्, इत्याशङ्क्य, यथा यागस्याविद्योपहितब्रह्मविवर्तत्वेऽपि सर्वेषु सर्गेषु स्वर्गाद्यर्थहेतुत्वमेव, न कस्मिंश्चित् सर्गेऽनर्थहेतुत्वम्; यथा वा ब्रह्महत्याया अविद्योपहितब्रह्मविवर्तत्वेऽपि सर्वेषु सर्गेस्वर्गाधर्थहेतुत्वमेव, न कस्मिंश्चित्सर्गेऽनर्थहेतुत्वम्; तद्वद् वेदानां तथात्वेऽपि सर्वेषु सर्गेष्वेकानुपूर्वीकत्वमेव, नत्वानुपूर्वीभेद इत्याह-*यथाहि यागादीत्यादिना*।।*न सर्गान्तरे विपरियन्तीति* ।। सर्गान्तरे विपरीता न भवन्तीत्यर्थः। तदेतदाह-* नहीति*।। *अग्निर्वेति*।। क्वचित् सर्ग इत्यनुषङ्गः। *आपो वेति* ।। अत्रापि क्वचित्सर्ग इत्यनुषङ्गः। दार्ष्टान्तिकं स्पष्टयति-तद्वदिति*।। *यथात्र सर्ग इत्यादिना*।। *अभ्युदयेति*।। यथा कर्मप्रतिपादकवेदाध्ययनं नियतानुपूर्व्यमत्र सर्गेऽभ्युदयहेतुः, यथा वा ब्रह्मप्रतिपादकवेदाध्ययनं नियतानुपूर्व्यं सदत्र सर्गे निःश्रेयसहेतुः तथा सर्वसर्गेष्वपि नियतानुपूर्व्यं सदेवोक्तं वेदाध्ययनमभ्युदयहेतुर्निःश्रेयसहेतुश्चेत्यर्थः।। अत्र सर्गे वेदाध्ययनस्यानियतानुपूर्व्यत्वे बाधकमाह-*अन्यथेति*।। *तदेव=अनियतानुपूर्व्यमध्ययनमेव। वाग्वज्रतयेति*।।

'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥''

इति स्वरानुपूर्व्यादिभङ्गेऽनर्थश्रवणादि (1) त्यर्थः एवं सर्गान्तरेष्वपीति*।। सर्गान्तरेष्वेवमेवानुपूर्व्यम्, अन्यथाऽनर्थ इत्यर्थः। एवं च वेदेषु ब्रह्मण ईश्वरस्यास्वतन्त्रत्वेऽपि यतो नियतानुपूर्वीभङ्गाभावः, अतो वेद ईश्वरस्य नास्वातन्त्र्यच्युतिरित्याह-*इति तदनुरोधादिति*।। *ननु*-वेदस्योक्तविधया पुरुषजन्यत्वे कथं वेदापौरुषेयत्वं वेदान्तिभिर्युष्माभिर्वर्ण्यते? इत्याशङ्क्य, जैमिनीयमतेऽपि वेदे पुरुषस्या स्वातन्त्र्यमेव वेदस्यापौरुषेयत्वम्, तच्चास्माकमपि समानमिति वेदापौरुषेयत्वमस्माभिर्वेदान्तिभिरुच्यत

इत्यांभप्रेत्याह-पुरुषास्वातन्त्र्यं, चेति*।। *अन्यत्रेति*। अद्वैत एवेत्यर्थः।। कर्तुरिति शेषः। "नचे" "त्येतत्- " युक्तमि" त्यनेन सम्बध्यते। एकेन यथोक्तम्- तथा पुरुषान्तरेणाप्युक्तं चेद् विश्वास इति तथाऽभिमानः; लोकेऽपि सर्वस्यापि वाक्यस्यैककर्तृकत्वेनैकस्मिन् नानाकर्तुरभावेन नानाकर्तृकत्वप्रतिभानस्य विश्वासाप्रयोजकतया निर्दुष्टैककर्तृकत्वप्रतिभानस्यैव विश्वासप्रयोजकत्वादिति भावः। दूषणानन्तरमाह-*नहि बहूनामिति*।। *प्रतिभाने=कर्तृत्वप्रतिभाने। तत्वज्ञानवत इति*।। अभ्रान्तस्येत्यर्थः। यत एवापास्तसमस्तदोषत्वम्, अत एवाभ्रान्तत्वं बोध्यम्। *प्रतिभानेन= कर्तृत्वप्रतिभानेन*। *ननु* एतावता निर्दुष्टेश्वरकर्तृके वेदे विश्वास इत्यायातम्, तदनुपपन्नम्; अस्माभिरीश्वरस्यैवाज्ञानात्, इत्यत आह- *सर्गादिभुवांमिति*।। *तत्स्वरूपावधारणम्=ईश्वरस्वरूपावधारणम्। अन्तोऽस्माभिरेव तत्स्वरूपमवधारितम्; अतस्तत्कर्तृकत्वप्रतिभाने वेदे नानाश्वासो युक्त इति भावः। अस्तु सर्गादिभुवां युष्माकं चेश्वरप्रत्ययनम्, अर्वाचीनानां कथमिति? अत आह-* तत्प्रत्ययने चेति*।। पूर्वोक्तमुपसंहरति *इत्युपपन्नमित्यादिना*।। *ननु* अनविच्छिन्नसंप्रदाये वेदे विश्वासः, अविच्छिन्नसंप्रदायत्वं च वेदस्य नानावक्तृकत्वे; नत्वेकवक्तृकत्वे; तथा च वेदस्य ब्रह्मैककर्तृकत्वे कथं तत्राश्वासः? इति चेत्, तत्र वक्तव्यम् - किं वेदस्य नानावक्तृकत्वं संप्रदायाविच्छेदाय वक्तव्यमित्युच्यते ? किं वा नानाकर्तृकत्वम्? आद्य इष्टापत्तिः; अध्यापकानामध्येतृणां च बहूनां वक्तृणां सत्वात्, न द्वितीयः वेदापौरुषेयत्ववादिना त्वयैकस्यापि। वेदकर्तुरनङ्गीकारेण नानाकर्तृकत्वस्य सुतरामनङ्गीकारात्, एकस्यैव सर्वज्ञस्य सर्वशक्तिमतो वेदकर्तृकत्वसंभवे नानाकर्तृकत्वमादायाविच्छेदासंभवाच्च। तस्माद् वेदकर्तुरेव ब्रह्मणो वेदोपादानत्वाद् ऋग्वेदादिलक्षणशास्त्रयोनित्वं ब्रह्मणः सिद्धम्।।

इति भामतीव्याख्यायामृजुप्रकाशिकायां शास्त्रयोनित्वाधिकरणे प्रथमवर्णकं सम्पूर्णम।

पञ्चपादिकाविवरणम्

शब्दोपादानभावाद् ध्वनिगतविषयद्योतनाः शक्तयोऽमू-

र्ब्रह्मण्येवासुरग्नेर्विषयविषयिणी दीपशक्तिः खलूच्चैः।

द्रष्टुश्च ज्ञानशक्तिर्न्नु न करणता, किन्तु दीपप्रभावत्

संयुक्तद्योतनैवेत्यपरमिह पुनः साध्यते सर्ववित्त्वम्।।

ब्रह्मणो लक्षणद्वयाभिधानपरेऽपि सूत्रे सर्वज्ञत्वं प्रधानादिकारणवैलक्षण्यस्य सिद्धये जगद्विरचनोपपत्तये च श्रुतियुक्तिभ्यां प्राधान्येन प्रदर्शितम्। तदेव हेत्वन्तरेण साधयति; प्राधान्यात् , अथवा-सर्वजगत्कारणत्वेन

सर्वज्ञत्वं न सम्भवति; वेदानामकर्तृकत्वादित्याशङ्क्य, सम्बन्धमाह- *अयमपर इति*।। वेदस्य तावत् सर्वविषयसामर्थ्यं दर्शयति तदुपादानतया ब्रह्मणोऽपि तद् दर्शयितुम्- * अनेकनानाविधविषयविद्यास्थानेति*। *ननु नास्ति वेदस्य सर्वज्ञता; अर्थज्ञानकरणतयोपयोगादिति, *सत्यम्* अत एव कल्पप्प्रत्ययप्रयोग इति। *ननु* वेदस्य सर्वविषयज्ञानसामर्थ्येऽपि ब्रह्मणः कथं सर्वज्ञतेति? अत आह- * अतश्च तस्य कारणमिति*।। दृश्यत इत्यादि दृष्टान्तः। अयं प्रयोगः- वेदः, स्वविषयादधिकतरविज्ञानवत्प्रणीतो भवति, वाक्यप्रमाणत्वात्; पाणिन्यादिशास्त्रवदिति। *ननु* किमत्रानुमानेन प्रसाध्यते? यदि तावदुपाध्यायस्याध्यापनोच्चारणवच्छास्त्रशब्दोपलक्षितानां सर्वेषां शब्दानां ब्रह्मण्यप्युच्चारणं साध्यते? तदा नोपाध्यायवत् सर्वज्ञं ब्रह्म भविष्यति। अथ सकलवाक्यार्थं प्रमाणान्तरेणोपलभ्य तत्प्रतिपत्त्यर्थं परस्मै वाक्यं विरचयति? प्राप्तं तर्हि पैरुषेयत्वम्; तल्लक्षणत्वात्पुरुषवचसाम्, इति चोदयति- *नन्वेवं सतीति*।।

अत्र केचित्परिहारमाचक्षते प्रमाणान्तरेणार्थमुपलभ्य विवक्षित्वा परस्मै विरचितः शब्दः पौरुषेय इत्युच्यते। तत्रेदमनेन कर्तव्यमिति वक्तुरभिप्रायभेदो रागः पुरुषवचसामर्थः। द्विविधश्च रागः- नित्योऽनित्यश्च। तत्रानीश्वराणामभिलषितसाधनज्ञानस्यायानित्यतया तज्जनयरागस्याप्यनित्यत्वात् तद्विषयाणां पुरुषवचसां प्रमाणान्तरसापेक्षतया पौरुषेयत्वमङ्गीक्रियते, ईश्वरस्य पुनर्निखिलेष्टसाधनविषयज्ञानानां नित्यतया तन्मूलरागस्यापि नित्यत्वादीश्वरप्रणीतानामपि वैदिकवचसां नित्यरागविषयतया पौरुषेयता न जेगीयते-इति, *नैतत्सारम्*; ईश्वरे सकलाभिलषितसाधनज्ञाननित्यत्वे प्रमाणाभावात् , अनुमानानां चातद्गोचरत्वस्य दर्शितत्वात्। शब्द इति चेत् , न; इतरेतराश्रयापातात्-नित्यज्ञानमूलनित्यरागजन्यत्वे शब्दस्यानपेक्षं प्रामाण्यम् , अनपेक्षे च शब्दे नित्यज्ञानसिद्धिरिति। 'रागश्च नित्यः' नित्याभिलषितसाधनज्ञानमूलः' इति च व्याहन्यते। कुतश्चैतद्-

नित्यानित्याभिप्रायभेदेन पुरुषवचसामपि सतां सापेक्षत्वानपेक्षत्वविभागो विद्यत इति? न च पुरुषाभिप्रायः शब्दार्थ इति च वक्ष्यते। तस्मादसमञ्जसमेतत्।।

अन्ये तु सङ्गिरन्ते- व्यासाद्यभिप्रायभेदतात्पर्यवतामपि भारतवचसामिदानीन्तनवाचकवदध्ययन-विधितात्पर्यवतामेव वेदानां सृष्टिकाले समुच्चारणमीश्वरस्य वेदप्रणयनं नाम। ततश्च रागतात्पर्याभावाद् वेदप्रामाण्यमीश्वरस्य सर्वज्ञता चेति, अत्र वयं पृच्छामः- सृष्टिसमये किं प्रमाणान्तरेणार्थमुपलभ्य वेदवाक्यं व्यनक्ति? यथा पाणिन्यादिः, आहोस्विदुपाध्यायवत् पूर्वसिद्धवाक्यमुच्चारयति? तत्र पूर्वस्मिन् कल्पे पौरुषेयताऽऽपत्तिः , उत्तरस्मिन्नुपाध्यायवदेवासर्वज्ञतापत्तिः। अभिप्रायतात्पर्याभावादपौरुषेयतेति चेत् , उपलभ्य रचनायां कुतो रागतात्पर्याभावः? पूर्वमेव विधितात्पर्यादिति चेत् , तथापीतरन्न विहन्यते। न चोभयतात्पर्यमुपपद्यते; सत्यपि विधितात्पर्येऽवगम्यार्थं रचनैव सापेक्षत्वे निमित्तं समधिगतम्। नचोपलभ्य रचनायां विधितात्पर्यमुपपद्यत इति यत्किञ्चिदेतत्।।

अपरे तु मन्यन्ते- निर्विकल्पज्ञानपूर्वकाणि किल वेदवाक्यानि न सापेक्षत्वदोषमश्नुवते; ब्रह्मस्वरूपज्ञानस्य निर्विकल्पकत्वात्, लौकिकवचसां तु सविकल्पज्ञानपूर्वत्वात्सापेक्षता-इति, *नायमपि विभागः सिध्यति*; उपलभ्य रचनाया एवं सापेक्षत्वनिमित्तत्वात्, स्वरूपज्ञानस्याप्यभिलषितसाधनोपरागे सविकल्पकत्वात्। तस्मान्नैते परिहाराः।।

स्यात्तर्हि वेदानां पौरुषेयता? ननु* औपौरुषेयो वेदः, अविच्छिन्नव्यवहारे सत्यस्मर्यमाणकर्तृकत्वात् ; आत्मवदित्यपौरुषेयतानुमीयत। इति, *न*; चिरवृत्तेष्वपीदानीमनुमानप्रमीयमाणकर्तृकेष्वनैकान्तिकत्वात्, वेदानां च कर्तुरनुमानागमाभ्यां प्रमीयमाणत्वात्। तथाहि विशिष्टबहुज्ञपुरुषप्रणीतः, वेदः वह्वर्थविषयवाक्य-प्रमाणत्वात् ; भारतवत् , "इदं सर्वमसृजत" "ऋचो-यजूंषि सामानी" त्यागमः। तस्मात्पौरुषेयो वेद इति। *अत्र पृच्छामः*- कथं पौरुषेये वेदे प्रामाण्यं लभ्यते कपिलकणादाक्षपादानामिति? सर्वज्ञप्रणीततयेति चेत्, न तावदनुमेयः सर्वज्ञ इत्युक्तम्। आगमाच्चेत्सिद्धिः, न; इतरेतराश्रयात्-सर्वज्ञे सिद्धे तत्प्रणीततया वेदप्रामाण्यम् , ततश्च सर्वज्ञसिद्धिरिति। स्यादेतत्- महाजनपरिग्रहाद् वेदप्रामाण्यमिति, न; सुगताद्यागमानुसारिणामेव देशविशेषेष्वानन्त्यश्रवणात्। न च देहात्मभाव-चन्द्रप्रादेशत्वादीनां महाजनपरिगृहीतानां प्रामाण्यं दृश्यते। न च महाजनपरिग्रहः प्रमाणपक्षपाती। तस्मान्न प्रामाण्यलाभः।।

किञ्च पुरुषो वा केन प्रमाणेनोपलभ्य धर्माधर्मौ, वेदवाक्यं विरचयेत्? न तावदिन्द्रियपञ्चकेन; रूप-रस-गन्ध-स्पर्श-शब्द-तत्तत्समवेत-विशेषग्राहित्वात् , वर्तमानग्रहणनियमाच्च. धर्मस्य च साध्यत्वात्। *ननु* आत्मसमवायी धर्मस्तद्ग्रहणेनैव ज्ञानेन तद्गुणतया मनसैव चक्षुरादिना वा गृह्यत इति, किमिति तर्हि न गृह्णीमः? न च विशिष्टः पुरुषो गृह्णाति; तदिन्द्रियाणामप्येतादृशत्वात्,

योगजधर्मसामर्थ्याद्विशिष्टानि तदिन्द्रियाणीति चेत्, तथाऽपि मार्जारादिदृष्टिवत्स्वविषयेऽतिशयमात्रं गृह्णीयुः, नाविषयं धर्मम्। "दिव्यं चक्षुर्ददाम्यहम्" प्रादात्तेषां स भगवान् दिव्यं चक्षुर्जनार्दनः" इति स्मरणादस्ति योगिनां दिव्यं चक्षुरिति चेत्, न; तस्यापि विश्वरूपादिस्वविषयातिशयदर्शित्वात्। न चात्मसमवेततयाऽपि धर्मो वर्तमानो भवति, येन प्रत्यक्षः स्यात् कल्पान्तरीयोऽनुष्ठितो धर्मोऽस्मिन् कल्पादौ वर्तत इति चेत्, न; कल्पान्तरीयधर्मोपदेशा- योगात्। कल्पान्तरीयोऽनुष्ठितो धर्मोऽस्मिन् कल्पादौ वर्तत इति चेत्, न; कल्पान्तरीयधर्मोपदेशायोगात्। ततोऽपि कल्पान्तरानुष्ठितधर्मं प्रत्यक्षेणोपलभ्योपदिशतीति चेत्, अन्धपरम्परा स्यात्। तस्मान्न प्रत्यक्षमूलो वेदः। नापि शब्दमूलः ; अनवस्थानात्। तस्मात्प्रामाण्यहानान्न पौरुषेयो वेद इति ॥

मा भूत् प्रामाण्यमिति सुगतार्हताः। तैरिदं वक्तव्यम्-प्रत्यक्षानुमानदृष्टव्यतिरिक्तः कर्मफलसंबन्धो विद्यते? नवेति? विद्यते चेत् कथमपौरुषेयागममन्तरेण तस्य वृद्धिः? सर्वज्ञसुगतप्रणीतागमादिति चेत्, किं कपिलादयः सर्वा न भवन्ति? सर्वे तीर्थकराः सर्वज्ञा इति चेत्, धर्माधर्मयोर्विवादः कथं स्यात्? न चैकः सर्वज्ञो नेतर इतिप्रमाणमस्ति। नच सर्वे सर्वज्ञप्रणीता धर्मा एवेति युक्तम् ; अन्योन्यधर्मनिराकरणात्। न चापौरुषेया एव सुगताद्यागमा इति युक्तम्; अनुस्मर्यमाणकर्तृकत्वात्। अपौरुषेयत्वे च न विवदामः- उदितानुदितहोमवद् व्यवस्थोपपत्तेः।।

आह लोकायतः-मा भूत् प्रत्यक्षदृष्टातिरिक्तः कर्मफलसंबन्धः, पौरुषेयता तु वेदस्यानुमानसिद्धा न निवार्यत इति। स वक्तव्यः-किं लौकिकवचांसि प्रमाणानि? न वेति? न चेत्, न मया ते वादो युक्तः; शब्दैरेव परस्परविरुद्धार्थप्रतिपादनरूपत्वाद्वादस्य। अथ लौकिकवचांसि प्रमाणानि, वेदवचोभिस्तर्हि किमपराद्धम्? *ननु* पौरुषेयत्वं वेदस्यानुमानात् तस्य च मूलप्रमाणाभावाद प्रामाण्यमुक्तम्, *न* स्वाभाविकत्वाच्छब्दानामर्थावबोधसामर्थ्यस्य प्रत्ययानुसारित्वाभावात्, अन्यथा सागरे विवक्षन्मेरूशब्दं ब्रूयात्। स्वभावसिद्धशब्दसामर्थ्यानुसारेण। हि लौकिकाः शब्दं प्रयुञ्जते, *सत्यम्*; कदाचित्सर्वाभिधान-सङ्केतसामर्थ्यात्। इदानीं व्यवस्थयाऽभिधानमिति चेत्, तत; विवादगोचरापन्नः पूर्वतनशब्दार्थसंबन्धव्यवहारः, तथाविधपूर्वपूर्वव्यवहारपरम्परानिबन्धनः; अभिधानाभिधेयव्यवहारत्वात् ; इदानीन्तनतद्व्यवहारवत्, इत्यनादितानुमानात्। साङ्केतिकशब्देष्वनैकान्तिक इति चेत्, न ; अभिधानाभिधेयविषयत्वादनुमानस्य। जाति-मात्राभिधायिनो वा सर्वदेशेष्वभिधानतया संप्रतिपन्ना वा यस्मिन्नुत्पद्यमाने क्वचिद् गुहीतसंबन्धा एवोपरज्यन्ते शब्दाः, तानि चाभिधानानि, नैवं साङ्केतिकाशब्दे इति। मा भूत् तर्ह्यभिधा संङ्केतः; वेदवाक्यरचना तु पुरुषनिबन्धनैवेत्यत आह- * न स्याद् ब्रह्मवदनादित्वादिति *।। विवादगोचरापन्नं सृष्टिकालीनं वेदाध्ययनम्, पूर्वपूर्वतथाविधवेदाध्ययनानुस्मृतिनिबन्धनं भवितुमर्हति, वेदाध्ययनत्वात् , इदानीन्तनवेदाध्ययनवदिति विशेषतोदृष्टानुमानेन वाक्यत्वाद्भारतवदिति सामान्यतोदर्शनाद्

बलीयसा वेदस्यानादित्वसिद्धेः कुतः पौरुषेयता? *ननु* सर्वेष्वपि ग्रन्थेष्विदमनादित्वानुमानमनुविशति, न; तैरेव ग्रन्थैस्तत्तत्कर्तॄणां प्रतिपादनात्तदागमविरोधात्, इहापि श्रुत्यैव वेदस्य कर्ता प्रतिपाद्यत इति चेत् ; न तावत् " स तया वाचेदं सर्वमसृजत ऋचो यजूंषि सामानी" ति श्रुतिः प्रजापतिविषया सती तस्य प्रमाणान्तरेणार्थमुपलभ्य शब्दरचनां ब्रवीति; "यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै" इति श्रुतौ प्रागेव वेदसद्भावावगमात्। "अस्य महतो भूतस्ये" ति श्रुतिरीश्वरविषयाऽपि सती प्रकरणसामर्थ्याद्वेदोपादानत्वमेव ब्रवीति।।

किं चेदं पौरुषेयत्वं साध्यते? यदि तावत्: पुरुषनिर्वर्त्यतामात्रम् , संप्रतिपन्नमेव ; तत्तत्क्रमविशिष्टानामेव वर्णानां वेदशब्दाभिधेयत्वात् क्रमस्य तूच्चारणोपलब्ध्योरन्यतरस्य प्रतिक्षणनिर्वर्त्यतया तद्विशिष्टवर्णानामपि प्रत्युच्चारणं जन्यत्वात्, पूर्वपूर्वक्रमानुस्मरणेन तत्सदृशोत्तरोत्तरक्रमनिवर्तनात्, क्रमसादृश्यपरम्परायाराश्चानिदंप्रथमतया तद्विशिष्टवर्णनित्यत्वाभिधानात्। अथ वेदः स्वार्थप्रवृत्तप्रमाणान्तरजन्यत्वात्पौरुषेय इति, तत्र प्रत्यनुमानमुच्यते-वेदः, स्वार्थप्रवृत्तप्रमाणान्तरजन्यो भवति, असर्वज्ञवचनत्वाभावे सति धर्माधर्मब्रह्मप्रमाणत्वात् ; परपरिकल्पितेश्वरबुद्धिवदिति। अध्ययनस्येदंप्रथमता वेदस्य पौरुषेयतेति, न, अध्ययनस्यानादित्वानुमानस्य दर्शितत्वात्। तस्मान्नास्ति वेदस्य पौरुषेयत्वमिति।।

ननु आप्तेन प्रमाणान्तरेणार्थमुपलभ्य परप्रतिपत्तये तत्र प्रयुज्यमानः शब्दः प्रमाणं भवति, तदभावादनाप्तवाक्यवदप्रमाणं वेदः प्रसज्यते,*ननु* अनाप्तेन भ्रान्त्योत्प्रेक्षया वाऽर्थाभासमुपगम्य परप्रवृत्तये तत्र प्रयुज्यमानः शब्दः प्रामाण्यात्परिहीयते, तदभावादाप्तवाक्यवद्वेदः प्रमाणं किं न स्यात्? *ननु* आप्तवाक्यमनाप्तप्रणीतत्वाभावात्प्रमाणम् ? किं वाऽतप्रणीतत्वात्? इति विवेक्तव्यम्, नोभयथाऽपीति ब्रूमः। कथम्? शब्दानां तावत्संसृष्टार्थावबोधनसामर्थ्यं स्वारसिकमेव मध्ममवृद्धप्रयोग-प्रत्यभ्यामाप्तानाप्तप्रत्ययव्यतिरेकेणावगतम्। तत्रानाप्तस्य भ्रान्त्युत्प्रेक्षाज्ञाने तन्मूलविरचितशब्दकारणदोषतया शब्देऽपि दोषं प्रसञ्जयतः। ततश्च दुष्टकारणजन्यविज्ञानमयथार्थमप्रमाणम्, इति स्वतः सिद्धशब्दसामर्थ्यप्रयुक्तप्रामाण्यस्य प्रतिबन्धकतयाऽनाप्तज्ञानमवतिष्ठते। आप्तप्रमाणं च प्रतिबन्धभ्रान्त्युत्प्रेक्षादिदोषनिरासितया संपद्यते। ततश्चाप्तत्वज्ञानं न शब्दप्रामाण्यहेतुः, वेदे तु पुरुषसंबन्धाभावान्न। प्रतिबन्ध-तन्निरासापेक्षा, इति नाप्तप्रणीतत्वमत्रोपयुज्यते। *ननु* आप्तप्रयोगानपेक्षत्वेऽग्निपर्वत तत्सम्बन्ध शब्देषु स्मर्यमाणेषु तेभ्य एवाग्निमानपर्वत, इति प्रमितिरुत्पद्येत, *सत्यम्*; पर्वतस्याग्निमत्तामात्रं प्रमीयत एव, पुरोवर्तिनि तु प्रमाणान्तर विरोधान्न प्रमीयत इति। अथवा-द्विविधः प्रयोगः प्रामाण्यहेतुः, अर्थोपलब्धिनिबन्धनः पौरुषेये, पूर्वप्रयोगानुस्मृतिनिमित्तो वेदे, तदुभयाभावात्सुप्तादिवाक्येष्विवाप्रामाण्यमिति, अथवा-तात्पर्याभावात् केवलेभ्यः शब्देभ्यो नार्थप्रमितिः वेदे पुनरध्ययनविधितात्पर्यादाप्तप्रयोगाभावेऽपि प्रमितिरुत्पद्यते ;

अध्ययनविधिवाक्यस्यापि स्वेनैव तात्पर्यसिद्धेः। अतोऽनादिर्वेद इति। अनादित्वेऽपि पुराणवाक्यवदन्यथासन्निवेशप्रणयनमाशङ्क्याह- *कूटस्थनित्यत्वादिति*।।

अनादिवेदस्य कथं ब्रह्मकारणता? इति शङ्कते- *कथं पुनरिति*।। अत्र शास्त्रशब्दोपलक्षितसर्वशब्दानां वर्णानामेकपदार्थबुद्ध्यवच्छेदकवर्णनियामकक्रमविशिष्टपदानां वाक्यार्थबुद्ध्यवच्छेदकवाक्य-नियामकक्रमविशिष्टवाक्यानां महावाक्यार्थबुद्ध्यवच्छेदकवाक्यनियामकक्रमविशिष्टप्रकरणानां परिपूर्ण-पुरुषार्थसाधनबुद्ध्यवच्छेदकानेकप्रकरणनियामकक्रमविशिष्टशास्त्राणां च प्रवाहरूपेण ब्रह्मोपादानतया कार्यत्वमस्तीत्याह- *तत्परतन्त्रत्वादित्यादिना*।।

ननु ''रज्जुसर्पवदि''ति वेदस्य मिथ्यात्वं कथं निदर्श्यते? *ननु* कोऽयं वेदो नाम? न तावद् वर्णमात्रम्। क्रमविशेषवन्तो वर्णा इति चेत्, नास्ति देशकालनिबन्धनो वर्णक्रमः; नित्यतया सर्वगतत्वात्, नापि वस्तुनिबन्धनक्रमः; विरोधात्, न ह्येकदैव राजा जरेति जकारस्य रेफात्पूर्वापरीभावो युक्तः। उच्चारणसमवेत एवं क्रमो वर्णेषूपरज्यत इति चेत्, न; अप्रत्यक्षत्वादुच्चारण-तत्क्रमयोः, प्रत्यक्षस्तु क्रमविशिष्टवर्णात्मा वेदः। अथोपलब्धिक्रमवन्तो वर्णा वेदशब्दभाज इति, न; अन्यक्रमस्यान्य-धर्मत्वानुपपत्तेः अथोपलब्धिधर्म एव क्रमो वर्णेषु समारोप्यत इति चेत्, तर्ह्यख्यातिवादिनः क्रममात्रस्य वर्णमात्रस्य वेदशब्दानर्हत्वाद् विशिष्टप्रत्ययाभावादविवेकमात्रमेव वेद इत्यर्थावबोधो न स्यात्, अन्यथाख्यातौ पुनर्विशिष्टप्रत्ययमात्रत्वाद् विशिष्टार्थाभावाद्विज्ञानातिरिक्तो वेदो न स्यात्। न च-उपलब्धिक्रमोपलक्षिता वर्णा वेदः, न विशिष्टा इति -युक्तम् ; क्रमविशिष्टवर्णप्रत्ययस्य प्रत्यक्षत्वात्। अनिर्वचनीये तु पुनर्विशिष्टार्थतत्प्रत्यययोर्भावाद् विज्ञानव्यतिरेकेणार्थस्यानिर्वचनीयत्वेऽप्यर्थक्रियासमर्थतया तुच्छव्यावृत्त्यभ्युपगमादस्त्येवार्थावबोधसमर्थो वेद इति निरवद्यम्।।

ननु पाणिन्यादिदृष्टान्तेन यदि सर्वशब्दोपादानतैव ब्रह्मणो वेदस्य पौरुषेयत्वपरिहाराय गीयते, तदा कथं तावता सर्वज्ञत्वम्? इति चोदयति- *नन्वेवं सति कथं सर्वज्ञतेति*।। परिहरति- *तस्यैव ज्ञान-शक्तिविवर्तात्मकत्वान्नामप्रपञ्चस्येति*।। अस्ति तावद् वर्णानां क्रम-संख्यादिभेदभाजां मुख्यलक्षणादिद्वारेण सर्वार्थप्रकाशनसामर्थ्यम् ; अव्यपदेश्यस्य वस्तुनोऽभावात्। तत्र कार्यगतमर्थप्रकाशनसामर्थ्यमुपादान-कारणधर्म एव भवति; प्रदीपगतप्रकाशनसामर्थ्यस्य वह्निधर्मत्वदर्शनात् कार्योपादानयोः शक्तिद्वयकल्पनाऽयोगात्। एवं सर्वार्थप्रकाशनसमर्थत्वात् सर्वज्ञं ब्रह्म। *ननु* समर्थस्यापि नित्यवज्ज्ञानसंयोगो न भवति, *नैष दोषः*; यथा प्रकाशद्रव्यस्य प्रदीपस्य स्वसन्निहिताशेषवस्तुप्रकाशिता एवं प्रकाशस्वरूपस्य ब्रह्मणः सर्वोपादानतया सर्वसंसर्गिणः स्वसन्निहिताशेषवस्तुप्रकाशिता। नित्यवद् भवतीति युक्तं सामर्थ्यानुसारेण सर्वज्ञत्वम्। कथं करणसामर्थ्यानि कर्तृसामर्थ्यानि भवन्तीति चेत्, न, ब्रह्मणो

विषयावगमं प्रति शब्दस्य करणताऽभावात्। *ननु* स्वयंप्रकाशतया सर्वसंसर्गित्वादेव सर्वज्ञता सिध्यति, न; वाय्वाकाशरसगन्धादिव्यापिनोऽपि सवितृकिरणस्य तत्प्रकाशनायोग्यत्वदर्शनात् तस्मात् सर्वार्थप्रकाशनसमर्थसर्वशब्दोपादानतया सर्वज्ञं ब्रह्म। तदेतदाह- *नासत: प्रादुर्भावादिति *।।

इति श्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्य स्वप्रकाशानुभवभगवत: कृतौ पञ्चपादिकाविवरणे ब्रह्मण: सर्वज्ञत्वनिरूपणं नाम षष्ठं वर्णकं समाप्तम्।।

अथवेत्यादिद्वितीयवर्णकविवरणं स्पष्टार्थम्।। तस्माज्जन्मादिनिमित्तोपादानकारणं सर्वज्ञं ब्रह्मेति सिद्धम्। तत्र मायशक्तिमत् कारणम्, जीवाश्च प्रत्येकमविद्यानुबद्धा इति केचित्। मायाऽविद्याप्रतिबिम्बितं ब्रह्म जगत्कारणम्। विशुद्धं ब्रह्मामृतत्वालम्बनम्, जीवाश्चाविद्याबद्धा इत्यन्ये। जीवा एव स्वाविद्यया प्रत्येकं प्रपञ्चाकारेणब्रह्माविर्भवन्तिं, सादृश्याच्च प्रपञ्चैकताभासोऽनेकैरवगतद्वितीयचन्द्रवत्। स्वरूपापेक्षया च ब्रह्म सर्वजगत्कारणमित्यपरे। ब्रह्मैकमेव स्वाविद्यया जगदाकारेण विवर्तते स्वप्नादिवदिति मतान्तरम्। तस्माद् ब्रह्मैव स्वमाययाऽविद्याया विवर्तत इति।।

इति पञ्चापादिकाविवरणे ब्रह्मण: शास्त्रप्रमाणकत्वं नाम सप्तमंवर्णक समाप्तम्।

ऋजुविवरणम्

*''शब्दोपादाने'' त्यस्यायमर्थः *-ब्रह्म धर्मि, शब्दगतार्थावभासनशक्तियुक्तम्, तदुपादानत्वात्; अग्निवत्, अथवा-ध्वनिगतशक्तयो धर्मिण्यः, ब्रह्मगता इति साध्यो धर्मः ; तत्कार्यगतत्वात्। *ननु* यदि शब्दगतविषयावभासकत्वशक्तिर्ब्रह्मण इत्युच्यते, तर्हि कारणत्वशक्तिरेव स्यात्, तथा सति न सर्वज्ञतेत्याशङ्क्याह- *द्रष्टुश्च ज्ञानशक्तिरिति*।। द्रष्टुश्च ज्ञानशक्तिस्साध्या; नतु करणतेत्यन्वयः। यद्वा- ''द्रष्टुश्चेति'' भाष्यकारीयानुमानप्रदर्शनम्। *ननु* कार्यशक्तिः स्वरूपकारणानुमेया, कार्ये कारणशक्तिर्दृष्टा, नान्या; न च साऽनुमेया, अतः तत्कथमनुमानम्? इत्याशङ्क्याह-* किन्तु दीपप्रभावदिति*।। संयुक्तद्योतना=द्योतकत्वशक्तिः कार्यगता कारणेऽनुमीयत इत्यर्थः। *दीपप्रभावदिति*।। यथा प्रभाया न प्रदीपवद् द्योतकत्वम् , अपि तु संयुक्तद्योतकत्वम्; एवमत्रापीति युक्तम्। ''अयमपरः'' इत्ययुक्तम् ; पूर्वसूत्रे सर्वज्ञत्वसाधनादर्शनादित्याशङ्क्यावतारयति- *ब्रह्मण इति* ।। *ननु* पूर्वसूत्रोक्तार्थान्तरं विहाय सर्वज्ञत्वमेव किमिति प्रतिपाद्यते? इत्याशङ्क्याह- *प्रधानेति*।। *ननु* लक्षणद्वयाभिधानपरत्वं सूत्रस्योक्तम् , कथं प्राधान्येन सर्वज्ञत्वं प्रदर्शितमित्युच्यते? इत्याशङ्क्याह- *लक्षणद्वयाभिधानेनेति*।।

ननु साधितस्य पुनः साधनं पुनरुक्तमित्याशङ्क्य पक्षान्तरमाह- *अथवेति*। *ननु* ब्रह्मणस्सर्वज्ञत्वं 'दर्शयितुमुपक्रम्य वेदस्य सर्वप्रकाशनसामर्थ्यप्रदर्शनमसङ्गतमित्याशङ्क्या-वतारयति- *वेदस्येति*।। अधिकतरविषयविज्ञानवत्प्रणीत इति*।। *अयमर्थः*- यद्यपि वेदाविषयीकृतं नास्ति; तथाऽपि सत्यर्थे ज्ञानसामर्थ्यं प्रसाध्यत इति न विरोधः। *अथवा*-वेदस्य किञ्चित् सामान्यरूपेण विषयः, किञ्चिद् विशेषरूपेण विषयः, अस्य तु सर्वं सर्वात्मना विषयः अतोऽधिकतरविषयविज्ञानवत्प्रणीतत्वं वेदस्य। ''न च तेने'' ति ग्रन्थस्सामान्याभिप्रायेणेति द्रष्टव्यः।। पौरुषेयत्वेन प्रामाण्येऽविशिष्टे किं तन्निराकरणेन? इत्याशङ्क्य, मतभेदं दर्शयति- *प्रमाणान्तरेणेति*।। *ननु* अनपेक्षबोधकत्वं वेदे तावद् दृश्यते, कथं पौरुषेयस्यानपेक्षता? इति तन्निर्वाहकत्वेन नित्येन वा समूलत्वं कल्प्यते, अतो न तेनेतरेतराश्रयमित्याशङ्क्याह-* रागश्च नित्य इति*।। *ननु* रागस्य ज्ञानविषयसापेक्षत्वेन तन्मूलत्वम् , न तु तज्जन्यत्वेन; अतो विरोधात्तद्विषयस्यानपेक्षतेत्याशङ्क्याह- *कुतश्चैतल्लब्धमिति*।। *ननु* पौरुषेयत्वेनाभिप्रायविषयत्वे निश्चिते, नित्यानित्याभिप्रायभेद एवानपेक्षात्वादिहेतुरिति विकल्प्यत इत्याशङ्क्याह- *न च पुरुषेति*।। पूर्वमेवाध्ययनविधितात्पर्ये कथमीश्वरप्रणयनम्? इत्याशङ्क्य दृष्टान्तमाह- * व्यासाद्यभिप्रायेति*। * अध्ययनविधितात्पर्यवतामिति*।। अयमर्थः अध्ययनविधिरध्ययनं प्रयुञ्जानो वेदस्य विवक्षितार्थत्वं बोधयति; अन्यथाऽध्ययनासिद्धेरिति। * तथापीतरदिति*।। अयमर्थः- शब्दं प्रयुञ्जानो विवक्षित्वैव प्रयुङ्क्त इति। *ननु* उभयथा तात्पर्येऽपि

विधितात्पर्यस्य पूर्वभावित्वादनपेक्षतेति, नेत्याह- *न चोभयतात्पर्यमिति *।। अध्ययनविधेरपि संसृज्यमानत्वेन तात्पर्यमिति। अथ तमप्यभिप्रायं स्मृत्वा भारतोच्चारणतात्पर्यवत्कल्पान्तरीयविधिं स्मृत्वा सृजतीत्यपेक्षेत्याशङ्क्याह- * सत्यपि विधितात्पर्य इति *।। *ननु* विधितात्पर्याभावे सति पौरुषेयत्वं सापेक्षत्वे निमित्तम् , अत्र तु तदभावान्न सापेक्षतेत्याशङ्क्याह- *न चोपलभ्येति *।। महाजनपरिग्रहः, तत्र *निर्विकल्पेति *।। गृहीतेऽर्थे विवक्षया शब्दप्रयोगे विवक्षानिश्चायकमूलापेक्षा, निर्विकल्पकपूर्वे तु विवक्षाऽभावाद् न सापेक्षतेति भावः। कथमत्र निर्विकल्पकपूर्व, त्वमिति? तदाह- * स्वरूपेति- *।। *उपलभ्येति *।। रचनाया उपलब्धिपूर्वकत्वमूलप्र माणानिश्चये न प्रामाण्यमिति भावः। *ननु* न। निर्विकल्पकपूर्वके 'घटोऽयमि'त्यादौ सापेक्षता; विवक्षया प्रयोगाभावात्, तद्वदत्रापि निर्विकल्पकपूर्वक इत्याशङ्क्याह- * अभिलषितसाधनोपराग इति *।।

तार्किकाः प्रत्यवतिष्ठन्ते- * स्यात्तर्हीति *।। तान् प्रति मीमांसकश्चोदयति- * नन्वपौरुषेय इति *।। कथं चिरवृत्तेष्वनेकान्तिकत्वम्? इत्याशङ्क्याह- * अनुमानप्रमीयमाणेति *।। सुगताद्यनुसारिणामिति *।। सुगतागमस्य महाजनपरिग्रहेऽपि न प्रामाण्यमिति भावः। *ननु* यदाचारो वेदानुमापक उक्त आचाराधिकरणे- ''के शिष्टा ये सदाचाराः'' इति, तत्परिग्रहः प्रामाण्ये कारणमित्याशङ्क्याह- *न च देहात्मभावेति *।। *ननु* देहात्मभावादिषु तेषामेव बाधान्न महाजनपरिगृहीतत्वमित्याशङ्क्याह- *न च महाजनेति *।। व्याभिचारित्वाद् ज्ञानस्वरूपे प्रामाण्ये वा न हेतुरिति भावः।।

ननु तादृशो महाजनपरिग्रहस्य प्रामाण्यंहेतुत्वाभावेऽपि, यत्र अध्ययनविधितात्पर्यगृहीतानामेव प्रणयने प्रमाणाभावात् तात्पर्यादिपरिज्ञाने च प्रमाणाभावात् स्थानान्तरमेव भवेदित्यर्थः।। प्रामाण्यमिति नियमादनुमापकत्वमित्याशङ्क्य, बाधितविषयत्वं दर्शयति- *किञ्चेति *।।

किञ्चावर्तमानत्वादप्रत्यक्षत्वम्। न चात्मधर्मतयाऽपि वर्तमानत्वमित्याशङ्क्याह- * न चात्मसमवेततयेति *।। किं कपिलादय इति *।। येन हेतुना कपिलादीनां सर्वज्ञत्वनिराकरणम् , तेनैव बुद्धादेरपि सर्वज्ञत्वं निराकर्तुं शक्यत इति भावः। *ननु* न विवादः ; यत उदितानुदितहोमवत्प्रमाणत्वेनाप्युपपद्यते, अतः सर्वे सर्वज्ञप्रणीता इत्याशङ्क्याह- *न च सर्व इति *।। *ननु* कर्तृस्मरणं पाठकवत्प्रवचनेन परिहार्यमित्याशङ्क्याह- * अपौरुषेयत्वे चेति *।।

ननु ब्रह्मोपादानत्वमपौरुषेयत्वं च विरुद्धमित्याशङ्क्याह- *किञ्चेदमिति *।। कथमपौरुषेयत्ववादिनां वेदस्य निर्वर्त्यत्वमङ्गीक्रियते, इत्याशङ्क्य, सर्वापौरुषेयत्ववादिनामिदं समानमित्याह- * संप्रतिपन्नमिति *।। *ननु* वर्णा वेदशब्दभाजः, ते च नित्या एव, कथं संप्रतिपत्तिरित्याशङ्क्याह- *तत्तत्क्रमविशिष्टानामिति *।। क्रमविशिष्टानामेव नित्यत्वमस्त्वित्याशङ्क्याह-

क्रमस्य त्विति।। तर्हि क्रमस्य पौरुषेयतेत्याशङ्क्याह- *पूर्व-पूर्वेति*।। वेदस्य नित्यत्वमभिधीयत इति, तदाह- *क्रमसादृश्येति*।।

नन्वाप्तंनेति ।। अयं प्रयोग: धर्मी, अप्रमाणमिति साध्यो धर्म:, आप्तेनाप्रणीतत्वात् अनाप्त-वाक्यवत्। *नन्वनाप्तेनेति* तत्र प्रत्यनुमानमुच्यते-* वेद:, प्रमाणं भवितुमर्हति, अनाप्तेनाप्रणीतत्वात् , आप्तवाक्यवदिति। *नन्वाप्तवाक्यमिति*।। अयं भाव:-आप्तप्रणीतत्वनिश्चयेनैव लोके प्रामाण्यनिश्चयदर्शनाद् वेदे तदभावादप्रमाणत्वमिति। *ननु* आप्तप्रणीतत्वस्यानाप्तेनाप्रणीतत्वस्य- च प्रमाण्येनान्वय-व्यतिरेके सति कथं तदहेतुत्वम्? इत्याक्षिपति- कथमिति*।। *शब्दानां तावदिति*।। अयं भाव: अनाप्तेनाप्रणीतत्वस्यान्वयव्यतिरेकेण प्रतिबन्धकाभावविषयतयाऽन्यथासिद्धावाप्तप्रणीतत्वस्य चान्वय-व्यतिरेकौ प्रामाण्यप्रतिबन्धनिरासितयाऽन्यथासिद्धाविति। तदुक्तम्-''अप्रामाण्यनिवृत्त्यर्थं दोषाभावोपवर्णनम्।'' इति। वेदेऽपि तर्ह्याप्तप्रणीतत्वं प्रतिबन्धनिरासायोपयुज्यतामिति, नेत्याह-*वेदे त्विति*।।

ननु अध्ययनविधिविषयेऽन्यतात्पर्याभावादप्रामाण्यमिति, नेत्याह-* अध्ययनविधीति*।। अत्र स्फोट: शब्द इति विवक्षित इति प्रतिभाति, तस्यैकत्वात्, तथा सति तस्य ब्रह्मकार्यत्वाभावान्न ब्रह्मणस्सर्वार्थप्रकाशनसामर्थ्यमिति। न च तद्व्यतिरिक्तमेकं शास्त्रं निरूपयितु शक्यम्। न च बोधकत्वं तदुपादानत्वेन सर्वज्ञत्वं वा। न च वर्णसमुदायातिरिक्तं शास्त्रशब्दाभिधेयमस्ति, यदुपादानत्वेन सर्वज्ञत्वं भवेत्। कथं च परतन्त्रत्वमनैकान्तिकं हेतु:? इत्याशङ्क्यावतारयति-*अत्र शास्त्रशब्दोपलक्षितेति*।। तत्रार्थप्रत्यायनसमर्थपदाद्युपादानत्वेन विना ब्रह्मणस्सर्वार्थप्रकाशनसामर्थ्यं न सिध्यति, इत्युपादानत्वं पदादिस्फोटविलक्षणपक्षादिनिरूपणेनाह-*एकपदार्थेत्यादिना*प्रवाहरूपेणेति*।। स्वरूपतोऽनादित्वा-भावादित्यर्थ:।

क्रमविशिष्टेति। क्रमानुरक्तप्रत्ययादित्यर्थ:। तदुक्तम्- 'स्वबुध्या रज्यते येन विशेष्यं तद्विशेषणम्'' इति।। *ननु* अनिर्वचनीयपक्षेऽप्यर्थावबोधसमर्थवेदाभाव इति, तत्राह-*अनिर्वचनीये त्विति*।। *ननु* अनिर्वचनीयत्वादेव कथमर्थावबोधनसमर्थत्वमिति? तत्राह- *अनिर्वचनीयत्वेऽपीति।।

ननु वेदस्य ज्ञानशक्तिविवर्तत्वेऽपि कथं ब्रह्मणस्सर्वज्ञत्वम्? उपलभ्य रचनाया एवाभावादित्याशङ्क्याह- *अस्ति तावदिति*।। *ननु* कार्यशक्त्या कारणे शक्ति: कल्प्यते, नतु सैव कारणस्य वैलक्षण्यमित्याशङ्क्याह-*कार्योपादानयोरिति*।। शब्दस्य करणत्वान्न तच्छक्ति; करणस्य तस्य कर्तृत्वात् , अथवा करणशक्तिरेव कारणस्यापि भवेदित्याक्षिपति-*कथं करणेति*।। *न ब्रह्मण इति*।। औपाधिकं कारणत्वम् , न स्वरूपप्रयुक्तमिति भाव:।। *ननु* स्वयंप्रकाशेति* शब्दोपादानत्वसाधनं व्यर्थमिति भाव:।।

इति स्वामीन्द्रपूर्णपूज्यपादशिष्य-सर्वशास्त्रविशारदजनार्दनात्मज-सर्वज्ञ-विष्णुभट्टोपाध्यायकृतौ ऋजुविवरणे ब्रह्मण: सर्वज्ञत्वनिरूपणं नाम षष्ठं वर्णकं समाप्तम्।

सूत्रद्वयार्थमुपसंहरति- *तस्माज्जन्मादीति *।। मायाऽविद्याप्रतिबिम्बितमिति वदतेदमुक्तम्-पूर्वस्मिन् ग्रन्थे मायाऽविद्याभेदमङ्गीकृत्योक्तम्, ब्रह्मणश्च न प्रतिबिम्बता, अत्र तु मायाऽविद्ययोरैक्यं प्रतिबिम्बभावश्च ब्रह्मण इति। "जीवा एवे" त्यनेन ब्रह्म मायाविशिष्टं तत्प्रतिबिम्बितं वा न जगत्कारणमित्युक्तम्। कथं ब्रह्म जगत्कारणमिति? तदाह- *स्वरूपेति *।।

इति ऋजुविवरणे शास्त्रप्रमाणकत्वं नाम सप्तमवर्णकं समाप्तम्।।

तत्त्वदीपनम्

शास्त्रस्य जगदन्त:पातित्वात् तत्कारणत्वकथनेन शास्त्रकारणत्वमपि निर्दिष्टम्, इति तत्कथनं मुधोत्याशङ्क्य तात्पर्यमाह- *शब्दोपादानेति*।। इह सूत्रेऽपरं सर्ववित्त्वं साध्यत इति संबन्ध। साधनप्रकारमाह- *ध्वनिगतेति*।। ध्वनिगतविषयद्योतना: शक्तय: सुप्रसिद्धा इति यावत्। भवतु शब्देषु विषयप्रकाशनशक्ति:, प्रस्तुते किमायातमिति? अत आह- *ब्रह्मणीति*।। विषयद्योतना: शक्तयो ब्रह्मण्येवासुरिति संबन्ध: तत्र हेतुमाह *शब्दोपादानेति*।। ब्रह्मण: शब्दोपादानत्वात्। तत्र दृष्टान्तमाह- *अग्नेरिति*। या विषयविषयिणी दीपशक्ति:, साऽग्नेरेवोत्पद्यमाना तद्गततादृशशक्तिपूर्विका दृष्टेत्यर्थ:। उपादानकारणं कार्यावस्थमित्यङ्गीकरणात् कार्य-कारणशक्त्योरेकत्वमुभयत्र विवक्षितमिति वार्थ:। विमता शक्ति:, कारणगततादृशशक्तिपूर्विका, कार्यगतप्रकाशनशक्तित्वाद्, दीपगतशक्तिवदिति। शब्देऽर्थप्रकाशकारणेऽपि तादृश्येव शक्ति: स्यादित्यतिप्रसङ्गाबाधकमाशङ्क्याह- * द्रष्टुश्चेति *।। चशब्द: शङ्काव्यावृत्त्यर्थ:। द्रष्टुर्ज्ञानशक्ति: साध्या, न करणतेत्यन्वय:। ''नन्वि'' त्यथशब्द: प्रसिद्धिद्योतक: ज्ञानशक्तिर्ज्ञातृत्वशक्तिरिति यावत्। आत्मनो ज्ञातृत्वेन प्रसिद्धत्वात् तद्विरुद्धं करणशक्तिमत्त्वप्रसाधनमित्यर्थ:। दीपस्याऽऽवरणशक्तिमत्त्वाद् दृष्टान्तासंगतिरिति शङ्कते- *किंत्विति*।। विवक्षितसाम्यसंभवाद् दृष्टान्तत्वं युक्तमित्याह- *दीपेति*।।यथा प्रदीपप्रभा स्वसंयुक्ताशेषवस्तुद्योतिका भवति, तद्वद् ब्रह्मण: सर्वोपादानतया संसर्गिण: एवसंयुक्ताशेषप्रकाशकत्वं तद्गताज्ञातत्वनिवर्तकत्वेनेत्यर्थ:।।

जन्मादिसूत्रे कारणत्वमेव प्रतीयते, न सार्वज्ञ्यम्, तथा च सर्वज्ञत्वे हेत्वन्तरमुपन्यस्यत इत्यसंगतमित्याशङ्क्य तात्पर्यमाह- *ब्रह्मण इति*।। प्रधानादिकारणवैलक्षण्यस्य, स्वरूपलक्षणैनैव सिद्धत्वात् किं सर्वज्ञत्वनिर्देशेनेति? तत्राह- * जगदिति *।। '' य: सर्वज्ञ: सर्वविदि ''त्यादिश्रुति:। स्रष्टव्यज्ञानं विना स्रष्टृत्वानुपपत्तिरित्याद्या युक्ति:।। संकलजगत्कारणत्वमुररीकृत्य सर्वज्ञत्वं प्रादर्शि, संप्रति वेदकारणत्वेनापि सुसाधमित्याह- *तदेवेति*।।

पूर्वाधिकरणशेषत्वेन सूत्रं व्याख्यायाधिकरणान्तरत्वेन व्याचष्टे- * अथवेति *।। आक्षेपलक्षणां संगतिमाह- * सर्वेति *।। '' अस्य महतो भूतस्य नि:श्वसितमेतद्यदृग्वेद: '' इत्यादिवाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं साधयति? उत न साधयति? इति सापेक्षत्वप्रसङ्गभावाभावाभ्यां संदेह:। पूर्वोत्तरपक्षयोरन्यतर एव भाष्यकृता निर्देष्टव्य:, किमिदमुच्यत वेद: सर्वज्ञ इति? इत्याशङ्क्य तात्पर्यमाह- *वेदस्येति*।। पुराण-न्याय-मीमांसा-धर्मशास्त्राणि चत्वारि, शिक्षा कल्पौ निरुक्तं व्याकरणं छन्दो ज्यौतिषमिति षडङ्गानि, चत्वारो वेदा इति चतुर्दश विद्यास्थानानि। अनेकश:=नानाविधशब्देनोच्यन्ते। वेदेनाविषयीकृतार्थाभावोद्वेद: सर्वज्ञ इत्युक्तम्, तदाक्षिपति- *ननु नास्तीति*।। सर्वं जानातीति सर्वज्ञ इत्युच्यते, वेदस्य च करणत्वान्न

सर्वज्ञत्वमित्यर्थः। करणत्वमङ्गीकरोति-सत्यमिति*।। तर्हि न वेदस्य सार्वज्ञ्यमित्याशङ्क्याङ्गीकारेणो-त्तरयति-*अत एवेति*।।

सर्वविषयप्रकाशनसामर्थ्यमङ्गीकृत्य ब्रह्मणि तदाक्षिपति-*ननु वेदस्येति*।। प्रमाणाभावादिति शेषः। असिद्धो हेतुरित्याह-* अतः आहेति* ।। वेदो विज्ञानवत्प्रणीत इत्युक्ते न सर्वज्ञप्रणीततासिद्धिः, तदर्थम्-*स्वविशेषणम्*।। न च-वेदस्य सकलविषयत्वात् स्वविषयादधिकतरविषयविज्ञानवत्प्रणीतत्वं बाधितमित्यपि-शङ्क्यम् ; इक्षु-क्षीरगुडादिमाधुर्यवैषम्यस्याभिधानाविषयीकृतत्वेऽपि प्रमाणान्तरविषयत्वं दृष्टम्, ततश्च वेदस्य स्वविषयादधिकतरविषयविज्ञानवत्प्रणीतत्वं संभवतीत्यर्थः। प्रत्यक्षं व्यावर्तयति-वाक्येति*।। अनाप्तोक्तिं व्यावर्तयति-*प्रमाणत्वादिति*।। विकल्पानुपपत्तेनैंतत्साध्यं साध्वित्याह-*ननु किमत्रेति*।। प्रणीतत्वं नाम किमुच्चारणमात्रम्? उत बुद्धिपूर्वकृतत्वम्? इति किंशब्दार्थः। आद्यमनूद्य दूषयति-*यदि तावदित्यादिना*।। *अध्यापनोच्चारणवदिति*।। अध्यापनायोच्चारणवदित्यर्थः। द्वितीयमुत्थाप्य दूषयति-*अथेति*।। उभयत्रापि विपक्षबाधकतर्कपराहतत्वेनाप्रयोजको हेतुरिति द्रष्टव्यम्। वेदस्य बुद्धिपूर्वकृतत्वमङ्गीकृत्यैवानपेक्षत्वं केचित् कथयन्ति, तत्प्रक्रियां दर्शयति-*अत्र केचिदिति*।। द्वितीयपक्षाङ्गीकारेण समाधानं दर्शयन् पौरुषेयस्वरूपमाह-*प्रमाणन्तरेणेति*।। पौरुषेयत्वे कथमनपेक्षत्वम्? इत्याशङ्क्य, वाक्याप्रमेयं तावद् दर्शयति-* तत्रेति*।। लौकिक वैदिक व चोभ्यां रागस्य प्रमेयत्वे सापेक्षत्वानपेक्षत्वाविभागः कुतस्त्यः? इत्याशङ्क्य तदर्थं रागभेदमाह-*द्विविध इति* ईश्वरस्येति*।। *पौरुषेयता न जेगीयत इति* ।। सापेक्षता नोच्यत इत्यर्थः। वेदवचसां नित्यज्ञानमूलरागविषयतया शब्दस्यानपेक्षत्वमित्युक्तम्। तत्र रागस्य नित्यज्ञानमूलत्वमसिद्धमित्याह-*नैतत्सारमिति*।। किमनुमानं नित्यज्ञानेश्वरे प्रमाणम्? उत शब्दः? नाद्य इत्याह -*अनुमानानामिति*।। सर्वं कार्यं स्वरूपोपादानविज्ञानवत्कर्तृकमित्वारभ्य नित्यज्ञानवदीश्वरागोचरत्वानुमानं दर्शितमित्यर्थः। द्वितीयमनुवदति-शब्द इति*।। प्रामाण्यासिद्धेर्न तत ईश्वरसिद्धिरित्याह-*नेति*।। नित्यरागविषयतया शब्दस्यानपेक्षप्रमाणत्वमाशङ्क्याह-* इतरेतराश्रयादिति*।। तदेव व्यनक्ति-*नित्यज्ञानेति*। नित्यज्ञानमङ्गीकृत्य दूषयति-*रागश्चेति*। रागो नित्यश्चेति व्याहन्यते, लोके रागस्यानित्यत्वनियमादित्यर्थः। नित्यश्च ज्ञानकार्यश्चेत्येतच्च व्याहतम्, नित्य इत्युक्ते सर्वकालसंबन्धित्वं प्रतीयते, कार्य इत्युक्ते कदाचिदसत्त्वमिति व्याघात इत्यर्थः। रागद्वैविध्यमाश्रित्य नित्यरागविषयत्वेनानपेक्षत्वम् , इतरस्य सापेक्षत्वमित्येतदयुक्तमित्याह-*न चेति*।। *वक्ष्यत इति* ।। समन्वयसूत्र इत्यर्थः। वेदवचसां पौरुषेयत्वेऽपि नित्यरागविषयतयाऽनपेक्षत्वमिति तन्निराकरणमुपसंहरति-*तस्मादिति*।।

मतान्तरमुत्थापयति-*अन्ये त्विति*।। अध्ययनविधिरध्ययनं प्रयुञ्जानो वेदस्य विवक्षितार्थतां गमयति; अन्यथाऽध्ययनासिद्धेः। तत्पौरुषेयत्वेऽपि विधितात्पर्यवतां वेदानां प्रामाण्यमित्यर्थः। तत्र

दृष्टान्तमाह-*भारतेति*।। इदानीन्तनो वाचको भारतादिवचांसि यथोच्चारयति, तद्वदित्यर्थः। दृष्टान्ते पुरुषाभिप्रायतात्पर्यवैषम्यमाशङ्क्याह-*व्यासादीति*।। उच्चारणमात्रलक्षणविवक्षितांशसाम्यसंभवाद् दृष्टान्तत्वं युक्तमित्यर्थः। अस्मदादिष्वभिनवश्लोकविरचनपूर्वकं समुच्चारणं प्राक्सिद्धोच्चारणं नेति। ततश्च विकल्पोपपत्तिरित्यर्थः। न च-वेदबलात्सार्वज्ञ्यमित्यपि-शङ्क्यम्; वेदस्रष्टृत्वेन सार्वज्ञ्योपपादनप्रक्रमविरोधादित्यर्थः। वेदस्य बुद्धिपूर्वकृतत्वेऽपि न सापेक्षत्वमिति शङ्कते-अभिप्रायेति*।। असिद्धो हेतुरित्याह-* उपलभ्येति*।। विमतम्, रागतात्पर्यवत्, उपलभ्य रचितत्वात्, संमतवदित्युक्ते, विमतम्, न रागतात्पर्यवत्, विधितात्पर्यत्त्वात्; *पूर्वमेवेति*।। *पूर्वमिति*।। रागतात्पर्यात्प्रागित्यर्थः। अप्रयोजकत्वेन हेतुं दूषयति-*तथापीति*। *इतरदिति*।। रागतात्पर्यमित्यर्थः। उपलभ्य रचितत्वाविशेषादिति द्रष्टव्यम्। रागमात्रतात्पर्यवत्त्वं सापेक्षत्वप्रयोजकम्, वेदवचसा च विधिरागतात्पर्यपरत्वाद-नपेक्षत्वमित्याशङ्क्याह-*न चेति*।। एकत्र तात्पर्ये संभवत्युभयत्र तात्पर्यकल्पनायोगादित्यर्थः। अङ्गीकृत्य दूषणमाह-*सत्यपीति*।। *विधितात्पर्य इति*। विधिरागतात्पर्य इत्यर्थः। उपलभ्य रचितत्वस्य सापेक्षत्वव्यापकत्वात्सापेक्षत्वं स्यादित्यर्थः। विधितात्पर्यविधुरत्वे सत्युपलभ्य रचितत्वस्य सापेक्षत्वव्यापकत्वाद् वेदवचसि च तदभावा सापेक्षत्वमित्याशङ्क्याह-*न चेति*।। विमतम्, न विधिपरम्, उपलभ्य रचितत्वात्; संमतवदित्यनुमानात् सापेक्षत्वं दुर्वारं स्यादित्यर्थः।।

सविकल्पकज्ञानपुरःसरत्वस्य सापेक्षत्वव्यापकत्वम्, तथा च व्यापकविरुद्धोपलब्ध्या व्याप्याभाव इति मतान्तरमुत्थापयति-*अपरे त्विति*।। निर्विकल्पकज्ञानपूर्वकत्वे किं मानमिति? अत्राह-*ब्रह्मस्वरूपेति*।। ईक्षणपूर्वकं सकलस्रष्टृत्वं श्रूयते। ईक्षणं च निर्विकल्पकम्, इति वेदस्य तत्पूर्वकत्वमित्यर्थः। सविकल्पकज्ञानपूर्वकत्वस्य सापेक्षत्वव्यापकत्वं कुत इति? अत आह-लौकिकेति**।। तदेतन्निराकरोति-नायमिति*।। सापेक्षत्वसविकल्पकज्ञानपूर्वकत्वयोर्व्यभिचारित्वा-दित्यर्थः। ज्ञानपूर्वकत्वे सविकल्पकज्ञानपूर्वकत्वाभावापराधेन सापेक्षत्वानुपलब्धेर्नोक्तप्रयोजकसिद्धि-रित्याह-*उपलभ्येति*।। सविकल्पकज्ञानपूर्वकत्वस्य व्यापकविरुद्धोपलब्धिं निरस्यति-*स्वरूपज्ञानस्येति*।। विशेषविषयज्ञानस्य सविकल्पविषयत्वाद् ब्रह्मज्ञानस्यापि विशेषविषयत्वेन सविकल्पकत्वमित्यर्थः। एकदेशिमतनिरा- करणमुपसंहरति-* तस्मादिति*।।

अपौरुषेयत्वनिरसनमाकर्ण्य तार्किकः -*प्रत्यवतिष्ठते-* स्यात्तर्हीति*।। वेदः, पौरुषेयः, वाक्यत्वात्; कालिदासादिवाक्यवत्, इत्यर्थः। प्रत्यनुमानप्रतिरोधं शङ्कते-*नन्वपौरुषेय इति*। अविच्छिन्नव्यवहारत्वे सत्यस्मर्यमाणकर्तृकत्वादित्यनुक्ते विच्छिन्नव्यवहारेषु जीर्णकूपादिषु व्यभिचारः स्यात्, तन्निरासार्थमाह-*अविच्छिन्नेति*।। पौरुषेयागमादिव्यावृत्त्यर्थम्-*''अस्मर्यमाणे''ति* विशेषणम्। व्यभिचारित्वान्नायं हेतुः साधुरित्याह-*न चिरेति*।। चिरवृत्तेष्विति विशेषणेन हेतोस्तत्र प्रवृत्तिं दर्शयति।

साध्याभावमाह- *इदानीमिति*।। विमतम्, सकर्तृकम्, सावयवत्वात्; संमतवदित्यर्थः। कालात्ययापदिष्टश्च हेतुरित्याह- *वेदानामिति*।। भण्डादिप्रणीततयाऽर्थान्तरत्वं व्यावर्तयति- *विशिष्टेति*।। वैशिष्ट्यमुपपादयति- *बहुज्ञेति*।। ईश्वरप्रत्यक्षं व्यावर्त यितुम्-''वाक्ये'' ति विशेषणम्। असर्वज्ञवाक्यप्रमाणव्याकृत्यर्थम्-''बह्वर्थविषये''त्युक्तम्। तावत्युक्ते ईश्वरज्ञाने व्यभिचारः, तदर्थम्-''वाक्ये''ति। विप्रलम्भकवाक्यव्यावृत्त्यर्थम्-''प्रमाणत्वादि''ति। प्रत्यनुमानस्याभासत्वे पौरुषेयत्वानुमानं सुस्थमित्याह- *तस्मादिति* ।। पौरुषेयत्वे प्रामाण्यानुपपत्तिबाधकतर्कपराहतत्वादप्रयोजको हेतुरित्याह- *अत्र पृच्छाम इति*।। पौरुषेयस्योन्मत्तवाक्यस्य यथाऽप्रामाण्यम्, तद्वदस्यापीत्यर्थः । तत्र विशेषं शङ्कते- *सर्वज्ञेति*।। सर्वज्ञेश्वर आनुमानिकः, उताऽऽगमिकः? उभयथाऽप्यसंभव इत्याह- *न तावदित्यादिना*।। सर्वज्ञप्रणीततामन्तरेणापि प्रामाण्यस्याधिगन्तुं शक्यत्वान्न तदाश्रयत्वमिति शङ्कते- * स्यादेतदिति*।। किं कतिपयमहाजनपरिगृहीतत्वम्? उत सर्वमहाजनपरिगृहीतत्वम्? इति विकल्प्योभयथाऽसंभव इत्याह- *न सुगतेति*।। आद्ये बौद्धागमे व्यभिचारः, द्वितीयेऽसिद्धिः, बौद्धपरिगृहीतत्वादित्यर्थः।। सदाचारानुष्ठातारो महाजनाः, तत्परिगृहीतत्वं प्रामाण्यप्रयोजकमित्याशङ्क्याह- *न च देहेति*।। किञ्च महाजनपरिग्रहः किं प्रत्यक्षाद्यन्तर्भूतः? उत बहिर्भूतः? नाद्यः इत्याह- * नचेति*।। अतिरिक्तप्रमाणानिरूपणाद् न द्वितीयोऽपीत्याह- *तस्मादिति*।।

वेदस्य पौरुषेयत्वे मूलभूतं प्रमाणं वक्तव्यम्, न च तन्निरूपयितुं शक्यमित्याह- *किञ्चेति*।। किं प्रत्यक्षं मूलम्? उतान्यत्? इति किंशब्दार्थः। आद्ये*पि किं बाह्यं प्रत्यक्षम्? उताऽऽन्तरम्? नाद्य इत्याह- *न तावदिति।। चक्षू रूपं रूपवन्तं च यथा गृह्णाति, तद्वत् तत्समवेततद्विशेषणं समवायं च गृह्णाति; एवं रसनादिकं रसादीन तत्समवेतान् विशेषणं च गृह्णातीत्यर्थः। तत्रैव हेत्वन्तरमाह- *वर्तमानेति*। ततः किमिति? अत आह- *धर्मस्येति*।। द्रव्यग्राहकं चक्षुरादि यथा रूपादिकं च गृह्णाति, तद्वदात्मग्राहकं मनोऽपि तद्धर्मादिकं किमिति न गृह्णीयात्? इति शङ्कते- * नन्वात्मेति*।। चक्षुरादि चेति दृष्टान्तनिर्देशः। चक्षुः- स्पर्शनाभ्यां द्रव्यग्राहकाभ्यां यथा तद्गुणग्रहणम्, तद्वदित्यर्थः। किं मनोमात्रेण धर्मादिग्रहणम्? उत विशिष्टेन? इति विकल्प्याद्यं दूषयति- *किमिति*।। *तर्हीति*।।''तस्मिन्नि'' ति पाठे मनसि सतीत्यर्थः। द्वितीयं निरस्यति- *नचेति*।। *एतादृशत्वादिति*।। अस्मदिन्द्रियसदृशत्वादित्यर्थः। यद्यपि मन एवात्र निराचिकीर्षितम् ; तथाऽपि चक्षुरादिना समानयोगक्षेमं दर्शयितुमितरनिरसनमित्यर्थः। सदृशत्वमसिद्धमिति शङ्कते- *योगजेति*।। वैशिष्ट्यमङ्गीकृत्य धर्मग्राहित्वं निरस्यति- * तथाऽपीति*।। *अतिशयमात्रमिति*।। दूरदेशवर्तित्वमित्यर्थः।। चक्षुषि दिव्यशब्दप्रयोगानुपपत्त्याऽविषयग्राहित्वं योगिचक्षुषो निश्चीयत इति शङ्कते- * दिव्यमिति*।। अस्मच्चक्षुषः कतिपयरूपग्राहित्वम् , इतरस्य निखिलरूपावभासकत्वमिति दिव्यशब्दप्रयोगो घटत इत्याह- *न तस्यापीति*।। रूपवदादिशब्दार्थः। किञ्च किमिन्द्रियस्य

सकलधर्मग्राहित्वम्? उत वर्तमानग्राहित्वम्? इति विकल्प्याद्यं निरस्यति- *न चेति*।। भविष्यद्धर्मस्य न वर्तमानस्यापि चक्षुर्ग्राह्यत्वमित्यर्थः। द्वितीयमुत्थापयति- *कल्पान्तरीय इति*।। त्वन्मते सर्वानुष्ठानमेव दुर्लभमित्याह- *न कल्पान्तरीयेति*।। पूर्वस्मिन् कल्पे धर्मोपदेशे सत्यनुष्ठानम् , अनुष्ठितस्य प्रत्यक्षम्। न चोपदेश संभव, तदा धर्माभावोन प्रत्यक्षायोगादुपदेशानुपपत्तेरित्यर्थः। *ननु* परम्पराया अनादित्वात् प्राक् सञ्चितमुपलभ्योपदिशतीति शङ्कते-* ततोऽगीति*।। अप्रामाणिकत्वान्नेयं कल्पना शोभत इत्याह- *अन्धेति*।। पक्षान्तरं निरस्यति- *नापीति*।। धर्मादिग्राहकशब्दप्रामाण्यसिद्धौ तेनार्थमुपलभ्य शब्दान्तरं रचयतीति युज्यते , तदेवानुपपन्नम् ; तन्मूलप्रमाणान्तराभावेन शब्दप्रामाण्यासिद्धेः। न च तत्रापि शब्दान्तरत्वम् ; अनवस्थितेः। न चानवस्थितिरास्थातव्या; तस्यां प्रामाण्यशून्यत्वादित्यर्थः। अप्रयोजकत्वसमर्थनमुपसंहरति- * तस्मादिति*।।

वेदाप्रामण्यप्रसञ्जनं नानिष्टमिति शङ्कते- *मा भूदिति*।। शब्दाप्रामाण्ये कर्मणामामुष्मिकफलसाधनत्वप्रतिपत्तिर्न स्यादित्यभिप्रेत्य विकल्पयति- *तैरिति*।। प्रत्यक्षानुमानाभ्यां दृष्टो यः कर्मणामैहिकफलसबन्धः, ततोऽतिरिक्त इत्यर्थः। आद्येऽपि किमस्मत्संमतादागमात्तत्सिद्धिः? उत त्वत्संमतात्? नाद्यः; तत्प्रामाण्य एव विवादात्, इतरथाऽसिद्धिरित्यभिप्रायेणाह- *विद्यते चेति*।। द्वितीयमनुवदति- *सर्वज्ञेति*।। पौरुषेयागमानां परस्परविरुद्धार्थत्वादप्रामाण्यमित्यभिप्रेत्याह- *किं कपिलादय इति*।। सुगतवत्कपिल-कणभुगादयोऽपि सर्वज्ञाः? आहो सुगत एव सर्वज्ञः? इति किंशब्दार्थः। आद्यमनुवदति- *सर्व इति*।। सर्वेषां सर्वज्ञत्वात् तदागमानामपि प्रामाण्यम्, तथाच तत्प्रतिपादितानां सर्वेषामपि धर्मत्वान्न विप्रतिपत्तिः स्यादित्याह- *धर्माधर्मयोरिति*।। द्वितीयं दूषयति- *न चेति*। मन्वत्रि-पराशरवत्कपिलादीनामपि प्रामाण्यम्, ततश्च तदुक्तः सर्वोऽपि धर्म एव। न च विवादानुपपत्तिः; उदितानुदितहोमवद्विवादसंभवादित्याशङ्क्याह- *न चेति*।। '' उदिते जुहोती'' त्यादेर्विप्रति-पत्तावप्यनपेक्षतया प्रामाण्याच्छाखाभेदेन व्यवस्था घटते, न च तथाऽत्रेति वैषम्यादित्यर्थः। सुगताद्यागमाना-मप्यपौरुषेयतया प्रामाण्याद् व्यवस्थितविषयत्वमिति स्व-परपक्षविभागप्रतिपत्त्यकुशलस्य शङ्कां प्रत्याह- *न चेति*।। अनादित्वेपि काठकं तैत्तिरीयकमिति कठादिप्रोक्ततया कर्तृस्मरणवत् स्मरणमुचितमित्याशङ्क्याह- * अपौरुषेयत्वं इति*।। ''न विवदामः'' इत्यत्र प्रामाण्यं प्रतीति शेषः। विरुद्धार्थानां कथं प्रामाण्यम्? इति शङ्कां निरस्यति- *उदितेति*।। अधिकारिभेदेनात्रापि व्यवस्थोपपत्तेरित्यर्थः। एतच्च प्रौढ्यवलम्बेनोक्तमिति द्रष्टव्यम्।।

आमुष्मिकफलसाधनधर्माभावाद् न तत्प्रतिपत्त्यर्थं शब्दप्रामाण्यमेष्टव्यमिति शङ्कते- * आह लोकायत इति*।। *ननु* अतिरिक्तः कर्मफलसंबन्धः कथं निरस्यते? ''स्वर्गकामो यजेते'' त्यादिना तत्प्रतिपत्तेरित्याशङ्क्याह- *पौरुषेयतेति*।। पौरुषेयवेदप्रामाण्यस्य मूलप्रमाणं विनाऽनुपपत्तेः।।

नचापौरुषेत्वमनुमानस्य; कपिलादिमते प्रमाणतया ततः पौरुषेयत्वसिद्धेः। तथा च न प्रत्यक्षाद्युपलब्धादतिरिक्तकर्मफलसंबन्ध इत्यर्थः। लौकिकवचोवद् वैदिकवचसामपि प्रमाणत्वात्कर्मफलसंबन्धसिद्धिरिति प्रतिपादयितुं लौकिकं वचो निरूपयति- *स वक्तव्य इति*।। शब्दानामर्थानवबोधकत्वे परप्रयुक्तशब्देभ्योऽर्थप्रतिपत्त्यनुपपत्तेर्न वादाधिकार इत्यन्तं दूषयति- *न चेदिति*।। आद्यमनुवदति- *अर्थेति*।। अबाधितानाधिगतासंदिग्धबोधजनकत्वाद् वेदप्रामाण्यमेष्टव्यमित्याह- *वेदवचोभिरिति*।। मूलभूतप्रमाणाभावाद् वेदस्याप्रामाण्यमित्युक्तमनुवदति- *ननु* पौरुषेयत्वमिति*।। किं शब्दस्य कार्यत्वमात्रं पौरुषेयत्वम्? उत शब्दसंबन्धस्य साङ्केतिकत्वम्? इति विकल्प्याऽऽद्ये सिद्धसाध्यतेत्यभिप्रेत्य द्वितीयं दूषयति- *न स्वाभाविकत्वादिति।। विपक्षे दण्डमाह- * अर्थेति*।। अर्थान्तरप्रसिद्धस्यापि गङ्गाशब्दस्यार्थान्तरविवक्षया गङ्गाशब्दप्रयोगो दृष्ट इत्यत्राह- * स्वभावसिद्धेति*।। गङ्गाशब्दस्य प्रवाहज्ञानजननसामर्थ्यमनतिक्रम्य लक्षणया गङ्गाशब्दस्तीरे प्रवर्तते, तेन न वाचकतयेत्यर्थः। शब्दार्थसंबन्धस्य सर्गादावीश्वरेण संङ्केतितत्वात्तदनुरोधेनास्माभिर्व्यवह्रियत इति शङ्कते- * सत्यमिति*।। ''सत्यमि'' त्यत्र शब्दानामस्मदभिप्रायाननुसारित्वमङ्गीकृतमिति द्रष्टव्यम्। संङ्केतितत्वमसिद्धमित्याह–तन्नेति*।। *इदानीन्तनव्यवहारे सिद्धसाध्यत्वं निराकर्तुं विशिनष्टि-* विवादेति*।। सर्गकालीन इत्यर्थः। *व्यवहारपरम्परानिबन्धन इति*।। प्राक्सिद्धसंबन्धानुस्मृतिनिमित्तपूर्वव्यवहारस्मृतिनिबन्धन इत्यर्थः। कल्पान्तरीयस्वव्यापारे व्यभिचारमाशङ्क्य पक्षतुल्यत्वान्नैवमित्याह- *इत्यनादितेति*।। साङ्केतिकशब्देषु हेतोरेवाभावान्न'' व्यभिचार इत्याह- *नाभिधानेति*।। अभिधाऽभिधेयशब्देन किं विवक्षितमित्याह- *जातिमात्रेति*।। आकाशादिशब्दानामभिधानत्वसिद्ध्यर्थं लक्षणान्तरमाह– * सर्वदेशेष्विति*।। लक्षणान्तरमाह– * यस्मिन्नुत्पद्यमान इति*।। पृथक्पृथक् प्रयोगस्य विवक्षितत्वान्न भागासिद्धिशङ्केत्यर्थः। शब्दार्थसंबन्धस्य स्वाभाविकत्वेऽपि वाक्यस्योपलभ्य विरचितत्वमेष्टव्यम्, कालिदासादिवाक्यवदिति शङ्कते- *मा भूत्तर्हीति*।। प्रतिज्ञामात्रेणार्थासिद्धिशङ्कायामाह– *विवादेति*।। उक्तमेव स्पष्टयति– * सृष्टिकालीनमिति*।। विवादगोचरापन्नमध्ययनपूर्वाध्ययनानुस्मृतिनिबन्धनमित्येतावत्साध्यत्वेन विवक्षितम् ; इतरत् स्पष्टीकरणार्थम्। भारताध्ययने बाधव्यावृत्त्यर्थम्–''विवादे'' ति विशेषणम्। कल्पान्तरीयवेदाध्ययनस्य पुरुषकृतत्वं व्यावर्तयितुम्- * ''पूर्वेति*।। भारताध्ययने व्यभिचारं व्यावर्तयति- *वेदेति*।। असिद्धिं निराकर्तृम् ' अध्ययनत्वादि'' त्युक्तम्। वेदः, पौरुषेयः, वाक्यत्वात्; भारतवदित्यनुमानाद् वेदस्य कार्यत्वमित्याशङ्क्याह- * इति विशेषेति*।। अतिप्रसङ्गलक्षणबाधकपराहतिं शङ्कते- * ननु सर्वेष्विति*।। भारताध्ययनम्, गुर्वध्ययनपूर्वकम्, अध्ययनत्वात्, संमतवत्, इत्यनुमानाद् भारतादेरप्यपौरुषेयत्वप्रसक्तिरित्यर्थः। कर्तृप्रतिपादकवचनविरुद्धत्वान्नायं प्रसङ्गः साधुरित्याह- * तैरेवेति। तदागमविरोधादिति*।। कर्तृप्रतिपादकागमविरोधादित्यर्थः। कर्तृप्रतीतिविरोधोऽत्रापि तुल्य

इत्याह– *इहापीति*।। किं हिरण्यगर्भकर्तृकसृष्टिश्रुत्या विरोधः? उतेश्वरसृष्टिश्रुत्या? नाद्य इत्याह– *न तावदिति*।। तयेति* ''तन्नाम करोदि'' त्यनया वाचा इत्यर्थः। हेतुमाह– *यो ब्रह्माणमिति।। प्रागेवेति*।। प्रजापतिसृष्टेः पुरेत्यर्थः।ं सिद्धस्य प्रदानसंभवात् प्रजापत्युत्पत्तेः प्राक् तत्सिद्धिरित्यर्थः। द्वितीयं दूषयति– * अस्येति।। प्रकरणसमर्थ्यादिति*।। कार्यमात्रप्रकरणबलादित्यर्थः। उपलभ्य रचितत्वव्यावृत्तिरवधारणार्थः।।

वेदस्य ब्रह्मकार्यत्वे पौरुषेयत्वं त्वयाऽप्याश्रितं स्यादित्याशङ्क्याह– *किंचेति*।। *किं पुरुषनिर्वर्तितत्वमात्रं पौरुषेयत्वम्? उत विसदृशोत्पद्यमानक्रमत्वम्? आहो स्वार्थप्रवृत्तप्रमाणान्तरजन्यत्वम्? इति किंशब्दार्थः। आद्यं दूषयति– *यदि तावदिति*।। * क्रमविशिष्टानामपीति*। तथाऽपि कथमनित्यत्वमिति? तत्राह– *क्रमस्य त्विति।। उच्चारणेति*।। अध्यापकाध्येतृसमवेतयोरित्यर्थः। द्वितीयं दूषयति– *पूर्वेति।। विमतो वेदक्रमः, तथाविधानुस्मृतिनिबन्धनः, वेदक्रमत्वात्; संमतवत्, इत्यनुमानात्पूर्वक्रमसदृशक्रमोदय इत्यर्थः। तर्हि कथं वेदनित्यत्वगीः? तत्राह– *क्रमसादृश्येति*।। तृतीयमुत्थापयति– *अथेति*।। न च हेतोः साध्याविशिष्टत्वम्; लक्षणलक्ष्यरूपत्वादित्यर्थः। जन्यो न भवतीत्युक्ते बाधः, तदर्थम्–''प्रमाणान्तरे'' ति। अन्यविषयप्रमाणाजन्यत्वस्य सिद्धतया सिद्धसाध्यत्वं व्यावर्तयति– *स्वार्थेति*।। असर्वज्ञवचन- त्वानधिकरणत्वे सति धर्माधर्मब्रह्मान्यतमप्रमाणत्वादित्यर्थः। नदीतीरफलसत्तावाक्यव्यावृत्त्यर्थम् –'' धर्माधर्मब्रह्मे'' ति विशेषणम्। मन्वादिवचनव्यावृत्त्यर्थम्–असर्वज्ञे'' ति। स्मृतिं व्यावर्तयति– '' प्रमाणत्वादि'' ति। भागासिद्धिनिरासार्थम्– ''धर्माधर्मे'' ति विशेषणम्। भारताध्ययनस्येदंप्रथमत्वे वेदस्य पौरुषेयत्वमिति शङ्कते–* अथेति*।। अध्ययनानादित्वसाधकानुमानविरोधान्नैवमित्याह– *नाध्ययनस्येति*।। दर्शितत्वादिति।। ''विवादगोचरापन्नमि'' त्यत्र दर्शितत्वादित्यर्थः।।

वेदवचनमाप्तप्रणीतम्; इतरथाऽप्रमाणत्वप्रसङ्गादुन्मत्तवाक्यवदित्याशयेन शङ्कते– * नन्वाप्तेनेति*।। अनाप्तवाक्याप्रामाण्ये भ्रान्त्यादिमूलत्वं प्रयोजकम्, तदभावाद् वेदस्य प्रामाण्यमित्याह– * नन्वनाप्तेनेति *।। संदिग्धाप्रयोजको हेतुरिति– * नन्वाप्तवाक्यमिति*।। प्रमाणत्वेन संमते वचसि भ्रान्त्याद्यमूलत्वमाप्तवाक्यत्वं च विद्यते, तत् कस्य प्रामाण्यप्रयोजकत्वम्? इति न ज्ञायत इत्यर्थः। अन्यदेव प्रयोजकमित्याह– *नोभयथापीति*।। आप्तप्रणीतत्वेनानाप्तप्रणीतत्वेन च प्रामाण्यमित्यर्थः। उभयोरपि प्रामाण्यान्वय-व्यतिरेकवत्त्वात् कथं प्रयोजकत्वनिषेधः? इति शङ्कते– *कथमिति*।। उक्तान्वय-व्यतिरेकयोरन्यथासिद्धत्वान्न ताभ्यां प्रयोजकत्वनिश्चय इत्याह– *शब्दानामिति*।। शब्दानां संसृष्टार्थप्रबोधनसामर्थ्यं स्वारसिकमवगतमिति संबन्धः। अवगमोपायमाह– *मध्यमवृद्धेति*।। मध्यमवृद्धसंबन्धित्वेन यौ प्रयोग' प्रत्ययौ, ताभ्यामित्यर्थः। मध्यमनरप्रवृत्तिलिङ्गेन तस्यार्थप्रत्ययमनुमाय तस्य हेत्वाकाङ्क्षायां शब्दप्रयोगान्वय-व्यतिरेकाभ्यां शब्दस्य तत्र हेतुत्वं निश्चीयते, न त्वाप्तप्रत्ययस्य भ्रान्त्याद्यमूलत्वस्य वा निश्चायकत्वमधिगतमित्यर्थः। *आप्तानाप्तप्रत्ययव्यतिरेकेणेति*।। आप्तानाप्तयोर्यः।

प्रत्यय: प्रयोगहेतु:, तं विनेति विग्रह:। आप्तप्रत्ययस्य मूलत्वेन शब्दप्रमितिहेतुत्वम् ; इतरथा नेत्येतन्नावगतं व्युत्पत्यवस्थायामित्यर्थ:। का तर्ह्यन्वयव्यतिरेकयोर्गति:? इत्याशङ्क्यानाप्तप्रत्ययमूलत्वस्य प्रामाण्यप्रतिबन्धकत्वात् तदभावविषयत्वेनान्वय-व्यतिरेकयोरन्यथासिद्धिमाह-* तत्रेति*।। अनाप्तस्य भ्रान्त्युत्प्रेक्षाज्ञाने शब्देऽपि दोषं प्रसञ्जयत इति संबन्ध:। तत्र हेतुमाह-* मूलेति*।। शब्दस्य कारणं य: प्रयोक्ता, तद्गतदोषत्वादित्यर्थ:। अथवा दोषप्रसञ्जनहेतुमाह-*कारणदोषतयेति*।। कारणत्वमाह-* तन्मूलेति*।। ते एव मूलं तन्मूलम् तेन विरचित: शब्दो यस्यानाप्तस्य, स तथोक्त:। फलितमाह-*ततश्चेति*।। अप्रामाण्यस्य पुरुषदोषाधीनत्वे प्रामाण्यं गुणाधीनं स्यादित्याशङ्क्य, प्रतिबन्धनिरासितया गुणस्यान्यथासिद्धिमाह- आप्तत्वज्ञानमिति*।। अन्यथासिद्धिप्रतिपादनफलमाह- *ततश्चेति*।। प्रतिबन्धनिरासितया वक्तृज्ञानं प्रमितावुपयुज्यते चेत्, तर्हि वेदेऽपि तदेष्टव्यं प्रतिबन्धनिरासायेत्याशङ्क्याह-* वेदे त्विति*।। प्रकारान्तरेणाप्तप्रणीतत्वस्य प्रमितिहेतुत्वं शङ्कते-*नन्वाप्तेति*।। प्रमितिजननायेति शेष:। संबन्धशब्देना'ग्निमानि'त्यत्र मतुबुच्यते। अनुपलब्धशब्दानां प्रमितिहेतुत्वाभावादुपलब्धत्वं वाच्यमित्याह-* स्मर्यमाणेष्विति*।। किमग्निसत्तामात्रप्रतीतिरापाद्यते? उत पुरोवर्तिनी? इति विकल्प्याद्यमङ्गीकरोति *सत्यमिति*।। अङ्गीकृतमेवांश माह-*पर्वतस्येति*।। द्वितीयं दूषयति-*पुरोवर्तिनी*।। प्रतिबन्धानिवर्तकत्वेन प्रयोगस्यान्यथासिद्धिमभिधाय तात्पर्यलक्षणप्रामाण्यजनकतया चान्यथासिद्धिमाह-* अथवेति*।। द्वैविध्यमाह-*अथवेति*।। हेतुमाह-* तदुभयेति*।। अथवा-वेदस्य नित्यत्वे सुषुप्तिप्रलयादिषु कथं प्रामाण्यम्? इति शङ्कायामाह-* तदुभयेति*।। उपलब्ध्यनुस्मृतिनिमित्तयो: प्रयोगयोरभावादित्यर्थ:। प्रामाण्यस्य जन्यत्वमाश्रित्यैतदुक्तमिति द्रष्टव्यम्। प्रलय-मूर्च्छादिरादिशब्दार्थ:। तात्पर्यस्य जन्यत्वमाश्रित्य मतान्तरमाह-*अथवेति*।। आप्तज्ञानेनाव्यवधानेन ज्ञायमानतात्पर्योपेतशब्दस्यार्थप्रमितिहेतुत्वं दृष्टम् ततश्च तादृशतात्पर्याभावादनाप्तवाक्येभ्यो नार्थप्रमितिरित्यर्थ:। कथं तर्हि वेदे प्रमिति:? तत्राह- *वेद इति*।। अध्ययनविधितात्पर्यादिति*।। अध्ययनविधिज्ञापितस्वाभाविकतात्पर्यादित्यर्थ: वैदिकविधिशब्दानां तात्पर्यमध्ययनविधिनिबन्धनं चेत्, तर्हि विधितात्पर्यं किंनिबन्धनम्? इति विवेक्तव्यम्-किं स्वनिबन्धनम्? उतान्यनिबन्धनमिति? आद्य आत्माश्रयता, द्वितीयेऽनवस्था, इत्याशङ्क्याह-*अध्ययनविधीति*।। न चात्माश्रितत्वम् ; शब्द इत्ययं शब्दो यथा स्वातिरिक्तात् शब्दानभिदधदात्मानमप्यभिदधाति, तद्वदित्यर्थ:। वर्णनित्यत्वमङ्गीकृत्य क्रमविशिष्ट-वर्णात्मकवेदस्य कल्पान्तरेऽन्यथाप्रणयनमाशङ्कते-* अनादित्वेऽपीति*।। यथा पूर्वस्मिन् कल्पे वर्णानां सन्निवेशविशेष:, तथाऽत्रापीत्येतत्कूटस्थनित्यशब्देन विवक्षितम्।। ·

वेदस्य नित्यत्वं कार्यप्रतिपादकश्रुतिविरुद्धमिति शङ्कते-*अनादीति*।। " तत्परतन्त्रत्वादि" त्यत्र ब्रह्माधीनत्वमुक्तम्, तदनुपपन्नम्; पारतन्त्र्यमात्रस्य सामान्यादौ व्यभिचारित्वेन कार्यताऽसाधकत्वात्। न च

कार्यत्वं तत्तन्त्रत्वमित्यपि शङ्कनीयम् ; मीमांसकमते हेत्वसिद्धेः। तथा शास्त्रशब्देन वर्णानामभिधानात्पदवाक्यादिविभाग आकस्मिकः स्यादित्याशङ्क्याह- *अत्र शास्त्रेति *।। अत्र सूत्र इति यावत्। एकैकस्य मिलितस्य वा वर्णस्यार्थबोधकत्वयोगादतिरिक्तस्य स्फोटस्य बोधकत्वं वक्तव्यम्, न च तस्य कार्यत्वमित्याशङ्क्य, पदार्थबोधकत्वोपाधौ वर्णानां पदत्वमित्याह- *एकपदार्थेति *।। पदार्थबुद्धेर्जनका ये वर्णाः तेषां नियामको यः क्रमः, तेन विशिष्टानां पदानामित्यर्थः उत्तरत्राप्येवमेव योज्यम्। ''प्रबाहरूपेणे'' त्यत्र वर्तमानानमित्यध्याहार्यम्।।

सर्पादेर्यथाऽज्ञातरज्ज्वादिविवर्तत्वम्, तद्वद् वेदोऽप्यज्ञातब्रह्मविवर्त इत्युक्तम्, तदाक्षिपति- *ननु रज्जुसर्पवदिति *।। वेदस्य मिथ्यात्वे रज्जुसर्पज्ञानवदप्रामाण्यप्रसक्तिरित्यभिप्रायः। मिथ्याभूतस्यापि वेदस्य प्रामाण्यं सर्वसंमतमिति वक्तुं विमृशति- *ननु कोऽयमिति * किं वर्णमात्रं वेदः? उत क्रमवन्तो वर्णा? इति किंशब्दार्थः आद्यं दूषयति- * न तावदिति।। अक्रम-व्युत्क्रमोच्चारितवर्णेषु, पदबुद्ध्यभावादित्यर्थः। द्वितीयमुत्थापयति- * क्रमविशेषेति *।। कोऽयं वर्णक्रम इति विवेचनीयम्-किं देशनिमित्तः क्रमः? उत कालनिमित्तः? आहो वस्तुनिमित्तः किं वोच्चारणनिमित्तः? अथवोपलब्धिनिमित्तः? इति विकल्प्य प्रथम-द्वितीयौ दूषयति- *नास्तीति * कालनिबन्धनत्वाभावे हेतुमाह * नित्यतयेति *।। इतरत्र हेतुमाह- *सर्वगतत्वादिति *।। तृतीयं दूषयति- *नापीति * ।। विरोधमेव व्यनक्ति- *न हीति *।। उभयोरेकस्मिन् काले राजा जरेति प्रयोगसमय एकस्य रेफस्य रेफात् पूर्वत्वमुत्तरत्वं चैकदा विरुद्धमित्यर्थः चतुर्थमुत्थापयति- *उच्चारणेति *।। अस्मिन् पक्षे वेदाप्रत्यक्षत्वप्रसङ्ग इत्याह- *नाप्रत्यक्षत्वादिति *।। पाठकगतोच्चारण-तत्क्रमयोरश्रोत्रग्राह्यत्वेन तदविशिष्टवेदस्यापि श्रोत्रग्राह्यतवं न स्यादित्यर्थः पञ्चममुत्थापयति- * अथेति।। उपलब्धिक्रमवन्त इति *।। श्रोत्रगतोपलब्धिक्रमवन्त इत्यर्थः। किमुपलब्धिगतक्रमस्य वस्तुतो वर्णधर्मत्वम्? उत समारोपात्? इति विकल्प्याद्यं दूषयति- *नान्यक्रमस्येति *।। द्वितीयमुत्थापयति- *अथेति *।। किमख्यातिवादिनश्चोद्यम्? उतान्यथाख्यातिवादिनः? न तावदाद्य इत्याह- * तर्हीति *।। वर्ण-क्रमयोस्तादात्म्यस्यानङ्गीकरणात् क्रममात्रं वर्णमात्रपाठ इदमित्यापद्यते, न चेत्थं घटत इत्यर्थः। द्वितीयं दूषयति- * अन्यथेति *।। न च ज्ञानमात्रं वेदः, वर्णविज्ञाने क्रमविज्ञाने च वेदबुद्ध्यभावादित्यर्थः। क्रमविशिष्टा वर्णा वेद इति पक्षं निराकृत्य, क्रमोपलक्षिता वर्णा वेद इति पक्षं निरस्यति- *न चोपलब्धीति *।। कदाचित्संबन्धिन उपलक्षकत्वाद वेदस्य च सर्वदा क्रमवत्त्वेनोपलम्भान्न क्रमस्योपलक्षणत्वमित्यर्थः। त्वन्मतेऽप्युक्तयुक्त्या क्रमनिरूपणाद् न वेदसिद्धिरित्याशङ्क्याह- *अनिर्वचनीये त्विति *।। भावादित्यस्यास्त्येवेत्यनेन संबन्धः। तन्मतेऽपि विशिष्टस्यानिर्वचनीयत्वाद् नार्थप्रमितिहेतुत्वम्, तत्राह- *विज्ञानव्यतिरेकेणेति *।। देहात्मभावस्यामिथ्यात्वेऽपि यथाऽर्थक्रियाकारित्वम्, तद्वदित्यर्थः।।

वेदसत्ताया ब्रह्मपरतन्त्रत्वाद् ब्रह्म वेदोपादानं चेत्, तर्हि न सर्वज्ञः स्यादिति शङ्कते- *ननु पाणिन्यादीति*।। वेदस्य पौरुषेयत्वपरिहाराय ब्रह्मणः सर्वशब्दोपादानता यदि गीयते, तदा पाणिन्यादिदृष्टान्तेन यत्सर्वज्ञत्वमुक्तम्, तत्तावता कथं स्यादिति योजना। *तावता*।। उपादानत्वमात्रेणेत्यर्थः। अर्थमुपलभ्य शब्दविरचयितरि पाणिन्यादौ शब्दविषयादधिकविषयज्ञानमुपलब्धम्, ब्रह्मणश्चानीदृक्त्वाद् न सर्वज्ञत्वसिद्धिरित्यर्थः। एकग्रन्थशङ्कां निरस्यति- * परिहरतीति*।। वेदस्य ज्ञानशक्तिविवर्तत्वेऽप्युपलभ्य विरचितत्वाभावात्कथं ब्रह्मणः सर्वज्ञत्वम्? इत्याशङ्क्याह- *अस्ति तावदिति*।। ''मुख्यलक्षणादिद्वारेणे'' त्यस्यायमर्थः:- केषांचिन्मुख्ययया वृत्त्या, केषांचिल्लक्षणया, केषाचिद्गौण्याऽर्थप्रकाशनसामर्थ्यमिति। फलितमाह- *तत्रेति*।। *ननु* कार्यशक्त्याकारेण शक्तिमात्रकल्पनमुचितम्, न तु तयोरैक्यमित्याशङ्क्याह- * कार्येति*।। ज्ञानजनने समर्थमपि चक्षुर्यथा न सर्वदा ज्ञानं जनयति, तद्वद् ब्रह्मापीति शङ्कते- *ननु सर्वसमर्थस्यापीति*।। नित्यवदिति*।। सर्वदैवेत्यर्थः। *ज्ञानसंयोग इति*।। ज्ञानसंबन्ध इत्यर्थः अप्रतिबन्धप्रकाशपुष्कलकारणस्य सदाऽभावात् सर्वज्ञत्वं घटत इत्याह- *नैष इति*।। कार्योपादानयोरेकं सामर्थ्यमित्युक्तम्, तदाक्षिपति- *कथं करणेति*।। शब्दस्य ज्ञानं प्रति करणत्वादात्मनश्च कर्तृत्वात् कथं करणकर्तृसामर्थ्यैक्यमित्यर्थः। किं शब्दस्य ब्रह्म प्रति करणत्वम् उत जीवं प्रति? नाद्य इत्याह- * ब्रह्मण इति*।। नित्यबोधरूपत्वेन ब्रह्मणः करणनिरपेक्षत्वादित्यर्थः। नापि द्वितीयः; शब्द-ब्रह्मणोरभेदाद् ब्रह्मगता प्रकाशनशक्तिः शब्देऽप्यन्वेति। तथा जीवस्याऽऽगन्तुकज्ञानत्वात् प्रकाशनशक्तिमान् शब्दस्तं प्रति करणतां भजत इति नावद्यमस्तीति द्रष्टव्यम्। प्रकाशरूपात्मसंबन्धेनैव सकलस्य प्रकाशसंभवे किं शास्त्रोपादानत्वेन सर्वज्ञत्वकल्पनया? इति शङ्कते- *-* ननु स्वयंप्रकाशतयेति*।। संसर्गित्वमात्रप्रयोजकमित्याह- *न वाय्वाकाशेति*।। कथं तर्हि प्राप्तविषयसिद्धिः? इति शङ्कामुपसंहारव्याजेन निरस्यति*-तस्मादिति*।। *रूपप्रपञ्चस्यापीति टीकाया अयमर्थः:*- *रूपप्रपञ्चकारणत्वम्=सत्तास्फूर्तिप्रदत्वम्। तद्वन्नामप्रपञ्चकारणत्वमपीत्याह- *रूपपप्रपञ्चतयेति*।। *तदाश्रित्य विवर्तनादिति*।। कस्मादसन्नेव प्रपञ्च उल्लसति? इत्याशङ्क्याह- *नासत इति*।। रूपप्रपञ्चो जडो यथा ब्रह्मण्यसन् नाविर्भवति, तथा नामप्रपञ्चोऽपीत्याशङ्कायामुक्तम् - *रूपेति*।।

इति परमहंसपरिव्राजकाचार्याखण्डानुभूतिशिष्येणाऽखण्डानन्दमुनिना विरचिते विवरणतत्त्वदीपने ब्रह्मणः सर्वज्ञत्वनिरूपणं नाम षष्ठं वर्णकं समाप्तम्।।

*अथवेत्यादिवर्णकान्तरस्यायमर्थः- ''तं त्वौपनिषदं पुरुषं पृच्छामी''त्यादिवाक्यं ब्रह्मणो वेदैकगम्यत्वं समर्थयति? उत न? इति कार्यत्वलिङ्गस्य कारणविशेषपर्यवसानापर्यवसानाभ्यां संदिह्यते। तत्र कार्यलिङ्गस्य कारणविशेषपर्यवसानाद् न ब्रह्मणो वेदैकगम्यत्वमिति प्राप्तम्। तथाहि-विमतम्,

कल्पितकारकशक्तिकर्तृपुर:सरम्, कार्यत्वात् ; घटवत्। स च कर्तैक:; कल्पनालाघवात् , इति प्राप्ते प्रतिविधीयते;-कार्यमात्रस्य कर्तृमात्रगमकत्वात्। न च लाघवादेकत्वनिश्चय:; विचित्रप्रसादादे-रनेककर्तृकत्वस्य शरीरिकर्तृत्वस्य च दृष्टत्वात्। तथा कार्यलिङ्गस्य सर्वज्ञे सर्वशक्तिमत्येकस्मिन्नपर्यवसानात्कारणविशेषस्य वेदैकगम्यत्वमिति।। अधिकरणार्थमुपसंहरति- *तस्माज्जन्मादीति*।।

एकमेव ब्रह्माऽविद्यया जगदाकारेण विवर्तते चेत्, तर्हि विद्ययाऽविद्याया व्यावर्तितत्वात् सकलमुक्त्यापात इत्याशङ्क्य, मतभेदं दर्शयति- *तत्रेति*।। वेदान्तव्याख्यातृणां मध्य इत्यर्थ:। प्रतिजीवमविद्याभेदान्नातिप्रसङ्ग इत्यर्थ:। मतान्तरमाह- *मायेति*।। पूर्वत्र मायाऽविद्ययोर्भेद:, अत्र त्वभेद इत्यर्थ:। पक्षान्तरमाह- *जीवा एवेति*।। प्रतिजीवमविद्याया भिन्नत्वात् कार्यप्रपञ्चस्यापि भेदादेकमुक्तौ न सर्वद्वैतनिवृत्तिरित्यर्थ:। प्रतिजीवं प्रपञ्चभेदे कथमैक्यप्रतिभास:? तत्राह- *सादृश्यादिति*।। कथं तर्हि ब्रह्मकारणवादिन्य: श्रुतय:? तत्राह- *स्वरूपेति*।। सिद्धान्तरहस्यमाह- *ब्रह्मेति*।। किं तर्ह्युपादेयमिति? अत्राह- *तस्मादिति*।। नचैकमुक्तौ सर्वमुक्तिप्रसङ्ग:; इष्टापत्ते: शिष्टमिष्टसिद्धौ द्रष्टव्यम्।।

इति परमहंसपरिव्राजकाचार्याखण्डानुभूतिशिष्येणाऽखण्डानन्दमुनिना विरचिते विवरणतत्त्वदीपने ब्रह्मण: शास्त्रप्रमाणकत्वं नाम सप्तमं वर्णकं समाप्तम्।।

वार्तिकम्

व्याख्यातं तावदुपलक्षणासाधनपरं जन्मादिसूत्रम्, संप्रति विशेषणलक्षणसाधनपरं सूत्रमवतारयितुमाक्षिपति- ***जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तमिति** *॥ येनैव पूर्वोक्तन्यायेन ब्रह्मण: श्रुत्युपात्तजगत्कारणत्वमवधारितम्, तनैव तस्य सर्वज्ञत्वमपि सिद्धं भवति। कुत:? जगत्कारणत्व-सर्वज्ञत्वयो: समव्याप्तत्वेन परस्पराविनाभूतत्वादित्युक्तमधस्तात्; अधिकरणसिद्धान्तस्याप्यङ्गीकारात्। तस्मात् ब्रह्मण: सर्वज्ञत्वसिद्ध्यर्थं न पृथग् न्यायान्तरं सूत्रणीयम्; सिद्धसाधनत्वादिति, *सत्यम्* तेनैव सर्वज्ञत्वमपि ब्रह्मणो जगत्कारणत्ववदुपक्षिप्तम्; तथाऽपि सिद्धस्यैव तस्य दार्ढ्यार्थं सूत्रकारो न्यायान्तरं दर्शयति स्म। किं पुनर्दार्ढ्यम्? कुचोद्यानुदयेन शिष्यस्य विश्वास:। कुचोद्यञ्चाचेतनजगदुपादानस्य न चेतनत्वसम्भव इत्यादि। अत एव न सिद्धसाधनत्वम्; शिष्यं प्रति तस्यादोषत्वात्, तयो:समानबलत्वेनैकेनान्यस्यान्यथा सिद्ध्यसम्भवाच्च। तस्मादुपपद्यते सूत्रकारस्याधिकरणसिद्धान्ततया जगत्कारणत्वसाधकन्यायेन सिद्धस्यापि ब्रह्मण: सर्वज्ञत्वस्य दार्ढ्यार्थं न्यायान्तरसूत्रणमिति परिहरन् सूत्रमवतारयति- * तदेव द्रढयन्नाह- **शास्त्रयोनित्वादिति** *॥

अत्र शास्त्रशब्देन मनोमयकोश उच्यते; ''तस्य यजुरेव शिर:। ऋग् दक्षिण: पक्ष:। सामोत्तर: पक्ष:। आदेश आत्मा। अथर्वाङ्गिरस: पुच्छं प्रतिष्ठे'' ति तदवयवत्वेन सर्वस्य वेदस्य मनोमयाकाशान्तर्भावश्रुते: आदिश्यते=उपदिश्यतेऽनेनिष्टानिष्टप्राप्तिपरिहारसाधनमित्यादेश:=अष्टविधब्राह्मणवाक्यम्। *ननु* काम-सङ्कल्पादिपरिणामात्मकं मन:; ''काम: सङ्कल्पो विचिकित्से'' त्यादिश्रुते:, शास्त्रन्तु वर्णात्मकम्; ''वर्णा एव तु शब्द इति भगवानुपवर्ष:'' इति वक्ष्यमाणन्यायात्। तथा च तयोरत्यन्तभेदात् कथमैक्यम्? ''तस्य यजुरेव शिर:। इत्यादिवाक्यस्य तूपासनार्थं कल्पनापरत्वेनाऽप्युपपत्तिरिति-चेत्, *न*; ''ब्रह्मविदाप्नोति परमि'' त्युपक्रमाद् वस्तुप्रतिपादनप्रक्रियायामुपासनाऽसम्भवात्, शिर आदिरूपत्वस्य काल्पनिकत्वेऽपि मनआत्मकत्वस्याकाल्पनिकत्वात्। न च-तयोरत्यन्तवैलक्षण्यमुक्तमिति- वाच्यम् ; वर्णानामपि कामादिवत् मनोवृत्तिरूपत्वात्, ''प्रजापतिर्वा इदमग्र आसीत्, स आत्मानमैक्षत, स मनोऽसृजत, तन्मन एवासीत्, तदात्मानमैक्षत,तद्वाचमसृजते'' ति श्रुते:, ''इत्येतत् सर्वं मन एवे'' त्यत्रेतिशब्दस्य प्रकारार्थत्वात्, परा-पश्यन्ती-मध्यमा- वैखरीरूपेण चतुर्धा शब्दोत्पत्तिश्रवणाच्च। अत एव मानसमन्त्रजपविधानमप्युपपद्यते; अन्यथा मनोवृत्यावृत्तौ मन्त्रावृत्तिर्न स्यात्; तयोर्भेदात्। विहिता च मन्त्रावृत्ति: '' त्रिप्रथमामन्वाह त्रिरुत्तमामि'' ति।। एतच्चोक्तश्रुतिभाष्य एव स्फुटमिति नातीव शास्त्रस्य मनआत्मकत्वसाधने यत्न: क्रियते।। एवमेव मनोमयमात्मानं सर्वविषयज्ञानशक्तिरूपत्वात् वेदपुरुष इति हिरण्यगर्भ इति चाहुर्वेदविद:।।

तदेतदृग्वेदादिसमुदायलक्षणं सर्वविषयज्ञानशक्तिरूपं हिताहितप्राप्ति-परिहारोपायशासनात् शास्त्रमित्युच्यते। तस्य शास्त्रस्य योनि:=कारणम्। यद्यपि योनिशब्द: स्त्रीव्यञ्जने रूढ:; तथाऽपि तस्य गुणयोगात् कारणान्तरे प्रयोगो युक्त:; स्वार्थस्य गर्भं प्रति निमित्तोपादानभावस्य दर्शनात्। भवति हि गर्भं प्रति योनिर्निमित्तम् ; तत्क्षेत्रत्वात् , उपादानञ्च ; तदवयवैस्तदारम्भादिति। यदा योनिशब्द: कारणमात्र उपादानकारणे वा रूढ: ; श्रुति- स्मृतिषु लोके च तत्र प्रयोगदर्शनात्, तदा स्त्रीव्यञ्जने सास्नादिमति गोशब्दवत्, तामरसे पङ्कजशब्दवच्च प्रयोगबाहुल्यात् प्रकरणाद्यनपेक्ष्य झटिति प्रत्यायकत्वं तस्य,अन्यत्र न तंदभावात् प्रकरणादिसापेक्षत्वमविरुद्धम्। तथा च ''यद्वै किञ्च विज्ञातं वाचस्तद्रूपमि'' ति श्रुते: सर्वज्ञापकरूपस्य वाङ्मनोमिथुनात्मकस्य त्रयीलक्षणस्याभिव्यञ्जकतया चिदुपाधिभूतस्योपादानत्वाद् निमित्तत्वाच्च भवति सर्वं ब्रह्म। नह्युपादानस्य ब्रह्मणाऽचेतनत्वे तत्कार्ये चैतन्योपराग: सम्भवति: अरूपकार्य इव रूपोपराग:। न वा तस्यासर्वविषयत्वे तत्कार्यस्य सर्वविषयत्वम्; परिणामवादे विवर्तवादे च कारणस्य कार्यापेक्षया व्यापकत्वनियमात्। न च ब्रह्मण: शास्त्रकारणत्वमसिद्धम्; 'अस्य महतो भूतस्य नि:श्वसितमेतद्यदृग्वेदो यजुर्वेद:'' इत्यादिश्रुतेस्तत्कारणत्वसिद्धे:।।

नचैतावता वेदस्य पौरुषेयत्वापत्ति:; किं तावत् पौरुषेयत्वमापाद्यते भवता? यदस्माकमनिष्टं स्यात्। यदि तावत् परमात्माभिन्नमितित्तोपादानकतया सर्गादावाकाशादिवदुत्पद्यमानत्वम्? तदिष्टमेवास्माकम्, नानिष्टम् , तदनभ्युपगमे द्वैतापत्तेरद्वैतहानात्। तथाच श्रुति:-''अस्य महतो भूतस्य नि:श्वसितमि'' इत्यादि रुदाहृतैव। *अर्थ* प्रमाणान्तरेण स्वार्थमुपलभ्य विरचितत्वं तदिति- चेत्, *न*; अनभ्युपगमात्। नहि तादृशं पराभ्युपगतं पौरुषेयत्वं वेदस्यास्माभिरभ्युपगतम्, येनापूर्वविषयत्वव्याहतेरनिष्टप्रसङ्ग: स्यात् तदनभ्युपगम उक्तहेतोर्नेशस्य सर्वज्ञत्वसिद्धिरिति-चेत्, न; सर्वविषयकविज्ञानशक्तिलक्षणवेदोपादानत्वमात्रेणापि तत्सिद्धे:, उपादानस्वरूपानुसारित्वात् कार्यस्य, पराभ्युपगतपौरुषेयत्वकल्पने प्रमाणाभावाच्च भारतादाविव कर्त्रस्मृते:, ''ऋच: सामानि जज्ञिरे'' इत्यादिमन्त्रस्यास्मदभिप्रेतोत्पत्त्याभिप्रायेणाप्युपपत्ते:, अन्यथा '' नि:श्वसितमि'' ति ब्राह्मणश्रुतिव्याकोपापत्ते:। अत्र हि पराभिमतपौरुषेयत्वशङ्कानिरासार्थमेव '' ''नि:श्वसितमि'' त्युक्तम्। यथाहि लौकिकपुरुषस्य नि:श्वासादिप्राणव्यापारो न तद्विषयविशेषविज्ञान-प्रयत्नादिसापेक्ष: क्रियान्तरवत्, अपितु चेतनावच्छरीरिणोऽधिष्ठानमात्रादेवोत्पद्यत इति लोकसिद्धम्; एवमृग्वेदादिलक्षणं ब्रह्मण: कार्यं न कविकाव्यलक्षणलौकिकवाक्यान्तरवदपूर्वसंसर्गविशेषविज्ञानविवक्षा-दिपूर्वकम्। किं तर्हि? नि:श्वासवदेव सामान्यत: सर्वविषयचेतनावदधिष्ठानमात्रादुत्पद्यत इति । तददि-मुक्तम्- * **नि:श्वसितमिति** *।।

नि:श्वसितमिव नि:श्वसितमित्यर्थ:। तर्हि नि:श्वासश्रुत्यनुग्रहाद् नि:श्वास एवास्तु ब्रह्मण ऋग्वेदादि:;

अन्यथा गुणकल्पनापत्तेरिति, नेत्याह- * श्रुतिर्महतो भूतस्येति *।। *महतः=देशकालवस्तुकृतपरिच्छेदत्रय शून्यस्येत्यर्थः; तदसत्त्वे सत्तया जगद्भानं न स्यात्; '' सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'' ''तमेव भान्तमनुभाति सर्व तस्य भासा सर्वमिदं विभाती'' त्यादिश्रुत्यन्तरदित्याशयः।। तथा च तादृशस्य महतो भूतस्याशरीरत्वात् '' अशरीरं वावसन्तमि'' तिश्रुतेर्निवासासम्भवात्, शरीरवत एव परिच्छिन्नम्य तद्दर्शनात्, निःश्वासकल्पत्वमेव वेदस्य युक्तम्, न निःश्वासत्वमित्यभिप्रायः।।

एतेन- वेदः, पौरुषेयः, वाक्यत्वात्, भारतादिवदिति सामान्यतोदृष्टम्- * अपास्तम्*; श्रुति-विरोधात्, शरीरजन्यत्वस्योपाधित्वाच्च। न च-लाघावाद् व्यभिचाराभावाच्च जन्यत्वमात्रं प्रयोजकम्, न शरीरजन्यत्वम् ; गौरवात् व्यर्थविशेषणत्वाच्च, तथा च साधनव्यापकतेति-वाच्यम्; निःश्वसितमिति श्रुतिविरोधेन जन्यत्वमात्रस्य तद्प्रयोजकत्वात्, विशेषसार्थक्यात्। तस्मान्न वेदस्याकाशादिवद् ब्रह्मज्ञत्वेऽपि पराभितमपौरुषेयत्वप्राप्तिः। यथा चैतत्, तथा विस्तरेण प्रतिपादितमस्माभिर्वेदान्तमन्दाकिन्याम्, नात्र विस्तार्यते; पूर्वतन्त्रसिद्धत्वाच्च। प्रकृतमनुसरामः।।

तथाचैवं प्रयोक्तव्यम्-ब्रह्म, सर्वज्ञं भवितुमर्हति, सर्वविषयज्ञानशक्तिलक्षणर्ग्वेदादिकारणत्वात्; यन्नैवम्, तन्नैवम् , ; घटादीति व्यतिरेकि, यद्वा- ब्रह्म, ऋग्वेदादिविषयापेक्षयाधिकविषयज्ञानवत्ः तत्प्रणेतृत्वात्, यो यद्वाक्यप्रणेता, स तद्विषयापेक्षयाऽधिकविषयज्ञानवान् दृष्टः, यथा भारतादिप्रणेता व्यासादिस्तद्विषयापेक्षयाऽधिकविषयज्ञानवानिति सामान्यतो दृष्टम्। पक्षधर्मताबलाच्च ब्रह्मणः सर्वज्ञत्व-सिद्धिः।। तदेतत् सर्वमाह भाष्यकारः- ***महत ऋग्वेदादेरित्यादिना** *।। महत्वञ्च परिमाणतो विषयतश्च। तदेव दर्शयति- ***अनेकविद्यास्थानोपबृंहितस्येति** *।। सगुण-निर्गुण-देवता-कर्मादिविषयभेदादनेका विद्याः, तासां स्थानानि=प्रकरणानि; प्रकरणविशेषत्वात् स्थानस्य, तैरुपचितस्येत्यर्थः। ग्रन्थतो महत्त्वमुक्त्वाऽर्थतस्तदाह- * **प्रदीपवत्सर्वार्थावद्योतिन** इति*।।

यद्यपि प्रदीपस्य रुपवन्मात्रावद्योतकत्वम्; तथाऽपि स्वगोचरसर्वावभासकत्वमात्रेणायं दृष्टान्त इति मन्तव्यम्। ''सर्वज्ञकल्पस्ये'' त्यनेन सर्वविषयज्ञानशक्तिलक्षणमनआत्मकत्वमृग्वेदादेर्दर्शयति; तस्या-चेतनत्वेऽपि स्ववृत्त्या सर्वज्ञानोपाधित्वेन सर्वज्ञस्थानेऽभिषिक्तत्वात् सर्वज्ञकल्पत्वोपपत्तेः। अत एव कल्पशब्दप्रयोगोऽपि युक्ततरः; अराजनि भद्रसेने राजकार्यकारित्वेन राजकल्पोऽयं भद्रसेन इतिवत्।।

व्यतिरेकव्याप्तिमाह- ***नहीदृशस्येति** *।। सर्वज्ञगुणः=सर्वविषयत्वम्, सर्वज्ञानाकरत्वं वा। अन्वय माह- ***यद्यद्विस्तरार्थमिति** *।। एतद्व्याप्तिद्वयसूचितप्रयोगद्वयं पूर्वमेव प्रदर्शितमस्माभिः। ''सर्वज्ञानाकारस्ये'' त्यनेन सर्वविषयज्ञानशक्त्यात्मकत्वमाह; आकाशशब्दस्य तत्रैव प्रसिद्धेः। *ननु*-प्रयत्नाभावे तत्कर्तृत्वमेव भगवतो न सिध्येत्, कुतस्तस्य तदुपादानत्वमिति? अत आह- ***लीलान्याये ति** *।।

नञ ईषदर्थत्वादित्यभिप्रायः। वेदसृष्टौ प्रयत्नस्येषत्वं'' निःश्वसितमि'' ति श्रुतिव्याख्यानं एवं पूर्वं दर्शितम्। वाक्यापरिसमाप्तवेवास्मिन्नर्थे श्रुतिं प्रमाणयति- ***अस्य महतो भूतस्येति** *।। वाक्यं पूरयति- ***तस्येति** *।।

इति शारीरकमीमांसाभाष्यवार्तिके शास्त्रयोनित्वाधिकरणे प्रथमं वर्णकं संपूर्णम्।।

''चोदनालक्षणोऽर्थो धर्मः'' इतिवद् लक्षण-प्रमाणोभयसूचनपरमेतत् सूत्रमित्यभिप्रेत्य वर्णकान्तरमाह- ***अथवेत्यादिना** *।। यद्वा-सर्वज्ञत्वस्य पूर्वसूत्रेणैवाधिकरणसिद्धान्तन्यायेन सिद्धेरुक्तत्वात् प्रमाणप्रदर्शनपरमेवैतत् सूत्रमित्याह- ***अथवेति** *।। प्रमाणे हि प्रदर्शिते तत्र वादिविप्रतिपत्याऽग्रे विचारः प्रवर्तिष्यते-''**तत्तु समन्वयादि**''ति।।

ननु प्रमाणमपि पूर्वं दर्शितमेव विषयतया-''यतो वा इमानि भूतानि जायन्ते'' इत्यादि, *सत्यं दर्शितं भाष्यकृता, नतु सूत्रकृता। *ननु*-सूत्रकारेणापि दर्शितमेव; वेदान्तवाक्यग्रथनार्थत्वात्सूत्राणाम्; अन्यथा निर्विषयन्यायसूत्रणानुपपत्तेरिति-चेत्, *सत्यं निर्विषयतर्काप्रवृत्तेर्वेदान्तवाक्यग्रथनार्थत्वं सूत्राणाम्, किन्तु तदेवाद्यापि न सिद्धम्। यावद्धयनेन सूत्रेण शास्त्रप्रमाणकत्वं ब्रह्मणो न सिध्यति, तावद्, न सूत्राणां वेदान्तवाक्यविषयत्वं निर्णेतुं शक्यते; प्रमाणान्तरविषयत्व-निर्विषयत्व-शङ्कयोर्जागरूकत्वात्। अत एव जन्मादिसूत्रस्य स्वतन्त्रानुमानविषयत्वं तार्किकैः शङ्कितम्। अतः सकलतन्त्रोपोद्घातमेतत्सूत्रमिति युक्तं प्रमाणसूत्रणमिति। तदत्राशङ्कते-

ननु-ब्रह्मणो जन्मादिकारणत्वम्-''एष बन्ध्यासुतो याति खपुष्पकृतशेखरः। कूर्मलोमपटच्छन्नः शशश्रृङ्गधनुर्धरः।।'' इति न्यायमुदाहरति; प्रमाणाभावेनासत्वावधारणस्योभयत्र तुल्यत्वात्, नास्ति चोक्तलक्षणे ब्रह्मणि प्रमाणम्; प्रत्यक्षादेरगोचरत्वस्य त्वयैवाङ्गीकृतत्वात्, शास्त्रस्य च कार्यमात्रैकगोचरत्वात् तत्परत्वानुपपत्तेः, ''यतो वा इमानि भूतानि जायन्ते'' इत्यादेश्चोपासनाविधिशेषत्वेनार्थवादमात्रत्वात्, अतो मास्तूक्तलक्षणं ब्रह्म; प्रमाणाभावात्, अत एवाह श्रुतिः-''असदेवेदमग्र आसीदि'' त्यादिरिति-चेत्, *नैतदेवम्*; अस्ति तावदुक्तलक्षणं ब्रह्म; शास्त्रप्रमाणकत्वात्, धर्मवदित्याह सूत्रकारः- ***शास्त्रयोनित्वादिति** *।। तदेतद् भाष्यकारो व्याचष्टे-*यथोक्तमृग्वेदादिशास्त्रं योनिः=कारणम्-ब्रह्मण इत्यादि*।। **किमर्थमित्यादिचोद्य-परिहारभाष्ये पूर्वमेव** व्याख्याते।।३।।

इति शारीरकमीमांसाभाष्यवार्तिके शास्त्रयोनित्वाधिकरणे द्वितीयं वर्णकं संपूर्णम्।।

भाष्यभावप्रकाशिका

सूत्रान्तरमवतारयन् पूर्वसूत्रसङ्गतिमाह- ***जगत्कारणत्वेति***॥ न केवलं जगत्कर्तृत्वाद् ब्रह्मणः सर्वज्ञत्वम् , किन्तु शास्त्रयोनित्वादपीति दृढीक्रियते। सर्वज्ञत्वं युक्त्यन्तरेणेत्यर्थः। शास्त्रयोनित्वस्य सर्वज्ञतासाधनत्वं समर्थयितु शास्त्रं विशिनष्टि- ***महत इत्यादिना***॥ महाविषयत्वादृग्वेदादि शास्त्रं महत्, न केवलं महाविषयत्वेनास्य महत्त्वम्, अपि त्वनेकाङ्गोपाङ्गोपकरणतयाऽपीत्याह- ***अनेकविद्येति***॥ पुराण-न्याय- मीमांसादयो दश विद्यास्थानानि, तैस्तया तया द्वारोपकृतस्येत्यर्थः। तदनेन विशिष्टजनपरिग्रहेणाप्रामाण्यशङ्काऽप्यर्थादपाकृता; पुराणादिप्रणेतृभिर्महर्षिभिस्तथा तथा वेदान् व्याचक्षाणैस्तदर्थं चादरेणानुतिष्ठद्भिः परिगृहीतो वेद इति अबोधकत्वास्पष्टबोधकत्वयोरभावादपि नाप्रमाणं वेद इत्याह- *प्रदीपवदिति*॥ *अत एव सर्वज्ञकल्पस्य=सर्वज्ञसदृशस्य सर्वविषयत्ववच्छास्त्रस्याप्यभिधानं सर्वविषयमिति। व्यतिरेकमाह- ***न हीदृशस्येति***॥

सर्वज्ञस्य गुणः, सर्वविषयज्ञता, तदन्वितं शास्त्रम्; अस्यापि सर्वविषयत्वात्,इदानीं प्रमाणं रचयति- ***यद्यद्विस्तरार्थमिति***॥ अथवा-पूर्वं व्यतिरेकमभिधायाऽन्वयव्याप्तिमभिधत्ते- ***यद्यदिति***॥ ***अधिकतरविज्ञान इति***॥ इक्षु-क्षीर-गुडादिमधुरस्य तद्भेदस्य च वचनागोचरस्याप्यनुभवगोचरत्वाद् वाक्याद् ज्ञानमधिकविषयमित्यर्थः।

इदानीमनुमिनोति- ***किमु वक्तव्यमिति***॥ अयं प्रयोगः वेदः, स्वविषयादधिकतरविषयविज्ञानवत उत्पन्नः, वाक्यप्रमाणत्वात्; पाणिन्यादिवाक्यवत् , इति। एवंविधस्य वेदस्य यस्मान्महतो भूताद् योनेः संभवः, तस्य महतो भूतस्य ब्रह्मणो निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं न किमु वक्तव्यमिति योजनात् पक्षधर्मताबलात् शास्त्रकारणस्य ब्रह्मणः सर्वज्ञता सिध्यतीति भावः॥ अन्ये तु- * **अनेकशाखाभेदभिन्नस्य** वेदस्ये'' त्यादि ''संभवः'' ''इत्यन्तमुपनयः, **''तस्ये''** त्यादि **''सर्वशक्तित्वं चे** ''त्यन्तं निगमनमिति-*वर्णयन्ति। ग्रन्थतो महत्त्वमाह- ***अनेकशाखेति***॥ अर्थतो महत्त्वमाह- ***देव तिर्यगादीति***॥ अत एवं **ज्ञानाकारस्येत्यु**क्तम्। इदानीं पौरुषेयत्वाशङ्कां व्यावर्तयति- * **अप्रयत्नेनेति***॥

प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वाभावात् तदुपादानत्वेऽपि वेदस्य नापौरुषेयता, पूर्व-पूर्व सदृशोत्तरोत्तरक्रमविशिष्टस्यैव ब्रह्मोपादानतया प्रवाहरूपेण नित्यत्वम्, सर्वार्थप्रकाशनसमर्थतया स्वोपादानगतसर्वार्थप्रकाशनसामर्थ्यानुमापकता न विरुध्यते; प्रदीपादिगतप्रकाशनशक्तेः स्वकारणाग्नि-शक्त्यनुमापकतादर्शनादिति भावः॥

इति पूज्यश्रीचित्सुखमुनिकृतौ शारीरकमीमांसाभाष्यव्याख्यायां भाष्यभावप्रकाशिकायां शास्त्रयोनित्वाधिकरणे प्रथमं वर्णकं संपूर्णम् ॥

इदानीं वर्णकान्तरे सूत्रस्य प्रमाणप्रतिज्ञालक्षणमर्थान्तरमाह- ***अथवेति***॥ अस्मिन् व्याख्याने पूर्वसूत्रशेषस्याप्यस्य सूत्रस्य पृथक्करणं वर्णकान्तरेण प्रपञ्चान्तःपातिशास्त्रस्यापि हेतुत्वेन सर्वज्ञत्वमुपपादयितुं शक्यमिति दर्शयितुम्, तदेव द्वितीयसूत्रेण ब्रह्मस्वरूपलक्षणासंभवाशङ्कां व्युदस्य लक्षणसंभव उक्तः। तस्यैव तु लक्षणस्यानुमानत्वाशङ्कामपाकृत्यागमिकत्वोपदर्शनेन ब्रह्मणि शास्त्रं प्रमाणमुक्तम्- ***शास्त्रयोनित्वादिति***॥ इति तृतीयं शास्त्रयोनित्वाधिकरणम्।

इति पूज्यश्रीचित्सुखमुनिकृतौ शारीरकमीमांसाभाष्यव्याख्यायां भाष्यभावप्रकाशिकायां शास्त्रयोनित्वाधिकरणे द्वितीयं वर्णकं संपूर्णम्॥

प्रदीपः

''अथातो ब्रह्मजिज्ञासे'ति जिज्ञास्यतया प्रतिज्ञातं निर्विशेषं ब्रह्म ''जन्माद्यस्य यत:'' इति सूत्रेण जगत्कारणद्वारोपक्षिप्तम्। जगत्कारणं हि ब्रह्मोपाधिभूतमायाया विलये चैतन्यस्वरूपमात्रं तदैव भविष्यति, यदि सर्वज्ञं तत्। उपाधित: सर्वज्ञानाश्रयत्वम्, स्वरूपतस्तु चैतन्यमात्रमिति। इदं च सर्वज्ञत्वं ब्रह्मणो ''यतोवे'' ति वाक्येऽपि कारणत्वान्यथाऽनुपपत्त्या सूचितमेव। ''य: सर्वज्ञ:'' इति वाक्ये तु स्पष्टमप्युपन्यस्तम्; तथाऽपि '' यतो वेत्या'' दिवाक्ये न तत् स्पष्टीकृतमिति केवलं सर्वज्ञत्वमाक्षेपगम्यमित्येव वक्तव्यम्। तदिदमाह-* **जगत्कारणत्वप्रदर्शनेनेति** *॥ यद्यपि निर्विशेषब्रह्मविचारे-न सविशेषसर्वज्ञत्वस्पष्टीकरणं साक्षादुपयुक्तम्; तथाऽपि पूर्वोक्तप्रकारेणाध्यारोपापवादाभ्यां वस्तुतत्त्वनिर्णये तदुपयुक्तमेवेति भाव:। ***जगत्कारणत्वप्रदर्शनेन** *॥ कारणत्वं चात्र कर्तृत्वरूपमेव। अभिन्ननिमित्तोपादानत्वेऽपि तु ब्रह्मण: कर्तृत्वमपि वर्तत एव॥ तथा च तेनैव कर्तृत्वेन सर्वज्ञत्वं सर्वशक्तिश्चार्थसिद्धमिति भाव:। ***तदेव द्रढयन्निति** *॥ तद् द्रढयन्नेवेत्येवकारस्य भिन्नक्रमेण योजना । यतोऽत्र सर्वशक्तित्वदृढीकरणमपि विवक्ष्यते। तेन ''निरतिशयं सर्वज्ञत्वं सर्वशक्तिमत्त्वं चे'' त्युत्तरग्रन्थो न विरुद्ध:॥

सर्वज्ञत्वमिव सर्वशक्तिमत्वमप्यर्थसिद्धं चेदपि तदर्थं पृथक्सूत्रान्तररचनापत्तिरिति शङ्का तु चन्द्रिकाकाराणां तदैवावसरेत्, यदि तदपि न दृढीकृतम्। परिमले हि तदप्युक्तसूत्रेण दृढीकृतमेवेति निरूपितम्। तदुक्तम्-'' *ननु* पूर्वसूत्रे ब्रह्मण: सर्वज्ञत्ववत् सर्वशक्तित्वमर्थलभ्यम्, तत्किमिति केनचिद्धेतुना न दृढीकृतम्? तदप्युक्तशङ्कानिवारणक्षमम्, *सत्यम्* तदपि नि:श्वसितश्रुत्युदाहरणेन दृढीकृतमेव। ''अस्य महतो भूतस्य नि:श्वसितमेतदृग्वेदो यजुर्वेद:'' इत्युपक्रम्य '' अयं च लोक: परश्च लोक: सर्वाणि च भूतान्येतस्यैवैतानि सर्वाणि नि:श्वसितानीति नामरूपात्मकस्य सर्वस्यापि प्रपञ्चस्य नि:श्वसितवदप्रयत्नसाध्यब्रह्मकार्यत्वोक्तेरि'' ति॥ किं बहुना? '' निरतिशयं सर्वज्ञत्वं सर्वशक्तिश्चे''ति भाष्यकारैरेव स्पष्टमेव सर्व शक्तित्वमप्यर्थसिद्धमत्र दृढीकृतमेवेति सूच्यत इत्यनुक्तोपालम्भनमेवेदम्॥

सर्वज्ञत्वं येन वाक्येन गम्यते, तेनैव सर्वशक्तित्वमपि गम्यत इत्युक्तश्रुतिपर्यालोचनेन स्पष्टमेव प्रकाशते। तदिदमभिप्रेत्यैवोक्तम्-सर्वज्ञत्वदृढीकारेण तत्समनियतसर्वशक्तित्वस्यापि दृढीकृतप्रायत्वादि''ति। उक्तश्रुतौ च प्रथमत: शास्त्रयोनित्वमनन्तरं भूतयोनित्वं च बोधितमिति ''शास्त्रयोनित्वा'' दिति प्रथमत: सार्वज्ञ्यस्फोरणमप्युपपन्नमेव॥ *एतेन*- मुखत: सार्वज्ञ्यस्यैव स्फोरणे निमित्ताभावात् सर्वशक्तित्वदृढीकारे तत्समनियतसार्वज्ञ्यस्यापि दृढीकृतप्रायत्वात्'' इति चन्द्रिकाप्रकाशोक्तम्- * अपास्तम् *॥

*द्रढयन् *=दृढीकुर्वन्। जगत्कारणत्वेन केवलं तत्तदुपादानगोचरज्ञानवत्त्वमात्रं बोधितं भवति, भाविपदार्थगोचरं तु ज्ञानं न साधितं स्यादिति शास्त्रयोनित्वसूत्रेण तस्यापि साधनाद् दृढीकरणमिति भाव:। एतावता च पूर्वाधिकरणेनैकविषयत्वमवान्तरसङ्गति: सूच्यते॥

शास्त्रयोनित्वादिति।। शास्त्रकर्तृत्वादित्यर्थः। अत्र ब्रह्मेति पक्षस्य सर्वज्ञमिति साध्यस्य चाध्याहाराद् ब्रह्म, वेदविषयादधिकविषयकज्ञानवत्, तत्कर्तृत्वात्, व्याकरणादिकर्तृपाणिन्यादिवदित्यनुमान-प्रयोगो विवक्षितः। अनेन चानुमानेन सर्वज्ञत्वं साधयितुं वेदस्य सर्वज्ञकल्पत्वमुपपादनीयमिति सौत्रशास्त्रपदार्थं तत्तद्विशेषणविशिष्टं निर्दिश्य, तद्धेतुत्वं ब्रह्मणि पक्षधर्मतोपपादनव्याजेनाह- ***महतइति***।। सूत्रे शास्त्रपदेनैवर्ग्वेदादिकं विवक्ष्यते। " तस्य महतो भूतस्ये''ति वाक्यनिर्दिष्टम्। तस्य च चातुर्वर्ण्य-चातुराश्रम्यादिबहुविधपदार्थभूयिष्ठत्वान्महत्त्वमिति भावः। ***अनेकविद्यास्थानोपबृंहितस्य**= ''पुराण-न्याय-मीमांसा धर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश''*।। इति याज्ञवल्क्यवचनसिद्धचतुर्दशविद्यास्थानोपबृंहितस्येत्यर्थः। पुराणादयो हि विधिवाक्यानां प्रवर्तकत्वेन धर्मपर्यवसानार्थं बहूपकुर्वन्ति वेदप्रामाण्यरक्षणेनेति विद्यास्थानान्युपबृंहकानि मन्यन्ते। ***सर्वज्ञकल्पस्य**=वेदेषु पुराणादिषु च विद्यास्थानेष्वनुक्तमिदानीन्तनं भावि च हस्तगतवराटिकमेव किंचिद् वेदेन न बोध्यत इति किंचिदूनं सर्वज्ञत्वं वेदस्येति भावः। तथा च सर्वज्ञकल्पकर्ता सर्वज्ञ इति युक्तमेव। सामान्यतोऽन्वयव्याप्तिसोदाहरणनिर्देशं वक्ष्यन् व्यतिरेकव्याप्तिमाह- ***यद्यदिति***।। यद्यदिति विभक्तिप्रतिरूपकमव्ययं यच्छब्दपर्यायम्। विस्तरशब्दस्य कर्मणि प्रत्ययान्तत्वेन विस्तीर्णपरत्वम्। तथाचाधिकार्थकमिति फलितम्। तथाचाधिकार्थकं यत् शास्त्रं यस्मात् पुरुषविशेषाद् भवति, स पुरुषस्ततोऽप्यधिकतरार्थज्ञानवानिति सामान्यव्याप्तिः प्रदर्शिता भवति। दृष्टान्तस्य पाणिने-र्व्याकरणाधिकज्ञानवत्त्वमुपपादयति- ***यथेति***। ज्ञेयैकदेशार्थमिति*।। पाणिनिना ज्ञातुं योग्येषु बहुषु केचनैव पाणिनिना स्वीये व्याकरणे सूत्रिताः, न तु सर्वं तदीयं ज्ञातमिति भावः। अपीत्यतः पूर्वं चेदित्यादिः। तथा च व्याकरणादिज्ञेयैकदेशार्थं चेदपि पाणिनिरधिकज्ञानवानिति योजना। *अधिकतरविज्ञानः=सर्वज्ञकल्प इत्यर्थः। तथा च पाणिनेरेव सर्वज्ञकल्पत्वे ब्रह्मणः षडङ्गव्याकरणाद्युपबृंहितर्ग्वेदादिकर्तुः सर्वज्ञत्वं कैमुतिकन्यायसिद्धमित्याह- ***किमु वक्तव्यमिति***।। पूर्वोक्तं महत्वमेव हेतुनिर्देशेन विवृणोति- ***अनेकशाखाभेदेत्यादिना***।। **प्रदीपवत्सर्वार्थावद्योतिनः***।। सर्वज्ञकल्पस्येत्यस्य विवरणम्- ***सर्वज्ञानाकरस्येति***।।

एतेन-अचेतनस्य वेदस्य कथं सर्वज्ञकल्पत्वमिति शङ्कायाः- अनवसरः। *ननु*-अर्थं बुध्वा शब्दरचना। तथा च वेदकर्तृत्वं प्रमाणान्तरेणार्थज्ञानमन्तरा न संभवति; सति चैवं प्रमाणान्तरपरतन्त्रत्वाद् वेदवाक्यानां पौरुषेयत्वमापद्येत। सति चैवमप्रमाणमपि प्रमाणं मत्वाऽपि वेदवाक्यानां रचनं संभवतीति ब्रह्मणोऽपि सर्वज्ञत्वं निरतिशयं बाधितं स्यात्। *एतेन*-सर्वशक्तिमपि बाधितम्। नहि सर्वशक्तिः प्रमाणान्तरमपेक्षत इति संभवतीत्याशङ्क्याह- ***अप्रयत्नेनैव लीलान्यायेनेति***।। तथाच गतकल्पीयं वेदं स्मृत्वोपदिशतीत्येतावतैवोपपत्तौ प्रमाणान्तरेणार्थमुपलभ्य वेदरचयितृत्वकल्पनानुपपत्तेरनेक-विद्यास्थानोपबृंहितर्ग्वेदादिकर्तृत्वम् ''धाता यथा पूर्वमकल्पयत्'' इति वचनानुसारेण तथैव

सर्वव्यवस्थापकत्वं वा सर्वज्ञत्वं सर्वशक्तिं च विना नोपपद्यत इति सर्वज्ञत्वमर्थसिद्धमेव।।

इदमत्र केचिन्मन्यन्ते-यत् शास्त्रयोनित्वपदेनार्थमुपलभ्य रचयितृत्वरूपं प्रणेतृत्वं न विवक्ष्यते; वेदपौरुषेयत्वापातात् अध्यापकवदुच्चारयितृत्वमात्रं तु प्रणेतृत्वं न सार्वज्ञसाधकम्, अप्रयोजकत्वात्। तावता हि महोपाध्यायसाम्यमेव स्यात्, वस्तुतस्तु-शास्त्रयोनित्वं सार्वज्ञविरुद्धम्। न हि स्वव्यतिरिक्तोपदेश्यपुरुषगोचरभ्रमं भ्रान्तिसिद्धशरीरादिकं च विनोच्चारयितृत्वं संभवति, इति शास्त्रयोनित्वमसार्वज्ञहेतुरेव स्यादिति।।

अत्रेदमद्वैतिनो मन्यन्ते-वेदकर्तृत्वं हीदं सकलवेदार्थज्ञानपूर्वकं वक्त्रन्तराधीनानुपूर्व्यनपेक्षसकलवेदोच्चारयितृत्वमेव। इदमेव हि भाट्टानामपि संमतम्। इदं च न महोपाध्यायादिसाधारणम्। जातिस्मराणामपि हि प्रथमजातौ वक्त्रन्तराधीनानुपूर्वकवेदोच्चारयितृत्वमेव, न तदनपेक्षमुच्चारयितृत्वमिति न दोषः।।

एतेन-अध्यापकेऽपि पूर्वसदृशानुपूर्वीरचयितृत्वसंभावात्, स्वेच्छया वेदरचयितृत्वस्य ब्रह्मण्यप्यभावात्, अध्यापकत्वादधिकस्य शास्त्रयोनित्वस्य तावताऽसिद्धत्वेन सार्वज्ञसाधनासंभवाद् महोपाध्यायेऽपि तत्तदर्थानुसन्धानपूर्वकसजातीयोच्चारणापेक्षोच्चारयितृत्त्वसत्त्वादित्यादि-परास्तम् ; अध्यापकमहोपाध्यायादीनां पूर्वोक्तरीत्या वक्त्रन्तराधीनानुपूर्वरिचयितृत्व सत्त्वेऽपि तदनधीनतत्कर्तृत्वाभावेनादोषात्। यद्यपि जगत्कारणस्येश्वरस्य भ्रान्तिसिद्धमस्मदादिशरीरसदृशं शरीरं न संभवति; एवमपि मायाख्यं शरीरं वर्तत एवेति न दोषः। अघटितघटनापटीयस्या मायाया विनाऽपि करचरणाद्यवयवं शरीरकार्यकारित्वं कथं न संभवति?

एतेन- लोक उच्चारणस्य भोगोत्पादकशरीरपटुकरणत्वव्याप्यतया दृष्टत्वेनाशरीरस्यापटुकरणस्य चेश्वरस्योच्चारणासंभवात्, अज्ञानविशेषरूपतया भवदभिमतमायाया उच्चारणप्रयोजकशरीररूपताया बाधितत्वात् कर-चरणाद्यवयवत्त्वस्यैव शरीरपदप्रवृत्तिनिमित्तत्वेन मायायास्तदभावेन शरीरत्वानुपपत्तेर्नेश्वरकर्तृत्वमिति- *अपास्तम्*; न हि करचरणाद्यवयववत्त्वस्यैव शरीरपदप्रवृत्तिनिमित्तत्वे वृक्षादिशरीरताव्यवहार उपपद्यते। न हि वृक्षादौ करचरणाद्यवयविशिषोपलब्धिः कस्यापि वर्तते। चेष्टा-वदन्त्यावयवित्वादिकं खलु शरीरपदप्रवृत्तिनिमित्तं सर्वेऽपि प्रामाणिका मन्यन्ते। आधिकारिकपुरुषाणां वसिष्ठादीनामिव मिथ्या शरीरस्यापि परमात्मनोऽप्युपदेशकत्वं संभवत्येव। आत्यन्तिकनिवृत्तिस्तु परमात्मनः सगुणस्य तदैव स्यात्, यदि तदुपाधिभूतसर्वजीवाश्रिताविद्याविनाशो भवेत्, इति न किंचिदनुपपन्नम्। इयान् विशेषः- यद् ईश्वरो न मायासंस्कारवशः, आधिकारास्तु तत्संस्कारवशा इति; आधिकारिकाणामपि हि विक्षेपशक्तिमात्रमवशिष्टं नावरणशक्तिरिति समानत्वात्।।

एतेन- ब्रह्मणो भ्रान्तत्वापत्तिरपि- परास्ता; तूलाविद्यापरिणामरूपभ्रमाख्यवृत्तिमत्त्वस्यैव भ्रान्तत्वप्रयोजकत्वादिति। अनेन ह्यावरणशक्तिसमवहितमायावृत्तिमत्त्वमेव भ्रान्तत्वव्यवहारप्रयोजकतया विवक्षितमिति जगत्कारणस्य ब्रह्मणो नोक्तव्यपदेश आपद्येत। किंच ब्रह्मणो भ्रान्तत्वापत्तिरिति? आद्य इष्टापत्ति:; जगत्कारणस्य मिथ्यात्वेनैवाद्वैतिभिरङ्गीकारात्। द्वितीये तु-'अहं भ्रान्त:' इति ब्रह्मण एव व्यवहार आपद्येतेति विवक्षितम्? उतास्मदादीनां ब्रह्म भ्रान्तमिति व्यवहार आपद्येतेति? उभयत्रापि बाधज्ञानानन्तरं वोक्तव्यवहार:? उत तत्पूर्वमिति? द्वितीयस्तु न युक्त; बाधज्ञानं बिना रज्जुसर्पादिज्ञानस्यापि भ्रान्तत्व व्यवहाराभावात्, अन्यथा बाधज्ञानात्पूर्वं भयकम्पाद्यनुवृत्त्यनुपपत्ते:। बाधज्ञानानन्तरन्तु भ्रान्तत्वव्यवहार इष्ट एवेति भ्रान्तत्वापादनमिदमापातरमणीयमेव। ईश्वरस्यातीतादिविषयमपि ज्ञानमद्वैत्यभिमतं साक्षिज्ञानरूपमेव; ''सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिभास्यमि'ति वचनात्। तत्र चेश्वरसाक्षी मायोपहितचैतन्यमेवेति परिभाषादावेव व्यक्तम्। तथा च विना मनोऽतीतादिपदार्थज्ञानमीश्वरस्य संभवत्येव। ईक्षत्यधिकरणभाष्ये ''नासाक्षिका वृत्तिर्जानातिनाऽभिधीयते'' इत्येवोक्तम्, नामनोनिबन्धनेति। सर्वथा चोपहितस्य जगत्कारणस्य शास्त्रयोनित्वेन सर्वज्ञत्वसाधनं न कथमप्यनुपपन्नम्।।

यत्तु विवरणे-ब्रह्म, वेदगतसर्वविषयप्रकाशनशक्त्याधार: वेदोपादानत्वात्, दीपगतप्रकाशनशक्त्याधार: दीपोपादानाग्निवत्, इत्युक्तम्, तदपि नानुपपन्नम्। सति चैवं ''*वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्। वेदाध्ययनसामान्यादधुनाध्ययनं या--'' इति वचनसिद्धपूर्वपूर्वक्रमापेक्षोच्चारविषयत्वाद्, वेदवाक्यानां वर्णनित्यत्वे पदनित्यवेऽपि वाक्यानामानुपूर्वीविशेषविशिष्टपदसमुदायरूपाणामनित्यत्वेन प्रावाहिकं नित्यत्वमीश्वरकृतत्वमुभयमुपपद्यत इति न विरोध:।।

एतेन-शास्त्रयोनित्वसूत्रेण शास्त्रस्यादिमत्त्वम्-''अत एव च नित्यत्वमि''ति सूत्रेण नित्यत्वं च परस्परविरुद्धं निर्दिष्टमिति शङ्काऽप्यनवसरेति-*सूचितम्*; एतादृशमेव शास्त्रयोनित्वं ब्रह्मणो विवक्षितमित्यत्र श्रुतिमेव प्रमाणयति-''***अस्य महत'' इति***।। अस्य ''**महतो भूतस्य नि:श्वसितमेतदृग्वेद**:'' इति श्रुते:, ''**यस्माद् महतो भूताद् अनेकशाखाभेदभिन्नादिरूपस्य सर्वज्ञानाकरस्यग्वेंदादे**: संभव:'' इति ज्ञायत इति शेष:। तस्य महतो भूतस्य निरतिशयं सर्वज्ञत्वं सर्वशक्तित्वं चार्थसिद्धमिति योजना।।

इति प्रथमवर्णकमिति।। ''तस्य महतो भूतस्ये'' ति वाक्यं विषय:। किमिदं वाक्यं वेदकर्तृत्वं ब्रह्मणो बोधयति? न वा? इति संशय:। ''वाचा विरूपनित्यये''ति श्रुत्या वेदस्य नित्यत्वावगमाद् न वेदकर्तृत्वमनेन वाक्येन ब्रह्मणो बोधयितुं शक्यत इति पूर्वपक्ष:। पूर्वपक्षप्रयोजनं निखिलजगत्कर्तृत्वेनेश्वरस्य सर्वज्ञत्वं बाधितमिति नेश्वरकर्तृत्वे ''यतो वे''ति वाक्यतात्पर्यमिति जीवकारणतायां प्रधानकारणतायां वैव

वेदान्तानां पर्यवसानमिति नाद्वैतसिद्धिरिति। सिद्धान्तस्तु-"अत एव च नित्यत्वमि" त्युपरितनेन सूत्रेण प्रावाहिकनित्यताबोधन एव "वाचा विरूपनित्यये"ति श्रुतेस्तात्पर्यव्यवस्थापनात्, "वाचा विरूपनित्यये"त्यस्य सामान्यतः प्रवृत्तस्य वर्ण-पदरूपशब्दविषयत्वसार्थक्ये वेदविषयत्वस्यापि कल्पने प्रमाणाभावाच्च "तस्य निःश्वसितमि"ति विशिष्यर्ग्वेदादिकर्तृत्वबोधकश्रुतिप्राबल्येन ब्रह्मणो वेदकर्तृत्वनिर्णय एवोचितः। सति चैवं वेदकर्तृत्वेन सर्वज्ञत्वादिसिद्ध्या "जन्माद्यस्य यतः" इति न जीवपरं प्रधानपरं वेति, न पूर्वोक्तप्रकारेणाद्वैतासिद्धिः॥

या तु चन्द्रिकायां श्रुतीनां परस्परविरोधपरिहाराय ब्रह्मातिरिक्तसर्वमिथ्यात्वस्य वियत्पादे वक्ष्यमाणतया तत्रैव शास्त्रयोनित्वस्य वक्तुं सुसङ्गतत्वेनेह तदुक्त्ययोग इति शङ्का कृता, सेयं परिमलेऽनूद्यैवं परिहृता-"पूर्वसूत्राक्षिप्तसर्वज्ञत्वदृढीकरणार्थतयेह वेदकर्तृत्वं व्यवस्थापनीयम्, तेनार्थाद् ब्रह्मणः सर्वकारणत्वमनुपपन्नम्; वेदस्य नित्यत्वात्, इति शङ्कानिवारणमपि लभ्यत इत्यानुषङ्गिकार्थकथनपरोऽयं श्लोकः। आनुषङ्गिके चार्थे न पृथक् सङ्गत्यपेक्षे"ति॥

अयं भावः-यथा रुद्रादिजगत्कारणत्वनिषेधं वक्ष्यमाणमपि सिद्धवत्कृत्य शास्त्रयोनित्वादिसूत्रं चन्द्रिकाकारादीनाम्, एवं वेदानित्यत्वं साधयिष्यमाणं सिद्धवत्कृत्य तत्कर्तृत्वेन सर्वज्ञत्वसाधनमेवात्र क्रियते, न तु वेदानित्यत्वम्, येन वियत्पाद एव संगतिः स्यात्। किं च "वेदानित्यत्वस्य वियत्पादसंगतिरि"त्यनेन किं विवक्षितम्-किं तत्रैव तदनित्यव्यपदेशो हेतुतयाऽधिकर्तव्य इति वा? साध्यतयाऽधिकर्तव्य इति वा? आद्ये न तत्र सङ्गतिः; तत्र तत्साध्यताया एव विवक्षितत्वात्। द्वितीये तु वियदाद्यनित्यत्वसाधनेन तस्यापि सिद्ध्या पृथक् तदनित्यत्वं कुत्रापि न वक्तव्यमिति शास्त्रयोनित्वसूत्रवैयर्थ्यमेवापादनीयम्, न तस्य वियत्पादे सङ्गतिः। अधिकाशङ्कानिवारणेन कथमपि तत्र सङ्गतिर्वर्तते, इति यदि तस्य तत्रैव करणापत्तिरित्युच्यते, तर्ह्यत्र हेतुत्वविवक्षया तन्निर्देशस्य को विरोधः? एवं च वियत्पादसंगतिर्हेतुतया विवक्षितस्य वेदानित्यत्वस्य कथमपि न भवतीति सूचितम्।

इति ब्रह्मसूत्रशाङ्करभाष्यटिप्पणे प्रदीपे शास्त्रयोनित्वाधिकरणे प्रथमं वर्णकं समाप्तम्।

ननु "जन्माद्यस्य यतः" इति सूत्रे सर्वभूतकारणत्ववर्णनेन वेदाकारणत्वमपि सूचितमेव। परन्तु-"अत एव च नित्यत्वमि"ति सूत्रेण स्वरूपतो नित्यत्वमपि वेदस्य साधितं स्यादिति शङ्कावारणार्थ "शास्त्रयोनित्वादि"ति शास्त्रस्यापि कार्यत्वं सिद्धवदनूद्यते, इति तन्महिम्ना वेदस्यापि कार्यकोटौ प्रवेशः सिद्ध्यतीति खलु प्रथमवर्णकेन विवक्षितम्। इदं च ज्ञेयस्य ब्रह्मणः प्रत्यगभेदविवक्षयैव गतार्थम्; अन्यथा हि वेद-तत्कारणयोरुभयोरपि ब्रह्मवत्सत्यत्वापत्त्या नाद्वैतसिद्धिः, इति व्यर्थमिदं योजनमित्यस्वरसादाह- ***अथवेति***॥ योनिपदस्य कारणपरस्यापि शास्त्रपदसामानाधिकरण्येन

बहुव्रीहिसमासाश्रयेण प्रमाणपरत्व एव पर्यवसानमिति सर्वसम्मतदिम्। तथाच शास्त्र प्रमाणकं ब्रह्मेति चोदनालक्षण इत्यत्रैव सूत्रार्थ इत्याह- *शास्त्रं योनिरिति*।।

ननु पूर्वाधिकरणेनापि ब्रह्मकारणतापरसर्ववेदान्तप्रतिपाद्यमित्येव व्यवस्थापितम्, अत्रापि तु तदेव प्रतिपाद्यत इति प्रकृतसूत्रवैयर्थ्यमापद्येतेत्याशङ्क्य, प्रकृते शास्त्रपदं न केवलकारणवाक्यपरम्, किंतु कर्मोपासनाकाण्डादिसाधारणसर्ववेदपरमिति ''सर्वे वेदा यत्पदमामनन्ती''ति सिद्धान्तव्यवस्थापनार्थमेवेदं सूत्रमित्यभिप्रायेण शास्त्रपदविवक्षितमाह- ***यथोक्त**मृग्वेदादीति*।। कर्मवाक्यानां परम्परया श्रवणविधिशेषतया एवं पदार्थशेषतया वा, उपासनावाक्यानामपि चित्तैकाग्र्यादिसम्पादनेन निदिध्यासनविधिशेषतया तत्पदार्थशेषतया वाऽन्वयात् सर्वेषां वेदवाक्यानां प्रत्यगभिन्ने ब्रह्मण्येव पर्यवसानम्। यथा च जीवपराणां कर्मकाण्डवाक्यानां देहातिरेकमात्रविवक्षया चरितार्थानामपि वस्तुगत्याऽऽनन्दा- दिरूपत्व एव तात्पर्यम्, एवं कारणवाक्यानामपि कल्पितकारणत्वादिपरित्यागेन चैतन्यस्वरूपमात्र एव पर्यवसानमित्यवान्तरतात्पर्यपराण्येव कर्मोपासनाविधयः सृष्टिवाक्यानि च। सति चैवं प्रत्यक्षसिद्धं देहात्मवादं निरस्य यथा कर्मकाण्डवाक्यानां प्रामाण्यम्, एवमनुमानसिद्धं कारणस्वरूपं निरस्य चैतन्यमात्रे तद् व्यवतिष्ठते। इदं च यथावत्स्वरूपाधिगमे शास्त्रमेव प्रमाणम्, नानुमानादि, इति निरूपणमन्तरा न संभवति, इति शास्त्रप्रामाण्याधिकरणमिदं प्रवर्तते। अन्यथाऽनुमानसिद्धं ''यतो वे'' त्यवान्तरवाक्यगम्यं च स्वरूपमेव यथावत्स्वरूपमिति शङ्का स्यात्, इति संसारिव्यतिरिक्तेश्वरास्तित्वमेव शास्त्रार्थ इति स्यादिति भावः। तमिमं भावमध्याहृतेन पदेन सूचयति- ***यथावत्स्वरूपाधिगम इति***।। पर्यवसितं वाक्यार्थमाह- ***शास्त्रादेवेति***।। नानुमानादित्यर्थः। अधिगम्यत इत्यस्यानन्तरं यथावदिति शेषः।।

तथा च यद् जन्मादिकारणमनुमानसिद्धं ब्रह्म, तत् शास्त्रादेव प्रमाणाद् यथावदध्यारोपापवादन्यायेनाधिगम्यत इति योजना। अनेन च ''यतो वा इमानि भूतानि जायन्ते'' इत्यादिवाक्यानि केवलमनुवादरूपाणि, निर्णायकं त्वानन्दवाक्यमिति, तावदन्तेन निर्णेयं स्वरूपमेव यथावद् ब्रह्मस्वरूपम्, न तु ''यतो वे''ति वाक्यमात्रसमधिगम्यमिति सूच्यते। इदमेव स्वमुखेनाह भाष्यकारः- ***शास्त्रमुदाहृतं पूर्वसूत्रे- ''यतो वा'' इत्यादीति***।। आनन्दवाक्यान्तमिति शेषः। *ननु* एवं सति भवन्मतेऽपीदं सूत्रं वितथमिति शङ्कते- *किमर्थमिति*।। निष्प्रयोजनमिदं सूत्रं स्यादित्यर्थः।।

सत्यं जन्मादिसूत्र इवाऽऽनन्दवाक्यान्तमेव विषयवाक्यमिति विवक्षायामेतत्सूत्रवैयर्थ्यमापद्यते, परन्तु नेदं कारणस्वरूपेऽवान्तरतात्पर्यमेवेति निर्णयं विना संभवति, इति तत्सूचनार्थमिदं सूत्रमपेक्षितमित्यभिप्रायेण समाधत्ते- ***उच्यत इति***।। महावाक्यमेव पर्यवसितार्थबोधकं शास्त्रं नाम; तस्यैव फलपर्यवसायित्वात्, नत्ववान्तरवाक्यमपि। तथाच ''जन्माद्यस्य यतः'' इति सूत्रे ''यतः''''अस्य''''जन्मादी''ति पदत्रयस्यैव

विद्यमानत्वात्, ''यतो वा इमानि भूतानि जायन्ते'' इत्यादि-सृष्टि-स्थिति-संहारपराण्येव वाक्यान्यवान्तराणि विषयवाक्यतया विवक्षितानीति शङ्का स्यात्, इति तद्वारणार्थमिदं सूत्रमित्याह- ***पूर्वसूत्राक्षरेणेति***॥ ***शास्त्रस्यानुपादानात्***॥ आनन्दवाक्यान्तस्यानुपादानात्। ***केवलमनुमानमिति***॥ अनुमानैकविषयसंसारिव्यतिरिक्तेश्वरस्वरूमात्रबोधककारणवाङ्मात्रमित्यर्थः। *उपन्यस्तम्= सूत्रकारतात्पर्यविषयः। यथाच संसारिव्यतिरिक्तसर्वज्ञेश्वरोऽनुमानस्य विषयः, तथा भाष्य एव प्रथमतो व्यक्तमिति न पिष्टमेव पेषयामः॥

अत्र भाष्यकारा अभिन्ननिमित्तोपादानपक्षपातिनोऽपि कारणस्वरूपं विशिष्टमनुमानगम्यमेव, चैतन्यांशस्तु निमित्तमेव; उपाधिभूतमायाया एवोपादानत्वम्, उपाधिगतमेवोपादानत्वं परस्पराध्यासाद् ब्रह्मनिष्ठमपि कल्प्यत इति सूचनद्वारा

''*अस्य द्वैतेन्द्रजालस्य यदुपादानकारणम्।

अज्ञानम्, तदुपाश्रित्य ब्रह्म कारणमुच्यते*॥''

इति वार्तिकसिद्धान्तं सूचयन्ति॥ तेन च विशिष्योपादानत्वसूचनार्थं न सूत्रान्तरापेक्षेति ज्ञाप्यते, यतस्तदपि कल्पितम्, इति न शास्त्रस्य तत्रापि तात्पर्यम्। इदमेव मतं भाष्यकारसूचितमादाय सिद्धान्तमुक्तावलीकारमतं सिद्धान्तलेशसंगृहीतं प्रवृत्तम्। ब्रह्मकारणताविषये मतान्तराणामपि ब्रह्मणि कारणत्वस्य कल्पितत्वेनैव प्रवृत्तत्वाद् नानेन मतेन विरोधो भाविता। सति चैवमभिन्ननिमित्तोपादानत्वबोधनार्थं ''शास्त्रयोनित्वादि''ति सूत्रमिति कल्पनाया अपि नावसरः॥

एतेन-बोधायनादिवृत्तिकाराणाम्-''जन्माद्यस्य यतः'' इति सूत्रगम्यं कारणमनुमानगम्यं कर्तृत्वविशिष्टमेव नोपादानस्वरूपमपि। ''यतो वा इमानि भूतानी''ति वाक्यमंशतोऽनुमानगम्यमंशतः श्रुतिगम्यं चोपादानं बोधयतीति न युक्तम्, इति नाभिन्ननिमित्तोपादानं ब्रह्मेति पूर्वपक्षनिरासार्थं शास्त्रयोनित्वादिति सूत्रम्, अनेन चाभिन्ननिमित्तोपादानमेवानुमानविरोधेनापि शास्त्रेण बोध्यत इति सूचनान्न कोऽपि दोषः'' इति विवरणं निष्प्रयोजनमिति सूच्यते। अयमेव पूर्वपक्षः श्रीभाष्यकारैः सिद्धान्ततया गृहीत इति, तदीयभाष्यत एव स्पष्टीभविष्यति। श्रीभाष्यमते हि ''जन्माद्यस्य यतः'' इति सूत्रेऽपि ''यतो वा इमानि भूतानि जायन्ते'' इति वेदान्तवाक्येनैव ब्रह्मस्वरूपनिर्णयात् तस्य चानुमानविरोधेनाभिन्ननिमित्तोपादान- बोधने तात्पर्यकल्पनाऽसंभवाद् व्यर्थमेवेदं सूत्रं पुनरुक्तम्; अथवा-''शास्त्रयोनित्वादि''ति सूत्रेणैव गतार्थत्वाद् व्यर्थं ''जन्माद्यस्य यतः'' इति वा सूत्रम्। अद्वैतमते त्वध्यारोपापवादन्यायेन ब्रह्मस्वरूपनिरूपणस्य विवक्षितत्वात् कारणवाक्यान्यध्यारोपमाश्रित्य, यथावच्चैतन्यमात्रवाक्यानि त्वपवादमाश्रित्य प्रवृत्तानीति सूचनार्थत्वादुभयसार्थक्यमवचनसिद्धमेव॥

यत्तु-माध्वानां ''शास्त्रयोनित्वादि''ति सूत्रेणानुमानिकेश्वरकारणतावादनिरासः, पाशुपतागमप्राप्तरुद्रकारणतावादनिरासश्च क्रियत इति मतम्, तत्र पूर्वस्मिन्नेव सूत्रे ''अस्यानुवादकत्वेऽपि श्रुतिप्राप्तकारणतापरत्वादि'' त्यादिनाऽऽनुमानिकेश्वरकारणतानिरासस्य श्रुत्यमूलागमप्राप्तरुद्रकारणता-वादनिरासस्य च सिद्धत्वाद् व्यर्थमेतदधिकरणमापद्यते। कुमारिलपादा हि ''हेतुदर्शनाच्चे''ति सूत्रे सांख्य-योग-पाशुपत-पाञ्चरात्राणां सर्वेषामपि त्रयोविद्भिरपरिगृहीतत्वादप्रामाण्यं स्पष्टमेव निरूपयन्ति, इति यदि शैवागमो न शास्त्रम्, तर्हि पाञ्चरात्रमपि न शास्त्रमेव, इति तदनुसारेण सिद्धान्तकरणं सर्वथा दुष्टमेव।। यथा च ''पत्युरसामञ्जस्यात्'', इति सूत्रेण पाशुपतमतस्य निरासः, तथा ''नैकस्मिन्नसंभवादि''ति पाञ्चरात्रस्यापि निरासः। शाक्तमतनिराकरणपरतयोक्ताधिकरणयोजनं तु शाक्तमतस्य महाजनापरिगृहीतत्वाद् निरर्थकम्। सर्वथा तु शास्त्रयोनित्वाधिकरणमिदमपवादप्रक्रियया ब्रह्मस्वरूपनिष्कर्षार्थमेवेति सिद्धम्।।

इति तृतीयं शास्त्रयोनित्वाधिकरणम्।।

पञ्चपादिका

अयमपरः प्रपञ्चकारणस्य ब्रह्मणः सर्वज्ञत्वे हेतुः।

अनेकनानाविधविषयविद्यास्थानोपबृंहितस्य वेदाख्यस्यापि शास्त्रस्य प्रपञ्चान्तः पातित्वात् तत एवं जन्म। न च तेनाविषयीकृतस्य सद्भावे प्रमाणमस्ति। अतः सर्वविषयत्वात्सर्वज्ञं तत्। कल्पप् प्रत्ययप्रयोगो भाष्ये बोद्धृत्वाभावादीषदपरिसमाप्त्या। ततश्च कारणं तद्विषयादप्यधिकतरग्रहणसमर्थं गम्यते। दृश्यते ह्यद्यापि शास्त्रकाराणां तथाभावः। *ननु* एवं सति बुद्धिपूर्वत्वात्सापेक्षं स्यात्।

न स्यात् ; ब्रह्मवदनादित्वात्।

कूटस्थनित्यत्वाच्च।। कथं पुनस्ततो जन्म? तत्परतन्त्रत्वात्, रज्जुसर्पवत्। तथा च श्रुतिः– "निःश्वसितमेतदि" ति । यथाऽपेक्षारहितैव लोके* निःश्वासप्रवृत्तिः, तथाऽस्यापीति न सापेक्षतादोषः।।

ननु एवं सति कथं सर्वज्ञता? तस्यैव ज्ञानशक्तिविवर्तात्मकत्वाद् नामप्रपञ्चस्य।

रूपप्रपञ्चस्यापि तदाश्रित्य विवर्तनात् तज्जन्मता; नासतः प्रादुर्भावात्।।

इति परमहंसपरिव्राजकादि-श्रीशङ्करभगवत्पादान्तेवासिवर-श्रीपद्मपादाचार्यकृतौ पञ्चपादिकायां ब्रह्मणः सर्वज्ञत्वनिरूपणं नाम षष्ठं वर्णक समाप्तम्।।

अथवा यथोक्तमृग्वेदादीत्यादिना सूत्रस्य प्रमाणप्रतिज्ञामर्थान्तरमाह; अपेक्षितत्वात्।। कथं पुनरेकस्य सूत्रस्यार्थद्वयम्? सूत्रत्वादेव। तथाच पौराणिकाः–

"अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।" इति।। विश्वतोमुखमिति नानार्थतामाह। अतोऽलङ्कार एव सूत्राणां यदनेकार्थता नाम।। *ननु* पूर्वसूत्रे शास्त्रमुदाहरता ब्रह्मावगमे शास्त्रं प्रमाणं प्रतिज्ञातमेव। सत्यमेतत्सूत्रबलेन तदुदाहृतम्; अन्यथा सूत्रे शास्त्रोपादानाभावादनुमानाशङ्कायाम्–**"यतः सर्वज्ञात्सर्वशक्तेः कारणाज्जगतो जन्मादि भवति, तद् ब्रह्मेति वाक्यशेषः"** इत्यस्योपस्कारस्याप्रमाणत्वप्रसङ्गः। प्रतिप्रपञ्चं पृथक्कारणजन्यताया अपि सम्भवात् सर्वज्ञत्व-सर्वशक्तित्वासिद्धेः, लोके च जगत्कारणे ब्रह्मशब्दप्रयोगादर्शनात्। अतो "जन्माद्यस्य यतः", "शास्त्रप्रमाणकमि" त्येतावदिदं सूत्रं सदसंदिग्धमनुमानशङ्कानिवृत्तेः पृथक्करणम्– प्रपञ्चान्तः पातिनः शास्त्रस्यापि हेतुत्वेन सर्वज्ञत्वं सुसम्पादमिति व्याख्यानान्तरेण कथयितुम्।।

इति परमहंसपरिव्रजकादि-श्रीशङ्करभगवत्पादान्तेवासिवर-श्रीपद्मपादाचार्यकृतौ पञ्चपादिकायां ब्रह्मणः शास्त्रप्रमाणकत्वं नाम सप्तमं वर्णकं समाप्तम्।

लक्षणप्रमाणाधीना हि वस्तुसिद्धिः। जगत्कारणं ब्रह्म किंप्रमाणकमित्यत आह-

सू० ॥ शास्त्रयोनित्वात् ॥ ३ ॥

यतः शास्त्रं योनिः प्रमाणम् अत एव जगज्जन्मादिलक्षणं ब्रह्म भवतीति शेषः। अत्र जगत्कारणं ब्रह्म शास्त्रैकगम्यमुत प्रमाणान्तरेणापि गम्यमिति सन्देहः ।

जगदिदं सावयवं कार्यमेव। तच्च वैचित्र्यगर्भितत्वेन स्वोचितकर्तृकमिति कश्चित्कल्पनीयस्सर्वज्ञत्वादिमान्। नासौ शास्त्रैकगम्य इति नास्मिन् शास्त्रस्य प्रामाण्यम्। शास्त्रस्य प्रमाणान्तराप्राप्तविषयत्वादिति पूर्वः पक्षः।

सिद्धान्तस्तु, जगत्कारण ब्रह्म वेदान्तशास्त्रैकगम्यं 'नावेदविन्मनुते तं बृहन्त' मित्यादिषु वेदान्तशास्त्रमन्तरेण ब्रह्मणो बोधासम्भवश्रवणात्। यदुक्तं सावयवत्वात्कार्यत्वसिद्धौ प्रपञ्चस्य कर्ता समुचितः कस्य एक इति। तदसत्। विचित्ररचनस्य गोपुरप्रासादादेर्बहुकर्तृकत्वदर्शनात्। तथा च नानुमानेनैककर्तृकत्वसिद्धिः व्याप्तिबलेन तस्य कर्मपारवश्यादिप्रसङ्गश्च। हेतोः पक्षधर्मताबलादनुमानेन जगतो विलक्षणैककर्तृकत्वसिद्धावपि निमित्तोपादानशक्तियुक्तैककर्तृकत्वसिद्धिर्नास्ति। ततो वेदान्तशास्त्रैकगम्यं तत्प्रमाणकं ब्रह्मेति सिद्धम्। अनेन सूत्रेण पूर्वाधिकरणप्रतिपादिजगत्कारणत्वसिद्ध्युपयोगि सर्वज्ञत्वं ब्रह्मणः शास्त्राणां वेदानां योनित्वाकारणत्वात्सिद्ध्यतीत्यपि प्रतिपाद्यत इति केचिदाहुः। सूत्रस्य सूचनात्मकस्यार्थद्वयाभिधाने श्लेषकाव्यवद्वाक्यभेदादिदोषाभावात्पुनरधिकरणान्तर-प्रस्तावः। 'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदस्सामवेद' इत्यादिः श्रूयतेऽस्य विषयः। ब्रह्मणो वेदकर्तृत्वं युक्तं न वेति सन्देहः। न युक्तमिति पूर्वपक्षः। 'वाचाविरूपनित्यये'त्यादेर्वाचो नित्यत्वप्रतिपादिकायाश्श्रुतेर्विरोधात्। वेदानां ब्रह्मकार्यत्वे पौरुषेयत्वादप्रामाण्यप्रसङ्गाच्च। तस्माद्ब्रह्मणो वेदकर्तृता कथमिति प्राप्ते ब्रूमः। युक्तमेव ब्रह्मणो वेदकर्तृत्वम्। 'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदस्समवेद' इत्यादिश्रुतेर्निश्वसितवद्वेदराशेरप्रयत्नेन ब्रह्मणः प्रादुर्भावावगमात् 'अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम्। आदिकर्ता कविस्साक्षाच्छूलपाणिरिति श्रुति'रिति परमेश्वरस्य सकलविद्याकर्तृत्वप्रतिपादनाच्च। सृष्टेः प्राक् स्वात्मनि विलीनानां वेदानां पूर्वपूर्ववर्णानुपूर्व्यनुरूपरचनया पुनः कर्ता भवति सर्वज्ञः परमेश्वरः। अत एव वेदानामपौरुषेयत्वमीश्वरकार्यत्वं च। येषां रागद्वेषादयस्तेषां वचनं प्रमाणम प्रमाणमपि भवति। निरस्तसमस्तदोषकलङ्कस्य निरुपप्लवनिरतिशयज्ञानप्रत्यक्षानुभूय-मानत्रैकालिकवस्तुविलासस्य स्वतः- प्रमाणस्य परमेश्वरस्य परमाप्तस्यावाप्तसमस्तकामस्य शिवस्य ब्रह्मणो वचनन्तु प्रमाणमेव भवति। 'ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानाम्' 'स नो देवश्शुभया स्मृत्या

संयुनक्तु 'इति हि परमेश्वरस्य सर्वविद्याप्रवर्तकत्वं शुभस्मृतिहेतुत्वं च श्रूयते।अतस्सर्ववस्त्ववशासकानां वेदानां परमेश्वरकर्तृकतया परमेश्वरस्य सर्वज्ञता निश्चीयते। अज्ञातस्य वक्तुमशाक्यत्वात्। यद्यपि सर्वगतस्य परमेश्वरस्य सर्ववस्तुसंयोगेन सर्वज्ञत्वं सिद्ध्यति तथापि सर्ववस्त्ववभासकानां वेदानां प्रणेतृता विशेषं दर्शयति यथा दीपस्स्वप्रभासंयुक्तेष्वपि रूपादिषु रूपमेव प्रकाशयति न रसादि तथा न परमेश्वर: किं तु स्वशक्तिसंयुक्तं सकलमपि प्रकाशयतीति। ननु, परमेश्वरस्य सर्वज्ञत्वं नाम वेदोक्तसकलपदार्थाभिज्ञत्वम्। तर्हि महर्षीणामपि वेदार्थवेदिनां सर्वज्ञत्वं सिद्धम्। किमत्र वैषम्यमिति चेन्न। तत्कर्तुरीश्वरस्याधिकं ज्ञानमस्ति। व्याकरणादेरधिकार्थविदां हि पाणिनिप्रभृतीनां तत्प्रणेतृत्वं दृश्यते। वेदश्च सर्वार्थावभासकोऽपि न सर्वं मुख्यत: प्रकाशयति किं तु किमपि लक्षणया किमपि सामान्येन किमपि विशेषेण। परमेश्वरस्सर्वसाक्षी सर्वं प्रत्यक्षयतीति वेदेश्वरयोरेतावद्वैषम्यमिष्यते। ननु, परमेश्वरस्यैव वेदकर्तृत्वमिति न नियम:। 'षड्ढोता वै भूत्वा प्रजापतिरिदं सर्वमसृजत ऋचो यजूँषि सामानी' त्यादिश्रवणाद्धिरण्यगर्भादेरपि तत्कर्तृत्वावगमादिति चेन्न। हिरण्यगर्भोत्पत्ते: प्रागपि वेदानां सद्भावात्। श्रूयते हि 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति। यस्सर्वदेवानामादिरस्य हिरण्यगर्भस्यापि कर्ता तस्मै सर्वान्वेदानुपदिशाति स एव सर्वाधिको वेदकर्ता परमदेशिक:। तथा हि श्रुत्याऽभिव्यज्यते। 'यो देवानां प्रथमं पुरस्तातिद्वश्वाधिको रुद्रो महर्षि:। हिरण्यगर्भं पश्यत जायमानं स नो देवश्शुभया स्मृत्या संयुनक्तु'। इति। महर्षिर्वेदकर्ता यस्सर्वज्ञत्वादिना विश्वस्माच्चिदचित्प्रपञ्चादधिको रुद: परब्रह्मभूतस्सर्वेषां देवानामिन्द्रादीनां प्रथममादिमं हिरण्यगर्भं ब्रह्माणं स्वसङ्कल्पेन प्रकृतेरुपादानात्मनो जायमानं सृष्टिकाले सर्वज्ञानोपायसकलवेदोपदेशरूपयाऽपश्यत् स परमदेशिको न: अस्मानपि सकलसंसारपाशमहानर्थनिवृत्तिहेतुभूतया परमामृतलक्ष्मीसमावेशपरानन्दप्राप्तिकारिण्या अत एव परममङ्गलरूपया वेदान्तसारसामरस्यसिद्धया स्मृत्या बोधकलया स्वविषयया संयोजयत्विति तात्पर्यम्। ततस्सकलवेदकर्तृत्वमीश्वरस्य सिद्धम्। वाचो नित्यत्वश्रुतिरीश्वरेण पूर्वसत्तानुवृत्त्या विहितत्वाद्वेदानामविरुद्धा। ततो वेदानामीश्वरप्रणीतत्वं नित्यत्वं चाविरुद्धमेव ।।

इति शास्त्रयोनित्वाधिकरणम् ।। ३ ।।

शिवार्कमणिदीपिका

सङ्गतिं प्रदर्शयन्नुत्तराधिकरणमवतारयति-**लक्षणेति।** न केवलं लक्षणेनेदमित्थमिति लक्ष्यनिर्धारणसिद्धिः। किं तु लक्ष्यस्वरूपे तस्य लक्षणरूपधर्मवैशिष्ट्ये च प्रमाणे सत्येव। अतस्तत्र प्रमाणप्रदर्शनार्थमुत्तराधिकरणमित्यर्थः। यद्यपि तस्मिन् 'यतो वे' त्यादिशास्त्रं प्रमाणमिति पूर्वाधिकरण एवोदाहृतं, तथाप्यानुमानिके जगज्जन्मादिकर्तरि तत्सिद्धार्थानुवादकं तद्वाक्यं न प्रमाणमिति तस्य पूर्वाधिकरणे तत्र प्रमाणतयोदाहरणमयुक्तमिति प्राप्ते शास्त्रप्रामाण्यादेव जगज्जन्मादिकारणं ब्रह्म न त्वनुमानप्रामाण्यादिति व्यवस्थापयितुमाक्षेपसङ्गत्येदमधिकरणमारभ्यत इति भावः ॥ सू० ॥ **शास्त्रयोनित्वात्** ॥ ३ ॥ सूत्रं व्याचष्टे-यत इति। 'यतश्शास्त्रं योनिः प्रमाणं अत' इत्यनेन शास्त्रस्य योनित्वं शास्त्रयोनित्वं तस्मादिति षष्ठीसमासाश्रयणेन शास्त्रस्य प्रामाण्यादित्यर्थे सूत्रं योजितम्। यतश्चैत्रः श्रुतशीलशाली अतस्तत्पुत्रोऽयं पूजनीय इत्युक्ते हि चैत्रस्य श्रुतशीलशालित्वादिति हेत्वर्थो लभ्यते। इह योनित्वशब्द गुणवाचित्वेऽपि 'पूरणगुणे'त्यादि(पा०२-२-११)सूत्रेण षष्ठीसमासनिषेधो न भवति। 'तदशिष्यं संज्ञाप्रमाणत्वा'दिति (पा०-१-२-५३-) सौत्रनिर्देशदर्शनात्। 'अत एवे'त्येवकारेण शास्त्रप्रामाण्यादेवायमर्थः सिद्ध्यति न त्वनुमानप्रामाण्यादिति सौत्रहेतुनिर्देशासामर्थ्यलब्धार्थो दर्शितः। **जगज्जन्मादिलक्षणं ब्रह्म भवतीति शेष इति।** अनेन पूर्वसूत्रार्थस्य साधनत्वेनान्वयो दर्शितः। एवमत्र सूत्रद्वयस्य साध्यहेतुपरतयैकार्थ्येऽपि प्रत्येकं निराकरणीयपूर्वपक्षसत्त्वेनाधिकरणभेदादस्य सूत्रस्य वर्णकांन्तरे साध्यान्तराध्याहाराच्च योगभेदः समाश्रितः। अत्र 'यतो वे'त्यादि वाक्यं ब्रह्मणि प्रमाणं न वेत्यधिकरणाङ्गसंशयं मनसि निधाय तदर्थसंशयमाह-**अत्रेति।** यदि ब्रह्म शास्त्रैकगम्यं तदा तत्र तत्प्रमाणं यदि प्रमाणान्तरेणाधिगम्यं तदा न प्रमाण' मप्राप्ते शास्त्रमर्थव 'दिति न्यायादिति संशययोः फलफलिभावः। तदर्थसंशयकोटिद्वयावलम्बनेन पूर्वपक्षसिद्धान्तप्रदर्शने कृते सत्यधिकरणाङ्गसंशयकोट्योस्तौ पर्यवसास्यते इति तु तयोरेव तौ प्रदर्शयिष्येते। ननु, कथमीश्वरः प्रमाणान्तरगम्य इति पूर्वपक्षस्यावकाशः। तत्र हि न प्रत्यक्षं प्रवर्तते। नाप्यनुमानम्। तद्व्याप्तलिङ्गाभावात्। नोपमानम् तस्य शक्तिसादृश्यान्यतरपरिच्छेदफलत्वात्। न लौकिकः शब्दः। तस्य प्रत्यक्षादिमूलप्रमाणापेक्षवात्। क्षितिगिरिसमुद्रादिरूपं जगत्सकर्तृकं कार्यत्वादिति सामान्यतोदृष्टानुमानं तत्र मानमिति चेन्न। अस्मदाद्यनुपलभ्यमानप्राक्कोटिषु क्षित्यादिषु कार्यत्वासिद्धेः। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथ्वी विश्वस्य धारिणी। अतः समुद्रा गिरयश्च सर्वे' इत्याद्यौपनिषद्वाक्यप्रमाणकं यदि कार्यत्वं तेषां समर्थ्येत तर्हि तत एवेश्वरस्यापि सिद्धिरिति न तदपेक्षमनुमानं तत्र प्रामाणीकर्तुमर्हमित्याशङ्क्य हेत्वन्तरेण तेषां कार्यत्वसिद्धिमाह-**जगदिदमिति।** ननु, सावयवत्वमवयवारब्धत्वं चेत्तस्याप्यसिद्धिः स्यात्। द्रव्यसमवेतद्रव्यं चेत् तद्द्रव्यसमवेतजात्यादेरिवाकार्यत्वेनाप्युपपन्नमप्रयोजकम्। अस्यामवयव इति व्यवहारप्रयोजकेन

स्वरूपसम्बन्धविशेषणावयवत्वं चेत्तदप्यप्रयोजकम्। कालस्यावयवः क्षणलवादिरित्यादिव्यवहारप्रयोजकक्षणलवादिसम्बन्धवति कालादौ व्यभिचारि च तत्। तस्मात्सावयवत्वं न कार्यत्वसाधकमित्याशङ्क्य तस्य तत्साधकतां सूचयितुं सावयवं कार्यमेवेत्यवधारणम्। यदेकदेशाः पटैकदेशाः तन्तव इव परस्परवियोजनार्हाः तदिह सावयवं विवक्षितम्। भूभूधरसमुद्राद्येकदेशाः मृच्छिलासलिलादिरूपाः खननटङ्कनिर्भेदधरोद्धरणादिव्यापारैः परस्परवियोजनार्हा इति सम्प्रतिपन्नमेतत्। तथाभूतं चावश्यं कार्यं भवेदेव। वियोजनव्यापारेण तत्तदेकदेशरूपाणामवयवानां विभागजननस्य विभज्यमानानां प्राचीनसंयोगनाशस्य नश्यतां संयोगानां सादित्वस्य साद्यवयवसंयोगानन्तरभावित्वनियतस्यासमवायिकारणसंयोगनाशेन नश्यतश्च सावयवस्य सादितायाश्चानिवार्यत्वादिति भावः। नन्वेवं सति भूभूधरादिकं सकर्तृकं कार्यत्वादित्यनुमानतो नास्मदादिविलक्षणः तत्कर्ता सिद्ध्येत्। भूगोलकादिष्वस्मदादिकर्तृकस्य खननपूरणादिरूपस्य वियोजनसंयोजनव्यापारस्य सर्वदा सत्त्वात्। अवयववियोजने सति महापटध्वंसजन्यखण्डपटन्यायेन भूगोलकान्तराद्युत्पत्तेरवश्यम्भावात्। अवयवान्तरसंयोजने सति पूर्वसिद्धेऽवयविन्यागन्तुकानामवयवानां कारणत्वासम्भवेन पूर्वसिद्धावयविनागन्तुकावयवैश्चावयव्यन्तरोत्पादनस्यावश्यं भावाच्च। ततश्च पूर्वतन्तुवियोजनतन्त्वन्तरसंयोजनकर्तारस्तदनन्तरभाविनः पटस्येव खननपूरणादिकर्तारस्तदनन्तरभाविनो भूगोलकादेः कर्तारः स्युरिति तैः सिद्धसाधनेन दुष्टमिदमनुमानं कथमस्मदादिविलक्षणं सर्वज्ञत्वादिलक्षणयुक्तं कर्तारं साधयेदित्याशङ्क्याह-**तच्चेति।** अतिविचित्रं महद्गोपुरप्रकारसौधादिकमेकदेशे किञ्चिच्छिलादिवियोजनसंयोजनाभ्यां कैश्चिन्नवीक्रियमाणं पश्यन्तस्तद्गतसकलविचित्रसन्निवेशनिर्माणोचितज्ञानशक्त्यादियुक्तं तदादिकर्तारमनुमिमाना दृश्यन्ते। न तेषामनुमानमेकदेशे संयोजनवियोजनकर्तृभिः सिद्धसाधनेन दुष्टं जायते। तद्वदिहापि विविधविचित्रसन्निवेशस्य क्षित्यादेस्तदुचितादिकर्त्रनुमानं नास्मदादिभिः सिद्धसाधनेन दुष्टं जायते घटादिकमिवास्मदादिकर्तृकत्वेन सम्प्रतिपन्नं क्षित्यादिकमपहाय आद्यक्षित्यादिमात्रस्याङ्कुरादेश्च पक्षीकरणसम्भवात्। 'ततस्तत्तदनन्तविधिविचित्रसन्निवेशरचनानुकूलज्ञानशक्तियुक्तस्यास्मदादिविलक्षणस्य तत्कर्तुः सिद्धिर्भवत्येवेति भावः। तच्चानुमानमेव नैयायिकाः कल्पयन्ति। अदृष्टद्वारकस्वोपादानगोचरजन्यकृतिजन्यभिन्नानि समवेतानि जन्यानि स्वजनकादृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि भावकार्यत्वात् घटवदिति। अत्र जन्यमात्रपक्षीकरणे ध्वंसस्यापि पक्षत्वेन तस्मिन्नुपादानघटितसकर्तृकत्वरहिते साध्यस्य बाधस्स्यादिति तन्निवृत्त्यर्थं समवेतानीति विशेषणम्। एवमपि पक्षतावच्छेदकस्य घटादिसाधारण्येन तदंशे सिद्धसाधनं स्यात्तन्निवृत्त्यर्थं जन्यभिन्नानीति विशेषणम्। तावत्युक्ते क्षित्यादेरपि जन्यत्वेनाश्रयासिद्धिः स्यात्। तन्निवृत्त्यर्थं जन्यकृतीति। एवमपि शब्दफूत्कारादेः पक्षता न स्यात्। तस्य शब्दादिनिमित्तभूतमृदङ्गताल्वादिगोचरास्मदादिनिष्ठजन्यकृतिजन्यत्वात्तस्यापि पक्षत्वेन

सङ्ग्रहः कार्य एव। अन्यथा पक्षातिरिक्ते हेतुमति तस्मिन्साध्यसन्देहेन सन्दिग्धानैकान्तिकतापत्तेः तत्सङ्ग्रहार्थं स्वोपादानगोचरेति। तस्य निमित्तभूतमृदङ्गादिगोचरजन्यकृतिजन्यत्वेऽपि स्वोपादानगोचरजन्यकृतिजन्येभ्यो घटादिभ्यो भिन्नत्वमस्त्येव। अस्मदादिनिष्ठजन्यकृतेस्तदुपादानातीन्द्रियाकाशादिगोचरत्वासम्भवात्। एवमपि क्षित्यङ्कुरादिषु पक्षतावच्छेदकं सन्दिग्धं स्यात्। यागदानाद्युपयुक्तहविर्देवादीनामपि दैवाद्यागदानादिप्रभादृष्टजन्यक्षित्यङ्कुराद्युपादानानुप्रवेशसम्भवेन हविर्देयादिगोचरकृतीनामुपादानगोचरत्वसम्भवात्। काल्या तपश्चरणेन यन्नीलरूपं परित्यज्य गौररूपंप्राप्तं तस्य च पक्षता न स्यात्। तस्य स्वोपादानभूतशरीरगोचरतपश्चर्यानुकूलजन्यकृतिजन्यत्वेन तद्भिन्नत्वाभावात्। तत्सङ्ग्रहार्थम् अदृष्टद्वारकेति। हविर्देयादिगोचरकृतिः कालीकृततपश्चादृष्टद्वारैव तत्तज्जनिकेति तत्सङ्ग्रहः। साध्ये ज्ञानचिकीर्षाकृतीनां मध्ये एकैकनिर्देशमपहाय त्रितयनिर्देशो यावदभिमतविशेषणगुणवत्त्वेनेश्वरसिद्ध्यर्थः। केवलं कृतिमज्जन्यत्वे साध्ये चिकीर्षावज्जन्यत्वं ज्ञानवज्जन्यत्वं वा सन्दिग्धोपाधिः स्यात्। एवं केवलं चिकीर्षावज्जन्यत्वे ज्ञानवज्जन्यत्वे वा साध्ये कृतिमज्जन्यत्वादिकं यथायथं सन्दिग्धोपाधिः स्यादिति तद्व्यावृत्त्यर्थश्च। अपरोक्षपदमुपादानज्ञानस्यापरोक्षज्ञानत्वेनैव हेतुत्वाद्व्यापकत्वसिद्धियौपयिकम्। एवमपि सिद्धसाधनम्। क्षित्यादेरपि स्वजनकादृष्टजनकयत्किंचिदुपादानभूतयागीयहविरादिगोचरापरोक्षज्ञानचिकीर्षाकृतिमदस्मदादिजन्यत्वात् तद्वारणाय स्वजनकादृष्टोत्तरेति ज्ञानादिवशिेषणम्। न च क्षित्यादिजनकादृष्टोत्तरयत्किञ्चिदुपादानगोचरेदानीन्तनज्ञानादिमताऽ स्मदानिना सिद्धसाधनम्। ज्ञानादीनामपि जनकत्वस्य विवक्षितत्वात्। न्यायभाष्यादिषु सकर्तृकत्वनिरुक्तावुपादानवद्दर्शनात् ध्वंसव्यावृत्तं सकर्तृकत्वमभिमतमिति तदनुरोधेन पक्षसाध्यहेतुषु समवेतोपादानगोचरभावपदानीति। अत्रेदं विचारणीयम्। उपादानगोचरत्वप्रवेशोन कथं साध्यस्य ध्वंसाव्द्यावृत्तिः। ध्वंसस्यापि रूपाद्युपादानघटादिगोचरापरोक्षज्ञानचिकीर्षाकृतिभिर्मुद्गरपातादिहेतुभिर्जन्यत्वात्। न चात्र पक्षविशेषण इव स्वोपादानगोचरत्वं विवक्षितुं शक्यम्। स्वोपादानगोचरजन्यकृतिजन्यभिन्नत्वस्य पक्षविशेषणतया भिन्नपदोपात्तान्योन्याभावप्रतियोगिविशेषणत्वेन तस्य प्रसिद्धिसम्भवेऽप्यत्रान्यविशेषणत्वाभावेन क्षित्याद्युपादानगोचरत्वरूपतापर्यवसायितया तथाभूतापरोक्षज्ञानद्यप्रसिद्ध्या साध्याप्रसिद्धिप्रसङ्गात्। न च वाच्यं मुद्गरपतनानुकूला कृतिरेव ध्वंसजनिका न तु ज्ञानं चिकीर्षा वा। ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वनियमादिति। घटतद्ध्वंसजननयोः कुलालघटध्वंसगतापरोक्षज्ञानचिकीर्षाकृतीनामन्वयव्यतिरेकतौल्येनोक्तनियमस्याप्रामाणिकत्वात्। प्रामाणिकत्वे वा ज्ञानदित्रयजन्यत्वाभावादेव ध्वंसव्यावृत्तसकर्तृकत्वलाभेन तद्व्यावृत्त्यर्थोपादानगोचरत्वविशेषणवैयर्थ्यात्। न चोपादानगोचरत्वघटितधर्मावच्छिन्नज्ञानादिनिष्ठजनकताप्रतियोगिजन्यताश्रयतवं विवक्षितमिति नोक्तदोषद्वयमिति वाच्यम्। घटादिषु लाघवान्मृदादिगोचरत्वेनैव ज्ञानादीनां जनकतयोपादानगोचरत्वस्य ज्ञानादिनिष्ठजनकतावच्छेदक-

कोट्यप्रवेशात्। न च ज्ञानादिनिष्ठविशेषकारणतावच्छेदके मृदादिगोचरत्वप्रवेशोऽपि सामान्यकारणतावच्छेदके उपादानगोचरत्वप्रवेशः स्यादिति वाच्यम्। ध्वंससाधारणकार्यसामान्यकारणतावच्छेदके तत्प्रवेशाभावात्। भावकार्यसामान्यातावच्छेदके उपादानगोचरत्वप्रवेशः स्यादिति चेन्न। यत्किञ्चिदुपादानगोचरत्वस्य ध्वंसकारणज्ञानादिष्वतिप्रसक्तत्वेन तत्तदुपादानगोचरत्वस्याननुगमेन च तत्रापि तत्प्रवेशासम्भवात्। किं च तत्प्रवेशो स्वजनकादृष्टोत्तरेति विशेषणं व्यर्थं स्यात्। हविरादिगोचरज्ञानादीनामुपादानगोचरत्वेन क्षित्यादिजनकत्वाभावादेवार्थान्तरवारणासम्भवात्। तस्मादुपादानगोचरविशेषणं तावद्व्यर्थत्वादयुक्तम्। तथैव स्वजनकादृष्टोत्तरेति विशेषणमप्ययुक्तम्। अर्थान्तरवारणैकप्रयोजनकस्य तस्य व्याप्तिग्रहानौपयिकत्वात् बीजसामान्येन व्यापकेऽपि व्यर्थविशेषणत्वस्य दोषत्वात्। अपि च स्वजनकेत्यत्र स्वपदं पक्षीकृतक्षित्यादिपरं दृष्टान्तीकृतघटादिपरं वा वाच्यम्। समभिव्याहृतपरत्वे व्यापकतावच्छेदकस्यैकस्यालाभेनाननुगमप्रसङ्गात्। तत्र पक्षद्वयेऽपि यावत्स्वजनकादृष्टोत्तरत्वं विवक्षितमुत यत्किञ्चित्स्वजनकादृष्टोत्तरत्वं वा। आद्ये दृष्टान्तस्य साध्यवैकल्यं स्यात्। यावत्क्षित्यादिजनकादृष्टोत्तरत्वस्य यावद्घटादिजनकादृष्टोत्तरत्वस्य वा कस्याञ्चिदपि घटादिजनकज्ञानादिव्यक्तौ सम्प्रतिपत्त्यभावात्। द्वितीये क्षित्यादिजनकादृष्टजनकहविरादिगोचर-ज्ञानादिमतास्मदादिना सिद्धसाधनं स्यात्। सर्वस्या अपि क्षित्यादिजनकादृष्टजनकज्ञानादिव्य-क्तेरनादिकार्यप्रवाहान्तःपातियत्किञ्चित्क्षित्यादिघटादिजनकादृष्टोत्तरत्वात्। न च पक्षतावच्छेदकावच्छिन्न-क्षित्यादिमध्ये दृष्टान्तत्वाभिमतघटादिमध्ये वा यत्र व्यक्तौ यदा साध्यमुपसंहियते तदा तत्परत्वं स्वपदस्य वक्तुं शक्यम्। तथा सति स्वपदस्य पक्षदृष्टान्तान्यतरपरत्वस्याप्यननुगमतादवस्थ्यप्रसङ्गेन तस्यादृष्टद्वा-रकस्वोपादनगोचरजन्यकृतिजन्यभिन्नसमवेतजन्यत्वरूपपक्षतावच्छेदकावच्छिन्नसामान्यपरत्वस्यादृष्टद्वारक-स्वोपादानगोचरजन्यकृतिजन्यत्वरूपदृष्टान्तगतधर्मावावच्छिन्नसामान्यपरत्वस्य वा वक्तव्यत्वात्। न च स्वपदं किञ्चिद्घटव्यक्तिपरमङ्गीक्रियते। तज्जनकादृष्टोत्तरकुलालज्ञानादिजन्यत्वं तत्र सम्प्रतिपन्नमिति स एव दृष्टान्तो भविष्यतीति वाच्यम्। तथा सति तत्पूर्वकालोत्पन्नेषु हेतुमत्सु साध्यस्य सन्दिग्धतया सन्दिग्धानैकान्तिकतापत्तेः। पक्षादन्यत्र हेतुमति साध्यस्य सन्देहस्य दोषत्वे च क्षितिमात्रपक्षीकरणेनाप्यनुमानप्रवृत्तिसम्भवेन यावदीश्वरमात्रकर्तृकत्वाभिमतसङ्ग्राहकपक्षतावच्छेद-कनिर्वचनप्रयासवैयर्थ्यापत्तेः। एतेन दृष्टान्तीकृतघटव्यक्तिव्यतिरक्तं सर्वं कार्यं पक्षीकृतमिति न सन्दिग्धानैकान्तिकत्वदोषापत्तिः। पक्षे साध्यसन्देहस्यादोषत्वादित्यपि शङ्का निरस्ता। तथा सत्येतद्घटव्यतिरिक्तसमवेतजन्यानीत्येव पक्षीकर्तव्यत्वेनादृष्टद्वारकेत्यादिपक्षतावच्छेदकनिर्वचनप्रयास-वैयर्थ्यापत्तेः। तस्मात्स्वजनकादृष्टोत्तरेत्यपि विशेषणमयुक्तम्। ननु तर्हि स्वजनकादृष्टोत्तरेत्यस्य स्थाने अदृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नेति विशेषणं क्रियते। हविरादिगोचरज्ञानादिन्यदृष्टप्रागभावव्यप्य-प्रागभावप्रतियोगिनि यत्र तेषां प्रागभावस्तत्र तत्कार्यादृष्टप्रागभावावश्यंभावादिति तद्व्यवच्छेदः।

अतस्तज्जन्यत्वेन सिद्धसाधनम्। यद्यप्यदृष्टाजनकेति ऋजुविशेषणेनापितद्व्यवच्छेदः कर्तुं शक्यः। तथाप्यत्र सिसाधयिषितानामीश्वरज्ञानादीनादृष्टजनकत्वाङ्गीकारात् बाधस्स्यात्स माभूदित्येवं विशेषणमिति चेन्न। कुलालादिगतघटादिजनकज्ञानादीनामपि तन्निष्ठविहितनिषिद्धक्रियाजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वेन दृष्टान्तत्वाभावप्रसङ्गात्। अथोच्येत स्वज्जन्यत्वमदृष्टे विशेषणं क्रियते। एवं च यान्यदृष्टजनकानि जन्यानि न तेषामेव स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वं कुलालादिकृतीनां त्वन्यजन्यादृष्टप्रागभावाव्याप्यप्रागभावप्रतियोगित्वमिति न दृष्टान्तस्य साध्यवैकल्यम्। न चैवं सति तीर्थाभिगमनतीर्थस्नादिजनकज्ञानादीनामदृष्टजनकानां स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगितया तद्भिन्नत्वाभावेन तथाभूतज्ञानादिजन्यत्वसाध्यसम्प्रतिपत्तिस्तीर्थादिगमनादिषु नास्तीति तेषु सन्दिग्धानैकान्तिकत्वापत्तिः। तीर्थाभिगमनादिकारणज्ञानादीनां तेषु कार्येष्वदृष्टद्वारकत्वेऽपि स्वर्गादिकार्यान्तरेष्वदृष्टद्वारकत्वेन तेषामदृष्टद्वारकस्वोपादानगोचरजन्यकृतिजन्यभिन्नतया पक्षान्तर्भावेन पक्षे साध्यसन्देहस्यादोषत्वादिति चेन्न। स्वपदस्य यद्वस्त्वदृष्टाजनकत्वेन गृह्यते तदा तत्परत्वेऽननुगमप्रसङ्गेन व्यवस्थितैकार्थपरत्वे वक्तव्ये पक्षीकृतक्षित्यादिजनकादृष्टाजनकानन्तहविरादिगोचरज्ञानादिमध्ये यद्ज्ञानादित्रयं स्वशब्देन ग्राह्यं ततोऽन्येषां स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नत्वेन तज्जन्येषु क्षित्यादिषु सिद्धसाधनं प्रसज्यत इत्यत्रापि पक्षे स्वपदार्थानुप्रवेशप्रयुक्त दोषानतिक्रमणात्। एतेनादृष्टप्रागभावेत्यादौ स्वजनकत्वमदृष्टविशेषणं कुलालगतज्ञानादीनांतद्गतविहितनिषिद्धक्रियान्तरजन्यादृष्टप्रागभावव्याप्यप्रागभाव- प्रतियोगित्वेऽपि घटजनकादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वं नास्ति। यद्यपि घटकर्तुः कुलालस्यैव घटभोक्तृत्वे घटजनकादृष्टप्रागभावं प्रति तद्गतघटजनकज्ञानादिप्रागभावानां दैशिकव्याप्तिरस्ति। तथापि कालिकव्याप्तेरिह विवक्षितत्वान्न दोष इत्यपि शङ्का निरस्ता। स्वपदार्थाननुगमदोषानिस्तारात् सर्वनाम्नां समभिव्याहृतपरत्वस्य 'तेन रक्तं रागा'दित्यादिप्रयोगेषु व्युत्पत्तिसिद्धत्वात्तदर्थाननुगमो न दोष इति चेत्सत्यम्। शब्देन बोधने तथा इहानुमानेनेश्वरं सिषाधयिषसि तत्र व्यापकतावच्छेदकाननुगमो दोष एव। तस्मादिदमनुमानमयुक्तमिति। अत्र ब्रूमः। ध्वंससाधारणमेवात्र सकर्तृकत्वं साध्यम्। अन्यथा जगज्जन्मस्थितिलयकारणत्वश्रुतेरनुमानसिद्धार्थानुवादकत्वपूर्वपक्षानिर्वाहात्। ततश्च पक्षे समवेतपदं साध्ये उपादानगोचरपदं हेतौ भावपदं न नोपादेयम्। एवं च ध्वंसवच्छब्दफूत्कारादिकमप्यस्मदादिकर्तृकमिति तत्सङ्ग्रहाय पक्षे स्वोपादानगोचरपदमपि नोपादेयम्। अदृष्टप्रागभावेत्यादिविशेषणस्यादृष्टद्वारकत्वमर्थः। एवं च हविरादिगोचरज्ञानादीनां क्षित्यादिकार्येष्वदृष्टद्वारकत्वात् न तद्वतास्मदादिना सिद्धसाधनम्। नचैवं सति बाधः ईश्वरज्ञानादीनामप्यदृष्टद्वारकत्वात् तज्जन्यस्तज्जन्यजनको व्यापार इति तल्लक्षणाङ्गीकारादिति वाच्यम्। यद्धर्मावच्छिन्नं प्रति जनकीभूतो व्यापारी तज्जननाय तद्धर्मावच्छिन्नं यं व्यापारमपेक्षते तस्यात्र द्वारपदेन विवक्षितत्वात्। ईश्वरज्ञानादीनां कार्यत्वावच्छिन्नजननार्थं तत्तददृष्टपेक्षायामप्यदृष्टव्यापीश्वरज्ञानजन्यतावच्छेदककार्यत्वावच्छेदकत्वेन तदनवच्छिन्नत्वाभावात्। न चैवमर्थान्तरवारणैक-

प्रयोजनस्यादृष्टद्वारकत्वविशेषणस्य व्याप्तिग्रहानौपयिकत्वाद्वैयर्थ्यदोषः व्यापकविशेषणे वैयर्थ्यबीजाभावात् साध्यनिरूपिता हेतुनिष्ठा व्याप्तिर्हेतुगतलघुधर्मावच्छेदेन ग्राह्येति सा धूमत्वादिलघुधर्मावच्छेदेनैव गृह्यते न तु नीलधूमत्वादिगुरुधर्मावच्छेदेनेति हि व्याप्यविशेषवैयर्थ्ये बीजम्। न चैवं व्यापकविशेषणे वैयर्थ्यमापादयितुं शक्यम्। यतस्तत्र साधनसमानाधिकरणात्यन्ताभावप्रतियोगितायामनवच्छेदत्वमेव ग्राह्यम्। न त्ववच्छेदकत्म्। न चानवच्छेदकत्वग्रहे गौरवं विरोधि। तथा सति गुरुधर्मस्यावच्छेदकत्वप्रसङ्गाभावात्। न चात्यन्ताभावगर्भव्याप्तौ व्यापकतावच्छेदके अनवच्छेदकत्वस्य ग्राह्यत्वेऽप्यन्योन्याभावगर्भव्याप्तौ साधनसमानाधिकरणमन्योन्याभावप्रतियोगितानवच्छेदकतायां साध्यगतायामवच्छेदकत्वं ग्राह्यम्। तद्ग्रहे च गौरवं विरोधीति व्यापकेऽपि व्यर्थविशेषणता स्यादिति वाच्यम्। तत्रापि साधनसमानाधिाकरणान्योन्याभावप्रतियोगितावच्छेदकतायामनवच्छेकत्वस्यैव व्यापकतावच्छेदके ग्राह्यत्वात्। गन्धपृथिवीत्वव्याप्तौ तत्तद्गन्धत्वाकारेण साधनसमानाधिाकरणान्योन्याभाव-प्रतियोगितावच्छेदकेषु गन्धेषु तद्भिन्नत्वस्याभावेन गन्धत्वेऽपि तदवच्छेदकत्वासम्भवात्। न चान्योन्याभावस्य व्याप्यवृत्तित्वनियमात् तत्तद्गन्धत्वाकारेणावच्छेदकेषु गन्धेषु गन्धत्वाकारेणावच्छेदकभिन्नत्वासम्भवेऽप्यवच्छेदकत्वात्यन्ताभावस्सम्भवति। तस्याव्याप्यवृत्तित्वा-भ्युपगमादिति तथाभूते साधनसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वे व्यापकतावच्छेद-कस्यावच्छेदकत्वं ग्राह्यमिति वाच्यम्। अवच्छेदकत्वग्रहणसापेक्षत्वावच्छेदकत्वात्यन्ताभावापेक्षया तन्नैरपेक्ष्येणावच्छेदकान्योन्याभावस्य लघूपस्थितिकतयावच्छेदकभिन्नत्वरूपस्यैवानवच्छेदकत्वस्य व्याप्तिशरीरे प्रवेशयितुमुचितत्वात्। तस्मात्पक्षद्वयेऽप्यनवच्छेदकत्वमेव व्यापकावच्छेदके ग्राह्यमिति न व्यापके व्यर्थविशेषणताबीजम्। अत एव व्यापके व्याप्तिग्रहानौपयिकान्यर्थान्तरवारणेन स्वाभिमतसाध्यसिद्धिप्रयोजनानि विशेषणानि कथकसम्प्रदाये सर्वेऽपि वादिनो निवेशयन्ति। एतेनेदमपि निरस्तम्। ज्ञानेच्छाकृतिषु कारणतावच्छेदकेनादृष्टद्वारकत्वमपि निवेशनीयम्। गौरवात्। न च तथा सत्यदृष्टद्वारकज्ञानादिसत्त्वात् कुलालज्ञानादिकं विनापि घटादिकार्योत्पत्तिप्रसङ्गः। घटादिकार्यविशेषे मृदादि तत्तदुपादानगोचरादृष्टद्वारकजन्यज्ञानादीनां विशेषकारणतया विशेषकारणरहितसामान्यकारणमात्रेण कार्यापादनायोगादिति अदृष्टद्वारकत्वस्य ज्ञानादिगतकारणतावच्छेदकत्वेऽप्यर्थान्तरवारणाय व्यापकशरीरे निवेशस्योपपादितत्वात्। तस्माददृष्टद्वारकजन्यकृत्यजन्यानि जन्यानि अदृष्टाद्वारकापरोक्षज्ञान-चिकीर्षाकृतिमज्जन्यानि जन्यत्वात्। यद्यज्जन्यं तत्तददृष्टद्वारकापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यं यथा घटादीत्यनुमानादीश्वरसिद्धिरप्रत्यूहा। नन्वनुमानादपि तत्सिद्धिः। तावता शास्त्रस्य प्रामाण्यं न हीयते। अनुमानवत्तस्यापि तत्प्रमाजननसामर्थ्यावैकल्यादित्याशङ्क्याह-**नासाविति।** शास्त्रैकगम्य एवार्थे शास्त्रस्य प्रामाण्यं न तु प्रमाणान्तरविषयेऽपि तत्र शास्त्रवैफल्यादिति भावः ननु, स्यादेतत्। प्रमाणान्तरविषयेऽपि

शास्त्रस्य प्रामाण्यं दृश्यते। यथा व्रीहीनवहन्तीति शास्त्रस्यावहनने यथा वा 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त' इति शास्त्रस्य मन्त्राश्वाभिधानीसम्बन्धे पुरोडाशसाधनतयोपात्तेषु व्रीहिषु तुषविमोकार्थं शास्त्रेण विधीयमानमवहननं हि तत्र लोकसिद्धकारणत्वादाक्षेपरूपस्यापि प्रमाणस्य विषयः। अश्वाभिधान्यादानानुष्ठानोपयोग्यनुष्ठेयार्थ- ज्ञानसाधनतया शास्त्रेण विधीयमान 'इमामगृभ्णन्नि'ति मन्त्रश्च रशनाप्रकारकसामर्थ्यरूप- लिङ्गाधीनाविनियोगकल्पनस्यापि विषयः। ननूदाहृतविधिविधेययोरवहननमन्त्रसम्बन्धयोः प्रमाणान्तर- विषयत्वं नास्त्येव। तथा हि-अवहनने तावदाक्षेपो हन्तिशास्त्रस्य प्रवृत्तेः पूर्वं न प्रवर्तते। 'व्रीहिभिर्यजेते'ति शास्त्रेण व्रीहीणां पुरोडाशनिर्वर्तकद्वारयागसाधानत्वावगत्यनन्तरं तेषां पुरोडाशनिर्वर्तकत्वं तुषविमोकं विनानुपपन्नमिति तत्र साधनाकाङ्क्षायां यावन्नखविदलनसाधारणलोकसिद्धकारणभावानुसन्धानेन पाक्षिकतत्साधनत्वेनावहननमाक्षिप्यते। ततः प्रागेव झटिति प्रत्यक्षशास्त्रेणावहननस्य तत्साधनतया समर्पणात्। नापि तदनन्तरं प्रवर्तते। प्रत्यक्षशास्त्रसिद्धेनावहननेनैव साधनाकाङ्क्षानिवृत्तेः। एव 'मित्यश्वाभिधानीमादत्त' इति शास्त्रप्रवृत्तेः पूर्वं मन्त्रस्याश्वगर्दभरशनासाधारणलैङ्गिकविनियोगकल्पना न प्रवर्तते। आक्षेपतः प्रत्यक्षशास्त्रस्य शीघ्रप्रवृत्तिकत्वात्। नापि तदनन्तरं प्रवर्तते। प्रत्यक्षशास्त्रसमर्पितविनियोगेन मन्त्रस्य नैराकाङ्क्ष्यादिति चेत्सत्यम्। अत्र वास्तवी प्रमाणान्तरप्रवृत्तिर्नास्त्येव। तथापि यदीमे शास्त्रे न प्रवर्तेतां तदानीमाक्षेपलैङ्गिककल्पनयोः प्रवृत्तिः स्यादिति तर्किता तयोः प्रवृत्तिरस्ति। अत एव ह्यनयोः शास्त्रयोरप्रवृत्तावर्थाक्षेपेण नखविदलनस्यापि कदाचित्प्राप्त्यावघातस्य पाक्षिक्येव प्राप्तिः स्यात्। मन्त्रस्य च लिङ्गाविशेषेण गर्दभरशनाग्रहणेऽपि विनियोगस्स्यात्। अनयोः प्रवृत्तौ त्वाक्षेपलैङ्गिककल्पनयोराकाङ्क्षाभावेनानवतारादवघातस्य नियतता। मन्त्रस्य गर्दभरशनातो निवृत्तिश्च लभ्यत इति नियमपरिसङ्ख्याफलकत्वमनयोर्विध्योरभ्युपगम्यते। ननु, तर्किते प्रमाणविषये शास्त्रप्रवृत्तावपि वास्तवप्रमाणविषये शास्त्रप्रवृत्तिर्न सम्भवति। न चात्रापि तर्कितैवानुमानप्रवृतिः। न तु वास्तवी। झटिति प्रवृत्तेन प्रत्यक्षशास्त्रेणेश्वरसिद्धौ सिद्धसाधनेनानुमानानवतारादिति वाच्यम्। सिद्धेरप्यनुमित्सयानुमानावतारसम्भवादिति चेत्सत्यम्। तर्कितवास्तवसाधारण्येन प्रमाणान्तरविषयेऽपि शास्त्रप्रवृत्तिरस्तीत्येतावत्येतदुदाहरणद्वयं दर्शितम्। वास्तवप्रमाणान्तरविषयेऽपि तत्प्रवृतिः दृश्यत एव। यथा अथातोऽग्निष्टोमेनानुयजन्ति तमुक्थ्येन तमतिरात्रेण तं द्विरात्रेण तं त्रिरात्रेण तं चतूरात्रेण तं पञ्चरात्रेण'त्यादिसन्दर्भे। अत्र प्रथमवाक्येन प्रकृत्यग्निष्टोमाङ्गत्वेन सिद्धस्याग्नेस्सर्वासु तद्विकृतिष्वतिदेशतः प्राप्तिरस्तीति द्विरात्रादिष्वग्नेरङ्गत्वे चोदकवाक्यविषय एव 'तं द्विरात्रेण'त्यादिशास्त्रप्रवृत्तिर्दृश्यते। न च द्विरात्रादिषु चोदकवाक्यमग्निव्यतिरिक्ताङ्गविषयं कल्पनीयम्। अखण्डोपकारकमुखेन सर्वाङ्गविषयतया प्रवर्तमानस्य चोदकवाक्यस्य किञ्चिद्व्यतिरिक्ताङ्गविषयत्वं कल्पयितुं न शक्यत इति तद्वर्जनातिदेशपक्षस्य

गृहमेधीयाधिकरणं निराकृतत्वात्। यथो' पांशुयाजमन्तरा यजती 'त्युपांशुयाजोत्पत्तिवाक्येन पौर्णमासीकर्तव्याग्नेयाग्नीषोमीययागद्वयान्तराले उपांशुयाजं विदधानेनार्थसिद्धतया सामर्थ्यरूप-प्रमाणान्तरविषय एवोपांशुयाजस्य पौर्णमासीकालत्वे 'तावब्रूतामग्नीषोमावाज्यस्यैवान्नावुपांशु पौर्णमास्यां यजन्ती 'ति शास्त्रप्रवृत्तिर्दृश्यते। तथा द्वे आहवनीये चतस्रो गार्हपत्ये चतस्रोऽन्वाहार्यपचने दश सम्पद्यन्ते दशाक्षरा विराट् य एवं विद्वान् विराट्सम्पन्नमग्निहोत्रं जुहोती 'त्यत्र विराट्सम्पत्तिवाक्यानुसारेण दशसङ्ख्यानामग्निहोत्राहुतीनां .मध्ये द्वे एवाहवनीये न त्वष्टावितरा इति परिसङ्ख्यानामष्टानां गार्हपत्यान्वाहार्यपाचनरूपा- धिकरणान्तरविधानसामर्थ्यात्सिद्ध्यतीति सामर्थ्यरूपप्रमाणान्तरविषय एव परिसङ्ख्याने द्वे आहवनीय इति शास्त्रप्रवृत्तिर्दृश्यते। नन्वस्तु नाम प्रमाणान्तरविषयेऽपि शास्त्रप्रवृत्तिः। तथापि यत्प्रमाणान्तरविषयावलम्बनं शास्त्रान्तरस्य किञ्चित्फलं वाच्यम् अन्यथा तस्य सर्वथैव वैयर्थ्यप्रसङ्गात्। अस्ति च प्रमाणान्तरविषयावलम्बनानामुदाहृतशास्त्राणां किंचित् किञ्चित्फलम्। तथाहि-द्विरात्रादिशास्त्रादिद्विरात्रादिष्वग्न्याश्रितगुणकामादिप्राप्तिः फलम्। अग्न्याश्रिता हि गुणकामाः श्रूयन्ते 'श्येनचितं चिन्वीत स्वर्गकाम 'इत्यादयः। तेन चोदकादग्नेः प्राप्तौ न प्राप्नुवन्ति। अंगस्य हि सतश्चोदकात् कथं भावाकाङ्क्षया कल्प्यात्प्राप्तिः न त्वङ्गाश्रितानां फलार्थगुणानाम्। तथाष्टमाध्याये निर्णीतत्वात्। उपदेशादग्नेः प्राप्तौ तु प्रकृताविव द्विरात्रादिष्वपि तदाश्रिताः काम्यगुणाः प्राप्नुवन्ति। 'तावब्रूता 'मित्यादिशास्त्रस्योपांशुयाजे 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते 'त्यधिकारिवाक्योद्देश्यफल-सम्बन्धसिद्धिः फलम्। तदभावे हि विद्वद्वाक्यस्थेन अधिकारवाक्यस्थेन च पौर्णमासपदेन 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति अग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छ 'दित्युत्पत्तिवाक्यावगतपौर्णमासीकालयोराग्नेयाग्नीषोमीययागयोरेव झटिति प्रवृत्तिनिमित्तावागत्या प्रथमगृहीतफलयोः सम्बन्धकरणादर्थावगम्यपौर्णमासीसम्बन्धस्योपांशुयाजस्य विलम्बितप्रवृत्तिनिमित्त-प्रतीतिकतया विद्वद्वाक्याधिकारवाक्यगतपौर्णमास- पदागृहीतस्य फलसम्बन्धो न सिद्ध्येत्। तत्सम्भवे तु 'उपांशु पौर्णमास्यां यजन्ती 'ति प्रकृत्य 'जामि वा एतदि' त्याद्याम्नानादुपांशुयाजोत्पतित्तवाक्यश्रुतोऽन्तरालकालः पौर्णमासीरूपतां प्रापितो भवतीत्याग्नेयाग्नीषोमीययोरिवोपांशुयाजस्याप्युत्पत्तिवाक्यावगतपौर्णमासीकालत्वेन विद्वद्वाक्याधिकार-वाक्यगतपौर्णमासपदप्रवृत्तिनिमित्तप्रतीतौ विशेषाभावात्तस्यापि फलसम्बन्धस्सिद्ध्यति। 'द्वे आहवनीय' इति शास्त्रस्य' दशानामप्याहुतीनामग्निहोत्रं जुहुयात्स्वर्गकाम' इत्यधिकारवाक्योद्देश्यफलसम्बन्धसिद्धिः फलम्। तदभावे हि गार्हपत्यान्वाहार्यपचनवाक्ये सङ्ख्याधिकरणविशिष्टकर्मविधायके स्यातां न त्व 'ग्निहोत्रं जुहोती 'ति वाक्यविहितकर्मानुवादेन गुणमात्रविधायके प्राप्ते कर्मणि। सङ्ख्याधिकरणरूपानेकगुणविधाने वाक्यभेदापत्तेः। ततश्च गार्हपत्यान्वाहार्यपचनवाक्ययोः सङ्ख्याधिकरणविशिष्टहोमविध्यवश्यंभा-वेनेष्टावपि होमाः 'अग्निहोत्रं जुहोती 'ति वाक्यविहिताद्धोमादन्य एव स्युः। विहितस्य विधानायोगादिति। न

तेषामग्निहोत्रमिति नाम सिद्ध्यति। किं त्वग्निहोत्रवाक्यविधेयस्यैकस्यैव होमस्य तन्नामेति प्राप्नोति। तदुत्पत्तिवाक्यगतत्वात्। अग्निहोत्रवाक्यविहितस्य सायंप्रातःकालयोर्देवताभेदेन द्विर्द्विरभ्यसनीयस्य होमस्य गार्हपत्यान्वाहार्यपचनवाक्यविहितानामष्टानां होमानां चानुवादके विराट्सम्पत्तिवाक्ये तावत्साधारण्येनाग्निहोत्रशब्दप्रयोगसत्त्वेऽपि तस्य छत्रिन्यायेन लक्षणोपपत्तेः। अग्निहोत्रवाक्यविहिते कर्मणि प्रथमावगतशक्त्यवश्यंभावेन तत्सम्बन्धादितरेषु लक्षणोपपत्तावनेकत्र शक्तिकल्पनस्यान्याय्यत्वात्। 'रथन्तरं पृष्ठं भवति' बृहत्पृष्ठं भवती' त्युत्पत्तिवाक्योर्माहेन्द्रस्तोत्रनामत्वेन प्रथमावगतस्य पृष्ठशब्दस्य 'सप्तदशानि पृष्ठानी'त्युनवादवाक्ये माहेन्द्रादिषु चतुर्ष स्तोत्रेषु प्रयोगो लाक्षणिक इति सप्तमाध्याये निर्णीतत्वात्। एवं चाधिकारवाक्यस्थेनग्निहोत्रनाम्नाग्निहोत्रवाक्यविहितस्यैव होमस्य समर्पणात्तस्यैव द्विरभ्यसनीयस्य फलसम्बन्धः सिद्ध्येत्। न तु गार्हपत्यान्वाहार्यपचनवाक्यविहितानां होमानाम्। द्वे आहवनीय' इति वाक्यसद्भावे तु विराट् सम्पत्तिवाक्य 'मग्निहोत्रं जुहोती'ति विहितस्यैव होमस्य दशधाभ्यासपरम्। अग्निहोत्रनामानुसारेणोपपादनसम्भवात्। तेषां दशानामभ्यासानां मध्ये 'द्वे आहवनीय' इत्यनेनाहवनीयपरिसङ्ख्या तेषामपेक्षितमधिकरणमेव गार्हपन्यान्वाहार्यपचनवाक्याभ्यां विधीयते। तयोश्चतुस्सङ्ख्याश्रवणं तु 'समं स्यादश्रुतत्वा' दिति न्यायप्राप्तानुवादकमिति लभ्यते। एवमग्निहोत्रवाक्यविहितस्यैव होमस्य देवताभेदेनाधिकरणभेदेन च सायं प्रातश्च दशदशाभ्यासः न तु तद्व्यतिरिक्ता होमास्सन्तीति पर्यवसाने अधिकारवाक्यगतमग्निहोत्रनाम सर्वविधाभ्याससहितस्याग्निहोत्रस्य समर्पकमिति सर्वसाधारण्येन फलसम्बन्धः सिद्ध्यति। एवं प्रमाणान्तरविषयावलम्बनेषु शास्त्रेषु किञ्चित्फलं न कल्प्यते चेत् द्विरात्रादिवाक्यानि स्तुत्याद्यर्थानुवादकान्येव स्युः। इह त्वनुमानविषये जगत्कर्तरि प्रवर्तमानस्य शास्त्रस्य न तथा किञ्चित्फलं दृश्यत इत्यनुवादकत्वकल्पनमेव न्याय्यमिति चेन्मैवम्। इहापि वेदान्तरूपेण शास्त्रेण जगत्कर्तृज्ञानमभ्युदयनिश्रेयसोपयोगि न त्वनुमानेन तज्ज्ञानमित्येवंफलकल्पनोपपत्तेः। एवंभूतफलकल्पनयापि केषाञ्चिच्छास्त्राणां साफल्यदर्शनात्। तथाहि-नानाशाखाग्निहोत्रादिवाक्यानि परस्परप्राप्तविषयाणि तत्तच्छाखाध्यायिनां तत्तच्छाखान्तर्गतवाक्य-जन्यान्येवाग्निहोत्रादिज्ञानान्यभ्युदयाद्युपयोगीनि न तु शाखान्तरगतवाक्यजन्यज्ञानानीत्येवं कल्पनया सफलान्युपपादनीयानि। स्वर्गकामवाक्यप्राप्तार्थविषयस्वर्गकामवाक्यादीन्यप्येवमेव सफलानि वक्तव्यानि। आहत्य च मीमांसकैरनारभ्याधीतसाप्तदश्यवाक्यसाफल्यमित्थमेवोपपादितम्। तथा हि 'सप्तदश सामिधेनीरनुब्रूया' 'दित्यनारभ्य श्रूयते। अत्र विधीयमानस्य साप्तदश्यस्य न सामिधेनीद्वारा प्रकृतौ निवेशः। प्राकरणिकतत्पाञ्चदश्यविरुद्धत्वात्। किं तु विकृतिष्वेव। तत्रापि श्रुतसाप्तदश्यासु मित्रविन्दादिष्वेव निवेशो न सर्वासु विकृतिषु। अनारभ्य श्रुतं साप्तदश्यं हि यावत्सामिधेनीद्वारा सकलविकृत्यङ्गं कल्प्यते तावत्प्राकरणिकैर्वाक्यैर्मित्रविन्दादिसम्बन्धे कृते क्षीणार्थापत्तिः न क्रत्वन्तरसम्बन्धं कल्पयति।

तेनानारभ्याधीतस्य साप्तदश्यस्योपसंहारार्थानि तत्तत्प्रकरणाम्नातानि साप्तदश्यवचनानि। ततश्च प्राकरणिकवचनैः साप्तदश्यस्य क्रतुसम्बन्धसिद्धिरनारभ्याधीतवाक्येन सामिधेनीसम्बन्धसिद्धिरिति मीमांसकमर्यादा। अत्रानारभ्य विधानाभावे साप्तदश्यस्य क्रतुसम्बन्धवत् सामिधेनीसम्बन्धोऽपि प्राकरणिकवचनैरेव सिद्ध्यतीत्यनारभ्यविधानस्य वैयर्थ्यशङ्का प्राप्नोति। अत्रोक्तं तन्त्ररत्ने 'यद्यपि प्राकरणिकेनैव क्रतुसम्बन्धः सामिधेनीसम्बन्धश्च सिद्ध्यति तथापि वाक्यद्वयाम्नाना-देवंविज्ञानमभ्युदयकारीति विज्ञायते अर्थवादप्ररोचितव' दिति। तस्मात्प्रमाणान्तरविषयेऽपि शास्त्रप्रामाण्यस्य बहुषु स्थलेषु दर्शनात् 'अनुमानविषयेऽपि जगत्कर्तरि तत्प्रामाण्यमुपपद्यत इत्याशङ्क्याह-**शास्त्रस्य प्रमाणान्तराप्राप्तविषयत्वादिति।** अयं भावः। प्रागेव प्राप्तेऽर्थे प्रामाण्यं क्वचिदपि न दृश्यते। तथाहि-द्विरात्रादिवाक्यान्यग्निबोधकपदयुक्तान्यखण्डोपकारमुखेन तज्जनकानि सर्वाण्यपि प्राकृताङ्गन्यविशेषेण प्रापयतो विशिष्य तत्तदङ्गेषु सामान्यमुखेन पर्यवस्यतश्च द्विरात्रादिचोदकवाक्यात्प्रागेव तेषु विशिष्याग्निसम्बन्धं बोधयंति 'तावब्रूता' मिति वाक्यं पौर्णमासीपदयुक्तमन्तरालकाल-विधानसामर्थ्यपरामर्शात्प्रागेवोपांशुयाजे पौर्णमासीकालयोगं बोधयति। 'द्वे आहवनीय' इति वाक्यं गार्हपत्यान्वाहार्यपचनवाक्यद्वयसामर्थ्यपरामर्शात्प्रागेव 'द्वे आहवनीय' इत्याहुत्यन्तराणामाहबनीयाद्व्यावृत्तिं बोधयति। नानाशाखागताग्निहोत्रादिवाक्यानि च तत्तच्छाखाध्यायिनं प्रति स्वशाखाध्ययनप्राथम्यात् शाखान्तरवाक्येभ्यः प्रागेवाग्निहोत्रादिकर्तव्यतां बोधयंति। स्वर्गकामवाक्यं च सामान्यमुखप्रवृत्तात् स्वर्गकामवाक्यात् प्रागेव ज्योतिष्टोमस्य विशिष्य स्वर्गसम्बन्धं बोधयति। (एवमेषां द्विरात्रादिवाक्यानां चोदकवाक्यादिभ्यः प्रागेव स्वस्वार्थबोधकत्वाभावे तेषामज्ञातज्ञापकत्वरूपं प्रामाण्यमेव न सिध्येत्। दूरे प्रामाण्यविशेषरूपं शास्त्रत्वम्)। न चैवमिहापि गृहीतव्युत्पत्तिकप्रसिद्धपदघटितं 'यतोवे'त्यादिशास्त्रं प्रसिद्धव्याप्यव्यापकतद्व्याप्तिग्रहादिसापेक्षादनुमानात्प्रागेव जगत्कर्तारं बोधयतीति शङ्कनीयम्। 'यतोवे'त्यादिशास्त्रं हि यच्छब्दयोगात् जगज्जन्मादिकारणस्यानुवादकं न स्वयं तस्य प्रापकम्। तस्य शास्त्रप्रतिपन्नार्थानुवादकत्वाभ्युपगमेऽपि 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा' इति वाक्यं तस्य पुरोवादकमभ्युपगन्तव्यमर्थैकरूप्यात्। तत्तु 'अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छ अद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छे'ति कार्यलिङ्गेन जगत्कारणानुमानप्रदर्शनपूर्वकं प्रवृत्तत्वादनुमानसिद्धार्थानुवादकमिति स्वप्रकरण एव स्पष्टम्। अतस्तदुपजीवनेन प्रवृत्तस्य 'यतोवे'त्यादिवाक्यस्यानुमानमुखनिरीक्षणावश्यम्भावात् तदनन्तरप्रवृत्तिकस्यास्य जगज्जन्मादिकारणे कथमपि न प्रामाण्यशङ्कावकाशः। ननु, जगत्कर्तुरनुमानतः सिद्धिसम्भवेऽपि तस्य 'यतोवे' त्यादिवाक्य एव 'तद्ब्रह्मे'ति विधीयमानं तस्य त्रिविधपरिच्छेदराहित्यं वाक्यान्तरेषु विधीयमानं च तस्य गुणचरितविग्रहविशेषादिवैशिष्ट्यं वेदान्तैकप्रमाणकमभ्युपगन्तव्यमिति चेदस्तु नाम। न तावता तस्यानुमानप्रमाणत्वं 'यतोवे'त्यादिलक्षणवाक्यस्य तदनुवादकत्वं च हीयते। न हि प्रत्यक्षादिना स्वरूपतो

लक्षणतश्च देवदत्तं जानानं प्रति लक्षणमुखेन तदनुवादपूर्वकं तस्य पुत्रेयत्तादिकथने क्रियमाणे पुत्रेयत्तादिकथनस्य श्रोतारं प्रत्यननुवादकत्वमस्तीत्येतावता लक्षणकथनस्य प्रत्यक्षादिसिद्धार्थानुवादकत्वमपैतीति। एवं पूर्ववृत्तानुमानरूपप्रमाणान्तरप्राप्तार्थविषयकत्वात् 'यतो वे' त्यादिशास्त्रस्य तत्पुरोवादकत्वाभिमतस्य 'सन्मूलाः सोम्येमाः सर्वाः प्रजा' इत्यादिशास्त्रस्य वा जगत्कर्तरि प्रामाण्यं नोपपद्यत इति पूर्वपक्षे प्राप्ते तस्य तत्र प्रामाण्यमुपपादयितुं जगत्कर्तुस्तथाभूतप्रमाणान्तरप्राप्तत्वं निराकुर्वन्सिद्धान्तयति-**सिद्धान्तस्त्विति।** इत्यादिष्वित्यादिशब्देन 'नैषा तर्केण मतिरापनेये' त्यादिवाक्यान्तरं गृह्यते। ननु, 'नावेदवि' दित्यादिवाक्यजातं मुमुक्षुज्ञेययावद्विशेषणविशिष्टतया ब्रह्मावगतिरन्यतो न सम्भवतीत्येतत्परं न तु जगज्जन्मादिकर्तृतामात्रेणाप्यन्यतस्तदवगतिर्न सम्भवतीत्येतत्परम्। तथा तदवगतिहेतोः श्रुत्यैव प्रदर्शितस्यानुमानस्य जागरूकत्वादित्याशङ्क्याह-**यदुक्तमिति। विचित्रेति।** अयमाशयः। महीमहीधरमहार्णवादीनामेकेन कर्त्रा युगपत्कृतत्वेनैव सकर्तृकत्वं निर्वाह्यमित्यत्र नास्ति प्रमाणम्। महतो देवालयस्य प्रासादमण्डपगोपुरप्राकारादीनामिव तेषां क्रमेण बहुभिः कृतत्वेनापि सकर्तृकत्वोपपत्तेः। प्रत्युत महीमहीधरादिकमनेककर्तृकं यावत्सम्प्रतिपन्नैककर्तृकघटाद्यपेक्षया महाकार्यत्वात् गोपुरप्राकारादिवदिति बहुकर्तृकत्वस्यैवानुमातुं शक्यत्वाच्च न च लाघवात् कर्त्रैक्यसिद्धिः। न हि प्रसिद्धसंसारविलक्षणा बहवः कर्तारः कल्प्यन्ते किंतु संसारिष्वेव केचित् कर्मोपासनाविशेषैरुपचितपुण्यविशेषाः क्षित्यादिषु कस्यचित्कस्यचित्कालविशेषेषु कर्तारः कल्प्यन्ते। प्रसिद्धं ह्यगस्त्यविश्वामित्रादीनां विन्ध्यसंस्तम्भनमहार्णवचुलुकीकरणस्वर्गान्तरसृष्ट्यादिसामर्थ्यम्। अद्यतनेऽङ्कुरादिष्वपि सूक्ष्मव्यवहितविप्रकृष्टार्थज्ञानादिमन्तस्तत्रतत्र सन्तो योगिनः कर्तारः सम्भवन्ति। अतः क्षित्यादिसकलोपादानगोचरापरोक्षज्ञानचिकीर्षादिमतः संसारिविलक्षणस्य कस्यचित्कर्तुः कल्पन एव धर्मिकल्पनागौरवम्। किं चादृष्टद्वारकेत्याद्यनुमानेन लाघवादेकस्य कर्तुः सिद्धिरिति कोऽर्थः। किं वस्तुत एकमेव कर्तारं विषयीकुर्वाणानुमितिर्भवति उतैकत्वविशेषितं कर्तारं विषयीकुर्वाणेति। नाद्यः एकत्वाविषयत्वे वस्तुत एकः कर्ता विषय इति निर्णेतुमशक्यत्वात्। न द्वितीयः। एकत्वस्य सङ्ख्यारूपत्वे बहुष्वपि प्रत्येकं तद्वैशिष्ट्यसत्त्वेन तद्विषयत्वस्य बहुकर्तृकत्वाविरोधित्वात्। अनेककर्तृकत्वाभावविशिष्टं सकर्तृकत्वमेककर्तृकत्वमिति तद्विषयिण्यनुमितिरिति चेत्तर्हि लघुविषयोपनयेन प्रमाणानुग्राहकतया प्रसिद्धं लाघवं गुरुविषयोपनायकं कृतं स्यात्। नैतद्युक्तम्। न ह्येवंभूतं लाघवं सम्प्रतिपन्नमस्ति। यदग्रे वस्तुलाघवसिद्ध्यर्थं स्वानुग्राह्यप्रमाणस्य विषयगौरवमापादयेत्। तत्सम्प्रतिपत्तौ पक्षे लिङ्गज्ञानस्यानुमितिकारणतां गृह्णतः प्रमाणस्यानुग्राहको लाघवतर्को 'धूमो वह्निव्याप्यः' 'पर्वतश्च धूमवा' निति ज्ञानद्वयस्थले 'वह्निव्याप्यधूमवान्पर्वत' इति विशिष्टज्ञानस्याकल्पनया वस्तुलाघवसिद्ध्यर्थं व्याप्यतावच्छेदकप्रकारकत्वमेव कारणतावच्छेदकत्वेनोपनयेत् न तु व्याप्तिप्रकारकत्वं लघुधर्म इष्टम्। पुरोवर्तिज्ञानस्य प्रवृत्तिकारणतां गृह्णतः प्रमाणस्यानुग्राहको लाघवतर्कश्च विसंवादिप्रवृत्तिस्थलेऽपि अधिकरणप्रकारकज्ञानस्याकल्पनया

वस्तुलाघवसिद्ध्यर्थं भेदाग्रहणमेव कारणातावच्छेदकत्वेनोपनयेत्। न तु ज्ञानवित्तिवेद्यतयोपस्थितं वैशिष्ट्यम्। अतो लाघवात्कर्त्रैक्यसिद्धिरित्ययुक्तमेव। एतेन पक्षीकृतक्षित्यादिजननसमर्था-परोक्षज्ञानचिकीर्षाकृतीनां लाघवात् प्रत्येकमेकैकत्वसिद्धौ तदाश्रयकर्त्रैक्यसिद्धिरित्यपि शङ्का निरस्ता। सम्प्रतिपन्नानामेव संसारिणां योगप्रभावादिसिद्धैः क्षित्यादिजननसमर्थापरोक्षज्ञान-चिकीर्षाकृतिविशेषैस्तत्कर्तृकत्वसम्भवात्। न च संसारिण एव सम्प्रतिपन्नाः न तु तेषु क्षित्यादिजननसमर्थाः अपरोक्षज्ञानादय - इति शङ्कनीयम्। तेषामपि योगशास्त्रादिप्रामाण्यसिद्धत्वात्। किं तु तेषां क्षित्यङ्कुरादिजननपूर्वक्षणे सद्भावमात्रं कल्पनीयम्। तत्कल्पना तु धर्मिकल्पनातो वरं धर्मकल्पनेति लाघवानुसारिण्येव। एकैकज्ञानादिजन्यत्वसाधने च नास्ति विषयलाघवम्। किं त्वनेकज्ञानाद्यजन्यत्वे सति ज्ञानादिजन्यत्वरूपस्य तस्य साधन एव गौरवमित्येतदपि दूषणमत्रापि तुल्यम्। अपि चेश्वरानुमाने लाघवतर्कमनुग्राहकमन्विच्छता पक्षतावच्छेदकशरीरानुप्रविष्टस्य कुलालादिकृतिषु जन्यत्वस्य ग्राहके प्रमाणे लाघवमनुग्राहकमादरणीयम्। तत्र कुलालादिकृतिषु कृतित्वमेव जन्यतावच्छेदकं युक्तम्। लाघवात्। न तु कुलालादिकृतित्वमीश्वरकृत्यन्यकृतित्वं वा। गौरवात् अननुगमादप्रसिद्धिदोषाच्च। तथा चानुमानप्रवृत्तेः प्रागेव कृतिमात्रस्य जन्यत्वनिश्चयेऽनुमानतो लाघवसहस्रेणापि न नित्यसर्वविषयैककृतिसिद्धिर्भवेत्। अपि च नित्यसर्वविषयैकचिकीर्षासिद्धिरपि न भवेत्। अस्मदा- दिनार्थान्तरवारणार्थं ज्ञानचिकीर्षाकृतीनामपि जनकत्वं साध्ये विवक्षितमिति खलूक्तम्। ततश्च घटादीनां चिकीर्षाकृ तिव्यवहितकुलालादिज्ञानजन्यत्वं चिकीर्षादिद्वारा ग्राह्यमिति चिकीर्षायाः द्वारत्वनिर्वाहाय ज्ञानजन्यत्वं ग्राह्यम्। तत्र लाघवाच्चिकीर्षात्वमेव जन्यतावच्छेदकं प्राप्नोति। ननु, तर्हि ज्ञानचिकीर्षे विहाय कृतिमज्जन्यत्वमात्रं साध्यते। कृतेर्जनकत्वविवक्षामात्रेणार्थान्तरवारणासम्भवात्। अनुमानतः कृत्याश्रयत्वेनेश्वरसिद्धौ तदनुवादेन सार्वज्ञ्यादेरपि श्रुत्या बोधनसम्भवाच्च। न च तथा सति ज्ञानवज्जन्यत्वं चिकीर्षावज्जन्यत्वं वा सन्दिग्धोपाधिः स्यादिति वाच्यम् ज्ञानस्य चिकीर्षया चिकीर्षायाः कृत्या चान्यथासिद्धतया घटादिषूपाधेः साध्यव्यापकत्वभङ्गात्। न च ज्ञानोपलक्षितजन्यत्वं चिकीर्षो- पलक्षितजन्यत्वं वा सन्दिग्धोपाधिः स्यादिति शङ्कनीयम्। ज्ञानचिकीर्षयोः कार्याप्रयोजकत्वे हेतुसाध्ययोरिव साध्योपाध्योर्व्याप्तिग्राहकस्य कार्यकारणभावमूलकस्यानुकूलतर्कस्याभावेन तथाप्युपाधेः साध्यव्यापकत्वभङ्गात्। अन्यथा ज्ञानादित्रयजन्यत्वेऽपि साध्येष्वेकैकजन्यत्वस्य साध्यातिरिक्त- स्योपाधितायाः वारयितुमशक्यत्वादिति चेत्। एवं तर्हि कृतेरपि चेष्टयान्यथासिद्धेर्वक्तुं शक्यत्वेन घटादिदृष्टांतः साध्यविकलः स्यात्। न हि ज्ञानचिकीर्षे चिकीर्षाकृतिभ्यामन्यथासिद्धे। कृतिस्तु चेष्टया नान्यथासिद्धा। किंतु तद्द्वारा घटादिजनिकेति कल्पने नियामकं कञ्चिद्विशेषमीक्षामहे। अतः कृतेर्घटादिजनकत्वमभ्युपगच्छता ज्ञानचिकीर्षयोरपि जन्यजनकत्वमभ्युपगम्य उपाधिसन्देहवारणार्थं तयोरपि साध्यानुप्रवेशः कल्पनीय एव। तदकल्पने च अस्मदादीनां जीवनयोनिकृत एव तत्तद्भोग्यक्षित्यङ्कुरादीनामपि जनिकाः कल्पयितुं शक्यन्त इति

तद्व्द्धिरस्मदादिभिस्सिद्धसाधनं च स्यात्। तस्मात्क्षित्यादिकर्त्रनुमानेनैव कर्त्रैक्यसिद्धये तदनुग्राहकं लाघवमाद्रियमाणस्य तत्प्राक्प्रवृत्तप्रमाणेषु लाघवानादरणे हेत्वभावेन लाघवानुगृहीतप्रथम-प्रवृत्तप्रमाणविरोधात्कर्तृसिद्धिरेव प्रतिहन्यत इति वृद्धिमिच्छतो मूलमपि नष्टमिति न्यायः समापद्यत इति। ननु, तर्हि क्वचिदपि लाघवं नाद्रियते। अनुमानसिद्धक्षित्यादिकर्त्रैक्यं तु श्रुत्यावगंस्यते इत्यनुशयानं प्रति तथापि नानुमानतस्त्वदभिमतेश्वरसिद्धिरित्याह- **व्याप्तिबलेनेति**। यथा हि घटादिकर्तरि ज्ञानेच्छादिमत्त्वं दृष्टं तथा कर्मपारवश्यशरीरत्वादिकमपि। तथा च क्षित्यादिकर्तरि ज्ञानेच्छादिवत्तदपि सिद्धं निवारयितुं न शक्यत इत्यर्थः। ज्ञानादिसिद्धौ कार्यकारणभावमूलकानुकूलतर्कसाचिव्यनिष्कलङ्का व्याप्तिर्मूलमस्ति न कर्मपारवश्यादिसिद्धाविति चेन्न। सामान्यकार्यकारणभावाननुप्रविष्टादृष्टद्वारकत्वविशेषितज्ञानादिमत्त्व-सिद्धिवत्तत्सिद्धेरप्यनिवार्यत्वात्। अभिमतसिद्ध्यर्थमदृष्टद्वारकत्वं साध्ये निवेशितम्। कर्मपारवश्यादिकं त्वनभिमतत्वान्न निवेश्यत इति चेन्न। यथादर्शनमात्रप्रवृत्तानुमानशरणस्य दृष्टान्तदृष्टविशेषणेषु क्वचिदभिमतेरन्यत्रानभिमतेश्च निर्मूलत्वात्। 'न कर्मणा वर्धते नो कनीया'नित्यादिश्रुतिबाधितं कर्मपारवश्यादिकं न त्वदृष्टद्वारकज्ञानादिकमिति चेन्न। जगत्कर्तरि धर्मिग्राहकमानसिद्धं ज्ञानादित्रयं द्रव्यत्वसामान्यप्राप्तं सङ्ख्यादिपञ्चकं च विहाय गुणान्तरं नास्ति। तदनुसारेणानन्दादिश्रुतयोऽन्यथा व्याख्येया इत्यभिमन्यमानस्यानुमानैकशरणस्य शुष्कतार्किकस्य दृष्टान्तदृष्टं कर्मपारवश्यादिकमपि साध्येऽन्तर्भाव्य 'न कर्मणा वर्धत' इत्यादिश्रुतेरन्यथाव्याख्याने विचिकित्साहेत्वभावात् कर्मतारतम्यप्रयुक्ततारतम्य-वदानन्दादिसद्भावमात्रं जगत्कर्तर्यङ्गीकृत्य तत्र नित्यनिरतिशयानन्दश्रुतिमात्रस्यान्यथाव्याख्यानोपपत्तेश्च। न च जगत्कर्तुः कर्मवश्यत्वेऽस्मदादिसाम्यापत्तिर्बाधः। विहितानुष्ठाननिषिद्धपरिहारनियमेन तस्य विशेषोपपत्तेः यथाकथञ्चित्साम्यमात्रस्य दोषत्वे ज्ञानदिमत्त्वसाम्यस्यापि दोषत्वापत्तेश्च। ज्ञानादीनां नित्यत्वेन सर्वविषयत्वेन च विशेषोऽस्तीति चेत्तर्हि तत एव कर्मवश्यत्वेऽपि विशेषोऽस्ति। किं च ईश्वरज्ञानादेर्नित्यसर्वविषयत्व एव भूयान्युक्तिबाधः। कथं हि सदा सर्वविषयिण्येकैव तस्येच्छा कालविशेषेण सिसृक्षासञ्जिहीर्षात्वादिरूपविशेषं भजेत। स हि विशेषाविषयविशेषोपधानात्मैव क्लृप्तस्तत्तत्कार्यसामग्रीविशेषोपधानरूपतया समर्थयितुमयुक्तः। न च शिवसूर्यप्रभारूपा चिच्छक्तिरिव तार्किककल्पितेश्वरगुणभूतेच्छा समयभेदेन विविधरूपपरिणामिनी। सिसृक्षासञ्जिहीर्षात्वादिरूपाणां सार्वदिकत्वे च सदैव सृष्टिसंहारादिकं प्रसज्येत। न च सिसृक्षादिसद्भावेऽपि सहकारिसमवधानक्रमात्कार्यक्रम उपपादनीयः। तदिच्छायां सहकारिसमवधानेच्छारूपत्वस्यापि सदातनत्वेन तत्समवधानक्रमस्याप्यशक्यसमर्थनत्वात् एवं सत्यपि यदि सिसृक्षादिप्रयुक्तं कार्यं कालान्तरेऽपि न स्यात् तदा तार्किकेश्वरो वितथसङ्कल्पत्वादनीश्वर एव स्यात्। तथा तार्किकैर्यन्नित्यमकारणमभ्युपगतं पारिमाण्डल्यादि तदपीश्वरचिकीर्षाकृत्योर्विषय इति वक्तव्यम्। विषयविशेषनियमनहेतोः

कारणविशेषप्रभवत्वस्याभावेनापातत: सर्वविषयत्वस्य तदंशे सङ्कोचयितुमशक्यत्वात् पारिमाण्डल्यादिविषयाभ्यां चिकीर्षाकृतिभ्यां न पारिमाण्डल्यादिकमुत्पादयितुं ध्वंसयितुं वा शक्यं न वा तेन कार्यान्तरमुत्पादयितुं शक्यमिति तत्रापि स वितथसङ्कल्पो वितथप्रयत्नश्च स्यात्। एवंविधानेकयुक्तिविरुद्धमपि नित्यसर्वविषयज्ञानादिकमङ्गीकुर्वत: किमपराद्धमीश्वरस्य कर्मवश्यत्वादिना। तस्माद्दृष्टान्तदृष्टतामात्रेणादृष्टद्वारकत्वं विशेषणं निवेशयत: कर्मवश्यत्वादिविशेषणं प्रतिक्षेप्यमित्यानुमानिकेश्वरवादे तस्य कर्मवश्यत्वादिप्रसङ्गो वारयितुमशक्य:। ननु, तर्ह्यदृष्टद्वारकत्वं त्यज्यते अपरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वमात्रं सिद्धमिष्यते। न चैवं सति हविरादिगोचरज्ञानादिमतास्मदादिनार्थान्तरप्रसङ्ग:, क्षित्यादिजनकतया साध्यमानस्य ज्ञानादित्रयस्य तदुपादानस्य च परस्परमप्रत्यासन्नत्वे कार्यनिष्पादकत्वायोगेन प्रत्यासत्तावपेक्षितायां घटादिजनकज्ञानादित्रयोपादानयोर्विषयविषयिभाव: प्रत्यासत्ति: क्लृप्त इत्यत्रापि तस्यैव प्रत्यासत्तितया सिद्धेरिति चेन्न। विशिष्य क्षित्यादिजनकादृष्टजनकहविरादिगोचरज्ञानत्रयेषु क्लृप्तस्य दृष्टद्वारकतत्तदुपादानसम्बन्धस्यैव तदुभयप्रत्यासत्तित्वसम्भवे अन्यत्र विषयविषयिभाव: तत्प्रत्यासत्तित्वेन क्लृप्त इति तल्लोभेन क्लृप्तहविरादिगोचरज्ञानादिकं परित्यज्याक्लृप्तनित्यज्ञानादिकल्पनायोगात्। शब्दफूत्कारादिजनकज्ञानादिकस्याकाशादिविषयत्वाभावेनान्यत्रापि विषयविषयिभाव एव तदुभयप्रत्यासत्तिरिति नियमासिद्धेश्च। तस्माज्ज्ञानादिमज्जन्यत्वमात्रे साध्येऽर्थान्तरं स्यादिति तद्वारणेनाभिमतसिद्ध्येकप्रयोजनमदृष्टद्वारकत्वं विशेषणं निवेशयतस्तथैव कर्मवश्यत्वादिनिवेशनमपि स्यादित्यनिवार्य: कर्मवश्यत्वादिप्रसङ्ग:। स्यादेतत्। भवत्वेवमष्टगुण ईश्वर इति स्वमनीषिकया कल्पयित्वा तदनुरोधेनानन्दादिश्रुतिमन्यथा कुर्वत: शुष्कतार्किकस्यानुमाने दूषणमिदम्। अनुमानसिद्धमीश्वरमनूद्य वेदान्तैस्तस्य विधीयमानं गुणचरितविग्रहादिकं प्रत्यक्षादिसिद्धं पृथिव्यादिकमनूद्य पृथिवी गन्धादिपञ्चगुणा सलिलं रसादिचतुर्गुणमित्यादिप्रकारेण तैर्विधीयमानं गुणव्यवस्थादिकमिव तथैवाभ्युपगम्यत इति मन्यमानस्य पूर्वपक्षिणोऽनुमाने नेदं दूषणं प्रसरति। अतश्चोक्तानुमानेन हेतो: पक्षधर्मबलात्क्षित्यादिजननानुकूलापरोक्षज्ञानचिकोर्षाकृतिमांस्तत्कर्ता सिध्यन्वस्तुतोऽस्मदादिविलक्षण एकश्च सिद्ध्यति। कर्मवश्यत्वादिनास्मदादिसालक्षण्ये गोपुरादिकर्तृन्यायेनानेकत्वे वा 'न कर्मणा वर्धते नो कनीयान्' 'एको रुद्रो न द्वितीयाय तस्थु'रित्यादिश्रुतिविरोधप्रसङ्गादित्याशङ्क्याह-**हेतोरिति**। यद्यनुमानसिद्धमीश्वरमनूद्य वेदान्तैर्विशेषा विधेया: तर्हि तमनूद्य तस्य जगदुपादानत्वं तैर्विधातुमशक्यं स्यात्। ईश्वर: पृथिव्युपादानं न भवति तत्कर्तृत्वात्कुलालवदित्याद्यनुमानविरोधात्। ईश्वरस्य श्रुतिसिद्धत्वाभ्युपगमे हि धर्मग्राहकमानविरोधादिदमनुमानं नोन्मिषेत्। अनुमानसिद्धत्वे तु तत्सिद्धेश्वरपक्षीकरणेनोन्मिषेदेव। उन्मिषितं चोपजीव्यजातीयत्वेन शुचि नरशिर:कपालं प्राण्यंगत्वात् शङ्खवदित्यनुमानान्नरशिर:-

कपालाशुचित्वप्रतिपादकवाक्यमिव ब्रह्मणो जगदुपादानत्वविधायकाद्वाक्यजातादिदमनुमानं प्रबलमित्यपि शङ्क्येत। एवं तर्ह्यनेककर्तृकत्वाद्यनुमानमपि वेदान्तेभ्यः प्रबलमाशङ्कितुं शक्यम्। कथं विलक्षणैककर्तृकत्वसिद्धावपीति तदभ्युपगमः। सत्यम्। अभ्युपेत्य वादोऽयमित्यपिशब्देनैव ध्वनितम्। तस्माच्छुष्कतार्किकरीतिमपहाय परमेश्वरे वेदान्तप्रतिपाद्ययावद्धर्मवैशिष्ट्यमुपादित्समानेन तन्निर्वाहाय वेदान्तैरेतत्सिद्धिरेष्टव्येति शास्त्रप्रमाणकमेव ब्रह्म नानुमानप्रमाणकम्। 'अन्नेन सोम्य शुङ्गेने' त्यादिश्रुतिप्रदर्शितमनुमानं 'सदेव सोम्येदमग्र आसी' दित्यादिना प्रपञ्चेन प्रागुपदिष्टे जगत्कारणे ब्रह्मणि प्रकरणस्य तात्पर्यनिर्णायकम्। यथाकथंचित् युक्त्युपन्यासात्मकमुपपत्तिरूपं लिङ्गं न तु स्वतंत्रप्रमाणमित्यभिप्रेत्याधिकरणार्थमुपसंहरति-**तत इति।** अनेन पूर्वपक्षिणापि परमेश्वरस्य वेदान्तप्रतिपाद्ययावद्धर्मवैशिष्ट्यमभ्युपगम्यते चेत्पक्षद्वयेऽपि फलभेदाभावात् किमर्थमिदमधिकरणमित्यपि शङ्का निरस्ता। परमेश्वरस्यानुमानिकत्वे तदभ्युपगम एव न निर्वहतीति फलभेदसत्त्वेन तत्त्वबुबोधयिषयाधिकरणप्रवृत्तेरिति। अत्र सूत्रे भाष्यान्तरप्रदर्शितं वर्णकान्तरमप्यङ्गीकृत्य तदुपपादयितुमुपक्रमते-**अनेनेति।** जगत्कारणत्वोपयोगि सार्वज्ञ्यं श्रुतेन जगत्कारणत्वेनैवाक्षिप्यते। साक्षाच्च श्रूयते 'यस्सर्वज्ञस्सर्ववि' दित्यादिषु। किमत्र हेत्वन्तरगवेषणया। अथापि तद्गवेषणया जगत्कारणत्वोपयोगिनि सर्वशक्तिकत्वेऽपि हेत्वन्तरं किमिति नान्विष्यते। उच्यते। वेदनित्यत्वमूलकसर्वजगत्कारणत्वरूपलक्षणासम्भवशङ्कानिरासोऽप्यनुषङ्गतो लभ्यत इत्यन्यतः सिद्ध्यत्यपि सर्वज्ञत्व एव वेदकारणत्वरूपं हेत्वन्तरमुच्यते। अत एव वेदनित्यत्वव्यवस्थापनं वियत्पादे सङ्गतं नात्र कर्तुं युक्तमित्यपि शङ्का निरस्ता। अनुषङ्गलभ्येऽर्थे पृथक्सङ्गत्यनपेक्षणात्। **श्लेषकाव्यवदिति।** 'त्रातः काकोदरो येन द्रोग्धापि करुणात्मना। पूतनामारणाख्यातः श्रेयसेऽस्तु स मे विभुः॥' इति श्लिष्टकविपद्ये यथा श्लेषालङ्कारकृतविच्छित्तिविशेषसिद्धये वक्तुरनेकार्थविवक्षासत्त्वात् स्वतंत्रानेकार्थत्वकृतवाक्यभेदोऽनेकार्थप्रतीत्यर्था वाक्यावृत्तिश्च न दोषाय। एवमिहाप्यनेकार्थसूचनसिद्धये सूत्रकृतस्तदनुमूलानेकार्थविवक्षासत्त्वात्तत्कृतो वाक्यभेदो वाक्यावृत्तिश्च न दोषायेत्यर्थः। 'अस्य महतो भूतस्ये' ति वाक्ये ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वमाक्षेप्तुं प्रभवति नँ वेत्यधिकरणाङ्गसंशयं सिद्धं कृत्वा तदर्थसंशयं तदर्थसंशयं दर्शयति-**ब्रह्मण इति।** वेदनित्यत्वपौरुषेयत्वविरोधाविरोधौ संशयबीजमित्यभिप्रेत्य तद्विरोधं पूर्वपक्षहेतुं दर्शयति- **वाचेति।** ननु, वर्णानां नित्यत्वेन 'नित्ययावाचे'ति विशेषणमुपपद्यते। मैवम्। यदि वर्णा नित्याः तदा लौकिकवाक्यगता अपि ते नित्या इति विशिष्य वेदवाचि नित्यत्वं विशेषणं न स्यात्। अतो वेदाख्यग्रन्थरूपेण नित्यत्वमभिप्रेत्येदं विशेषणं कृतमिति ज्ञायते। नन्वानुपूर्वीविशेषणविशिष्टवर्णरूपस्य वेदस्य नित्यत्वं न सम्भवति आनुपूर्व्याः कृतकत्वादि ति चेत् सत्यम्। स्वरूपनित्यत्वं न वेदनित्यत्वश्रुतेरर्थ इष्यते। किं त्वविच्छिन्नप्रवाहत्वरूपं प्रवाहनित्यत्वम्। न च प्रवाहनित्यत्वे सति स्वरूपानित्यत्वमात्रेण स्वतंत्रपुरुषप्रणीतत्वरूपं सकर्तृकत्वं सम्भवति। येन ब्रह्मणस्सार्वज्ञ्याक्षेपकं वेदकर्तृत्वं युक्तं स्यात्। तथा

सति कालिदासाद्युपज्ञस्य कुमारसम्भवादेरिव वेदस्य प्रवाहस्सादिरेव स्यात्। ननु, निश्वसनश्रुतितो वेदनित्यत्वश्रुते: किं प्राबल्यकारणं येन तद्विरोधान्निश्वसितश्रुतिप्रतिपन्नं ब्रह्मणो वेदकर्तृत्वमयुक्तमिति वक्तव्यं स्यात्। उच्यते। निरवकाशत्वं तत्प्राबल्यकारणम्। असम्भवत्स्वरूपनित्यभावानां वेदानां प्रवाहतोऽपि नित्यत्वस्यानभ्युपगमे तन्नित्यत्वश्रुतेर्नास्ति कश्चिदवकाश:। वेदकर्तृत्वश्रुतेस्त्वस्त्यवकाश:। कथम् ब्रह्मण इव प्रजापतेरग्न्यादीनां च वेदकर्तृत्वं श्रूयते। 'षड्ढोता भूत्वा प्रजापतिरिदं सर्वमसृजत। ऋचो यजूंषि सामानि।' 'ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोस्सामवेद आदित्या'दित्यादिश्रुत्यन्तरेषु। न चैकस्मिन्ग्रन्थे बहूनां स्वतंत्रकर्तृत्वं सम्भवति। तस्माद्वेदाभिमानिदेवतानां प्रजापतेरग्न्यादिभ्यश्च जननविषयाणि वेदानामेव तत्तत्प्रवर्तितत्वविषयाणि वा तानि श्रुत्यन्तराणीति योजनीयम्। तथैव निश्वसितश्रुतेरपि योजनोपपद्यते। संति हि पृथिव्याद्यभिमानिदेवतावत्तत्तद्वेदाभिमानिन्योऽपि देवता:। उक्तं च तन्त्रवार्तिकेऽपि ग्रहैकत्वाधिकरणे 'शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते। तदप्यधिष्ठितं सर्वमेकेन परमात्मना। तथर्ग्वेदादयो वेदा: प्रोक्ता येऽपि पृथक्पृथक्। भोग्यत्वेनात्मनां तेऽऽपि चैतन्यानुगतास्सदे' ति। तासां च देवतानां ब्रह्मणो जातानामपि समयान्तरे पुनरग्न्यादिभ्योऽपि जननमुपपद्यते। ब्रह्मणो मानसपुत्राणां दक्षनारदवसिष्ठभृग्वादीनामिव समयान्तरे पुनरन्यतोऽपि जननम्। एवमादौ ब्रह्मणा प्रवर्तितानामपि वेदानां कालक्रमेण लुप्तानां कालान्तरे पुनरग्न्यादिभिरपि प्रवर्तितत्वं सम्भवति तस्माद्युक्तमुक्तं वेदनित्यश्रुतिविरोधाद्ब्रह्मणो वेदकर्तृत्वमयुक्तमिति। बाधकान्तरमाह-**वेदानामिति।** यदि वेदा: स्वतंत्रपुरुषप्रणीता: स्यु: तदा तत्प्रणेतरि भ्रमप्रमादविप्रलिप्साकरणापाटवशङ्कानामपरिहार्यत्वेन बुद्धाद्यागमवदेव तेषामप्रामाण्यं प्रसज्येत। न चेश्वरे सार्वज्ञ्यादिनिश्चयादुक्तशङ्कानवतार: वेदादन्यतस्तन्निश्चयासम्भवात् बुद्धादीनामपि सार्वज्ञ्यादेस्तदागमतो निश्चयसम्भवस्यातिशिष्टत्वाच्च । न च वेदेषु महाजनपरिग्रहो बुद्धाद्यागमाद्विशेष:। महत्त्वस्य पूज्यत्वरूपत्वे वेदपरिगृहीतॄणां पूज्यत्वस्य तत्प्रामाण्यनिर्णयं विना निर्णेतुमशक्यत्वात् सङ्ख्याधिक्यरूपत्वे सन्दिग्धासिद्धे:। न च सर्वसम्मतवैद्यकपरिग्रह: तथाभूतव्याकरणपरिग्रहो वा महाजनपरिग्रह:। बौद्धागमानुसारिवैद्यशास्त्रे रोगशांत्यर्थं तदागमोक्तकर्मविधानेन जैनव्याकरणदर्शनेन च तयोरतिप्रसक्तत्वात्। न च वेदोक्तस्य सत्यसम्भाषणादीनां धर्मत्वस्य सम्मतत्वं महाजनपरिग्रह:। बौद्धोक्ताहिंसाधर्मत्वस्यापि सर्वसम्मतत्वाच्च। न च वैदिकमंत्रजपादिषु फलसंवादो महाजनपरिग्रह:। एकदेशसंवादस्य सर्वसाधारण्यात् बुद्धोक्तग्निस्तम्भनादिकर्मणां क्षपणकर्षिकमंत्राणां च केषाञ्चित्फलसंवाददर्शनात्। सार्वत्रिकसंवादस्य वैदिककर्मस्वप्यदर्शनात्। तस्माद्वेदस्य प्रामाण्ये सिद्ध एव तत्प्रतिपाद्यस्यापीश्वरस्य सार्वज्ञ्यादिकं तत्परिगृहीतॄणां पूज्यत्वरूपं महत्त्वं च सिद्ध्यति। न तु तेन वेदप्रामाण्यमिति तस्य प्रामाण्यसिद्ध्यर्थमवश्यं पौरुषेयत्वमभ्युपगन्तव्यम्। न च वेदस्य स्वतन्त्रवक्तृप्रमितिपूर्वकत्वाभावे 'शुक्ल:पट' इत्यन्धवाक्यस्य चक्षुष्मत्प्रमितिपूर्वकत्वाभाव इव न प्रामाण्यं निर्वहतीति वाच्यम्। अपौरुषेयत्वेन वक्तृदोषाभावसिद्धौ शुकबालादिप्रमाणवाक्यसाधारणेन योग्यवाक्यत्वेनैव तत्प्रामाण्यनिर्वाहात्। अन्धवाक्यन्यायेन मूलापेक्षा तु

पौरुषेयवाक्य एव। अर्थमुपलभ्य रचितं हि वाक्यं पौरुषेयम्। तत्स्वप्रमाण्यनिर्वाहार्थं स्वमूलोपलम्भस्य नियमेन प्रामाण्यमपेक्षते 'शुक्ल: पट' इत्यन्धवाक्यमिव तन्मूलभूतस्यापदेष्टुश्चक्षुष्मत्ताम्। अपौरुषेयं तु वाक्यमपौरुषेयवेदमूलप्रमाणनिरपेक्षम्। तदेव चक्षुष्मत्स्थानीयमिति न तत्र लौकिकवाक्यन्यायावतार:। न च लौकिकवाक्ये वक्तृज्ञानप्रामाण्याधीनं प्रामाण्यं दृष्टमिति चक्षुष्मद्वाक्येऽपि चक्षुष्मद्वाक्यान्तरापेक्षकत्वकल्पनाप्रसङ्गात्। तस्माद्वेदनित्यत्वश्रुतिविरोधाद्वक्तुर्भ्रमप्रमादादिसम्भवेन तत्प्रामाण्यसंशयप्रसङ्गात् स्वतन्त्रवक्तृप्रमितिपूर्वकत्वाभावेऽप्यपौरुषेयत्वेन प्रामाण्यनिर्वाहाच्च न ब्रह्मणो वेद कर्तृत्वम्। अतो न तेन तस्य सार्वज्ञ्यसिद्धिरिति पूर्वपक्षमुपसंहरति–तस्मादिति। सौत्रं सार्वज्ञ्ये हेतुमुपपादयितुं प्रतिजानीते–**युक्तमेवेति**। ननु, निश्वसितश्रुतिर्ब्रह्मणो वेदोपादानताविषयत्वेन आधुनिकाध्यापकरीत्या सर्गादौ सर्ववेदाध्यापकताविषयत्वेन वोपपन्ना। न तस्य ततोऽर्थमुपलभ्य रचयितृत्वरूपस्य वेदकर्तृत्वस्य सिद्धि:। येन तस्य सार्वज्ञ्यं सिद्ध्येदित्याशङ्क्योपबृंहणवशात्तदभिप्रेतश्रुत्यन्तरवशाच्चोक्तरूपं वेदकर्तृत्वं तदर्थोऽवसीयत इत्यभिप्रेत्योपबृंहणमुदाहरति–**अष्टादशनामिति**। चत्वारो वेदा: शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि। पुराणन्यायमीमांसाधर्मशास्त्राण्यायुर्वेदधनुर्वेदगान्धर्वार्थशास्त्ररूपाश्चत्वार ऋग्वेदाद्युपवेदाश्चेत्यष्टादश विद्यास्थानानि। तानि विद्योत्पत्तिस्थानत्वादिह विद्याशब्देन लक्ष्यन्ते। तानि प्रधानोपसर्जनभावेनैकफलपर्यवसायित्वेऽपि द्वारभेदेन भिन्नवर्त्मानि। तत्र ब्रह्माराधनभूतकर्मोपासनाद्वारेण साक्षाच्च ब्रह्मप्रतिपादकाश्चत्वारो वेदा: प्रधानभूता:। तदीयस्वरवर्णपदतदर्थावधारणोपायभूतानिशिक्षाव्याकरणनिरुक्तानि। तदुक्ताग्निहोत्रादिकर्मानुष्ठानप्रकारप्रतिपादक: कल्प:। कर्माङ्गमन्त्रेषु ज्ञातव्यानां गायत्र्यादिछन्दसां निर्णायकं छन्द:। कर्माङ्गकालविशेषनिर्णायकं ज्योतिषम्। सृष्टिवाक्याद्यर्थप्रपञ्चनेन पारमेश्वरमहाविभूत्युपबृंहणार्थानि पुराणानि। वेदान्ततात्पर्य निर्णयानुकूलषड्विधलिङ्गान्तर्गतोपपत्तिरूपानुमानतत्परिकरशोधनार्थं न्यायशास्त्रम्। वेदानिर्णयानुकूलन्यायविचारात्मिका मीमांसा। वर्णाश्रमानुगुणनिमित्तसाधारणधर्मप्रतिपादकं धर्मशास्त्रम्। सकलानुष्ठानसाधनदेहपाटवार्थ आयुर्वेद:। राज्यपालनोपयोग्यस्त्रजातज्ञानार्थो धनुर्वेद:। सकलदेवताप्रीणनगीतिज्ञानाद्यर्थं गान्धर्वम्। दृष्टादृष्टोपयोगिधनार्जनोपायज्ञानार्थमर्थशास्त्रम्। वैदिकहरिश्चन्द्राद्युपाख्यानार्थप्रपञ्चपराणामितिहासानां वैदिकदेवतातदाराधनप्रकारविशेषप्रतिपादकानामागमानां च पुराणशब्देनैव संग्रह:। सर्वेषामेषां विद्यास्थानानामादिकर्ता सर्गाद्यकालेषु प्राथमिक: कर्ता शूलपाणि:। अत्र श्रुति: 'छन्दांसि यज्ञा: क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति। अस्मान्मायी सृजते विश्वमेत' दिति। न चायमध्यापकरीत्या तत्तद्विद्यास्थानगतवर्णावलीमात्ररचयिता किं तु साक्षात्कवि:। अर्थविशेषानुपलक्ष्यश्लोकादिनिर्मातारो हि कवय:। ते च परमेश्वरादन्ये पूर्वपूर्वकविच्छायापत्त्या कवय:। अयं तु साक्षात्कवि: स्वयमेव तत्तदर्थमुपलभ्य सर्वेषां विद्यास्थानानां निर्माता। अत्रापि श्रुति:–'तदेव ब्रह्म परमं कवीना' मिति। तत्प्रकृतं ब्रह्मैव कवीनां मध्ये परममुत्कृष्टम्।

तत्तद्विद्यास्थानैकदेशप्रबन्धारो ह्यन्ये कवयः देवर्षिमनुष्यादिरूपाः। अयं तु सकलविद्यास्थानप्रथमप्रबन्धृत्वात्सर्वोत्कृष्टः कविरित तदर्थः। 'कविं कवीनामुपमश्रवस्तमम्' 'उदीरयं कवितमं कवीनां' 'कविं सम्राज' मित्यादिश्रुत्यन्तराणामप्युक्तरूपे परमेश्वरस्य सर्वोत्कृष्टकवित्व एव तात्पर्यमिति तादृशानि श्रुत्यन्तराण्यप्यत्र विवक्षितानि। ननु, यदि कविशब्देन निर्देशादर्थमुपलभ्य वेदादिरचयितृत्वमीश्वरस्य सिद्ध्येत्तर्हि तत एव स्वेच्छाधीनयानुपूर्व्या तद्रचयितृत्वमपि सिद्ध्येत्। न हि प्राक्सिद्धयानुपूर्व्या प्राचीनश्लोकादिकं कीर्तयन्कविरित्युच्यते। ततश्चानुपूर्व्यमन्यथात्वरूपस्यापि वेदनित्यत्वस्याभावात् तन्नित्यत्वश्रुतिः सर्वधा निर्विषया स्यादित्याशङ्कां परिहरति-**सृष्टेरिति।** सर्वज्ञः सर्वानुग्राहकः परमेश्वरः प्रलये स्वस्मिन्विलीनान्वेदान् सृज्यमानाः प्राणिन एतेभ्यो वेदवाक्येभ्यः कर्मोपासनादिकं ज्ञात्वा तदनुष्ठानेन कृतार्था भवन्त्वित्यभिप्रायेणैव हि विरचयति। एवमभिप्रायपूर्विका वाक्यविरचनार्थानभिज्ञाध्यापकोच्चरितवेदवाक्यवदर्थोपलम्भमनपेक्ष्य वर्णावलिज्ञानमात्रेण न सम्भवतीत्यर्थमुपलभ्य रचयितृत्वं तावत्कविशब्देन संग्राह्यम्। न त्वानुपूर्व्यन्तरेण रचयितृत्वमपि। कर्मोपासनादिप्रतीत्यर्थं प्राचीनानुपूर्व्यपेक्षणात्। अतस्तदन्यथात्वरूपमनित्यत्वं न प्रसज्यत इति न नित्यत्वश्रुतिविरोध इत्याशयः। ननु, कर्मोपासनादिप्रतीत्यर्थमानुपूर्व्यैक्यं नापेक्षते। आनुपूर्वीभेदेऽप्यर्थैक्यदर्शनात्। प्रतिदिनमहरादौ भृत्यान्यथापूर्वं तत्तत्कार्येषु नियुञ्जानो हि स्वाम्येकरूप एवार्थे भिन्नभिन्नानुपूर्वीकमपि वाक्यं रचयतीति दृष्टान्तविषम उपन्यासः। भृत्यनियोगवाक्येष्वानुपूर्वीभेदेऽप्यर्थो न भिद्यते। वेदे तु क्रमविशेषविशिष्टवाक्यसन्दर्भविषयेषु वेदपारायणादिविधिषु उपक्रमोपसंहारपाठक्रमादिपर्यालोचनया निर्णेतव्येषु कर्मसु चार्थो भिद्येतैव। तथा च कल्पभेदेन धर्माधर्मव्यवस्थाविप्लवापत्तिः। न च पूर्वानुपूर्व्यनुरोधमात्रेण वेदवक्तुस्तत्र स्वातन्त्र्यभङ्गप्रसङ्गः। तथा सति पूर्वकल्पेषु यानि भूतानि यद्गुणकानि येन रूपेण प्राणिनामुपकारकाणि येन क्रमेणोत्पत्तिमन्तिं येन क्रमेण विलयवन्ति च तानि तथैव सृजतः संहरतश्च परमेश्वरस्य जगन्निर्माणमात्रे पारतन्त्र्यप्रसङ्गात्। यदि तु प्राणिनां प्राचीनमदृष्टनिचयं भोगेन क्षपयित्वाताननुजिघृक्षन्परमेश्वरः पूर्वं प्राणिभिर्यथाभूतेन भूतभौतिकवर्गेण भोगाननुभूय पुनरपि तादृग्भोगसिद्ध्यर्थं यान्यदृष्टान्यर्जितानि तानि तथाभूतेनैव तेन भोगं सम्पाद्य क्षपणीयानीति तत्क्षपणेच्छयैव भूतं भूतभौतिकसर्गं सृजति न तु किञ्चित्पारतन्त्र्येणेत्युच्येत तदा पूर्वपूर्वकल्पेषु 'पुण्यः पुण्येन कर्मणा भवती' त्यादि वाक्यं दृष्ट्वा तत्कालप्रचरद्वेदसिद्धयज्ञदानतपोवेदपारायणादिपुण्यकर्मसिद्ध्यर्थं यान्यदृष्टान्यर्जितानि तानि तथाभूतेनैव पुण्यकर्मवर्गानुष्ठानेन क्षपणीयानीति तथा भूतयज्ञादिप्रतिपादकं तथाभूतानुपूर्वीकमेव वेदं रचयतीति तुल्यम्। यद्येवं वस्तुतः स्वातन्त्र्ये सत्यपि पूर्वानुरोधमात्रेण जगन्निर्माणे वेदनिर्माणे वा पारतन्त्र्यं व्यपदिश्येत। न तावता वस्तुकृतस्वातन्त्र्यस्य स्वेच्छया जगत्स्रष्टृत्वरूपस्यार्थमुपलभ्य वेदरचयितृत्वरूपस्य च न काचन हानिः प्रसज्यते। ननु, क्रमान्यथात्वाभावेन

वेदनित्यत्वश्रुतिविरोधपरिहारेऽप्यर्थमुपलभ्य रचितत्वरूपस्य पौरुषेयत्वस्याङ्गीकारान्न तन्मूलोपलम्भप्रामाण्याधीनं वेदप्रामाण्यमापद्यत इति तत्र भ्रमंमात्रादिशङ्कया वेदप्रामाण्येऽप्यनाश्वासः स्यादित्याशङ्कां निराकरोति–**अत एवेति।** यत एव वेदानामनादिसिद्ध एव वर्णपदवाक्यप्रकरणतदानुपूर्वीतदर्थाः न त्वेतेषु किञ्चिदपि पुरुषबुद्ध्यानीतं नूतनमभ्युपगम्यते। अर्थमुपलभ्य रचितत्वं तु तेषामस्माद्वाक्यादेतदर्थप्रतीतिरस्य भवत्वित्यभिप्रायवतार्थाभिज्ञाध्यापकोच्चरितवेदवाक्यस्येवाभिप्रायनिर्वाहार्थमभ्युपगम्यते। तन्निर्वाहोपयोग्यर्थोपलम्भपूर्वकेणापि सकलवेदकर्तृत्वेन परमेश्वरस्य सार्वज्ञ्यसिद्धेः। न तु पौरुषेयवाक्यवद्वेदानां प्रामाण्यनिर्वाहार्थं मूलप्रमाणवत्त्वसिद्धये तदभ्युपगम्यते येन तद्भ्रमत्वशङ्कया वेदप्रामाण्येऽप्यनाश्वासः स्यात्। वेदानां प्रामाण्यं तु अनादिसिद्धवर्णपदवाक्यप्रकरण- तदानुपूर्वीतदर्थानामविपर्यासेनैव सिद्ध्यति। तदेव च तेषामपौरुषेयत्वम्। अत एव वेदानामुक्तमपौरुषेयत्वमर्थमुपलभ्य परमेश्वरेण रचितत्वरूपं तत्सार्वज्ञ्यसाधकं तत्कार्यत्वं चाविरोधेनोपपद्यत इत्यर्थः। एतेन तार्किकाणां वेदपौरुषेयत्वानुमानानि पूर्वमीमांसकानां तदकर्तृकत्वानुमानानि च निरस्तानि। तार्किकास्तावदेवमनुमानानि कल्पयन्ति। वेदः सजातीयोच्चारणानपेक्षोच्चरितजातीयः, वाक्यत्वात् लौकिकवाक्यवत्। वेदत्वं सजातीयोच्चारणानपेक्षोच्चरितवृत्तिमहाजनपरिग्राह्यतावच्छेतकत्वे सति वाक्यवृत्तिवात् भारतत्ववत्। वेदः शब्दाजन्यवाक्यार्थगोचरयथार्थज्ञानजन्यः प्रमाणशब्दत्वात् प्रत्यक्षमूललौकिकवाक्यवत्। बुबोधयिषुपठितो वेदः स्वानपेक्षस्वसमानविषयकज्ञानपूर्वकः बुबोधियिषुवाक्यत्वात् तथाभूतलौकिकवाक्यव'दिति। अत्र प्रथमानुमानसाध्ये सजातीयपदं श्रुतिवाक्यान्याकर्ण्य रचितेषु तदर्थसङ्ग्राहकेषु स्मृतिवाक्येषु व्यभिचारवारणाय। जातीयपदम् आधुनिकोच्चरितवेदे अंशतो बाधवारणाय। तदुभयमपि समानानुपूर्वीकत्वपरम्। तथा च समानानुपूर्वीकोच्चारणापेक्षभिन्नोच्चारणविषयसमानानुपूर्वीकत्वं प्रथमसाध्यार्थः। तत्र सजातीयेत्यनेन यत्किञ्चित्समानानुपूर्वीकत्वे विवक्षिते स्मृतिमूलभूतश्रुतिवाक्यस्यापि अन्योच्चरितश्रुतिवाक्यसमानानुपूर्वीकत्वेन व्यभिचारतादवस्थ्यप्रसङ्गात् स्वसमानानुपूर्वीकत्वं विवक्षणीयमिति पक्षदृष्टान्तानुगतस्वत्वाभावादननुगमस्तावदेको दोषः। अयमुत्तरानुमानेष्वपि समानः। सर्गादिष्वीश्वरोच्चारणं सजातीयोच्चारणानपेक्षमस्माभिरप्यभ्युपगम्यत इति तत्समानानुपूर्वीकत्वेन सिद्धसाधनमपरो दोषः। मौनिना स्वयं निर्माय विलिख्यान्यस्मै मौनिने दत्ते तेनापि लिपिभिरनुमायावगतार्थे ततोऽन्येन केनाप्यनवगते श्लोके उच्चरितत्वाभावाद्व्यभिचारश्चान्यो दोषः। द्वितीयानुमानहेतौ तत्तद्वेदव्यक्तिवृत्तिमात्रव्यभिचारवारणाय सत्यन्तम्। वेदत्वमेव वेदे लाघवान्महाजनपरिग्राह्यतावच्छेदकं न तु तत्तद्वेदत्वमिति व्यभिचारनिरासः। तत्र सिद्धसाधनं पूर्ववदुन्नेयम्। हेतुरप्यसिद्धः। शब्दतदुपजीविप्रमाणेतरप्रमाणजन्यप्रमित्यविषयार्थकत्वविशेषितशब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वरूपतार्किकाभिमतवेदत्वापेक्षया लघुधर्मस्य तदेकदेशभूतस्य स्मृतिपुराणादिसाधारणस्य शब्दतदुपजीविप्रमाणेतरप्रमांणजन्यप्रमित्यविषयार्थकप्रमाणशब्दत्वस्य प्रमाणशब्दत्वमात्रस्यैव वा

महाजनपरिग्राह्यत्वावच्छेदकत्वे सम्भवत्युक्तरूपस्य वेदत्वस्य तदनवच्छेदकत्वात्। न च नित्याध्ययनविषयत्वं वेदत्वमिह विवक्षितमिति वाच्यम्। अङ्गसाधारणस्य तस्य वेदत्वरूपत्वाभावात्। न चाङ्गव्यतिरिक्तत्वमपि विशेषणम्। तदविशेषितस्याङ्गसाधारणस्य लघुधर्मस्य तदवच्छेदकत्वे सम्भवति तस्यानवच्छेदकत्वात्। न चादृष्टजनकशब्दत्वं वेदत्वम्। पुराणादिसाधारण्यात्। तद्व्यावर्तकविशेषणदानेन तदविशिष्टस्यैव लाघवादवच्छेदकत्वे सम्भवति तद्विशिष्टस्यानवच्छेदकत्वात्। तृतीयानुमानसाध्ये अर्थाभिज्ञेनाध्यापकेनार्थविवक्ष्योच्चरितवेदवाक्ये अंशतस्सिद्धसाधनवारणाय शब्दाजन्येति विशेषणम्। अर्थानभिज्ञाध्यापकोच्चरितवेदवाक्येष्वीश्वरज्ञानजन्यत्वमादाय साध्यसिद्धेर्नाशतो बाधः। शुकशारिकादिप्रमाणवाक्येष्वीश्वरज्ञानमादाय साध्यसिद्धिरिष्यत इति पक्षसमत्वान्न व्यभिचार इति तार्किकाणां मतम्। तत्रावश्यकवर्णावलीज्ञानादेव वाक्यरचनोपपत्तेः। साभिप्रायवाक्येषु दृष्टान्वयव्यतिरेकं वाक्यार्थज्ञानम भिप्रायोपक्षीणं क्वचिदपि वाक्यप्रयोगे न कारणम्। विसंवादिशुकशारिकादिवाक्ये व्यभिचारात्। अन्यथा तदर्थगोचरमीश्वरस्य भ्रान्तिज्ञानमस्तीत्यपि कल्पनाप्रसङ्गादिति दृष्टान्तः साध्यविकलः। साभिप्रायवाक्यस्थले वाक्यार्थज्ञानस्याभिप्रायद्वारा वाक्यप्रयोगकारणत्वाभ्युपगमेऽपि सर्गादिषु वेदानां स्रष्टुरीश्वरस्याभिप्रायमूलभूतं ज्ञानं तद्रचितवेदवाक्येषु तद्द्वारा तन्मूलकेष्वन्योच्चरितवेदवाक्येषु च कारणं भविष्यतीति सिद्धसाधनम्। एवमभिप्रायमूलमीश्वरज्ञानमादाय सिद्धसाधनं चतुर्थानुमानसाध्येऽपि समानम्। वेदवक्तुरीश्वरस्याभिप्रायमूलभूतं ज्ञानमस्माभिरिव तार्किकैरभ्युपगन्तुं न शक्यत इति तन्मतमर्यादया बाधोऽधिकः। तथा हि–असदर्थावलम्बनेनापि विधेयस्तुतिपराणि निषेध्यनिन्दापराणि च वाक्यानि दृश्यन्ते। यथा 'स आत्मनो वपामुदखिदत्तामग्नौ प्रागृह्णात्ततोऽजस्तूपरस्समभवत्तं स्वायै देवताया आलभते'ति वाक्यं स्वावयवोत्कर्तनेनापि विशिष्टप्रयोजनं कर्म क्रियते बाह्येन धनत्यागेनास्य कर्तव्यता किं वक्तव्येति तत्र प्रवृत्त्यर्थं प्रजापतिवपोत्खननरूपासदर्थावलम्बनेन विधेयस्तुतिपरम्। 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्वशीयत तद्रजतँ हिरण्यमभवत्तस्माद्रजतं हिरण्यमदक्षिण्य'मिति वाक्यमश्रुप्रभवं रजतमङ्गलमिति यज्ञे दक्षिणात्वेन तद्दानान्निवृत्त्यर्थमत्र रोदनश्रुतावश्रुप्रभवत्वरूपासदर्थावलम्बनेन निषेध्यनिन्दापरम्। यद्यपि न्यायविचारेणासदर्थावलम्बनत्वमेवभूतस्तुतिनिन्दयोर्जानीयुः श्रोतारः। तथापि यथात्यन्तहितैषिणः परमाप्तस्य पित्रादेर्वचने कस्यचिद्दोषं गुणत्वेन गुणं वा दोषत्वेन प्रदर्शयत्यसदर्थावलम्बनत्वावगतावप्यन्यदेव किञ्चित्फलमभिप्रेत्य तत्र प्रवर्तयितुमन्यत्किञ्चिदनिष्टमाशङ्क्य ततो निवर्तयितुं वेदमारोपितार्थावलम्बनं स्तुतिनिन्दावचनमिति तद्विश्वासेन प्रवर्तन्ते निवर्तन्ते च। एवं मातापितृसहस्रेभ्योऽपि प्रत्ययिततरे वेदे स्तुतिनिन्दावचनमसदर्थावलम्बनमपि विध्यवगतफलार्थमवश्यं प्रवर्तितव्यं निवर्तितव्यं वेति तात्पर्येण प्रवर्तितमिति विश्वासेन प्रवर्तेरन्निवर्तेरंश्च विद्वांसः। एवं च वेदस्याभिप्रायमूलभूतवाक्यार्थज्ञानपूर्वकत्वनियमाभ्युपगतावसदर्थावलम्बनयानया स्तुत्या निन्दया

चावश्यकर्तव्यतामवश्यपरिहरणीयतां च ज्ञात्वा विहितेषु प्रवर्तन्तां निषिद्धेभ्यो निवर्तन्तामित्यभिप्रायेण स्तुतिनिन्दावाक्यरचनार्थमभिप्रायपूर्वभावितदालम्बनासदर्थविषयमाहार्यज्ञानं वेदरचयितुरङ्गीकरणीयम्। कवेरिव काव्यरचनोपयोग्यौत्प्रेक्षिकार्थविज्ञानं तन्नित्यमेकं सन्मात्रविषयमीश्वरज्ञानमिति मन्यमानानां तार्किकाणां न सम्भवति। अस्माकं तु हिताहितप्रवर्तननिवर्तनाभ्यां लोकानुग्रहैकरसिकस्य परमेश्वरस्य तदुपयोगीनि चिच्छक्तिपरिणामविशेषरूपाणि स्तुतिनिन्दार्थान्याहार्यज्ञानानि काव्यमूलज्ञानवदेव सम्भवन्ति। सर्वाणि चैतान्यनुमानान्यप्रयोजकानि। न ह्यनुमानसाध्ययोस्सजातीयोच्चारणानपेक्षत्वस्य तृतीयानुमानसाध्ये शब्दाजन्यत्वस्य चतुर्थानुमानसाध्ये स्वानपेक्षत्वस्य च व्यापकविशेषणस्य वैशिष्ट्येन तत्तन्निरूपिततया व्याप्तिग्रहे कश्चिदनुकूलतर्कोऽस्ति। पूर्वपूर्वाध्यापकोच्चारणापेक्षोच्चारणादीनामपि वाक्यत्वादिहेतूपपत्तेः। एवमन्यान्यपि तार्किकाणां वेदपौरुषेयत्वानुमानानि सिद्धसाधनत्वाप्रयोजकत्वादिदुष्टानि वेदितव्यानि। मीमांसकास्तु कर्त्रस्मरणादिभिर्वेदस्याकर्तृकत्वं साधयन्ति। तान्यपि 'छन्दांसि यज्ञाः क्रतवो व्रतानी' त्यादिश्रुतिपुराणा दिसत्त्वादसिद्ध्यादिदुष्टान्युपेक्षणीयानि। नन्वनादिवर्णपदानुपूर्व्यभङ्गादपौरुषेया वेदा इत्यङ्गीकृत्यापि यदि तेषां प्रलयेऽपि लयः पुनः सर्गादौ तयैव वर्णपदानुपूर्व्या समुद्धरणमित्येवं परमेश्वरकर्तृकत्वमित्यङ्गीक्रियते तदा सामुद्धर्तुस्तस्य भ्रमप्रमादकरणापाटवविप्रलिप्सा[1]-सम्भवेनानाद्यानुपूर्वीभङ्गशङ्कया तेषां प्रामाण्ये अनाश्वासः स्यादित्याशङ्क्याह-**येषामिति।** येषां विप्रलिप्सादिहेतवो रागादिदोषास्सन्ति तेषामेव वचनं कदाचिदप्रमाणमपि भवेत् परमेश्वरस्य तु कदाचिदपि न ते सन्तीति तेनोद्ध्रियमाणेषु वेदेषु पूर्वानुपूर्वीभङ्गशङ्कानवतारेण तदप्रामाण्यशङ्का नावकाशं लभत इत्यर्थः। 'निरस्तसमस्तदोषकलङ्कस्ये' ति सामान्यतः प्रदर्शितो दोषाभावः उत्तरविशेषणैर्विशिष्य तत्तद्दोषाभावप्रदर्शनेन समर्थ्यते। तत्र 'निरुपप्लवे' त्यादिविशेषणेन भ्रमाभाव उक्तः। 'स्वतः प्रमाणस्ये' त्यनेन प्रमादाभावः। तात्त्विकार्थनिर्धारणशक्तस्यापि कदाचिदन्यथाज्ञानहेतुभूतमनवधानं हि प्रमादः। स तु नित्यमेव सर्वविषयप्रमाश्रयतया नित्ययावहितस्य न सम्भवतीति भावः। 'स्वतः प्रमाणस्ये' त्यनेन हि नित्यप्रमाश्रयत्वमेवोच्यते। यतः प्रमाणशब्दः प्रमित्ययोगव्यवच्छेदवाची। स तु प्रमाकरणानां चक्षुरादीनां विषयसन्निधानाद्यन्याधीनो भवति। परमेश्वरस्य तु स नित्यप्रमाश्रयत्वरूपः स्वत एव भवतीति। परमेश्वरस्येत्यनेन स्ववशीकृतसकलप्रपञ्चत्ववाचकेन करणापाटवासम्भव उक्तः। 'परमाप्तस्ये' त्यनेन विप्रलिप्साभावः। तत्र हेतुभूतो रागाद्यसम्भवस्तु 'अवाप्तसमस्तकामस्ये 'त्यनेन समर्थितः। उपन्यस्तं शिवस्य भ्रमाद्यभावं श्रुत्युदाहरणेन द्रढयति-**ईशान इति।** 'ईशानः सर्वविद्याना' मिति श्रुतिः शिवस्य सकलविद्यैश्वर्यं प्रतिपादयति। तस्य यथावद्विद्यासम्प्रदायप्रवर्तनविरोधिनां भ्रमादीनामभावं गमयति। अन्यथा तदैश्वर्यानुपपत्तेरिति भावः। ननु, यथावदुपदेष्टुं शक्तोऽपि विप्रलिप्सयान्यथोपदिशेदित्याशङ्क्य तदभावे श्रुत्यन्तरमुदाहरति-**स नो देव इति।** निरतिशयानन्दप्रापकतत्त्वबोधसंयोजकत्वं शिवस्य प्रतिपादयन्ती 'स

नो देव' इति श्रुतिः तस्मिन्विप्रलिप्सागन्धमपि न सहत इति भावः। एवं शास्त्रयोनित्वहेतुमुपपाद्य तस्याध्याहृतेन साध्येनान्वयं दर्शयति--**अत इति**। तत्रानुकूलतर्कमाह-**अज्ञातस्येति**। वक्तुं परबुबोधयिषया शब्दसन्दर्भं रचयितुम्। ननु, सर्वगतस्य परमेश्वरस्य यावदाश्रयव्यापिनी चैतन्यशक्तिः सर्ववस्तुसंयोगिनीति तत एव हेतोस्तस्यास्सर्वविषयत्वसिद्धेः परमेश्वरस्य सर्वज्ञत्वं सिद्ध्यति। किं शास्त्रयोनित्वहेतुप्रसाधन-क्लेशेनेत्याशङ्क्य शास्त्रयोनित्वहेतुना सिद्ध्यन्विशेषः सर्ववस्तुसंयोगेन न सिद्ध्यतीत्याह-**यद्यपीत्यादिना**। ननु, वेदप्रणेतृतारूपं शास्त्रयोनित्वं कुतो विशेषं गमयति यदर्थं सर्ववस्तुसंयोगहेतुमुपेक्ष्य स हेतुरन्विष्यत इत्याकाङ्क्षायां तेन गमयितव्यं विशेषमाह-**यथेति**। 'सकलमपि प्रकाशयती'ति विशेषं वेदानां प्रणेतृता दर्शयति गमयतीति पूर्वेणान्वयः। यथा दीपप्रभा रूपरसादिसम्बन्धाविशेषेऽपि रूपमेव प्रकाशयति न रसादि तथा परमेश्वरप्रभारूपचैतन्यशक्तिरपि किं व्यवस्थितविषयेत्याशङ्का शास्त्रयोनित्वहेतुना सर्वविषयज्ञातृत्वसाधनेनैव निवर्तनीयेति तदर्थमपि तदन्वेषणमावश्यकमिति भावः। ननु, यथा सर्वसंयोगिचैतन्यशक्तिमत्त्वेन निरङ्कुशं सर्वज्ञत्वं न सिद्ध्यति तथैव वेदकर्तृत्वेनापि। तेनापि हि वेदाद्वेदार्थमवगच्छतां महर्षीणामिव वेदोक्तसकलपदार्थाभिज्ञत्वमात्रं सिद्ध्यति न तु वेदार्थबहिर्भूतगङ्गावालुकासङ्ख्यादिज्ञातृत्वमपीत्याशङ्कते-**नन्विति**। सर्वज्ञत्वं सिद्धमिति सकलवेदार्थवेदित्वरूपं सङ्कुचितं सर्वज्ञत्वं सिद्धमित्यर्थः। किमत्रेति। वेदादर्थमवगच्छतां सार्वज्ञ्याद्वेदकर्तृत्वेन सिद्ध्यतीश्वरसार्वज्ञ्ये वैषम्यं नास्ति, उभयस्यापि यावद्वेदार्थविषयतारूपत्वादित्यर्थः। यद्वा सर्वसंयोगित्वेन सिद्ध्यतः सार्वज्ञयात्तत्र नास्ति वैषम्यं विषयसङ्कोचस्योभयत्रापि सद्भावादित्यर्थः। वेदकर्तृत्वेन वेदार्थविषयमेव सार्वज्ञ्यं न सिद्ध्यति किंत्वधिकविषयमपि प्रबन्द्धृणां प्रबन्धमूलज्ञानस्य प्रबन्धाधिकविषयत्वदृष्टेरिति परिहरति-नेति। ननु, अपूर्वप्रबन्धरचयितुरेव प्रबन्धार्थाधीनस्य करणीयप्रबन्धोचितवर्णपदवाक्यविन्यासादिप्रकारस्य तत्परिहरणीयदोषजातस्य तत्तत्प्रदेशकर्तव्यार्थ-सङ्क्षेपविस्तरौचित्यस्य तत्र तत्र सम्भाविताक्षेपसमाधानव्यञ्जनसमर्थविशेषणविन्यास-स्येत्येवमादेर्ज्ञानमपेक्षितम्। अनादिमपौरुषेयप्रबन्धं लोके खिलीभूतं प्रचारयितुं पूर्वसिद्धयैव वर्णपदानुपूर्व्योच्चारयतस्तु तन्नापेक्षितम्। अतोऽनपेक्षितत्वादप्रयोजकमधिकज्ञानं न वेदकर्तृत्वेन सिद्ध्येत्। अन्यत्र दर्शनमात्रेण तत्सिद्धावन्यत्र प्रबन्धान्तराभ्यासजनितमधिकज्ञानं दृष्टमितीश्वरस्यापि तथाभूतमेव तत्सिद्ध्येदित्याशङ्क्याह-**व्याकरणादेरिति**। पाणिनिप्रभृतयो हि परमेश्वरोपज्ञपूर्वपूर्वव्याकरण-प्रसिद्धमर्थजातं सङ्गृह्णन्तोपि रचनीयसूत्रादिगतवर्णपदानुपूर्व्याद्यधिकार्थविषयज्ञानवन्तो भवन्ति। तथा वेदकर्तुरपि वैदिकवर्णपदानुपूर्व्यादिज्ञानमावश्यकमिति वेदकर्तृत्वेन वेदार्थाधिकविषयज्ञानसिद्धिर्भवत्येवेति भावः। यद्यपि महर्षीणामिव सकलवेदार्थाभिज्ञत्वरूपमेव सार्वज्ञ्यं सिद्ध्येत्। तथापि तेषां वेदश्रवणाधीनात्सार्वज्ञ्यात्परमेश्वरस्य वेदरचनामूलभूतं वेदकर्तृत्वेन सिद्ध्यत् सार्वज्ञ्यं विशिष्टं सिद्ध्येदित्याह-**वेदश्चेति**। **सर्वार्थेति**। स्वविषयीभूतसर्वार्थावभासकोऽपीत्यर्थः। वेदः स्वविषयं सर्वमर्थ

न मुख्यया वृत्त्या प्रकाशयति किं त्विक्षुक्षीरमाधुर्यादिवदनुभवैकवेद्यमर्थजातं तत्तदसाधारण-वाचकशब्दाभावान्मुख्यवृत्त्या प्रख्यापयितुमशक्नुवन्यथाकथाञ्चिल्लक्षणया ख्यापयति। यथा-'यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चने'ति। न हि ब्रह्मानन्दगतः सर्वोत्कर्षः केन चिदसाधारणेन शब्देनेत्थंभूत इति प्रख्यापयितुं शक्यते। अतो वाङ्मनसातीतत्ववचनेन लक्षणया ज्ञाप्यते। विशिष्य प्रख्यापयितुमशक्यं किञ्चिदर्थजातं तु सामान्यमुखेन ज्ञापयति। यथा 'अनन्ता वै वेदा' इति आनन्त्यमनन्तोत्कर्षापकर्षशालि। तद्यथा-अतीतक्षणानन्त्यमस्मिन्कल्प इव पूर्वकल्पेऽप्यस्ति। तत्र पूर्वकल्पगतात्तस्मादेतत्कल्पगतं भूयसोत्कृष्यते। एवमागाम्यनन्तकल्पगतानि तान्युत्तरोत्तरमुत्कृष्यन्ते। एवमनन्तविधानन्त्यमध्ये वेदानन्त्यमीदृशमिति विशिष्य प्रदर्शयितुं नास्ति तदसाधारणः शब्दः। अतः सामान्यमुखेन ज्ञाप्यते। एवं सामान्यमुखेन क्वचित्क्वचित्प्रवर्तमानस्य वेदस्य तत्तदर्थं प्रत्यक्षतः स्वयं विशिष्यानुभूय तत्तद्वेदवाक्यप्रणेतुरीश्वरस्य च महति वैषम्ये स्थिते तत्तद्वेदवाक्यश्रवणेन तत्तदर्थमवगच्छतां महर्षीणां तत्तदर्थे न तथा स्पष्टावभासः। यथा यथार्थतस्तदप्रत्यक्षतोऽनुभूय तत्तद्वाक्यप्रणेतुरीश्वरस्येति व्यक्तमेव। न हि क्षीरमाधुर्यविशेषं स्वयमनुभूय क्षीरं मधुरतरमिति प्रयुञ्जानस्येव तस्माद्वाक्यात्तन्माधुर्यमवगच्छतः तथा तत्र स्पष्टावभासोऽस्तीति भावः। नन्वीश्वरस्य वेदरचनामूलत्वेन सिद्ध्यज्ज्ञानं विशिष्य सर्ववेदार्थविषयं तदधीनवर्णपदानुपूर्व्यादिविषयं च सिद्ध्यतु नाम। तथापि तस्य नदीवालुकासङ्ख्यादिविषयत्वासिद्धेर्न निरङ्कुशसार्वज्ञ्यसिद्धिरिति प्रश्नस्य किमुत्तरं निष्पन्नम्। वेदरचनामूलभूतं ज्ञानं यावद्वेदतदर्थविषयमिति सिद्धौ शिवशक्तिर्दीपप्रभान्यायेन व्यवस्थितविषयेति शङ्कायां निरस्तायां नदीवालुकासङ्ख्यादिविषयत्वमपि सिद्ध्यतीति चेत् तथाप्यतीतानागतवस्तुविषयज्ञानं न सिद्ध्यति। ज्ञानसंयोगस्य विद्यमानेष्वेव सम्भवात् सत्कार्यवादे सर्वेषामर्थानां सदा सत्त्वेऽपि तत्तदागन्तुकभूतभविष्यदवस्थाविशेषज्ञानं न सिद्ध्यतीति चेत्। उच्यते। वेदकर्तृत्वेन वेदरचनामूलभूतज्ञानसिद्धौ तद्रचनासमयेष्वसतां भूतभविष्यतामपि वेदार्थानां ज्ञानं सिद्ध्यतीति तद्बहिर्भूतानामपि भूतभविष्यतां ज्ञानं सिद्ध्येत्। शिवज्ञानस्य विद्यमानविषयेषु व्यवस्थितविषयत्वशङ्काया इव भूतभविष्यद्विषयत्वासम्भवशङ्काया अपि निरासे सति सङ्कोचकाभावेन सर्वविषयत्वसिद्धेः। यस्य प्रसादादतीतानागतविषयं ज्ञानं देवर्षिमनुष्यादीनां जायते तस्य परमेश्वरस्यातीतानागतज्ञातृत्वकल्पने कानुपपत्तिः। कारणाधीनमतीतानागतविषयत्वमनित्यज्ञानानां सम्भवति। नित्यस्य तु परमेश्वरज्ञानस्य तत्तदर्थसम्बन्धाधीनमेव तत्तद्विषयत्वं वाच्यमित्यतीतानागतावस्थाविशेषविशिष्टः सम्बन्धाभावे कथं तद्विषयत्वं स्यादिति चेन्न। जीवानामिवेश्वरस्यापि चिच्छक्तिः 'प्रज्ञा च तस्मात्प्रसृता पुराणी'ति वचनप्रामाण्येन नादृष्टादिकारणाधीननानापरिणामविशेषवतीत्यभ्युपगमात्। तदेतत्सर्वमभिप्रेत्योक्तं भाष्ये 'परमेश्वरस्सर्वसाक्षी सर्वं प्रत्यक्षयती'ति। 'नं सर्वं मुख्यतः प्रकाशयती' त्येतन्न सर्वं विशिष्य प्रकाशयतीत्यस्याप्युपलक्षणम्। 'किमपि विशेषेणे'ति दृष्टान्ततयोपन्यस्तम्। ननु, ब्रह्मणो वेदकर्तृत्वे सति

तेन महर्षीणां सार्वज्ञ्याद्विशिष्टमीश्वरस्य सार्वज्ञयं सिद्धयेति तत्रैव न प्रमाणम्। निश्वसितादिश्रुतीनां पड्ढोतृवाक्यादीनामिव तत्तदभिमानिदेवतादृष्टत्वादिविषयत्वादित्याभिप्रायेण शङ्कते-**नन्विति।** प्रजापतेः परमेश्वराद्वेदावाप्तिश्रवणात्तस्य वेदप्रणेतृत्वमनुपपन्नं दूरे तत्सृष्टानामग्न्यादीनामिति तेषां वेदकर्तृत्वश्रुतेरन्यथा नेतव्यत्वेऽपि परमेश्वरस्य वेदकर्तृत्वश्रुतयो नान्यथा नेतव्याः। बाधकाभावात्। अतः सृज्यमानाय प्रजापतये वेदप्रदानश्रवणात् ततः प्रागेव परब्रह्मणा वेदाः प्रणीता इत्यभ्युपगन्तव्यमित्याशयेन **परिहरति-नेति।** 'सर्वदेवानामादिमस्ये'ति विशेषणमग्न्यादीनां वेदकर्तृत्वश्रवणस्यान्यथा नेतव्यतायाः कैमुतिकन्यायेन सिद्धिं दर्शयितुम्। यद्यप्युदाहृतमन्त्रे पूर्वमित्युक्त्यैवोपन्यस्तविशेषणार्थस्सिद्धयति तथापि तस्य स्पष्टीकरणार्थं मन्त्रान्तरमुदाहरति-**तथाहीति।** अस्मिन्मन्त्रे देवानां प्रथममिति स्पष्टमुक्तम्। पुरस्तात् कल्पादौ। पश्यतेत्यडागमाभावः आत्मनेपदं चेत्युभयं छान्दसम्। 'जायमान' मित्यनेन जननावस्थायामेव चराचरसृष्ट्युपयोगिसकलवेदतदर्थस्फूर्तिसमर्थयानुग्रहदृष्ट्या दर्शनं व्यज्यते। अत एव 'यो ब्रह्माणं विदधाती'ति मन्त्रेऽपि लडाख्याताभ्यां सृष्टिवेदप्रदानयोस्समानकालत्वमुक्तम्। पुराणेषु च 'ज्ञानमप्रतिमं यस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टय'मिति हिरण्यगर्भस्य ज्ञानादीनां सहजत्वमुक्तम्। 'स्मृत्ये' त्यनेन मोक्षार्थं दहराद्युपासनारूपा स्मृतिसन्ततिरुच्यते। तज्जन्यसाक्षात्कारो वा तद्वाचकेन लक्ष्यते। 'स्मृतिलाभे सति सर्वग्रन्थीनां विप्रमोक्ष' इति श्रुत्यन्तरेऽपि मोक्षजनकज्ञाने स्मृतिशब्दप्रयोगो दृश्यते। मन्त्रं व्याचष्टे-**महर्षिरिति।** तस्मिञ्जन्मनि कुतश्चिदध्ययनमनपेक्ष्य स्वयमेव सूक्तविशेषरूपवेदैकदेशद्रष्टारो हि वसिष्ठादय ऋषय उच्यन्ते। अतः परमेश्वरः कदाचिदप्यध्ययनमनपेक्ष्य सकलवेदप्रणेतृत्वान्महर्षिरिति निर्दिष्टः। इदं विशेषणं हिरण्यगर्भसृष्ट्यवस्थायां वदेप्रदानरूपानुग्रहदृष्ट्या दर्शनं समर्थयितुम्। ततः प्रागेव वेदप्रणेतृत्वप्रदर्शनार्थं सर्वज्ञत्वादिनेति। निरतिशयं सर्वज्ञत्वमत्रैव विश्रान्तमिति भावः। रुद्रशब्दोऽत्र संसाररुजां द्रावके परब्रह्मणि वर्तते न तु संहाररुद्रादाविति व्यचाष्टे-**रुद्र इति। स्वसङ्कल्पेनेति।** निमित्तरूपस्य स्वस्य सङ्कल्पेन प्रकृत्यवस्थाविशेषात्मकोपादानरूपात् स्वात्मनो जायमानमित्यर्थः। 'हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु'इति श्वेताश्वतरोपनिषद्यस्य मन्त्रस्य पाठात्स्वसङ्कल्पेनेति विशेषितम्। 'पश्यते'ति दर्शनमात्रोक्तेः फलाभावात् 'यो वै वेदांश्च प्रहिणोति' इति मन्त्रान्तरदर्शनाच्च विशिष्टदर्शनमिह विवक्षितमित्यभिप्रेत्य विशेषयति-**सर्वज्ञानेति। परमामृतेति।** परमममृतं ब्रह्म तल्लक्ष्मीसमावेशः सत्यसङ्कल्पत्वादिना तत्सादृश्यप्राप्तिः परानंदप्राप्तिः। उक्तस्मृतिविशेषणार्थस्सर्वोऽपि 'शुभये' ति तद्विशेषणेन लब्ध इत्यभिप्रेत्याह-**अत एवेति।** सामरस्यमैककण्ठ्येन ब्रह्मणि तात्पर्यं तस्मान्निश्वसितादिश्रुतीनां षड्ढोतृवाक्यादिवैषम्यात् ततः सकलवेदकर्तृत्वमीश्वरस्य सिद्ध्यतीत्युपसंहरति-तत इति। तथापि वेदनित्यत्वश्रुतिविरोधः स्यादित्याशङ्क्य 'पूर्वं सृष्टेः प्रा' गित्यादिग्रन्थेन सूचिते तत्समाधाने स्थित एव समाधानान्तरमाह-**वाच इति।** पूर्वं प्रलयेषु

घटादीनामिव वेदानामसत्त्वेऽपि प्रतिकल्पं प्रादुर्भावात् प्रवाहनित्यत्वमस्तीति तद्विषयतया वेदनित्यत्वश्रुतेरविरोध उक्तः। इदानीं तु क्रमविशेषविशिष्टवर्णरूपाणां वेदानां प्रलयेऽपि क्रमोपाधिभूतपरमेश्वरबुद्ध्यनुवृत्त्या सत्तानुवृत्तिरस्तीति तद्विषयतयेति भेदः। ननु, वेदानां प्रलयेऽपि सत्त्वे कथं तेषां सर्गादावीश्वरप्रणीतत्वमुपपद्यत इत्याशङ्क्याह-तत इति। प्रलये वेदानां परमेश्वरबुद्धिगोचरतयैवानुवृत्तिः सर्गादौ तु तेषां परश्रवणगोचरतया वैखरीवृत्तिविशिष्टत्वेन परमेश्वरप्रणीतत्वमित्युभयमप्यविरोधेनोपपद्यते। अत एव 'अनादिनिधना दिव्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी भूता यतः सर्वाः प्रवृत्तयः।।'' इति वेदानां नित्यत्वेऽपि शिवप्रणीतत्वं स्मर्यत इति भावः।।३।।

इति शास्त्रयोनित्वाधिकरणम्।।।३।।

अथ समन्वयाधिकरणे

तत्तु समन्वयात्॥

कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते? यावता "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" (जै० सू० १/२/१) इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम्।

अतो वेदान्तानामानर्थक्यम्; अक्रियार्थत्वात्, कर्तृ-देवतादिप्रकाशनार्थत्वेन वा क्रियाशेषत्वम्, उपासनादिक्रियान्तरविधानार्थत्वं वा। नहि परिनिष्ठितवस्तुप्रतिपादनं संभवति; प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनः। तत्प्रतिपादेन च हेयोपादेयरहिते पुरुषार्थाभावात्। अत एव "सोऽरोदीत्" इत्येवमादीनामानर्थक्यं मा भूदिति "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" (जै० सू० 1/2/7) इति स्तावकत्वेनार्थवत्त्वमुक्तम्। मन्त्राणां च "इषे त्वा" इत्यादीनां क्रिया-तत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तम्। न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वा। न च परिनिष्ठिते वस्तुस्वरूपे विधिः संभवति; क्रियाविषयत्वाद् विधेः। तस्मात् कर्मापेक्षितकर्तृस्वरूप-देवतादिप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम्। अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते, तथाऽपि स्ववाक्यगतोपासनादिकर्मपरत्वम्। तस्मान्न ब्रह्मणः शास्त्रयोनित्वम्।

इति प्राप्ते, उच्यते- *तत्तु समन्वायात्*॥ तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। *तत्*=ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्ति-स्थिति-लयकारणं वेदान्तशास्त्रादेवावगम्यते। कथम्? *समन्वयात्*॥

सर्वेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि-"सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्" (छा० 6/2/1) "आत्मा वा इदमग्र आसीत् (ऐत० 2/1/1/1) "तदेतद् ब्रह्मापूर्वमनपरमन्तरमबाह्यम्" अयमात्मा सर्वानुभूः" (बृह० २/५/१४) "ब्रह्मैवेदमृतं पुरस्तात्" (मुण्ड० २/२/११) इत्यादीनि। न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पना युक्ता; श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। न च तेषां कर्तृस्वरूपप्रतिपादनपरताऽवसीयते; "तत् केन कं पश्येत्" (बृह० २/४/१३) इत्यादिक्रियाकारकफलनिराकरणश्रुतेः। न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यखादिविषयत्वं ब्रह्मणः; "तत्त्वमसि" (छान्दो०६/८/७) इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्। यत्तु-हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति, ; नैष दोषः हेयोपादेयशून्य-ब्रह्मात्मतावगमादेव सर्वक्लेशप्रहाणात्पुरुषार्थसिद्धेः। देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति; एकत्वे हेयोपादेयपशून्यतया

क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः। न ह्येकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः संभवोऽस्ति, येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपद्येत। यद्यप्यन्यत्र वेदवाक्यानां न विधिसंस्पर्शमन्तरेण प्रमाणत्वं दृष्टम्; तथाऽप्यात्मविज्ञानस्य फलपर्यन्तत्वान्न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुम्।

न चानुमानगम्यं शास्त्रप्रामाण्यम्, येनान्यत्र दृष्टं निदर्शनमपेक्ष्येत।

तस्मात् सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वम्।

अत्रापरे प्रत्यवतिष्ठन्ते-

यद्यपि शास्त्रप्रमाणकं ब्रह्म; तथाऽपि प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यते। यथा यूपाहवनीयादीन्यलौकिकान्यपि विधिशेषयता शास्त्रेण समर्प्यन्ते, तद्वत्।

कुत एतत्? प्रवृत्ति-निवृत्तिप्रयोजनत्वाच्छास्त्रस्य। तथाहि शस्त्रतात्पर्यविद आहुः-"दृष्टो हि तस्यार्थः कर्मावबोधनम्" इति। "चोदनेति क्रियायाः प्रवर्तकं वचनम्"। "तस्य ज्ञानमुपदेशः" -(जै० सू०१।१।५) "तद्भूतानां क्रियार्थेन समाम्नायः"-(जै० सू० १।१।२५) "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्"- '(जै० सू० १।२।१) इति च। अतः पुरुषं क्वचिद्विषयविशेषे प्रवर्तयत्कुतश्चिद्विषयविशेषान्निवर्तयच्चार्थवच्छास्त्रम्। तच्छेषतया चान्यदुपयुक्तम्; तत्सामान्याद् वेदान्तानामपि तथैवार्थवत्त्वं स्यात्।

सति च विधिपरत्वे यथा स्वर्गादिकामस्याग्निहोत्रादि साधनं विधीयते, एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत इति युक्तम्।

ननु इह जिज्ञास्यवैलक्षण्यमुक्तम्, कर्मकाण्डे भाव्यो धर्मो जिज्ञास्यः, इह तु भूतं नित्यनिवृत्तं ब्रह्म जिज्ञास्यमिति, तत्र धर्मज्ञानफलादनुष्ठानापेक्षाद्विलक्षणं ब्रह्मज्ञानफलं भवितुमर्हति, *नार्हत्येवं भवितुम्*; कार्यविधिप्रयुक्तस्यैव ब्रह्मणः प्रतिपाद्यमानत्वात्-"आत्मा वा अरे द्रष्टव्यः" (बृह०२।४।५) इति।

"य आत्माऽपहतपाप्मा-सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" (छान्दो० ८।७।१) ''आत्मेत्येवोपासीत'' (बृ०1/4/7) ''आत्मानमेव लोकमुपासीत'' (बृ० 1/4/15) "ब्रह्म वेद ब्रह्मैव भवति" (मुण्ड० ३।२।९) इत्यादिविधानेषु सत्सु, कोऽसावात्मा? किं तद् ब्रह्म? इत्यकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः-नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्य-शुद्ध मुक्तस्वभावो विज्ञानमानन्दं ब्रह्म" इत्येवमादयः।

तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति। कर्तव्यविध्यननुप्रवेशे वस्तुमात्रकथने हानोपादानासंभवात् 'सप्तद्वीपा वसुमती' 'राजाऽसौ गच्छती'त्यादिवाक्यवद्वेदान्तवाक्यानामानर्थक्यमेव स्यात्।

ननु वस्तुमात्रकथनेऽपि 'रज्जुरियं नायं सर्प:' इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेनार्थवत्त्वं दृष्टम्, तथेहाप्यसंसार्यात्मवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वंस्यात्, *स्यादेतदेवम्*; यदि रज्जुस्वरूपश्रवण इव सर्पभ्रान्ति:, संसारित्वभ्रान्तिर्ब्रह्मस्वरूपश्रवणमात्रेण निवर्तेत, नतु निवर्तते; श्रुतब्रह्मणोऽपि यथापूर्वं सुख-दु:खादिसंसारिधर्मदर्शनात्, "श्रोतव्यो मन्तव्यो निदिध्यासितव्य:" (बृह० २।४।५) इति च श्रवणोत्तरकालयोर्मनन-निदिध्यासनयोर्विधिदर्शनात्। तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति।

अत्राभिधीयते—न; कर्म-ब्रह्मविद्याफलयोर्वैलक्षण्यात्। शारीरं वाचिकं मानसं च कर्म श्रुति-स्मृतिसिद्धं धर्माख्यम्—यद्विषया जिज्ञासा "अथातो धर्मजिज्ञासा" (जै० सू० १।१।१) इति: सूत्रिता; अधर्मोऽपि हिंसादि: प्रतिषेधचोदनालक्षणत्वाद् जिज्ञास्य: परिहाराय। तयोश्चोदनालक्षणयोरर्थादर्थयोर्धर्माधर्मयो: फले प्रत्यक्षे सुख-दु:खे शरीर-वाङ्मनोभिरेवोपभुज्यमाने विषयेन्द्रियसंयोगजन्ये ब्रह्मादिषु स्थावरान्तेषु प्रसिद्धे। मनुष्यत्वादारभ्य ब्रह्मान्तेषु देहवत्सु सुखतारतम्यमनुश्रूयते। ततयच तद्धेतोधर्मस्य तारतम्यं गम्यते। धर्मतारतम्यादधिकारितारतम्यम्। प्रसिद्धं चार्थित्व-सामर्थ्यादिकृतमधिकारितारतम्यम्। तथा च यागाद्यनुष्ठायिनामेव विद्या समाधिविशेषादुत्तरेण पथा गमनम्, केवलैरिष्टापूर्तदत्तसाधनैर्धूमादिक्रमेण दक्षिणेन पथा गमनम्, तत्रापि सुखतारतम्यं तत्साधनतारतम्यं च शास्त्राद् "यावत् संपातमुषित्वा" (छान्दो० ५।१०।६) इत्यस्माद्गम्यते। तथा मनुष्यादिषु नारकस्थावरान्तेषु सुखलवश्चोदनालक्षणधर्मसाध्य एवेति गम्यते तारतम्येन वर्तमान:। तथोर्ध्वगतेष्वधोगतेषु च देहवत्सु दु:खतारतम्यदर्शनात्तद्धेतोरधर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते। एवमविद्यादिदोषवतां धर्माधर्मतारतम्यनिमित्तं शरीरोपादानपूर्वकं सुख-दु:खतारतम्यमनित्यं संसाररूपं श्रुति-स्मृति-न्यायप्रसिद्धम्। तथा च श्रुति:-"न ह वै सशरीरस्य सत: प्रियाप्रिययोरपहतिरस्ति" इति यथावर्णितं संसाररूपमनुवदति। "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत:" (छान्दो० ८।१२।१) इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षणधर्मकार्यत्वं मोक्षाख्यस्याशरीरत्वस्य प्रतिषिध्यत इति गम्यते। धर्मकार्यत्वे हि प्रियाप्रियस्पर्शनप्रतिषेधो नोपपद्यते। अशरीरत्वमेव धर्मकार्यमिति चेत्, न; तस्य स्वाभाविकत्वात्। "अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति"।। (कठ० २।२।२१)। "अप्राणो ह्यमना:" (मुण्ड० २।१।२) "असङ्गो ह्ययं पुरुष:" (बृह० ४।३।१५) इत्यादिश्रुतिभ्य:। अत एवानुष्ठेयकर्मफलविलक्षणं मोक्षाख्यमशरीरत्वं नित्यमिति सिद्धम्। तत्र किंचित्परिणामि नित्यम्—यस्मिन् विक्रियमाणेऽपि 'तदेवेदमि 'ति बुद्धिर्न विहन्यते; इदं तु पारमार्थिकम्, कूटस्थनित्यम्, व्योमवत् सर्वव्यापि, सर्वविक्रियारहितम्, नित्यतृप्तं निरवयवं स्वयंज्योति:स्वभावम्। यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते। तदेतदशरीरत्वं मोक्षाख्यम्। "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च" (क० २।१४) इत्यादिश्रुतिभ्य:।

अतस्तद् ब्रह्म, यस्येयं जिज्ञासा प्रस्तुता। तद्यदि कर्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एवं स्यात्। तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिचदतिशयो मोक्ष इति प्रसज्येत। नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यते। अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्तः।

अपि च "ब्रह्म वेद ब्रह्मैव भवति" (मुण्ड० ३।१।९) "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टेपरावरे" (मुण्ड० २।२।८)। "आनन्दं ब्रह्मणो विद्वान्। न बिभेति कुतश्चन" (तैत्ति० २।९) "अभयं वै जनक प्राप्तोऽसि" (बृह० ४।२।४) "तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवन्" (वाजसनेयिब्राह्मणोप० १।४।१०) "तत्र को मोहः कः शोक एकत्वमनुपश्यतः" (ईशा० ७) इत्येवमाद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति। तथा "तद्धैतत्पयश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च" (बृह० १।४।१०) इति ब्रह्मदर्शन-सर्वात्मभावयोर्मध्ये कर्तव्यान्तरवारणायोदाहार्यम्। यथा "तिष्ठन् गायती"ति तिष्ठति-गायत्योर्मध्ये तत्कर्तृकं कार्यान्तरं नास्तीति गम्यते। "त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि" (प्र० ६।८) "श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति। सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयतु" (छान्दो० ७।१।३) "तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुारः"(छान्दो० ७।२६।२) इति चैवमाद्याः श्रुतयो मोक्षप्रतिबन्धनिवृत्तिमात्रमेवात्मज्ञानस्य फलं दर्शयन्ति।

तथा चचार्यप्रणीतन्यायोपबृंहितं सूत्रम्–"दुःख-जन्म-प्रवृत्ति-दोष-मिथ्या-ज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" (न्यायसू० १।१।१) इति।

मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति।

न चेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपम्; यथा "अनन्तं वै मनोऽनन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति" (बृह० ३।१।९) इति। न चाध्यासरूपम्; यथा "मनो ब्रह्मोत्युपासीत" (छान्दो० ३।१८।१) "आदित्यो ब्रह्मेत्यादेशः" (छान्दो ३।३९।१) इति च मनआदित्यादिषु ब्रह्मदृष्ट्यध्यासः। नापि विशिष्टक्रियायोगनिमित्तम्–"वायुर्वाव संवर्गः" (छान्दो० ४।३।१,३) इतिवत्। नाप्याज्यावेक्षणा-दिकर्मवत्कर्माङ्गसंस्काररूपम्। संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने "तत्त्वमसि" (छान्दो० १।८।७) "अहं ब्रह्मास्मि" (बृह० १।४।१०) "अयमात्मा ब्रह्म" (बृह० २,५।१९) इत्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयः पीड्येत। "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः" (मुण्ड० २।२।८) इति चैवमादीन्यविद्यानिवृत्तिफलश्रवणान्युपरुध्येरन्। 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्ड ३।२।९) इति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे न सामञ्जस्येनोपपद्येरन्। तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानम्। अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या।

किं तर्हि? प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद् वस्तुतन्त्रा। एवंभूतस्य ब्रह्मणस्तज्ज्ञानस्य च न कयाचिदुक्त्या शक्य: कार्यानुप्रवेश: कल्पयितुम्। न च विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मण:; "अन्यदेव तद्विदितादथो अविदितादधि" (केन० १।३) इति विदिक्रियाकर्मत्वप्रतिषेधात्, "येनेदं सर्वं विजानाति तं केन विजानीयात्" (बृह०२।४।१३) इति च। तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति– "यद्वाचानभ्युदितं येन वागभ्युद्यते" इत्यविषयत्वं ब्रह्मण उपन्यस्य "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" (केन० १।४) इति। अविषयत्वे ब्रह्मण: शास्त्रयोनित्वानुपपत्तिरिति चेत्, न; अविद्याकल्पितभेदनिवृत्तिपर त्वाच्छास्त्रस्य।

नहि शास्त्रमिदन्तया विषयभूतं ब्रह्म प्रतिपिपादयिषति। किं तर्हि? प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्य–वेदितृ–वेदनादिभेदमपनयति। तथा च शास्त्रम्– "यस्यामतं तस्य मतं मतं यस्य न वेद स:। अविज्ञातं विजानतां विज्ञातमविजानताम्।।" (केन० २।३) "न दृष्टेर्द्रष्टारं पश्ये:" ''न विज्ञातेर्विज्ञातारं विजानीया:'' (बृ० ३/४/२) इति चैवमादि।

अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणन्न मोक्षस्यानित्यत्वदोष:।

यस्य तूत्पाद्यो मोक्ष:, तस्य मानसं वाचिकं कायिकं वा कार्यमपेक्षत इति युक्तम्, तथा विकार्यत्वे च; तयो: पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम्। नहि दध्यादि विकार्यम् उत्पाद्यं वा घटादि नित्यं दृष्टं लोके।

न चाप्यत्वेनापि कार्यापेक्षा:; स्वात्मस्वरूपत्वे सत्यनाप्यत्वात्। स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वम्; सर्वगतत्वेन नित्याप्तस्वरूपत्वात्सर्वेण ब्रह्मण आकाशस्येव।

नापि संस्कार्यो मोक्ष:, येन व्यापारमपेक्षेत। संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्यात्? दोषापनयनेन वा?

न तावद् गुणाधानेन संभवति; अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य। नापि दोषापनयनेन; नित्यशुद्धब्रह्मस्वरूपत्वान्मोक्षस्य। स्वात्मधर्म एव संस्तिरोभूतो मोक्ष: क्रिययाऽऽत्मनि संस्क्रियमाणेऽभिव्यज्यते, यथाऽऽदर्शे निघर्षणक्रियया संस्क्रियमाणे भावस्वरत्वं धर्म इति चेत्, न; क्रियाश्रयत्वानुपपत्तेरात्मन:। यदाश्रया क्रिया, तमविकुर्वती नैवात्मानं लभते। यद्यात्मा क्रियया विक्रियेत, अनित्यत्वमात्मन: प्रसज्येत। "अविकार्योऽयमुच्यते" इति चैवमादीनि वाक्यानि बाध्येरन्। तच्चानिष्टम्। तस्मान्न स्वाश्रया क्रियाऽऽत्मन: संभवति। अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तयाऽऽत्मा संस्क्रियते।

ननु देहाश्रयया स्नानाचमन–यज्ञोपवीतादिकया क्रियया देहो संस्क्रियमाणो दृष्ट:, *न*; देहसंहतस्यैवाविद्यागृहीतस्यात्मन: संस्क्रियमाणत्वात्। प्रत्यक्षं हि स्नानाचमनादेर्देहसमवायित्वम्। तथा देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीत: संस्क्रियत इति युक्तम्। यथ

देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलम्; 'अहमरोग:' इति यत्र बुद्धिरुत्पद्यते, एवं स्नानाचमना–यज्ञोपवीतादिन–'अहं शुद्ध: संस्कृत:' इति यत्र बुद्धिरुत्पद्यते, स संस्क्रियते। स च देहेन संहत एवं। तेनैव ह्यहंकर्त्राऽहंप्रत्ययविषयेण प्रत्ययिना सर्वा: क्रिया निर्वर्त्यन्ते। तत्फलं च स एवाश्नाति; "तयोरन्य: पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" (मुण्ड० ३।१।१) इति च।

तथाच "एको देव: सर्वभूतेषु गूढ: सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्ष: सर्वभूताधिवास: साक्षी चेता केवलो निर्गुणश्च" (श्वेता० ६।११) इति, "स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्" (ईशा० ८) इति चैतौ मन्त्रावनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयत:।

ब्रह्मभावश्च मोक्ष:। तस्मान्न संस्कार्योऽपि मोक्ष:। अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनचिद् दर्शयितुम्।

तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते।

ननु ज्ञानं नाम मानसी क्रिया, *न*; वैलक्षण्यात्। क्रिया हि नाम सा, यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषचित्तव्यापाराधीना च यथा–"यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद् वषट् करिष्यन्" इति, "संध्या मनसा ध्यायेत्" (ऐ० ब्रा० ३।८।१) इति चैवमादिषु। ध्यानं चिन्तनं यद्यपि मानसम्; तथाऽपि पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यम्; पुरुषतन्त्रत्वात्, ज्ञानं तु प्रमाणजन्यम्। प्रमाणं च यथाभूतवस्तुविषयम्। अतो ज्ञानं कर्तुमकर्तुमन्यथा वा कर्तुमशक्यम्, केवलं वस्तुतन्त्रमेव तत्, न चोदनातन्त्रम्। नापि पुरुषतन्त्रम्। तस्मान्मानसत्वेऽपि ज्ञानस्य महद् वैलक्षण्यम्। यथा च "पुरुषो वाव गौतमाग्नि:" "योषा वाव गौतमाग्नि:" (छान्दो० ५।७,८।१) इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति, केवलचोदनाजन्यत्वात्क्रियैव सा, पुरुषतन्त्रा च या तु प्रसिद्धेऽग्नावग्निबुद्धि:, न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा, किं तर्हि? प्रत्यक्षविषयवस्तुतन्त्रा क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्। तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्। तद्विषये लिङादय: श्रूयमाणा अप्यनियोज्यविषयत्वात् कुण्ठीभवन्त्युपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यवत्; अहेयानुपादेयवस्तुविषयत्वात्।

किमर्थानि तर्हि–"आत्मा वा अरे द्रष्टव्य: श्रोतव्य:" इत्यादीनि विधिच्छायानि वचनानि?

स्वाभाविकप्रवृत्तिविषयविमुखीकरणार्थानीति ब्रूम:। यो हि बहिर्मुख: प्रवर्तते पुरुष:– 'इष्टं मे भूयाद् अनिष्टं मा भूदि'ति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसंघातप्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति–"आत्मा वा अरे द्रष्टव्य:" इत्यादीनि। तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते-''इदं सर्वं यदयमात्मा'' (बृह० २।४।६) ''यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् केन कं विजानीयात्'' ''विज्ञातारमरे केन

विजानीयात्'' (बृह० ४।५।१५) ''अयमात्मा ब्रह्म'' (ब्रह० २।५।१९) इत्यादिभिः।।

यदप्यकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति, तत्तथैवेत्यभ्युपगम्यते। अलंकारो ह्ययमस्माकं यद् ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता चेति। तथाच श्रुतिः-''आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्।।'' (भ० गो० १५।२३) इति स्मृतिः। तस्मान्न प्रतिपत्तिविधिविषतया ब्रह्मणः समर्पणम्। यदपि केचिदाहुः-प्रवृत्तिविधितच्छेषव्यतिरेकेण केवलवस्तुवादा वेदभागो नास्तीति, तन्न; औपनिषदस्य पुरुषस्यानन्यशेषत्वात्। योऽसावुपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्म, उत्पाद्यादिचतुर्विधद्रव्यविलक्षणः स्वप्रकरणस्थोऽनन्यशेषः, नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम्, 'स एष नेति नेत्यात्मा' (बृह० ३।९।२६) इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात्, य एव निराकर्ता तस्यैवात्मत्वात्।

ननु आत्माऽहंप्रत्ययविषयत्वादुपनिषत्स्वेव प्राधान्येन विज्ञायत इत्युनपपन्नम्, *न*; तत्साक्षित्वेन प्रत्युक्तत्वात्। न ह्यहंप्रत्ययविषयकर्तृव्यतिरेकेण तत्साक्षी सर्वभूतस्थः सम एकः कूटस्थनित्यः पुरुषो विधिकाण्डे तर्कसमये वा केनचिदधिगतः सर्वस्यात्मा। अतः स न केनचित्प्रत्याख्यातुं शक्यो विधिशेषत्वं वा नेतुम्। आत्मत्वादेव च सर्वेषां न हेयो नाप्युपादेयः।

सर्वं हि विकारजातं विनश्यत् पुरुषान्तं विनश्यति। पुरुषो विनाशहेत्वभावादविनाशी, विक्रियाहेत्वभावाच्च कूटस्थनित्यः। अत एव नित्य-शुद्ध-बुद्ध-मुक्तस्वभावः। तस्मात् ''पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः'' काठ० 1/3/11) ''तं त्वौपनिषदं पुरुषं पृच्छामि''। ((वृह० ३।९।२३) इति चौपनिषदत्वविशेषणं पुरुषस्योपनिषत्सु प्राधान्येन प्रकाश्यमानत्व उपपद्यते। अतो भूतवस्तुपरो वेदभागो नास्तीति वचनं साहसमात्रम्।

यदपि शास्त्रतात्पर्यविदामनुक्रमणम्-'दृष्टो हि तस्यार्थः कर्मावबोधनम्' इत्येवमादि, तद्धर्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम्।

अपिच ''आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्'' इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः। प्रवृत्तिनिवृत्तिविधितच्छेषव्यतिरेकेण भूतं चेद्वस्तूपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं नोपदिशतीति को हेतुः? नहि भूतमुमदिश्यमानं क्रिया भवति। अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात्क्रियार्थ एव भूतोपदेश इति चेत्, नैष दोषः; क्रियार्थत्वेऽपि क्रियानिर्वर्तनशक्तिमद्वस्तूपदिष्टमेव, क्रियार्थत्वं तु प्रयोजनं तस्य। नचैतावता वस्त्वनुपदिष्टं भवति। यदि नामोपदिष्टम्, किं तव तेन स्यादिति?

उच्यते-अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति। तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन।

अपि च "ब्राह्मणो न हन्तव्यः" इत्येवमाद्या निवृत्तिरुपदिश्यते। न च सा क्रिया। नापि क्रियासाधनम्। अक्रियार्थानामुपदेशोऽनर्थकश्चेत्, "ब्राह्मणो न हन्तव्यः" इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तम्। तच्चानिष्टम्।

न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुम्, हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण।

नञश्चैष स्वभावो यत्स्वसंबन्धिनोऽभावं बोधयतीति। अभावबुद्धिश्चौदासीन्यकारणम्। सा च दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति। तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव "ब्राह्मणो न हन्तव्यः" इत्यादिषु प्रतिषेधार्थं मन्यामहेऽन्यत्र प्रजापतिव्रतादिभ्यः।।

तस्मात्पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवादविषयमानर्थक्याभिधानं द्रष्टव्यम्। यदप्युक्तम्-कर्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात् 'सप्तद्वीपा वसुमती' त्यादिवदिति, तत् परिहृतम्; 'रज्जुरियं नायं सर्पः' इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात्।

ननु-श्रुतब्रह्मणोऽपि यथापूर्वं संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमित्युक्तम्, *अत्रोच्यते*-नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वं शक्यं दर्शयितुम्, वेदप्रमाणजनितब्रह्मात्मभावविरोधात्। नहि शरीराद्यात्माभिमानिनो दुःखभयादिमत्त्वं दृष्टमिति तस्यैव वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तौ तदेव मिथ्याज्ञाननिमित्तं दुःखभयादिमत्त्वं भवतीति शक्यं कल्पयितुम्। नहि धनिनो गृहस्थस्य धनाभिमानिनो धनापहारनिमित्तं दुःखं दृष्टमिति तस्यैव प्रव्रजितस्य धनाभिमानरहितस्य तदेव धनापहारनिमित्तं दुःखं भवति। न च कुण्डलिनः कुण्डलित्वाभिमाननिमित्तं सुखं दृष्टमिति तस्यैव कुण्डलवियुक्तस्य कुण्डलित्वाभिमानरहितस्य तदेव कुण्डलित्वाभिमाननिमित्तं सुखं भवति। तदुक्तं श्रुत्या-"अशरीरं" वाव सन्तं न प्रियाप्रिये स्पृशतः" (छन्दो॰ ८।१२।१) इति। शरीरे पतितेऽशरीरत्वं स्यात्, न जीवत इति चेत्, न; सशरीरत्वस्य मिथ्याज्ञाननिमित्तत्वात्। नह्यात्मनः शरीरात्मनः शरीरात्माभिमानलक्षणं मिथ्याज्ञानं मुक्त्वाऽन्यतः सशरीत्वं शक्यं कल्पयितुम्। नित्यमशरीरत्वमकर्मनिमित्तत्त्वादित्यवोचाम। तत्कृतधर्माधर्मनिमित्तं सशरीरत्वमिति चेत्, न; शरीरसंबन्धस्यासिद्धत्वाद्धर्माधर्मयोरात्मकृतत्वासिद्धेः। शरीरसंबन्धस्य धर्माधर्मायोस्तत्कृतस्तत्कृत्वस्य चेतरेतराश्रयत्वप्रसङ्गादन्धपरम्परैषाऽनादित्वकल्पना; क्रियासमवायाभावाच्चात्मनः कतृत्वानुपपत्तेः। संनिधानमात्रेण राजप्रभृतीनां दृष्टं कर्तृत्वमिति चेत्, न; धनदानाद्युपार्जितभृत्यसंबन्धित्वात्तेषां कर्तृत्वोपपत्तेः,

नत्वात्मनो धनदानादिवच्छरीरादिभिः स्व-स्वामिसंबन्धनिमित्तं किंचिच्छक्यं कल्पयितुम्। मिथ्याभिमानस्तु प्रत्यक्षः संबन्धहेतुः। एतेन यजमानत्वमात्मनो व्याख्यातम्।

अत्राहुः-देहादिव्यतिरिक्तस्यात्मन आत्मीये देहादावभिमानो गौणः, न मिथ्येति चेत्, न; प्रसिद्धवस्तुभेदस्य गौणत्व-मुख्यत्वप्रसिद्धेः। यस्य हि प्रसिद्धो वस्तुभेदः, यथा केसरादिमानाकृतिविशेषोऽन्वय-व्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाग् मुख्योऽन्यः प्रसिद्धः, ततश्चान्यः पुरुषः प्रायिकैः क्रौर्य-शौर्यादिभिः सिंहगुणैः संपन्नः प्रसिद्धः, तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतो नाप्रसिद्धवस्तुभेदस्य। तस्य त्वन्यत्रान्यशब्द-प्रत्ययौ भ्रान्तिनिमित्तावेव भवतो न गौणौ; यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे पुरुषशब्द-प्रत्ययौ स्थाणुविषयौ; यथावा शुक्तिकायामकस्माद्रजतमिदमिति निश्चितौ शब्द-प्रत्ययौ; तद्वद्देहादिसङ्घातेऽहमिति निरुपचारेण शब्द-प्रत्ययावात्मानात्माविवेके-नोत्पद्यमानौ कथं गौणौ शक्यौ वदितुम्?

आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः। तस्माद्देहादिव्यतिरिक्तात्मास्तित्ववादिनां देहादावहंप्रत्ययो मिथ्यैव, न गौणः। तस्मान्मिथ्याप्रत्ययनिमित्तत्वात्सशरीत्वस्य, सिद्धं जीवतोऽपि विदुषोऽशरीरत्वम्। तथा च ब्रह्मविद्विषया श्रुतिः-''तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते। अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव'' (वृह० ४।४।७) इति। ''सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इव'' इति च। स्मृतिरपि च-''स्थितप्रज्ञस्य का भाषा'' (भ० गी० २।५४) इत्याद्या स्थितप्रज्ञलक्षणान्याचक्षाणा विदुषः सर्वप्रवृत्त्यसंबन्धं दर्शयति। तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वम्, यस्य तु यथापूर्वं संसारित्वम्, नासाववगतब्रह्मात्मभाव इत्यनवद्यम्। यत्पुनरुक्तं श्रवणात्पराचीनयोर्मनन-निदिध्यासनयोर्दर्शनाद्विधिशेषत्वं ब्रह्मणः, न स्वरूपपर्यवसायित्वमिति, न; अवगत्यर्थत्वान्मनन-निदिध्यासनयोः। यदि ह्यवगतं ब्रह्मान्यत्र विनियुज्येत, भवेत्तदा विधिशेषत्वम्, नतु तदस्ति; मनन-निदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात्। तस्मान्न प्रतिपत्तिविधिविषयतया शास्त्रप्रमाणकत्वं ब्रह्मणः संभवति, इत्यतः स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयादिति सिद्धम्।

एवं च सति ''अथातो ब्रह्मजिज्ञासा'' इति तद्विषयः पृथक्शास्त्रारम्भ उपपद्यते। प्रतिपत्तिविधिपरत्वे हि ''अथातो धर्मजिज्ञासा'' इत्येवारब्धत्वान्न पृथक्शास्त्रमारभ्येत। आरभ्यमाणं चैवमारभ्येत-अथातः परिशिष्टधर्म-जिज्ञासेति, ''अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' (जै० ४।१।१) इतिवत्। ब्रह्मात्मैक्याव-गतिस्त्वप्रतिज्ञातेति तदर्थो युक्तः शास्त्रारम्भः-'अथातो ब्रह्मजिज्ञासा' इति। तस्मादहं ब्रह्मास्मीत्येतदवसाना

एव सर्वे विधय: सर्वाणि चेतराणि प्रमाणानि।

नह्यहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाण्यप्रमातृकाणि च प्रमाणानि भवितुमर्हन्तीति।।

अपि चाहु:-''गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्।

सद्ब्रह्मात्माहमित्येवं बोधि कार्य कथं भवेत्।।

अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मन:।

अन्विष्ट: स्यात्प्रमातैव पाप्मदोषादिवर्जित:।।

देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पित:।

लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्'।। इति ।। ४ ।।

इति श्रीशङ्करभगवत्पादकृतौ शारीरकमीमांसाभाष्ये समन्वयाधिकरणं संपूर्णम्।।

पञ्चपादिकाविवरणम्

ज्ञानानन्दैकरूपं निखिलजगदुपादानमीशं प्रभूणाम्

सर्वज्ञं ब्रह्म नित्यं विशदमतितरां निर्गुणं निष्क्रियं च।

एतत्कार्यावमृष्टिं निखिलभववतीं सम्यगुद्धूय विद्ध्वा

त्वप्रमाण्यं श्रुतीनां श्रुतिभिरिदमजं ज्ञेयमित्युच्यतेऽस्मिन्॥

जगतो जन्मादिकारणं ज्ञानान्दं ब्रह्मेति च लक्षितम्। तत्र वेदान्ताः प्रमाणमिति प्रतिज्ञातम्। तत्रेदं निरूपणीयम्–किं भूतेऽप्यर्थे शब्दः प्रमाणम्? न वेति? नेति तावदाह–कथं पुनर्ब्रह्मण इति*॥ *ननु* आक्षेपः किंनिबन्धनः? सूत्रप्रामाण्यादित्याह– *यावताऽऽम्नायस्येतिं*॥

ननु वेदान्तानामानर्थक्यमुच्यते? किं वा क्रियापरत्वमिति? न तावत्क्रियापरत्वम्; आदिमध्यावसानेषु तात्पर्येण ब्रह्मैक्यपर्यवसानादिति, तत्राह– *यद्यपि प्रदर्शितानीति*॥ तथाऽपि तत्र न सम्भवति प्रामाण्यमित्यर्थः। *ननु* यत्र शब्दस्य शक्ति–तात्पर्ये विद्येते, तत्र शब्दः प्रमाणम्, न विषयविशेषापेक्षं शब्दस्य प्रामाण्यम् ; विषयस्य शाब्दप्रमितिहेतुत्वाभावादिति, तत्राह– *तत्र परिनिष्ठिते वस्तुनीति*॥ अभूदस्ति भविष्यतीत्यवगम्ये वस्तुनि, असाध्यस्वभावे वा वस्तुनीत्यर्थः। *ननु* परिनिष्ठितोऽपि रसो न चक्षुषा गृह्यते, नापि जिह्वया गन्धः, तद्वत्परिनिष्ठिते ब्रह्मणि प्रमाणान्तरानधिगम्यतया शब्दैकगम्यत्वं किं न स्यात्? *न*; चक्षुरादीनामितरेतरविषयव्यभिचारवदागमव्यतिरिक्तप्रमाणानां परिनिष्ठिते वस्तुनि व्यभिचारदर्शनाद् भूतं चेत्प्रमाणान्तरगम्यमेवेति निश्चीयते। *ननु* तुच्छव्यावृत्तेऽपि वस्तुनि प्रमाणान्तरगम्यताया व्यभिचाराभावात् कार्यमपि प्रमाणान्तरगम्यं किं न स्यात्? *न*; साध्यस्वभावतया प्रत्यक्षानधिगम्यतया सम्बन्धाग्रहणात्, अनुमानादीनामनवगम्यत्वात् तुच्छव्यावृत्तं प्रमाणान्तरयोग्यमिति च ग्रहणाद् वरं भूतं वस्तु प्रमाणान्तरयोग्यमिति ग्रहणम्; प्रयोजकस्य निरुपाधिकत्वलाभात्।

ननु रूपादिहीनत्वाद् ब्रह्मापि प्रमाणान्तरानधिगम्यमेव, *तथाऽपि* परिनिष्ठितवस्तुत्वात् प्रमाणान्तरयोग्यत्वाशङ्का न व्यावर्तते। अस्ति च प्रमाणान्तरं ब्रह्मस्वरूपविज्ञानम्; अतस्तत्संवादादप्रमाणं वेदान्ताः॥

ननु पुरुषवचांसि प्रमाणान्तरसापेक्षत्वात् तत्संवाद–विसंवादाभ्यां प्रामाण्यमप्रामाण्यं वाऽश्नुवाते, वेदवचसां तु पुरुषसम्बन्धाभावात् प्रमाणान्तरानधिगम्यविषयतया चक्षुरादिवदनपेक्षमेव प्रामाण्यमिति चोदयति– *नन्वपौरुषेयत्वादिति*॥ परिहरति– *सत्यं तथापीति*॥ *अयमर्थः*–अनपेक्षप्रमाणयोरपि चक्षुः

स्पर्शनयोरर्थे विसंवादादन्यतरस्याप्रामाण्यवत्, ब्रह्मैकत्वश्रुतेः ''अहं मनुष्यः'' इति प्रत्यक्षस्य च परस्परव्याघातात् शब्दस्याप्रामाण्यमिति।। किंचाप्तः खलु लोके प्रमाणान्तरेणार्थमवगम्य परस्मै शब्दं प्रयुञ्जानः श्रोतुः साक्षाद्वा परम्परया वा प्रयोजनपर्यन्तमर्थं विवक्षित्वा प्रयुङ्क्ते; प्रयोजनानभिसन्धाने तात्पर्यादर्शनात्। तच्च प्रयोजनं साध्यस्वभावम् इति परिनिष्ठितं वस्तु स्वयं न प्रयोजनम्, नापि क्रियामनपेक्ष्य प्रयोजनसाधनम्, इति न तत्र तात्पर्यहीनः शब्दः प्रामाण्यमश्नुत इत्याह– *किञ्च पुरुषार्थशून्यत्वादित्यादिना*।। ''ततोन क्वचिदि'' त्युपसंहरति। किञ्च विधायकपदव्यतिरिक्तानां पदानां सम्भूय प्रमाणान्तराऽनधिगतवस्तुप्रतिपादनं न सम्भवति; प्रमाणान्तरानधिगतविषये सम्बन्धाग्रहणात्, यथासम्बन्धग्रहणमर्थप्रतिपादनात्, कार्यस्य तु प्रमाणान्तरानवसेयतया सत्संसृष्टपदार्थानामतद्गोचरत्वाद् युक्ता शब्देभ्यः पूर्वार्थप्रमितिरिति दर्शयति– *किञ्च प्रत्यक्षाद्यविषय इत्यादिना*।। यस्मात् सूत्रकारवचनाद् भूतवस्तुप्रतिपादनायोगात् प्रयोजनशून्यत्वाद् अनधिगतार्थताऽभावाच्च न ब्रह्मणि वेदान्ताः प्रमाणम्, तस्मादनर्थका वेदान्ता इत्युपसंहरति– *तस्मादिति*।।

यत्पुनर्भाष्यकारेणेत्यादेरयमर्थः–न तावद् वेदान्ताः कस्यचित्कर्मविशेषस्य प्रकरणे समधिगताः, येन'' सोऽरोदीदि''त्यादिवद् विधिसमन्वयः स्यात्। *ननु* सर्वकर्मविधायिवेदैकदेशत्वात् सर्वकर्मप्रकरणं स्यात्, *न*; सर्वेण वेदवाक्येनैकस्य वस्तुनः प्रतिपादनाभावादेकवाक्यताऽयोगात्, धर्मसामांन्यस्याप्रतिपाद्यत्वात्। अस्तु तर्हि पर्णमयीवाक्यवत् कर्तृद्वारेण सर्वक्रतुशेषभूतोऽर्थवाद इति, नैतद्युक्तम्; स्तुतौ प्रतिपादने चोपयोगो नास्ति; विपरीतं च। न हि कर्मणां कर्ता नित्य-शुद्ध बुद्ध-मुक्तस्वभावो निर्गुणो निष्क्रियोऽनश्नन्नन्योऽभिचाकशीतीति स्तवः, प्रतिपादनं वा कर्मसु प्रवृत्तावुपकरोति; विपरीतं च स्यात् । तस्मान्न कर्मसु वेदान्तानां समन्वयः, किंतु स्वप्रकरणगतसगुणोपासनासु सम्बन्ध इति भाष्यार्थमनूद्याक्षिपति– *तदयुक्तमिति*।। तथाऽपि विशिष्टब्रह्मस्वरूपासिद्धिरित्यर्थः। न खलूपासनाशेषतया ब्रह्मस्वरूपसिद्धिर्भाष्येऽभिप्रेता, किन्तूपास्ये गुणप्रक्षेपद्वारेण वेदान्तानां समन्वयो विवक्षित इति परिहरति– *सत्यमनुमानेति*।। *ननु* वेदान्तवाक्यानां सगुणोपासनप्रकरणादपि व्युत्थितानां स्वरूपमात्रपर्यवसितानां नोपासनासम्बन्धः, नापि स्वात्मन्युपासना कल्पयितुं शक्यते; अश्रुतत्वादिति, तत्राह– *एवं चाध्ययनबिधीति*।। फलं चेति*।। रात्रिसत्राणामिवेति शेषः।।

सूत्रं व्याचष्टे– *तद् ब्रह्म सर्वज्ञत्वादीत्यादिना*।। *तत्र तात्पर्येणेति*।। अयमर्थः–तात्पर्य नाम तदर्थप्रमितिशेषता शब्दधर्मः। कथम्? विवक्षातात्पर्यमिति चेत्, अर्थप्रमितिं विवक्षित्वा तादर्थ्येन प्रयुज्यमानत्वं शब्दधर्म एव। तत्रापि तात्पर्य न विवक्षामात्रम्। तच्च तात्पर्यं यस्मिन्नर्थे वाक्यस्योपक्रमोपसंहारैकरूप्यम्, यस्य चार्थस्य पुनःपुनरभ्यासः, यस्मिन्नर्थे फलविशेषसङ्कीर्तनम्, अपूर्वार्थप्रमेयता च, यत्र चार्थवादोपादानमुपपत्तिभिरुपपादनं चेत्यादीनि लिङ्गानि भवन्ति, तस्य वाक्यस्य

तस्मिन्नर्थे तात्पर्यमिति गम्यते। न च प्रमेयस्य साध्यतैव तात्पर्यलिङ्गम्; ''पुत्रस्ते जातः'' इत्यादिषु तात्पर्यदर्शनात्, साध्यस्य च प्रमेयत्वे तात्पर्यसिद्धिः, तात्पर्ये सिद्धे साध्यस्य प्रमेयतेतीतरेतराश्रयात्। साध्येऽर्थे प्रमिते प्रतिबन्धनिरासितया पश्चात्तात्पर्यमवगम्यत इति चेत्, तथाऽपि साध्यता न तात्पर्यलिङ्गम्; ''जर्तिलयवाग्वा वा जुहुयादि'' त्यादिष्वदर्शनात्। तस्मादुक्तानि तात्पर्यलिङ्गानि वेदान्तानां ब्रह्मणि दृश्यन्ते। तथाहि-''सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्'' ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसी'' त्युपक्रमोपसंहारयोरैकरूप्येण प्रत्यगात्माद्वितीयरूपं ब्रह्मावगम्यते। तथा-'' ऐतदात्म्यमिदं सर्वे तत्सत्यं स आत्मा तत्त्वमसी ''ति नवकृत्वोऽभ्यस्यते। प्रमाणान्तरेण चानधिगतमद्वितीयं ब्रह्मात्मत्वं प्रतिपाद्यते। ''आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये'' इति च निरतिशयपुरुषार्थावाप्तिर्ब्रह्मविज्ञानफलमवगम्यते। ''अनेनाजीवेनात्मनाऽनुप्रविश्य'' ''येनाश्रुतं श्रुतमि'' त्यादिब्रह्मण्यर्थवादश्चोपादीयते। मृल्लोहतप्तपरशुग्रहणादिदृष्टान्तैः स्वपितिनामनिर्वचनेन च सृष्टि-स्थिति संहारैश्च ब्रह्मात्मैकत्वं प्रतिपाद्यत इति।।

तथा तैत्तिरीयके-''सत्यं ज्ञानमनन्तं ब्रह्म'' ''स यश्चायं पुरुषे यश्चासावादित्ये स एकः'' इत्युपक्रमोपसंहारयोः प्रत्यगद्वितीयं ब्रह्मावगम्यते। तथा ''सच्च त्यच्चाभवद् यदिदं किंच तदात्मानं स्वयमकुरुत यतो वाचो निवर्तन्ते'' इति च प्रत्यगद्वितीयं ब्रह्माभ्यस्यते। प्रमाणान्तरेणानधिगतं च प्रतिपाद्यते। ''स सर्वान् कामान् समश्नुते'' इत्यादि च फलं ब्रह्मविज्ञानेऽवगम्यते। सृष्टिश्रुतयश्चाद्वितीयब्रह्मप्रतिपत्त्यर्थवादभूता दृश्यन्ते। तथा कोशपञ्चकोपन्यासेन प्राणनादिव्यापारलिङ्गैश्च ब्रह्मात्मैकत्वं प्रतिपाद्यत इति। एवं सर्वेषु वेदान्तेषु ब्रह्मात्मैकत्वप्रमितौ तात्पर्यलिङ्गानि द्रष्टव्यानि। एवं तात्पर्येण समन्वयाद् ब्रह्मैव वेदान्तप्रमेयमिति।।

सम्यगन्वय इत्यादिना सूत्रभागं व्याचष्टे। पदानामन्वय इति सम्बन्धः। तत्र क्रिया-कारकसंसर्ग-विषयतया पदानामन्वयं व्यावर्तयति-* परस्परानवच्छिन्नार्थानामिति*।। तत्रोद्भिदादिशब्दस्य यजतिसामानाधिकरण्येनोद्भिद्यागमात्रवर्तिनोरुद्भिद्यागशब्दयोरनवच्छिन्नार्थत्वेऽपि नियोगाकाङ्क्षा विद्यते, तथेहापि स्यादिति, नेत्याह-*अनन्याकाङ्क्षाणामिति*।। एवं शब्दानां क्रियावाक्येभ्यो वैलक्षण्यमुक्त्वाऽर्थवैलक्षण्यं दर्शयितुं तत्र क्रिया-कारक-संसर्गेभ्यो वैलक्षण्यमाह-*अव्यतिरिक्तेति*।। *ननु* नीलोत्पलवद् भेदाभेदविषयतयाऽप्यभिधेयाव्यतिरेक इति, नेत्याह-* एकरसेति*।। तत्रोद्भिद्यागशब्दयोर्यागविशेषैकरसार्थवर्तिनोरप्यर्थस्य नियोगाकाङ्क्षावदिहाप्यन्याकाङ्क्षेति, नेत्याह-*प्रातिपदिकार्थेति*।। तत्रापि लिङ्गसंख्ययोरवश्याभ्युपगमनीयतेति, नेत्याह-*मात्रान्वय इति*।।

जगत्कारणसामान्यानुवादेन तत्र ज्ञानानन्दशब्दावानन्दविशेषं गमयतः। एक-सत्यानन्तशब्दा

भेदमिथ्यात्वद्वैताभावाभिधानद्वारेण तत्र लक्षणया वर्तन्ते। "सर्वज्ञः सर्वशक्तिरि" त्यादिशब्दाश्चानिर्वचनीयप्रपञ्चोपाधितया तत्र वर्तन्ते। "अयमात्मा तत्त्वमसी" त्यादिशब्दाश्च मुख्यलक्षणाभ्यां ब्रह्मण्येव वर्तन्त इति।।

सर्वे जगत्कारणविषयाः शब्दा मुख्यलक्षणोपाधिभिरेकरसमेव ब्रह्म प्रतिपादयन्ति। न चानिर्वचनीयभेदा- भावयोः शब्दप्रवृत्तनिमित्तयोः परमार्थसत्यैकरसभेदनिमित्ततेति।।

अनेकेषां पदानां लक्षणादिद्वारेणैकरसवृत्तितायामुदाहरणमाह। तत्र द्विविधा वाक्यप्रवृत्तिः- एका ब्रह्मात्मनोरेकत्वविषया, अपरा सत्यज्ञानादिलक्षणब्रह्मविषया। तत्र प्रथमं ब्रह्मात्मैकत्वे दृष्टान्तमाह- *सोऽयमित्यादिवाक्यस्थपदानामिवेति*।। तत्र "सोऽयं देवदत्तः" इति पदत्रयस्यैक- स्मिन्देवदत्ते पर्यवसानं दृश्यते।।

तथाहि-प्रत्यभिज्ञायामधिगतमेकत्वं परस्मै प्रतिपादयति-'सोऽयं देवदत्तः' इति । तत्र न तद्देशकालयोरेतद्देशकालयाश्च परस्परैक्यं प्रत्यभिजानाति; भेदप्रत्ययात्। अत एव विशिष्टयोरप्यैक्यं न प्रत्यभिज्ञायते, किन्तु सोऽयमिति विशिष्टद्वयोपलक्षितः प्रत्यभिज्ञागोचरः। प्रत्यभिज्ञातं चार्थं परस्मै ' 'सोऽयमि'ति विशिष्टाभिधायिभ्यां पदाभ्यां स्वार्थैकदेशपरित्यागेनैकदेशलक्षणया देवदत्तस्वरूपैक्यमेव प्रतिपादयति। *ननु* 'सोऽयमि'ति पदार्थयोर्यदैक्यम्, तदेव वाक्येनापि प्रतिपाद्यते चेत्, अनुवादप्रसंगः। न च देवत्तस्यैक्यद्वयमस्ति, येन वाक्यप्रमेयमपरमैक्यं स्यात्, *प्रत्यभिज्ञायां तर्हि कथम्*? न ह्यभिज्ञयोरवगतदेवदत्तैक्यमस्ति। एकस्य कालद्वयसंबन्धः प्रत्यभिज्ञागोचर इति चेत्, कालद्वयसंबन्धिपदार्थाभिज्ञयोरेव सिद्धेः परिशेषात्तदैक्यं प्रत्यभिज्ञाविषयः। तत्र चानुवादो दर्शितः।।

स्यादेतत्- क्षणिकत्वपरिहाराय तत्प्रत्यभिज्ञाप्रामाण्यं तावद् वक्तव्यम्। तत्र कालद्वयपरामर्शेन तत्संबन्धिपदार्थैक्ये प्रत्यभिज्ञाविषयेऽपि पदार्थभेदप्रतिभासविरोधितैव प्रमाणफलम्, नाज्ञातार्थाधिगतिः। अतः कालद्वयपरामर्शेन तत्संबन्धिपदार्थैक्यमेवावलम्बमाना। पदार्थभेदप्रतिभासविरोधितं प्रामाण्यमश्नुते प्रत्यभिज्ञा। एवं तर्हि 'सोऽयमि'ति वाक्यस्याप्येवमेव प्रामाण्यं भविष्यति।। तथा तत्त्वमसिवाक्यस्यापि त्वंपदार्थैकदेशपरित्यागेन त्वंपदेन लक्ष्यमाणद्रष्टृस्वरूपस्य पारोक्ष्यपरित्यागेन तत्पदाभिधेयब्रह्मस्वरूपैक्ये वाक्यजन्यज्ञानगोचरेऽपि जीव-ब्रह्मपदार्थप्रतीतिसमये प्रतिपन्नैक्यविषयतयाऽनुवादप्राप्तावपि भेदप्रतिभासविरोधितया प्रामाण्यमुपपद्यत इति।।

ननु पदार्थयोः प्रत्येकमसाधारणमैक्यं पदार्थप्रत्ययगोचरः, पदार्थयोरितरेतरैक्यं वाक्यगम्यम्, इत्यस्त्येव प्रमेयभेदः, *नैतत् सारम्*; भिन्नद्रव्ययोरैक्यप्रतिपादने तथा स्यात्। यदैकमेव द्रव्यं भिन्नोपाधिपरिकल्पितभेदप्रतिभासव्युदासेन प्रतिपाद्यते, तदा निवर्त्यविशेषादेव प्रामाण्यम्, न प्रमेयविशेषात्। तदुक्तम्- "सिद्धं तु निवर्तकत्वादि"ति । इह तु कार्यकारणद्रव्यव्यतिरिक्तत्वे सति द्रव्याभिधायिपदयोः सामानाधिकरण्यं 'सोऽयमि'तिवदेकस्य द्रव्यस्योपाधिपरिकल्पितभेदव्यु-

दासेनैकद्रव्यपर्यवसायीत्यवगम्यते। *ननु* तत्त्वंपदाभ्यां लक्ष्यमाणपदार्थयोरपि भेदो विद्यते? न वा? विद्यते चेत्, ऐक्यप्रमितिर्न स्यात्। न चेद् भेदः, वाक्यार्थ एव पदार्थः स्यात्, *सत्यम्*; वाक्यार्थ एव पदार्थः। स च लक्षणया प्रतिपाद्यते; मुख्याभिधेयैक्यायोगात्। तस्मात् तत्त्वंपदाभ्यामेकमेव ब्रह्मोपाधिपरामर्शेन प्रतिपाद्यत इति सिद्धम्।।

*अत्र केचिदाहुः–लक्ष्यमाणयोरपि जीव-ब्रह्मणोर्भेदाभेदविषयं सामानाधिकरण्यम्; अन्यथा पदार्थवाक्यार्थयोः साङ्कर्यात्। अस्ति जीव-ब्रह्मणोर्भेदोऽपि; ''य आत्मनि तिष्ठन्नि'' त्यादिलिङ्गात्, *नैतद्युक्तम्*; भेदाभेदविषयेण वाक्यजन्यज्ञानेन तदभ्यासजन्यापरोक्षज्ञानेन वा स भेदो निवर्त्यते वा? न वेति? निवर्त्यते चेत्, कथं विज्ञानस्य स्वविषयनिरासिता? तृतीयज्ञानेनाभेदमात्रविषयेण भेदो निवर्त्यत इति चेत्, न; यथाप्रमाणमभ्यासजन्यस्यापि ज्ञानस्य भेदाभेदाविषयेण अन्यथाप्रमाणेऽन्यथाभ्यासजन्यज्ञाने च भेदाभेदप्रमाणवैकल्यात्। ज्ञाननिवर्त्यत्वेन भेदस्यापि विद्यावन्मिथ्यात्वमपि स्यात्। ज्ञानेनाज्ञानं निवर्त्यते, भेदस्तु कर्मभिर्विनश्यतीति चेत्, न; ''ब्रह्म वेद ब्रह्मैव भवती''ति ज्ञानप्रयुक्तत्वादेवकाराभिधेयभेदनिरासस्य। येनैव चाकारेण जीवस्य भेदः, तेनैव चेदभेदोऽपि, भेदनिवृत्तावभेदोऽपि निवर्तेत। आकारान्तरेण चेदभेदः, तदा निरवयवद्रव्यस्यैकदेशो न कर्मणा निवर्तयितुं शक्यते, इति भिन्नाभिन्न एवं मुक्तावपि जीवः स्यात्। न च भेदाभेदौ शास्त्रेण प्रतिपादनीयौ; लोकसिद्धसामान्यतो दर्शनेनैव सिद्धेः। यदि च भेदाकारविशिष्टो जीवः, तन्नाशेन नश्येत्। अथ भेदविनिर्मुक्तो जीवः, ब्रह्मास्वरूपमेव जीवः, इत्येकद्रव्यनिष्ठं सामानधिकरण्यं स्यात्। अथ विशिष्टो जीवो विशेषणनाशेऽपि स्वरूपावस्थानान्मुच्यत इति, तर्हि यो मुक्तिमनुभवति, स एव पूर्वमपि जीवः संसारी, इत्येकमेव वस्तु सामानाधिकरण्यालम्बनमित्युक्तं स्यात्। तस्मादभिधेयपरामर्शेनैकस्मिन् वस्तुनि लक्षणया वृत्तिः सामानाधिकरण्यमिति। योऽपि लक्ष्यमाणजीवब्रह्मणोरतिरेकनिमित्तं पदार्थापौनरुक्त्यं कल्पयति, तस्यातिरेको भेदवन्निराकर्तव्यः; ''एकधैवानुद्रष्टव्यं नेह नाने'' ति श्रुतेः। तस्मादेकस्य द्रव्यस्योपाधिजनितभेदावभासपरामर्शेनैकद्रव्य-पर्यवसायि सामानाधिकरण्यमित्येकरसं ब्रह्मेति सिद्धम्।।

इदानीं सत्यज्ञानादिवाक्यस्योदाहरणमाह– *प्रकृष्टप्रकाशशब्दयोरिवेति*।। तयोरेकार्थनिष्ठतामेव दर्शयति– *तथा च व्यक्तिविशेष इति*।। *अयमर्थः*–प्रकाशशब्दः सामान्याभिधानमुखेन व्यक्तिविशेषे वर्तते। प्रकृष्टशब्दश्च लक्षणया प्रकर्षगुणाभिधानमुखेन प्रकाशविशेषे वर्तते। तत्र गुणसामान्ययोश्चन्द्रपदाभिधेयत्वाभावाज्जहल्लक्षणया तदुभयं व्युदस्य तत्समवायिप्रकाशविशेष एव चन्द्रपदाभिधेयतया समर्प्यते, इति प्रकृष्ट-प्रकाश-चन्द्रशब्दानामेकार्थवृत्तिता सिद्धा। *ननु* गुण-गुण्यन्वयः क्रिया-कारकान्वयो वा किं न स्यादिति? तत्राह– *एवं च सति नीलोत्पलवदिति*।।

''एकमेवाद्वितीयमेकधैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन'' ''उदरमन्तरं कुरुते अथ तस्य भयं भवती''

त्यादिप्रतिषेधादित्यर्थः ''तथाविधान्युदाहरती'' त्यारभ्य ''यत्पुनरि'' त्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः*। ''यत्पुनः सिद्धे वस्तुनी'' त्युक्तार्थमनुवदति। परिहरति- *तद्रूपाद्यसंभवादिति*।। अयमाशयः-किं प्रमाणान्तरयोग्यत्वे सति तदनुत्पत्तौ विषयस्याभावे निश्चिते तत्र शब्दस्य मिथ्यात्वमाशङ्क्यते? किं वा प्रमाणान्तरसंभिन्नार्थविषयत्वात्पौरुषेयवचोवत्सापेक्षं प्रामाण्यमिति? किं वा प्रमाणान्तरयोग्यार्थविषयत्वात् तत्सिद्धार्थानुवादाशङ्केति? तत्र न तावत् प्रथमः ; कल्पः; प्रमाणेन हि प्रमीयमाणस्यार्थस्य प्रमाणान्तरानुत्पादो मिथ्यात्वं नावहति; सर्वप्रमाणानामनधिगतार्थगन्तृत्वात्, अन्यथा चक्षुषा गृह्यमाणस्य रूपस्य द्रव्यस्य वा स्पर्शेनाग्रहणान्मिथ्यात्वशङ्का स्यात्। कथंचित्सापेक्षप्रमाणस्य पुरुषवचसः प्रमाणान्तराभावे मिथ्यात्वाशङ्का स्यात्, न त्वपौरुषेयस्य वेदवचसः; अनपेक्षत्वात्।।

नापि द्वितीयः कल्पः; प्रमाणान्तरसंभिन्नार्थताऽभावात्। भूतार्थविषयत्वेन नदीतीरफलसत्तावाक्यवत् प्रमाणान्तरसंभिन्नार्थतेति चेत्, न; पौरुषेयवचनप्रयुक्तत्वात् सम्भेदस्य। भूतार्थत्वप्रयुक्तत्वे प्रत्यक्षादीनामपि संभेदः स्यात्। *ननु* भूतार्थस्मृतौ संभेदो दृश्यत इति चेत्, *तर्हि* स्वार्थप्रवृत्तज्ञानान्तरजन्यता संभेदहेतु; कार्य-भूतार्थनिष्ठयोर्लौकिकवचसोस्तथा दर्शनात्। पुरुषो हि प्रमाणान्तरेणार्थमुपलभ्य तन्निमित्तं परस्मै शब्दं विरचयति, नतु वेदवचसः, प्रमाणान्तरजन्यता, इत्यनपेक्षता।। *किञ्च* तुच्छव्यावृत्तमात्रं प्रमाणान्तरयोग्यम्, इति विधिवाक्यानामपि संभिन्नार्थतया सापेक्षता स्यात्; लौकिकविधीनां प्रमाणान्तरयोग्यतादर्शनात्, अयोग्यत्वे वा तत्र संबन्धाग्रहणाद् वेदेऽप्यर्थप्रतिपत्तिर्न स्यात्। *ननु* कार्यस्य साध्यस्वभावत्वान्न प्रमाणान्तरगम्यतेति, ब्रह्मापि तर्हि रूपादिहीनत्वान्न प्रमाणान्तरेण गम्यते। स्वरूपज्ञानमेव प्रमाणान्तरमस्ति अतस्तत्संभिन्नतया सापेक्षतेति चेत्, न; शब्दजन्यविषयस्थचैतन्यतया प्रमाणफलरूपत्वात्, चैतन्यज्ञानसंभिन्ने वा ब्रह्मणि शब्दस्यानपेक्षप्रामाण्यसिद्धिः। पुरुषान्तरतत्संवेदनविषयं पुरुषान्तरानुमानं स्वयंप्रकाशविषयमपि संभिन्नार्थतया न सापेक्षमिति। तस्मादनपेक्षमपौरुषेयं वचः।।

नापि तृतीयः कल्पः; स्पर्शज्ञानयोग्यद्रव्यविषयस्य चक्षुषोऽनुवादकत्वादर्शनात्। शब्दविषयोऽयं नियम इति चेत्, विधिवाक्यस्यापि स्यात्; तस्यापि लौकिकस्य मानान्तरयोग्यत्वात्, शब्दावगतस्य वा प्रमाणान्तरमनुवादः किं न स्यात्? तस्माद् भूतार्थनिष्ठमपि वैदिकं वचोऽनपेक्षं प्रमाणमिति। तत्र चोदयति- *नन्विन्द्रियागोचरत्वादिति*।।

अत्र पृच्छामः-किं प्रमाणान्तरगृहीतेऽर्थे संबन्धग्रहणमात्रमुच्यते? किं वा प्रमाणान्तरमपि शब्दार्थ इति? पूर्वस्त्वङ्गीकृत इत्याह- *यद्यपि शब्दमात्रस्येति*।। नापि द्वितीयः कल्पः; इत्याह- * व्युत्पत्ता तु कथमिति*।। *ननु* प्रमाणान्तरगृहीतेऽर्थे प्रयोगप्रत्ययदर्शनात् तत्संभिन्नार्थज्ञाने शब्दसामर्थ्यं गृह्यत इति, नेत्याह- *श्रोतृव्यवहारो हि मूलमिति*।। *अयमर्थः*-शब्दादर्थं प्रतिपाद्यमानः श्रोता किं स्वकीयप्रमाण संभिन्न प्रतिपद्यते? किं वा व्युत्पत्तुः प्रमाणसंभिन्नं अहोस्विद्वक्तुः प्रमाणसंभिन्नमिति? न तावत्पूर्वौ पक्षौ;

शब्दादर्थप्रतिपत्तेः प्रागुभयोरपि तस्मिन्नर्थे प्रमाणानुत्पादात्। प्रमाणान्तरेणोपलभ्य तत्र शब्दप्रयोगाद् वक्तुः प्रमाणसंभिन्नेऽर्थे श्रोतुः शाब्दप्रमितिरिति, व्युत्पत्ताऽपि तत्रैव शब्दसामर्थ्ये श्रोतुः प्रवृत्त्या प्रतिपद्यत इति चेत्, तत्राह– * स च श्रोतुर्ज्ञानान्तरानिमित्ततापरिशुद्ध इति *।।

अयमर्थः–व्युत्पत्ता तु प्रत्यक्षादिव्यवहारे प्रवर्तितव्यार्थमात्रज्ञानात् प्रवर्तमानमात्मानं पश्यति; न प्रमाणान्तरसंभिन्नार्थज्ञानात्। ततश्च स्वेनैव दृष्टान्तेन श्रोतुः प्रवृत्तिलिङ्गादर्थमात्रज्ञानमनुमिनीते। न वक्तुः प्रमाणस्य विषयविशेषणतयाऽवगम्यत्वेन प्रवृत्तिहेतुतां कल्पयति; दृष्टान्ताभावात्। अतः प्रमाणान्तरस्य विषयविशेषणत्वेनानवगम्यमानतया प्रवृत्तिं प्रत्यनिमित्ततया परिशुद्धः श्रोतुर्व्यवहारः केवलार्थज्ञानजन्य इत्यर्थः। ततः शब्दस्यार्थमात्रज्ञाने सामर्थ्यप्रतिपत्तेर्न प्रमाणान्तरसंभिन्नः शब्दार्थ इत्याह– *अतो न प्रतिपत्तुर्ज्ञानान्तरसिद्धार्थावबोधकत्वमिति *।।

ननु मा भूच्छ्रोतुः प्रमाणान्तरसंभिन्नोऽर्थः प्रतिपन्नः, तथाऽपि व्युत्पत्ता संभिन्नेऽर्थे शब्दसामर्थ्यं प्रतिपद्यत इति, नेत्याह– * तेनानवगम्यैव तद्विषयमिति *।। प्रवृत्तिहेतुज्ञानविषयतया स्वात्मानुमानेनानवगतस्य मानान्तरस्य न शब्दसामर्थ्यविषयता प्रतिपत्तुं शक्यत इत्यर्थः। *ननु* अर्थमात्रे सम्बन्धग्रहणेऽपि व्युत्पत्त्युत्तरकालं संभिन्नोऽर्थो बोध्यत इति, नेत्याह– *यथावगमं चेति *।। *ननु* कार्यविषयाद् वाक्यादसंभिन्नेऽर्थे युक्तः सम्बन्धग्रहः, कार्यपदव्यतिरिक्तस्य तु शब्दमात्रस्य संभिन्नेऽर्थे सम्बन्धग्रह इति, *न*; तेषामपि कार्यवाक्येऽर्थमात्रसम्बन्धग्रहणात्। अत्र केचिदाहुः अर्थासंसपर्शी शब्द इति। तथाहि–''अङ्गुल्यग्रे हस्तियूथशतमास्ते'' इत्यादौ न कश्चिदर्थः प्रमीयते। यत्र च प्रमीयते, तत्रापि मानान्तरनिबन्धना प्रमितिर्न शब्दनिबन्धनेति।।

अत्र केचित्परिहारमाचक्षते–पुरुषवचसां तु नार्थसंसर्गः प्रमेयः, कित्वेवमयं वेदेति वक्तृज्ञानमेव प्रमीयते, प्रमीयमाणवक्तृज्ञानसामर्थ्याच्चार्थो निश्चीयते। सर्वत्र चाङ्गुल्यग्रादिवाक्येषु भ्रान्तिमुत्प्रेक्षां प्रमाणं वा वक्तृज्ञानं शब्दः प्रमेयं न व्यभिचरति। तस्मादर्थसंस्पर्शी शब्द इति, तदयुक्तम्; वक्तृज्ञानस्यानुमानगम्यत्वाच्छब्दप्रमेयत्वाभावादित्याह– *यदा पुनर्व्युत्पन्नः सन्निति *।। अयमर्थः–गृहीतसम्बन्धोऽपि सन् प्रमाणान्तरेणार्थमुपलभ्य विवक्षित्वा परस्मै शब्दं प्रयुञ्जानमात्मानं पश्यति। तेन दृष्टान्तेन पूर्वमपि मध्यमवृद्धेभ्यः प्रयोक्तारः प्रयुञ्जानाः प्रमाणान्तरेणोपलभ्य विवक्षित्वा प्रयुञ्जत इत्यनुमिमीते। *नन्वेवमपि* शाब्दसामर्थ्यविषयतयैव प्रमाणान्तरमनुमिमीत इति, नेत्याह– *केवलमिति *।। शब्दप्रयोगनिमित्ततामेव विवक्षा–मानान्तरयोः स्वात्मनि पश्यन्नन्यत्रापि तथैवानुमिमीत इत्यर्थः। प्रकरणार्थमनूद्योपसंहरति– *तस्मान्न शब्दस्येत्यारभ्य–अपिचेत्यतः प्राक्तनेन ग्रन्थेन *।।

किंच यदि लौकिकवचांसि वक्तृज्ञानमेव गमयन्ति, तदा संसृष्टार्थप्रतिपादनसामर्थ्याप्रतिपत्तेर्वेदे शब्दादर्थाधिगमो न स्यात्। किञ्च न तावद्वक्तृज्ञानमात्रं शब्दार्थ:; अर्थे व्यवहारानुदयप्रसङ्गात्। नाप्यर्थ-व्यावृत्तं ज्ञानम् ; अर्थस्यैव शब्दप्रमेयत्वप्रसङ्गाद् ज्ञानस्यानुमेयतयाऽन्यथासिद्धेः। ज्ञानाभिधायिशब्दाभावाच्च न तस्य वाक्यार्थता; पदार्थस्यैव वाक्यार्थत्वात्।*ननु* पदेभ्य: पदार्था: प्रतीयनते, संसर्गश्चोत्प्रेक्षयाऽवगम्यते। तेन च व्यावृत्तं वक्तृज्ञानं शब्दार्थ इति, तदिदं श्रोतु: संसर्गज्ञानं वक्तृज्ञानविशेषणार्थविशिष्टतया प्रथमोत्पन्नं स्मृति-संशय-विपर्यासायोगात्प्रमाणज्ञानमेव परिशिष्यते, शब्दानां च पदार्थज्ञानोपक्षयाद्वक्तृज्ञानाधीनैव संसर्गप्रमितिरिति वेदे संसर्ग: शब्दार्थो न स्यात्। तस्माच्छाब्दी संसर्गप्रमिति:, वक्तृज्ञानं त्वनुमेयमिति सिद्धम्। कस्तर्हि शब्दानामर्थासंस्पर्शस्य परिहार इति? उच्यते-प्रत्यक्षेऽपि तुल्यमेतच्चोद्यम्; शुक्तिरजतादिज्ञानानामर्थव्यभिचारात्। अदुष्टकारणजन्यज्ञानानामर्थसंस्पर्श इति चेत, शब्देऽपि योग्येतरसंसृष्टाभिधायिन्यर्थनियमो विद्यते; अङ्गुल्यग्रादीनां संसर्गायोग्यत्वादिति। *किञ्च* अपौरुषेयस्य शब्दस्यानप्रेक्षमाणत्वान्मानान्तर-संवादविसंवादाभ्यां न किञ्चित्परिहीयत इत्याह- *अपिचापौरुषेय इति*।। *ननु* उक्तमिति स्पष्टार्थम्*।। *न तत्साधूक्तमिति* परिहारग्रन्थस्यायमर्थ:-निरपेक्षज्ञानयोरपि परस्परविरुद्धयोरन्यतरस्य कारणदोषसंभावनया बाधो निरूप्यते। तत्राद्वितीयप्रत्यगात्मप्रतिपत्तेरात्मनि द्वैतावभासहेतूनां चक्षुरादीनां संभावितदोषत्वात्, "इन्द्रो मायाभि:" "मायां तु प्रकृतिम्" "अविद्यायामन्तरे" इत्यादिदोषजन्यत्वश्रवणाच्च, स्वप्नवद्दोषजन्यत्वेऽपि व्यवहाराविसंवादात् प्रामाण्यलाभात्, शब्दे तु पुनर्दोषकल्पनायां व्यवहारातीतविषयत्वाद् दोषवत्तया च तत्त्वात्प्रच्युतेरुभयविधमपि प्रामाण्यं न स्यात्। न च द्वैतावभासस्य दोषजन्यत्वाच्छुक्तिरजतज्ञानवद् व्यवहारविसंवाद: कल्पयितुं शक्य:; प्रत्यक्षविरोधात्, आगमेन च द्वैतस्य तत्त्वांशबाधात्, व्यवहारबाधाभावात्, अद्वितीयात्मप्रतिपत्तेश्च शब्दादीनामर्थक्रियासामर्थ्यलभ्यत्वात्। तस्मादद्वितीयात्मप्रमितिरपरोक्षप्रत्ययरूपा च देहात्मप्रत्ययमिव द्वैतावभासं बाधते; अन्यथा देहात्मभावस्याप्यबाधप्रसङ्गादिति। *ननु* प्रमेयगतदोषादेव चित्रनिम्नोन्नतादिज्ञानवद् ब्रह्मज्ञानमपि मिथ्येति, नेत्याह- *प्रमेयस्य पुनर्न ज्ञानहेतुत्व इत्यादिना*।। *अत:* इत्युपसंहरति।। अपि च भूतार्थनिष्ठत्वात्प्रमाणान्तरविरोध उच्यते? संवादो वाऽपेक्ष्यत इति? विरोधेऽन्यतरस्य बाधो दर्शित:। संवादोऽपेक्षित इति चेत्, नेत्याह- *न च संवादलक्षणमिति*।। अज्ञातार्थावगम एव प्रमाणलक्षणमित्यर्थ:। तत: किमायातमिति? तदाह- *अतो यथैव विधिवाक्यानामिति*।। *ननु* सूत्रवचनविरोध इति चोदयति- *ननु विधिवाक्यानामेवेति*।। "नेतरेतराश्रयत्वादि"ति परिहार:। *ननु* सूत्रकारप्रामाण्यादेवाम्नायस्य क्रियार्थत्वं सिद्धमिति, नेत्याह- *नह्येकमप्यन्यत इति*।। कस्तर्ह्याम्नायार्थ इति? तदाह- * अतो यदवगमयतीति*।। *ननु* प्रमेयविशेषादेव प्रामाण्यम्, नावबोधात्, न; कार्यस्याप्यवबोधनिबन्धनत्वादित्याह- *तस्माद्यथा कार्यमिति*।। न तर्हि ब्रह्मणि शब्देभ्य: प्रतीतिरिति,

नेत्याह– *प्रतीतिश्चेति*।। *ननु*. प्रवर्तनालक्षणं प्रामाण्यम्, न बोधलक्षणमिति, नेत्याह–* प्रत्यक्षादिष्वपीति*।। *ननु* भिन्नमेव प्रमाणलक्षणं प्रत्यक्षादिषु वस्तुमात्रावबोधप्रामाण्यलक्षणम्, प्रवृत्ति-निवृत्ती तु वस्तुस्वभावानुरोधिन्यौ न प्रमाणफलम्, शब्दे तु पुनः प्रवृत्ति-निवृत्तिफलपर्यन्त एव प्रमाणव्यापारः, श्रोतुः पुरुषार्थमुद्दिश्य शब्दप्रयोगात्। अतः प्रवृत्तिनिवृत्तिशून्ये भूते वस्तुनि न शब्दप्रामाण्यमित्याह– *युक्तमित्यादिना–उच्यत इत्यतः प्राक्तनेन ग्रन्थेन*।। *उच्यते* इत्यादिः परिहारः*।।

*इदं निरूपणीयम्-पुरुषः खल्विष्टानिष्टाप्राप्तिपरिहारमात्रं प्रार्थयते? किं वा तयोः प्रवृत्ति-निवृत्तिसाध्यतामपीति? तत्र प्रवृत्ति निवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारप्रार्थनाकल्पनाल्लघीयसी हिताहितप्राप्तिपरिहारप्रार्थनाकल्पनेत्याह– *पुरुषो ह्येतावदपेक्षत इति*।। *ननु* सर्वो बाध्यस्वभावमेव पुरुषार्थं प्रार्थयत इति, नेत्याह– *नत्वित्थमन्यथा वेति*।। फलमेव हि मुख्यं प्रार्थयते, नान्तरीयका साधनप्रार्थनेत्यर्थः*।। *ननु* साध्यासाध्यावपि पुरुषार्थो साध्यावेष करोतीति, नेत्याह– *न चास्य स्वयमीष्ट इति*।। *ननु* सर्वः साध्य एव पुरुषार्थः, न तु सिद्धस्वभावः; प्रेप्सागोचरत्वाभावादिति, तत्राह– *द्विविधं चेष्टमिति*।। *ननु* द्विविधेऽपि पुरुषार्थसाध्यस्वभावता न व्यावर्तत इति, नेतीति विभज्य दर्शयति– *तत्र प्राप्तपरिहार्ययोरिति*।। *ननु* ज्ञानमात्रसाध्यः पुरुषार्थो न लभ्यत इति, तत्राह– *इतरयोस्तु भ्रान्तिमात्रव्यवहितत्वादिति*।। *ननु* हस्तगतविस्मृतसुवर्णस्य तत्त्वज्ञानात्प्राप्तिमारोपितसर्पादिभावस्य तत्त्वज्ञानान्निवृत्तिं पुरुषार्थतया नानुमन्यते; क्रियासाध्यस्यैव पुरुषार्थताप्रसिद्धेरिति, नेत्याह–एवमपि लभ्यमानमिति*।। साधनसाध्याज्ज्ञानलभ्यस्यातिशयेन पुरुषार्थतामाह– *सुतरां चाभिनन्दतीति*।। *ननु* ब्रह्मात्मैकत्वे प्रतिपाद्यमाने न क्रियासाध्यः पुरुषार्थः नापि ज्ञानलभ्य इति, तत्राह- *अनेकानर्थकलुषितमिवेति*।।

किंच शब्दस्य प्रामाण्यं प्रत्यक्षादिवत्प्रमेयमात्रावबोधनिबन्धनं किं न स्यात्? न च प्रवृत्ति-निवृत्ती साक्षात् फलम्; अवगते वस्तुनि प्रयोजनाद्यनुस्मृतिनिबन्धनत्वात्प्रवृत्ति-निवृत्त्योः। नच ते पुरुषार्थतयाऽकाङ्क्षिते; सुख दुःखप्राप्तिपरिहारलक्षणत्वात् प्रयोजनस्य। ततश्च नित्य-नैमित्तिकवाक्यानां प्रयोजनशून्यतया प्रामाण्यं न स्यात्। अकरणे प्रत्यवायपरिहारः प्रयोजनमिति चेत्, न; प्रत्यवायस्यापि तन्निबन्धनत्वात्। ततश्च नित्यविधयोऽनुष्ठानाननुष्ठानयोरनर्थमेव प्रापयन्तीति न तद्वाक्यानां प्रामाण्यं युक्तम्। अतो बोधलक्षणमेव प्रामाण्यम्, न प्रवृत्तिलक्षणमिति। *तस्मात्सिद्धं ब्रह्मणः शास्त्रप्रमाणत्वमिति*।।

इति श्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्य–स्वप्रकाशानुभवभगवतः कृतौ पञ्चपादिकाविवरणे वेदान्तानां ब्रह्मणि समन्वयनिरूपणं नामाष्टमं वर्णकं समाप्तम्।।

लोके पदानां योग्येतरसंसृष्टस्वार्थप्रतिपादने सामर्थ्यमङ्गीकृत्य भूतेऽप्यर्थे प्रामाण्योपगमेन लौकिकवचसां भूतेऽर्थे प्रमाणान्तरानुसारेण प्रयोजनपर्यन्तं प्रामाण्यमङ्गीकृत्य वेदवचसां तु प्रमाणान्तराभावाद्विध्यनुसारेणैव प्रयोजनपर्यन्तं प्रामाण्यं वक्तव्यमित्याशङ्क्य नेति प्रतिपादितम्। इदानीं

कार्यसंसृष्टस्वार्थे शब्दसामर्थ्यमिति मन्वानाः कार्यशेषतयैव भूतेऽप्यर्थे प्रामाण्यमिति प्रत्यवतिष्ठन्त इत्याह- *अत्रापरे प्रत्यवतिष्ठन्त इति*। *ननु* लौकिकवचसां भूतेऽप्यर्थे प्रयोगप्रत्ययदर्शनात् तदनुसारेण च योग्येतरसंसृष्टे शब्दसामर्थ्यप्रतिपत्तेः कुतो विधिसंस्पर्श इत्याक्षिपति- *कस्मादेवमिति*।। परिहरति- *अन्यथा शब्दप्रयोगानुपपत्तेरिति*।।

अयं भावः-श्रोतुः साध्यमेव किंचित्प्रयोजनमुद्दिश्य प्रवृत्तिं विवक्षित्वा प्रवर्तकज्ञानाय प्रयोक्ता शब्दं प्रयुङ्क्ते। ततः प्रवर्तकनिष्ठं वाक्यं श्रोतुः प्रवर्तकज्ञानमेव जनयति। प्रवर्तकज्ञानेन च शब्दसमनन्तरभाविनाऽनन्यथासिद्धान्वय-व्यतिरेकाभ्यां शब्दस्य संबन्धं व्युत्पत्ता प्रतिपद्यते। तच्च प्रवर्तकं प्रत्यक्षादिव्यवहारेषु शब्दव्युत्पत्तेः प्राक् कार्यमिति ज्ञानात्सर्वत्र प्रवर्तते, इति कार्यमेव श्रोतुः शाब्दज्ञानगोचरं कल्पयति। तत्र कार्यसंसृष्टेषु तदार्थेषु पदसमुदायस्य प्रथमं सामर्थ्यं कल्पयित्वा पुनः प्रयोगान्तरेष्वावापोद्वापाभ्यामेकैकस्य पदस्य कार्यसंसृष्टस्वार्थेषु संबन्धं प्रतिपद्यते; प्रथमप्रयोगे कार्यसंसृष्टपदार्थेषु सामर्थ्यप्रतिपत्तेः। *ननु* बालस्य स्वव्यवहारेऽभिलषितसाधनताज्ञानात्प्रवृत्तिः, न कार्यज्ञानात्। ततश्च श्रोतुः शब्दसामर्थ्यविषयतयाभिलषितसाधनज्ञानमेव प्रवृत्त्याऽनुमिमीते, न कार्यज्ञानमिति, *नैतद्युक्तम्*; अभिलषितसाधनेऽपि कार्यमितिज्ञानस्य प्रवृत्त्यानन्तर्यात्तदेव प्रवर्तकमनुमीयते। नचेष्टसाधनज्ञानं प्रवर्तकम्; अतीतानागतवर्तमानेष्टसाधनज्ञानानामप्रवर्तकत्वात्। तस्मात्कार्यसंसृष्टस्वार्थेषु शब्दसामर्थ्यमिति। *ननु* सर्वत्र कार्यव्यभिचाराभावे संसृष्टस्वार्थेषु शब्दसामर्थ्यमिति युक्तं प्रतिपत्तुम्, कार्यसंसृष्टस्वार्थ इति विशेषणायोगात्, अन्यथा प्रमाणान्तरगृहीतकार्यसंसृष्टस्वार्थ इत्यव्यभिचारात्कल्प्येत, *नैतद् युक्तम्*, संसृष्टस्वार्थ इत्युक्ते केन संसृष्टः? इत्यपेक्षायां कार्यसंसृष्ट इति विशेषप्रतिपत्तिमन्तरेण प्रयोजकस्यानिरूपणात्प्रमाणान्तरगृहीतत्वस्य शब्दसामर्थ्यप्रतिपत्तिकालेऽप्रतिपत्तेर्न तत्र शब्दसामर्थ्यमित्युक्तम्। *ननु* कार्यसंसृष्ट इत्युक्ते कार्यस्य कार्यान्तराभावात् कार्यपदस्यान्यसंसृष्ट इति प्रयोजकभेदो वक्तव्यः स्यात्, *न*; धात्वर्थस्यापि कार्यत्वात्तत्संसृष्टनियोगे कार्यपदसामर्थ्यात्। *ननु* लोकेऽतीतानागत-वर्तमानार्थनिष्ठवाक्येभ्योऽतीताद्यर्थप्रतिपत्तिकार्यदर्शनात् तदनुसारेण संसृष्टस्वार्थे सामर्थ्यं नियम्यत इति, *न*; सम्बन्धग्रहणाधीनत्वादर्थप्रतिपत्तेस्तया सम्बन्धग्रहणनियमायोगात्। अतीतादिवाक्यानां चैवमवधार्यतामिति नियोगनिष्ठत्वात्। तस्मान्न कार्यसंस्पर्शमन्तरेण भूतेऽप्यर्थे शब्दप्रामाण्यमिति।। अपि च-प्रवृति-निवृत्तिसाध्यप्रयोजनमन्तरेण वाक्यप्रयोगानुपपत्तेः प्रयोजनस्य नियोगसामर्थ्याधीनत्वाद् नियोगपर्यवसितमेव वाक्यमित्याह- *पुरुषेच्छासमुत्थापितो हीति*।। *ननु* नेदं कालान्तरभावि नैयोगिकं फलम्, येन नियोगाधीना फलप्रतिपत्तिः स्यात्, किन्तु सम्यग्ज्ञानफलं प्राप्तब्रह्मप्राप्तिलक्षणमविद्यानिवृत्तिलक्षणं च हस्तगतविस्मृतसुवर्णप्राप्तिवदन्वयव्यतिरेकसिद्धमिति, नेत्याह- *न च विस्मृतसुवर्णारोपितसर्परशनाप्रतिपत्ताविवेति*।। *ननु* अन्वय-व्यतिरेकविरुद्धमेतत्, यद्

ब्रह्मात्मतत्त्वज्ञानाद् ब्रह्मप्राप्त्यनर्थनिवृत्ती न स्त इति, न; प्रत्यक्षविरोधादित्याह- *पूर्ववत्संसारित्वोपलब्धेरिति*।। अपि च-शब्दज्ञानव्यतिरेकेण ब्रह्मात्मनि ज्ञानसाधनान्तरविधानात् प्रयत्नान्तरसाध्यं प्रयोजनं न ज्ञानमात्रसाध्यमित्याह- *प्रतीत्युत्तरकालं चेति*।। *ननु* लोके भूतार्थनिष्ठतया प्रयोजनपर्यन्तता दृश्यते, तद्वदिहापि स्यादिति, नेत्याह-तस्मात्सन्तु नाम लोक इति*।।

ननु धर्मजिज्ञासा ब्रह्मजिज्ञासेति च जिज्ञास्ययोर्धर्म-ब्रह्मणोः सिद्ध-साध्यभेदेन वैलक्षण्यं दर्शितम्, न च ब्रह्मणि जिज्ञासाकर्मणि शब्दप्रतिपत्ति-विध्यादयः शास्त्रेण प्रतिपाद्या इति युक्तं प्रतिपत्तुम्; सूत्रविरोधात्, इत्यत आह- *तस्माद्यपीति*।। तथाऽपि प्रतिपत्त्यादिविधिशेषतयैव ब्रह्म जिज्ञास्यमित्यर्थः। कथं पुनर्ब्रह्मप्रतिपादनपराणां वाक्यानां ब्रह्मप्रतिपत्तिविधिशेषतया समन्वय इति? तदाह- *सोऽन्वेष्टव्य इत्यादि*।। *यः पुनस्तस्मादित्यादिः स्पष्टार्थः* तत्र नियोगमुखेन ब्रह्मणोऽवगतिमिच्छतो नियोग-ब्रह्मणी न प्रमाणेन प्रमातुं शक्येते, इत्येतत् प्रथमं दर्शयति- *अत्रोच्यत इति*।। तत्र विधेयाभावात्तद्व्यावृत्तौ विधिः प्रमातुं न शक्य इत्याह- *किमिदं ज्ञानमिति*।। तत्र तावच्छाब्दं ब्रह्मविषयं विज्ञानं विधातुं न शक्यत इत्याह- *न तावच्छब्दजन्यमिति*।। गृहीतपद-पदार्थस्याधीयमानाद्वाक्याद्विधिवाक्यादिव विध्यर्थे ब्रह्मणि विज्ञानमुत्पद्यते, तदेव च विचारेण प्रतिष्ठाप्यत इति। न चानन्यथासिद्धकार्यमन्तरेण मियोग उपपद्यते। शब्दावगते ब्रह्मणि तत्समानजातीयस्मृतिसन्ताने विधीयतामिति शङ्कते- *अथ शब्दजन्स्यैवेति*।। तत्र स्मृतिसन्तानविधेः प्रयोजनं न तावददृष्टम्; स्वर्गादिवन्मोक्षस्य कर्मजन्यत्वप्रसङ्गात्, दृष्टफलत्वेऽपि न किञ्चित्फलं निरूप्यत इत्याह- *न तस्य प्रयोजनं पश्याम इति*।। *ननु* मर्दनसुखवत् प्रत्यक्षं सुखमित्याह- *ननु इष्टविषयस्येति*।। तर्ह्यन्वय-व्यतिरेकसिद्धसाधनत्वान्मर्दनादिवत् स्मृतिसन्तानो न विधेय इत्याह- *यद्येवमिति*।। अस्तु तर्हि स्मर्यमाणस्य साक्षात्करणं स्मृतिसन्तानविधेः प्रयोजनमिति शङ्कते- *अथ पुनरिति*।। किं साक्षात्करणं स्मृतिसन्तानस्यादृष्टं प्रयोजनम्? दृष्टं वा भवति? न चादृष्टम्; वस्त्वापरोक्ष्यस्य चक्षुरादिप्रमाणसामग्रीसाध्यत्वाददृष्टमात्राजन्यत्वात्। अदृष्टसहकृताज्जन्मान्तरीयप्रमाणकारणाज्जन्यत इति चेत्, तर्हि जन्मान्तरे यथा शब्दादिप्रमाणकरणं विधिमन्तरेण ब्रह्मावगतिं जनयिष्यति, तथेहापि स्यात्। अथ दृष्टमेव ब्रह्मसाक्षात्करणं प्रयोजनमिति, न; अनुपलब्धेरित्याह- *नैतद्युक्तमिति*।। अनुपलब्धिविरोधमेव दर्शयति- *नहि लैङ्गिकोऽर्थ इति*।। शाब्दज्ञानस्मृतिसन्तानान्नापरोक्षज्ञानमात्रमुत्पद्यते, किं तु तज्जननसमर्थ-विज्ञानान्तरमुत्पद्यते। तद्विज्ञानफलाय स्मृतिसन्तानो विधीयत इति शङ्कते- *मा भूच्छाब्दज्ञानादेवेति*।। तदप्यपरोक्षफलं विज्ञानं नादृष्टतया विधिफलम्; प्रमाणाधीनत्वादवगमस्य, नापि दृष्टतया; स्मृतिसन्तानस्य प्रमाणत्वाभावात्, नापि तद्विधिज्ञानफलत्वे प्रमाणमस्तीत्याह- *नेत्थम्भावे प्रमाणमस्तीति*।। मा भूत् स्मृतिसन्तानविधिः, शब्दावगते ब्रह्मणि ध्यानं विधीयते। *ननु* को विशेषः स्मृतिसन्तानाद् ध्यानस्य? तत्र स्मृतिसन्तानो नाम प्रमाणावगते वस्तुनि तत एव प्रमाणात्सजातीयप्रत्ययप्रवाहो वस्तुतत्त्वविषयः। ध्यानं नाम

वस्तुतत्त्वमनपेक्ष्यारोपितविषयतयाऽपि मनःसंकल्पप्रवाहः, स विधेय इत्याह- *अस्तु तर्हि शब्दात् प्रतिपन्नस्येति*। *ननु* तस्याप्यदृष्टं दृष्टं वा प्रयोजनं वक्तव्यम्। न तावददृष्टम्; नैयोगिकत्वेन स्वर्गादिवदनित्यत्वप्रसङ्गात्, नापि दृष्टं दृश्यत इत्याक्षिपति- *किमर्थमिति*।। *ननु* ध्येयसाक्षात्करणाय तदपि नादृष्टं फलम्; प्रमाणजन्यत्वादर्थानुभवस्य, दृष्टं फलं चेत्, न; अनुपलब्धिविरोधादित्याह- *न तस्य सम्भव इत्यादि*।। *ननु* ध्यानाभ्यासप्रचयसामर्थ्याद्विनष्टपुत्राद्यापरोक्ष्यं दृश्यत इति चोदयति- *ननु दृष्टमिति*।। न हि विनष्टपुत्रादीनामिदानीमविद्यमानत्वात्तदापरोक्ष्यं सम्भवति, किंतु यत्पुरोदेशे पुत्राद्यवभासते, तद् बाध्यमानत्वादविद्यात्मकम्, अतो न वस्त्वापरोक्ष्यमिति परिहरति- *मैवम्; न तद् ध्यायमानमिति*।। *ननु* ब्रह्मात्मनि ध्यायमाने ध्यानप्रकर्षाद् ध्येयापरोक्ष्यं पुत्रादिवत्सिध्यति, ध्येयस्य च वस्तुत्वं शब्दप्रमाणात्सिध्यति, अतो वस्त्वापरोक्ष्यं ध्यानात्फलिष्यति, यथा स्वप्ने चतुष्पथे हस्तिज्ञानमुत्पन्नं तथाभूतजागरणसंवादेन सम्यग् ज्ञानं भवतीति, *नैतत्सारम्*; अपरोक्षज्ञानस्य शब्दप्रमाणसामर्थ्यात्तथाभूतज्ञानत्वेन संवादात्प्रामाण्यं स्यात्। न च स्वप्नज्ञानं प्रमाणम्; अविद्यात्मकत्वात्, संवादस्तु सादृश्यभ्रमादिति। न हि चक्षुरादिप्रवृत्तिमन्तरेण वस्तुदर्शनं सम्भवति।।

ननु विध्युद्देशसामर्थ्यादेव ध्येयसाक्षात्करणं ध्यानफलं गम्यते, किमन्वय-व्यतिरेकाभ्यामित्याह- *ननु द्रष्टव्य इति*।। तत्रापि किं नैयोगिकं फलम्? आहोस्विद् दृष्टमिति? नैयोगिकत्वे स्वर्गादिवदुपचयापचयात्मको मोक्षः स्यात्, दृष्टं फलं चेत्, तदाह- *उक्तमेतदिति*।। विधेयसद्भावमङ्गीकृत्य शब्दानां ध्यानविधिपरत्वे ब्रह्मात्मैकत्वं न सिध्यतीत्याह- *अथापि भवतु ध्यानादिति*।। *ननु* शब्दो ब्रह्मात्मैकत्वं प्रतिपादयतीति, नेत्याह- *शब्दस्तावदिति*।। *ननु* ज्ञानविधिवाक्यव्यतिरिक्तानामवान्तरवाक्यानां ब्रह्मणि समन्वयाद्वस्तुसिद्धिरित्याह- *सत्यं तथाऽपि तत्त्वं सिध्यतीति*।। परिहरति- *विषम उपन्यास इति*।। तस्माद्विधिपरत्वे नास्ति वस्तुसिद्धिरिति। सर्वविधिभेदेष्वतिदिशति- *पूर्वोक्तेष्वपीति*।।

स्मृतिसन्तान-ध्यानयोर्नियोगो निराकृतः, इदानीं तृतीयज्ञानेऽपरोक्षफले नियोगमाशङ्कते- *यत्पुनः कैश्चिदुच्यत इति*।। *तत्र वदामः*- विधीयमानज्ञानस्य प्रत्यक्षानुमान-शब्दजन्यत्वाभावाद् दर्श-पूर्णमासवदलौकिककरणेतिकर्तव्यताविषयविधानैः सह दर्शनं विधेयम्, न तद् दृश्यत इत्याह- *तत्पुनः किंसाधनमित्यादिना*।। शङ्कते *तमेतं वेदानुवचनेनेति*।। श्रवण-मनन-निदिध्यासनैः करणैर्वेदानुवचन-यज्ञ-दान-तपोऽनशन-शम-दमाद्यनुगृहीतैर्मोक्षकामो ब्रह्मण्यपरोक्षफलं ज्ञानं कुर्यादित्यर्थः। परिहरति- *प्रमाणान्तरस्य तर्हि प्रमाणमिति*।। अयमर्थः। सेतिकर्तव्यं साधिकारं च ब्रह्मण्यपरोक्षफलं विज्ञानं प्रमाणान्तरम्। तत् कर्तव्यतया शब्दैः प्रमीयते चेत्, न ब्रह्मणि प्रमाणं शब्दः, किंतु ब्रह्मप्रमाणे प्रमाणम्। ततश्च कल्पनालाघवाद् ब्रह्मण्येव प्रामाण्यं युक्तमिति। *ननु* विधिविषयमन्तरेण

ब्रह्ममात्रे प्रामाण्यं न युक्तमिति, नेत्याह- *कार्यगम्यमिति*।। गृहीतसम्बन्धस्य वेदान्तवाक्येभ्यो ब्रह्मणि निश्चितप्रमितिकार्यगम्यं वेदान्तप्रामाण्यम्। तत्र प्रमितिजननाद् विषयस्य विधेय (१) त्वगम्ये प्रामाण्येऽग्निहोत्रवाक्यं दर्श-पूर्णमासविधिनिष्ठं किं न स्यात्? तत्र शब्दसामर्थ्याभावात्प्रमित्यनुदयादिति चेत्, इहापि "सत्यं ज्ञानमनन्तं ब्रह्म" "तत्त्वमसी" त्युक्तेन विधौ सामर्थ्यप्रमितिर्वा गम्यत इति ब्रह्मण्येव प्रामाण्यं युक्तमिति। *ननु* लौकिकं प्रामाण्यं कार्यगम्यमेव, शास्त्रीयं तु विधिगम्यमिति, नेत्याह- *तदुक्तमिति*।। अत्र लौकिकानां शब्दानां मुख्यार्थाभिधानमुखेन वैदिकार्थप्रतिपादनासम्भवे किं वेदे पृथक्सम्बधं गृह्णीमः, किं वा वृत्त्यन्तरद्वारेणापि लौकिकादेव सम्बन्धादर्थं प्रतिपाद्यामह इति विशये लौकिकमेव प्रतिपत्तुं युक्तम्; अलौकिककल्पनादित्याह- *गुणाद्वाप्यभिधानं स्यादिति*।। एवं लौकिकमेव प्रामाण्यं युक्तम्; अलौकिककल्पनादित्यर्थः। तस्मान्न दृष्टफलतया नियोगपर्यवसितानि वेदान्तवाक्यानि।।

ननु कोऽयं नियोगो नाम? *ननु* आचार्यनियोग इत्यादौ प्रसिद्धः, सत्यम्; तत्रोत्कृष्टस्य पुरुषस्यावरपुरुषप्रेरणात्मकोऽभिप्रायभेदो नियोगः, नासावपौरुषेये वेदे बालस्य प्रत्यक्षादिव्यवहारे च संभवति। *ननु* कार्यबुद्धिगम्यं वस्तु नियोग इत्याख्यायते प्रवर्तकत्वसामान्यादिति, किमिदं कार्यं नाम? यदि कृतियोग्यतामात्रम्, न ततः प्रवृत्तिः ; प्रागभाववतां सर्वेषां कृतियोग्यत्वात्। अथ कृतिसंसृष्टं कार्यम्, न; कृतिसंसर्गस्यैव निमित्तत्वोपगमात्कार्यबुद्धेः। अथ कृतियोग्यमेवालौकिकं किञ्चिद्वस्तु कार्यमिति तर्ह्यव्युत्पन्नस्य घटेनोदकाहरणं कर्तव्यमित्यादिप्रत्यक्षव्यवहारे क्रिया-कारकव्यतिरेक्तमलौकिकं किंचित्प्रतिपन्नम्? न वा? इति वक्तव्यम्। प्रतिपन्नं चेत्, नालौकिकं किञ्चिदिति। निदर्शनीयं च शब्दान्तरेणेदमित्थमिति। *ननु* कार्यमिति प्रतिपद्य प्रवर्तते। ततश्च प्रवर्तकाकारता कार्यस्य क्रिया-कारक फलेभ्यो वैलक्षण्यमिति, *न*; धात्वर्थस्यैवाभिलषितसाधनतया प्रवर्तकत्वात् तस्यैव च कार्यबुद्धिगोचरत्वात्। *ननु* अन्यत् कार्यमन्यदभिलषितसाधनम् ,*सत्यम्*; अभिलषितसाधनमेव कृतियोग्यतया प्रवर्तकं कार्यमुच्यते। न च श्रेयःकृतिप्रतियोगिभेदमात्रादुभयबुध्यालम्बनं साधनं भिद्यते। न च कृतियोग्येष्टसाधनव्यतिरिक्तं कार्यं नाम प्रवृत्तिनिमित्तं पश्यामः। *ननु* फलमपि कार्यतया प्रवृत्तिसमर्थं दृश्यते, *न*; विशिष्टप्रवृत्तिहेतुत्वाभावात्फलकार्यत्वस्य। अभिलषितसाधनं कार्यमेव सम्बन्धग्रहण-लिङ्गभूतायाः प्रवृत्तेर्हेतुः; फलस्य त्विच्छामात्रहेतुत्वात्। न च कार्यं नामालौकिकं किञ्चिल्लोके दृश्यते। न तावत्प्रत्यक्षेणावगन्तुं शक्यम्; असिद्धस्वभावत्वात्। सम्बन्धाग्रहणान्नानुमानेन। अव्युत्पन्नत्वान्नगमेन। अलौकिककार्यमन्तरेणानुपपत्त्यभावान्नार्थापत्त्या कार्यमवगन्तुं शक्यम्। प्रवर्तकत्वमनुपपन्न इति चेत्, न; कृतियोग्यादभिलषितसाधनादपि प्रवृत्तेः। न च साधनत्वमपि कार्यवत्प्रमाणशून्यम्; तत्फलोदयान्वय-व्यतिरेकाभ्यामवगमात्, अननुभूतेऽपि सामान्यतो दर्शनेन साधनत्वसिद्धेः। न चातीतादिसाधनेषु प्रवृत्तिप्रसङ्गः; कृतियोग्येष्टसाधन इति विशेषणात्। तस्मादव्युत्पन्नस्य व्यवहारे

प्रमाणान्तरेण यत्प्रवर्तकतया वर्तते, तदेव श्रोतुरपि शाब्दबुद्धिगोचरतया प्रवर्तकमनुमीयत इति सिद्धम्। तत्र ब्रह्मात्मैकत्वविज्ञाने विधिसम्बन्धो नाम फलसाधनसामर्थ्यम्। तत्राविद्यानिवृत्तिव्यतिरेकेण मोक्षफलस्याभावात्तस्य चान्वय-व्यतिरेकसिद्धत्वात्तत्वज्ञानस्य मोक्षसाधनत्वमन्वय-व्यतिरेकगम्यं न शब्दप्रमेयमिति ब्रह्मण्येव प्रमाणं शब्द इति सिद्धम्। इदानीं जीव-ब्रह्मणोर्भेदमङ्गीकृत्य ब्रह्मणश्च प्रदेशान्तरवर्तित्वं सर्वगतत्वं चाभ्युपगम्याहं ब्रह्मास्मीत्यारोपितरूपेण विधीयमानादुपासनाद् यागादिव स्वर्गो मोक्षः फलिष्यतीति ये मन्यन्ते, तन्निरासायोत्तरं भाष्यमित्याह-*अथाप्यथ यदतः परो दिवो ज्योतिरित्यादिना*।। *ननु* एवमप्युपासनाविधिपरत्वे शब्दस्य ब्रह्मस्वरूपासिद्धिरित्यत आह-*देवताविग्रहवत्त्वन्यायेति*।। न च प्रमाणान्तरविरोधः; विकारासंस्पर्शित्वाद्, ब्रह्मणः सद्वितीयत्वात्। *ननु* नैयोगिकफलत्वे मोक्षस्य स्वर्गादिवदनित्यतेति, नेत्याह-*नच साध्यत्वेऽपीति*।। *ननु* श्रुतिरनित्यत्वानुमानविरुद्धा कथमनावृत्तिं साधयेदिति? अत आह-*न ह्येष इति*। *ननु* अनुमानागमयोर्विरुद्धाव्यभिचारित्वात्संशयहेतुत्वमिति, तत्राह-*शब्दगम्यस्येति*।। अनुमानादागमो बलवानित्यर्थः। अस्य परिहारत्वेन भाष्यमवतारयति-*न कर्मब्रह्मविद्याफलयोरित्यादिना*।। भाष्यस्य तात्पर्यार्थमाह-*अस्यायमर्थः संक्षेपत इत्यादिना*।। *ननु* नास्ति फलवैलक्षण्यम्; मोक्षस्याप्युपासनासाध्यतया कर्मजन्यत्वात्, ततश्चोपचयापचयशरीरेन्द्रियादिमत्ताऽपि स्यादित्यत आह-*श्रुतितो न्यायतश्चेति*।। ''ब्रह्म वेद ब्रह्मैव भवति'' ''विद्ययाऽमृतमश्नुते'' ''ब्रह्मसंस्थोऽमृतत्वमेति'' ''अथायमशरीरोऽमृतः प्राणो ब्रह्मैवे'' त्यादिश्रुतितो ब्रह्मात्मताऽशरीरामृतत्वलक्षणो मोक्षो दर्शितः। न्यायतश्च मोक्षस्य नित्यत्वं गम्यते, पुनरावृत्तौ पुनर्बन्धान्मोक्षशब्दस्योपचरितार्थताप्रसङ्गाद् अभ्युदयनिःश्रेयसयोश्च भेदप्रतिपत्तेः। अनादित्वमपि श्रुति-न्यायाभ्यामवगतम्। ''विमुक्तश्च विमुच्यते'' ''ब्रह्मैव सन् ब्रह्माप्येती''ति श्रुतेः, सादित्वे चान्तवत्त्वं स्यादिति न्यायात्। ततश्च न क्रियासाध्यो मोक्ष इति। क्रियासाध्यत्वेऽभ्युदयफलवच्छरीरेन्द्रियादिसम्बन्धक्षयिष्णुतोपचयापचयवत्त्वं च मोक्षस्य स्यादित्याह-*यदि सन्ध्योपासनवदित्यादिना*।। *ननु* यथैवोपचयापचयवत्क्षयिष्णु शरीरेन्द्रियादिभोग्यं च कर्मफलम्, एवं तद्विपरीतमशरीरामृतब्रह्मलक्षणं च निःश्रेयसं कर्मफलमेव स्यात्, कर्मणां पश्वादिविविधफलहेतुत्वदर्शनादिति, अत आह-*न चाशरीरत्वमेव धर्मकार्यमिति*।।

किमिदं स्वाभाविकमशरीरत्वम्? किं वा नैमित्तिकमिति? शरीरात्मनोर्मिथ्याज्ञानसम्बन्धव्यतिरिक्तस्य सर्वप्रकारसम्बन्धस्यात्यन्तिकाभावः स्वाभाविकमशरीरत्वम्, मिथ्याज्ञानसम्बन्धान्नैमित्तिकं शरीरित्वमिति। तत्र सम्यग्ज्ञानसाध्यस्य मिथ्याज्ञानसम्बन्धनिवृत्तिलक्षणस्याशरीरत्वस्य कर्मसाध्यत्वाभावात् सम्बन्धान्तरनिवृत्तिलक्षणस्याशरीरत्वस्य स्वाभाविकत्वान्न धर्मसाध्यो मोक्ष इति। *ननु*

यदिदमशरीरामृतब्रह्मलक्षणं फलम्, तदन्यथा कर्मभिः परिणम्यत इति, नेत्याह- *तथापि कथंचिदित्यादिना*।। *ननु* भवतु स्वाभाविकाशरीरामृतध्रुवलक्षणो मोक्षः सदैकरूपः; तथाऽप्युपासनासन्तानाद् विधीयमानाद्भविष्यति; ज्ञानलक्षणत्वादुपासनस्येत्यत्राह- *तत्र यदि हस्तगतविस्मृतसुवर्णवदित्यादिना*।।

ननु किमिति यागफलबदुपासनासाध्यत्वे मोक्षस्योपचयापचयक्षयिष्णुताशरीरसम्बन्धः स्यात्? *उच्यते*-मोक्षफलाय विधीयमानस्योपसनस्य स्वरूपतः कालतः सङ्ख्यातो वा परिमितिरस्ति वा? न वा? इति वक्तव्यम्। अस्ति चेत्, साङ्गदर्श-पूर्णमासपरिमितिवदेतावदिदमित्युपासनापरिमितिः प्रदर्शनीया। न च तथा दृश्यते। नापि सङ्ख्यातः परिमाणमस्ति; सहस्रं लक्षं वा प्रत्ययानां मोक्षसाधनमिति नियामकादर्शनात्। नापि कालतः परिमाणमस्ति; एकं शतं सहस्रं वा संवत्सराणामुपासीनस्य मोक्ष इति नियमे प्रमाणाभावात्। मरणमेवावधिरिति चेत्, तथाऽपि दर्श-पूर्णमासवदेकाकारसाधनपरिमितिर्न लभ्यते; एकेन दशभिः शतेन सहस्रेण वा कालेन कस्यचिन्मरणात्पुरुषभेदेषूपासनोपचयापचयप्रसङ्गात्। उपास्यापरोक्ष्यमवधिरिति चेत्, तथाऽपि कस्यचित्केनचित्कालेनापरोक्षात्साधनोपचयापचयौ तदवस्थौ। अतो नोपासनलक्षणमोक्षसाधनैकरूप्यं लभ्यते। नचारोपितापरोक्षानुभव एव मोक्षसाधनम्; अविहितत्वान्मिथ्याज्ञानत्वाच्च। अथ मा भूदैकरूप्यम्, देश-काल-सङ्ख्या-परिमाणभेदादग्निहोत्रा-भ्यासवत्पुरुषभेदेषु साधनोपचयापचयात्मता भविष्यतीति; न तर्हि सर्वेषामेकरूपो मोक्षः स्यात्; काष्ठोपचयाद् ज्वालोपचयवदग्निहोत्रोपचयात् स्वर्गोपचयवच्चोपासनोपचयान्मोक्षोपचयापचयोपपत्तेः। अथ साधनवैषम्येऽपि फलैकरूप्यमुच्येत, अनुष्ठानवैफल्यं स्यात्। *अथ* उपासनाऽपि विधीयमाना नियामकाभावादुपचयापचयरूपिणी, फलं च शास्त्रादेकरूपमिति; *नैतत्सारम्*; उपासनातोऽविद्या-तत्संस्कार-काम-कर्मसु क्षीयमाणेषु चित्तैकाग्र्यादपरोक्षसम्यग्ज्ञानोदयोपपत्तेः, क्षीयमाणकर्मादिवैषम्यादपरोक्षज्ञानोपपत्तेश्च। तस्मात् स्वर्गादिफलवदुपचयापचयरूपिणी मुक्तिः स्यात्, इति विधीयमानोपासनासाध्यत्वात् सुख-दुःखस्येव शरीरेन्द्रियादिदृष्टसामग्रीसाध्यत्वं साधनक्षयात्क्षयिष्णुता च स्यादित्युपसंहरति- *अतो न कर्तव्यशेषत्वेनेति*।।

ननु श्रुत्यनुमाने सामान्यावलम्बिनी-"तद्यथेह कर्मचितः" "यत् कृतकम्, तदनित्यमि"ति, अपुनरावृत्तिश्रुतिस्तु मोक्षविषया बलीयसीत्युक्तार्थमनुवदति- *यत्पुनर्न च पुनरावर्तत इति*।। तत्र तावद्विधिपरत्वे वेदान्तानां फलश्रुतयोऽर्थवादाः, पर्णमयीत्वादिवत्, नचार्थवादैरपुनरावृत्तिः प्रमातुं शक्यते; द्रव्य-गुणसंस्कार-कर्मफलश्रुतिवत्। *ननु* नार्थवादत्वात्फलश्रुतयः प्रामाण्यं जहति, किंतु वर्तमानापदेशित्वेन योग्यानुपलब्धिविरोधात्, *इहापि* तर्हि "न च पुनरावर्तते" इत्यप्राप्तप्रतिषेधान्नार्थवादानां न च प्रामाण्यम्। तथाहि-"ब्रह्मलोकमभिसंपद्यते न च पुनः पुनरावर्तते"

इत्यभिसंपत्तिसमये पुनरावृत्तिरप्राप्ता प्रतिषिध्यते। *ननु* पुनरावर्तिष्यत इति भाविनी पुनरावृत्तिः प्रतिषिध्यत इति वाक्यार्थः कल्प्यत इति चेत्, *न*; श्रुतार्थपरित्यागेनाश्रुतार्थकल्पनायाम्-यत्कृतकम्, तदनित्यम्, ''तद्यथेह कर्मचितः'' इति श्रुत्यनुमानविरोधात्। एवमपुनरावृत्तिवाक्यान्तरेषु योजयितव्यम्। तस्मादर्थवादमात्रमेतत्।।

सामान्यश्रुत्यनुमानाभ्यां साध्यस्य मोक्षस्यानित्यता दर्शिता, इदानीमपुनरावृत्तिविशेषणसामर्थ्यादेवान्तवत्तामाह-*किंच तेषामिहेति*।। ''इममिहे''ति विशेषणं मानवान्तरे स्वतः प्राप्तामावृतिं दर्शयति। *ननु* अस्मिन् कल्पेऽनावृतिं प्रतिपादयतो वाक्यस्य कल्पान्तरे पुनरावृत्तिप्रतिपादने द्वैयर्थ्याद्वाक्यभेदः स्यादिति, *अनभिज्ञोऽयं* सर्वसङ्करवादी देवानां प्रियः, यतः सर्वेषां सविशेषणवाक्यानामिदं चोद्यमवतरति। *अथ* सविशेषणं वाक्यं विशिष्टमर्थं मुखतः प्रतिपादयति, अर्थात्तु विशेष्यान्तरव्यावृत्तिः प्रमीयत इति न वाक्यभेदः, *तर्हि* इहाप्येतत्कल्पविशेषिताऽनावृत्तिर्मुखतः प्रतिपाद्यते, अर्थादपुनरावृत्तिरस्य कल्पान्तरे निवार्यते, इति न वाक्यभेदः। *ननु* कल्पान्तरेऽपि श्रुतिसामान्यादिह न पुनरावृत्तिरिति प्रतिषेधस्तुल्यः, *सत्यम्* अस्माकं तावदस्मिन् कल्पे प्रतिपन्नानां कल्पान्तरे पुनरावृत्तिर्विशेषणसामर्थ्यात्प्रमीयत इदानीम्, कल्पान्तरप्रतिपत्तॄणामपि तस्मिन्ननावृत्तिप्रमितिश्चेत्, *स्यात्* इत्थं व्यवस्था कल्प्यते;-अस्मिन् कल्पे प्रतिपन्नानां कल्पान्तरे पुनरावृत्तिः, कल्पान्तरे प्रतिपन्नानां तत्रानावृत्तिरिति; अन्यथा विशेषणवैकल्यादिति।।

अपि च ''अभ्युपेत्ये'' त्यारभ्य ''तथा तद्वैतदि''त्यतः प्राक्तनग्रन्थस्यायमर्थः-शब्दादवगते ब्रह्मणि सुखसंवेदनत्वादभ्यासेनापरोक्षीकृते विधिमन्तरेण यत्साक्षात्कारणम्, तद् ब्रह्मवेदनमित्युच्यते। तस्मिन्नुत्पन्नेऽनन्तरमेवाविद्यादिदोषनिवृत्तेर्युक्तं ब्रह्मसंवेदनेन समानकालत्वं फलस्य। यदा पुनरुपासनैवाध्यारोपितात्मविषया विधीयमाना ब्रह्मसंवेदनमुच्यते, तदा नैयोगिकफलस्य कालान्तरभावित्वान्न युक्तः समानकालतानिर्देशः। अतः शब्दादपि विदितस्य ब्रह्मणः स्वयमेवापरोक्षज्ञानाय प्रवृत्तेः फलजननात्प्राङ् न कार्यानुप्रवेश इति। ''तथा तद्वैतत्पश्यनृषिर्वामदेवः'' इत्यादिः ''किञ्चे'' त्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः।।

अपि च ब्रह्मविद्याफलमविद्यानिवृतिं दर्शयन्ति। स चापरोक्षाध्यासलक्षणतत्त्वापरोक्षज्ञानमन्तरेण न निवर्तते। यदा पुनरुपासनैवारोपितरूपा तत्त्वज्ञानं स्यात्, न तेनाविद्या निवर्तेत। अतस्तत्त्वज्ञानमेव प्रमाणजनितमविद्यानिवर्तकम्, इत्यविद्यानिवृत्तिफलश्रवणाद् ब्रह्मात्मनि वेदान्ताः प्रमाणमित्याह-*किंच तस्मै मृदित-*कषायायेत्यादि*।। *ननु* अविद्यानिवृत्तिरिह न श्रूयते, *नैष दोषः*; ''तरति शोकमात्मविदि''ति शोकतरणनिमित्तमात्मज्ञानं प्रक्रम्य ''तमसः पारं दर्शयती''त्युपसंहरन् यदि तमोनिवृत्तिमेव न ब्रवीति, तदा शोकाद्यध्यासनिवृत्त्युपक्रमो न स्यात्। अतः

शोकाद्युपादानानाद्यविद्यानिवृत्तिरेव ''तमस: पारं दर्शयती'' त्युक्तेति गम्यते। तथा ''अविद्याया: परं पारं तारयसी''त्यविद्यातिक्रमेण ब्रह्मप्राप्तिं ब्रुवन्नतिक्रमानुपपत्तेर्निवृत्तिमेव दर्शयतीति श्रुत्यनुसारेणाविद्यानिवृत्तिफलसिद्धये तत्त्वज्ञाननिष्ठं वेदान्तप्रमाणमित्युक्तम्।।

इदानीं तर्कशास्त्रानुसारेणापि मिथ्याज्ञाननिवृत्तिफलं तत्त्वज्ञानमिति दर्शयति- *इतश्चैतदेवमिति*।। अयमर्थ:-दु:ख-जन्म-प्रवृत्ति-दोष- मिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति। आत्म-शरीरेन्द्रियार्थ-बुद्धि-मन:- प्रवृत्ति-दोष-प्रत्यभाव-फल-दु:खापवर्गेषु द्वादशसु पदार्थेषु यदिदमनादिप्रवृत्तं मिथ्याज्ञानम्, तस्यात्मपरमात्मशरीरेन्द्रियादिद्वादशपदार्थतत्त्वदर्शनवैमल्यादपाये तेषु राग-द्वेष-मोहा नोत्पद्यन्ते। तत: प्रवर्तकाभावात्सुख-दु:ख-फले प्रवृत्ति-निवृत्ती नोपजायेते। तत: प्रवृत्ति-निवृत्तिद्वारोपचितशुभाशुभव्यामिश्रकर्मशून्यतया ब्रह्मादिस्थावरान्तेषु योनिभेदेषु न जायते; शरीरसम्बन्धं न प्रतिपद्यत इत्यर्थ:। तत: शरीराभावे सुख-दु:खे नोत्पद्येते, इति मिथ्याज्ञानापायमेव मोक्षं दर्शयति। तथा वैशेषिकैरपि द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायेषु सालक्षण्यवैलक्षण्याभ्यां तत्त्वापरिज्ञानादनादिप्रवृ त्तं मिथ्याज्ञानं तत्त्वपरिभावनया निवर्त्यते; ततश्चोत्तराभावादपवर्ग इत्युक्तम्। तथा सांख्ययोगैरपि दर्शितम्-द्रष्टृ-दृश्याविवेकलक्षणाऽविद्याऽनादिप्रवृत्ता तत्त्वज्ञानेन निवर्त्यते। ततश्चाविद्याऽस्मिता-राग-द्वेषाभिनिवेशा: क्‍लेशा: प्रहीयन्ते। तत: प्रक्षीणक्लेशस्य प्रवृत्त्यनुदयादपवर्ग इति। सुगतैरप्युक्तम्-अनुसन्धानकल्पनया राग-द्वेषादिदोषै: प्रवृत्ति-तत्फलोदयपर्यन्तैर्विषयविभ्रमैश्च दूषितानि विज्ञानानि। तेषु च तत्त्वपरिभावनया निवृत्तेषु,विभ्रमेषु, विशुद्धविज्ञानचरमक्षणोदयो मोक्ष इति। तदेवमविद्यानिवृत्तौ मोक्षे प्रमाणजनितं तत्त्वज्ञानं विहाय कथमुपास्तिक्रिया मोक्षसाधनं कल्प्यत इति?

ननु प्रदर्शितमन्यदेव मिथ्याज्ञाननिवर्तकं तत्त्वज्ञानम्। तथाहि-द्वादशपदार्थेषु तत्त्वपरिभावनाजनितेन सम्यग्ज्ञानेनाविद्या निवर्त्यते। पूर्वोपचितानि च कर्माणि तत्त्वपरिभावनाजनितसंक्लेशेन तत्प्रकर्षजनितेनानन्देन वर्तमानस्य चोपभेगेन निवर्त्यन्ते। ततश्च कैवल्यमिति नैयायिकैरुक्तम्। वैशैषिकैरपि पदार्थषट्कपरिभावनाजनितेन तत्त्वज्ञानेनेश्वराभिध्यानानुगृहीतेन मिथ्याज्ञानं निवर्त्यते, ततो रागादय: क्रमेण परिहीयन्ते, ततश्च पूर्वोपचितदुरितानां पदार्थपरिभावनापरिक्लेशफलानामत्यन्तोच्छेद:, सुकृतानां च तत्त्वदर्शनवैमल्यानन्देन निवृत्ति:, तत: कैवल्यमिति दर्शितम्। योगास्तु प्रतिपेदिरे-असंप्रज्ञातसमाधिजनितेन प्रकृति-पुरुषविवेकज्ञानेन पुरुषाकारमात्रपर्यवसितेनाविद्याऽस्मिता-राग-द्वेषाभिनिवेशेषु क्षीयमाणेषु पूर्वोपचितकर्मसु चैकभविकन्यायेन क्षीयमाणेष्वपवृज्यत इति। सुगतै: प्रतिपन्नम्-क्षणिक-स्वलक्षण-दु:खमार्गासत्य-भावनाजनितविशुद्धज्ञानलक्षणचरमक्षणोदयेन हीयमानेषु स्थायित्वाकार्यत्व-प्रवृत्ति-विषयविभ्रमेषु सन्तानोच्छेदो मोक्ष इति; तदेवं भिन्नविज्ञानसाध्यो मोक्ष इति, तत्राह- *मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानादिति*।। *ननु* प्रदर्शिततत्त्वदर्शिनेष्वपि मिथ्याज्ञाने प्रतिपक्षेषु ब्रह्मविज्ञानमेव किमिति

निवर्तकं गृह्यते? इति चोदयति-*कथं गम्यत इति*।। भेददर्शनस्य मिथ्याज्ञानविलसितत्वेन तत्प्रतिपक्षेणाद्वितीयब्रह्मात्मदर्शनेनैव तन्निवृत्तिः, न यथोक्तभेददर्शनैरिति परिहरति-*इन्द्रो मायाभिरित्यादिना*।। *ननु* अद्वितीयब्रह्मात्मैकत्वपरं न शास्त्रम्; तत्र तात्पर्याभावात्, किन्तु जीवविलक्षणे प्रमाणान्तराविरुद्धे ब्रह्मणि शास्त्रप्रतिपन्ने संपदादिविषयाणि तादात्म्यवाक्यानीति पूर्वपक्षयति--*अथापि स्यादित्यारभ्यात्रोत्तरमित्यतः प्राक्तनेन ग्रन्थेन*। ग्रन्थस्तु स्पष्टार्थः। तत्रेदं वक्तव्यम्-किं प्रमाणान्तरविरोधात्संपदादिपरः पदसमन्वयः? किं वाऽर्थे तात्पर्याभावादिति? न तावत्प्रमाणान्तरविरोधः; तयोस्तदगोचरत्वात्। भेदावभासेऽपि बिम्ब-प्रतिबिम्बन्यायावतारात्। न च तात्पर्याभावादर्थपरत्वाभाव इत्याह-*संपदादिरूपे हीत्यादिना*।। तथाहि-''तत्त्वमसी''ति नवकृत्वोऽभ्यस्तस्य ''अनेन जीवेनात्मनानुप्रविश्ये''त्यैकात्म्यसिद्धयेऽर्थवादो गृह्यते। ''अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षयलोका भवन्ती''ति भेददर्शनं निन्द्यते। तथा-''अहं ब्रह्मास्मी''त्यस्य ''स एष इह प्रविष्टः'' इत्याद्यर्थवादः। ''अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमि'' त्यादिभेदप्रतिषेधश्च तात्पर्यहेतुरुपादीयते। तथा-''एष त आत्मे''ति बहुकृत्वोऽभ्यस्तस्य ''नान्योऽतोऽस्ति द्रष्टे'' त्यादिभेदापवादेन तात्पर्यं ज्ञायते। तथा-''स यश्चायं पुरुषे यश्चासावादित्ये स एक'' इत्यस्य तत् सृष्ट्वा तदेवानुप्राविशदि''त्यर्थवादः। तथा ''उदरमन्तरं कुरुतेऽथ तस्य भयं भवती''ति भेददर्शनापवादः। तथा-''एतमेव पुरुषं ब्रह्म ततममपश्यदि''त्यस्य ''स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यते''त्यर्थवादः।। तदेवं सर्ववेदान्तेषु तत्र तत्रावस्थात्रयपर्युदासेन ब्रह्मात्मैकत्वं प्रतिपाद्यमानं द्रष्टव्यम्। न हि भेददर्शनापवादेन ब्रह्मण एव जीवात्मना प्रवेशार्थवादेन च ब्रह्मात्मैकत्वं तत्र तत्राभ्यस्यावस्थात्रयसंबन्धविरोधनिराकरणेन च। प्रतिपाद्यमानं तात्पर्यहीनमिति युक्तं वक्तुमिति। *किंच* अविद्यानिवृत्तिर्ब्रह्मात्मभावश्च विद्याफलं श्रूयते। न च संपदादिपरत्वे तदुपपद्यते; अन्यस्यान्यात्मताविरोधात्, अप्रमाणत्वाच्च। अतः फलवचनासामर्थ्यादपि ब्रह्मात्मैकत्वपरः पदसमन्वय इत्याह-*तदवगमनिमित्तं चेति*।। उपसंहरति-*तस्मान्न संपदादिवदिति*।।

अत्र कश्चिदाह-ब्रह्मणो भिन्नाभिन्नोऽयं जीवः। ततश्च ब्रह्मणो नित्यमुक्तता जीवस्य च नित्यबद्धता व्यवस्थामश्नुते, अत्यन्ताभेदे तु ब्रह्मैव स्वसंसाराय कथं जगदुत्पादयेत्? विरुद्धा च विशुद्धस्याशुद्धताप्रतिपत्तिरिति, *अत्रोच्यते*; किमात्मिकेयं भिन्नाभिन्नता? न तावज्जातिव्यक्ति-गुणगुणि-कार्यकारण-विशिष्टस्वरूपांशांशिभावनिबन्धना; जीव-ब्रह्मणोस्तेषामभावा-त्प्रकारान्तरेण भेदाभेददर्शनात्। ''ममैवांशो जीवलोकः'' इति स्मृतेरंशांशितेति चेत्, न; ''निष्कलं निष्क्रियमि''तिश्रुतिविरोधात्। ''पादोऽस्य सर्वा भूतानी''ति चाल्पतामात्रविवक्षयोक्तम्; वाक्यस्य ब्रह्मानन्त्यप्रतिपादनपरत्वात्, सांशत्वे च पटादिवदवयवारभ्यत्वप्रसङ्गात्। *ननु* स्वाभाविकी निरवयवता, बुद्ध्याद्युपाधिनिमित्तं सांशत्वमिति चेत्, न तावदुपाधिना विदार्य पृथक्क्रियते जीवः;

खड्गधारासमाविद्धेऽप्याकाशे निरवयवे भेदनादर्शनात्। उपाधिभिश्च स्वात्मानं विदार्य संसारमनुभावयता ब्रह्मणा स्वात्मनि व्यामोह एव प्रकटितः स्यात्। न चोपाधीनामन्यार्थतया सृष्टिः; अन्याभावात्, प्रागभिन्नानां जीवानामन्यत्वाभावात्, द्रव्येणैव द्रव्यविदारणात्कर्माविद्यासंस्काराणां सतामप्यनुपाधित्वात्।।

अथ भेदोऽनिष्पन्नोऽप्यौपाधिको व्यज्यत इति, तर्ह्यनादिरेव भेदः। स च जाति-व्यक्तिभावादिनिबन्धनो ब्रह्मणि जीवे च न स्यात्। नील-पीतादिवत्स्वाभाविको भेदो द्रव्यत्वादिजातिनिबन्धनश्चाभेद इति चेत्, तर्हि तद्वदेव-''अयमात्मा ब्रह्मे''ति सामानाधिकरण्यं न स्यात्, तस्यैव प्रवेशश्रुतयश्च बाध्येरन्। एकत्वानुमानं च दर्शितम्। न निष्पन्नः, नाप्यनादिः, किंतूपाधिनिबन्धनस्तत्र प्रकाशते भेद इति चेत्, स तर्ह्यतस्मिंस्तदारोपो विभ्रम एव स्यात्। न च प्रत्यक्षादिभिर्जीवब्रह्मभेदो गृह्यत इत्युक्तम्। आगमश्च ''नान्योऽतोऽस्ति द्रष्टे''ति भेदं प्रतिषेधति। अभेदवचनानि तानीति चेत्, मैवम्; ''एष त आत्मे'' त्यादिनाऽभेदं प्रतिपाद्यैव पुनर्भेदस्य तत्रैव प्रतिषेधात्, कथं वा सत्यप्यभेदेऽविद्या-काम-कर्मव्यवस्था? न ह्याकाशं घटेनावच्छिद्य तदन्तर्धूमादिसमावेशने सत्याकाशस्य धूमादियोगः परिहर्तुं शक्यते। *ननु* भेदाद् व्यवस्थाऽपि विद्यते, तर्हि ब्रह्मण्यविद्यादिसंसर्गोऽसंसर्गश्चेत्युभयमपि स्यात्। *ननु* विरुद्धमिदमापाद्यते, कोऽयं भेदाभेदवादिनो विरोधो नाम? एकोपाधावेकस्यैव भावाभावोपगमादभेदो नाभावः, किन्त्वैक्यमेव धर्मान्तरमिति चेत्, तथाऽपि-'अहं मनुष्यो' 'द्वौ चन्द्रावि'त्यादावैक्यभेदयोर्भेदैक्यज्ञानाभ्यां बाधदर्शनाद्भेदाभेदौ विरुद्धावेकत्राभ्युपगच्छता किमिति भावाभावाविदानीं ब्रह्मणि नाभ्युपगम्येयाताम्? *किंच* प्रत्येकं देहपटावयवेषु मलसंसृष्टेषु मलिनः पटोऽहं मलिन इति वाऽवयविनि मलसंसर्गनिश्चयात् फलवचनानां च वर्तमानापदेशिनां प्रत्यक्षविरुद्धतयाऽर्थवादत्वात्, सत्यपि भेदे जीवसमवायिभिर्मलैरवयवि ब्रह्म मलभूयिष्ठमेवेति निश्चीयेत। *किंच* ब्रह्मण्यविद्यादिमलसंसर्गमप्यसहमानोऽतिभक्तिविलसितान्तःकरणः कथं तैरेव मलैरभेदं सहते!!! निरवद्यश्रुतिविरोधान्नाभेद इति चेत्, न; सर्वात्मत्वश्रुतेः। अत एव पापीयानयं पक्ष इत्युक्तम्। *ननु* उपाधिभेदेन व्यवस्थाप्यते, *न*; अर्थतो भेदनाभावे परमार्थसत्यस्य संसारसम्बन्धस्याभेदे सति व्यवस्थानुपपत्तेः। मिथ्याभेदेन तु मिथ्यासंसारव्यवस्था युज्यते; बिम्ब-प्रतिबिम्बयोस्तथा दर्शनात्। *किंच* ब्रह्म सर्वान् जीवानात्मत्वेन पश्यति वा? न वा? न चेत्, सर्वज्ञताहानिः। पश्यति चेत् स्वात्मन्येव संसारं पश्येत्। *ननु* भेदमपि पश्यति, तर्हि ब्रह्माऽऽत्मनि संसारं पश्यति, न पश्यतीति स्यात्। *किंच* सत्यपि भेददर्शने मिथ्यातादात्म्याभिमानाद् देहधर्मानात्मनि पश्यति, किमु वक्तव्यं सत्येनाभेदाभिमानेनेति? न ह्यभेदापरोक्ष्ये सति भेदोऽप्यपरोक्षोऽवभासमानो दृष्टः।।

किंच सर्वं च सत्यतयैवात्मन्यपरोक्षतया सर्वाधारस्य सर्वज्ञस्य पश्यतो ब्रह्मणः सर्वसंसारसम्बन्धः स्यात्। *किंच* ज्ञान-ध्यान-समाधिभिरेकस्मिन्नुपाधावेकस्य जीवस्य प्रलीयमानेऽपि न किंचित्प्रयोजनमस्ति; परिशिष्टसर्वोपाधितद्धर्मसंबन्धप्रतिभासनात्। न च सर्वोपाधिविनिर्मोक्षः केनचिदपि

कर्तुं शक्यते। मम पुनरेकोपाधिपरित्यागेन बिम्बभूतब्रह्मात्मतापरोक्षावभासिनोऽपि प्रतिबिम्बश्यामत्वादिभिरिव जीवसंसारैर्न संबन्धः; मिथ्यात्वेन तत्त्वज्ञानप्रतिहतत्वात्। स्वप्नादिवच्च तत्त्वज्ञानेन सर्वोपाधिविनिर्मोक्षश्च युज्यते; वामदेवादिमुक्त्येदानीं संसारानुपलब्धिः स्यादिति चेत्, एकैकमुक्तावप्यनन्तैरेव युगैरनन्तानां जीवानां मुक्तत्वात्तुल्येदानीं संसारानुपलब्धिः। इदानीं संसारदर्शनं तु परस्यापि तुल्यम्। अनुपपत्तिश्चावयोः समाना। अतो निरुपाधिकचैतन्ये त्वयि ब्रह्मणि प्रत्यक्षे बन्धावभासे सोपाधिकचैतन्येषु तव मुक्ततावभासो विभ्रमः। तद्विषयश्रुत्यादीनां प्रत्यक्षविरुद्धतयाऽर्थवादत्वाद् निरुपाधिकचैतन्यप्रतिभासे त्वयि सोपाधिकचैतन्यभेदानां कल्पितत्वात् कस्यैकस्य बन्धमोक्षाविति तव तावत्संदेहो न जायते; सोपाधिकचैतन्येषु मुक्तताभ्रमात्, तद्वचनानां चार्थवादत्वात्। एवं प्रत्येकमात्मनो न संदेहः। तस्मात्सर्वसङ्करवादिनो विभ्रमोऽयमस्मत्पक्षे व्यवस्थेति।

तदेवं ब्रह्मावगमे विधिमन्तरेणैवापरोक्षफलपर्यन्ते साध्यान्तराभावान्न विधिसम्बन्ध इत्याह- *तत्रैवं सतीति*।। किं तर्हि प्रमाणफलमिति? तदाह- *अतो मिथ्यैवेति*।। *ननु* प्रयोजनाभावाद् ब्रह्म न विधिकर्म भवति? आहोस्वित् कारकत्वाभावादिति? प्रयोजनं तु साध्यो मोक्षो वक्ष्यते, न कर्मकारकत्वाभावात्, विदिक्रियाकारकत्वादित्याह- *ननु* विदिक्रियाकर्मेति* न चेति भाष्यमेव परिहारः। *ननु* विदिक्रियाकर्मत्वाभावे शास्त्रजन्यज्ञानं व्यावर्तकत्वाभावान्न शास्त्रगम्यं ब्रह्मेति चोदयति- *सोऽयं शान्तिकर्मणीति*।। स्वयंप्रकाशमानतया स्वविषयप्रकाशजननानपेक्षस्यापि ब्रह्मणः शास्त्रजन्यज्ञानाकारतया तद्व्यावर्तकस्याविद्यादिदोषनिवृत्तिफलवत्तया शास्त्रप्रमेयं ब्रह्मेति प्रतिपादयति।।

अत्रोत्तरम्- *नाविद्याकल्पितेत्यादि*।। *ननु* अनधिगतार्थप्रकाशमन्तरेण न प्रमाणव्यापारस्य फलवत्तेत्यत्राह- *शास्त्रं हि सोऽयमित्यादीति*।। *ननु* तत्र वा विषयाधिगममन्तरेण कथं निवर्त्यमात्रे प्रमाणव्यापार इति? अत आह- *तथाहीति*।। उक्तमेतद् देवदत्तैक्यस्याभिज्ञायामेव सिद्धत्वात्तदाकारेण प्रत्यभिज्ञावाक्याभ्यामुपजनितेन ज्ञानेनोपाधिपरिकल्पितभेदनिरासेन प्रत्यभिज्ञावाक्ययोः प्रामाण्यमिति। *ननु* ब्रह्मात्मनि विपर्ययाभावान्न तन्निरासेनापि प्रामाण्यमित्यत आह- *तथा त्वंपदार्थोऽपीति*।। केन तर्हि प्रमाणाकारेण विपर्यासनिरास इति? तदाह- *तत्पदार्थैकतामुपगच्छन्निति*।। तत्त्वंपदाभ्यां लक्ष्यमाणं ब्रह्मात्मैकत्वं विज्ञानाकार इत्यर्थः। किं तर्हि तदाकारज्ञानेन निवर्त्यत इति? तदाह- *अहमात्मकेदमंशोपाधिकृतेति*।। प्रमाणव्यापारो विषयाकारोदय एव प्रमीयमाणवस्तुसामर्थ्याद्विपर्यासनिरास इत्याह- *अर्थादिति*।।

ननु ज्ञातृसमवायिनी ज्ञेयाकारा संवित्प्रमाणफलम्, अनेन च विपर्यासो निरस्यते; प्रकाशस्यैवाप्रकाशविरोधित्वात्, नित्ये च चैतन्यप्रकाशे न प्रमाणफलमस्तीत्यत आह- *अवच्छिद्यमानानिदंप्रकाशः प्रमाणफलमिति*।। प्रमाणेन विषयीकृतार्थगतं चैतन्यं

प्रमाणफलमुच्यते, न प्रमाणजन्यम्; लोकेऽप्यजन्यत्वात्। अतः प्रमातृ-प्रमाण-प्रमेयावच्छिन्नं चैतन्यं प्रमात्रादि निवर्तयति; अवच्छेदनिवृत्त्योः पूर्वोत्तरक्षणतया विरोधाभावादिति। *ननु* फलं चेन्निवर्तकम्, निवर्त्यानन्तरभूतत्वात्। तर्हि फलं यावत्कालमेव स्थास्यतीति, नेत्याह- *तदप्यवच्छेदकविनाश इति*।। *ननु* शास्त्रजन्यज्ञानेन न प्रकाश्यते चेद् ब्रह्म, न शास्त्रगम्यं स्यादित्यत आह- *तेन प्रमाणादिचतुष्टयस्येति*।। *ननु* किमित्यविद्यानिवृत्तिरेव प्रमाणफलमुच्यते? विषयप्रकाशोऽपि प्रमाणफलमुच्यतामिति, तत्राह- *तथा चैवंविधस्येति*।।

अविज्ञातं विजानताम्'' यतो वाचो निवर्तन्त इत्यादि।। *ननु* ''मनसैवानुद्रष्टव्यम्'' ''तन्त्वौपनिषदं पुरुषमि''ति ज्ञानक्रियाकर्मत्वमपि श्रूयते, *नैष दोषः*; वेदान्तजनितापरोक्षज्ञानस्याकारसमर्पकतया व्यावर्तकत्वं शास्त्रप्रमेयत्वं नाम, ज्ञानजन्यप्रकाशातिशयशून्यत्वमविषयता नामेति व्यवस्थोपपत्तेः। नहि प्रकाशगुणे पुनः प्रकाशगुणान्तरोदय इति। *ननु* अविद्यानिवृत्तेरपि ज्ञानसाध्यत्वाद् मोक्षस्यानित्यतेति, नेत्याह- *एवं च नित्यमुक्तति*।।

ननु कोऽयं जीवो नाम? यस्य स्वरूपं त्वंपदेन लक्ष्यमाणं ब्रह्मैव वाक्यार्थः संपद्यते। ब्रह्मैवाविद्याप्रतिबिम्बितमिति वदामः। ततश्च त्वंपदेनाशेषोपाधिनिराकरणेनाऽऽत्मस्वरूपमेव लक्ष्यमाणं तत्पदोपलक्ष्यं ब्रह्मैव पदद्वयसामर्थ्यात्संपद्यते। न चैतदुपाधिद्वयनिराकरणेन विशुद्धब्रह्मात्मज्ञानमेकेनैव पदेन लभ्यते; विरोधानुत्पत्तेः। *ननु* भिन्नाभिन्नता वाक्यार्थः किन्न स्यात्? *न*; तथा सति शरीरेन्द्रियविशिष्टस्यैव त्वंपदार्थस्य ब्रह्मणो भिन्नाभिन्नत्वात्तथैव वाक्यार्थसिद्धर्लक्षणया ब्रह्मात्मज्ञानेनाध्यासबाधो न स्यात्, वर्तमानापदेशिनां फलवचनानां योग्यानुपलब्धिबाधात्, सत्यपि तत्त्वज्ञाने न शास्त्राद्बन्धनिवृत्त्यवगमः। भिन्नाभिन्ने च वाक्यार्थे न तत्त्वज्ञानाद् भेदांशनिवृत्तिः; तस्य स्वविषयानाशकत्वात्कर्मोपासनापरोक्षानुभवान्निवृत्तिकल्पना भिन्नाभिन्नविषयागमविरुद्धा, आगमस्य सर्वकालं भेदाभेदविषयत्वात्। यत्त्वभेदांशेन ज्ञानमोक्षादिव्यवहारो भेदांशेन कर्माविद्यादिव्यवहार इति व्यवस्था कल्प्यते; तन्मन्दचेतनोपच्छन्दनमात्रम्। तथाहि- यदि भेदाभेदाभ्यामंशी जीवोऽभेदांश्च ब्रह्मैव स्यात्, तदा सावयवो जीवांशश्च ब्रह्मेति पण्डि[illegible]न्यस्य हि परीतोऽर्थः संपद्येत। भेदांशस्याब्रह्मत्वेऽत्यन्तभेद एव स्यात्। न चांशद्वयसमुदायो जीवः; अव[illegible]वप्रसङ्गात्। न चाभेदांश एव जीवः; ब्रह्मण एव जीवत्वप्रसङ्गात्। नचोभावंशौ; जीवद्वयप्रसङ्गात्। [illegible] च भेदांश एव जीवः; अत्यन्तभेदप्रसङ्गात्। तत्र तत्त्वज्ञानमोक्षादिव्यवहाराऽसिद्धिः। भेदाभेदांशावभिन्नौ जीव इति चेत्, यद्यभिन्नावेव जीवः, तर्हि ब्रह्मैव जीव इति कुतो बन्ध-मोक्षव्यवहारव्यवस्था? अथ भेदाभेदांशौ परस्परं भिन्नाभिन्नाविति मतम्, नैवम्; भेदाद्यनवस्थाप्रसङ्गात्। किंचांशिनो वांशद्वयसमुदायस्य वा परस्पराभिन्नांशद्वयस्य वा जीवत्वे ब्रह्मणो जीवांशत्वं परिहर्तुं न शक्यते। किंच कस्यायं शास्त्रोपदेशः? न तावदभेदांशस्य; तस्य

ब्रह्मस्वरूपतयोपदेशानपेक्षत्वात्, नापि भेदांशस्योपदेश:; ''अहं ब्रह्मास्मी''तिप्रतिपत्त्ययोगात्। न च भेदांशस्य पुनरभेदः सम्भवति; विरोधात् ब्रह्मण्येव संसारप्रसङ्गाच्च। कस्यचायमविद्यादोष:? न तावदभेदांशस्य; ब्रह्मण्येव प्रसङ्गात्। नापि भेदांशस्य; उपाधिजननात् प्राग् भेदाभावात्। स्वत एव भेदांशेऽशिनि वा जीवे बन्धदोष इति चेत्, तद्विनाशे जीवनाशः स्यात्; मोक्षे भेदांशविनाशात्, अभेदांशस्य नित्यमुक्तत्वात्।। कस्यायं मोक्ष उपदिश्यते। तत्रापि भिन्नाभिन्नं चेत्, ''ब्रह्म वेद ब्रह्मैव भवती'' त्येवकारविरोधः संसारादविशेषश्च स्यात्।

किं चायं सर्वत्र संकीर्णं वस्तु प्रतिपद्यमानः स्वर्ग-नरक-बन्ध-मोक्षादीन् सांकर्येण व्यवस्थापयितुं प्रवृत्तः कथं व्युत्पन्नमतिषु नापत्रपेत। भेदेनैव सर्वं व्यवस्थाप्यते चेत्, किमनेन भेदेन बन्ध्यायमानेन? स्वप्रयुक्तकार्यानिमित्तेन कल्पितेन धर्मिप्रतियोगिव्यतिरेकेण भेदोपाधेरभावात्। उपाधिभेदेन भेदाभेदव्यवस्था त्वेकस्य भेदाभेदौ निवारयति; धर्मिप्रतियोगिभेदात्। शास्त्रं पुन:-''नान्योऽतोऽस्ति द्रष्टे''ति भेदोपमर्देनैवाभेदं प्रतिपादयति-''एष त आत्मे''ति च। न च सत्त्वादिसामान्यद्वारेण जीवब्रह्मणोरभेद:; अनुमानेनैव तत्सिद्धेः शास्त्रानपेक्षणात्। *ननु* अत्यन्ताभेदवादिनस्तवैव सर्वं संकीर्येत, न मम; भेदस्याभ्युपगमात्, *नैवम्*; कार्यप्रपञ्चस्यानिरूपितस्वभावतया यथावभासं भेदादिव्यवस्थोपगमात्, आत्मन एवाभेदोपगमात्। तस्मान्मन्दमतिसन्तोषमात्रप्रयोजनतया बहुवेणुभारपीडितचेतसाऽयं भेदाभेदपक्षः समादीयत इति। तस्मादिदमेव ब्रह्म देवदत्तवदुपाधिभेदनिमित्तविभागपरामर्शेन प्रत्यस्तमितविभागं वाक्येन प्रतिपाद्यत इति शोभनम्।।

''यस्य तूत्पाद्यो मोक्ष:'' इत्यादिनोत्तरस्य भाष्यसमुदायस्य तात्पर्यमाह-*ननु* ब्रह्मणोऽपि कारकत्वसम्भवात् कथं न सम्भवति क्रियेत्याह-*कथमिति*।। तत्रेदं वक्तव्यम्-किं यागादिवत्कर्तृसमवेतापूर्वादिफलदानाय ज्ञानं विधीयते? किं वा कर्मकारकातिशयफलायेति? न तावत् पूर्व: कल्प:; ''न कर्म-ब्रह्म-विद्याफलयोर्वैलक्षण्यादि'' त्यारभ्य निरस्तत्वात्; नाप्युत्तरः कल्प इत्याह-*यदि तावदुत्पाद्य इत्यादिना*।।

अत्र केचिदाहु:-उत्पाद्यत्वेऽपि मोक्षस्य नानित्यतादोष:; क्रियासाध्यस्यैवानित्यत्वात्, मोक्षस्य ज्ञानमात्रसाध्यत्वात्, न च ज्ञानमात्रसाध्यस्यानित्यत्वं दृष्टम्; न चाविद्यानिवृत्तिमात्रमेव ज्ञानसाध्यम्; ब्रह्मभावस्यापि साध्यत्वात्। ननु जीवस्य ब्रह्मभावः स्वाभाविको न साधनीय:, न; तादात्म्यस्यैव स्वाभाविकत्वात्। भेदतावन्मात्रविरोधस्तादात्म्यं नाम। तद्भावस्तु ब्रह्मतावन्मात्रताजीवस्य ज्ञानेन साध्यते; ''तरति शोकमात्मवित्'' ''ब्रह्म वेद ब्रह्मैव भवती''त्युभयविधश्रुतिसामर्थ्यादिति, *अत्रोच्यते*-किं शास्त्रजनितसम्यग्ज्ञानेन तादात्म्यविषयेण मोक्षः साध्यते? किं वा तद्भावविषयेणेति? न

तावत्तद्भावविषयेण; तस्य नित्यसिद्धताप्रसङ्गात्। यदि तादात्म्यविषयेण? तत्रापि निवृत्ते तादात्म्ये तद्भावः साध्यते वा? न? इति वक्तव्यम्। निवृत्ते चेत्, ज्ञानस्य स्वविषयविनाशकत्वं दर्शितं स्यात्। ज्ञाननिवर्त्यत्वे चाज्ञानमेव तादात्म्यमापद्येत, अनिवृत्ते तु तादात्म्ये तद्भावो नोपपद्यते। न हि तावन्मात्रता तद्विरोधिता च युगपत् स्यातामिति।। किंच तादात्म्यनिवृत्तिरेव तद्भावः किंवान्य इति वक्तव्यम्। निवृत्तिरेव चेत्, अविद्यानिवृत्तिरेव मोक्ष इत्युक्तं स्यात्, अन्यश्चेत्, तर्हि तादात्म्यं तद्भावं चान्तरेण रूपान्तरं वक्तव्यम्। न हि जीव-ब्रह्मणो-स्तादात्म्य-तद्भावव्यतिरेकेणात्यन्तभेदादन्यद् रूपान्तरं शक्यते निरूपयितुम्। कश्चायं तद्भावो नाम? न तावद् ब्रह्मैव; असाध्यत्वात्। अत एव न जीवोऽपि; न च तृतीयश्चेतनोऽचेतनो वा तद्भावो निरूपयितुं शक्यः। किंच यदि तादात्म्यलक्षणातिरेकविशिष्टश्चेज्जीवः, तद्विनाशे विनाशमियात्। निष्कृष्टतादात्म्यश्चेज्जीवः, ब्रह्ममात्रमेव स्यात्; अत्यन्तभेदानङ्गीकारात्। तस्मात्तत्तादात्म्यस्य तद्भावः शास्त्रयुक्तिहीनः। न च तत्त्वंपदाभ्यां लक्ष्यमाणयोर्जीव-ब्रह्मणोस्तादात्म्यं प्रतीयते; भिन्नोपाधिपरामर्शेनैकस्य वस्तुनो लक्ष्यमाणत्वात्। न चैकेनैव पदेन तस्य लक्षणायां भेदावभासो निवर्तते। फलश्रुतयश्चाविद्यानिवृत्तौ योजयितुं शक्यन्ते। न च ज्ञानसाध्यस्य नित्यतालाभः; संस्कारस्य तज्जन्यस्यानित्यतादर्शनात्। न च संस्कारस्यापि क्रियाजन्यता; संस्कारान्तरवत्स्मृतिहेतुत्वायोगात्, अन्वय-व्यतिरेकविरोधाच्च। अब्रह्मज्ञानस्य साध्यत्वात् क्रियाजन्यतेति चेत्, न; क्रियायामनैकान्तिकत्वात्। तस्मादभूत्वा भवनमेवानित्यताहेतुरिति। तर्हि तृतीयं फलं क्रियासाध्यमिष्यतामिति शङ्कते--*अथानित्यत्वपरिहारायेति*।। तत्रेदं वक्तव्यम्-किं ब्रह्म प्रत्यगात्मभूतम्? व्यतिरिक्तं वा? व्यतिरेकेऽपि सर्वगतं वा? प्रदेशान्तरवर्ति वा ब्रह्मेति? तादात्म्ये दूषणमाह-*तदपि नेति*।। व्यतिरेके सर्वगतं चेत्, संयोगव्यतिरिक्तप्राप्त्यभावात्संयोगो नित्यसिद्ध इत्याह-*व्यतिरेकेऽपीति*।। प्रदेशवर्तित्वं शङ्कते-*अथ विकारावर्तिन इति*।। तत्र वक्तव्यम्-किं विकारसंस्पर्शपरिहाराय प्रदेशवर्तित्वमुच्यते? किं वा शास्त्रसामर्थ्यादिति। शास्त्रं पुनः सर्वगतत्वमेव दर्शयति, न च सर्वगतत्वेऽपि विकारसंस्पर्श इत्याह-*न विकारदेशेऽपीति*।। अथ सर्वगतत्वस्यौपचारिकत्वात्प्रदेशविशेषवर्त्येव ब्रह्मेति शङ्कते-*अथ विकारावर्त्येवेति*। *न*; मध्यमपरिमाणस्य वस्तुनः पृथिव्यादिवत्सावयवत्वात्। दूषणविभागज्ञानाय विकल्पयति-*सा तर्हि तत्प्राप्तिरिति*।। प्रथमे कल्पे दूषणमाह-*तदा स्वरूपनाश इति*।। कथं तत्र तावज्जीवस्य ब्रह्मभावः? ब्रह्मैव वा जीवो वा न संभवति; असाध्यत्वात्। नापि जीव-ब्रह्मभ्यामारभ्यमाणं द्रव्यान्तरम्; विनाशित्वप्रसङ्गात्, सर्वगतस्य ब्रह्मणोऽवयवित्वायोगात्। नापि जीव-ब्रह्मणोस्तादत्म्यं नाम कश्चित्संबन्धः; भिन्नद्रव्ययोः संयोगातिरिक्तसंबन्धाभावात्। नापि जीवेऽणुपरिमाणेऽवस्थिते ब्रह्मस्वरूपापत्तिः; विरोधात्, अनवस्थिते च परिणामे द्रव्यस्वरूपनाश इति। द्वितीयेऽपि कल्पे दूषणमाह-*संयोगस्येति*।। *ननु* शास्त्रसामर्थ्यादपुनरावृत्तौ कथं तर्केण पुनरावृत्तिः साध्यते? तत्राह-*न चापुनरावृत्तिश्रुतिरिति*।। यथाश्रुतार्थेऽप्राप्तप्रतिषेधात्, नावर्तिष्यत इति कल्पनायाः कृतकत्वानुमानविरोधात्, तस्यैव स्वरूपेणावस्थाने

"स स्वराड् भवती"तिश्रुतेरनेकेश्वरप्रसङ्गात्। तस्मान्न प्रदेशान्तरवर्तिब्रह्मप्राप्तिरिति।। *ननु* "तयोर्ध्वमायन्नमृतत्वमेती"ति श्रूयते। तर्हि प्रतीकालम्बनानामपि मूर्द्धन्यनाड्यैवाऽऽमानवपुरुषाद् गच्छतामममृतत्वं स्यात्; अविशेषश्रवणात्। *ननु* "स एनान् ब्रह्म गमयती"त्यर्चिरादिना गच्छतां ब्रह्मप्राप्तिः श्रूयते, *न*; कार्यब्रह्मविषयत्वात्। *ननु* ब्रह्मशब्दार्थस्य मुख्यत्वात्परमेव ब्रह्म गम्यते, *न*; यदि तावद् वृद्धव्यवहारे प्रयोगान्मुख्यताऽभिधीयते, तर्हि कार्यब्रह्मण्यपि रूढ एवायं शब्दो भवति। अथावयवार्थानुगमेनार्थमुख्यताऽभिधीयते, नैवम्; एकस्य शब्दस्य युगपद्रूढि-योगवृत्तिद्वयोपादानायोगात्। प्रयोगमुख्यत्वे कार्यब्रह्मैव गम्यते। किंच "स एनान् ब्रह्मलोकान् गमयती"ति ब्रह्मलोकशब्दाद् बहुवचनात्, "तेषु परावतो वसन्ती"त्यधिकरणाधिकर्तव्यताश्रवणात्, "तस्मिन् वसन्ति शाश्वतीः समाः" इति कालपरिच्छेदश्रवणात्, "तृतीयस्यामितो दिवी"ति संख्या-द्युशब्दयोः श्रवणात्, "तथैरंमदीयस्य सरसोऽश्वत्थस्य सोमसवनस्य, अपराजितायाश्च पुरो हिरण्मयस्य च वेश्मनोऽरस्य ण्यस्य चार्णवस्य पर्यङ्कादेश्च भोग्यवस्तुभेदस्य श्रवणात्, प्रजापतेः समां वेश्म प्रपद्ये" इति प्रजापतिसभावेश्मनां श्रवणाच्च कार्यब्रह्मैवार्चिरादिना गम्यत इति प्रतीयते। न च ब्रह्मैव लोक इति समासः; ब्रह्मलोकशब्दस्य सत्यलोके रूढत्वात्, यौगिकत्वेऽपि तत्र प्रथमतरबुद्धिहेतुत्वाद् ब्रह्मणि लोकशब्दविरोधात्। न चैतेषां कार्यब्रह्मलिङ्गानामपबाधया ब्रह्मशब्दस्यैकस्य प्रयोगमुख्यत्वातिरिक्तमर्थमुख्यत्वमप्युपादातुं युक्तम्; प्रजापतिशब्दस्य कार्यब्रह्मणि रूढत्वात् लोकशब्दस्य च भोगभूमिविशेषवाचित्वात्।।

किंच पञ्चाग्निविदामपि परब्रह्मप्राप्तिरस्मिन् पक्षे स्यात्। न च-"स एनान् ब्रह्म गमयती" त्येतच्छशब्दः पञ्चाग्निविदतिरिक्तान् परामृशतीति-युक्तम्; पञ्चाग्निविदामेव प्राधान्येन प्रकृतत्वात्, तेषामनिर्दिष्टफलत्वप्रसङ्गात्। किञ्च गायत्री-शाण्डिल्य-षोडशकलोपकोसल-वैश्वानर-भूम-दहर-पर्यङ्कविद्यानामेकरूपैव ब्रह्मप्राप्तिः फलम्? आहोस्विदुपचयापचयरूपम्? इति वक्तव्यम्। एकरूपफलत्वे गुणोपचयापचयादुपासनोपचयापचयौ व्यर्थौ स्याताम्। न ह्यग्निहोत्राद्यनुष्ठानोपचयात् फलोपचयो न जायते। अथ फलोपचयापचयावपीष्येयाताम्, तर्हि न विकारासंस्पर्शब्रह्मप्राप्तिः; तत्र तदभावात्। किंच वैश्वानरोपासनाफलं त्रैलोक्यापत्तिरिष्यते वा? न वा? इति वक्तव्यम् इष्यते चेत्, विकारासंसृष्टे ब्रह्मणि कथं त्रिलोक्यात्मताफलप्राप्तिः? न चेदिष्यते, "तं यथा यथोपासते" इतिश्रुतिविरोधः स्यात्। किंच पित्रादिसंकल्पैर्विकारासंसृष्टे ब्रह्मण्युपभोगः स्यात्? न वा? इति वक्तव्यम्। न चेत्, पित्रादिसंकल्पश्रुतिविरोधः। स्याच्चेत्, विकारावर्ति ब्रह्म पित्रादियुक्तं स्यात्। किंच विकारावर्तिब्रह्म प्राप्तोऽपि ब्रह्मैवेति "मनसैतान् कामान् पश्यन् रमते तेन पितृलोकेन सम्पन्नो महीयते" इति ब्रह्मण एव साधनभोगो दर्शितः स्यात्। ततश्चाप्तकामताविरोधः स्वार्थप्रयुक्ता च सृष्टिः स्यात्।

किंच विकारावर्ति ब्रह्म प्राप्तस्य लिङ्गशरीरमस्ति वा? न वा? इति वक्तव्यम्। अस्ति चेत्,

कलाप्रविलयश्रुतिर्बाध्येत। न चेल्लिङ्गशरीरम्, ''मनसैतान् कामानि''ति श्रुतिर्बाध्येत। किंच तत्र लिङ्गशरीरविलये निमित्तं वक्तव्यम्। विद्यैव चेत्, उत्क्रान्तिकाले स्यात्; तदारम्भककर्मक्षयात्। अमानवकरस्पर्शश्चेत्, विद्युत्-स्थाने स्यात्। न चोपरिष्टात्कलाविलयननिमित्तं श्रूयते। किंच औपाधिकजीवपक्षे न जीवस्य विकारावर्तिब्रह्मगमनं सम्भवति; निरवयवावच्छेदस्य घटाकाशस्येवोद्धृत्य नयनायोगात्। उद्धरणे च ब्रह्मशून्योऽयं प्रदेशः स्यात्। उपरिष्टाच्च ब्रह्मोपचयं प्राप्नुयात्। तस्मादुपाधिगमनादात्मनि गमनविभ्रमः। *ननु* उपाधेरपि गमनं न सम्भवति; तदुपादानस्य ब्रह्मणश्चलनशून्यत्वात्, न हि मृदि निश्चलायां घटस्य गमनमस्तीति, *एवं तर्हि* स्वप्नगमनवन्मायाविजृम्भितो गमनादिप्रतिभासः। *ननु* न पित्रादिसंकल्पैर्ब्रह्मणि भोगोऽभिधीयते, किन्तु यावांस्तत्र भोगः, तस्य नित्यानन्दप्राप्तावन्तर्भावादैश्वर्यभेदः कथ्यत इति, *न*; एकस्य ब्रह्मशब्दस्य यौगिकार्थभङ्गभयाद् वह्वीनां फलश्रुतीनामुपचारकल्पनायोगात्, शास्त्रान्त्यपादवैफल्यप्रसङ्गाच्च। तस्मात् प्रदेशान्तरवर्तिब्रह्मप्राप्तये क्रियाविधानमित्यनुपपन्नम्॥

संस्कारपक्षे दूषणमाह-*संस्कार्यत्वमपीति*॥ दोषापनयनेन विद्यमानस्य ब्रह्मभावस्याभिव्यक्तिः संस्कार इत्याशङ्कते-*अथ विद्यमानस्येति*॥ तत्र वक्तव्यम्-किमात्माश्रयक्रियया दोषापनयः? किं वाऽन्याश्रययेति? न तावदात्मनो निरवयवस्य परिस्पन्दपरिणामावित्याह-*नात्मनः क्रियारहितत्वादिति*॥ नचान्याश्रयक्रियया; क्रियावद्द्रव्यसंयोगाभावात्तत्रातिशयायोगादित्याह-*प्रत्यग्रूपत्वादिति*॥ *ननु* मन्त्र-देवताभिध्यानाद् विषनिरासवदीश्वराभिध्यानाद्दोषापनयः स्यादिति चोदयति-*नन्वीश्वराभिध्यानादिति*॥ ''उच्यते'' इत्यादि परिहारः स्पष्टार्थः*ननु* शास्त्रीयकर्मभिरात्मनो गुणाधानलक्षणः संस्कारः श्रूयत इति, नेत्याह-*न च स्नानादिक्रिययेवेति*॥ *अयमर्थः*-यः साधनानि शरीरेन्द्रिय-मनांसि प्रेरयति, स कर्ता, भोक्ता, संस्कार्यश्च। स च चैतन्यसंवलितोऽहङ्कारः; ''विज्ञानं यज्ञं तनुते'' इति श्रुतेः। स चाऽऽसंसारसमाप्तेरविच्छिन्नो वर्तत इति भोगश्च संभवति। तत्र च धर्माधर्मातिशय उत्पद्यते न निर्विकारात्मनि। ततस्तस्य न संस्कार्यत्वमुपपद्यत इति। *तस्मान्न संस्कार्य इत्यादि-ननु इत्यतः प्राक्तनः स्पष्टार्थः*। ''ननु ज्ञानस्यापी''त्यारभ्येदमपरमित्यतः प्राक्तनौ चोद्यपरिहारौ पूर्वोक्तावप्यवसरप्राप्तत्वात्पुनरिहानीतौ स्पष्टार्थौ*॥ जन्याजन्यफलत्वे क्रिया-ज्ञानयो-र्वैलक्षण्यमुक्तम्, इदानीं पुरुषेच्छाप्रयत्नसाध्या हि क्रिया, तदनपेक्षमात्मज्ञानमिति कारणतो वैलक्षण्यमाह-*इदमपरं वैलक्षण्यमिति*॥ चोदनाजन्यं पुरुषेच्छाप्रयत्नजन्यं न भवति; ज्ञानमनिच्छतोऽपि दुर्गन्धादिज्ञानदर्शनादित्यर्थः। *ननु* शब्दजन्यस्य ज्ञानस्य विषयजन्यत्वाभावान्न वस्तुपरतन्त्रता, ततश्चोदनाजन्यत्वमिति शङ्कते-*अथापीति*॥ तत्रापि विधिजन्यपुरुषेच्छाप्रयत्ननिरपेक्षमेव लिङ्गादिजन्यमेवेति परिहरति-*तत्रापीति*॥

ननु संयोग-विभागप्रचयातिरेकिणी केयं क्रिया नाम? *ननु* चलतीति प्रत्यक्षमेवैतच्चलनम्।

सत्यम्; तदपि संयोगविभागालम्बनमेव चलनम्। *ननु* स्थाणावपि श्येनसंयोगविभागवति चलतीति प्रसङ्गः, *न*; स्वदेशसंयोगविभागालम्बनत्वात्प्रत्ययस्य, स्थाणोश्च श्येनदेशत्वाभावात्। सर्वस्य चाकाशदेशत्वादिति चेत् न; बहलान्धकारावृते तमस्यप्रतीयमानेऽपि खद्योते चलनबुद्धिदर्शनात्। न च देशमप्रतीत्य तत्संयोगविभागाः प्रतीयन्त इति। तस्मात्संयोगविभागातिरिक्तक्रियालम्बनश्चलतीति प्रत्ययः। यस्तु स्वदेशसंयोग-विभागाभ्यां क्रियामनुमिमीते; कथम्? द्रव्यजनितौ संयोग-विभागौ, स्वाश्रये कादाचित्कातिशयपुरस्सरौ; व्यवस्थितद्रव्ये कादाचित्कत्वात्, संयोगविभागजन्यकार्यवदिति। तस्य मकरादिषु जलप्रवाहाधारेषु स्थिराचलावयवेषु स्वदेशजलसंयोगविभागयोः सतोरपि तेषु क्रियाज्ञानाभावादनैकान्तिकता हेतोरिति। किंच संयोगविभागहेतुरतिशयः क्रियाभिधानीयः स्थिरादेव द्रव्यादुत्पद्यते? अतिशयान्तरवतो वा? पूर्वस्मिन्नव्यवस्थितद्रव्यादेव क्रियाजन्मवत्तत एव संयोगविभागजन्म स्यादित्यनैकान्तिकः। अतिशयान्तरकल्पनायामनवस्थापातः। पादाश्रयस्य कर्मणो हि स्वाश्रयासम्बन्धिभूसमवायिपादसंयोगारम्भवत् प्रयत्नवदात्मपादसंयोगस्यापि भूपादसंयोगारम्भसिद्धेर्न पादाश्रयकर्मातिशयावकाशः। तस्मात्प्रत्यक्षः क्रियाप्रत्ययः॥

ननु क्षणिकस्य कर्मणः कथमिन्द्रियसंयोगज्ञानलक्षणक्षणद्वयावस्थानम्? *शब्द-विद्युदादिवदित्यविरोधः*॥ तस्मादस्ति क्रिया ज्ञानविलक्षणेति। *किंचेति स्पष्टार्थः*॥ किंच ''वेदान्तविज्ञानसुनिश्चितार्थाः'' इति निश्चितार्थविषयतत्त्वज्ञानमेव मोक्षसाधनमुक्तम्, तच्च प्रमाणजन्यत्वे संभवतीत्याह- *एवं सम्यग्ज्ञानत्वोपपत्तेरिति*॥ दार्ष्टान्तिकमाह- *एवं सतीति*॥

ननु ब्रह्मज्ञाने विधयः श्रूयन्ते, तत्कथं तर्केण निरस्यन्त इति? अत्राह- *अतः श्रूयमाणा अपीति*॥ *ननु* अनुष्ठेयाभावाद्विधेरभावे शब्दस्य वैयर्थ्यं स्यादिति, नेत्याह- *अतोऽर्थवादतयैवेति*॥ ननु* अर्थवादान्तरवत्स्तावकत्वे विधिपदमर्थशून्यं स्यादिति, नेत्याह- *तदुन्मुखीकरणादिति*॥ ''तथा च श्रवणं नामे''त्यादिना यैः श्रवणादिभिरात्मा संस्तूयते। तान् विभज्य दर्शयति। *ननु* श्रवणादिभिः किं श्रेयः क्रियते? येनोत्कर्षवद्भिरेतैर्विषयीकरणादात्मा स्तुतः स्यादिति, तदाह- *अतो वाक्यार्थे स्थैर्यादिति*॥ *ननु* विधेयस्यैवार्थवादसंबन्धः; स्तुतेः प्रवृत्तिफलत्वात्, न सिद्धवस्तुनः, इत्याक्षिपति- *कः पुनरिति*॥ फलप्रशंसाया अपि प्रवृत्त्युपयोगित्वात् फलभूतात्मप्रशंसाया अपि श्रवणादिप्रवृत्त्युपयोगित्वमुपपद्यत इत्यभिप्रेत्याह- *इदमत्र प्रस्तुतमित्यादि*॥ *ग्रन्थस्तु स्पष्टार्थः*॥ *ननु* सम्यग्दर्शनस्य फलरूपत्वात् प्रमाणाधीनत्वाच्चाविधेयतेति युक्ता तस्यार्थवादता, श्रवणादयस्तु क्रियारूपत्वात्सम्यग्दर्शनस्य दृष्टादृष्टोपकारितया विधेया एवेति, तदाह- *एतच्च सर्वं प्रथमसूत्रेणैवेति*॥ मनन-निदिध्यासनोपबृंहितस्य श्रवणस्य सम्यग्दर्शनाय विधेयत्वमङ्गीकृत्य प्रथमसूत्रं प्रवृत्तमित्यर्थः। विधीनामपि सतां स्तावकत्वमुक्तम्, इदानीं शब्दस्यार्थान्तरमाह- *अपि च नैवायमिति*॥ *ननु* मा भूवन् ज्ञानविधयः, उपासनाविधिस्तु श्रूयत

इति, नेत्याह- *तेनात्मेत्येवोपासीतेत्यादि*।। सर्वत्रैवकारविशेषणश्रवणात्, अहमितिस्वभावप्राप्त-प्रत्ययावृत्त्यनुवादेन विषयविशेषः प्रतिपाद्य इति- *अतो हानोपादानशून्येत्युपसंहरति*।।

भाष्यं विवृणोति*-तस्यायमर्थ इति*।। उक्तमेतन्मोक्षफलविधेयज्ञानब्रह्मरूपनिरूपणायां विधिनिरपेक्षमेव ब्रह्मणि वेदान्ताः प्रमाणमिति द्वितीयेन वर्णकेन प्रथमेन च वर्णकेन प्रमाणान्तरानपेक्षं ब्रह्मणि प्रामाण्यमुक्तम्, इदानीं तदुभयवर्णकार्थमाक्षिप्य समाधत्ते- *यदपि कचिदाहुरित्यादिना*।। कथम्? किमहंप्रत्ययावसेय एवात्मा वेदान्तैः प्रतिपाद्यते? किं वा तव्द्यतिरिक्तः? यद्याद्यः, तदा तस्य क्रियायामङ्गत्वाद्विधिवाक्यैर्वेदान्तानामेकवाक्यता स्यात्। अथ तव्द्यतिरिक्तः प्रतिपाद्यते, तदा किंचिदुद्दिश्य किंचित्प्रतिपाद्यमित्युद्देशताऽभावात्प्रतिपादनं न स्यात्। तस्यापि चेतनत्वे कर्मानङ्गतैव स्यात्। तस्मात्क्रियायामेव वेदान्ताः प्रमाणम्। तथाच कर्मण्येव कृत्स्नस्य वेदस्य प्रामाण्यमापस्तम्बो दर्शयति- त्रैविद्यवृद्धानां तु वेदाः प्रमाणमिति निष्ठा। तत्र यानि श्रूयन्ते व्रीहि-यव-पश्वाज्य-पयः-कपाल-पत्नी-संबन्धान्युच्चैर्नीचैः कार्यमिति, तैर्विरुद्ध आचारोऽप्रमाणमिति मन्यत इति। तथा''चाग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतमि''ति।। तत्रोत्तरमाह- *तत्रौपनिषदस्येत्यादिना*।। अहंप्रत्ययावसेयाद्विशिष्टात्मनोऽन्य एव क्रिया-कारकससंर्गशून्यः, न स कर्माङ्गतया वेदान्तानां विधिशेषतां नयतीत्यर्थः।

ननु असावपि चेतनश्चेदहंप्रत्ययगम्यतया कर्माङ्गमिति, नेत्याह- *न स केनचिदिति*।। *ननु* शास्त्रगम्यस्यापि कर्माङ्गता किं न स्यादिति? अत आह- *न हि प्रमाणान्तरासिद्ध इति*।। अधिकारिणं कर्तारं च प्रमाणान्तरसिद्धावनूद्य विधिमात्रप्रतिपादनादन्यथा वाक्यभेदादिति। *ननु* चेतनः प्रमाणान्तरागम्यत्वाच्छास्त्रेणापि न गम्यत इति, नेत्याह- *न च स न प्रतीयत इति*।। *ननु* सर्वो वेदो धर्मे विनियुक्तः स्मृतिकारैरित्युक्तम्, अत आह- *अत एवौपनिषदत्वेति*।। औपनिषद इति तद्धितप्रत्ययो ब्रह्मणि वेदान्तान्विनियुङ्क्ते। तथा ''सर्वे वेदा यत्पदमामनन्ति'' ''वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्''तिश्रुति-स्मृतिभ्यां ब्रह्मपरा वेदान्ता इति गम्यते। *ननु* पदसमन्वयाद् ब्रह्मणि प्रतीयमानेऽपि प्रत्यक्षादिभिर्बाधान्मिथ्याज्ञानमिति, नेत्याह- *नैष प्रतीयमानोऽपीति*।। *ननु* उद्देशाभावादुपादेयं प्रमातुं न शक्यत इत्यत आह- *इंतश्च न शक्यत इति*।। *ननु* अहंप्रत्ययगम्यमात्मानमुद्दिश्य तस्याद्वितीय-निरतिशय-ज्ञानानन्द- ब्रह्मात्मप्रतिपादनेऽप्यात्मनोऽवस्तुत्वान्निरालम्बनत्वमिति, नेत्याह- *आत्मनश्चानिराकार्यत्वादित्यादिना*।।

प्रकरणार्थमुपसंहरति- *अतोऽवच्छेदत्रयशून्य इत्यादिना*।। *ननु* सूत्रकारवचनसामर्थ्यात्कृत्स्नो वेदः क्रियायामेव विनियुक्त इति चोदयति- *नन्वाम्नायस्येति*।। *ननु* पौरुषेयवचनात्कथमनादेर्वैदिक-

पदसमन्वयस्यार्थनिर्णयः? *उच्यते*; अनादिप्रवृत्तात् क्रियार्थतयैव प्रयोगप्रत्ययव्यवहारादेतदवगम्यत इत्याह– *तस्मात्प्रवृत्ति-निवृत्तीति*।। *ननु* शब्दश्रवणानन्तरं भूतेऽप्यर्थे प्रतीतिरुपजायत इति, नेत्याह– *न ततो वस्त्ववगम इति*।। *ननु* अज्ञातब्रह्मावगमः कथं विभ्रमः स्यादिति? तत्राह– *अत एव तन्मिथ्येति*।। शब्दसामर्थ्याभावात्संवादाभावाच्चेत्यर्थः। *ननु* भूतेऽप्यर्थे प्रमितिरुपजायते चेत्, नैव तत्र शब्दसामर्थ्यं कल्प्यतामिति चोदयति–*कथं पुनरिति*।। परिहरति– *शब्दस्य तत्रेति*।। *ननु* धूमस्य सामान्येन गृहीतसंबन्धस्य विशेषबोधकत्ववत्क्रियार्थे गृहीतसंबन्धोऽपि भूतमर्थं गमयेदिति, नेत्याह– *न चागृहीतसामर्थ्य इति*।। तर्हि भूतेऽप्यर्थे संबन्धो गृह्यतामिति, नेत्याह– *सामर्थ्यग्रहणं चेत*।। *ननु* भूतेऽप्यर्थे प्रवृत्त्या ज्ञानानुमानेन सामर्थ्यं गृह्यतामिति, नेत्याह– *तदभावे कुत इति*।। साध्ये प्रवृत्तिर्न भूतार्थ इति। *उच्यते नैव सूत्रकारेत्यादिः परिहारः*।। कथम्? लौकिकन्यायमनुसरता वार्तिककारेणेदं प्रतिपादितम्–"अभिहितान्वय इति"।। पदेभ्यः प्रतिपन्नानां पदार्थानां संसृष्टपरस्परार्थावबोधनमभिहितान्वयो नाम। तत्र श्रोतुः प्रवृत्त्या विशिष्टसंसर्गज्ञानं शब्दकार्यत्वेनानुमाय शब्दसमुदायस्यार्थसमुदाये सामर्थ्यं प्रतिपद्यते। तत्र "गामानय" "गां बधाने"त्यादिप्रयोगभेदष्वावापोद्वापाभ्यामानयन-तत्संसर्गव्यभिचारेऽपि गोमात्रान्वयाद् बन्धनेऽपि गोशब्दस्य गोमात्रे संबन्धः प्रतिपद्यते, नानयन-तत्संसर्गयोः; व्यभिचारात्। एवं सर्वपदानां पदार्थस्वरूपमात्रेषु सामर्थ्यप्रतिपत्तेः संसर्गबोधः किंनिबन्धनः? इति वीक्षायामनन्यथासिद्धान्वय-व्यतिरेकाभ्यां शब्दावगतपदार्थनिबन्धन इति कल्प्यते। ततः पदेभ्यः पदार्थाः, पदार्थेभ्यः संसर्ग इत्यभिहितान्वयवादिनां मतम्।

तत्र यद्यक्रियाभिधायिनां पदानामालम्बनाभव उच्यते? किं वा प्रयोजनाभाव इति? यद्यालम्बनाभावः, तत्राह–*पश्यतु भवान् देवदत्त गामभ्याजेति*।। अथ नालम्बनाभावः, किं तु प्रयोजनाभव इति वक्तव्यमित्याह– *प्रतीयते चेदिति*।। अथाक्रियार्थानां प्रयोजनाभव इति, *न* ; क्रियायाः प्रयोजनत्वाभावादित्याह– *प्रयोजनं चानन्तरमिति*।। अथ क्रियाद्वारमेव प्रयोजनमिति, सत्यं केषाञ्चिदित्याह– *अतस्तदर्थक्रियानुपयोग्यर्थवाचिनामिति*।। *ननु* सर्वं क्रियाद्वारमेव प्रयोजनमिति नेत्याह– *ब्रह्मात्मत्वावगतीति*।। अतोऽभिहितानां पदार्थानां प्रयोजनवदर्थसंसृष्टस्वार्थप्रतिपादनेऽपि भूतवस्तुप्रतिपादनं संभवतीति। अत्र प्राभाकरः प्रत्यवतिष्ठते–कार्यसंसृष्टस्वार्थे पदसामर्थ्यं न पदार्थमात्र इत्याह– *स्यादेतद्यद्यपीति*।। *ननु* भूतार्थे सामर्थ्यं प्रतीयते चेद् भूतसंसर्गोऽपि प्रमीयतामिति, नेत्याह– *तथापि नाप्रतिपन्न इति*।। भूतार्थविशिष्टं कार्यमेव प्रभीयत इत्यर्थः। *ननु* संसृष्टस्वार्थे शब्दसामर्थ्यं चेद् भूते संसर्गः प्रमीयतामिति, नेत्याह– *क्रियार्थतयैवेति*।। नियोगसंसृष्टतयैवेत्यर्थः। *ननु* कार्यसंसृष्टस्वार्थसामर्थ्येऽप्यन्वितस्वार्थस्य तत्रान्तर्भावात्तेनैव प्रयोजकेन भूतेऽपि संसर्गः प्रतीयतामिति, नेत्याह– *न हि गोपदात्तदर्थ इति*।।

अयमाशय:–"गामानय शुक्लां दण्डेने"ति शब्दश्रवणानन्तरं श्रोतुर्गवानयने प्रवृत्तिमुपलभ्य गवानयनकर्तव्यताऽनेन शब्दात्प्रतिपन्नेति भूतार्थसंसृष्टे कार्ये शब्दसमुदायस्य सामर्थ्यं प्रतिपद्यते। पुनश्च "गां बधानाश्वमानये"ति प्रयोगान्तरेषु गोशब्दस्यान्वये कार्यसंसृष्टगवाकृतेरन्वयात्तदुद्धारे च कार्यसंसृष्टगवाकृतेरेवोद्धारात् कार्यसंसृष्टायां गवि पदसामर्थ्यं कल्प्यते; आनयन-तत्संसर्गव्यभिचारेऽपि कार्यसंसर्गाव्यभिचारात्। एवं च प्रथमावगतसंसर्गबुद्धिहेतुत्वानपवादाच्छब्दानां मध्ये च पदार्थ-तच्छक्तिव्यवधानकल्पनागौरवपरिहारात् पदानामेव संसर्गप्रतिपादनसामर्थ्यकल्पना; लाघवाच्च तस्मात्कार्यसंसृष्टस्वार्थेषु शब्दसामर्थ्यमिति। तदेतन्निराचष्टे– *विषम उपन्यास इति*।। न हि प्रयोगभेदेषु कार्यसंसर्ग एव गवाकृतोर्नियमेन प्रतीयते, किन्तु गुण-व्यक्तिक्रियाकारकसंसर्गश्च। तथाहि "शुक्लां गामानये"त्युक्ते गुण-कारक-क्रियासम्बन्धा: प्रतीयन्ते क्रियाद्वारश्च कार्यसम्बन्ध:। तत्राव्यवहितसम्बन्धोपादानसिद्धयेन्यान्वितस्वार्थे सामर्थ्यं गृह्यते। क्रमेण च गुणक्रियादिसंसर्गो यथायोगमवभासमानो यावदन्त्यपदोच्चारणसमाप्ति, पश्चात्संभूय सर्वैरेव पदैरेकप्रयोजनावच्छिन्नो महावाक्यार्थ: प्रमीयत इति नान्योन्संसर्गविरोध:। प्रमाणान्तरग्राह्यत्ववत्कार्यमपि प्रवृत्तिलिङ्गहेतुतया नियमेनान्वेति, न सर्वशब्दसामर्थ्यविषयतया। तस्माल्लाघवादन्वितस्वार्थे सामर्थ्यमित्यन्यथानुवाद-प्रसङ्गात्कार्यान्वितस्वार्थेषु प्रमाणान्तरेण शब्दसामर्थ्यप्रतिपत्तौ शब्दादपि तावन्मात्रबोधेऽनुवाद: स्यात्। न च कार्येण सर्वपदार्थानामव्यवहित: सम्बन्ध:, येन तत्संसृष्टे सामर्थ्यं स्यात्। अस्ति शेषशेषितालक्षणसम्बन्ध इति, केयं शेषशेषिता नाम? न तावत्स्वामिता; चेतनविषयत्वात् तस्या:, नापि देवदत्तवदङ्गाङ्गिता; तदवयवत्वाभवादितरेषाम्। अथ साध्यतैव शेषिता; क्रियैव तर्हि गुणकारकसाध्येति सैव शेषिणी स्यात्। अथ परमसाध्यता स्वर्ग एव, तर्हि शेषीति किमनेन कार्येणान्तर्गडुना। तस्माद् गुणानां द्रव्यैरन्वयो द्रव्याणां विभक्त्यर्थसंसृष्टानां क्रिययान्वय:, तस्याश्च कार्येणेति व्यवधानादन्यान्वितस्वार्थे समार्थ्यं समञ्जसम्। किंच कार्यस्य कार्यान्तरान्वयाभावादन्यान्वयो वक्तव्य:। धात्वर्थेन कार्येण कार्यस्यान्वय इति चेत्, न; नियोगान्वयनिमित्तत्वाद्धात्वर्थेकार्यताया:। नियोगस्य तु धात्वर्थेन केवलेनान्वयो न कार्येण; उत्तरकालत्वात् तत्कार्यत्वस्य। अतोऽप्यन्यान्विते शब्दसामर्थ्यमिति।।

किंच प्रमाणान्तरग्राह्यत्वमप्यर्थस्य शब्दसामर्थ्यविषय: स्यात्; अव्यभिचारात्। प्रयोगनिमित्ततयाऽन्यथासिद्धिरन्वयस्येति चेत्, कार्यत्वस्यापि प्रवृत्तिलिङ्गहेतुतयैवान्वयनियम:, न सर्वपदसामर्थ्यविषयतयैवेति। किंच भूतसंसर्गेऽपि शाब्दी प्रमितिरनुभूयते लोके–देवदत्तो भुक्त्वा निर्गत इत्यादौ। तत्र किं प्रतिवाक्यं कार्यपदमध्याह्रियताम्? शब्दव्यतिरिक्तप्रमाणान्तरं वा कल्प्यताम्? भ्रान्तित्वं वोपेयताम्? आहोस्विदन्यान्विते शब्दसामर्थ्यं प्रतिपद्य प्रामाण्यं वा व्यवस्थाप्यतामिति? अबाधितभूतार्थव्यवहारात्कल्पनालाघवाच्च गृहीतप्रयोजनानां विप्रतिपन्नप्रयोजनानां च सम्बन्धग्रहणा-देवार्थप्रतिपत्तेर्निरूपणीयमेतत्। किंच निघण्टु-व्याकरणोपदेशै: कार्यपदार्थमप्रतिपद्यैवार्थान्तरसंसृष्ट-

स्वार्थेष्वव्यभिचाराच्छब्दसामर्थ्यं प्रतीयते, क्वचित्कार्यसंसर्गदर्शनादन्यत्रापि तदनुमीयत इति चेत्, न; अन्यत्रान्यसंसर्गमात्रदर्शनेन कार्यसंसृष्टेऽप्यन्यसंसर्गमात्रप्रयोजककल्पनोपपत्तेरदृष्टप्रयोजकोप- संहाराद् दृष्टप्रयोजनस्यैव युक्तत्वात्। तस्मादन्यसंसृष्टस्वार्थे शब्दसामर्थ्यमिति सिद्धम्।।

ननु गोपदस्याप्यानयनसंसर्गादिबह्वर्थप्रतिपादकत्वादानयनपदस्यापि गोससंसर्गाद्यनेक- कार्याभिधायित्वात् पदाभ्यां प्रतिपाद्यसंसर्गनियमो न स्यात्, *नैष दोषः*; एकैकपदोच्चारणे यावानर्थः प्रतीयते, तावतामेव संसर्गः संभूयोच्चारणे प्रतीयत इति नियमोपपत्तेः। नह्येकैकपदोच्चारणात्सर्वे संसर्गाः प्रतीयन्ते; सहकारिपदान्तरनिमित्तत्वात्संसर्गप्रतीतेः। *ननु* एवं पर्यायता स्यात्, तथाहि- गोपदस्याप्यानयनसंसृष्टं गोत्वमर्थः, आनयेतिपदस्यापि गोसंसृष्टमानयनमर्थ इति, *नैतत्सारम्*; एकस्मात्पदाद्यावानर्थः प्रतीयते, तावानेव चेत् पदान्तरादपि प्रतीयात्, स्यादेव पर्यायत्वम्। यदा पुनरितरेतरसंसृष्टौ पदार्थौ पदाभ्यां संभूय प्रतीयेते, तदा कुतः पर्यायतेति? *ननु* गोपदोच्चारणे गवाकृतिरेव किमिति प्रतीयते? न सामर्थ्यविषयभूतं सर्वमिति? अन्वयव्यभिचारात् संस्कारभूयस्तवाद्गवाकृतेः, इतरेषां व्यभिचारादित्यनवद्यम्।।

ननु अभिहितेन पदार्थान्तरेण संसृष्टं गोत्वं प्रतिपादयति चेत्, गोपदमानयतिपदमप्यभिहितेनैव गोपदेन संसृष्टं स्वार्थं प्रतिपादयतीतीतरेतराश्रयता स्यात्-गोत्वेऽभिहिते तत्संसृष्टानयनाभिधानम्, तस्मिन्नभिहिते तत्संसृष्टगोत्वाभिधानमिति, *नैष दोषः*; क्रमेण पदेषूच्चार्यमाणेषु क्रमेणैव पदार्था अव्यभिचारिणः प्रतीयन्ते; अन्त्यपदोच्चारणानन्तरं च संभूयैकस्मृतिगम्यानि पदान्यभिहितानेव पदार्थान् संसृष्टतया प्रतिपादयन्तीत्यभिहितेनैवान्वयोपपत्तेः। पदार्थेष्वपि संसर्गप्रतिपादकेषु तुल्यौ चोद्य-परिहारौ। पदानामेव संसृष्टस्वार्थप्रतिपादनमन्विताभिधानं नाम। तदेवं कार्यमनपेक्ष्यैव भूतेऽप्यर्थे शब्दसामर्थ्यं सिद्धम्। तदेतत्सर्वमभिप्रेत्याह- *गोपदस्याभिधेयसम्बन्धेनेत्यादिना*।।

वेदेऽपि कार्यमनपेक्ष्यैव संसर्गप्रमितिरङ्गीकृतेत्याह- *तथाच वषट्कर्तुरित्यादिना*।। *ननु* कर्तव्य इति पदं तत्राप्यध्याहृत्य तेनैकवाक्यत्वोपगमेन वाक्यार्थः प्रमीयत इति *तत्राह यस्तु कर्तव्य इति*।। *ननु* सूत्रकारेणैव वृद्धव्यवहारानुसारिणा कार्यान्वितस्वार्थे शब्दसामर्थ्यं दर्शितम्, "तद्भूतानां क्रियार्थेने"ति, तत्राह- *यत्तु तद्भूतानामित्यादि*।। भाष्यकारेणैव गुण-गुण्यादीना विशेषण-विशेष्यादिभावेन समन्वयो दर्शित इत्यर्थः। *ननु* क्रियार्थेनेतिवचने कथं गुण-गुण्यादिसामानाधिकरण्यसम्बन्ध इति? अत आह- *क्रियार्थेनेति*।। *तथा च भाष्यकारोऽपीत्यारभ्यात एवेत्यतः प्राक्तनः स्पष्टार्थः*।। किंच किमिति जैमिनीयसूत्रवचनाद् वेदान्तानां कार्यनिष्ठत्वमिष्यते? बादरायणसूत्रैर्ब्रह्मनिष्ठत्वमिष्यताम्, इत्याह *अत एव पूर्वेण तन्त्रेणेति*।। *ननु* अर्थभेदाभावे कथं पृथगारम्भ इति? तत्र विभागमाह- *तत्र हि वेदस्येत्यारभ्य मुख्यः प्रदर्शित इत्यन्तेन ग्रन्थेन*।।

ननु प्रातिपदिकार्थानामेकरसब्रह्मपरतयाऽन्वयेऽपि प्रथमाविभक्तेरव्यभिचारात् तदर्थकारकत्वान्वय इति, नेत्याह– *तथा च भगवान् पाणिनिरव्यतिरिक्त इति*।। तत्र लिङ्गसंख्यादयस्त्वर्थात्प्रतीयमाना अपि प्रज्ञानघन एवाद्वितीयमित्यादिशब्दविरोधादनिर्वचनीया भविष्यन्तीत्यर्थः। *ननु* क्रियान्तरविरहेऽपि प्रातिपदिकार्थान्वये–"अस्तिर्भवन्तीपरः प्रयोक्तव्यः प्रथमपुरुषेऽगम्यमाने" इति कात्यायनस्मरणादस्त्यर्थनिष्ठः समन्वय इति, नेत्याह– *नास्तिक्रियाकर्तर्येवेति*।। *ननु* अस्तिक्रियामप्यपहाय समन्वयो न दृश्यत इति, तत्राह– *दृश्यते च फलिता इति*।। *ननु* तत्राप्यस्तिक्रियान्वयः कल्प्यतामिति, नेत्याह– *नात्रापि ये फलिता इति*।। कुत्र तर्हि वाक्यं पर्यवसितमिति, संबन्धमात्र इत्याह– *अपित्वेते द्रुमा इति*।। कथं पुनरत्र क्रियामपहाय संबन्धमात्रपर्यवसितं वेदान्तवाक्यमिति, तदाह– *एवं सामान्यतः सिद्धस्येति*।। उक्तं तावत्पदानामर्थान्तरसंसर्गमात्रे सम्बन्धग्रहणात् क्रियामपहायाव्यतिरिक्तैकरसप्रातिपदिकार्थान्वयो युक्त इति, इदानीं क्रियान्वयाभिधानवादिनामपि भूतेऽर्थे निषेधवाक्यसमन्वयो वक्तव्य इत्याह– *किंच ब्राह्मणो न हन्तव्य इति*।। *ननु* ब्राह्मणहननाभावोऽपि स्वयं क्रिया? क्रियार्थो वेति? नेत्याह– *न क्रिया क्रियार्थो वेति*।। प्राप्तक्रियानिवृत्तिलक्षणत्वादित्यर्थः। *ननु* "नेक्षेतोद्यन्तमादित्यमि"त्यादावीक्षणविरोधिनी 'नेक्षे' इति संकल्पक्रिया विधीयते, एवं 'न हन्यामि'ति हननविरोधिनी संकल्पक्रियैव विधीयतामिति नेत्याह– *व्रतशब्दसमन्वयादिति*।। अयमर्थः संसृज्यमानाऽभावमेव मुख्यया वृत्त्या नञ्शब्दः प्रतिपादयति। अनुष्ठेयाभिधायिव्रतशब्दोपक्रमात्संसृज्यमानविरोधिनि क्रियान्तरे लक्षणया वर्तते, न तथेहापवादकं किंचिदस्ति, येन नञ्शब्दस्य संसृज्यमानविरोधिसंकल्पक्रियाणां लक्षणा स्यादिति। *ननु* संसृज्यमानात्तदन्यतद्विरोधिनोरपि मुख्य एव नञ्शब्द इति, नेत्याह– *न नञः समन्वयमात्रादिति*।।

अत्र प्राभाकरः प्रत्यवतिष्ठते–अत्र त्रयोऽर्थाः प्रतीयन्ते–ब्राह्मणः, हननम्, प्रत्ययार्थश्चेति। तत्र न ब्राह्मणेन प्रतिषेधान्वयः; प्रत्यक्षविरोधात्। न च हननाभावं प्रतिपादयति; तस्य प्रवृत्तत्वात्। नापि प्रत्ययार्थाभावम्; फलप्रार्थनायाः प्रवृत्तिहेतोः कार्यबुद्धेर्वा प्रत्यक्षत्वात्, नचाभावो नाम भावान्तरव्यतिरेकेण कश्चिदस्ति, येन तत्पर्यावसितं वाक्यं स्यात्। अतो भावान्तरविधिपरं वाक्यमिति, तदेतदाह– *स्वभावत एव रागादिनिमित्तादित्यादिना*।।

परिहरति– *नचैतद्युक्तमिति*।। न चाभावस्तद्बुद्धिगोचरो निवर्तयितुं शक्यः। न च भावान्तरमेवाभावः; तस्य सप्रतियोगिकत्वात्। अभाव एव च नञो मुख्योऽर्थः; अर्थान्तर-विरोधिनोरभावसम्बन्धिनोर्लक्षणयाऽपि प्रवृत्तिसंभवे रूढिकल्पनायोगात्। *ननु*–"नाम-धात्वर्थयोगे तु नैव नञ् प्रतिषेधकः। वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनौ।।" इत्यर्थान्तरेऽपि नञ्शब्दो दर्शितः, *सत्यम्*; तत्रापि मुख्यार्थान्वयेन लक्षणयाऽर्थान्तरेऽपि बुद्धिनियमो दर्शित इत्यविरोधः।

आह प्राभाकरः—हननाभावे नियोगः, ततश्च नियोगपर्यवसितं वाक्यमिति, तदाह— *ननु* नञर्थनियोग इति*।। दूषयति- *वार्तमेतदिति*।। भावार्थो दध्यादिगुणो वा विधिविषयतया तन्निवृत्तिहेतुः, न हननप्रागभावः; अनादिसिद्धतया नियोगस्याननुष्ठेयत्वात्। दूषणान्तरमाह— *एवं प्रतिषेधस्येति*।। विधिप्रतिषेधविभागव्यवहारो लौकिको न स्यादित्यर्थः। तस्मान्न कार्यपर्यवसितमित्युपसंहरति— *तस्मात्संसृज्यमानेति*।।

प्रकृत्यर्थस्य हननस्यैव नञ्शब्दान्वयमङ्गीकृत्य भावोऽर्थान्तरं वा न विधेयमित्युक्तम्; इदानीं प्रत्ययार्थ एव नञा सम्बध्यते, प्रकृत्यर्थस्यान्योपसर्जनत्वात्प्रधानेन चेतरेषामन्वयादित्याह— *तच्च संसृज्यमानमिति*।। प्रत्यक्षादिव्यवहारेषु पुरुषान्तरनिबन्धनत्वाभावाद्विध्यादीनामसंभवे प्रतिपाद्यधर्म इत्यनुष्ठेयता स्वधर्म इत्यर्थः। *प्रतिषिध्यमानक्रियाफलेति*।। निवर्त्यमानक्रियाफलेत्यर्थः। प्रत्ययार्थनिषेधेऽपि प्रकृत्यर्थो निवर्तत इति। प्रार्थ्यत इति प्रार्थना फलसाधनमित्यर्थः। ततश्च हननस्य यदिष्टसाधनत्वं प्रवर्तकम्, तदेव प्रत्ययेनानूद्य प्रतिषिध्यते ब्राह्मणहननमिष्टसाधनं न भवतीति।। *ननु* प्रत्यक्षमिष्टसाधनत्वं हननस्य नादृष्टाविरोधि दृष्टप्रयोजनस्येष्टशब्दत्वादिदमदृष्टाविरोधि, दृष्ट प्रार्थ्यत इति प्रार्थना; फलसाधनमित्यर्थः। ततश्च हननस्य यदिष्टसाधनत्वं प्रवर्तकम्, तदेव प्रत्ययेनानूद्य प्रतिषिध्यते—ब्राह्मणहननमिष्टसाधनं न भवतीति। *ननु* प्रत्यक्षमिष्टसाधनत्वं हननस्य नादृष्टविरोधि; .दृष्टप्रयोजनस्येष्टशब्दत्वात्, इदमदृष्टविरोधिदृष्टसाधनं न भवतीत्यर्थः। सर्वत्र चार्थानर्थसंयोगादनयादधिकोऽर्थः पुरुषार्थ इत्युच्यते, अर्थाच्चाधिकोऽनर्थोऽपुरुषार्थ इति, तत्र पुरुषार्थसाधनं न भवति हननमित्युक्तेऽनर्थादधिकोऽर्थो नास्तीत्युक्तं भवति। ततश्चार्थादनर्थ-स्याधिक्यादर्थादनर्थमित्युक्तम्। तदेवं प्रत्ययार्थ-प्रतिषेधस्याननुष्ठेयत्वं सिद्धमित्याह— *स च प्रागभाव इति*। किं तर्ह्यनुष्ठेयमिति? पुरुषार्थसाधनविभ्रमाद्रागाद्युद्बोधप्रसक्तौ तन्निमित्तप्रध्वंसोऽनुष्ठेय इत्याह— *तत्संस्कारोद्बोध इति*।। स एव तर्हि वाक्येन विधीयतामिति, नेत्याह— *स च यद्यपि साध्य इति*।। हननमिष्टं न भवत्यनिष्टं चेत्यवगतौ हननोद्बोधनिमित्तनिरोधस्यान्वय-व्यतिरेकाभ्यामेवानुष्ठेयत्वाद् न तत्र शब्दापेक्षेति। निमित्तनिरोधकर्तव्यतायां वाक्यस्यासामर्थ्याच्चेत्याह— *तत्प्रतिपादकेति*।। *ननु* अनिष्टसाधनविषयशब्दसामर्थ्याच्चेन्निमित्तनिरोधः, सोऽपि तर्हि शब्दार्थ इति, नेत्याह— *यश्चार्थादर्थ इति*।। अङ्गीकरोति— *अथ पुनरिति*।। दूषयति— *भवतु; तथापीति*।। तथाऽप्यनुष्ठेयांशस्यान्वय-व्यतिरेकसिद्धत्वाच्छब्दो नानुष्ठेयनियोगपर्यवसित इत्यर्थः। *ननु* प्रत्ययेनापूर्वं प्रतिपाद्यते, तत्कथमननुष्ठेयं स्यात्?

क्वैतद् गृहीतसम्बन्धम्? न तावल्लोके; तस्यादर्शनात्। *ननु* स्वर्गकामिनो यागकर्तव्यता स्वर्गसाधनमन्तरेणानुपपन्ना। तच्च साधनत्वं क्षणभङ्गिनः कर्मणो मध्यवर्तिकायमन्तरेणानुपपन्नमिति- श्रुतार्थापत्त्याऽपूर्वं गम्यते, तत्र शब्दस्य सामर्थ्यं गृह्यत इति, सोऽयं बकबन्धः। शब्दाल्लौकिकसामर्थ्यानुसारेण

क्रियाकर्तव्यताऽभिहिता चेत्पुनस्तत्सामर्थ्यलब्धेऽपूर्वे किमिति सम्बन्धो गृह्यते? अथ नाभिहिता क्रियाकर्तव्यता, न तर्ह्यपूर्वमेव लभ्यत इति कुतः सम्बन्धग्रहः? *ननु* यागकर्तव्यताऽभिहिताऽनुपपन्ना साऽपूर्वाभिधानमन्तरेणेति, तर्हि तदप्यनुपपन्नम्; शरीरेन्द्रियविषयसम्बन्धमन्तरेण स्वर्गस्यासिद्धेः। अतः प्रत्ययेन शरीराद्यभिधानं स्यात्, अर्थापत्तिगम्यत्वान्न शब्दापेक्षेति चेत्, अपूर्वेऽपि तुल्यम्। तस्माद्धात्वर्थकर्तव्यतालक्षणमिष्टसाधनमेव प्रत्ययार्थ इति। तदेवं वृद्धव्यवहारानुसारेणेत्यारभ्यात्रोत्तरमित्यतः प्राक्तनः स्पष्टार्थः। प्रथमोत्पन्नं शाब्दज्ञानं तावन्न विधीयते, तत्सन्तानश्च सुखानुभवकामस्य न विधेयः; ताभ्यामेव च स्वयं प्रवृत्ताभ्यामपरोक्षज्ञानमुत्पद्यते। तदेवमुत्पन्नापरोक्षज्ञानमधिकृत्योत्तरमाह– *नावगतब्रह्मात्मभावस्येति*।। *ननु* कर्मादिनिमित्तः शरीरसम्बन्धः, ततश्च संसारः, किमपरोक्षज्ञानेन? इत आह– *न कर्मनिमित्तस्तावदित्यादिना सुखदुःखानुभव इत्यन्तेन ग्रन्थेन*।।

उक्तमन्वय-व्यतिरेकाभ्यां तत्त्वज्ञानेनाविद्यानिवृत्तौ संसारनिवृत्तिरिति, अथेदानीं तत्रैवागमप्रमाणमाह– *तथा च श्रुतिस्मृतिवादा इति*।। ते हि ब्रह्मात्मैकत्वं साक्षादनुभवन्तोऽपि द्वैतदर्शनाभासं दर्शयन्ति।।

ननु अपरोक्षज्ञानान्मिथ्याज्ञाने निवृत्ते कुतो द्वैतदर्शनमिति? तत्राह– *वैषयिकस्त्विति*।। *ननु* कर्मणामपि निवृत्तत्वात् कथं तन्निमित्तं द्वैतदर्शनम्? *नैष दोषः*; "तस्य तावदेव चिरमि"ति ज्ञानव्यतिरिक्तावध्यन्तरकरणात् कञ्चित्कालं शरीरेन्द्रियाद्यवस्थानकल्पनया तन्निमित्तकर्मावस्थानकल्पनात्। *ननु* सर्वकर्मक्षयश्रुतेः श्रुत्यर्थापत्तिः कथमेकदेशबाधिका स्यात्? *अर्थापत्त्यनुदये श्रुतस्यैव बाधप्रसङ्गादिति वदामः*। तस्मात् श्रुत्यादेरेव सामान्य-विशेषभावेन व्यवस्थेति।। *ननु* अपरोक्षज्ञानेन कृत्स्नाविद्यानिवृत्तौ कुतः कर्मणामवस्थानमिति? *उच्यते*; तत्त्वज्ञानमेव स्वकारणेभ्यो जायमानं श्रुत्यवगतारब्धकर्मावस्थानप्रतिबन्धात्तदपेक्षितद्वैतप्रतिभासनिवर्तनपाटवशून्यमितरकर्माविद्यारागादेर्निवर्तकं चोत्पद्यते। *ननु* ब्रह्मात्मानुभव-द्वैतदर्शनयोः कुतः साहित्यमुच्यते? *न वयं साहित्यं ब्रूमः*; कदाचिदसंप्रज्ञातात्मैकत्वदर्शनं कदादिरारब्धकर्मोपस्थापितदोषनिमित्तद्वैतदर्शनं चेति। *ननु* नास्त्येव सशरीरस्यापरोक्षदर्शनम्, *न*, आरब्धकर्मव्यतिरिक्तपूर्वोत्तरकर्मविनाशनिमित्तदर्शनाभ्युपगमात्। न चापरोक्षदर्शनमन्तरेण कृत्स्नकर्मविनाशः। प्रारब्धकर्मवतश्च तत्त्वदर्शनं सशरीरस्यैव संभवति। व्यासादीनां च सशरीराणामेवापरोक्षदर्शनं श्रूयते।।

ननु तत्त्वदर्शिनोऽपि द्वैतदर्शनं चेत्, नियोगानुष्ठानमपि स्यात्, *न*; नियतदेशकालाधिकारकर्तृत्वप्रतिपत्त्यधीनत्वादनुष्ठानस्य। तत्त्वदर्शिनस्त्वारब्धकर्मनिमित्तदोषोद्भवस्य

देशकालनियमाभावात्, प्रारब्धानुष्ठानपरिसमाप्तिपर्यन्तमवस्थानायोगात्, पुनःपुनस्तत्त्वदर्शनेनानुष्ठितकर्मणां बाधादनुष्ठाने प्रयोजनाभावात्, प्रत्यवायस्य च तत्त्वदर्शनेनैव निवृत्तेः। *ननु* तत्त्वदर्शिनः शास्त्रनियमाभावे यथेष्टाचरणं स्यात्, *न*; हिताहितप्राप्तिपरिहारप्रार्थनानिमित्तत्वादाचरणस्य स्वात्मन्येव निरतिशयानन्दमशेषानर्थनिवृत्तिं च साक्षादनुभवतः साध्यपुरुषार्थप्रार्थनाभावात्कुतो यथेष्टाचरणप्रसङ्गः? कथं तर्हि शरीरयात्रेति चेत् आरब्धकर्मदोषवशादित्युक्तम्। न चापूर्वकर्मोपचयस्याविद्यारागादिनिमित्तं संभवति; निवृत्तत्वात्, आरब्धकर्मणां च स्वफलमात्रहेतुत्वात्। तस्मात्तत्त्वदर्शिनोऽपि द्वैतदर्शनाभास उपपद्यत इति॥

ननु श्रवणज्ञाननव्यतिरेकेण मनन-निदिध्यासनविधानात् साध्यान्तरमस्तीत्युक्तमिति, नेत्याह- *मनन निदिध्यासनयोश्चेति*॥ उक्तं च मनन-निदिध्यासनयोस्तत्त्वदर्शनहेतुत्वम्, इदानीं वर्णकद्वयोक्तमर्थमनुवदति -*तदेवं सिद्धस्य वस्तुन इत्यारभ्य-अतो विधिनिरपेक्षं स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयादित्यन्तेन ग्रन्थेन*॥ अपि च विधिनिरपेक्षभूतवस्तुप्रतिपादने शास्त्रारम्भभेद-सिद्धिरित्याह- *एवं च सति पदानामिति*॥ *ननु* प्रवर्तकविशेष एव पृथक्शास्त्रारम्भनिमित्तमिति, नेत्याह- *अन्यथात्रेति*॥ *ननु* अन्यदेव भेदकमस्ति, शरीरेन्द्रियनिर्वर्त्या विधिभेदाः कर्मकाण्डे निरूपिताः, इह तु केवलमानससाध्यो विधिर्निरूप्यत इति, तदाह- *अथाप्यबहिःसाधन इति*॥ दूषयति- *तथाप्यथातः परिशिष्टधर्मजिज्ञासेति*॥ अधिकरणार्थमुपसंहरति- *तदेवं ब्रह्मात्माव-गमात्प्रागिति*॥ ब्रह्मात्मापरोक्षदर्शनादुत्तरकालमन्तःकरणसंपिण्डितप्रमातृबाधात्, प्रमेयसम्बन्धा-सिद्धेर्निवर्तत एव प्रमातृ-प्रमाण-प्रमेय-कर्तृ-कर्म-कार्य-भोक्तृ- भोगलक्षणो व्यवहार इति॥

ननु भेदाभेदरूपत्वान्नाद्वैतदर्शनेन द्वैतदर्शनबाधः, *न तर्हि देहात्मभावः सुखदुःखादिरपि बाध्येत*; भेदाभेदरूपत्वात्। भेदाभेद इति च स्ववचनविरोधः; पूर्वपक्ष-सिद्धान्तनियमाभावश्च; सर्वसाङ्कर्यात्। *ननु* तवाप्यद्वैते सर्वसाङ्कर्यं समानम्, *न*; प्रपञ्चस्य यथादर्शनमेव भेदेन व्यवस्थितत्वात्, ब्रह्मण एवाद्वितीयत्वात्। *ननु* दृश्यते भिन्नाभिन्नं वस्तु प्रत्यक्षेण, *किं तत् प्रत्यक्षम्*? न तावत् खण्डो गौरिति भिन्नाभिन्नविषयं प्रत्यक्षम्; तथा प्रतिभासाभावात्। *ननु* इतरेतरात्मनैवाभेदः प्रतिभासते, *तर्हीतरेतरानात्मना भेदोऽप्यवभासेत*। *ननु* रूपभेदेन भेदोऽवभासते *तर्हि* रूपैक्यादभेदो वक्तव्यः। अथेतरेतरात्मत्वादभेदः, रूपभेदाद् भेद इति, *क्व दृष्टमितरेतरात्मत्वमभेद इति*? न तावदेको घट इत्यत्र दृश्यते। तस्मात्खण्डो गौरिति न भेदाभेदावभासः॥

स्यादेतत्-खण्डो गौरिति प्रत्ययाभ्यां भेदाभेदावभास इति, *न*; ज्ञानयोः संभूय प्रमापकत्वाभावात्, प्रत्यभिज्ञामन्तरेणैकस्योभयसम्बन्धासिद्धेः। तर्हि प्रत्ययत्रयेणार्थाद् भेदाभेदसिद्धिरिति,

प्रत्यक्षं तावत् पराहतम्। खण्डस्य गोश्च तदुभयालम्बनपिण्डस्य च त्रयाणां प्रत्यक्षेऽवभासनात्सामानाधिकरण्यस्य च तदुभयाश्रयपिण्डालम्बनत्वात्। न चार्थापत्तिरपि; 'ह्रस्वोऽकार:' 'दीर्घोऽकार:' 'स एवायमकार:' इति प्रत्ययत्रयेणापि भेदाभेदासिद्धेर्भ्रान्तिमात्रत्वोपगमात्। तस्मान्न भिन्नाभिन्नं वस्तु। नाप्यात्मनि भेद: प्रमातुं शक्य:; विवादगोचरापन्ना:, स्थावर-जङ्गमशरीरव्यक्तय:, प्रतिवादिशरीरव्यक्त्यात्मनैवात्मवत्य:, शरीरव्यक्तित्वात्; प्रतिवादिशरीरव्यक्तिवदित्येकात्मत्वानुमानात्; युगपज्जनन- मरणादिविरुद्धधर्माश्रयत्वादग्न्युदकादिवद्धर्मिभेदोऽनुमीयत इति चेत्, न; शरीराश्रयतया व्यधिकरणसिद्धत्वात्। प्रतिशरीरं सुखद:खाद्यनुभवाननुभवानुसन्धानाननुसन्धानैर्द्रष्टृभेदै: कल्प्यत इति चेत्, न; शरीरभेदे सत्येकस्याप्यात्मनो जन्मान्तरीयाननुसन्धानादिदर्शनात्, सत्यप्येकत्वे प्रतिबिम्बभेदेषु वर्णसंकरादर्शनात्। न च जीव-ब्रह्मभेदोऽपि प्रत्यक्षसिद्ध:; विरुद्धधर्माश्रयत्वाद् भेदानुमाने बिम्बप्रतिबिम्बयोरनैकान्तिकत्वात्। नियन्तृ-नियन्तव्येशित्रीशितव्य-द्रष्टृ-दृश्यादीनां भेदलिङ्गत्वाज्जीवब्रह्मभेद इति चेत्, न; "नान्योऽतोऽस्ति द्रष्टे"त्यादिश्रुत्यैव भेदप्रतिषधे लिङ्गाद् भेदानुमितेरयोगात्, अतुल्यप्रमाणत्वाच्च भेदाभेदकल्पनायोगात्। "द्वा सुपर्णा" इति द्वित्वसंख्या श्रूयत इति चेत्, न; "यश्चायं पुरुषे यश्चासावादित्ये स एक:" इत्येकत्वसंख्याश्रवणाद् भ्रान्तिसिद्धद्वित्वानुवादादेकत्वम्; नानात्वे प्रमाणाभावात्। प्रत्यक्षेण भेदग्रहणे भेदस्य धर्मिप्रतियोगिकत्वव्यवस्थापेक्षत्वात् तद्व्यवस्थायाश्च भेदापेक्षत्वादितरेतराश्रयत्वात्। तस्मान्न भेदाभेदौ, इत्यद्वैतदर्शनेन द्वैतदर्शनबाध:। प्रत्यक्षभ्रमस्य चाप्तवचनेन बाधदर्शनात्फलवचनानां च वर्तमानापदेशितया योग्यानुपलब्धिविरोधाद् दृष्टद्वारेण बन्धनिवृत्तिरेव मोक्ष इति।।

अपि चाहुरिति श्लोकत्रयय तात्पर्यमाह- *गौणमिथ्यात्मन इत्यादिना*।। श्लोकं व्याचष्टे - *तदेतद् द्रढयन्नाहेति*।। द्वितीयश्लोकस्य तात्पर्यमाह- *कथमिदानीमस्य प्रामाण्यमित्यादिना*।। तृतीयश्लोकं व्याचष्टे -*अद्वितीय-निरतिशयानन्द-चैतन्यैकतान -सर्वज्ञ-सर्वेश्वर-सर्वशक्ति-निरवयव-स्वच्छासङ्ग-प्रत्यग्भूतब्रह्मात्मन्यपरोक्षानुभवात्प्राग् देहात्मप्रत्ययवत् सर्वो व्यवहारो यथादर्शनमुपपद्यते। तस्मिंश्चापरोक्षेऽवभासमाने प्रमातृत्वादिबाधात् सर्वो व्यवहारो निवर्तत इति श्लोकार्थ:।।

इति श्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्य स्वप्रकाशानुभवभगवत: कृतौ पञ्चपादिकाविवरणे समन्वयाधिकरणं नाम नवमं वर्णकं समाप्तम्।।

ऋजुविवरणम्

वक्ष्यमाणार्थं श्लोकेन संगृह्णाति- *ज्ञानानन्दैकरूपमित्यादिना*।। अस्मिन् सूत्रे श्रुतिभिर्ब्रह्म ज्ञेयमित्युच्यत इत्यन्वयः। पूर्वमुक्तं लक्षणद्वयमनुवदति- * ज्ञानानन्दैकरूपमिति *।। ''ईशं प्रभूणामि'' त्यनेन निमित्तत्वनिर्देशः। ''सर्वज्ञं ब्रह्मे'' त्यनेन सूत्रद्वयोक्तसर्वज्ञत्वानुवादः। ''नित्यमि'' त्यनोनोपादानत्वेऽपि परिणामित्वाभावान्न जगद्धर्मैर्ब्रह्म दुष्येदित्युक्तम्। ''विशदमतितरामि'' त्यनेन नित्यत्वमुपजीव्यासङ्गत्वमुक्तम्। निगुर्णत्वं निष्क्रियत्वञ्च तद्धेतुकमेव, अथवा- जगदुपादानत्वेन सक्रियत्वं सगुणत्वं च वदन्ति, तन्निरासः- ''निर्गुणं निष्क्रियञ्चे'' ति। तथा परिणामित्वे निरस्ते विशदत्वं निर्मलत्वं नित्यत्वमविनाशित्वञ्च सिध्यति। अथवा-''नित्यमि'' त्यादिविशेषणमेतत्सूत्रसाध्यत्वेन निर्दिष्टमिति। *एतत्कार्यावमृष्टिमिति*।। एषा चासौ कार्यावमृष्टिश्चेति विग्रहः। *निखिलभववतीमिति*।। निखिलो भवो यस्याःसा, तथोक्ता, उत्पत्त्यादियुक्तेत्यर्थः। एतदुक्तं भवति- ''क्रियानुप्रवेशनिरासेन विशुद्धब्रह्मणो ज्ञेयत्वमुच्यते; क्रियानुप्रवेशे ह्यनित्यत्वादिदोषप्रसङ्गादिति। अयं द्वितीयवर्णकार्थः। *ननु* पूर्वसूत्रेणैवैतदुक्तम्, किं सूत्रान्तरेण? इत्याशङ्क्याह- *विद्ध्वा त्वप्रामाण्यमिति*।। अप्रामाण्यनिरासेन तदेव साध्यत इत्यर्थः *अयं प्रथमवर्णकार्थः*।। यद्वा एतद् ब्रह्म ज्ञेयमित्युच्यत इत्यन्वयः। *कार्यावमृष्टि निखिलभववतीमिति* निखिला चासौ भववती चेति विग्रहः। एतदुक्तं भवति- अर्थगतं सविशेषत्वं स्वरूपप्रयुक्तं कार्यहेतुकं च पराकृत्य शब्दगतमप्रामाण्यं च निरस्य ज्ञेयत्वं व्युत्पाद्यत इति।।

एतद्वर्णकद्वयोक्तार्थसमाधानरूपत्वात् तृतीयवर्णकार्थोऽप्यत्रैवोक्तः। अस्य सूत्रस्य पूर्वसूत्रेण सङ्गतिं वक्तुं वृत्तकीर्तनं करोति- *जगतो जन्मादिकारणमिति*।। '' प्रतिज्ञातमि ' ति वदता न तत्र प्रामाण्यं साधितम्, अतो नास्य सूत्रस्य वैयर्थ्यमित्युक्तम्। सूत्रकारवचनसामर्थ्यान्नाक्षेपः; तस्यान्यार्थत्वस्य दर्शितत्वादिति चोदयति- * नन्वाक्षेप इति*।। सूत्रकारवचनं यद्यपि क्रियाप्रकरणपठितवाक्यविषयम्; तथाऽपि हेतुसाम्यान्यादाक्षेपः। तत्र तद्वचनादेकदेशविषयत्वं विचारस्योक्तम्, अत्राप्रामाण्यम्। ''यद्यपी'' त्यनेन प्रतिपादकत्वमङ्गीकृत्यासंवादादप्रामाण्यमुक्तम्, तदयुक्तम्; आनर्थक्यस्योक्तत्वात्, पुनः शङ्काकारणाभावात्, व्यर्थश्च; तेनैवाप्रामाण्यसिद्धेरित्याशङ्क्याह- *ननु वेदान्तानामिति*।। ''न तावदि 'त्यनेन द्वितीयपक्षस्यादौ निराकरणं कृतम्; सन्निहितत्वात्, प्रथमपक्षस्य निरस्तत्वादिति।।

''परिनिष्ठितमि'' त्ययुक्तम्; उत्पत्तेः प्रागसिद्धत्वात्, पश्चात् परिनिष्ठितत्त्वस्य सर्वत्रैवाविशेषादित्याशङ्क्याह- *अभूदस्तीति*।। तदपि न कारणम्; कार्येऽपि समानत्वादित्याशङ्क्याह- *असाध्यस्वभावे चेति*।। तत्र टीका- *प्रत्यक्षादीनामपीति*।। अयं प्रयोगः- ब्रह्म धर्मि, प्रमाणान्तरयोग्यमिति साध्यो धर्मः, परिनिष्ठितवस्तुत्वात्; घटादिवत्।* तैरसंवाद इति*।। अयं

प्रयोगः– वेदान्तशास्त्रं धर्मि, प्रमाणं न भवतीति साध्यो धर्मः प्रमाणान्तरयोग्यत्वे सत्यनुपलभ्यमानार्थत्वात्; स्पर्शगोचरचित्रनिम्नतादिज्ञानवत्। शङ्कितोपाधिरनुकूलतर्को वा नास्यास्तीति चोदयति- *ननु परिनिष्ठितोऽपीति *।। परिनिष्ठितत्वेन हेतुना यथा चक्षुरादिग्राह्यत्वं रसादीनां साधयितुं न शक्यते, तथा प्रमाणान्तरग्राह्यत्वमपि न सम्भवति; विशेषाभावादित्यर्थः। *ननु* किमिति पूर्वहेतोरप्रयोजकत्वम्? अनुगतत्वात्तदेव प्रयोजकमस्तु, को दोषः? इति चेत्, कार्ये प्रसङ्गादिष्टविघात इति भावः। *ननु* व्यावर्त्यत्वेन हेतुना न कार्यस्य मानान्तरयोग्यत्वानुमानम्; बाधितविषयत्वादित्याह- *साध्यस्वभावतयेति *।। नत्वेवं ब्रह्मण्यप्यनुमानमबाधितविषयम्; केनचिद्रूपेण तूभयत्राविशिष्टम्, अतो व्यापिन एव प्रयोजकत्वमिति।।

ननु ''अपौरुषेयत्वादि'' ति हेतुर्व्यर्थः; पूर्वं पौरुषेयत्वेन न सापेक्षत्वमुक्तं यतः, सिद्धार्थत्वेन संवादापेक्षत्वं च न परिहृतम्; अतोऽनुपपन्न इत्याशङ्क्याह- *ननु पुरुषवचांसीति *।। ''सत्यं तथापी'' त्यनेनासंवादादप्रामाण्यवत् प्रकृतेऽप्यसंवादादप्रमाणमित्युक्तम्, तदयुक्तम्; नहि तत्रासंवादादप्रामाण्यम्, नापि प्रकृते; अनपेक्षत्वाविशेषादित्याशङ्क्य व्याचष्टे- *अनपेक्षप्रमाणयोरिति *।। *ननु* 'अहं मनुष्य' इति प्रत्यक्षेण शब्दस्य बाधो न संभवति; दोषजन्यत्वेन बाधकत्वानुपपत्तेः; न च शब्दप्रामाण्यसापेक्षमहङ्काराप्रामाण्यम्, तदभावे शब्दस्य प्रामाण्यम्, इति शक्यं वक्तुम्; अनुमानादिना बाधादित्याशङ्क्य परिहृतम्- *''किञ्च पुरुषार्थशून्यत्वादि'' ति *, तदयुक्तम्; नहि सप्रयोजनत्वं प्रामाण्ये प्रयोजकम, येन तदभावादप्रामाण्यं भवेत्, उपेक्षणीये दर्शनात्, ''तौ च सिद्धत्वादि'' ति व्यर्थम्; अत्र पुरुषार्थत्वस्य तद्धेतुत्वस्य वा वक्तुं शक्यत्वादित्याशङ्क्यावतारयति- *किंचाप्तं खलु लोक इति *।। *ननु* न तात्पर्यं प्रमितिहेतुः। येन तदभावे व्युत्पन्नं ज्ञानमज्ञानसंशय-विपर्ययरहितत्वात्प्रमाणमेव भवेत्, अतत्परादप्यबाधितबोधदर्शनात्, नापि प्रयोजनाभावादतत्परत्वेनाप्रामाण्यमिति युक्तं वक्तुम्; प्रयोजनहीनेऽपि तात्पर्यदर्शनात्, उभयाभावेऽपि प्रामाण्यं युज्यत एव; अनधिगतबोधलक्षणत्वात्तस्य, सति च बोधे प्रयोजनं च कल्पयितुं शक्यत एवेत्याशङ्क्य परिहृतम्- *किञ्च प्रत्यक्षाद्यविषयं इति *।। तत्र किं शब्दमात्रं नाम? कथं वा तस्याप्रतिपादकत्वम्? कारणाभावात्, शक्त्या हि बोधकत्वम् नतु विषयस्य प्रत्यक्षादिविषयत्वेन; अतिप्रसङ्गादित्याशङ्क्यावतारयति- *किञ्च विधायकपदेति *।। ननु* प्रमाणान्तरगृहीते भवतु संबन्धग्रहणम्, प्रतिपादनञ्च केवल एव भवत्वित्याशङ्क्याह- * यथासंबन्धग्रहणमिति *।।

ननु तर्हि विधायकपदसन्निहितेष्वपि नानधिगतार्थप्रतिपादनं संभवति, गृहीत एव संबन्धग्रहणात्, कथञ्चिद्विधायकपदार्थस्याज्ञातत्वेऽपीतरपदार्थानां गृहीतत्वादित्याशङ्क्याह- *कार्यस्य तु प्रमाणान्तरेति *।। *''प्रकरणान्तरभयादि'' ति* किमर्थमुक्तम्? अयोग्यत्वेनानन्वयसिद्धेः, कर्मप्रकरणगतत्वस्य च वक्तुं शक्यत्वात्, तदभावे चाव्यभिचरितकर्तृप्रतिपादनेन सर्वशेषोऽर्थवाद इति वक्तुं शक्यत्वादित्याशङ्क्य

व्याचष्टे- * न तावद् वेदान्ता इति *।। सर्वेण वेदवाक्येनेति *। अयमर्थः-यदि सर्वो वेद एकवाक्यतयैकं कर्म प्रतिपादयेत्, तर्हि तत्प्रकरणात् तदेकवाक्यता भवेत् न च तदस्तीति।। *ननु* धर्ममात्ररूपेण प्रतिपाद्यस्यैकत्वात् तत्प्रतिपादकस्याऽप्येकवाक्यत्वेन तदेकवाक्यता वेदान्तवाक्यानामित्याशङ्क्याह-*धर्मसामान्यस्येति *।। *पर्णमयीवाक्यवदिति *।। ''यस्य पर्णमयी जुहूर्भवती'' ति वाक्यस्य यथा जुहूप्रकृतिभूतपर्णतासमर्पणेन जुहूमदपूर्वार्थत्वम्; जुह्वाः प्रकृतिमद्द्राव्यापेक्षितत्वेनास्य तत्समर्पकत्वात्, अव्यभिचरितक्रतुं 'संबन्धेन सर्वार्थत्वम्, एवमिहाप्यात्मनः सर्वकमार्थत्वात् तद्द्वारेण सर्वशेषत्वम्; आत्मनः कर्मभिरपेक्षितत्वात्, अस्य च तत्समर्पकत्वादिति। स्तुतौ प्रतिपादने चोपयोगो नास्तीत्युक्तम् तदयुक्तम्- अङ्गस्तुतेः प्रवृत्तावुपयोगित्वात्, प्रतिपादनञ्चोपयोगि; कर्मणां कर्त्रा विनाऽनुपपत्तेरित्याशङ्क्याह-*नहि कर्मणामिति *।। न कर्तृमात्रप्रतिपादनपरं वेदान्तवाक्यम्, किन्तु निर्विशेषस्वरूपप्रदर्शनपरम्। न च तत्कर्मसूपयुज्यत इति भावः। *ननु* एतद्वाक्यबलादेव कश्चिदुपकारः कल्प्यत इति नेत्याह- * विपरीतञ्चेति *।। ''तदयुक्तमि'' त्यादिना जगत्कारणे सर्वज्ञत्वादिसिद्धिर्नास्तीति कथमुक्तम्? स्वरूपासिद्धिप्रसङ्गात्, अप्रस्तुतञ्चैतत्; उपास्यब्रह्मसमर्पणेनोपासनाशेषत्वं तेनोक्तम्, तद्विहाय जगत्कारणे सर्वज्ञत्वादिगुणनिराकरणादित्याशङ्क्यः व्याचष्टे- *तदाऽपि विशिष्टब्रह्मेति *।। ''सत्यमनुमानतः'' इति परिहारो न युक्तः; नह्युपासनानियोगसिद्धिमात्रप्रदर्शनमुपयुज्यते, किन्तु वेदान्तानां तादर्थ्यम्। न च तदस्मिन् पक्षे संभवत्यनुमानसिद्धम्; धर्मारोपेणोपासनाकीर्तनात्, तावता वेदान्तानां तादर्थ्यासिद्धेरुपास्यसमर्पकत्वाभावात्, अतो भाष्यविरोध इत्याशङ्क्यावतारयति- *न खलूपासनेति *।।

*ननु वेदान्तवाक्यानामिति *।। यथा कर्मशेषत्वं वेदान्तानां निराक्रियते प्रकरणपाठाभावात्, तथा सगुणोपासनाप्रकरणेऽपि पाठाभावान्नैतच्छेषत्वमित्यर्थः। *ननु* प्रकरणपाठाभावेऽपि प्रयोजनाकाङ्क्षत्वात् तच्छेषत्वं निश्चीयते, तदपेक्षितोपास्यसमर्पणसामर्थ्यात्, विधेश्च समर्पणापेक्षित्वात्, तदुभयाकाङ्क्षयाऽन्वय इत्याशङ्क्याह-* स्वार्थमात्रपर्यवसितानामिति *।। अनन्याकाङ्क्षितवस्तुप्रतिपादकत्वादित्यर्थः। अथवा-प्रकरणादुत्थितत्वं स्वार्थमात्रपर्यवसाने हेतुः, मा भूदुपासनान्तरसंबन्धः, स्ववाक्य एवोपासना कल्प्यते सप्रयोजनत्वसिध्यर्थमित्याशङ्क्याह-*नापि स्वात्मनीति *।। *अश्रुतत्वादिति *।। व्यधिकरणो हेतुः, अश्रुतत्वस्य कल्पनानिवर्तकत्वाभावात्, इष्टविघातकारी चायं हेतुः. तस्य कल्पनाहेतुत्वादिति।।*अयमभिप्रायः*।। नात्र विधिः कल्पयितुं शक्यते; कल्पकाभावात्, न तावद्वेदान्तानां तादर्थ्यबोधकं प्रमाणमस्ति, नापि तेन विनाऽनुपपद्यमानस्य श्रवणमस्ति, नापि फलश्रवणमस्ति; तदभावेऽऽधिकार्यभावाद् नोपासनाकल्पनम्, इत्यतो निरर्थका वेदान्ता इति चोद्याभिप्रायः। *रात्रिसत्राणामिवेति *।। ''य एता रात्रीरुपयन्ती'' त्यत्राधिकारस्तावद् न श्रूयते, अतः कल्प्यः। तत्रान्तरङ्गत्वेऽपि न जीवनं कल्प्यम्, अपि तु प्रयुक्तिलाघवाय कामाधिकारित्वम्। तत्रापि ''सः

स्वर्गस्स्यादि'' त्यनेन न्यायेन स्वर्गो वा कल्प्यताम्? आर्थवादिकं वा? इति विशये ''श्रुतमात्रेयो निर्देशादि''त्यनेन न्यायेनैकवाक्यताऽनुरोधादार्थवादिकफलस्वीकारः, तद्वदिहापि ''एतावदरे खल्वमृतत्वमि'' त्याद्यर्थवादप्रतीतामृतत्वस्वीकार इति।

कथं समन्वयमात्रेण ब्रह्मप्रमाजनकत्वम्? व्यभिचारात्, इत्याशङ्क्य व्याख्यातम्- ''तात्पर्येऽपी''ति, तदयुक्तम्; तात्पर्यस्य पुरुषधर्मत्वेनापौरुषेये वेदेऽभावादित्याशङ्क्य, व्याचष्टे- * तात्पर्यं नामेति *।। कथं शब्दधर्मता, सत्यपि शब्दे पुरुषहीने तात्पर्यशब्दप्रयोगाभावात्, सति तु तस्मिन् तत्प्रयोगात्पुरुषधर्मत्वमेवेत्याशङ्क्याक्षिपति- *कथमिति *।। किं तर्हि तात्पर्यमिति? तदाह- * विवक्षातात्पर्यमिति *।। अयं भावः-विवक्षित्वा प्रयुक्ते शब्दे तात्पर्यशब्दप्रयोगो दृश्यते लोके; तदभावे नास्ति; अतो तदागमन्यायेन विवक्षायास्तत्त्वमिति परिहरति- * अर्थप्रमितिमिति *।। यद्यपि विवक्षित्वा प्रयुक्ते शब्दे तच्छब्दप्रयोगः; तथाऽपि न विवक्षामात्रं तात्पर्यम्; सत्यामपि विवक्षायां तादर्थ्येनाप्रयुक्ते शब्दे तात्पर्यादर्शनात्, नापि विवक्षापूर्वकतादर्थ्येन प्रयोगस्तात्पर्यम्; सत्यपि तादर्थ्ये विवक्षाऽभावापराधेन तात्पर्याभावादर्शनात्, विवक्षाया विद्यमानस्थलेऽप्यप्रयोजकत्वात्। तादर्थ्यं तु विवक्षारहितमपि तात्पर्यं भवत्येव प्रयोग-प्रतिपत्तिभ्याम्। तस्माच्छब्दधर्म एवेति भावः। भवतु शब्दधर्मता, तथाऽपि तात्पर्येण समन्वयादिति विशेषणासिद्धो हेतुः ; तात्पर्यज्ञापकाभावात्, अज्ञातस्य प्रमाजनकत्वाभावाद् ज्ञातत्वं वक्तव्यम्। प्रमालक्षणकार्यात् तज्ज्ञान इतरेतराश्रयप्रसङ्गाद न तात्पर्येण प्रमाजनकत्वनिश्चयः, भवतु वा कथञ्चित्तात्पर्येण निश्चयः, तथाऽपि नात्र तात्पर्यमिति निश्चेतुं शक्यत इत्याशङ्क्याह- *तच्च तात्पर्यं यस्मिन्निति *।। ''तस्य वाक्यस्य तस्मिन्नर्थे'' इत्यनेन तात्पर्यज्ञापकलिङ्गमर्थविशेषनिष्ठत्वादर्थविशेषनिष्ठमेव तात्पर्यं ज्ञापयतीत्युक्तम्। *ननु* नैतानि लिङ्गानि तात्पर्ये , साध्यतैव तु प्रमेयगता तात्पर्यलिङ्गम्; वाक्यान्तरे दर्शनात्, अत्र तु तदभावान्न तात्पर्यनिश्चय इत्याशङ्क्याह- *न च प्रमेयस्येति *।। *ननु* तत्रापि न सिद्धार्थे तात्पर्यम् अपितु कार्य एव; अतस्तदेव तात्पर्यलिङ्गमित्याशङ्क्याह- *साध्यस्य च प्रमेयत्वं इति *।। *ननु* नेतरेतराश्रयः, यस्मान्न तात्पर्यादर्थबोधः अपित्वन्यत एवेति चोदयति- * साध्येऽर्थे प्रमित इति *।। तस्मादुक्तानि तात्पर्यलिङ्गानि। तानि चात्र दृश्यन्त इत्यर्थः।। लिङ्गप्रदर्शनं निगदव्याख्यातम्।।

सच्च त्यच्चेति तदित्यर्थः।। अभावप्रपञ्चोऽत्र त्यच्छब्देन विवक्षितः। *प्राणनादिव्यापारलिङ्गैश्चेति *।। ''को ह्येवान्यात् कः प्राण्यादि'' तिविवक्षितो व्यापारः प्राणनादिव्यापारः प्राणनादिव्यापारः। ''एष ह्येवानन्दयाति'' इत्यादिशब्दपरिगृहीतश्च। प्रातिपदिकार्थस्य सत्तामात्रत्वान्नान्याकाङ्क्षा; क्रियाकारकाणामेव तदपेक्षति भावः। *तत्रापीति *।। लिङ्गसंख्याविशिष्टस्यैव वाक्यार्थत्वान्नेतरवाक्यार्थवैलक्षण्यमिति भावः। कथमेवंविधवस्तुप्रतिपादनं संभवति? सर्वत्र प्रसिद्धार्थानुवादेनाप्रसिद्धार्थप्रतिपादनं क्रियते। न च तदत्र संभवति; निर्विशेषत्वप्रतिज्ञानात्। यदि शब्देन विना

प्रसिद्धिरङ्गीक्रियते; प्रतिपादनवैयर्थ्यमेव स्यात्। नाप्येवंविधेऽनेकशब्दप्रवृत्तिः संभवति; प्रवृत्तिनिमित्ताभावात्, भावे वा विशिष्टस्य वाक्यार्थत्वप्रसङ्गात् अतो नैवंविधे पदानामन्वयस्संभवतीत्याशङ्क्याह- * जगत्कारणसामान्येति *।। *एतदुक्तं भवति *-" न जगत्कारणमत्र प्रतिपाद्यम् किन्त्वनूद्यम्; प्रसिद्धत्वात्, तच्च सामान्येन प्रसिद्धम्, न विशेषत इति प्रतिपादनसाफल्यमिति।।* ज्ञानानन्दशब्दाविति *।। अनेनैतदुक्तं- यज्जगत्कारणमित्यनूद्य तत्र ज्ञानानन्दशब्दप्रयोगाद् ज्ञानत्वाधारसुखविशेषसिद्धिः। एकैकपदप्रयोगे ज्ञानत्वाधारव्यक्तिमात्रम् सुखमात्रं वा प्रतीयेत, मिलितयोस्तु प्रयोगे सुखज्ञानशब्दोऽन्तःकरणवृत्तौ प्रतिबिम्बितचैतन्ये व्युत्पन्नोऽपरिच्छिन्नसत्यसामानाधिकरण्यायोगादानन्दैक्यविरोधाद् ज्ञानविशेषप्रसिद्धो जन्मादिभेदप्रतिभासहेतुतयाऽध्यस्तान्तःकरणवृत्तिं तद्गतसामान्यं च विहायापरिच्छिन्नचैतन्यं लक्षयति। आनन्दशब्दोऽपि शुद्धसात्त्विकान्तःकरणवृत्तौ चैकतयाऽध्यस्तानन्दे व्युत्पन्नोऽपरिच्छिन्नसत्यज्ञानैक्यायोगाद्वृत्त्यैक्यं तन्निमित्तभेदोत्पत्तिज्ञेयत्वमानन्दत्वासामान्यानि च परित्यज्याद्वयानन्दे लक्षयति। सत्यशब्दस्सर्वात्मकजाड्याभिन्नपृथक्कृत्य ज्ञानात्मैकत्वप्रतिपादनेन सत्यात्पृथग् जड्वर्गोपस्थानेन च वस्तुपरिच्छेदं व्यावर्तयति।।

अथवा-सत्याकारस्य जाड्यात्पृथक्करणे जडस्य मिथ्यात्वसिद्धावपि स्वरूपभेदेन सांख्यभ्रमसिद्धवस्तुपरिच्छेदं व्यावर्तयति। *ननु* एक-सत्यादिशब्दाः कथं ब्रह्मणि वर्तन्ते? संख्या-सामान्य-परिमाणाभावादित्याशङ्क्याह-*एकसत्यानन्तेति*।। *ननु* सामान्याभावोपाधीनां प्रवृत्तिनिमित्तानामङ्गीकारे भेदः स्यादित्याशङ्क्याह-*न चानिर्वचनीयेति*।। *ननु* सत्यादिशब्दानां कथमखण्डैकरसे वृत्तिर्निश्चीयते? भिन्नार्थत्वात्, एकार्थत्वे वा सहप्रयोगानुपपत्तिः; पर्यायत्वादेव, पर्यायेण बोधका इति पर्यायता प्रसिद्धा। तदुक्तम्-

"पर्यायाणां प्रयोगो हि यौगपद्येन नेष्यते। पर्यायेणैव ते यस्माद्वदन्त्यर्थं न संहताः।।" इति।।

यदप्युक्तम्-सच्चिदानन्दशब्दाः परापरसामान्यद्वारेणैकामानन्दव्यक्तिं लक्षयन्तीति, 'तदपरामृष्टलक्षणावृत्तेरितीरितम्; यतः प्रमाणान्तरयोग्यस्य कार्ययोगितया क्लृप्तस्याव्यभिचरितस्य लक्ष्यत्वं दृष्टं तीरादेः, न चात्र तत् संभवति; वाच्यस्य च वाक्यार्थे संबन्धानुपपत्तिर्लक्षणाबीजम्। न च तदप्यस्ति।।

ननु निर्विशेषत्वं ब्रह्मणः श्रूयतेऽद्वितीयास्थूलनिर्गुणश्रुतिभिः अतो गुणादिविशिष्टस्य वाक्यार्थत्वायोगाद् लक्षणाश्रयणम्, *मैवम्*; पर्यायता च। किञ्चापर्यायशब्दा एते ज्ञानानन्दादयः। न चापर्यायाणामखण्डार्थता।।

गुरुकारुण्यसंलब्धतत्त्वबोधप्रसादतः। अखण्डैकरसे वृत्तिः पदानामिह वर्ण्यते।।

"तत्त्वमसि" "सत्यं ज्ञानमनन्तमि" ति सामानाधिकरण्यं प्रतीयते। तत्र भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति लक्षणम्। तत्रार्थशब्दो न पुरुषार्थवचनः; 'अयं दुर्गन्धः' इत्यादिषु सामानाधिकरण्यदर्शनात्,अभिधेयवचनत्वमपि न संभवति; अयोग्ये वृत्तिप्रसक्त्यभावात्; योग्ये वृत्तिरिति न युक्तम्ः व्यर्थविशेषणत्वात्। अतः प्रवृत्तिनिमित्तभेदे सत्येकस्मिन् वृत्तिः, इति लक्षणे प्राप्ते, वस्तुवाचिनाऽर्थशब्देन विशेषितत्वात्प्रवृत्तिनिमित्तस्यासत्यत्वे सत्येकमेव सत्यं प्रमेयमिति लक्षणतः सिद्धम्। तथा च "यतो वाचो निवर्तन्ते" इति श्रुतिर्जाति-गुण-क्रियोपाधि-सम्बन्धान्यतमभावात्पुरुषार्थब्रह्मप्रतिपादने प्रवृत्ताऽपि ततो व्यावृत्तेत्याह। "औपनिषदं पुरुषमि" त्युपनिषद्भ्यो विज्ञेयतां दर्शयत्यपरा श्रुतिः। अत उभयविधश्रुतिसामर्थ्याद् वाचकत्वहानेन लक्षणत्वं निश्चीयते। भिन्नाभिन्नत्वं च श्रुत्या निषिध्यते- "नेति नेति" इति । अत्र "द्वे वा व ब्रह्मणो रूपम्" इति सर्वात्मकत्वप्रतिपादनादत्यन्तभेदनिवृत्तेः प्राप्तत्वादभेदसहिष्णुभेदं निषेधति प्रथमो नेतिशब्दः, द्वितीयस्तु तद्योग्यतानिषेधकः; नष्टे पदार्थे भेदनिवृत्तावपि तद्योग्यतादर्शनात्। अथवा- भावनिषेधकः प्रथमः, द्वितीयस्त्वभाववर्गविलापकः; स्थूल-सूक्ष्मवासना- तदितरादिविषयत्वेन वा द्रष्टव्यम्। अतः श्रुति-लक्षणाभ्यामेकरसस्य प्रमेयत्वं निश्चीयते। तथा परमार्थत्वसामर्थ्यादप्यैक्यं प्रतीयते।

तथाहि-चिदानन्दयोरन्योन्यव्यभिचाराच्छून्यविरोधित्वप्रयोजकत्वायोगात्, सत्तासंसर्गनिबन्धने च शून्यविरोधित्वे सत्तायां व्यभिचारात्, सत्तासंसर्गे च शून्यविरोधः शून्यविरोधित्वे सत्तासंसर्ग इत्यन्योन्याश्रयात् सदैक्यमशून्यत्वाय कल्पनीयम्। एवञ्चिदाकारादन्यत्वे सदानन्दयोरस्फुरणाच्छून्यता स्यात्, ज्ञानसंसर्गनिबन्धने प्रकाशे, संसर्ग-प्रकाशे सति संसर्गिप्रकाशस्संसर्गिप्रकाशपुरस्सरं संसर्गप्रकाश इत्यन्योन्याश्रयाद् ज्ञानैक्यमशून्यत्वाय कल्पनीयम्। एवमत्यन्तैक्याद् न वाच्यता। तथा पुरुषार्थत्वसामर्थ्यादप्येकत्वं प्रतीयते।

तथाहि-पुरुषार्थत्वं नानन्दत्वेन संभवति; अदर्शनात्, आनन्द-तत्संसर्गयोरन्योन्य-व्यभिचारात्पुरुषार्थत्वप्रयोजकत्वायोगादानन्दैक्यं पुरुषार्थत्वाय कल्पनीयम्। तस्याप्यप्रकाशमानस्या-पुरुषार्थत्वाच्चैतन्यरूपता, चैतन्यसंसर्गनिबन्धने प्रकाश इतरेतराश्रयप्रसङ्गात्प्रकाशसंसर्गे प्रकाशिते संसर्गिप्रकशः संसर्गिप्रकाशपुरस्सरः संसर्गप्रकाश इति, अतस्तद्रूपत्वमङ्गीकर्तव्यम्। एवमसतोऽपि पुरुषार्थत्वायोगात् सत्तासंसर्गस्य तद्वत्त्वस्य वा सत्त्वव्यवच्छेदकत्वाभावात्सदैक्यमशून्यत्वाय कल्पनीयम्। एवं परस्परैक्यमूह्यम्। किञ्च सच्चिदानन्दानामौपाधिक आभासश्च भेदः; स्वतो भिन्नत्वेऽनित्यत्वादिदोषोत्पत्तेः, ब्रह्मणश्चिदाकारादन्यत्वे चिद्गुणत्वं न संभवति; जड़त्वात्; पटवत् चिदानन्दयोस्समानाश्रयत्वे चौष्ण्य-प्रकाशयोरिव विषय-विषयित्वायोगात्, ब्रह्मानन्दोऽननुभूतोऽपुरुषार्थः स्यात्। यत् प्रमाणान्तरयोग्यत्वम्, क्लृप्तकार्योपयोगित्वमविनाभूतत्वं च लक्ष्यत्वे प्रयोजकमिति, तदचारु,

न मानान्तरयोग्यत्वं प्रतीतिस्तु प्रयोजिका। प्रतीतेस्तदभावेन न लक्ष्यत्वे पराक्रिया।।

लक्ष्यस्य सर्वत्र प्रतीत्या भवितव्यम्, न तु मानान्तरयोग्यत्वम्; वाच्येन संबन्धितया गृहीते वाच्यस्यान्वेतुमयोग्यत्वे सति संबन्धिनः प्रमाणान्तराग्राह्यत्वेनालक्ष्यत्वानुपलम्भात्। लक्ष्यत्वं विद्यमानस्थलेऽप्यप्रयोजकम्; विशिष्टस्य वाच्यत्वे स्वरूपस्यापि स्वप्रकाशत्वेन सिद्धत्वाद वेद्यत्वाभावापराधेन मानान्तरवेद्यत्वाभावेन वा सिद्धे लक्ष्यत्वाभावानुपलम्भाद्वेद्यत्वं मानान्तरवेद्यत्वं च विद्यमानस्थलेऽप्यप्रयोजकम्।।

यद्वा- विशिष्टस्य वाच्यत्वात् तस्य च मानान्तरवेद्यत्वे स्वरूपस्यापि मानान्तरवेद्यत्वात् साहचर्याच्च लक्षणासंभवः। किञ्च वाच्यस्य वाक्यार्थेनान्वेतुमयोग्यत्वं योग्यार्थलक्षाणाकारणम् नतु लक्ष्यस्य मानान्तरवेद्यत्वम्; वाच्यस्यान्वयायोग्यत्वे सति लक्ष्यस्य मानान्तरयोग्यत्वाभावेनालक्ष्यत्वानुपलम्भात्, मानान्तरयोग्यत्वं विद्यमानस्थलेऽप्यप्रयोजकम्, किञ्च संस्कारवाक्यैरपूर्वीयव्रीहिलक्षणेष्यते। न च मानान्तरवेद्यता। एवं बहुशो मानान्तरावेद्ये दीक्षणीयादौ लक्षणा द्रष्टव्या। न च लक्ष्यस्य तत्संबन्धस्य वा सत्यत्वं लक्षक्त्वप्रयोजकम्; असत्यस्याप्यसंबन्धस्य लक्षकत्वात् संबन्धवत्त्वं न लक्षकत्वस्य प्रयोजकम्; संबन्धे विद्यमाने तयोस्सत्यत्वाभावापराधेनालक्षकत्वानुपलम्भात् सत्यत्वमप्यप्रोजकम्।।

ननु लक्ष्यस्यैकत्वेन पर्यायत्वं वैयर्थ्यञ्चेति, तदसत्; लक्ष्यस्यैकरसत्वेऽपि कुतस्तद्दूषणद्वयम्? यद्यप्येकमेव वस्तु, तच्च सर्वविरोध्याकाररूपम्, तथाऽपि नैकेन पदेन तत्तादृशं लभ्यते।।

तथाहि-सन्नित्युक्ते जाड्यानन्दविरोधिचिदानन्दरूपत्वं न लभ्यते। लोके सत्त्वप्रतीतावपि चिदानन्दरूपत्वादर्शनात्, तदात्मकत्वं प्रतिपादनीयम्। तथा चैतन्येऽपि सदानन्दत्वं प्रतिपादनीयम्; ज्ञानाकारस्यासत्त्वादनानन्दनिवर्तकत्वाभावात्, व्यभिचारात्। तथाऽऽनन्देऽपि सद्रूपत्वं प्रतिपादनीयम्; केवलस्य व्यभिचारादेव।

ननु लक्ष्यस्वरूपस्यैकत्वात् तस्य चैकेन पदेन सिद्धेः पदान्तरप्रयोगस्तल्लक्ष्यैकत्वप्रतिपादनञ्च व्यर्थम्, *मैवम्*; लक्षणाबुद्धीनामपुनरुक्त्यर्थं तत्तद्भ्रमविरोधिधर्माः कल्पिताः। तत्कल्पने च तद्धर्मोपाधिकत्वेन स्वरूपस्य भेदभ्रमप्राप्तौ तदुपादाननिवृत्त्यर्थं विरोधिधर्मोपलक्षितस्य सत्याकारस्य चिद्रूपत्वमानन्दरूपत्वञ्च चिद्रूपस्याप्यानन्दसन्मात्रत्वमानन्दरूपस्य सच्चिन्मात्रतेत्यैक्यप्रमितिर्जायते। तदुत्पत्तौ विरोधिधर्म-तन्निबन्धनभेद-तदुपादानाज्ञानस्य च निवृत्तिः। सर्वभ्रमनिवृत्त्यर्थं तत्तद्भ्रमविरोधिधर्माः कल्पिताः; विरोध्यधिष्ठानप्रमितेरेव बाधकत्वोक्तेः। न चैतत्पदसामानाधिकरण्येन लभ्यात्यन्तैक्य-बलादेतत्पदवैयर्थ्यापादनं युक्तम्; एतत्पदनिबन्धनवाक्यार्थज्ञानवत एव तद्वाक्यानन्तरं वैयर्थ्यात, पूर्वन्तु वाक्यार्थज्ञानाभावादेव न वाक्यप्रयोगो वैयर्थ्यं वा।।

ननु विरोधिधर्मस्यारोपितत्वेन प्रमित्यभावात्कथं विरोध्यधिष्ठानप्रमितेर्बाधकत्वम्;*मैवम्*; विरोधिधर्मस्य प्रतीतिमात्रमपेक्षितम्, न प्रमितिः; प्रतीयमानविरोधित्वधर्मेण लक्षितस्य प्रमितत्वे सति विरोधिधर्मस्य प्रमितत्वाभावापराधेनोत्पन्नाधिष्ठानप्रमितेरबाधकत्वानुपलम्भात्, भ्रमविरोधित्वेन प्रतीतधर्मोपलक्षितस्वरूपप्रमितिर्बाधिता; तस्यैवाधिष्ठानत्वात्, भ्रमोपादानाविद्याविषयत्वाच्च लक्ष्याव्यतिरिक्तपदार्थैरैक्यस्य कदाचिदपि सत्त्वासिद्धेः प्रतियोग्यभावात्तन्निषेधोऽपि न प्रामाणिकः। अतोऽन्यैक्यनिषेधेनाऽऽरोपितेनैव लक्ष्यत्वम्, भ्रमनिवृत्तिश्चैष्टव्या।।

ननु ज्ञानादिशब्दैर्न स्वरूपस्य लक्ष्यत्वम्, आनन्दाद्भिन्नं हि विज्ञानशब्देन लक्ष्यम्। एवमानन्दादिशब्दैरपि; तथा सति भिन्नत्वे गृहीते नैकत्वं संभवति; स्वरूपत्वे स्वरूपग्रहणेन गृहीतत्वात् प्रमितिरेकैवोच्यते। ज्ञानस्वरूपत्वं ज्ञानशब्देन लक्ष्यत्वप्रयोजकम्, नानन्दाद्भेदवत्त्वम्; ज्ञानस्वरूपे विद्यमानेऽन्यस्माद्भेदाभावापराधेनालक्ष्यत्वानुपलम्भात्।। एवमानन्देऽपि। न च ज्ञानबुध्याऽभेदस्य गृहीतत्वम्; विज्ञानं भिन्नमिति पुनरुक्तिप्रसङ्गात्।। *ननु* भेदाप्रतीतावानन्दरूपस्य ज्ञाने प्रतीतिस्स्यात्, स्वरूपस्यैकत्वात्, व्यवस्थापकाभावात्, *मैवम्*; आनन्दबुद्धौ ज्ञानस्वरूपस्याभासार्थमौपाधिकभेदाभासाङ्गीकारात्।।

ननु गङ्गाशब्दलक्ष्यस्य न गङ्गात्वम्, तद्वदानन्दादिशब्दलक्षणायाममुख्यानन्दादिरूपत्वाद् न मुख्यानन्दादिरूपता भवेत्; *मैवम्*; वाच्यस्य ज्ञानादिरूपता लक्ष्यस्वरूपैक्याध्यासात् न स्वरूपतः; अतो यदधीनमस्य ज्ञानादिरूपत्वम्, तस्यैवार्थतो मुख्यज्ञानादिरूपता। गोलकानुप्रविष्टचक्षुरादीनां चक्षुरादिशब्दवाच्यत्वेऽपि शुद्धस्वरूपस्यैवार्थस्य मुख्यत्ववदिति वदामः। गङ्गात्वन्तु गङ्गाया न तीरैक्याध्यासनिबन्धनम्, किन्तु स्वत एव, तेन न तीरस्य गङ्गात्वमिति भेदः।।

ननु वाच्यत्वेन सिद्धस्यान्यत्र लक्ष्यत्वं दृष्टम्, तदभावाद् नात्र लक्षणा, *मैवम्*; नान्यत्र वाच्यत्वमत्र लक्ष्यत्वप्रयोजकम्, किन्तु वाक्यार्थेनान्वय एव। यदप्युक्तम्-"अखण्डार्थताऽनुपपन्नेति, केनैतद् दूषणमीरितम्? न तावद् वैयाकरणेन, स हि प्रातिपदिकार्थस्य प्रथमाविभक्तेश्चाव्यतिरिक्तार्थतामाह। बौद्धा अपि विज्ञानं क्षणिकमित्यव्यतिरिक्तार्थतामाहुः। प्राभाकरास्तु स्वरूपं भेदः 'निर्घटं भूतलमि'त्यादीनामखण्डार्थतामाहुः। स्वरूपभेदवादिनां सर्वेषामेतदेवोदाहरणीयम्। धर्मभेदवादिनां भेदो भिन्न इति प्रयोगदर्शनात्। अतः पर्यनुयोग एव कर्तुं न शक्यते।।

ननु सर्वपदानाञ्चेल्लक्षणावृत्तिरिष्यते। न लक्ष्ये व्यवहारस्स्यात् साक्षाद्धि हेत्वभावतः।।

उच्यते ब्रह्मशब्दस्तु संज्ञोक्तं ब्रह्मसंज्ञितम्। पराशरेण तेनात्र व्यवहारः प्रवर्तते।।

इत्येवं सर्ववेदान्तपदानां निर्विशेषणे। सिद्धा लक्षणया वृत्तिरात्मनि ब्रह्मरूपणे।।
प्रत्यग्ब्रह्मणि शब्दानां वृत्तिरेकरसे कथम्। भिन्नार्थानां विशिष्टे हि वाक्यार्थे वृत्तिरिष्यते।।
एकार्थत्वे प्रयोगोऽपि तेषां नो युगपद्भवेत्। लक्षणावृत्तिमाश्रित्य यद्येकार्थत्वमिष्यते।।
गुण इत्यन्वये वाक्यं मेये सति न लक्षणा। वाच्यस्यानान्वये मेये लक्ष्ये तद्योगिनि श्रिते।।
मानान्तरगृहीतस्य लक्ष्यत्वं दृश्यते यतः। निर्विशेषस्य बोध्यत्वमेतस्मिन्निति वाक्यतः।।
ज्ञायते लक्षणा तेन, ननु सर्वपदे श्रिता। निषिध्यते प्रपञ्चस्य स्थूलादिः शुद्धकारणे।।
नानिष्टं तद्गुणाश्चात्र निषेध्या रोपिता यतः। ननु सर्वत्र वाक्यार्थे लक्ष्यत्वं तदभावतः।।
नैतत्स्यादन्वितानान्तु वाचकत्वं यतः स्थितम्। इतरस्मिंस्तु लक्ष्यत्वे विशिष्टस्यैव मेयता।।
तेनोभयत्र वाक्यार्थे विशिष्टत्वं व्यवस्थितम्। तेनात्रापि विशिष्टस्य वाक्यमेयत्वमिष्यताम्।।
अत्र लक्षणाश्रयणे लक्ष्ये भेदो न वाऽस्ति वा।। पर्यायता च वैयर्थ्यमाद्ये वैयर्थ्यमुत्तरे।।
किञ्चापर्यायशब्दाः स्युर्ज्ञानानन्दादयस्ततः। निर्विशेषे स्वरूपे ते वर्तितुं नैव शक्नुयुः।।
अत्र वेदान्तसिद्धान्तसंप्रदायानुरूपतः। न्यायेन च समस्तानामेकार्थत्वमिहोच्यते।।
लक्षणाश्रयणे नैतद्वर्ण्यते तावदत्र तु । कारणं वचनेनैव वाचकत्वं निवारितम्।।
एतावता प्रवृत्तिस्तु न शक्या वर्णितुं यतः। निश्चितार्थत्वनिर्देशात् तद्धितश्रुतिदर्शनात्।।
तेनोभयं समालोच्य लक्ष्यत्वमिह वर्णितुम्। '' यदा ह्येवे'' ति वाक्येन भेदादि च निवारितम्।।

अत्यन्तभेदो ननु वार्यतेऽत्र पूर्वेण वाक्येन हि लभ्यतेऽसौ।
नह्यन्यथा तत्र भयापहारो भेदो हि तद्धेतुतया प्रसिद्धः।।

उद्विशेषणमप्यर्थम्, 'अरमि'त्यल्पवाचकम्। तेनाभ्यां भेदमात्रस्य निषेधः शक्तितः कृतः।।
'नेति नेती' ति वाक्याच्च सविशेषत्ववारणम्। गुण-जाति- क्रियोपाधियोगो वाच्ये न विद्यते।।
तेनाशैव न कर्तव्या शुक्लादिगुणवारणे। अतोऽपि निर्विशेषत्वाल्लक्षणैव समाश्रिता।।
सामानाधिकरण्याच्च निर्विशेषेऽत्र वस्तुनि। वृत्तिः कल्पितवाच्यस्य त्यागेनैव प्रतीयते।।
एवं शास्त्रेण बौद्धस्य निर्विशेषत्वनिश्चये। लक्षणाऽऽश्रीयते नात्र भेदाभेदनिबन्धनम्।।

सामानाधिकरण्यं स्यात् तन्निमित्तवियोगतः।
जात्यादियोगो नहि तत्पदार्थे तत्त्वंपदार्थे न तदीयहेतुः।
नांशांशिभावोऽत्र निवारितत्वाद् वदन्ति यत्पञ्चसु नान्यथा तत्।।

सामानाधिकरण्यं च सोऽयमित्यादिवाक्यवत्। एकस्मिन्नेव मुख्यं स्याद् नान्यथा तत्प्रकल्पते।।
पुरुषार्थत्वसामर्थ्यादत्यन्तैक्यं प्रतीयते। सुखत्वञ्च सुखित्वञ्च नैकैकं स्यात्प्रयोजकम्।।
अन्योन्यव्यभिचारेण तदैक्यं स्यात् प्रयोजकम्। तस्याचैतन्यरूपत्वे न च स्यात् पुरुषार्थता।।
चित्सङ्गान्न प्रतीतिः स्यादन्योन्याश्रयदोषतः। चिद्रूपत्वमतस्तस्य पुरुषार्थत्वसिद्धये।।
तद्रूपत्वं च तस्यैवं पुरुषार्थत्वहेतुकम्। असन्न पुरुषार्थं स्यान्न चासत्वं निवारकम्।।
सत्ता-तद्योग-तद्वत्वं नैकैकं तन्निवर्तकम्। तेन तद्रूपता तस्य तेन स्यात् पुरुषार्थता।।
परमार्थत्वसामर्थ्यादेवमैक्यं प्रतीयते। ज्ञानानन्दौ न तावद्धि सन्निषेधविरोधिनौ।।
एकैकव्यभिचारेण न चान्यत्तन्निषेधकृत्। सत्ता- तद्योग - तद्वत्त्वं नैकैकं तन्निषेधकृत्।।
तेन यद्रूपता तस्य तेन स्यात्पुरुषार्थता। व्यभिचारान्न सत्तायास्तद्वत्ता दृश्यते यतः।।
योगेनैवाऽस्ति तद्योगः सद्रूपत्वं घटादिषु। सन्निपेधविरोधित्वे सद्योगस्स्यात्तथा सति।।
सद्योगात्तद्विरोधित्वमन्योन्याश्रयता भवेत्। अन्यस्मिन्नेवमेवातः सदैक्यं तन्निषेधकृत्।।
सदानन्दौ च चिन्मात्रमन्यथा शून्यता भवेत्। अभानान्नान्यथा भानं चित्संयोगनिबन्धनम्।।
तन्नोक्तं दूषणं पूर्वं स्फुरणैक्यमतस्तयोः। यद्यदर्थं प्रयुज्यत तत्तदैक्ये विवक्षिते।।
प्रयोजकत्वसिद्धिस्स्यात्सर्वत्रैक्यं तथा सति। एवं सर्वप्रकारेण न भेदावसरः क्वचित्।।
तदभावे च शब्दानां वाचकत्वं कथं भवेत्। निर्विशेषे च शब्दानामेवं तात्पर्यनिश्चये।।
लक्षणाश्रयणं युक्तं वस्तुसिद्धिमभीप्सता। इत्येभिः कारणैस्सिद्धे लक्षणाश्रयणे सति।।
नान्यकारणराहित्याच्चोद्यस्यावसरो भवेत्। परिहारोऽपि तच्चोद्ये विभवेनाभिधीयते।।
अन्वयानुपपत्तिस्तु वाच्यस्यार्थस्य साधिका। निर्विशेषे हि वाक्यार्थे न तेषामन्वयो भवेत्।।
क्लृप्तत्वञ्चास्ति शुद्धस्य शुद्धेनान्वयदर्शनात्। मानान्तरागृहीतत्वं लक्षणाकारणं कथम्।।
सत्येतस्मिन्द्वये तेन बिना नालक्षणा यतः। अप्रसिद्धे न लक्ष्यत्वमिति कश्चिद् ब्रवीति चेत्।।
पदवाच्ये विशिष्टेऽपि स्वरूपं तत्र गृह्यते। स्वप्रकाशतया चाऽस्य ग्रहणं तेन लक्षणा।।
विशिष्टस्यैव सर्वत्र वाक्यमेयत्वमीरितम्। तत्सोऽयमिति वाक्यार्थनिरूपणनिवारितम्।।
यत्तु लक्ष्येऽपि भेदादिविकल्पेन त्वदीरितम्। दूषणं तत्र लक्ष्ये नो भेदलेशोऽस्ति तत्र तु।।
व्यवच्छेद्यस्य भिन्नत्वात्प्रत्यात्मपरिवर्तिनः। तेन यद्दूषणं पूर्वमीरितं नैव तद्भवेत्।।

न चैकेन पदेनाद्या सर्वव्यावृत्तिसंभवः। सच्छब्दः केवलो जाड्याद्भिन्नसत्वं न बोधयेत्।।
केवलानन्दशब्दोऽपि नाभिप्रेतं समर्पयेत्। जन्यानन्दे प्रसिद्धत्वाद् ज्ञानशब्दस्तथैव च।।
एवमन्योऽपि नैकैकः स्वाभिप्रेतं समर्पयेत्। सामानाधिकरण्येन लौकिकाकारवर्जनम्।।
शब्दान्तरेण तेनैते सर्वे स्युः स्वप्रयोजनाः। साफल्यात्पदजातं च तेन सर्वं प्रयुज्यते।।
अपर्यायतया नात्र वर्तनं संभवेदिति। ईरितं सोऽयमित्यादि वाक्यादर्शनहेतुजम्।।
ननु ते लक्षणं नात्र संबन्धस्य न सत्यता। तदभावे कथं तस्य लक्षकत्वं भवेदिह।।
मैवं लक्षणसत्यत्वं संबन्धस्याथवा भवेत्। लक्षकत्वे निमित्तं नो केवलव्यभिचारतः।
संबन्धे विद्यमानेऽपि लक्षकत्वं न चेद्भवेत्। सत्यत्वेन विना तत्स्यात्सत्यत्वमपि कारणम्।
न च तेन न सत्यत्वं लक्षकत्वप्रयोजकम्। ननु लक्ष्यस्य सर्वत्र वाच्यस्स्यादन्यरूपता।
दृष्टा गङ्गादिलक्ष्येषु प्रकृतेऽपि तथा भवेत्। अज्ञानत्वमसत्यत्वममुख्यानन्दरूपता।।

लक्ष्यैकहीने यदि वाच्यरूपे ज्ञानादिरूपत्वमिह प्रसिध्येत्।
मुख्यं ततो लक्ष्यममुख्यरूपं तेनेह मुख्यं कथमत्र न स्यात्।।

लक्ष्यन्ते नात्र मुख्यं स्यान्मण्डलाद्यभिमानिवत्। तदैक्याच्छब्दवाच्येऽपि ज्ञानानन्दादिरूपता।।
तत्र तत्रोक्तमेवैतद् ग्रन्थकारेण यद्यपि। संगृह्येह सुबोधार्थं दिङ्मात्रं सारमीरितम्।।

विश्वावष्टम्भमेकं निरतिशयसुखं शब्दवाच्यं न यत्तद् जातिर्योगो गुणादिर्न युतिमुपगतस्तेन वेद्यत्वमेव।
व्यावर्त्यातत्स्वरूपं निखिलजडगतं चित्सदानन्दशब्दा जाड्यासत्त्वासुखत्वं परपरिकलितं पर्यवस्यन्ति तस्मिन्।

स्वस्माद्भेदं मितत्वन्त्विह परिहरतस्तावनन्तात्मशब्दौ वाच्यं वाच्यापहारे सहचरितमितौ लक्षणा तेन युक्ता।

यद्वा सामान्यमुख्यं भ्रमसमयमितं वाच्यभेदं प्रकल्प्य ब्रह्मात्मैकत्वनिष्ठा पदनिकरजधी-लक्षणावृत्तिभेदात्।।

ननु टीकाकारेण ''सोऽयमि'' त्यादिवाक्यमुदाहृतम्, तत्किमर्थम्? नहि तत्रैकरसे वृत्तिरस्ति, तदेवात्र सन्निहितत्वादुदाहरणेन साधनीयम्, अतो नेदमुदाहरणीयमित्याशङ्क्यावतारयति- *अनेकेषां पदानामिति*।। *ननु* एकेनोदाहरणेनाखण्डैकरसे वृत्तिसिद्धेः किमुदाहरणद्वयेन? इत्याशङ्क्याह- *तत्र द्विविधेति*।।

*ननु एकेनैव "तत्त्वमसी" तिवाक्येन प्रत्यग्ब्रह्मणोरेकत्वसिद्धेः किं सत्यादिवाक्येन? यद्वा - सत्यादिवाक्येनैवाद्वितीयैकरसवस्तुसिद्धेः किं "तत्त्वमसी" तिवाक्येन? *मैवम्*; तत्पदार्थस्यालौकिकत्वात्तत्प्रतिपादनपूर्वकमेव "तत्त्वमसी" तिवाक्यं प्रवर्तते। न च तेनैवालमिति-वाच्यम्; सत्यादिवाक्यम्, पदार्थान्तरनिरासेन तत्तद्भेदनिवर्तकम्, तेन ब्रह्मस्वरूपेणानिवर्त्यात्मब्रह्मभेदायोगात्; अन्योन्यात्मत्वस्य विधेयत्वात्, प्रमेयतयाऽऽत्मब्रह्मस्वरूपं परित्यज्यौपाधिकभेदाभासनिरासेनैक्यप्रमित्यर्थं "तत्त्वमसी" त्यादिवाक्योपादानम्। *ननु* भेदबाधेऽन्यतरस्वरूपस्य बाधो दृष्टः; तद्वज्जीवब्रह्मणोरपि बाधस्स्यात्; मैवमौपाधिकत्वाद्भेदस्य, बिम्बप्रतिबिम्बभेदवत्स्वरूपाबाधेऽपि बाधोपपत्तेः किमर्थं तर्हि "तत्त्वमसी" तिवाक्योदाहरणं नानन्तरमुदाहृतम्? तस्य सत्यादिवाक्यसापेक्षत्वात् सत्यमेवात्र क्रमो विवक्षितः, अनास्थयैवमुदाहृतम्; अथवा- प्रत्यग्ब्रह्मप्रतिप्रादनपरत्वाच्छास्त्रस्य" तत्त्वमसी" तिवाक्यस्यैव महावाक्यत्वेन प्राधान्यात् तत्समर्थनमेवादौ कृतमित्यदोषः। *ननु* प्रत्यभिज्ञया न स्वरूपैक्यं प्रतीयते; विशिष्टशब्दसंजल्पात्, अत एव प्रत्यभिज्ञाधिगतमेकत्वं परस्मै प्रतिपाद्यत इति वक्तुं न शक्यते, सोऽयमिति पदाभ्यां समर्पितयोरैक्यं प्रतिपादनीयम् तथा सति न प्रकृतोपयोगिता दृष्टान्तस्य, नापि तत्संभवति, अतो नेदमुदाहरणमित्याशङ्क्योपपादयति-* तत्र न तद्देशकाळयोरिति*।। *स्वार्थैकदेशपरित्यागेनेति*।। देशकालपरित्यागेनेत्यर्थः।। *एकदेशलक्षणयेति*।। देवदत्तस्वरूपलक्षणयेत्यर्थः।। *तथा तत्त्वमसिवाक्यस्यापीति* प्रामाण्यमुपपद्यत इत्यन्वयस्त्वंपदेन, लक्षणयान्वयमाह- *एकदेशपरित्यागेनेति*।। त्वम्पदेनान्तःकरणवृत्तिविषयसंबन्धसाक्ष्यहं जानामीति प्रतीयमानो 'न जानामी'त्यज्ञानसाक्षित्वेन च प्रतीयमानः परिच्छिन्नो वाच्यतया प्रतीयते, स च प्रेमास्पदत्वेन प्रतीत्या सुखस्वरूपः, तस्य नान्तःकरणाद्यात्मकत्वं संभवति; साक्ष्यस्य साक्ष्यात्मकत्वायोगात्। नापि भेदशून्यत्वसंभवः, इत्यनुसन्धानेन "अकायमव्रणमि"त्यादि त्वंपदार्थपरिशोधकवाक्यैश्चाज्ञानादिप्रपञ्चं विलाप्यापरिच्छिन्नसच्चिदानन्दलक्षणस्य, तत्पदेनाऽपि पारोक्ष्यपरित्यागेन सच्चिदानन्दस्वरूपं लक्षयित्वा तदैक्यं प्रतिपाद्यत इति।। *ननु* इह भिन्नयोरैक्यं प्रतिपाद्यं न भवति, किन्तूपाधिपरिकल्पितभेदव्युदासेन स्वरूपमेव प्रतिपाद्यत इति कथं निश्चीयते? इत्याशङ्क्य प्रमाणमाह*इह तु कार्यकारणद्रव्येति*।। अयं प्रयोगः- तत्त्वमसिवाक्यं धर्मि, एकस्य द्रव्यस्योपाधिपरिकल्पितभेदव्युदासेनैकद्रव्यपर्यवसायीति साध्यो धर्मः, कार्य-कारणद्रव्यव्यतिरिक्तत्वे सति द्रव्याभिधायिपदयोः समानाधिकरण्यत्वात्, 'सोऽयं देवदत्तः इतिवत्। अखण्डैकरसवृत्तित्वमप्येतदेव; मुख्याभिधेयैक्यायोगादिति लक्षणाबीजम्। अतो वाक्यार्थस्यैव पदार्थत्वदोषोद्भावनेन चोद्यवादिनः पदाभिधेयैक्यमेव विवक्षितम्, तदपि परिहृतमिति भावः।।

*ननु*यावत्प्रमाणेन गृहीतं वस्तु, तावदेवाभ्यासेन भवितव्यमिति नियमो नास्ति तेनाभेदज्ञानस्यैवाभ्यास इत्याशङ्क्याह-* अन्यथा प्रमाण इति*।। *ननु* यथा स्थितं वस्तु तथा शास्त्रं प्रतिपादयति, न तु

प्रयोजनवशात्, अभ्यासे तु भेदांशस्य नाभ्यास:; प्रयोजनशून्यत्वात् निवर्त्यत्वाच्चेत्याशङ्क्याह- *ज्ञाननिवर्त्यत्वेनेति*।। तथा सति न शास्त्रप्रमेयत्वमिति भाव:। *ननु* नेदमसाधारणं कर्म निवर्तकम्; साङ्गस्यैव फलसाधनत्वात्, कर्मणाञ्च मोक्षहेतुत्वप्रतीतिरस्ति, ज्ञानस्य चाज्ञानमिथ्याज्ञाननिवर्तकत्वम्, तन्निमित्तरागादीनामपि तत एव नाश:, न तु भेदस्य; अतो न भेदस्य मिथ्यात्वमित्याशङ्क्याह- *येनैव चाकारेणेति*।। *ननु* शास्त्रमेव भेदाभेदं प्रतिपादयद् भेदनिवृत्तिमपि प्रतिपादयति, अत: शास्त्रसामर्थ्यादुभयमप्यङ्गीकर्तव्यमित्याशङ्क्याह- *न च भेदाभेदाविति*।। *ननु जीवब्रह्मणोस्सामानाधिकरण्यमत्रैव प्रतीयते, तेन च भेदाभेदनिश्चय:, इत्याशङ्क्य 'सोऽयं देवदत्त:' इतिवदेकद्रव्यनिष्ठमेव सामानाधिकरण्यम, भेदाभेदविषयमिति दर्शयति- *यदि भेदाकारविशिष्ट इति*।। *ननु* एकस्यैवालम्बत्वे सामानाधिकरण्यमेव न स्यादित्याशङ्क्याह- *तस्मादभिधेयपरामर्शेनेति*।। तथा च ''व्यक्तिविशेष:'' इत्यनेन प्रकृष्ट-प्रकाशचन्द्रशब्दानामैकार्थ्यमुक्तम्, तत् कथम्? प्रकर्षवाचिनस्सामान्यवाचिनश्च चन्द्राभिधायकत्वाभावात्। नहि प्रतिवचनत्वानुपपत्तिस्तदर्थत्वाभाव इति तदर्थत्वसाधिकेत्याशङ्क्याह- *अयमर्थ: प्रकाशशब्द इति*।। *गुणसामान्ययोरिति*।। प्रकर्षगुणो न चन्द्रपदाभिधेय:; प्रकृष्टं तम इति प्रयोगात् खद्योतेऽपि प्रकाशगुणदर्शनादिति। अत्रापि लिङ्ग-सङ्ख्ययोरविवक्षा द्रष्टव्या; अपुरुषार्थनिरूपणस्यायुक्तत्वात्। अत एकरसार्थत्वसिद्धि:। ''उदरमन्तंरमि'' ति चोच्छब्दोऽप्यर्थ:, अरमल्पमपि भेदं य: कुरुत इत्यर्थ:।

''तद्रूपाद्यसंभवादि'' त्यनेन ब्रह्मण इन्द्रियादिगोचरत्वं नास्तीत्युक्तम्; प्रमाणान्तराभावेन मिथ्यात्वाशङ्काया: परिहाराभावादित्याशङ्क्याभिप्रायमाह- *अयमाशय:, किं प्रमाणान्तरेति। संभिन्नार्थेति*।। *ननु* प्रमाणगृहीते संवादाभावेनाप्रामाण्यशङ्का स्यात्। दृश्यते च, अत: कथं सेत्याशङ्क्याह- *कथञ्चित्सापेक्षप्रमाणस्येति*।। *भूतार्थविषयत्वेनेति*।। अयं प्रयोग:-वेदान्तवाक्यं धर्मि, प्रमाणान्तरसाध्यो धर्म:, भूतार्थविषयत्वात्; नदीतीरफलसंबन्धफलवाक्यवत्। नायं हेतुरप्रयोजक इति परिहरति- *न पौरुषेयवचनेति*।। कथं पौरुषेयत्वस्य प्रयोजकत्वम्? न भूतार्थस्येत्याशङ्क्यातिप्रसङ्गदूषणमाह- *भूतार्थत्वप्रयुक्तत्व इति*।। *ननु* पौरुषेयवचनत्वमपि न प्रयोजकम्; व्यभिचारात्, इति चोदयति- *ननु भूतार्थस्मृताविति*।। *ननु* लौकिकवचसां पुरुषजन्यत्वात् कथं प्रमाणान्तरजन्यत्वं संभेदहेतुत्वेनोच्येते? तथा वेदेऽपि स्वार्थप्रवृत्तप्रमाणजन्यत्वं वक्तुं शक्यते, इत्याशङ्क्याह- *पुरुषो हि प्रमाणान्तरेणेति*।। *ननु* भूतार्थस्य प्रमाणान्तरयोग्यत्वं दृष्टम्, प्रमाणान्तरयोग्ये वर्तमान: शब्दस्तदनुसारेण वर्तते, अत: संभिन्नार्थतया सापेक्षत्वम्, अतो न स्वार्थप्रवृत्ते प्रमाणान्तरजन्यत्वमुपाधि:, तस्याप्यनेन हेतुना साधयितुं शक्यत्वात्, अथवा-स्वार्थप्रवृत्तप्रमाणान्तरजन्यत्वं संभेदप्रयोजकं न भवति; प्रमाणान्तरयोग्यत्वे विद्यमाने तज्जन्यत्वाभावेनासंभेदानुपलम्भादित्याशङ्कायामपि सोपाधिक इत्याह- *किञ्च तुच्छव्यावृत्तिमात्रमिति*।। अयं प्रयोग:-कार्यं धर्मि, प्रमाणान्तरयोग्यमिति साध्यो धर्म:; तुच्छव्यावृत्तत्वात्;

नदीतीरफलसंबन्धवत्।। *ननु* नानेन हेतुना योग्यत्वमनुमातुं शक्यते; विधीयमानत्वस्य प्रमाणान्तरयोग्यत्वबाधकत्वादित्याशङ्क्य, व्यभिचारमाह- *लौकिकविधीनामिति*।। कथं लौकिके विधीयमानस्य मानान्तरयोग्यता वक्तुं शक्यते? कार्ये तेषामसामर्थ्यादित्याशङ्क्याह- *अयोग्यत्वे चेति*।। *ननु कार्यस्य साध्यस्वभावत्वादिति*।। न तावत्कार्यं प्रत्यक्षम्; वर्तमानविषयत्वात्प्रत्यक्षस्य, तत्पूर्वकत्वादनुमानादेरपि न गोचरः। न चैवं कार्ये व्युत्पत्त्यभावः; प्रमाणान्तरगम्यत्वाभावेऽपि वेद एव कार्ये व्युत्पत्तिसंभवात् अतो बाधितविषयमनुमानमिति भावः। *ब्रह्मापि तर्हीति*।। अनेन ''भूतत्वादि''ति हेतोर्बाधितविषयत्वमुक्तम्। *ननु* कथं बाधितविषयत्वम्? अनुमानाद्यभावेऽप्यवभासकान्तरस्य विद्यमानत्वादिति चोदयति- *स्वरूपज्ञानमेव प्रमाणान्तरमिति*।। अत्र प्रमाणशब्दोऽवभासाभिप्रायो द्रष्टव्यः। कथं चैतन्यस्य प्रमाणफलता? चिद्रूपस्य वस्तुनोऽविषयत्वात्। न हि विषयस्य फलता। यद्यपि चैतन्यस्यैव केनचिदवच्छेदेन फलत्वम्; तथाऽपि चैतन्यमात्रस्य फलत्वाभावात् तत्संभिन्नतया सापेक्षत्वमित्याशङ्क्याह- *ज्ञानसंभिन्ने वा ब्रह्मणीति*।। कथं विज्ञानात्मकब्रह्मविषयत्वे सापेक्षत्वाभावः, स्वेनैव प्रकाशितस्य विषयत्वादित्याशङ्क्य दृष्टान्तमाह-* पुरुषान्तरसंवेदनेति*।। कथं विधिवाक्येऽनुवादकत्वमापद्येत? मानान्तरयोग्यविषयत्वाभावात्, इत्याशङ्क्याह- *तस्यापि लौकिकस्येति*।। प्रमाणान्तरगृहीतग्राहित्वाभावेपि यदि योग्यत्वमात्रादनुवादकत्वमुच्येत, तर्हि वैपरीत्यमापद्यत इत्याह- *शब्दावगम्यस्य वा प्रमाणान्तरमिति*।। यद्वा भवतु प्रमाणान्तरयोग्यार्थस्यानुवादकत्वम्, किं तेन च्छिन्नम्? इत्याशङ्क्याह- * शब्दावगतस्य वेति*। शब्द एवायं नियम इति निष्प्रमाणकमिति भावः। स्पष्टमपि चोद्यमवतारयति परिहारावतारणाय। ''*यद्यपि शब्दमात्रस्ये'' त्यादिपरिहारोऽसमञ्जस इवाभाति; पूर्वचोद्यस्यापरिहृतत्वादिष्टविघातप्रसंगात्, ' व्युत्पत्त्या तु कथमि'' त्यादिना च व्युत्पत्तिप्रकारान्वेषणं केवलव्युत्पत्तिप्रदर्शनञ्चासङ्गतम्; वस्तु-कीर्तनादित्याशङ्क्यावतारयति- *अत्र पृच्छामः किं प्रमाणान्तरेणेति*।। ''श्रोतृव्यवहारः''इत्यनेन व्युत्पत्तिमूलं प्रदर्शितम्, तदसमञ्जसम्; नहि श्रोतृव्यवहारस्य व्युत्पत्तिहेतुत्वकीर्तनेन ''प्रमाणान्तरगृहीत एव प्रयोगप्रत्ययादि'' ति हेतुः परिहृतः। न च- उत्तरेण तत्र हेतुप्रतिपादनमिति- युक्तम्; श्रोतृप्रमाणसंभिन्नत्वाभावेऽपि वक्तृप्रमाणसंभिन्नत्वस्य बालप्रमाणसंभिन्नत्वस्य वा परिहाराभावात्। अत एव प्रमाणमात्रसंभिन्ने शक्तिरिति पक्षोऽपि नानेन परिहृतः; श्रोतृप्रमाणसंभिन्नत्वाभावस्य प्रमाणान्तरसंभेदाभावसाधकत्वाभावात्, व्यधिकरणता च भवति; प्रमाणान्तरसंभेदेन भवितव्यमिति चोदिते श्रोतृप्रमाणसंभेदनिराकरणादित्याशङ्क्य व्याचष्टे- *अयमर्थः शब्दार्थं प्रतिपाद्यमान इति*। *ननु* शब्दार्थप्रतिपत्तेः प्राग्वक्तृप्रमाणे विद्यमानेऽपि कथं तस्य शक्तिप्रतियोगित्वं प्रतिपाद्यते? नहि विद्यमानत्वमेव शक्तिप्रतियोगित्वकारणम्; अतः केन विशेषेण तस्य पृथङ् निराकरणमिति? तदाह- *प्रमाणान्तरेणोपलभ्येति*।। '' स च श्रोतुरि''ति ग्रन्थे श्रोतुरिति पदस्य ज्ञानपदेनान्वयः

प्रतिभाति-श्रोतुर्ज्ञानान्तरेति, तथा सति परिहारो व्यधिकरणस्स्यात्; वक्तृप्रमाणसंभेदस्य चोदितत्वात्, तस्य चापरिहृतत्वात्, पुनरुक्तता च । अथैवमन्वयः-स च श्रोतुर्व्यवहार इति, तथाऽपि ज्ञानान्तरानिमित्ततेत्यनन्वयः। अथाऽनिमित्तमन्वय इति व्याख्यायेत, हेतोरसिद्धता स्यात्; ज्ञानान्तरनिमित्तत्वं चोद्यसमये दर्शितं यतः, नापि परिशुद्धत्वं निरूपयितुं न शक्यते; अतो नानेन ग्रन्थेन वक्तृप्रमाणसंभिन्ने शक्तिनिराकरणं क्रियते, इत्याशङ्क्य व्याचष्टे-*अयमर्थो व्युत्पत्ता त्विति*।। कथं तर्हि टीकाकारेण ज्ञानान्तरानिमित्ततापरिशुद्ध इति निमित्तत्वमात्रनिराकरणं क्रियते? ज्ञान एव प्रयोगस्योक्तत्वात्, तदभावे प्रयोगस्यैवानु- पपत्तेर्निमित्ताभावादित्याशङ्क्य प्रयोजनान्तरं दर्शयति-* अतः प्रमाणान्तरेण विषयविशेषणत्वेनेति*।। परिशुद्ध इत्यस्य व्याख्या-* केवलार्थेति*।।

अयं प्रयोगः-श्रोता धर्मी प्रवर्तितव्यार्थमात्रज्ञानात्प्रवर्तत इति साध्यो धर्मः; प्रवर्तमानत्वात्; यथा-'अहमि'ति। अतो न ''प्रतिपत्तुरि''त्यनेन ग्रन्थेन ज्ञानान्तरसिद्धावबोधकत्वज्ञानं व्युत्पत्तिसमये नास्तीत्युक्तम्, तदयुक्तम्; वक्ता प्रतिपन्न इति ज्ञातत्वात् तस्यैव प्रतिपादनात्। अप्रस्तुतञ्चैतत्; विशिष्टे शक्तिनिराकरणस्य प्रस्तुतत्वात्। व्यधिकरणश्चात इति हेतुः। नहि केवलार्थजन्यव्यवहारस्य सामर्थ्यावगमहेतुत्वं ज्ञानान्तरसिद्धावबोधकत्वं निरुणद्धि, तेनासमञ्जस इत्याशङ्क्यावतारयति-*ततः शब्दस्यार्थमात्रज्ञान इति*।। ज्ञाने सतीत्यर्थः। यद्वाऽर्थमात्रज्ञाने सामर्थ्यप्रतिपत्तेस्तदुत्पादकत्वमित्यर्थः। अतो व्याख्या कृता। यद्वा-''स च श्रोतुरि'' त्यनेन ग्रन्थेन पुनरुक्त इवाभाति; तत्र प्रमाणसंभिन्ने वस्तुनि शाब्दप्रतिपत्तिर्न भवतीत्युक्तम्-''अतः'' इति, अनेनापि प्रमाणसंभिन्नार्थबोधकज्ञानं नास्तीत्युक्तत्वादित्याशङ्क्यावतारयति-*ततः शब्दस्यार्थमात्रज्ञान इति*।। '' तेनानवगम्ये'' ति ग्रन्थः पुनरुक्त इवाभाति, पूर्वत्रापि ज्ञानान्तरसंभिन्नत्वज्ञानेन विनाऽर्थमात्रे व्युत्पत्तिरित्युक्तम्; अनेनापि ग्रन्थेन तद्विषयज्ञानावगमेन विनाऽव्युत्पत्तेरुक्तत्वादित्याशङ्क्य विषयभेदं दर्शयति-*ननु मा भूच्छ्रोतुरिति*।। *संभिन्नेऽर्थ इति*।। संभेदस्याव्यभिचारे स्थिते सोऽपि शब्दार्थ इति भावः।'' तेनानवगम्ये''त्यनेन कथं विशिष्टे शक्तिनिराकरणं कृतम्। नहि तद्विषयज्ञानेन विनैव सामर्थ्यमवगन्तव्यमित्यत्र कश्चिद्धेतुरस्ति। न च ''तेनानवगम्ये''त्यत्रानवगतत्वं हेतुत्वेन विवक्षितम्; असिद्धत्वप्रसङ्गाच्छब्दप्रयोगसामर्थ्यात्, तद्विषयज्ञानस्य निश्चितत्वादित्याशङ्क्य व्याचष्टे-* प्रवृत्तिहेतुज्ञानविषयतयेति*।।

ननु अर्थमात्रे संबन्धग्रहणमिति वक्तुं न शक्यते; संबन्धस्यैवाभावादिति चोदयति-*अत्र केचिदाहुरिति*।। कथमर्थासंस्पर्शिता शब्दस्य निश्चीयते? शब्दादर्थाप्रतिपत्तिदर्शनात्, असंसृष्टत्वे तद्बोधकत्वायोगादित्याशङ्क्योपपादयति-* तथा ह्यङ्गुल्यग्र इति*।। एतदुक्तं भवति= ''अंङ्गुल्यग्रादिवाक्ये स्वसामर्थ्येनार्थं तिरस्कृत्य बोधकत्वं दृष्ट्वाऽर्थासंस्पर्शित्वान्निश्चीयते, तत्सामान्यादितरवाक्येष्वप्ययथार्थबोधकत्वमर्थासंस्पर्शश्च निश्चीयत इति।।*ननु* चक्षुरादीनामयथार्थबोधकत्वं दृष्टम्,

नत्वर्थासंस्पर्शिता, अतो यथार्थबोधकत्वमनैकान्तिकम्, *मैवम्*; नेन्द्रियाणां विपर्ययज्ञानहेतुत्वम्, किन्तु दोषस्यैव; तदभावे सत्यपीन्द्रिये भ्रान्तिज्ञानाभावात्। *ननु* शब्देऽप्यनाप्तप्रणीतत्व-दोषादप्रमाणज्ञानस्योत्पत्तिः; न शब्दमात्रात्, *मैवम्*; अनाप्तप्रणीतेऽप्यङ्गुल्यग्रवाक्ये बोधदर्शनात्। *ननु* ईदृशवाक्यं कथमाप्तप्रणीतं भवितुमर्हति? तेन दोषस्यैव कारणत्वमिति वक्तुं युक्तम् *मैवम्*; यदीदृशं वाक्यमाप्तो न प्रयुञ्जीत, तर्हि दोषजन्यत्वं ज्ञानस्य निश्चेतुं न शक्यते; प्रयुक्ते शब्दे दोषाभावेन ज्ञानानुत्पादादर्शनात्, व्यतिरेकाभावाच्छब्दे हेतुत्वं निश्चेतुं शक्यम्; सत्यपि दोषे शब्दप्रयोगाभावे ज्ञानानुत्पादात्। अपि चाप्तप्रयोगोऽपि दृश्यते नेदृशं वचः प्रयोक्तव्यम्, यथा लोके ह्यङ्गुल्यादिवाक्यं दृश्यते।

बहूनि स्वार्थहीनानि गन्धमादनवर्णने। रचितानि स्वबुद्ध्याऽतः कविभिर्दृश्यते मतिः।

"तेन शब्देऽस्य सर्वत्र हेतुता भ्रान्तिबोधने।" इति॥

अपि च बाधकज्ञानजननेऽपि शब्दो मिथ्याज्ञानमुत्पादयति, नतु चक्षुरादिवदुदास्ते, तेनार्थसंस्पर्शी शब्दः। तदुक्तम्–"विकल्पयोनयः शब्दा विकल्पाश्चार्थयोनयः। तेषामन्योन्यसंबन्धान्नार्थाच्छब्दाः स्पृशन्त्यमी॥" इति।

ननु शब्दादर्थप्रमितिरपि दृश्यते, तत् कथमर्थासंस्पर्शोऽनुमीयते? बाधितविषयत्वप्रसङ्गादित्याशङ्क्याह– *यत्र च प्रमीयत इति*॥ * अत्र केचित्परिहारमाचक्षत इति*॥ अयमभिप्रायः– संबन्धे सत्यन्यस्यान्यत्र प्रामाण्यं भवेत्, न चात्र शब्दस्यार्थेन संबन्धः स्वभावलक्षणः कार्यलक्षणो देशादिनियमो वाऽस्ति; वक्तृज्ञानेन तु कार्य – कारणलक्षणस्संबन्धोऽस्ति, तेन तत्र प्रामाण्यमिति। *ननु* शब्दस्य कथं कार्यतोच्यते? प्रत्यक्षादिनाऽर्थं प्रतिपद्य विवक्षित्वा वक्ता पदरचनां करोति, तेन च प्रत्येति श्रोता, एवं परम्परया वक्तृज्ञानकार्यत्वं पदरचनात्मकस्य वाक्यस्य दृश्यते, तेन तत्र प्रामाण्यम्। *ननु* शब्दादर्थप्रतीतिरपि दृश्यते, तत्कथं वक्तृज्ञान एव प्रामाण्यम्? *उच्यते*; यद्यप्यर्थः प्रतीयते, तथापि वक्तृज्ञान एव प्रामाण्यं नार्थे; तन्नियमस्य तदधीनत्वात्। किञ्च लोके व्यवहारसामर्थ्यादपि वक्तृज्ञान एव प्रामाण्यं प्रतीयते। तथाहि कश्चिदेवमाह– कथमयमर्थोऽवधारित इति? सोऽपि प्रतिवदति– स एव जानाति, येन मे कथितमिति। अतो ज्ञानादेवार्थो निश्चीयते, तेन सर्वत्र तत्परता। *ननु* भवतु वक्तृज्ञाने प्रामाण्यम्, अर्थेऽपि प्रतीयमाने कथं परित्यज्यते प्रामाण्यम्? तेन तद्द्वारेणाऽपि प्रामाण्यम्, *मैवम्*; वक्तृज्ञानेन व्यवहितेऽर्थबोधोदासीन एव शब्दो न बाह्येऽर्थे प्रामाण्यं भजते। यदि वक्तृज्ञाने प्रामाण्यं शब्दस्य, कथं तर्हि बाह्यार्थत्वम्? तथा तद्धेतुकश्च व्यवहारः? इत्याशङ्क्याह– * प्रतीयमाने वक्तृज्ञानसामर्थ्यादिति*॥

ननु वाक्यात्प्रथमे वार्थे प्रतिपन्ने पश्चात्तदर्थविषयवक्तृज्ञानप्रतीतिः, तत्कथं ज्ञानेनान्तरितत्वम्? तत्रैव वा प्रामाण्यं चेति? *उच्यते* यद्यप्यर्थः पूर्वं प्रतीयते; तथाऽपि तन्निश्चयो वक्तृज्ञानप्रामाण्यप्रतीतिपूर्वक

एव। अतोऽर्थनिश्चयस्य ज्ञाननिश्चयपूर्वकत्वाद ज्ञानान्तरितत्वम्, तेन चार्थनिश्चयसिद्धेर्नार्थेऽपि प्रामाण्यमिति। *ननु* यथार्थव्यभिचारान्नार्थपरत्वं शब्दस्य; वक्तृज्ञानेनापि व्यभिचारान्न तत्परत्वं शब्दस्य संभवतीत्याशङ्क्याह- * भ्रान्तिमुत्प्रेक्षां प्रमाणं वेति *।। *ननु* ''तयोस्सत्तां प्रतिपद्यते'' इति न युक्तं वक्तुम्; प्रतीत्यङ्गीकारे पारिशेष्यात्तेनैव संबन्धाच्छाब्दत्वप्रसङ्गात्। अथवा-वक्तृज्ञानेन बोधकत्वं शब्दस्याङ्गीकार्यम्; तेन विनाऽर्थनिश्चयायोगात्, तदङ्गीकारे च नार्थपरत्वकल्पना, एवं शब्दमेयत्वे निश्चिते नानुमेयत्वकल्पना, नापि लिङ्गमस्तीत्याशङ्क्य व्याचष्टे- *अयमर्थो गृहीतसंबन्धोऽपीति *। यद्वा-अनुमेयत्वं वक्तुं न शक्यते; अर्थेनैव शब्दस्य संबन्धग्रहणे तदनुमाने लिङ्गाभावात्, प्रयोजनाभावाच्चेत्याशङ्क्य व्याचष्टे- * अयमर्थो गृहीतसंबन्धोऽपीति *।। सत्ताऽनुमानमिति वक्तुं न शक्यते; भावधर्मस्याभावधर्मस्योभयधर्मस्य वा हेतुत्वेऽसिद्ध्यादिदोषप्रसङ्ग इति न्यायविद आहु:; अनुपयोगाच्च न सत्तामात्रानुमानसंभव इत्याशङ्क्य व्याचष्टे- * शब्दप्रयोगनिमित्ततामिति *।। ''तस्माच्च शब्दस्ये''त्यादे: पौनरुक्त्यं परिहरति- *प्रकरणार्थ-मनूद्येति *।। *ननु* लौकिकवचांसि नैव वक्तृज्ञानानपेक्षाण्यर्थनिश्चायकानि, किन्तु वक्तृज्ञानद्वारेण; ततश्च तस्यैव शब्दार्थत्वम्, अर्थस्य तु वक्तृज्ञानाधीना सिद्धि:, अतो न प्रयोगमात्रनिमित्तत्वमित्याशङ्क्याह- *किञ्च यदि लौकिकवचांसीति *।। *ननु* पौरुषेयवचनत्वप्रयुक्तं वक्तृज्ञानप्रतिपादकत्वम्, न च वेदे तदस्ति, न च संसृष्टार्थप्रतिपादनसामर्थ्यभावेन, अतो वेदे संसृष्टार्थप्रतिपादनसामर्थ्याभाव:; लोकेऽपि पदानां संसृष्टार्थप्रतिपादनसामर्थ्याविशेषात्, निश्चयस्तु तैर्न संभवतीति वक्तृज्ञानप्रतिपादकत्वम्, अतो न दोष इति, तत्राह- *किञ्च न तावद्वक्तृज्ञानमात्रमिति *।।

यद्वा- लौकिकवचसां नार्थसंसर्ग: प्रमेय:, किन्तु वक्तृज्ञानं प्रमेयम्, तेन विनाऽर्थनिश्चयाभावाद्बाह्यार्थव्यभिचारात्, लोकेऽप्यर्थतथात्वे वक्तृज्ञानस्यैव निर्देशदर्शनात्, अतो न व्युत्पत्तिसमयेऽवगतं वक्तृज्ञानपरत्वम्, उत्तरकालीनस्वप्रवृत्त्या प्रयोगमात्रनिमित्ततानुमानम्? स्वस्यापि स्वज्ञानख्यापनाय वाक्यप्रयोगादित्याशङ्क्याह- *किञ्च यदि लौकिकवचांसि वक्तृज्ञानमिति *।।

ननु लोकेऽपि पदानां संसृष्टार्थप्रतिपादनशक्तिरस्त्येव; तथाऽपि पौरुषेयवाक्यान्नार्थप्रमिति:; वक्तृप्रमाणाभावे तदभावात्, वेदे तु कथं संसर्गप्रमित्यभाव:? अपौरुषेयत्वेन वक्तृज्ञानापेक्षाभावात्, सामर्थ्यस्य च विद्यमानत्वात्। अतो लोके वक्तृज्ञानपरतेति चेत्, *तत्राऽपि* किं ज्ञानमात्रे प्रामाण्यम्? अर्थव्यावृत्तौ वा? न तावत्प्रथम: कल्प इत्याह- * किञ्च न तावद्वक्तृज्ञानमात्रमिति *।। नापि द्वितीय इत्याह-नाप्यर्थव्यावृत्तमिति *।। 'नागृहीतविशेषण' न्यायेनार्थप्रतीतौ तद्व्यावृत्तज्ञानाप्रतीतेरर्थस्यैव शब्दार्थत्वमिति भाव:। *ननु* विशेषणग्रहणेन विना विशेष्यप्रतीत्यभावेन तस्य शब्दार्थत्वनिश्चयेऽपि कथं तस्यैव शब्दार्थत्वनिश्चय: ? ज्ञानस्यापि प्रतीतेरविशेषाच्छब्दार्थत्वमिति, तत्राह- *ज्ञानस्यानुमेयतयेति *।। अनन्यथासिद्धकार्यदर्शनाच्छाब्दत्वम्, नेह तथेति भाव:। *ननु* शब्दानन्तर्येण शाब्दत्वे संभवति सति

कथमनुमेयत्वम्? इत्याशङ्क्याह- *ज्ञानाभिधायिशब्देति*।। मा भूत्तदभिधायिपदम्, तथाऽपि पदेभ्यः प्रतीयमानस्य वाक्यार्थत्वमित्याशङ्क्याह- * पदार्थस्यैवेति *।। अनन्वितपदार्थकत्वं धावतीत्यत्र पदस्यापि वाक्यार्थत्वञ्च भवेदित्यर्थः। कथमत्र संसर्गस्य विशेषणत्वेनादौ गृहीतत्वम्, तेन च शाब्दत्वं तस्यैव निर्णीयत इति शक्यते वक्तुम्? तस्याप्यन्यथासिद्धेरिति चोदयति- *ननु पदेभ्यः पदार्था इति*।। संसर्गश्चोत्प्रेक्षयेति*।। संभूय समुच्चरितपदार्थानां नूनं संसर्गेण भवितव्यमिति प्रतीतिर्भवति। स एव व्यावर्तको नार्थमात्रम्, येन नागृहीतविशेषणन्यायेनार्थस्य शब्दार्थत्वं भवेत्, प्रमित्यर्थञ्च वाक्यप्रयोगः, तत्रापि नार्थप्रमितिस्संभवति, अतो वाक्यवैयर्थ्यपरिहाराय वक्तृज्ञानपरत्वं निश्चीयत इति भावः। '' *तदिदं श्रोतुरि''ति *।। न स्मृतिः; अनधिगतार्थगन्तृत्वात्, संस्कारजन्यत्वाभावात्। कोटिद्वयावलम्बित्वाभावाद् न संशयः, बाधकाभावाद् न विपर्ययः। तेन प्रमाणत्वे सिद्धेऽक्षादिकारणान्तराभावात्पारिशेष्याच्छाब्दज्ञानमेव भवेत्, तथा सति वक्तृज्ञानस्य न शब्दमेयता, अर्थ एव शब्दस्य चरितार्थत्वादिति भावः।।

ननु संसर्गे प्रमितिः कथं निश्चीयते? वाक्यं तावद्वक्तृज्ञानपरमेव; वक्तृविवक्षाज्ञानानिश्चयेऽर्थनिश्चयादर्शनात्, पदानि च पदार्थमात्रोपक्षीणानि न संसर्गं बोधयन्ति, अत औत्प्रेक्षिकत्वेन न प्रमारूपत्वमित्याशङ्क्यातिप्रसङ्गमाह - *शब्दानाञ्च पदार्थज्ञानोपक्षयादिति *।। वेदे संसर्गप्रमितिमिच्छता लोके संसर्गबोधकत्वमङ्गीकर्तव्यमित्युपसंहरति- *तस्मादिति*।। शब्दानन्तर्याच्छाब्दत्वम्, कारणदोष-बाधकप्रत्ययाभावात्प्रमाणत्वम्, वक्तृज्ञानापेक्षे तु पौरुषेयत्वेनाप्रामाण्यशङ्का भवेत्, स स्मृत्यादिवन्मूलज्ञानेन निवार्यत इति। कथं तर्हि वक्तृज्ञानप्रतीतिरिति? तदाह-* वक्तृज्ञानमिति*।। यदि वक्तृज्ञानपरत्वं निराक्रियते, तर्ह्यर्थस्य व्यभिचारित्वेन संबन्धाभावाद् नार्थासंस्पर्शः परिहर्तुं शक्यत इत्यभिप्रायेण पृच्छति- *कस्तर्ह्यर्थासंस्पर्शस्येति*।। यदि क्वचिद् व्यभिचारादन्यत्राप्यर्थासंस्पर्शोऽनुमीयेत, इष्टविघातलक्षणविरुद्धता स्यादित्यभिप्रायेण प्रतिबन्द्या परिहरति-प्रत्यक्षेऽपीति*।। *ननु* शुक्तिकाविज्ञाननिदर्शनेन न घटादिज्ञानानामर्थसंस्पर्शित्वमनुमातुं शक्यते; अप्रयोजकत्वादिति चोदयति- * अदुष्टकारणजन्यज्ञानानामिति*।। ''न तत्साधूक्तमि''त्यादिना दोषजन्यस्य बाध्यत्वमुक्तम्, तदयुक्तम्; प्रत्यक्षस्य प्राबल्येन शब्दबाधकत्वात्, बाधाधीनत्वाद् दोषकल्पनाया न तेन बाधनिश्चय इत्याशङ्क्य व्याचष्टे- *परिहारग्रन्थस्यायमर्थ इति*।। कथं द्वैताभावस्यैव मिथ्यात्वम्? न त्वात्मप्रतीतेरिति निश्चयः? तत्राह- *शब्दस्य स्वयं दोषेति*।। *ननु* संभावितत्वमात्रेण न चक्षुरादिषु दोषसिद्धिः, प्रमाणायत्तत्वादित्याशङ्क्याह-- *इन्द्रो मायाभिरितीति*।।

ननु दोषजन्यत्वे सति द्वैतावभासस्य प्रामाण्याभावाद् व्यवहार एव न स्यादित्याशङ्क्याह- *स्वप्नवद्दोषजन्यत्वेऽपीति*।। *ननु* तर्हि शब्देऽपि दोषः कल्प्यताम्, प्रामाण्यञ्च द्वैतावभासवत्, किं दोषत्वनिराकरणेन? इत्याशङ्क्याह- *शब्दे तु पुनर्दोषकल्पनायामिति*। *ननु*

द्वैतावभासो धर्मी, व्यवहारविसंवादीति साध्यो धर्मः, दोषजन्यत्वात्; शुक्तिरजतज्ञानवदित्यनुमातुं शक्येतेत्याशङ्क्याह– *नच द्वैतावभासस्येति*।। मा भूत्प्रत्यक्षबाधादनुमानम्, आगमेन बाधो निश्चीयते, इत्याशङ्क्याह– * आगमेन द्वैतस्य तत्त्वांशेति*।। *ननु* विशेषेण बाधप्रतीतौ। कथमतत्त्वांशविषयत्वं कल्प्यत इति? तत्राह– * अद्वितीयात्मप्रतिपत्तेश्चेति*।।

ननु प्रत्यक्षत्वमात्रेण प्राबल्येन नित्यं शब्दस्य बाध्यत्वे संभवति सति, किमिति देहात्मप्रत्ययस्य बाध्यत्वं निश्चीयते? इत्याशङ्क्याह– *अन्यथा देहात्मभावस्येति।।

न च संवादलक्षणमिति*।। प्रामाण्यस्वरूपं कथम्? अप्रस्तुतम्; प्रसङ्गाभावात; पुनरुक्तञ्च; पूर्वमप्युक्तत्वादित्याशङ्क्य, पूर्ववादिनाऽपि निष्फलत्वमप्रामाण्यहेतुत्वेनोक्तम्, तद्विकल्प्य निराक्रियत इति दर्शयति– *अपिच भूतार्थनिष्ठत्वादिति*।। कथं बोधलक्षणत्वं प्रामाण्यस्य? बोधरूपत्वस्यातिव्यापकत्वादित्याशङ्क्य व्याचष्टे– *अज्ञतार्थावगम एवेति*।। ''उच्यते पुरुषः'' इत्यादिना पुरुषेच्छाविषयनिरूपणं न प्रस्तुतम्; प्रवृत्तिनिवृत्तिसाध्यप्रयोजनाभावे सिद्धेऽर्थे प्रामाण्यं न संभवतीति चोद्यस्यापरिहारादित्याशङ्क्य समुदायमवतारयति *उच्यत इत्यादिरिति*।। ''पुरुषो ह्येतावदि'' त्यादेरिच्छास्वरूपकथनस्यासङ्गतिं परिहरति– * इदं निरूपणीयमिति।। *ननु* अनेन साधनेनेदं फलं भवतु, एतत्फलसाधनं वा मम संपाद्यतामिति साधनेऽपि प्रार्थना दृश्यते, अतः कथमुक्तम्–''न त्वित्थमन्यथा वा? इत्याशङ्क्य व्याचष्टे– *फलमेव हीति*।। पूर्वं प्रत्यक्षादीनामनधिगतार्थगन्तृत्वेन प्रामाण्यम्, शब्दे तु प्रवृत्त्यादिसाध्यफलपर्यन्त एव व्यापारः, तदभावे न प्रामाण्यमिति चोद्ये कृते प्रयोजनपर्यन्तत्वमङ्गीकृत्य परिहृतम्, इदानीं शब्देऽपि न प्रवृत्तिपर्यन्तता प्रामाण्यस्येति दर्शयति– * किञ्च शब्दस्य प्रामाण्यमिति*।। *ननु* निष्प्रयोजनत्वेऽध्ययनविध्युपात्तत्वायोगाद् बोधमात्रस्याप्रयोजनत्वात्प्रवृत्तिपर्यन्ततेति नेत्याह– *न च प्रवृत्ति-निवृत्तीति*।। *ननु* अभिलषितसाधनत्वाद्यनुसन्धानव्यवधानेऽपि प्रवृत्ति-निवृत्त्योरपेक्षितत्वात्पुरुषार्थतेति, नेत्याह– * न च ते पुरुषार्थतयेति*।। *ननु* सुखावाप्ति-दुःखपरिहारयोः फलत्वेऽपि तत्साधनत्वेन प्रवृत्ति-निवृत्त्योराकाङ्क्षितत्वात्तत्परतेत्याशङ्क्य बाधकं दर्शयति– * ततश्च नित्य- नैमित्तिकेति*।। यद्वा- भवतु सुखावाप्ति- दुःखपरिहारफलत्वम्, ततः किमिति? तदाह– * ततश्च नित्य - नैमित्तिकेति*। *तदकरणे प्रत्यवायपरिहार इति*।। तेषां वाक्यानां कर्मणां वा योग्यमकरणे प्रत्यवायः; तत्परिहारः प्रयोजनमित्यर्थः। *प्रत्यवायस्यापि तन्निबन्धनत्वादिति*।। अयमर्थः–प्रत्यवायस्यास्तित्वं विधित्वेन प्रामाण्ये सिद्धे, तदस्तित्वे च विधित्वसिद्धिरस्तीतीतरेतराश्रयत्वम्, अथवा प्रत्यवायस्य दुरितस्य योऽयं परिहारः, तन्निबन्धो दुःखसाधनत्वनिबन्धः, न साक्षात् तच्च दुःखं तत्करणेऽप्यविशिष्टम्; अतो न सप्रयोजनत्वम्।। यद्वा–प्रत्यवायस्यापि दुःखस्य तन्निबन्धनत्वादनुष्ठानदुःखस्याप्यनुष्ठानहेतुत्वात्तत्परिहारवत् तेन न तस्य प्रयोजनत्वम्, यद्वा प्रत्यवायस्य

दुरितस्यापि पुण्यवत् तन्निबन्धनत्वादनुष्ठाननिबन्धनत्वान्नाकरण- निबन्धनत्वम्, ''कथमसतः सज्जायेत'' '' नासतो विद्यते'' इति दर्शनात्। केचित् प्रत्यवायस्याप्यतन्निबन्धनत्वादकरणनिबन्धनत्वादिति–व्याचक्षते।। सर्वथा नित्य-नैमित्तिकानां निष्प्रयोजनत्वेन तद्वाक्यानां प्रामाण्यमिति।।

इति स्वामीन्द्रपूर्णपूज्यपादशिष्य-सर्वशास्त्रविशारदजनार्दनात्मज-स्र्वज्ञविष्णुभट्टोपाध्यायकृतौ ऋजुविवरणे वेदान्तानां ब्रह्मणि समन्वय-निरूपणं नामाष्टमं वर्णकं समाप्तम्।।

"अत्रापरे" इत्याक्षेपो नोदेति, परिहृतत्वात्, पूर्ववर्णकेऽपि प्रवृत्ति- निवृत्तिसाध्यप्रयोजनोद्देशेन शब्दप्रयोगो दृष्टः, वेदेऽपि तथाविधप्रयोजनाभावे सिद्धे वस्तुनि न प्रामाण्यम्, अध्ययनविध्युपात्तत्वाच्च वेदस्य। तस्य च निष्प्रयोजनत्वेनाक्षरग्राहकत्वाभावात्, प्रयोजनस्य च प्रवृत्ति-निवृत्तिसाध्यत्वात्, तयोश्च विध्यायत्तत्वात् केवलस्वरूपे प्रामाण्यं नास्तीत्याक्षिप्य समर्थनं कृतम्, अत्रापि स एवाक्षेपः। न च सिद्धे वस्तुनि सामर्थ्याभावेनाक्षेपाद्भेदः; पूर्वत्रापि तस्याविशेषात् तस्येहानुक्तत्वाच्च। न च लोकेऽपि सिद्धवस्तुप्रतिपादनादर्शनाद् वेदेऽपि न संभवतीत्याक्षेपाद् भेदः; पूर्वमपि तस्यैवाक्षेपहेतुत्वात्, न चान्यदाक्षेपबीजं प्रागनुक्तमिहोक्तं दृश्यते, परिहारश्च। उपक्रमेऽपि वर्णकस्यास्य कारणं नोपलभ्यते; अतो नारम्भणीयं वर्णकान्तरमित्याशङ्क्य विषयभेदं दर्शयति– *लोके पदानामिति*।। प्रामाण्यस्यैवाक्षेपः पूर्ववर्णके, तदङ्गीकृत्याक्षेपात्क्रम इत्युक्तम्। हेतुः "पुरुषेच्छासमुत्थापितो ही"त्यादिना कीर्तितः। "अयथा शब्दप्रयोगानुपपत्तेरि"त्ययुक्तम्; नह्ययं ग्रन्थो वेदविषयः, तस्य लोकव्युत्पत्त्यनुसारित्वात् कथं विधिसंस्पर्शो निश्चीयते? "पुरुषेच्छासमुत्थापितो ही"त्यादिरपि विरुध्यते; अपौरुषेयत्वेन पुरुषेच्छानिबन्धनत्वाभावात्, नापि लौकिकप्रयोगविषयः; तस्य प्रयोगप्रत्ययदर्शनात्, तदधीनत्वादृ व्युत्पत्तेर्व्युत्पत्त्यधीनत्वादुत्तरप्रयोगस्येति परिहृतत्वात्, शक्तितात्पर्यज्ञानं यत्र शब्दस्य भवति, तत्र प्रामाण्यम्, तदभावे च प्रयोगानुपपत्तिः। न च तदप्यस्ति; अतो नानुपपत्तिरित्याशङ्क्य, प्रयोगप्रत्ययव्युत्पत्तिश्रोतुःसामर्थ्यादेवानुपपत्तिर्निश्चीयत इत्यभिप्रायमाह– *अयं भावः साध्यमेवेति*।। यद्यपि प्रयोगः प्रवर्तकविषयः, प्रतिपत्तिरपि तथेति कथं निश्चीयत इत्याह– *ततः प्रवर्तकनिष्ठमिति*।।

ननु प्रवर्तकज्ञानजननेऽपि तन्निष्ठत्वेनैव व्युत्पत्तिरिति कथं निश्चीयते? शक्तिविषयादन्यत्रापि बोधजनकत्वदर्शनादित्याशङ्क्याह– *प्रवर्तकज्ञानेन शब्दसमनन्तरेति*।। *ननु* प्रवर्तके व्युत्पत्तावपि न कार्यनिष्ठता निश्चेतुं शक्यते; प्रवर्तक एव बहुधा वादिविवाददर्शनात्–केचिद्भावार्थ एव प्रवर्तक इत्याहुः, अपरे फलं साधनज्ञानं वा, अन्ये रागम्, अन्ये प्रत्यक्षादिव्यवहारे यत्र यस्य प्रवर्तकत्वं दृश्यते, तत्र तस्य प्रवर्तकता, शब्दव्यवहारे तु लिङ्गादय एव प्रवर्तका इत्याहुः, इतरे शब्दव्यापारमेवाभिधेयानभिधेयत्वविभागेन प्रवर्तकत्वेन प्रतिपन्नाः, अतः कार्यनिष्ठता कथं निश्चीयत इति? तत्राह– *तच्च प्रवर्तकं प्रत्यक्षादीति*।। न

तावच्छब्द-तद्व्यापारयोः प्रवर्तकत्वम्; प्रत्यक्षादिव्यवहारेऽदर्शनात्। प्रेक्षापूर्वकारिणो हि स्वव्यापारे यस्य प्रवर्तकत्वं दृष्टम्, तस्यैवान्यत्र कल्पयति। न च शब्दे तदस्ति; अव्युत्पन्नानामपि प्रवृत्तिप्रसङ्गात्।

"प्रवर्तकं यद् व्यवहारकाले बालस्य पूर्वं तदिहापि कल्प्यम्।
कार्येतरन्नैव तदस्ति दृष्टं शब्देऽपि तेनेदमवेहि हेतुम्।।"

तेन कार्यं व्यवहारहेतुः। पक्षान्तरेषु चायं दोषः समानः। दोषान्तरं व्यक्तत्वाद् नेह कीर्तितं विस्तरभयात्। *ननु* तर्हि सर्वपदानां कार्यमात्रे शक्तिप्रतिपत्तेः पदान्तरप्रयोगः पर्यायतया न स्यात्, न च प्रातिस्विकपदार्थे प्रथमं शक्तिज्ञानकारणमस्ति। न च प्रथमं कार्ये गृहीतशक्तीनां पश्चात्स्वार्थे शक्तिग्रहणं युक्तम्; प्रथमप्रतिपत्तिविरोधादित्याशङ्क्याह– *तत्र कार्यसंसृष्टेषु पदार्थेष्विति*।। यदि प्रथमं पदसमुदायस्य शक्तिः कल्पिता स्यात्; प्रतिपदमर्थभेदो न स्यात्; समुदायस्यैव शक्तिप्रतिपत्तेः, तद्धानस्य चायुक्तत्वादित्याशङ्क्याह– *पुनः प्रयोगान्तरेष्विति*।।

ननु आवापोद्धाराभ्यामेकैकस्य पदस्य पश्चात्सामर्थ्यं कल्प्यते यदि, तर्हि सर्वपदानां पदार्थमात्रे शक्तिस्स्यात्, न कार्यान्विते; अन्वय-व्यतिरेकाविशेषाल्लाघवादित्याशङ्क्याह– *प्रथमप्रयोगे कार्यसंसृष्टेति*।। पदसमुदायाभावान्न तस्य शक्तिः; अन्वय-व्यतिरेकाभ्यामवयवार्थदर्शनाद् भेददर्शनाच्च नास्य शक्तिः, किन्तु पदानामेव; प्रथमप्रयोगेऽपि सर्वेषां पदानां शक्तिरिति कल्पनया समुदायस्येत्युक्तम्, नतु व्यतिरिक्तसमुदायाभिप्रायेण; कार्यान्वितत्वस्य प्रथमप्रतिपत्तेरव्यभिचारात् तत्स्वीकारे बाधकाभावाच्च तदन्विते शक्तिरिति भावः। *विशेषणायोगादिति*।। अयमर्थः–लाघवात्प्रयोजकस्य केवलत्वमङ्गीकर्तुं युक्तम् ; केवलव्यभिचारे हि विशेषणापेक्षायां विशिष्टस्य प्रयोजकता, तदभावे न विशेषणत्वमिति भावः। *ननु* संसृष्टपदार्थहानेन पदार्थमात्रे शक्तिसंभवेऽप्यव्यभिचारात्संसृष्टत्वस्वीकारः, तथा कार्यसंसृष्टेऽपि शक्तिः कल्प्येत, व्यभिचारादित्याशङ्क्याह– *अन्यथा प्रमाणान्तरगृहीतेति*।।

ननु अनियतस्य न प्रयोजकत्वं युक्तम् ; नियतप्रयोजकसद्भावे। न च कार्यसंसृष्टत्वमव्यभिचारि; कार्यपदे व्यभिचारात्, अन्यान्वितं त्वव्यभिचारात्प्रयोजकमिति चोदयति– *ननु कार्यसंसृष्ट इत्युक्त इति*।। यद्यर्थप्रतिपत्तिः संबन्धग्रहणाधीना, कथं तर्ह्यतीतादिविषयवाक्यादर्थप्रतिपत्तिः? अतोऽन्यान्विते शक्तिग्रहणमित्याशङ्क्याह– *अतीतादिवाक्यानामिति*।। कार्यान्विते शक्तिः पूर्वप्रमिता, नोत्तरकालीनतदधीनकारणेन बाधितुं शक्तेत्यर्थः। "पुरुषेच्छासमुत्थापितो ही"ति पुनरुक्त इवाभाति; पूर्वग्रन्थेऽपि साध्यप्रयोजनमुद्दिश्य प्रवर्तकज्ञानाय शब्दप्रयोगात्कार्यनिष्ठतेत्युक्तम्, उत्तरग्रन्थेऽपि साध्यप्रयोजनस्य प्रवृत्त्यादिसाध्यत्वात् प्रवर्तकनिष्ठत्वमित्युक्तत्वात्, यद्वा "पुरुषेच्छासमुत्थापितो ही"तिहिशब्दप्रयोगात्पूर्वग्रन्थविवरणमिव प्रतिभाति, तथा सति विरोधः; पूर्वं प्रवर्तकज्ञानाय शब्दप्रयोगात्

प्रवर्तकस्य कार्यत्वात्तन्निष्ठतेत्युक्तम्, इह तु साध्यत्वात्प्रयोजनस्य नियोगेन विना तत्सिध्यनुपपत्तेस्तन्निष्ठयुक्तत्वादित्याशङ्क्य विषयभेदं दर्शयति- *अपिच प्रवृत्ति-निवृत्तिसाध्येति*।। तथाऽपीति टीकाग्रन्थेनेदमुक्तम्-यद्यपि सूत्रकारेण सिद्धब्रह्मजिज्ञासाप्रतिज्ञा कृता:; तथाऽपि ब्रह्मणो विधिभिपेक्षित्वात्तच्छेषभूतस्यैव प्रतिपादनमिति, तन्न युज्यते; विध्यनपेक्षितत्वेन चोद्याभावात्तत्प्रदर्शन-स्यासङ्गतत्वात् व्यधिकरणं च; न ह्यन्यानपेक्षितत्वं प्राधान्येन जिज्ञासाप्रतिज्ञाविरोधं परिहर्तुमलम्। यद्विरोधेन च चोद्यं कृतम्, तत्परिहाराभावादयुक्तम्, इत्याशङ्क्य पूरयति- *तथाऽपि प्रतिपत्त्यादीति*।। केवलसिद्धप्रतिपादनासंभवं कारणमुक्तमेव पूर्वम्,-तदन्विते शक्तिज्ञानम्, अतो न हेतूपन्यासोऽत्र कृत:।

"यद्बोधकत्वं द्विविधं प्रसिद्धं तन्नेह जात्यादिविशेषहीने।

ज्ञाता हि कार्यान्वितशक्तिरेषा तदन्वयो ब्रह्मणि नैव युक्त:।।

कारकादिविशेषाणां कार्येणान्वय इष्यते। तथैवाऽन्वय इष्टश्चेत् सविशेषं प्रसज्यते।।"

"अत्रोच्यते" इत्यादिटीकाग्रन्थे विधेयस्वरूपनिराकरणं कृतम्, तदयुक्तम्; कार्यान्विते व्युत्पत्तिसामर्थ्यात्साध्यप्रयोजनसामर्थ्यात्कार्यान्वित एव प्रामाण्यमिति चोदिते कार्ये व्युत्पत्तिस्तत्साध्यत्वं वा प्रयोजनस्य निराकरणीयम्, नान्यत्; तदसङ्गतत्वादित्याशङ्क्यावतारयति- *तत्र नियोगमुखेनेति*।। *एतदुक्तं भवति* अत्राक्षेपवादिनो ब्रह्मासिद्धिरभिप्रेता, तदङ्गीकारे नैवमाक्षेपो युक्त:, स्वाभिमतमेव विहन्यते यत:, अतो ब्रह्मासिद्धिमङ्गीकुर्वता तेनापि कार्यनिष्ठत्वं निराकार्यमित्यभिप्रायेण तत्प्रमित्यभावो वर्ण्यत इति।।

*ननु*नियोगप्रमितिनिराकरणमत्र न दृश्यते, किन्तु ज्ञानस्य विधेयत्वमात्रम्, तत्कथं नियोगप्रमितिनिराकरणं क्रियत इत्युक्तम्? इत्याशङ्क्यावतारयति- *तत्र विधेयाभावात्तद्व्यावृत्त इति*।। कथं स्वाध्यायपाठे तज्ज्ञानसिद्धिरुक्ता? अधीतवेदमात्रस्यार्थावबोधहेतुत्वायोगादित्याशङ्क्याभिप्रायमाह- *गृहीतपद- पदार्थस्येति*।।

ननु पाठमात्रेण प्रतीतिमात्रं निश्चायकमुत्पद्यते, न च तेन प्रयोजनमस्ति; अतो निश्चितं ज्ञानमनन्यलभ्यं वा विधीयत इत्याशङ्क्याह- *तदेव च विचारेणेति*।। *ननु* ज्ञानस्यान्यतस्सिद्धिसंभवेऽपि विधीयत इत्याशङ्क्याह- *न चानन्यथासिद्धेति*।। यद्वा-शब्दस्यैव विधानमित्याशङ्क्याह- *न चानन्यथासिद्धेति*।। "अथ शब्दजन्यस्यैवे"त्ययुक्तम्; शब्दादुत्पन्नस्य ज्ञानस्याभ्यासायोगात्, अथ शब्दसाधनाभ्यासेन तदभ्यासविधानम्, मैवम्; तस्यापि स्वाध्यायाभ्यासेनैव सिद्धे:, पौनरुक्त्यञ्चास्मिन् पक्षे भवेत्; पूर्वग्रन्थ एव तस्यापि लब्धत्वादित्याशङ्क्यावतारयति- *शब्दावगते ब्रह्मणीति*।। "न तस्य प्रयोजनमित्य"युक्तम्, मोक्षफलस्य विद्यमानत्वादित्याशङ्क्यावतारयति- *तत्र स्मृतिसन्तानविधेरिति*।।

''दृष्टाधिकार:'' इत्यत्राधिकारशब्देन फलमभिधीयते, अधिक्रियतेऽनेनेति व्युत्पत्त्या, यद्वा-अधि उपरि, करणं यस्मिन् फले सति भवति सोऽधिकार इति, ''मा भूच्छाब्दज्ञानादि''त्ययुक्तो ग्रन्थ:; पूर्वमेव तत्पक्षहानेन पक्षान्तरस्य प्रदर्शितत्वादिदानीं मा भूदिति वक्तुमयुक्तत्वात्, नापि शाब्दज्ञानाभ्यासपक्ष: पूर्वमुक्त:, तावदुक्तं वा निर्देष्टव्यम्, नतु व्यवहितमेकदेशमात्रम्, ''तज्जन्मनो ज्ञानान्तरादि''ति तु पुनरुक्तम्; तज्जन्यस्मृतिसन्तानस्यापरोक्षज्ञानहेतुत्वस्य निरस्तत्वादित्याशङ्क्यावतारयति- *शाब्दज्ञानस्मृतिसन्ताना-दिति*।। शाब्दज्ञाने यत्स्मृतिसन्तानम्, तस्मादित्यर्थ:। अनेन शाब्दज्ञानादभ्यस्यमानादिति सामानाधिकरण्यं न भवति, किन्तु शाब्दज्ञानहेतुको योऽभ्यासस्तस्मादिति व्याख्यातम्। यद्वा-शाब्दज्ञानात्स्मृतिसन्तानादिति द्वन्द्वो विवक्षित:, तस्मिन् पक्षे टीकाग्रन्थ एवं व्याख्यातव्य: शाब्दज्ञानादेव, नापरोक्षानुभव:, नाभ्यस्यमानादिति।

ननु विधिसामर्थ्याद् लभ्ये फले तत्सामर्थ्यादेवोपपत्तिरित्याशङ्क्याह- *नापि तद्विधिविज्ञानफलत्व इति*।। ''किमन्वय-व्यतिरेकाभ्यामि'' त्यनेन यद्यप्यन्यत्र ध्येयसाक्षात्कारहेतुत्वं न दृष्टम्; तथापीह भविष्यतीत्युक्तमयुक्तम्; ''नहि दृष्टाधिकार:'' इत्ययुक्त: परिहार:; दृष्टफलत्वेन चोद्याकरणादित्याशङ्क्य विकल्प्यावतारयति- *तत्रापि किं नैयोगिकमिति*।। ''तथाऽपि तत्त्वं सिध्यती''ति न युक्तम्; नह्येकेन विधिवाक्यगतेन शब्देन तत्त्वसिद्धौ देवताधिकरणे कश्चिन्न्यायोऽप्युदाहृतोऽस्ति। नापि ध्येयनिर्देशचरितार्थस्य तथाविधवस्त्वग्राहकत्वमित्याशङ्क्यावतारयति- *ननु ज्ञानविधिवाक्यव्यतिरिक्ता-नामिति*।। त्रिविधमन्यपरं वाक्यम्; प्रमाणान्तरविरुद्धार्थम्, गृहीतार्थम्, अनधिगतार्थं च। तत्राद्ययो: प्रामाण्यं नास्त्येव। अत्रापि विरोधादप्रामाण्यमित्युक्तम्, ''शाब्दज्ञानादन्यदि'' ति चोद्यं पुनरुक्तम्; पूर्वमपि तदन्यस्य विधानमिति चोद्यस्य कृतत्वाद् निराकृतत्वाच्चेत्याशङ्क्यावतारयति- *स्मृतिसन्तान-ध्यानयोरिति*।। *ननु* ज्ञानस्य साधनादि प्रसिद्धमेव, किं तद्विधानेनेत्याशङ्क्यावतारयति- *विधीयमानज्ञानस्येति*।। *ननु* ''विविदिषन्ती''ति वाक्ये भवदभिमतज्ञाने साधनविधानं न भवति, किन्त्विच्छायाम्, ज्ञानस्यैव विवक्षितत्वे वा वेदानुवचनादिजन्यस्य न प्रमाणत्वमपरोक्षफलत्वं वा लभ्यते, नापि करणादिविभागोऽधिकारी च लभ्यते, नह्येतैर्विना लौकिकसाधनमात्रेण विधि:, तत् कथं विधानमित्याशङ्क्य व्याचष्टे- *श्रवण-मनन-निदिध्यासनैरिति*।। ''प्रमाणान्तरस्य तर्हि प्रमाणमित्य'' युक्तम्; किमत्र प्रमाणम्? कथं तत्र प्रामाण्यम्? नहि शब्द: प्रमाणान्तरास्तित्वं बोधयति, नात्मतत्त्वस्येत्यदूषणम्; आत्मन: प्रमाणान्त-रसिद्धत्वेन तदप्रामाण्येऽनिष्टाभावात्, ''नैतदुपपद्यते'' इत्यप्ययुक्तम्; अनुपपत्तिकारणाभावात्, अथात्मशब्देन ब्रह्म विवक्षितम्, तथाऽपि नानुपपत्ति:; विध्यपेक्षितत्वे ब्रह्मण्यपि प्रामाण्यसिद्धेरित्याशङ्क्य व्याचष्टे- *अयमर्थ: सेतिकर्तव्यमिति*।। कार्यगम्यं प्रामाण्यं न विधिगम्यमिति विरुद्धमभिहितम्; कार्यगम्यत्वे विधिगम्यत्वं सिद्धमेव; तयोरभेदादित्याशङ्क्य व्याचष्टे- *गृहीतसंबन्धस्य वेदान्तवाक्येभ्य इति*।। कथमर्थप्रमितिलक्षणकार्यगम्यत्वं प्रामाण्यस्य, न विधिगम्यत्वमित्या-

शङ्क्यातिप्रसङ्गमाह– *विषयस्य विधिगम्ये प्रामाण्य इति*।। प्रमितिमात्रस्य प्रयोजकत्वसंभवान्न विशिष्टस्य प्रयोजकत्वमिति परिहाराभिप्रायः।।

ननु लोकप्रसिद्धसंबन्धेनैव वेदेऽप्यर्थप्रतिपत्तिः, नतु संबन्धान्तरं वेदे कल्पयितुं युक्तमिति ''गुणाद्वे'' ति सूत्रेणोक्तम्, तत्किमर्थमत्रोदाहृतम्? तत्र प्रामाण्यस्य लौकिकत्वानुक्तेरित्याशङ्क्याह– *एवं लौकिकमेव प्रामाण्यमिति*।। ''तस्मान्न दृष्टफलतये'' त्युपसंहारः कृतः; अदृष्टफलत्वस्योत्तरत्र निराकरिष्यमाणत्वात्। उक्तं शास्त्रप्रमाणत्वं ब्रह्मणो नोपपद्यते–

कार्यान्वितार्थता येन पदानामिह गम्यते। प्रयोग–प्रतिपत्तिभ्यां बालव्युत्पत्तिदर्शनात्।।
वृद्धाः प्रवर्तकं किञ्चिद्विवक्षित्वा प्रयुञ्जते। तज्ज्ञानेन ततः श्रोता शब्दात्तं प्रतिपद्यते।।
तज्ज्ञानेन प्रवृत्तं तमुपलभ्य तु बालकः। प्रवर्तकेन संबन्धमन्वय–व्यतिरेकतः।।
प्रतिपद्य ततस्तच्च कार्यमेवेति बुद्ध्यते। स्वकीयव्यवहारे हि कार्यं येन प्रवर्तकम्।।
कार्यसंसृष्ट एवार्थे पदानां शक्तिकल्पना। आवापोद्धारभेदेन पदानां च पृथक् पृथक्।।
स्वार्थे कार्यान्विते शक्तिमात्रज्ञानानुसारतः। बुद्ध्यते ननु बालस्य नैव कार्यं प्रवर्तकम्।।
विमतिर्बहुधा दृष्टा प्रवर्तकनिबन्धना। भावार्थ–फल–तद्धेतुबोधानन्ये लिङादिकम्।।
वाच्यावाच्यत्वभेदेन तद्व्यापाराभिधा तथा। प्रवर्तकत्वसामर्थ्याच्छक्तिः कार्यान्विते कथम्।।
उच्यते फल–धात्वर्थौ नैव तावत्प्रवर्तकौ। अदृष्टेर्वर्तमानापदेशादौ च न दृश्यते।।
फलसाधनतायां च नैव तद्धेतुता कुतः। भूतादौ व्यभिचारेण शब्दव्यापारयोस्तथा।।
व्यवहारे स्वकीये यो हेतुरध्यवसीयते। शाब्देऽपि हेतुता तस्य शब्दव्यापारयोः कथम्।।
शब्दश्रवणमात्रेण सर्वेषां च प्रवर्तनम्। भवेत्, तेन न तद् दृष्टं व्यापारे च न हेतुता।।
अभिधेयत्वपक्षे च तस्यान्येनाभिधेयता। तस्याप्यन्येन तत्रैवमनवस्थानमाश्रयेत्।।
व्यापारे तदभावश्चेदर्थे चास्तित्वधीः कथम्। व्यापारोऽपि न युज्येत शब्दे मूर्तिविवर्जिते।।
गुणत्वाद् द्रव्यपक्षे च विभुत्वेन न संभवेत्। कार्यस्याव्यभिचारेण स्तन्यपाने प्रवर्तते।।
तेन शाब्देऽपि तस्यैव हेतुत्वं परिकल्पितम्। एवं स्वव्यवहारेण लोके कार्यान्वितेऽभिधा।।
तेन वेदेऽपि लिङ्वाच्यं कार्यमेव प्रपद्यते। अभिधेयं लिङादीनां कार्यं स्यादितरान्वितम्।।
कामवाक्ये लिङादीनामादौ शक्तिः प्रकल्प्यते। स्वर्गकामपदेनेह नियोज्यस्तु समर्प्यते।।

कार्यबोद्धव्यरूपोऽयं षष्ठाद्ये निपुणं स्थितः। काम्यत्वात्साध्यरूपोऽयं स्वर्गः स्यात्तद्विशेषणम्।।
तद्विशिष्टस्य तस्यापि तस्मिन् कार्ये नियोज्य तम्। ईप्सितोपायता यस्य तत्रैवास्यान्वयो भवेत्।।
उपायत्वं क्रियाया न क्षणभङ्गस्वरूपतः। आमुष्मिकत्वं स्वर्गस्य षष्ठाद्येनैव सिद्ध्यति।।
क्रियातो भिन्नमेवातस्तन्न मानान्तरान्वितम्। तेनापूर्वं तदित्युक्तं कार्यत्वेन प्रतीयते।।
नियोग इति तैरुक्तं कार्यत्वेन मितं यतः। नियुङ्क्ते स्वात्मनीत्येवं कार्यस्येह नियोगता।।
तदुक्तम्-क्रियादिभिन्नं यत्कार्यं वेद्यं मानान्तरैर्न तत्। अतो मानान्तरापूर्वमपूर्वमभिधीयते।।
कार्यत्वेन नियोज्यं च स्वात्मनि प्रेरयन्नसौ। नियोग इति मीमांसानिष्णातैरभिधीयते।।
इति साध्यप्रधानत्वं लक्षणं तस्य वर्ण्यते। ननु स्वामिफलोत्पादादपूर्वस्य प्रधानता।।
न युज्यते तथात्वे च प्राधान्यं नैव लक्षणम्। उच्यते स्वार्थसिद्ध्यर्थं नियोज्यस्येप्सितं फलम्।।
कुरुते, तत्प्रधानत्वं न हि तेन प्रहीयते। स्वामी दासस्य संरक्षां नित्यमेव करोति सः।।
न शेषः स्वार्थमेवास्य संविधानं करोत्ययम्। वेदवाक्यानुसारेण लोकव्युत्पत्तिरेव तु।।
तदुक्तम्-व्युत्पत्तिरपि कार्यार्थे व्यवहारानुसारिणी। किन्तु निर्धारणामात्रं वेदवाक्यविमर्शजम्।।
वाक्यशेषानुसारेण यवाद्यर्थस्य निर्णयः। नियोज्यवाचकेनेह स्वर्गकामपदेन तु।।
अपूर्वं कार्यमेवाह समभिव्याहृतो हि लिङ्। विमृश्यैवमपूर्वं हि ज्ञात्वा वाच्यत्वनिश्चयः।।
तर्कान्तर्गत एवायं तेनास्यानतिरेकता। यद्वाऽस्य स्मृतिकोटित्वं सापेक्षा तु स्मृतिर्भवेत्।।
भूतानुभवसापेक्षा भाविन्यनुभवे तथा। अनुसंहितयागादिस्तद्द्वारेणैव साधनम्।।
तन्मार्गमेवमालोच्य संक्षेपोऽयं निरूपितः। ख्यापनाय यथातत्त्वं नाज्ञाते दूषणं यतः।।
अत्र वेदान्तसिद्धान्तसारमालोच्य यत्नतः। सिद्धे व्युत्पत्तिसिध्यर्थं प्रवर्तकविवेचनम्।।
प्रवर्तकत्वमन्येषां यन्नेति प्रतिपादितम्। तदङ्गीकृतमेवेष्टं साधनस्य तु वर्ण्यते।।
प्रवर्तकत्वं सर्वत्र तस्य येन प्रतीयते। प्रवर्तते कदाचिन्नो श्रेयःसाधनतां विना।।
अध्येषणादीनां यातु तद्धीहेतुतयैव सा। यस्त्वत्र व्यभिचारोऽपि भूतेष्टादौ प्रदर्शितः।।
अयुक्तः स यतो येन गृहीता कार्यहेतुता। तेनाप्यभिमतो वायं हेतुताधीनिबन्धना।।
कार्यधीरभ्युपेतव्या स्वतःक्लेशकरे यतः। कार्यत्वं नोपपद्येत श्रेयःसाधनतां विना।।

इष्टोपायधियो यद्वत्कार्यधीहेतुतोच्यते। तत्र यः परिहारः स्यात्स नोऽत्रापि भविष्यति।।
कृत्युद्देश्यत्वमेवेह भूतादिभ्यो विशेषकृत्। इष्टसाधनता बुद्धिर्द्विविधा खलु दृश्यते।।
भूतादिका तथाऽन्या तु कार्याकारा प्रदृश्यते। कार्याकारा च या तत्र गीयते सा प्रवर्तिका।।
नन्विष्टोपायधीवेद्यमेवं कार्यं प्रसृज्यते। इष्टोपायत्वबुद्ध्या तु ज्ञाप्यत्वं भवदीप्सितम्।।
इष्टसाधनतोल्लेखात् कार्यधीहेतुतेष्यते। इष्टसाधनताज्ञाप्यं कार्यत्वं तेन गीयते।।
यथा खल्वेकधीवेद्यजातिधीहेतुता श्रिता। व्यक्तिबुद्धेस्तथाऽत्र स्यादिष्टबुद्धेश्च हेतुता।।
इष्टसाधनताऽप्येवं द्विप्रकारा प्रतीयते। भूताद्याकाररूपा सा कृतिसाध्यगता तथा।।
वृष्ट्यादौ मा प्रसङ्गः स्यात्प्रवृत्तेरिति वर्ण्यते। फलादौ व्यभिचारेण न कार्यं स्यात्प्रवर्तकम्।।
कृतिसाध्यार्थसंयुक्ता श्रेयःसाधनता ननु। कृतार्था रागमुत्पाद्य प्रवृत्तौ नैव कारणम्।।
तत्र रागस्य हेतुत्वं केवलस्योच्यतेऽथवा। साधनेनानुरक्तस्य प्रथमस्तु न युज्यते।।
अदृष्टेः फलरागस्य साधनेनास्य हेतुता। अज्ञाते फलहेतुत्वे नैव कश्चित्प्रवर्तते।।
साधनत्वे च विज्ञाते तदेव स्यात्प्रवर्तकम्। ननु भागीरथीस्नाने श्रेयःसाधनलक्षणे।।
कृतिसाध्ये प्रवृत्तिर्नो रागस्तेन प्रवर्तकः। तत्रेष्यमाणमेव स्यात्फलमत्र तदिष्यताम्।।
स्नानसाध्ये न चेदीप्सा न स्नानं हितसाधनम्। प्रवर्तकं च यल्लोके कृतियोग्येष्टसाधनम्।।
नन्वीप्सागोचरस्यैव साधनस्येह हेतुता। कार्यैकार्थेन संयोगोऽप्यर्थस्तेन प्रकल्पितः।।
उच्यते सुरतारम्भे सन्तप्तस्य स्पृहा भवेत्। इन्दूदये प्रवृत्तिस्तु नैव तत्रोपजायते।।
तेन स्यात्कृमिसाध्यार्थसमवायो विशेषणम्। ननु कार्यं ममेदं स्यादिति मत्वा प्रवर्तते।।
कृतियोग्यत्वमात्रन्तु विषयो नास्य युज्यते। अनिष्टसाधने योग्ये कार्यतो नैव दृश्यते।।
नेष्टसाधनता कार्यबुद्धेरालम्बनं भवेत्। भूतादौ व्यभिचारेण सुखसाधनतां विना।।
फलेऽपि कार्यताज्ञानं साधने च न दृश्यते। मण्डलोदय इत्युक्तं तेनान्यस्येह कस्यचित्।।
स चायं कार्यरूपोऽर्थः कृतिसाध्यत्वलक्षणः। कृत्युद्देश्यत्वरूपश्च मानसज्ञानगोचरः।।
उच्यते नेदृशी बुद्धिरभिलाषातिरेकिणी। कर्तुमिच्छैव सर्वेषां स्वसंवेद्योपजायते।।
मनसा साक्षिमात्रेण गृह्यतेऽन्यत्ततो न हि। सिद्ध्यति ग्राहकाभावादुक्तं बिम्बोदये ननु।।

चिकीर्षा नाभिलाषोऽपि तत्रान्यत्कारणं शृणु। चिकीर्षा कृतियोग्ये स्यात् साधने केवले न तु॥
चिकीर्षा कार्यबुद्ध्या स्यादिति भेदो निरूपित:। इष्टसाधनबोधेन कृत्युद्देश्यनिरूपणम्॥
क्रियते यादृशेनेह कृतियोग्येन तेन मे। जायते कर्तुमिच्छात: कार्यं नैव निरूप्यते॥
प्रवर्तकत्वे कार्यस्य निरस्ते सङ्गतिग्रह:। निरस्त एव कार्यस्य ग्रहणं नैव विद्यते॥
कार्याभिधायिता लोके लिङादीनां भवेद्यदि। तथाप्यपूर्ववादित्वं वेदे तेषां कथं भवेत्॥
ननूक्तं स्वर्गकामादिपदाद्वेदे नियोगधी:। साध्य: स्वर्गविशिष्टस्तु नियोज्यस्तत्र भङ्गिनीम्॥
क्रियां कार्यतया ज्ञातुं कथमुत्सहते नर:। उत्पादनानुकूलत्वं फले नास्योपपद्यते॥
यस्मिन् सति भवेत् स्वर्ग: कर्म तावच्चिरङ्गतम्। तेनान्यस्यैव कार्यत्वमयोग्यत्वाद्विनाशिन:॥
क्रियाया: साधनत्वं किमयोग्यं प्रतिपत्तित:। अथवा वस्तुतस्त्वाद्ये प्रतिबन्दिरिहोच्यते॥
षण्णामपूर्वहेतुत्वं प्रतिपत्तिरिहोदिता। स्वर्गहेतुत्वधीरेवं नेष्यते केन हेतुना॥
तुषपक्वा भवन्तीति कथं कामेषु हेतुता। उपपादकसद्भावो नोभयत्र विशिष्यते॥
"सर्वेभ्य:" इति वाक्येन दर्शादे: संप्रतीयते। नापूर्वहेतुता तेषां तद्धीहेतोरभावत:॥
अत्राप्यपूर्वहेतुत्वं फलस्य परिकल्प्यते। तद्वदेवेति चेद् ब्रूयादन्योन्याश्रयता भवेत्॥
अयोग्यत्वमपूर्वे नो शाब्द्यां बुद्धौ प्रतीयते। तस्यान्यकालता येन तदानीं न प्रतीयते॥
स्वर्गेऽप्यस्य समानत्वाद्वैषम्यं नैव तद्भवेत्। आमुष्मिकत्वं स्वर्गस्य यतस्तेन न मीयते॥
अर्थवादात्प्रतीयेत सहितं बोधकं यत:। यो वदेदिति तं ब्रूयादत्राप्येतत्प्रकल्प्यते॥
यदा कर्म प्रतीयेत नाम्ना तद्भिन्नकालजम्। प्रतीयेत तथाच स्याद्भिन्नकालीनसाध्यता॥
एवं साधनता हेया षण्णां व्यवहितेऽपि वा। एष्टव्या साधनत्वे धी: स्वर्गेऽप्येवं भविष्यति॥
अर्थवादाच्च नाम्न: स्याद्विध्युद्देशेऽन्तरङ्गता। अयोग्ये त्वप्रतीतिश्चेत्कार्यं नैव प्रतीयते॥
प्रयत्नव्याप्यता साक्षाद्येन नास्ति न चान्यथा। साध्यत्वं तस्य वक्तुं हि शक्यं स्यादप्रतीतित:॥
अयोग्येऽपि प्रतीतिश्चेन्निर्वाहापेक्षया यदि। अन्योन्याश्रयमेव स्यात्पूर्वधीहेत्वभावत:॥
धीमात्रं चेदुपेयेत तथा सर्गे भविष्यति। निर्वाहोऽपि तथैव स्यादिति मन्त्रान्तरं पुन:॥
विधिसामर्थ्यलभ्यं यत्कर्मण्यैश्वर्यमीरितम्। स्वर्गकामस्य नैश्वर्यमतत्साधनकर्मणि॥

तत्कृतिव्याप्यता चास्य न तत्साधनतां विना। करणत्वानुसन्धानं न नैयोगिकमादितः।।
अयोग्यत्वे निरस्ते च विमर्शोऽपि न लभ्यते। व्युत्पत्तिहेतुता नास्य तत्स्वरूपानिरूपणात्।।
प्रमाणं वाऽप्रमाणं वा? नाद्यः; संख्यातिरेकतः। अन्तर्भावोऽपि नैवास्य शब्दादन्येषु संभवेत्।।
वृत्तिर्मानान्तरायोग्ये येन तस्य न संभवेत्। हैतुकत्वान्न शाब्दत्वं संभवि स्वेन चोद्गते।।
अनिश्चयान्न चाप्यस्य लिङ्गादाविव संभवः। शब्दादर्थाच्च सामार्थ्यात्संभवो नास्य विद्यते।।
अन्तर्भावोऽपि तेनास्य न तस्मिन्नुपपद्यते। द्वितीये त्वप्रमाणत्वात्तद्गृहीतेऽपि वस्तुनि।।
व्युत्पत्तिर्नैव युज्येत वस्तुसिद्धेरभावात:। स्मृतित्वमपि तेनास्य संस्कारो विद्यते यतः।।
सापेक्षत्वं स्मृतेः शक्यं लक्षणं नैव वर्णितुम्। उत्पत्ति-ज्ञप्तिपक्षाभ्यां स्यादतिव्याप्तिदूषणम्।।

कार्यस्वरूपं न विरुद्ध्यते तत्प्रयत्नसाध्यत्वमपीह नैकम्।
असंभवित्वं व्यभिचारिता च दोषो भवेल्लक्षण ईदृशे हि।।

प्राधान्यमपि नैवास्य तत्स्वरूपानिरूपणात्। प्राधान्यं चेदुपेयोऽत्र कृत्युद्देश्यत्वलक्षणम्।।
नापूर्वस्योपपद्येत नहि तत्फलमिष्यते। कृत्याद्यपेक्षया तच्चेत्स्यादतिव्याप्तिदूषणम्।।
सर्वान् प्रति प्रधानत्वं कस्यचिन्नैव विद्यते। अन्यशेषत्वराहित्यं नापूर्वस्योपपद्यते।।
पुरुषापेक्षितं स्वर्गं कुर्वत्तच्छेषतामियात्। आत्मसिद्ध्याऽऽनुकूल्येन साधनत्वं न दोषभाक्।।
यो वदेदिह तस्यापि गर्भदासेऽपि तद्भवेत्। नहि स्वाभ्युपकाराय केवला तत्क्रिया भवेत्।।
आत्मार्थत्वानुसन्धानात्प्रवृत्तिस्तस्य दृश्यते। यागादौ पुरुषस्यापि न भवेच्छेषता पुनः।।
तत्सिद्धिमात्रमुद्देश्यं न हि स्यात्तत्कृतेरिह। तेन नैतत्प्रधानत्वं शक्यं नान्यन्निरूपितुम्।।
प्राधान्यं कृतिसाध्यत्वं मिलितं च न लक्षणम्। असंभवत्वदोषेण प्राधान्ये तन्निरूपितम्।।
व्यापारे कृतिसाध्यत्वम्, नास्य व्यापाररूपता। कालत्रयानवच्छेदो यश्च कार्ये निरूपितः।।
प्रातीतिकः स चेदिष्टः सर्वकार्ये प्रसज्यते। वस्तुतश्चेद्भवेत्तस्य कार्यत्वं हीयते ततः।।
भविष्यत्कालयोगे हि कार्यत्वं सर्ववस्तुनः। एवं नियोज्यता वार्या दिङ्मात्रमिह दर्शितम्।।

मेयं न तेऽन्यस्य न तेन तस्य योगे गृहीते न हि गृह्यतेऽसौ।
हीनो न तेनायमुपैति हित्वा श्रेयःस्वरूपं श्रुतिमात्रगम्यम्।।

तत्र नियोगस्यैवाप्रसिद्धत्वात्कथं तन्निष्ठतेति चोदयति- *ननु कोऽयमिति*।। *ननु* नियुङ्क्त इति नियोग इति प्रवर्तकस्य नियोगत्वं प्रतीयते, कार्यज्ञानाच्च प्रवृत्तिर्दृश्यते, अत: कार्यमेव नियोग इति चोदयति- *ननु कार्यं बुद्धिगम्यमिति*।। पराभिमतकार्यस्याप्यनिरूपितत्वात्तन्मुखेनापि न नियोगनिरूपणमिति परिहरति- *किमिदं कार्यमिति*।। *ननु* कृतिसंसर्गस्येति संसृष्टतया प्रतीति:? संसर्गो वा, नाद्य:; कृतिसंसर्गो हि कार्यबुद्धौ निमित्तमित्यभ्युपगम्यते। न च कार्यबुद्धौ निमित्तस्यैव नैमित्तिकबुद्धिविषयत्वम्। द्वितीयेऽपि कार्यबुद्धेस्तत्र निमित्तता, न कार्यान्तरत्वं तस्येति भाव:।। *नन्वन्यत्कार्यमिति*।। न धात्वर्थस्याभिलषितसाधनत्वेन प्रवर्तकत्वम्; भूतवर्तमानादावभावात् न तस्य कार्यत्वम्; अतोऽन्यदेव ममेदं कार्यमिति बुद्धेरालम्बनमिति भाव:। *सत्यमभिलषितसाधनमेवेति*।। यद्यपि नेष्टसाधनमात्रं कार्यम्; व्यभिचारादिष्टसाधनेऽपीन्दूदयादौ, तथाऽपि न ततो भेद:; कृतियोग्यस्यैतस्यैव कार्यत्वोपपत्तेरिति भाव:। *ननु* एवमपि नेष्टसाधनमेव कार्यम्, कृतिसाध्यन्तु कार्यम्, श्रेयस उत्पादकन्तु साधनम्, न च तयोर्विरुद्धाकारयोरैक्यमित्याशङ्क्याह- *न च श्रेय:कृतिप्रतियोगीति*।। असाधारणधर्मभेदो हि भेदक:, न प्रतियोगिमात्रमिति भाव:।। *ननु* प्रवर्तकं कार्यम्; ममेदं कार्यमिति ज्ञानात्प्रवृत्तिदर्शनात्, न च कृतियोग्यत्वेन कार्यतेति युक्तम्; अनिष्टसाधने व्यभिचारात्। न च श्रेय:साधनत्वेन कार्यता; तस्यापि व्यभिचाराद्भूतादौ। न च कृतियोग्येष्टसाधनत्वेन कार्यत्वम्; जाह्नवीस्नाने कृतियोग्येष्टसाधनत्वे विद्यमानेऽपि कार्यत्वादर्शनात्, फलस्य तादृशसाधनत्वेन विना कार्यत्वमिति वक्तुं न शक्यते। दृश्यते च कार्यबुद्धि: सर्वेषाम्, तेनान्यदेव कृतिसाधनं तद्बुद्धिगोचर:, इत्याशङ्क्याह- *न च कृतियोग्येष्टसाधनेति*।। न चेच्छाऽभावे स्नानस्येष्टसाधनत्वमिति भाव:। यद्वा प्रतियोगिमात्रभेदमाश्रित्य साधनस्यैव प्रवर्तकत्वं कस्मादाश्रीयते? व्यतिरिक्तमेव प्रवर्तकं कार्यमिष्यतामित्याशङ्क्याह- *न च कृतियोग्येष्टेति*।। *ननु* इष्टसाधनव्यतिरिक्तमपि प्रवर्तकं कार्यं दृश्यते फलमिति चोदयति- *ननु फलमपि कार्यतयेति*।। *विशिष्टप्रवृत्तिहेतुत्वाभावादिति*।। अयमर्थ:-फलं स्वात्मनि प्रवृत्तिं जनयति? साधने वा? नात्मनि; अयोग्यत्वात्, नापि साधने; अज्ञाते साधने प्रवृत्त्यदर्शनात्, ज्ञाते च साधनज्ञानमेव प्रवर्तकम्; फलज्ञानस्य व्यवहितत्वात् फलस्यापि प्रवर्तकत्वं दृश्यत इत्याशङ्क्याह- *फलस्य त्विच्छामात्रेति*।। *ननु* कार्यप्रतीतिरङ्गीकृतैव भवता नामान्तरेण, तत्कथं निराक्रियते? इत्याशङ्क्याह- *न च कार्यं नामेति*।। ''न च कृतियोग्येष्टसाधने'' त्यनेन प्रवर्तकत्वं व्यतिरिक्तस्य निरस्तम्, अनेनालौकिकस्य प्रवृत्तिर्निरस्तेत्यपुनरुक्ति:।। यद्वा पूर्वं प्रवर्तकत्वं कार्यस्य योग्स्येष्टसाधनसय साधितम्, इदानीं कार्यस्य तदीयस्य शब्दवाच्यत्वमपि न संभवति; तस्यागृहीतत्वेन संबन्धग्रहणाभावादित्याह- *न च कार्यं नामेति*।।

ननु प्रवृत्त्यन्यथानुपपत्त्या कार्यं गम्यते; तस्यैव स्तन्यपानादौ प्रवर्तकत्वात्, इति चोदयति- *प्रवर्तकत्वमिति*।। अर्थापत्तेरन्यथाऽप्युपपत्तेरिति परिहरति- *न कृतियोग्यादिति*।। *ननु* साधनस्यापि ज्ञापकाभावात्कथं प्रवृत्तिहेतुत्वं शब्दवाच्यत्वं वा संभवतीत्याशङ्क्याह- *न च

साधनत्वमपीति*।। *तत् फलोदयान्वयेति*।। तस्य साधनस्य येन फलोदयेनान्वय-व्यतिरेकौ, तस्मिन् सति फलोत्पत्तिरसति चानुत्पत्तिरित्येवंरूपौ, ताभ्यां साधनत्वधीरित्यर्थः। *ननु* एवमपि न साधनस्य प्रवर्तकत्वम्; अननुभूतस्य प्रवर्तकत्वाभावात्, अनुभूते फलस्य निष्पन्नत्वान्न प्रवर्तकत्वमित्याशङ्क्याह-*अननुभूतेऽपीति*।।

ननु मा भूत् कार्यस्य विधेयता, तथाऽपि न ब्रह्मणि प्रामाण्यं युज्यते; वेदान्तानामिष्ट-साधनविधिपरत्वेन् ज्ञानस्य विधेयत्वेन तन्निष्ठत्वस्य वेदान्तानां दुष्परिहरत्वादित्याशङ्क्याह-*तत्र ब्रह्मात्मैकत्वविज्ञान इति*।। सर्वं चैतद्व्यक्तमुद्ग्राहणिकायामिति नेहोच्यते। अथवा-''अथ यदतः'' इत्यादिग्रन्थेन प्रपञ्चातिरिक्तब्रह्मोपासनं मोक्षाय विधीयते, मोक्षश्च ब्रह्मप्राप्तिलक्षण इत्युक्तम्, तदयुक्तम्, नहि प्रपञ्चातिरिक्तत्वं ब्रह्मणः संभवति; सर्वात्मकत्वाद्, व्यर्थं च तत्कीर्तनम्। न च प्राप्तिलक्षणो मोक्षः संभवति; आत्मत्वेन नित्यप्राप्तत्वात्, पुनरुक्तं च; पूर्वमेवोपासनाविधानमाशङ्क्य निरस्तत्वादित्या-शङ्क्यावतारयति-*इदानीं जीव-ब्रह्मणोरिति*।।

ननु न देवताधिकरणन्यायेन वस्तुसिद्धिः; तस्य प्रमाणान्तराविरोधसापेक्षत्वात्, इह सर्वगतस्य न प्राप्यत्वं संभवति। नहि गन्तृ-गन्तव्यभेदोऽपि तस्मिन्नुपपद्यते सर्वगतत्वे च सर्वविकारसंबन्धेन विकारित्वम्, तथा सत्यविकारित्वप्रतिपादकागमस्य तद्विरोधः, प्राप्तत्वे वा परिच्छिन्नत्वम्, इत्याशङ्क्याह-*न च प्रमाणान्तरेति*।। तथा सति सावयवत्वेनानित्यत्वम्, ''विरुद्धाव्यभिचारित्वादि'' ति समकक्षत्वम् न परस्परविरुद्धार्थप्रतिपादकत्वं विवक्षितम्; विरुद्धेनार्थान्तरेणाव्यभिचारादित्यर्थः। ''नह्येष तर्कगम्यः'' इत्ययं परिहारो व्यधिकरण इव लक्ष्यते; विरुद्धाव्यभिचारि चोद्यस्यापरिहृतत्वात्, विरुद्ध इतः परं वा; अनुमानविरोधेन चोद्यस्य कृतत्वान्न तर्कविरोधेनेत्याशङ्क्य व्याचष्टे-फलवैलक्षण्यमसिद्धमिति शङ्कते-*नन्विति*।। शरीराद्युपभोग्यफलकं कर्म, मुक्तेश्च शरीराद्यसङ्गित्वान्न कर्मफलत्वमित्याशङ्क्याह-*तत इति*।। श्रुति-न्यायाभ्यां नित्यत्वप्रतिपत्तिरित्युक्तम्, तत्र श्रुतिं दर्शयति-*ब्रह्मेति*।। ब्रह्म नित्यसिद्धम्, तदेव विद्याफलम्, न तदतिरिक्तमैक्यमिति श्रुत्यर्थः। न्यायत इत्युक्तम्, तद्विवृणोति-*न्यायत इति*।। न्यायमेवाह-*पुनरावृत्ताविति*।। मुक्तरनित्यत्वेऽभ्युदयाद्भेदोऽपि न स्यादित्याह-*अभ्युदयेति*।। अभूत्वा भाविनः साध्यत्वम्, मुक्तेस्तद्वैपरीत्याद-साध्यत्वमित्याह-*अनादित्वमिति*।। श्रुति-न्यायौ क्रमेणाह-*विमुक्तश्चेति*।। बाह्यक्रियासाध्यस्यैवोपचयादिमत्त्वम्, मुक्तेश्चान्तरक्रियासाध्यत्वान्नित्यमित्याशङ्क्य, व्यर्थविशेषणत्वात् साध्यत्वमात्रमनित्यत्वप्रयोजक-मित्याशयेनाह-*क्रियासाध्यत्व इति*।। सशरीरत्वस्यापि धर्मकार्यत्वादशरीरत्वमेवेति कथमुक्तम्? इत्याशङ्क्य, न चाशारीरत्वमित्येतद्व्यावर्त्यां शङ्कामाह-*ननु यथैवेति*।। एवकारस्य ''धर्मकार्यमि''त्यनेन संबन्धः। 'अथायमशरीरः' इत्यादिनाऽशरीरत्वस्य कार्यत्वप्रतिपत्तेरसिद्धं स्वाभाविकत्वम्, तथा

सशरीरत्वानुभवविरोधश्चेति शङ्कते- *किमिदमिति *।। यदिदमशरीरत्वम्, तत्किं स्वाभाविकम्? उत नैमित्तिकम्? इति विमर्शार्थः। शरीरसंबन्धस्य परमार्थसतो ब्रह्मणि कालत्रयेऽप्यनुपपत्तेरशरीरत्वमित्याह- *शरीरेति *।। सशरीरत्वानुभवविरोध इत्युक्तं निरस्यति- *मिथ्येति *।। आगन्तुकमपि सशरीरत्वं न वस्तुसदिति दर्शयितुम्-''मिथ्याज्ञाने'' ति विशेषणम्।। 'अथायमि'त्यादिनाऽशरीरत्वस्य साध्यत्वं प्रतीयते, इत्याशङ्क्य, किं मिथ्याज्ञानसंबन्धध्वंसलक्षणस्य? आहो संबन्धान्तरध्वंसलक्षणस्य? इति विकल्प्याद्यं दूषयति- *तत्रेति *।। कर्मशब्देनोपासनाऽभिधीयते। तत्र हेतुमाह- *सम्यग्ज्ञानेति *।। प्रमाणज्ञानस्याज्ञानतत्कार्यविरोधित्वादुपासनस्य चानीदृशत्वमित्यर्थः। द्वितीयं दूषयति- *संबन्धान्तरेति *।। सत्त्वादीनामनादित्वेऽपि यथा परिणामः, तद्वन्मुक्तेरपीति शङ्कते- *नन्विति *।। कूटस्थनित्यताप्रतिपादकश्रुत्यादिविरोधान्नैवमित्याह- *नेत्याहेति *।। कौटस्थ्यमङ्गीकृत्य तत्रोपास्तेरनुप्रवेशं शङ्कते- *नन्विति *।। 'सदैकरूपः' ''भविष्यती'' ति च विरुद्धमिति, अत्राह- *ज्ञानेति *।। ज्ञानस्य तावत्तत्रानुप्रवेशोऽङ्ग्यकारि, उपास्तेश्च ज्ञानत्वात्कथं निषेध इत्यर्थः। अविद्या-तत्कार्यनिवृत्तिमात्रं ज्ञानफलम्, तद्विहाय मुक्तेर्ज्ञानसाध्यत्वाङ्गीकारे स्वर्गादिसमत्वं स्यादित्याह- *अत्राहेति *।। कर्मणामुपचितापचितरूपत्वात्तत्फलस्वर्गादेरपि तथात्वं युक्तम्, न तथाऽत्रोपासनायाः; एकविधत्वादिति शङ्कते- *ननु किमिति *।। विकल्पासहत्वान्नैतदित्याह- *उच्यत इति *।। ''उच्यते'' इत्यारभ्य ''मरणमेवे'' त्यतः प्राक्तनः स्पष्टार्थः। ''यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्। तं तमेवे' त्यादिवाक्यपर्यालोचनयोपासनस्यावधिः प्रतीयत इति शङ्कते- *मरणं वेति *।। आयुर्नियमाभावात्साधनैकरूप्यं न सेत्स्यतीत्याह- *तथापीति *।। परिमितिभावाभावमेवाह- *एकेनेति *।। अवध्यन्तरमाशङ्कते- *उपास्येति *।। अस्मिन्नपि पक्षे साधनैकरूप्याभावस्तदवस्थ इत्याह- *तथापीति *।। *ननु* उपासना न मोक्षसाधिका, येन तदुपचयादिना मुक्तेरपि तथात्वमापद्येत, किं तूपासनजनितः साक्षात्कारो मुक्तिहेतुरित्याशङ्क्याह- *न चेति *।। किं विहितत्वेन साधकत्वम्? उतान्वय-व्यतिरेकसिद्धत्वेन? नाद्य इत्याह- *विहितत्वादिति *।। द्वितीयं प्रत्याह- *मिथ्याज्ञानत्वादिति *।। प्रमाणज्ञानस्याविद्यानिवर्तकत्वमन्वय-व्यतिरेकसिद्धम्, नाप्रमाणस्येत्यर्थः। द्वितीयं पक्षमुत्थापयति- *अथ मा भूदिति *।। अस्मिन् कल्पे पूर्वोक्तमेव दोषं स्मारयति- *न तर्हीति *।। उपासनोपचयादिना तत्फलेऽप्युपचयादिरित्युक्तम्, तत्र विपक्षे बाधकाभावं शङ्कते- *अथेति *।। बाधाभावोऽसिद्ध इत्याह- *अनुष्ठानेति *।। उपचितापचितसाधनानुष्ठानान्तरमपि फलसाम्येऽनुपचितसाधनानुष्ठानं विफलं स्यादित्यर्थः। एकरूपफलोद्देशेन विधिरूपोपासनाविधानात्फलैकरूप्यं सिद्धमिति शङ्कते- *अथेति *।। *नियामकाभावादिति *।। मरणापेक्षादेरनियतत्वात्साधनैकरूप्यस्य नियामकं न पश्याम इत्यर्थः।।

न्यायाविरुद्धे श्रुत्यर्थे संभवति विरुद्धेऽर्थान्तरे तात्पर्यं न कल्प्यमिति समाधत्ते- *नैतत्सारमिति*।। मिथ्याज्ञानमविद्याशब्दार्थः। एकाग्रचित्तस्यापरोक्षज्ञानं जायते, आत्मप्रपञ्चमिथ्याज्ञानादिप्रतिबन्धनिवृत्तौ, तन्निवृत्तिश्चोपासनाधीनेति प्रणाड्या मुक्त्युपयोगसंभवे न साक्षात्तस्यास्तत्साधनत्वं श्रुत्यादिविरुद्धं कल्प्यमित्यर्थः। उपासनाया उपचितादिरूपत्वात्फलेऽप्युपचितापचितरूपत्वमिति यत्तूक्तम्, तत्राह- *क्षीयमाणेति*।। निवर्त्याविद्यादितरतमभावात् साधनेऽपि तरतमभाव उचित इत्यर्थः। पापादिनिवृत्तेर्दुरधिगमंत्वात् संततमुपास्त्यनुष्ठानं स्यादित्यत्राह- *अपरो भवति- यद्यपि साक्षात्साधनपरिमाणं न श्रूयते, तथाऽपि ज्ञानावधित्वप्रतीतेर्न साधनोपचयापचयौ संभवत इति। यत्पुनः- ''न च पुनरि'' त्युक्तार्थानुवादः कृतः, स न युक्तः; आगमस्याप्यनित्यत्वसाधकस्य विद्यमानत्वादित्याशङ्क्यावतारयति- *ननु श्रुत्यनुमान इति*।। ''तदयुक्तं वर्तमानापदेशत्वेने'' त्यनेन वर्तमानापदेशत्वेन प्रमाणान्तरसापेक्षत्वमुक्तम्, अयुक्तं तत्; तस्य मानान्तरापेक्षत्वे कारणत्वाभावात्, इत्याशङ्क्याभिप्रायमाह- *तत्र तावद्विधिपरत्व इति*।। *ननु* *अर्थवादत्वेऽप्यपुनरावृत्तिप्रतिपादकत्वमित्याशङ्क्याह-* *न चार्थवादैरिति*।। *द्रव्ये फलश्रुतिः- ''यस्य पर्णमयी'' ति ''वर्म वा एतद्यज्ञस्ये'' ति क्रियायाम्,-* *यदाङ्क्ते चक्षुरेव भ्रातृव्यस्ये''ति तु संस्कारे।।*

ननु प्राप्तस्य पुनर्निषेधो दृष्टः, अतः कथमप्राप्तप्रतिषेधः? इत्याशङ्क्य विवृणोति- *तथाहि- ब्रह्मलोकमिति*।। प्रमाणान्तरविरोधपरिहारेणाश्रुतार्थकल्पना दृष्टाऽन्यत्र, नेह तथेत्यभिप्रायेण परिहरति- *न श्रुतार्थपरित्यागेनेति*।। ''किञ्च तेषामि'' ति कस्मिन्नर्थे युक्त्यन्तरमुच्यते? न तावत्पूर्वग्रन्थार्थे; तत्रार्थवादत्वेन प्रामाण्यमेव नास्तीत्युक्तम्। प्रमाणान्तराभावोऽप्ययुक्तः, नतु सावधिकवृत्तिप्रतिपादकत्वमुक्तम्, अतो भिन्नविषयत्वान्न युक्त्यन्तरमित्याशङ्क्यावतारयति- *सामान्यश्रुत्यनुमानाभ्यामिति*।। श्रुतिसामान्यादेकत्वादियमेव तत्राप्यनावृतिं प्रतिपादयतीत्यर्थः।।

''अपि चाभ्युपेत्ये'त्यनेनैतदुक्तम्- वेदान्तवाक्यान्येव क्रियानुप्रवेशं निराकुर्वन्तीति, तत्र ब्रह्मवेदनं विवक्षितं प्राथमिकम्? अपरोक्षं वा? न तावत्प्राथमिकज्ञान- ब्रह्मभवनयोर्मध्ये क्रियानुप्रवेशनिराकरणम्; अभ्यासेन विनाऽऽपरोक्ष्यानुपपत्तेः, तस्य च विधानसापेक्षत्वात्। नापि द्वितीयः; विहिताभ्यासजन्यापरोक्षज्ञान- ब्रह्मभवनयोर्मध्ये क्रियानुप्रवेशनिराकरणे न किञ्चित्प्रयोजनम्; ब्रह्मणः क्रियानुप्रवेशस्य सिद्धत्वात्। नहि क्रियानुप्रवेशवादिनापि सर्वदा क्रियानुप्रवेशोऽङ्गीकृतः, तेन हेयो ग्रन्थ इत्याशङ्क्य व्याचष्टे- *अपि चाभ्युपेत्येत्यारभ्येति*।।

ननु टीकाकारेण ''तिष्ठन् गायती'' ति कथमुदाहृतम्? विषमत्वात्, नहि स्थितिक्रिया गानहेतुः, अव्यवहितश्च हेतुरत्र निदर्शनीयः; अतः स्थितेर्गानहेतुत्वम्? ब्रह्मदर्शनस्य वा सार्वात्म्यहेतुत्वाभावः? इत्याशङ्क्य स्वयमेव परिहरति- *अत्र न स्थितिक्रियेति*।। किञ्च ''तस्मै मृदितकषायाये'' त्यनेन

तमोनिवृत्तिरूपं मोक्षं दर्शयति। न क्रियासाध्यमित्युक्तम्, तत्र ज्ञानातिरिक्तक्रिया निषिध्यते? तद्रूपा वा? नाद्य:; पूर्ववादिनाप्यङ्गीकृतत्वात्, न द्वितीय:; शास्त्रत एव प्रतीते:, नहि विधेयोपासनातिरिक्तज्ञानप्रतीति: शास्त्रे; तरति शोकमात्मविदिति ज्ञानमात्रप्रतीते:। अतोऽविद्यानिवृत्तिफले न क्रियासाध्यत्वाभावनिश्चय इत्याशङ्क्यावतारयति- *अपि च ब्रह्मविद्येति*॥

अविद्यानिवृत्तिरिति॥ तमस: पारदर्शनमात्रश्रवणात्। न चोपक्रमसामर्थ्यादपि तत्प्रतीति:; शोकतरणमात्रप्रतीतेरिति भाव:। *नैष दोष इत्यादेरयमर्थ:-शोकतरणमात्रं ज्ञानेन भवतीति श्रूयते। न च ज्ञानस्य साक्षात्तन्निवर्तकत्वं संभवति; विरोधाभावात्, अतोऽज्ञानद्वारेण तन्निवर्तकत्वं प्रक्रान्तम्, उपसंहारेऽपि तदेव प्रतीयत एकरूपत्वायेति। अविवेकनिमित्तो विभ्रमोऽविद्या। तयाऽहमस्मीति बुद्धिरित्यनुसन्धीयते, इत्यनुसन्धानस्थायित्वम्, तेन कल्प्यन्त इति कल्पना द्रव्यत्वादय:। अथवा अनुसन्धानं कल्पना चेत्यनुसन्धानकल्पना। यद्वा-अनुसन्धानेन कल्पनेति। एतत्सर्वं क्षणभङ्गे व्यक्तमिति नेह प्रतन्यते। *असंप्रज्ञातसमाधीति*॥ समाधिर्द्विविध:-संप्रज्ञातोऽसंप्रज्ञातश्च। ध्यातृ-ध्येय-ध्यानानुसन्धानसहित: संप्रज्ञात:, तद्रहितोऽसंप्रज्ञात इति। *ऐकभविकन्यायेनेति*॥ सोऽयं ग्रन्थ एकस्मिन्नेव जन्मन्यनेकशरीरोपभोग्यानि कर्माण्यनेकशरीरग्रहणेन क्षये नयतीति। एकस्मिन् भवे जन्मनि भवतीति व्युत्पत्ति:। अथवा ''स्यादि'' त्यादिनैकत्वविज्ञानस्य परमार्थवस्तुविषयत्वं नास्ति, किन्तु संपदादिरूपत्वमिति चोद्यं कृतम्, तदनुपपन्नम्; परमार्थैकत्वविषयत्वाभावे कारणाभावात्। न च संपदादिरूपत्वमपि संभवति सिद्धे हि वस्तुद्वये संपदादिसंभव:; अत्र प्रमाणाभावेन ब्रह्मसिद्धेरभावादित्याशङ्क्यावतारयति- *नन्वद्वितीयब्रह्मात्मैकत्व इति*॥

तयोरिति जीव-ब्रह्मणोर्निर्देश:; जीवस्यापि स्वरूपेण मानान्तरवेद्यत्वात्। भेदस्तावज्जीव-ब्रह्मणो: प्रतीयते, तत्कथमेकत्वप्रतिपादनम्? इत्याशङ्क्याह- *भेदावभासेऽपीति*॥ *ननु* तात्पर्याभावे सति यदिदमुदाहृतं भेददर्शननिषेधादि, तेनापि न वस्तुसिद्धिरित्याशङ्क्याह- *नहि भेददर्शनापवादेनेति*॥ *ननु* न ब्रह्मण एव संसार:, अपित्वविद्याविशिष्टस्य चैतन्यस्य, न स्वसंसाराय जगदुत्पादकत्वमित्याशङ्क्याह- *विरुद्धा चेति*॥ असङ्गस्य संसारासंबन्धात् तस्मिन् प्रतीतिर्न युज्यत इत्यर्थ:॥ *ननु* ''पादोऽस्य सर्वा भूतानी'' ति श्रुत्यैव सांशत्वं प्रतीयत इत्याशङ्क्याह- *पादोऽस्येति*॥ कथं श्रुतेर्भागे मुख्याया आनन्त्यमात्रपरत्वम्? मुख्यार्थहाने कारणाभावादित्याशङ्क्याह- *सांशत्वे चेति*॥ *ननु स्वाभाविकीति*॥ औपाधिके तु सांशत्वे न तदारभ्यत्वम्, नापि श्रुतिविरोध:; व्योमादावदर्शनादिति भाव:। एवं भेदाङ्गीकारेऽपि बन्ध-मोक्षव्यवस्था स्वपक्ष इति यदुक्तम्, तदपि न संभवति; स्वसंसाराय जगदुत्पादकत्वे विशुद्धस्याशुद्धत्वविरोधस्त्वत्पक्षेऽपीत्याह- *उपाधिभिश्चेति*॥

ननु जीव-संसारयोरुपाधिसंसर्ग:, अतो न दोष इत्याशङ्क्याह- *न चोपाधीनामिति*॥ *ननु*

जीवो ब्रह्मणो भिन्नः, अतः कथमन्याभावः? इत्याशङ्क्याह- *प्रागभिन्नानामिति*।। *ननु* उपाधिसृष्टेः प्रागपि नाभिन्नत्वम्; प्रागप्युपाधीनां कर्माविद्यादीनां भेदकानां विद्यमानत्वादित्याशङ्क्याह- *द्रव्येणैव द्रव्येति*।। औपाधिकः=उपाध्यधीन इत्यर्थः। *तर्हि तद्वदेवेति*।। नीलं पीतमिति यथा सामानाधिकरण्यं नास्ति, तद्वदत्रापि न भवेदित्यर्थः। अर्थतो भेदं निराकृत्य भेदे प्रमाणमपि नास्तीत्याह- *न च प्रत्यक्षादिरिति*।। यद्वा प्रमाणसिद्धे कथमारोपितत्वम्? इत्याशङ्क्याह- *न च प्रत्यक्षादिभिरिति*।। एवं स्वरूपतः प्रमाणतश्च भेदं निराकृत्येदानीं व्यवस्थाऽपि न संभवति, यद्वा- ''य आत्मनी''ति भेदस्यापि प्रतिपादनादत्यन्तं भेद इत्याशङ्क्याह- *कथं वा सत्यपीति*। *अभेदो नाभाव इति*।। न भेदाभेदवादिना भावाभावावेकत्राङ्गीकृतौ; अभेदशब्दस्य भेदाभावावाचकत्वादित्यर्थः। *तथाप्यहं मनुष्य इति*।। अयमर्थः- यद्यप्यभेदशब्देन न भेदाभावाभिधानम्; तथाऽपि न तदन्यवाचकत्वम्, किन्तु विरोधिधर्मान्तरम्; विरुद्धयोरपि चेदेकत्र स्थितिः, भावाभावयोरपि स्यादिति।। *ननु* सति भेदे भिन्नाकारसमवेतानामविद्या-काम-कर्मणां कथं ब्रह्मसंबन्धापादनम्? अभिन्नाकारसंबन्धाभावात्, नापि संसर्गासंसर्गाविरोधोऽस्ति, इत्याशङ्क्याह- *किञ्च प्रत्येकमिति*।।

ननु जीवाद् ब्रह्म मलभूयिष्ठम्; मलानां ब्रह्मात्मकत्वादित्याशङ्क्याह- *किञ्च ब्रह्मण्यविद्यादीति*।। ''निरवद्ये'' त्यविद्यराहित्यं प्रतीयते; ब्रह्मणो मलसंसर्गाङ्गीकारे तद्विरोधादित्यर्थः। अत एव पापीयानिति निरवद्यश्रुतावन्यतत्संबन्धो निषिद्धः, भेदाभेदे तदुभयं भवेदिति पापीयानित्युक्तम्। मा भूद् भेदमात्राद् व्यवस्था, उपाधिना व्यवस्थाभावदर्शनाद् अत्रापि सा भविष्यतीति चोदयति- *ननूपाधिभेदेनेति*।। ''परमार्थसत्यस्ये'' त्यनेन व्यावहारिकसत्यव्यवच्छेदः कृतः। *ननु* त्वत्पक्षेऽपि कथं व्यवस्था? इत्याशङ्क्य दर्शयति- *मिथ्याभेदेन त्विति*।। *ननु* संसारसंबन्धेऽपि न संसारित्वम्, किन्तु स्वगतत्वेन दर्शनम्, न च ब्रह्मणि तदस्ति, अतो न संसारित्वमित्याशङ्क्याह- *किञ्च ब्रह्म सर्वान् जीवानिति। *ननु भेदमपीति*।। भेददर्शनस्य विद्यमानत्वाज्जीवगतत्वेन पश्यतीत्यर्थः। *ननु* संसारित्वासंसारित्वं ब्रह्मणो न संभवति, किन्त्वसंसारित्वमेव; तद्धेतोर्भेददर्शनस्य सर्वदा विद्यमानत्वादित्याशङ्क्याह- *किञ्च सत्यपि भेददर्शन इति*। *ननु* देहधर्माध्याससमये भेददर्शनाभावात्तद्धर्मदर्शनमत्र; सर्वदा भेददर्शनात्, न जीवसंसारस्य स्वात्मनि दर्शनमित्याशङ्क्याह- *नह्यभेदापरोक्ष्ये सतीति*।। परोक्षस्तु नापरोक्ष्यनिमित्तकार्यप्रतिबन्धक इति भावः।। *ननु* भ्रान्तस्य भेदस्याभेदापरोक्ष्ये नापरोक्ष्यम्, सत्यस्य तु भेदस्याभेदापरोक्ष्येऽप्यापरोक्ष्यात्स्वात्मगतत्वेन संसारदर्शनाभावान्न संसारित्वमित्याशङ्क्याह- *सर्वाधारस्येति*।। सर्वस्यात्मतापरोक्ष्यं संसारित्वे हेतुः, आपरोक्ष्ये च सर्वज्ञत्वं हेतुः। ''सत्यत एवात्मनी'' त्यत्र सर्वाधारत्वं हेतुः।। यद्वा- पूर्व संसारित्वमात्रं जीवाभेदेनापाद्येदानीं सर्वसंसारसंबन्धो हेत्वन्तरेणापाद्यत इति, एवं सति निष्प्रयोजनतया शास्त्रमनारम्भणीयं स्यादित्याह- *किञ्च ज्ञानध्यानेति*।।

ननु सर्वोपाधिविलयेन मोक्षो भवत्वित्याशङ्क्याह-*न च सर्वोपाधीति*।। *ननु* त्वत्पक्षेऽपि समानोऽयं दोष:; एकोपाधिविगमेऽपीतरसंसारस्य स्वगतत्वेन दर्शनात् सर्वोपाधिविनिर्मोक्षस्याशक्यत्वादित्याशङ्क्याह-*मम पुनरिति*।। नानाजीवजपक्षाश्रयणेन व्यवस्थामुपपाद्यैकजीवपक्षाश्रयेण सर्वोपाधिक्षयोऽप्युपपद्यत इत्याह-*स्वप्नादिवदिति*।। यथा स्वप्नेऽनन्तोपाधिदर्शिन: परमार्थभूतस्यैकस्य प्रबोधे यत्किञ्चिदुपाधिजातं दृष्टम्, तस्य सर्वस्य प्रलये एवमत्राप्येक एव संसारी भ्रान्त्यानेकान् पश्यति, तस्य च तत्त्वज्ञाने सति तदज्ञानविजृम्भिते सर्वं प्रलीयत इत्यर्थ:। *ननु* एकजीवपक्षे तस्य मुक्तत्वात्संसारानुपलब्धि: स्यादिति चोदयति-*वामदेवादीति*।। यच्चोद्यमुभयो: समानं न तत्रैक: पर्यनुयोज्य:, अत्र तु तवैव दूषणम्; यत एकस्यैव बन्ध: तथात्वे च कस्यैकस्य बन्ध इति व्यवस्था न स्यात्; अनेकेषां प्रतीयमानत्वात्, अस्यैवेति निश्चयायोगात्। तदाभावे च शास्त्रे प्रवृत्तिर्न स्यात्; फलभाक्त्वानिश्चयात्, अथ य: सर्वान्, पश्यति भावान्, तत्र सर्वस्य कल्पितत्वाद्युज्येते बन्ध-मोक्षौ, तत्र तत्र च प्रवृत्तिरिति, मैवम्; अन्येषामपीतरसर्वदर्शित्वेन स्वस्यापीतराज्ञानकल्पितत्वसन्देहानिवृत्ते: सर्वेषां सत्यत्वमसत्यत्वं वा।।

ननु एकस्यैव बन्ध-मोक्षनिश्चय इत्याशङ्क्याह-*निरुपाधिकचैतन्येति*।। अत्र त्वदज्ञानपरिगृहीतत्वं कल्पितत्वमिति त्वन्मदादिशब्दै: परिच्छिन्नं चैतन्यमभिधीयते? किं वा विगलितनिखिलभेदं चैतन्यमिति? प्रथमपक्षे परिच्छिन्नानामविद्याश्रयत्वमवस्तुत्वान्न युज्यत इति न तदविद्याविजृम्भितत्वम्, द्वितीये तु ब्रह्मैवेति तदविद्याविजृम्भितत्वं सर्वेषामस्ति। तस्य चैकत्वान्न सन्देह:। ''निरुपाधिकचैतन्यप्रतिभासे त्वयी'' त्यनवच्छिन्नचैतन्यविवक्षयोक्तम्। निरुपाधिकत्वनिर्देशान्न पूर्वोक्तदोष इति भाव:। कथं तर्हि सोपाधिकेषु मुक्तिरिति? तदाह-*भ्रमादिति*।। कथं भ्रान्तत्वं शास्त्रत एव प्रतीतेरिति? तदाह-*तद्वचनानामिति*।। अत्रादौ निरुपाधिकचैतन्ये त्वयि ब्रह्मणीति ग्रन्थान्तरं पठन्ति, तत्रैवं व्याख्यानम्-वामदेवस्य न मुक्तता; त्वयि संसारप्रतीते:, तन्मुक्तिवचनस्यार्थवादत्वादिति।।

ननु व्यधिकरणमेतत्, नह्यन्यत्र संसारोपलब्धिस्तन्मुक्तिविरोधिनी। न च सर्वस्यार्थवादता; बन्ध-मोक्षोपपत्तेरित्याशङ्क्य बन्धत्वं निराकरोति-*निरुपाधिकचैतन्येति*।। अनन्तरशङ्कां परिहरति-*कस्यैकस्येति*।। *ननु मुक्तिसामर्थ्याद्बन्धनिश्चय इत्याशङ्क्याह-*सोपाधिकेति*।। *ननु* न भ्रान्तत्वं वचनात्, एवञ्च बद्धोऽपीत्याशङ्क्याह-*तद्वचनानामिति*।। एवं सति प्रत्येकं य: सन्देह आपाद्यते, यथैक: स्वाज्ञानपरिकल्पितत्वमितरेषां पश्यति, तथेतरेऽपि स्वाज्ञानपरिकल्पितत्वं ज्ञास्यन्तीति सन्देह: स्यादिति, तदपि परिहृतमित्याह-*एवं प्रत्येकमात्मन इति*।। एकस्यैवाविद्यया सर्वदर्शित्वादितरेषां तद्दर्शित्वाभावादित्यर्थ:। एतच्च सर्वं स्वप्ननिदर्शनेनोह्यम्।।

यत्पुनरुत्पन्नविद्यस्य कथं शिष्यत इति? न कथञ्चिदित्येवोत्तरम्। कथमुपदेश इति चेत्, न; कथञ्चित्; यावद्भ्रमं व्यवहाराः स्वप्नवत्, तदभावे न व्यवहाराः। *यत्पुनरत्र चोद्यमनुत्पन्नज्ञानस्य कथं विद्योदेति? उपदेष्टुरात्मान्तरस्याभावात्, न च गुरुणा विना ज्ञानोत्पत्तिः; "आचार्यवान् पुरुषो वेदे" ति श्रुतेः, *तदपि* प्रयोजकाज्ञानविजृम्भितम्-यतो मायाविनिर्मितभेदाश्रयेण गुरुशिष्यव्यवस्था स्वप्नवदेव। यच्चोत्पन्नज्ञानस्य भ्रान्त्यभावाच्छिष्यसङ्गत्ययोग इति, तदपि न सुन्दरम्; गुरोरपि शिष्याविद्याविजृम्भितत्वात्। तर्हि कल्पितस्य तत्त्वदर्शनाभावादुपदेष्टृत्वानुपपत्तिः, *मैवम्*; विद्यावत्त्वेनैव कल्पितत्वादुपदेष्टृत्वं स्वप्नवत्। यदि मदविद्याविजृम्भितो मद्गुरुस्त्वदविद्याविजृम्भितश्च त्वद्गुरुः, सर्वे च मदविद्याविजृम्भितास्त्वदविद्याविजृम्भिता वेति संशयः पुनर्भवेत्, तन्न; त्वन्मदादिशब्दैः परिच्छिन्नं चैतन्यमभिधीयते? अपरिच्छिन्नं वा? नाद्यः; कल्पितस्याविद्याश्रयत्वाभावात्। द्वितीये त्वद्वितीयत्वात् चैतन्यस्य न दूषणं किञ्चित्। कल्पितगुरूपदेशे ज्ञानानुदय इति, स्वप्ननिदर्शनेनैव पराहतम्। एवमादि सर्वं मनसि निधायाह- *एवं प्रत्येकमिति*।। विस्तरभयान्न प्रदर्श्यत इति*।। "तत्पदार्थैकतामि"त्यनेन तत्त्वंपदस्यार्थयोरैक्याकारेणेत्युक्तम्, तत्र तत्त्वंपदवाच्ययोः पदार्थयोः स्वीकारे न तज्ज्ञानेन विपर्यासनिरासः संभवति; अतत्त्वरूपत्वात्तस्येत्याशङ्क्य व्याचष्टे- *तत्त्वंपदाभ्यामिति*।। अर्थात्प्रलीयमानेनेति न युक्तं वक्तुम्; प्रमाणस्य साक्षाद्विद्यमानत्वात्, तद्विषयत्वे चार्थादित्युक्तमेव स्यात्; प्रमाणस्य विषयगतविपर्ययनिवर्तनसामर्थ्यात्, नापि तस्यान्यत एव प्रलीयमानत्वेऽवच्छेदकत्वनिरूपणं युज्यत इत्याशङ्क्यावतारयति- *प्रमाणव्यापार इति*।। कथमनिदंप्रकाशस्य फलत्वम्? प्रमाणजन्यत्वाभावादित्याशङ्क्य व्याचष्टे- *प्रमाणेन विषयीकृतेति*।। *ननु* अवच्छिन्नस्य निवर्तकत्वं न संभवति; निवर्त्यस्यावच्छेदकत्वविरोधादित्याशङ्क्याह- *अवच्छेद-निवृत्त्योरिति*।। "एवञ्च नित्यमुक्ते"त्यनेन नित्यमुक्तात्मनि कल्पितबन्धनिवृत्तिः साध्या। सा च निवृत्तिर्नानित्या; प्रध्वंसरूपत्वादित्युक्तम्, अथवा नित्यमुक्त एवात्मा, नतु मुक्तिः स्वरूपातिरिक्ता साध्यास्ति; स्वरूपातिरिक्तनिवृत्तौ तस्याः साध्यत्वे च प्रमाणाभावात्। न च-प्रपञ्चस्य स्थितिः स्यादिति-वाच्यम्; अभावोत्पत्तावप्यविशेषात्। अथाभावोत्पत्तौ विरोधात् पुनर्न तिष्ठेत्, तत्रापि यदि स्वरूपाभावो भवतीत्युच्यते? किं वान्यत्? प्रथमेऽनवस्था। द्वितीये स्वरूपस्थितिः। अथ विरोध्युत्पत्तावभावेन विनापि स्वरूपं न भवेत्, वस्तुमात्रमधिष्ठानं तिष्ठेत्, तर्हि भावविरोधिज्ञानोत्पत्तौ स्वरूपमेव न भवेत्। नत्वभावो नामात्मातिरिक्तः; आत्मनि तदभावव्यवहारादात्मैवाज्ञाननिवृत्तिरिति व्यवहारः। अभावस्तु न घटादावपि निरूपयितुं शक्यः-यथा प्रागभावेऽभावेन स्वरूपभङ्गः, एवमन्यत्रापि। न च घटस्यैव तदभावत्वम्; घटापगमे प्रागभावप्रसङ्गात्, तद्विरोधिसद्भावमात्रेणाभावेन विनापि वस्त्वपहारोऽङ्गीकृतः स्यात्। न च-केवलस्वरूपाङ्गीकारादेवाभावाङ्गीकार इति-वाच्यम्; कैवल्यस्य स्वरूपत्वेनाभाववादिभिरङ्गीकरणीयत्वात्। तथाहि-भूतले घट-तदभावावित्यङ्गीकर्तव्यम्, तत्र सघटे तदभावो न वर्तेत, नाभावयुक्ते

च घटः। नापि स्वरूपमिति युक्तं वक्तुम्; तद्युक्तेऽपि स्वरूपस्य विद्यमानत्वात्; अतः केवल इति वक्तव्यम्। नापीतराभावयुक्त इतरस्य भावः; तथात्वे तद्युक्ते तद्योग इति प्रसङ्गात् तत्रात्माश्रयत्वादिदोषप्रसङ्गः। *ननु* उभयरहितं केवलम्, न च राहित्यमभावः; उभयाभाववति तद्योगायोगात्, परस्पराभावरूपत्वेन न तस्यातिरिक्तस्य संभवः। न च श्रवणादिवैयर्थ्यम्; मुद्गराभिघातवत्परिहारात्॥

ननु कोऽयमिति॥ जीवो ब्रह्म तावन्मात्रमिति वक्तुं न शक्यते; एकेन पदेनैव तत्सिद्धावितरवैयर्थ्यादुपदेशानर्थक्यात्, ब्रह्मैव जीव इति प्रतिपादनं च न स्यात्; वैयर्थ्याद् लक्षणाश्रयणं च न स्यात्। अतिरिक्तत्वे तु निर्विभाग इति वक्तुं न शक्यते; ब्रह्मैव जीव इति च न सिध्येत्, अतो भिन्नाभिन्नत्वमेव सकलपदसाफल्यायैषितव्यमिति भावः। *ब्रह्मैवाविद्यादिप्रतिबिम्बितमिति*॥ ब्रह्मैवेत्यनेनैकत्वसिद्धिरुक्ता। ''अविद्यादी'' त्यनेनेतरपदवैयर्थ्यादि परिहृतमिति॥ *ननु एकस्मिन् तत्त्व एकेनैव पदेन लक्षणया लब्धे पदान्तरवैयर्थ्यं तदवस्थमित्याशङ्क्याह- *न चैतदिति*॥ *ननु* शास्त्रमेव ज्ञानाद् बन्धनिवृतिं श्रावयति, तत्कथमध्यासबाधो न स्यात्? इत्याशङ्क्याह- *वर्तमानापदेशिनामिति*॥ *ननु* बन्धनिवृत्तिप्रतिपादकशास्त्रे योग्यानुपलब्धिविरोधः; तथाविधज्ञाने सति निवृत्त्यभावानुपलम्भात्, विरोधित्वेन च तावज्ज्ञानस्य बन्धनिवर्तकत्वं सिद्धमित्याशङ्क्याह- *भिन्नाभिन्ने इति*॥ *ननु* न तत्त्वज्ञानात्तन्निवृत्तिः, किन्तु कर्मोपासनाजन्यज्ञानादित्याशङ्क्याह- *कर्मोपासनेति*॥ *ननु* अत्यन्ताभेदे बन्ध-मोक्ष-व्यवहारानुपपत्तिः, अत्यन्तभेदे च शास्त्रविरोधाद्भिन्नाभिन्नत्वमङ्गीकरणीयम्, तत्रौपाधिकत्वाद्भेदस्योपाधिनिवृत्त्या निवृत्तिरुपपद्यते, भेदांशावलम्बिशास्त्रविरोधाभावश्च; तस्याप्यौपाधिकभेदाश्रयत्वादित्येतदनुवदति- *यत्त्वभेदांशेनेति*॥

तन्मन्दचेतनोपच्छन्दनमात्रम्। मन्दचैतन्यानुसरणमित्यर्थः॥ *ननु* सर्वत्रैकस्मिन् वस्तुनि विरुद्धरूपसमवायो रूपभेदादिना परिहर्तव्यः नैवात्र कश्चिद्विशेष इत्याशङ्क्याह- *किञ्चांशिनो वेति*॥ *ननु* शास्त्रसामर्थ्यादुभयप्रतिपत्तौ घटाकाश-महाकाशन्यायेन प्राचीनदोषपरिहार इत्याशङ्क्याह- *किञ्च कस्यायं शास्त्रेति*॥ *ननु* अविद्यादिदोषवतां शास्त्रमुपदिशति, न च विरोधः, ब्रह्मणि संसारित्वं चौपाधिकत्वेन; भेदादिनिवृत्तेरित्याशङ्क्याह- *कस्यायमविद्यादोषेति*॥ कथं जीवनाशो भवेत्? अभेदांशस्य विद्यमानत्वादित्याशङ्क्याह- *अभेदांशस्येति*॥ न तस्य जीवत्वमिति भावः। *ननु* मोक्षावस्थासंबन्धिनो बद्धत्वम्, तेन न तन्नाशेन मुक्त्यभावः, अविद्यादोषायोगश्च; शास्त्रञ्च तस्यैव ब्रह्मरूपतामुपदिशतीति वक्तुं शक्यत इत्याशङ्क्याह- *कस्यायं मोक्ष इति*॥ न मुक्तौ ब्रह्म भिन्नाभिन्नम्; अतो नावधारणविरोधः, न मुक्त्यभावः; अभिन्नस्वरूपस्य विद्यमानत्वात्, न च ब्रह्मणि संसारप्रसङ्गः, अभेदांशस्य विद्यमानत्वात्, एवञ्चाविद्यानिर्वाहः। न चोपाधिजननात्प्रागसंबन्धो ब्रह्मणि वा योगः, इतरेतराश्रयत्वादित्याशङ्क्याह- *किञ्चायं सर्वत्रेति*॥

ननु न वयमभेदं कल्पयामः, अपि तु शास्त्रत एव प्रतीयते, तर्ह्यभेद एव स्यादित्याशङ्क्याह- *धर्मिप्रतियोगीति*।। *ननु* धर्मि-प्रतियोगिस्वरूपमात्रनिबन्धनं भेदं न ब्रूमः, येन तदसंभवेन भेदो निराक्रियते, अपित्वौपाधिकमित्याशङ्क्याह- *उपाधिभेदेनेति*।। *ननु* नोपाधिमात्रगतो भेदः, नापि तेन भेद एवापादित इति शक्यं वक्तुम्, उभयमपि शास्त्रसिद्धं यतः, इत्याशङ्क्याह- *शास्त्रं पुनरिति*।। न शास्त्रीयाभेदेन भेदनिषेधः; रूपान्तरनिबन्धनत्वात्तस्य, भेदनिषेधस्य चात्यन्तभेदविषयत्वादित्याशङ्क्याह- *न च सत्तादिसामान्येति*।। *ननु* तर्हि ज्ञानमात्रसाध्यत्वेन नित्यत्वेऽविद्यानिवृत्तिरेव, तेन न विवादः; बाधानुपपत्तिश्चेत्याशङ्क्याह- *न चाविद्यानिवृत्तीति*।। कथमुभयमपि ज्ञानसाध्यमिति? तदाह- *तरति शोकमित्यादिना*।। *नित्यसिद्धतेति*।। विज्ञानाविषयत्वे तद्भावस्य ज्ञानात्प्राक् प्रसिध्या भवितव्यम्, पूर्वसिद्धौ न ज्ञानसाध्यता, तदभावे नित्यसिद्धतेति भावः। *ननु* तादात्म्य-तदभावयोर्विरोध एवासिद्धः, तत्कथं यौगपद्यं निराक्रियते? इत्याशङ्क्याह- *किं तादात्म्यनिवृत्तेरिति*।। अन्यत्वेऽपि स्वरूपातिरिक्तम्? स्वरूपम् वा? नाद्य इत्याह- *अन्यश्चेत्तर्हीति*।। द्वितीयेऽपि जीवस्वरूपं ब्रह्मस्वरूपं वेति विकल्पं मनसि निधायाह- *कश्चायमिति*।। *ननु* स्वरूपतावन्मात्रत्वं न तादात्म्यनिवृत्तिमात्रम्, अपि तु शुद्धस्वरूपेणावस्थानम्; अतो न पूर्वोक्तदोष इत्याशङ्क्याह- *किं तादात्म्येति*।। *ननु* शास्त्राद् भेदः प्रतीयते, फलश्रुतिसामर्थ्यात् तद्भावः, अतो द्वयमपि शास्त्रसिद्धम्, तादात्म्यज्ञानस्य तन्निवर्तकत्वम्, तद्भावस्य साध्यत्वम्, नित्यत्वं चेत्याशङ्क्याह- *न च तत्त्वंपदाभ्यामिति*।। वाच्ययोः सामानाधिकरण्यं पूर्वमेव निरस्तमिति।। *ननु* तर्हि पदान्तरवैयर्थ्यम्; एकेनैव पदेन लक्षणायां तत्त्वसिद्धेरित्याशङ्क्याह- *न चैकेनैवेति*।। फलश्रुतिसामर्थ्यात्तद्भावः प्रसङ्गत इति यच्चोद्यम्, तत्परिहरति- *फलश्रुतयश्चेति*।। ज्ञानसाध्यत्वेन नित्यत्वसिद्धिरिति यदुक्तम्; तत्राह- *न च ज्ञानसाध्यस्येति*।। *ननु* भावनाख्यः संस्कारोऽपि क्रियाजन्यः, अतो न ज्ञानसाध्यत्वस्य व्यभिचार इत्याशङ्क्याह- *न च संस्कारस्यापीति*।। भावनायां ज्ञानान्वय-व्यतिरेकौ दृश्येते; तस्मिन् सत्येव भावात्, असति चाभावात् तद्विरोधोऽपि।।

यद्वा-स्मृतिहेतुत्वं निराकर्तु न युक्तम्; अन्वय-व्यतिरेकविरोधात्, अतः क्रियाजन्यत्वमपीत्याशङ्क्याह- *अन्वयव्यतिरेकेति*।। अनुमानात्क्रियासाध्यत्वप्रतीतावन्वय-व्यतिरेकघटनं कथं क्रियते? इति चोदयति- *अब्रह्मज्ञानेति*।। *ननु* जीवस्य नित्यस्य नित्यब्रह्मतादात्म्ये कथं स्वरूपनाशः? जीव-ब्रह्मणोस्तत्तादात्म्यस्य न नित्यत्वात् कथंचित्तत्तादात्म्यानित्यत्वशङ्का युज्येतापि, स्वरूपनाशस्त्वयुक्त इत्याक्षिपति- *कथमिति*।। *ननु* प्रमाणान्तरविरोधाभावे प्रामाण्यं युज्यते। यद्वा-कथं वर्तमानापदेशत्वेनान्यसापेक्षत्वम्? स्वस्य प्रामाण्याभावश्च? इत्याशङ्क्योपपादयति- *यथाश्रुतार्थ इति*।। न च तदानीं पुनरावृत्तिः प्राप्ता; अतोऽप्राप्तप्रतिषेध इति। *ननु* प्राप्तप्रतिषेधसिद्ध्यर्थं नावर्तिष्यन्त इति कल्प्यत इत्याशङ्क्याह- *नावर्तिष्यत इति*।। तर्हि जीवस्यैव स्वरूपेणावस्थानमस्त्वित्याशङ्क्याह- *

तस्यैव स्वरूपेणेति*।। *ननु* प्रतीकोपासकानां मूर्धन्यया गमनमेव कथममृतत्वमापादयतीत्याशङ्कयाह- *मूर्धन्यनाड्यैवेति*।।

ननु न प्रतीकालम्बनानाममृतत्वम्; ब्रह्मप्राप्त्यभावात्, ''अप्रतीकालम्बनान्नयती'' ति साधितत्वात्, अतस्तद्व्यतिरिक्तानां ब्रह्मप्राप्तिरमृतत्वं चेति चोदयति- *ननु स एनानिति*।। कार्यब्रह्मणोऽस्मिन् वाक्ये प्राप्यत्वावगमाद् न प्राप्तेर्नित्यत्वमिति परिहरति- *न कार्यब्रह्मेति*।। *ननु ब्रह्मशब्देति*।। ब्रह्मशब्दस्य वा मुख्यार्थत्वम्? अर्थस्य वा? तत्र प्रथमपक्षे दूषणमाह- *यदि तावदिति*।। न द्वितीय इत्याह- *अथावयवेति*।। अत्रापि किं योगरूढवृत्त्युपादानेन ब्रह्मसिद्धिः? योगमात्रेण वा? नाद्य इत्याह- *नैवमेकस्येति*।। न द्वितीयः; 'रूढिर्योगमपहरती'ति न्यायात्।। अथ प्रयोगमुख्यत्वेन तत्स्वीकार इति, नेत्याह- *प्रयोगमुख्यत्व इति*।। *ननु* रूढिपक्षे कार्यमेवेति नियमः कथम्? उभयत्राविशेषेऽन्यतरनिर्धारणायोगात्, परस्मिन्नेव मुख्यः, कार्ये तु गौणः; न च गौणार्थस्वीकारो मुख्यसंभवे, इत्याशङ्क्याह- *किञ्च स एनानिति*।। *ननु* ब्रह्मैव लोक इति कर्मधारयबलीयस्त्वात्परमेव ब्रह्म प्रतीयत इत्याशङ्क्याह- *न च ब्रह्मैव लोक इति*।। *ननु* योगसंभवे रूढिकल्पना न युक्ता; गौरवादित्याशङ्क्याह- *यौगिकत्वेऽपीति*।। *ननु* भवतु योगसंभवः; न रूढिः, योगभावे तु कथं कर्मधारयसमासस्तन्निबन्धनः? न तत्पुरुषस्वीकारः? इत्याशङ्क्याह- *ब्रह्मणि लोकशब्देति*।। *ननु* श्रुति-लिङ्गविरोधे श्रुतिर्बलीयसी, तत्कथं ब्रह्मशब्दस्यार्थोऽन्यथा नीयते? इत्याशङ्क्याह- *नचैतेषामिति*।। बहुतरलिङ्गानुगृहीतश्रुतिद्वयविरोधेन तस्य हानमिति भावः।

ननु अन्यथासिद्धत्वे श्रुति-लिङ्गाभ्यां ब्रह्मशब्दस्य तदनुरोधेन वर्तनम्, अत्र वैपरीत्यम्, ब्रह्मशब्द एवानन्यथासिद्धो ग्राह्यः; साक्षात्प्राप्यविषयत्वात्, लोकसमादिप्राप्तिस्तु मार्गपर्वप्राप्तिवदर्वाचीना निर्दिश्यते, अतो न लिङ्गविरोधः। प्रजापतिशब्दः सभाविशेषितो न प्राप्यविषयः; लोकशब्द-बहुवचनयोर्गुणे त्वन्याय्यकल्पनेति न्यायेन-''पाशानि'' त्यत्र प्रातिपदिकार्थस्य प्राधान्यात्तस्य प्रामाणत एकत्वेन सिद्धत्वात्तदनुरोधेन गुणे विभक्तिरूपेऽन्यायकल्पना मुख्यार्थहानं क्रियते,-तद्वदत्रापि प्रथमश्रुतत्वेन प्रबलत्वात्तदनुरोधेन लोकशब्दो वर्तते, ब्रह्मैव लोक इति समासाश्रयणे लोकस्य विशेषणत्वे वैपरीत्येनान्याय्यकल्पनादिति वाच्यम्; यतो ब्राह्मण एव प्राप्यत्वं न लोकस्य; ''ब्रह्म गमयती''ति श्रुतेः। न च ''ब्रह्मलोकानि''ति श्रुतिबलात्तत्पुरुषसमासाश्रयेण लोकस्य प्राप्यत्वं कल्प्यम्; तस्य ब्रह्मविषयत्वेनैकवाक्यत्वसंभवे वाक्यभेदस्यायुक्तत्वात्। न च तेषामेव प्राप्यत्वम्; श्रुत्यन्तरविरोधात्, एकवाक्यत्वेनान्यथासिद्धत्वाच्च, विकल्पस्य चायुक्तत्वात्। अतः कालविशेषादीनामविरुद्धत्वात्परमेव ब्रह्म प्राप्यमित्याशङ्क्याह- *किञ्च पञ्चाग्निविदामिति*।। न च तेषां ब्रह्मप्राप्तिर्युक्ता; अब्रह्मोपासकत्वादित्यर्थः। *ननु* ''स एनानि'' त्यत्र पञ्चाग्निविदां निर्देशो नास्ति, तेन न दोष इत्याशङ्क्याह- *न च स एनानिति*।। न सन्निधिमात्रेण निर्देशः, किन्तु योग्यतया। न चात्र योग्यत्वमित्याशङ्क्याह- *तेषामनिर्दिष्टफलत्वेति*।।

*ननु अनिर्दिष्टफलत्वे योग्यफलान्तरमेव कल्प्यताम्, ब्रह्मोपासकानामेव तत्प्राप्तेरित्याशङ्क्य तत्प्राप्त्युपपत्तिमाह- *किञ्च गायत्रीति*।। *ननु* उपासनोपचयेऽपि न फलोपचयो जायते, नापि वैयर्थ्यमित्याशङ्क्य- *नह्यग्निहोत्राद्यनुष्ठानेति*।। *ननु* विकारासंसृष्टे ब्रह्मण्यपि सत्यकामादयः सर्वे गुणाः सन्त्येव; साधारणत्वेनोपास्यानामानन्दादीनां सर्वोपासनासु प्राप्तेः, असाधारणा तु गुणप्राप्तिः, तत्तदुपासकानां गुणसद्भावो ब्रह्मण्यविशिष्ट एव ''ब्राह्मेण जैमिनिरि'' त्यत्रोक्तः, अतो न दोष इत्याशङ्क्याह- *किञ्च वैश्वानरोपासनेति*।। *ननु* वैश्वानरत्वं प्राप्य पश्चात् क्रमेण ब्रह्मप्राप्तिः, तत्प्राप्तस्य च न विकारः, तेन न विरोध इत्याशङ्क्य शुद्धप्राप्तौ दूषणमाह- *किञ्च पित्रादिसंकल्पैरिति*।। *ननु* पित्रादिसंकल्पनिमित्तभोगे निर्विकारब्रह्मण्यङ्गीक्रियमाणेऽपि न ब्रह्मणः पित्रादियोगप्रसङ्गः; तत्प्राप्तस्य मुक्तस्यैव भोगाङ्गीकारादित्याशङ्क्याह- *किञ्च विकारावर्तीति*।। *ननु* नाप्तकामत्वविरोधः; आप्तकामस्यापि राज्ञोऽत्यन्ताल्पकञ्चुकादिविषयेच्छादर्शनादित्याशङ्क्याह- *स्वार्थप्रयुक्ता चेति*।। *ननु* ब्रह्म प्राप्तस्य ब्रह्मत्वेऽपि न ब्रह्मणो भोगादिप्रसङ्गः, घटाद्युपाध्युपलक्षित इवाकाशे स्वरूपप्राप्तेऽपि धर्मान्तरसंबन्धेऽपि यथा नाकाशमात्रसंबन्धः, तथात्रापीत्याशङ्क्य तस्यापि भोगानुपपत्तिमाह- *किञ्च विकारावर्ति ब्रह्म प्राप्तस्येति*।। *ननु* पूर्वस्य लिङ्गशरीरस्य प्रलये सति ब्रह्मप्राप्तौ शरीरेन्द्रियाद्यन्तरस्य सृष्टत्वान्न प्रविलयश्रुतिविरोधः, नापि ''मनसैतानि''ति श्रुतिविरोध इत्याशङ्क्य, न शुद्धे ब्रह्मणि लिङ्गशरीरप्रविलय इत्याह- *किञ्च तत्र लिङ्गशरीरेति*।। *ननु* संसारमण्डलमतिक्रम्य त्रिपाच्छब्दवाच्ये ब्रह्मणि प्रविलय इत्याशङ्क्याह- *न चोपरिष्टादिति*।। *ननु* जीवस्य ब्रह्मांशत्वात्तस्य च शरीरेण विना गमनासंभवाच्छरीरस्यापि गमनं निश्चीयते, तत्र लयश्रवणाल्लयोऽपि निश्चीयते, तत्कारणं यथासंभवं स्थितिहेतुकर्माभावादनुवृत्ताविद्यया तत्संस्कारेण वा मोक्षार्थं कर्म वा भविष्यति, अतः पूर्वस्य लय उत्तरोत्पादस्तत्र भोगश्चोपपद्यत इत्याशङ्क्याह- *किं चौपाधिकजीवपक्ष इति*।। *शास्त्रान्त्येति*।। तस्मिन् पादे ब्रह्मप्राप्ति-प्राप्यस्वरूपनिरूपणम्, संकल्पात्पित्रादिगमागमः, मानसः शरीरश्च भोगः, तत्र च विशेषनिरूपणं कृतम्, तस्य सर्वस्य फलश्रुतीनामन्यार्थमारम्भः स्यादित्यर्थः।।

''अहं कर्तुरिदमंशस्ये''-- त्ययुक्तम्; कर्तुर्हि संस्कारः, न चाचेतनस्य वैदिककर्माणि, तदभावे न संस्कार्यत्वं कर्तृत्वेन, संस्कार्यत्वेन वा भोक्तृत्वमपि तस्य स्यात्; प्रयोक्तृगतत्वाद्भोक्तृत्वस्य, बन्धमोक्षाधिकरणत्वं च स्यात्, नचैतदचेतनेषु युज्यत इत्याशङ्क्य व्याचष्टे- *अयमर्थः-यः साधनानीति*।। *ननु* संवलितस्य संस्कार्यत्वेऽहङ्कारापगमे संस्कृतस्यागतत्वाद्भोगानुपपत्तिः स्यादित्याशङ्क्याह- *स चासंसारसमाप्तेरिति*।। *ननु* संस्कारो धर्माधारत्वयोग्यत्वलक्षणः, अतस्तदाधार आत्मनि संस्कार्यत्वम्, नान्तःकरण इत्याशङ्क्याह- *तत्र च धर्माधर्मेति*।। ज्ञानस्याजन्यफलत्वमात्रमुक्तम्, न क्रियाफलस्य किञ्चिदुक्तम्, तत्रार्थसिद्धिरिति वृत्तकीर्तनव्याजेनाह- *जन्याजन्यफलत्वेनेति*।। वृत्तकीर्तनव्याजेनाजन्य-

फलत्वादिति टीकापदेऽजन्यं फलं यस्येति विग्रहः प्रदर्शितः। इदमपरं वैलक्षण्यमित्ययुक्तम्; ज्ञानस्याचोदनाजन्यत्वं यत्तत्क्रियायामविशिष्टम्; चोदनायाः क्रियोत्पादकत्वाभावादित्याशङ्क्याह- *पुरुषेच्छाप्रयत्नेति*।। *ननु* पुरुषेच्छाप्रयत्नसाध्यत्वमपि न वैलक्षण्यम्, ज्ञानेऽपि तत्साध्यत्वदर्शनादित्याशङ्क्य व्याचष्टे- *विधिजन्येति*।। *ननु संयोगविभागेति*।। संयोगविभागप्रचये बाहुल्ये सति चलतीति प्रत्ययदर्शनात्तदभावे चादर्शनान्न तद्व्यतिरिक्तक्रियेति भावः*।। *ननु* प्रत्यक्षमेव तदतिरिक्तत्वेन विलक्षणरूपविषयं ज्ञानम्, तत्कथं प्रश्नः? इत्याह- *ननु चलतीति*।। प्रत्यक्षमिति*।। *तदपीति*।। तेषु सत्सु भावादसत्स्वभावादित्यर्थः।। *ननु* चलतीति ज्ञानं न संयोगविभागालम्बनम्; अतिप्रसङ्गादिति चोदयति- *ननु स्थाणावपीति*।। *सर्वस्य चेति*।। आकाशस्यैवावकाशदातृत्वादित्यर्थः। *ननु* अप्रतीयमानेऽप्याकाशे खद्योतचलनं खद्योतगतसंयोगविभागालम्बनम्, का क्षतिरिति? तदाह- *न च देशमिति*।। ''कादाचित्कत्वादिति'' हेतू रूपादिष्वनैकान्तिकः, तदर्थम्- *व्यवस्थितेति*।। *द्रव्ये इति*।। कादाचित्कत्वे विवक्षितातिशयपुरःसरत्वादित्यर्थः। *ननु* अन्यतरकर्मजसंयोगविभागयोरपि स्वाश्रयगतातिशयपुरःसरत्वमस्ति; जलस्य सक्रियत्वात्, अतो नानैकान्तिकत्वमित्याशङ्क्य विकल्प्य दूषणान्तरमाह- *किञ्च संयोगविभागेति*।। *ननु* अभिघातादिकारणान्तरेण कर्मोत्पद्यते, तच्च स्वकारणात्, अतो नानवस्थादि, अत्र त्वन्यस्यासंभवात्कर्मसिद्धिरित्याशङ्क्याह- *पादाश्रयस्येति*।। भूसमवेतत्वाकारे भूमेराश्रयत्वम्, न च तत्र क्रियादियोगः, तेनानैकान्तिको हेतुर्न स्वाश्रये क्रियां साधयतीति भावः।

''एवं सम्यग्ज्ञाने''त्यनेन वस्तुतन्त्रत्वे सम्यग्ज्ञानत्वमुक्तम्, तत्र मा भूत् सम्यक्त्वम्, विधिजन्यत्वनिराकरणमत्र प्रस्तुतं नान्यदित्याशङ्क्याह- *किञ्च वेदान्तेति*।।

युक्ता तस्यार्थवादतेति*।। तद्वाक्यस्येत्यर्थः। प्रथमसूत्रेणेति कथमुक्तम्? प्रथमसूत्रस्य ह्यर्थचतुष्टयं निरूपितं पूर्वम्, नायं तदन्तर्गत इत्याशङ्क्य व्याचष्टे- *मननिदिध्यासनेति*।। ''अपिच नैवायमि''ति पुनरुक्तः; पूर्वग्रन्थेऽपि विधायकत्वनिराकरणेन स्तावकत्वं दर्शयताऽर्हार्थत्वमुक्तमेवेत्याशङ्क्यावतारयति- *विधीनामिति*।।

ननु ''ज्ञातव्यः'' इत्यादिवाक्यसाम्येन नोपासनाविधाननिराकरणं युक्तम्; तव्यप्रत्ययस्यार्थान्तरत्वेन तत्राविधायकत्वम्, नात्र तथेत्याशङ्क्योपपादयति- *सर्वत्रैवकारेति*।। सविशेषणवाक्ये विशेषण एव विधिः संक्रामतीत्युक्तमेवेति न विधानमिति तात्पर्यम्। ''यदपि केचिदि'' त्यादिना किमाक्षिप्यते? न तावद्वेदान्तप्रामाण्यम्; पूर्वमेव परिहृतत्वात्, नापि स्वरूपे प्रामाण्यासंभवेन कार्ये प्रामाण्यमुच्यत इति युक्तम्; तत्रापि कर्मापेक्षितकर्तृप्रतिपादनेन तच्छेषत्वं संभवतीति प्रथमवर्णक एवोक्तत्वाद् वेदान्तवाक्येष्वपि

विधानसंभवेन न तन्निष्ठत्वमित्युक्तम्, अतो विधिमन्तरेण ब्रह्मणि प्रामाण्यस्य सिद्धत्वादाक्षेपान्तरादर्शनादनारम्भ इत्याशङ्क्यावतारयति- *उक्तमेतदिति*।।

ननु प्रमाणान्तरानपेक्षे प्रामाण्ये विधिनिरपेक्षत्वे च साधिते केन हेतुनाऽऽक्षेप इति पृच्छति- *कथमिति*।। *उद्देश्यताऽभावादिति*।। प्रसिद्धत्वाभावादित्यर्थ:।। *ननु* लोके सिद्धार्थत्वेन प्रामाण्यमस्ति; सिद्धे व्युत्पत्तेरित्युक्तम्, अतो वेदान्तानामपि स्वरूपप्रामाण्यसंभवे कथं सिद्धे प्रामाण्याभाव:; कार्यपरत्वं च सिद्धवत्कृत्य कथं कर्माङ्गत्वमुच्यते? नापि वेदान्तप्रतिपाद्यशुद्धचिदानन्दरूपस्य कर्मण्युपयोग:, प्रत्युत वैपरीत्यमप्युक्तम्, अतो नाक्षेपकारणे आक्षेप्ये चाधिक्यमुपलभ्यत इत्याशङ्क्याह- *तथा च कर्मण्येवेति*।। अत: स्तुति-प्रतिपादनयोरुपयोगो नास्तीत्यादि परास्तम्; सिद्धे कर्मार्थत्वे प्रमाणतस्तदुपयोगस्यापि संभावयितुं शक्यत्वात्।।

ननु अधिकारिण: कर्तुश्च शास्त्रीयस्य कर्मसंबन्धप्रतिपादनं दृश्यते, तद्वत्स्यादित्याशङ्क्याह- *अधिकारिणं कर्तारमिति*।। *विधिमात्रप्रतिपादनाद्विधीयत इति*।। विधिरिति *इष्टसाधनत्वप्रतिपादनादित्यर्थ:*।। *औपनिषद इतीति*।। श्रुतिस्मृतिविरोधात्। आपस्तम्बस्मृति-रितरतदविषया वा स्मृतिर्वेत्यर्थ:। न च सिद्धे प्रामाण्याभावात्तद्धितश्रुतिर्न ब्रह्मपरत्वं बोधयतीति युक्तम्; आपस्तम्बेऽपि तुल्यत्वात्। न च वेदस्यैव कार्यपरत्वमिति युक्तम्, सिद्धे बोधदर्शनादितरेतराश्रयप्रसङ्गात्। "इतरश्च न शक्यते" इत्यनेनोद्देशेनासंभवेनापि न मिथ्यात्वम्; अहंप्रत्ययावसेयस्योद्देश्य-त्वादित्युक्तमित्यनुवादव्याजेन दर्शयति- *ननु अहंप्रत्ययगम्यमिति*।।

उच्यते-नैव सूत्रकारेणेति कथमुक्तम्? सूत्रभाष्यवचनस्य दर्शितत्वात्, न च तदभिप्रायस्यान्यथात्वद्योतकं किञ्चिदुपलभ्यते, नापि न्यायस्य, तत्कथमज्ञानमुक्तमिति पृच्छति- *कथमिति*।। तत्र न्यायापरिज्ञानं तावद्दर्शयति- *सम्यगवगत इति*।। न्यायस्वरूपे निर्धारिते तन्मूलत्वेन सूत्राभाष्याभिप्रायोऽपि स्पष्टो भवति। तन्मूलत्वेन दौर्बल्यादादौ न्यायप्रदर्शनम्। न्यायेऽपि सन्देहनिवृत्त्यर्थ वृद्धपरिग्रहप्रदर्शनेन तत्स्वरूपं दर्शयति- *तत्र लौकिकन्यायमनुसरतेति*।। कोऽयमभिहितान्वयो नाम? कथञ्च तत्प्रतिपादने सिद्धे प्रामाण्यलाभ इति? तदाह- *पदेभ्य: प्रतिपन्नानामिति*।।

ननु शब्दानन्तर्ये विद्यमाने कथं संसर्गबोधोऽर्थनिबन्धन:? इत्याशङ्क्याह- *तत्र श्रोतु: प्रवृत्त्येति*।। "तदर्थक्रियानुपयोग्यर्थवाचिनामि" ति टीकाग्रन्थस्यायमर्थ:-स चासवर्थश्चेति तदर्थ:। तदर्थस्य क्रियोत्पत्ति:। यद्वा-तदर्थ एव क्रिया, तत्रानुपयोग्यर्थवाचिनामिति। एतदुक्तं भवति- *प्रयोजन-तत्साधनव्यतिरिक्तवाचिनामानर्थक्यमिति*।। टीकाग्रन्थमुपजीव्य चोदयति- *ननु भूतार्थ इति*।। नाप्रतिपन्नभूतार्थावगते: संभव इति। किमुक्तं पूर्वमनवगतस्य भूतस्य तदानीं प्रतिषिध्यते?

उतोत्पत्तिकालेनावगतस्येति? उभयस्याङ्गीकरणान्न दोष इत्याशङ्क्य व्याचष्टे- *भूतार्थविशिष्टं कार्यमिति*।। पूर्वोक्तप्रतीतिमात्रानुपपत्त्या चोदयति- *ननु संसृष्टस्वार्थ इति*।। व्युत्पत्तिकाले शक्तिविषयतयाऽप्रतिपन्नशुद्धभूतार्थावगतेस्संभवो नास्तीति व्याख्यातम्।। ''ननु क्रियार्थतये''ति न युक्तम्; नियोगवादिनोऽपसिद्धान्तप्रसङ्गात्, तदर्थत्वं त्वभिहितान्वयवादिनाप्युच्यते; क्रियायास्सर्वप्रयोजनत्वाङ्गीकारात्, तेनायुक्तमित्याशङ्क्य व्याचष्टे- *नियोगसंसृष्टतयेति*।। व्याख्यातम्। *ननु कार्यसंसृष्टेति*।। अयमर्थः-कार्यसंसर्गस्य व्युत्पत्तिकाले व्यभिचाराभावेऽपि कार्यान्वयमध्यगतस्येतरान्वितस्याव्यभिचाराल्लाघवात्तस्यैव शक्तिनियामकत्वं युक्तमिति। ''नहि गोपदादि''ति टीकाग्रन्थेन गोपदस्य सास्नादिपिण्डस्य धर्मभूतगोत्ववाचकत्वे सिद्धे प्रयोगान्तरे स्वनिष्ठगोत्ववाचकत्वमन्यधर्मवाचकत्वञ्च यथा न युक्तम्; व्युत्पत्तिविरोधात्, तथात्रेत्युक्तम्, तदयुक्तम्; नात्रोत्तरत्र प्रतीत्यापादनं क्रियते, किन्तु चित्तविरोधलाघवेन व्युत्पत्तिरेव योग्येतरान्वितस्वार्थे भवत्विति चोदितत्वात्, न हि प्रयोजकलाघवे संभवति स्थितिमात्रेण विशिष्टस्य प्रयोजकत्वाश्रयणं युक्तमित्याशङ्क्याभिप्रायमाह- *अयमाशयो गामानयेति*।। *प्रथमावगतेति*।। अनेन च विशिष्टस्य प्रयोजकत्वाश्रयणे कारणमुक्तम्।। *ननु* पदानां पदार्थमात्राभिधायकत्वे पदार्थेभ्य एव वाक्यार्थावगमसंभवे तद्धानेन पदानामेवान्विताभिधायकत्वाश्रयणमयुक्तमित्याशङ्क्याह- *मध्ये च पदार्थतच्छक्तिव्यवधानेति*।। ''विषम उपन्यासः'' इत्यादि परस्परविरुद्धमिवाभाति; गोपदस्येत्यनेनैकेन पदेनैकरूपैव प्रतीतिः सामर्थ्यैकरूपत्वादित्युक्तम्। ''शब्दार्थान्तरान्वयः'' इत्यनेनेतरान्वयप्रतीतिः कथमित्याशङ्क्य तद्घटनं कृतमिव प्रतिभाति, व्युत्पत्तिकाल एवान्वीयमानपदस्य विभक्तेर्वाऽन्यत्वे तद्योग्यार्थान्वयदर्शनात्संभूय समुच्चरितेषु प्रयोगस्येदंपरत्वे ज्ञाततत्तदन्वयप्रतीतेरनियतस्संबन्ध इत्युक्तत्वात्। न च गोत्वमात्रे नियतस्संबन्धोऽनियतस्त्वन्वित इत्यविरोधः; शक्तिद्वयाभावात्।। *ननु* स्वरूपे संबन्धिदर्शनमात्रात्स्मृतिः, शक्त्या त्वन्वितप्रतीतेरनियतत्वमित्यविरोधः; एवं तर्हि न परिहारः; पूर्ववादिनाप्यङ्गीकृतत्वात्, पूर्वग्रन्थे गोत्वे व्युत्पत्त्यनुसारेण प्रतिपत्तिदर्शनात्कार्येऽपि तथा स्यादित्युक्ते तद्वैषम्यमनेनोच्यते, युक्तं गोत्वे सास्नादिधर्मभूतस्यैव प्रतीतिर्न स्वनिष्ठस्यान्यधर्मस्य वा व्युत्पत्तिसमयेऽनेकप्रकारगोसामर्थ्यप्रतिपत्त्यभावादिति।। ''शब्दार्थान्तरे''त्यनेन व्युत्पत्तिकाल एवानेकान्वयप्रतिपत्तिदर्शनान्न कार्येण नियतस्संबन्धः, अपि तु योग्येतरान्वित इत्युक्तम्, अतः समञ्जसः परिहार इति। तथाऽपि न निर्वाहः; कार्यस्याव्यभिचारात्तदन्वितत्वहानं न युक्तम्; प्रधानेन चेतरेषामन्वयात्, इतरान्वयप्रतीतेः पार्ष्ठिकत्वात्, इतरथाऽन्यान्वित एव शक्तिरित्याशङ्क्याह- *नहि प्रयोगभेदेष्विति*।। *ननु* गुण-गुण्यादिसंबन्धे सत्यपि न कार्यान्वयभङ्गः; सर्वपदानां कार्यान्वितस्वार्थत्वस्याव्यभिचारात्, गुण-गुण्यादिसंबन्धस्तु पार्ष्ठिकः, अतस्तद्दर्शनान्न कार्यान्वयभङ्ग इत्याशङ्क्याह- *क्रियाद्वारश्चेति*।।

ननु अन्यान्वितस्वार्थाभिधानं न युज्यते; सर्वपदानामेकवाक्यार्थप्रमितिसिद्धये प्रयोगान्नास्मिन् पक्षे तत्संभवति। न च तेषामेव पुनर्वाक्यार्थप्रत्यायकत्वं संभवति; विरोधात्, सकृत्कार्यद्वयस्य शक्तिश्च तत्र कल्प्येत, तथा सति गौरवान्नान्यान्विततासंभव इत्याशङ्क्याह- *क्रमेण गुणक्रियेत्यादिना- संसर्गविरोध इत्येवमन्तेन*।।

ननु अव्यभिचरितत्वं कार्यस्य, तेन सर्वपदानां कार्यान्वितस्वार्थाभिधायकत्वं निश्चीयते, इतरथा नियमेनान्वयविरोध इत्याशङ्क्याह- *प्रमाणान्तरग्राह्यत्ववदिति*।। कार्यान्वितस्वार्थाभिधायकत्वेऽनुवाद-कत्वमिति यदुक्तम्, तदयुक्तम्, नहि प्रमाणान्तरं कार्यसंसृष्टपदार्थे प्रवृत्तमस्ति, येनानुवादः स्यादित्याशङ्क्याह- *कार्यान्वितस्वार्थेष्विति*।। *ननु* नानुवादकत्वं पदानाम्, येन व्युत्पत्तिकाले कार्यान्वितमात्रान्वितज्ञानम्, प्रतीतिकाले तु कार्यविशेषान्वयः सन्निधानात्प्रतीयते, तेन नानुवाद इत्याशङ्क्याह- *न च कार्येणेति*।।

यद्वा- इतरान्वितस्वार्थाभिधायकत्वाङ्गीकारेऽपि पुनर्वाक्यार्थप्रतिपादकत्वकल्पनाद् वरं साक्षात्कार्यान्विते शक्तिरिति वक्तुं न शक्यते; अनिर्धारितस्य शक्तिप्रतियोगित्वाभावात्, अव्यवस्थितश्च पदार्थः स्यात्, न च स्वर्गादेः साध्यत्वेनान्वयः संभवति; कृतिसाध्यताऽभावात्, अतो व्यवस्थितसिद्धपदार्थ-सिद्धयेऽव्यभिचारिकार्यान्वयो वक्तव्य इत्याशङ्क्याह- *किञ्च कार्यस्येति*।। *न नियोगान्वयेति*।। कार्यस्य साध्यत्वसिध्यर्थविषयत्वेनान्वितयागस्य करणत्वे पश्चात्कार्यसाध्यत्वमङ्गीक्रियते, तेन पूर्वं कार्यत्वाभावान्न तदाकारेणान्वय इत्यर्थः।।

ननु चैकस्मिन् पदे व्यभिचारभयेन बहुपदानां कार्यान्वितार्थत्वहानमयुक्तम्; अव्यभिचारात्, किन्तु सर्वपदानुरोधेन तत्राप्यनन्यनिबन्धनं कार्यत्वमेवेति कार्यान्वयित्वमेव; लोके च तस्य कार्यत्वं दृश्यते, अतो नाव्यभिचरितकार्यान्वयहानं युक्तमित्याशङ्क्याह- *किञ्च प्रमाणान्तरग्राह्यत्वमिति*।। अनन्यथासिद्धान्वय-व्यतिरेकतो वाच्यत्वकल्पना, अत्र तु प्रमाणान्तरेण गृहीत एव शब्दप्रयोगस्संभवति, नान्यथेत्यन्यथासिद्धत्वान्न वाच्यत्वनिश्चायकत्वमिति चोदयति- *प्रयोगनिमित्ततयेति*।। तर्हि कार्यान्वयनियमोऽप्यन्यथासिद्धः। मध्यमवृद्धप्रवृत्तिदर्शनेन हि बालस्य व्युत्पत्तिर्भवति। न च कार्यज्ञानेन विना मध्यमवृद्धप्रवृत्तिः; अतः प्रवृत्तिरूपलिङ्गहेतुतया सिद्धो व्यभिचार इति परिहरति- *कार्यत्वस्यापीति*।।

ननु प्रमाणान्तरग्राह्यत्वसाम्येन कथं कार्यस्य शक्तिप्रतियोगिकत्वनिराकरणम्? नहि मानान्तरयोग्यत्वं कदाचिदपि प्रतीयते, किन्तु सत्तयैव हेतुत्वम्, तेन न तस्य वाच्यत्वम्, कार्यस्य तु प्रतीतिरस्ति, न कदाचिदपि व्यभिचारः, अतः कार्यसंसृष्ट एव शक्तिग्रहणमित्याशङ्क्याह- *किञ्च भूतसंसर्गेऽपीति*।। *ननु* त्वयैव

निरूपणीयं नास्माभिः; अज्ञत्वाद्विप्रतिपत्तेर्वेत्याशङ्क्याह- *अगृहीतप्रयोजनानामिति *।। यद्वा-लोक एव सिद्धत्वान्निरूपणवैयर्थ्यमित्याशङ्क्याह- *अगृहीतेति *।। अज्ञ-विप्रतिपन्नयोरपि शब्दादर्थप्रतिपत्तिदर्शनान्न लोकतो निर्णय इति भावः।। *ननु* किमत्र निरूपणीयम्? कार्यसंसृष्टे शक्तिर्निश्चिता; व्युत्पत्तावव्यभिचारात्, उत्तरकालभाविन्या तु न भूतार्थनिश्चयः; यथाव्युत्पत्तिप्रतीतेः, न च तद्धानेन व्युत्पत्तिरित्याशङ्क्याह- *किञ्च निघण्टु-व्याकरणोपदेशैरिति *।। *ननु* अन्यसंसृष्टस्वार्थप्रतिपादकत्वमपि न संभवति; अन्यशब्देन हि पदान्तरोपस्थाप्यो विवक्षितः, न चासौ व्यवस्थितो लभ्यते; तदस्यानेकान्वितस्वार्थाभिधायकत्वदर्शनात्। न च तत्सर्वसंसृष्टस्वार्थाभिधायकत्वं संभवति; अव्यवस्थित्वाच्च, न चैकस्यैव परिग्रहे कारणमुपलभ्यते, तेन न पदार्थनियम इति चोदयति- *ननु गोपदस्यापीति *।।

ननु इतरान्वितस्वार्थे शक्त्यभ्युपगमे गोशब्दोच्चारणे गोत्वप्रतीतिवत्सर्वेतरप्रतीतिः स्यादिति चोदयति- *ननु गोपदोच्चारण इति *।। गोशब्दो गोत्वप्रतीतिमेव करोति; इतरान्वये सर्वत्र तस्य व्यभिचाराभावेन संस्कारात्पदार्थत्वात्, इतरेषान्तु प्रतिप्रयोगम्, भिन्नत्वेन संस्काराभावादनियतत्वात्, अभिहितत्वे सत्येव तदन्विताभिधायकत्वमात्रसंस्कारकत्वमित्याशङ्क्याह- *अन्वयभिचारादिति *।।

ननु क्रमेणोच्चरितपदेष्वितरपदार्थप्रतीतौ पुनरन्वितबोधो न स्यात्; पदाभावे प्रतीतेरित्याशङ्क्याह- *संभूयैकस्मृतीति *।। *पदार्थेष्वपीति *।। अभिहितस्यैव वाक्यार्थप्रतिपादकत्वम्; तत्रापि नैकैकस्य; एकैकप्रतीतिसमये वाक्यार्थबोधादर्शनात्, अतो वाक्यप्रतीतिसमये न पूर्वेषामवभासः; अनवभासमानानां च न हेतुत्वम्, बोधद्वयाङ्गीकारः, इत्यादि सर्वं सममेवेत्यर्थः।। *ननु* पूर्वं केवलपदार्थप्रतीतिः, पश्चादन्वितप्रतिपत्तावभिहितान्वय एव च स्यात्, नान्विताभिधानमित्याशङ्क्याह- *पदानामेवेति *।। अभिहितान्वये पदार्थानामभिहितानामभिधीयमानानां वाक्यार्थहेतुत्वाद्वैषम्यम्। यदा तु अभिहितान्वयवादिन एवं वदन्ति-पदार्थाभिधानाऽवान्तरव्यापारेण पदान्येव वाक्यार्थप्रतिपत्तिं कुर्वन्तीति; तेषामप्याकाङ्क्षादिवशेन विशिष्टार्थप्रतिपादकत्वम्, न तु वाचकत्वेनेति वैषम्यम्।। *ननु* प्रातिपदिकार्थे प्रथमाविभक्तिस्मरणे कारकत्वसामर्थ्यलभ्यक्रियान्वयो न भवेत्, एकार्थत्वं वक्तुं न शक्यते; लिङ्ग-सङ्ख्यादीनामवर्जनीयत्वान्नाभिमतान्वयलाभ इत्याशङ्क्याह- *लिङ्गसङ्ख्यादयस्त्विति *।। "अस्तिर्भवन्तीपरः प्रयोक्तव्यः प्रथमपुरुषेऽगम्यमाने" इति। अयमर्थः-अस्तिः="अस् भुवी"ति धातुः; "इक्स्तिपौ धातुनिर्देशे" इति स्मरणात्, भवन्तीपरः=लट्पर इत्यर्थः। भवन्तीति संज्ञा लटः पूर्वाचार्याणाम्।।

एतदुक्तं भवति–क्रियानिष्ठमेव पदजातम्; विभक्तिसहितस्यैव प्रयोगात्, द्वितीयादिविभक्तियुक्तानां क्रियान्वय: प्रसिद्ध एव, प्रथमाविभक्तेरप्यस्ति क्रिया; कर्तरि स्मरणात्, तदस्ते: कर्तव्य:, द्रुमा: सन्तीति गम्यमानत्वदर्शनात्, "व्रतशब्दसमन्वयादि"त्यनेन व्रतशब्दान्यबलेन विरोधिक्रियाविधायकत्वम्, तदयुक्तम्; संसृज्यमानाभाव-तदन्य-तद्विरोधिनामपि नञ्वाच्यत्वात्, तच्चास्त्यत्राप्यहननसंकल्पवाचित्वम्, इत्याशङ्क्याभिप्रायमाह–*असमर्थ: संसृज्यमानेति*।। "स्वभावत एवे"त्ययुक्तं चोद्यम्; नञो मुख्यया वृत्त्याऽभाववाचकत्वं स्यात्; तत्त्वात्, तत्त्यागे कारणाभावस्याप्युक्तत्वात्, तेन न चोद्यमुपपद्यत इत्याशङ्क्यावतारयति–*अत्र प्राभाकर इति*।। फलं प्रार्थ्यतेऽनेनेति फलसाधनमभिधीयत इति। कार्यबुद्धेर्वेति तन्मतानुसारेणोक्तम्।। *ननु* प्रत्ययाभिहितेषु साधनान्वयेन तन्निषेधेऽनिष्टसाधनतायां निमित्तप्रवृत्त्युपरमहेतुत्वेनाभावपर्यवसितत्वे मुख्ये संभवति सति कथं तद्विरोधिपरत्वममुख्यमाश्रीयत इत्याशङ्क्याह–*न चाभावो नामेति*।। *ननु* अभाव एव नास्ति, कुतस्तदर्थत्वमित्याशङ्क्य परिहाराभिप्रायमाह–*न चाभाव इति*।। *ननु* भावान्तरस्याभावबुद्धिगोचरत्वाङ्गीकारान्न बुद्धिविरोध इत्याशङ्क्याह–*नच भावान्तरमिति*।। *ननु* भवत्वभाववाचित्वम्, तथाऽपि तदन्यं-तद्विरोधिनोरपि वाच्यत्वं कल्प्यत इत्याशङ्क्याह–*अभाव एवेति*।। *ननु* तदन्य-तद्विरोधिनोरपि प्रयोगान्मुख्यत्वमित्याशङ्क्याह–*अर्थान्तर-तद्विरोधिनोरिति*।। "ननु नञर्थ:" इति चोद्यं पुनरुक्तम्–पूर्वमपि नञर्थस्यैव संकल्पस्यैव नियोगविषयत्वमुक्तम्, अत्रापि नञर्थानुष्ठानादित्याशङ्क्यावतारयति–*हननाभाव इति*।। *ननु* क्रिया-तत्साधनव्यतिरिक्ताभावस्यैव विधिनिवर्तकत्वमस्त्वित्याशङ्क्याभिप्रायमाह–*भावार्थो दध्यादिरिति*।। *एवमिति* पूर्वोक्तमुपजीव्योक्तमिति भाति; तदयुक्तम्; पूर्वग्रन्थे ह्यभावस्य विधिविषयत्वं निरस्तम्, अत्र तु–"एवमि"त्युक्ते तस्य विषयत्वाभावे विधिप्रतिषेधभेद इति प्रतिभाति, तदा विरोध:; तेनैव भेदाभावसिद्धेरित्याशङ्क्यावतारयति–*दूषणान्तरमिति*।। *एवमिति*।। औदासीन्यमात्रार्थत्व इत्यर्थ:।। *ननु* विधिप्रतिषेधभेदो मा भूत्; सर्वत्रानुष्ठेयस्यैव विषयत्वं भवतु, को दोष:? इत्याशङ्क्य व्याचष्टे–*विधिप्रतिषेधविभागेति*।। "तस्मात्संसृज्यमान:" इत्युपसंहारो न युक्त:; तस्याप्रतिपाद्यत्वात्, असमाप्तत्वात्, उत्तरत्र तत्प्रतिपादनात्, इत्याशङ्क्यावतारयति–*तस्मान्न कार्येति*।। "तच्च संसृज्यमानमि"त्यनेन किमधिकमुच्यते? पूर्वग्रन्थे संसृज्यमानाभावार्थत्वान्न कार्यत्वमित्युक्तम्, अत्रापि संसृज्यमानाभावार्थत्वात्तस्य चाननुष्ठेयत्वान्न कार्यपरत्वमित्युक्तम्, अत: पुनरुक्तम्। *ननु* संसृज्समानाभावार्थत्वमेव तत्रोक्तम्, न तु संसृज्यमानस्वरूपं निर्दिष्टम्, अत्र तन्निरूपणं क्रियत इति भेद:, निष्फलत्वात्तत्रापि संसृज्यमानस्यापेक्षितत्वेन योग्यत्वेन लब्धत्वात्पुनरुक्त

इत्याशङ्क्यावतारयति– *प्रकृत्यर्थस्य हननस्यैवेति*।। *ननु* विध्यादीनां लिङर्थत्वात्कथं "तेषामसंभवः?" इति टीकाकारोक्तमित्याशङ्क्य हेतुमाह– *पुरुषान्तरनिबन्धनत्वेति*।। *प्रतिपाद्यधर्म इति* न युक्तम्; निषेधावाक्ये नञर्थस्यैव प्रतिपाद्यत्वात्। न हि स्वेनैव स्वस्यान्वयः, नापि प्रतिपाद्यशब्देन प्रतीयमानत्वं विवक्षितम्; ब्राह्मण-धात्वर्थयोरुभयोरपि प्रतीयमानत्वेनोभयधर्मत्वप्रसङ्गादित्याशङ्क्य व्याचष्टे– *प्रतिपाद्यधर्म इति*।। *अनुष्ठेयेति*।। "प्रतिषिध्यमाने"ति व्याहतम्; धात्वर्थधर्मस्य नञाऽन्वयात्तदन्वयेन विना क्रियानिषेधानुपपत्तेः, "फलप्रार्थना लिङाद्यर्थः" इत्यनेन लिङर्थस्य निषेधेऽन्वयप्रतीतेश्च विरोध इत्याशङ्क्याह– *निवर्त्यमानक्रियेति*।। *ननु* विरुद्धं लिङर्थस्य निषेधे क्रियानिवर्त्यत्वाभिधानमिति, तत्राह– *प्रत्ययार्थनिषेधेऽपि प्रकृत्यर्थ इति*।। *ननु* फलप्रार्थनेति फलरागः प्रतीयते, कथं तस्य लिङर्थत्वम्? इत्याशङ्क्य व्याचष्टे– *प्रार्थ्यत इति प्रार्थनेति*।। फलार्थं साधनेऽपि रागोऽस्त्येवेति तात्पर्यम्। यद्वा–फलं प्रार्थ्यतेऽनेनेति फलप्रार्थनेति। कथं तर्हि वाक्यार्थः संपद्यत इति? तदाह– *ततश्च हननस्येति*।। *ननु* हनने सुखं दृश्यते, कथं निषेधः? इति चोदयति– *ननु प्रत्यक्षमिति*।। इष्ट इति शब्दो यस्य तदिष्टशब्दः, तस्य भाव इष्टशब्दत्वम्, तस्मादिति। *ननु* अदृष्टाविरोधित्वं प्रयोजकं न भवति; अविरोधिन्यप्यपुरुषार्थत्वदर्शनात्, विरोधिन्यपि पुरुषार्थत्वदर्शनान्न तत्प्रयोजकम्; तेन यस्येष्टसाधनत्वं नास्ति, अनिष्टं वा साधयेत्, तदनिष्टसाधनमिति विभागः क्रियताम्, किं विरोधाविरोधेन? इत्याशङ्क्याह– *सर्वत्रेति*।। तर्हि पुरुषार्थापुरुषार्थविवेको न स्यात्; शबलितत्वादित्याशङ्क्याह– *अनर्थादधिकोऽर्थ इति*।। एवं नात्रानिष्टसाधनत्वनिश्चयः; इष्टसाधनत्वनिषेधस्य विध्यायत्तत्वात्, अनर्थाधिक्याभावादित्याशङ्क्याह– *तत्र पुरुषार्थसाधनमिति*।। स्वरूपमात्रस्य निषेद्धुमशक्यत्वादित्यर्थः।।

ननु सिद्धेऽनर्थसाधनत्वे ततोऽर्थोऽधिको नास्तीति वक्तुं शक्येत, तदेव न सिद्धमित्याशङ्क्याह– *ततश्चार्थादनर्थस्येति*।। "तस्मादि"त्युपसंहार इवाभाति, स न युक्तः; नहि संस्कारोद्बोधकस्य निरोधकरणं पूर्वं साधितम्, येन तदुपसंह्रियेत, इत्याशङ्क्यावतारयति– *किं तर्ह्यनुष्ठेयमितीति*।। "अन्वय-व्यतिरेकगम्यः" इत्युक्तम्; तत्कथं निमित्तनिरोधस्यान्वय-व्यतिरेकगम्यत्वम्? नहि तत्कर्तव्याताबोधकावन्वय-व्यतिरेकौ स्तः; तथा कस्यान्वय-व्यतिरेकाभ्यामिति न ज्ञायते; विशेषानुपादानात्, इत्याशङ्क्य दर्शयति– *हननमिष्टमिति*।। अनुष्ठेयाभावे नियोगाङ्गीकारोऽपि न दोषायेत्यभिप्रायेणाह– *अङ्गीकरोतीति*। "तथाऽपी"त्यनेनैतदुक्तम्–क्रियानिवृत्तिमात्रेण यदि नियोगसिद्धिः, तर्ह्यनुष्ठानाभाव इति। तर्हि क्रियानिवृत्तेरनुष्ठेयत्वमित्याशङ्क्याह– *क्रियोपादने चेति*।। (टीकायाम्) क्रियानुष्ठाने यच्च निमित्तमिष्टं फलसाधनत्वम्, तन्निषेधे क्रिया निवर्तत एव; पुनरपि भ्रान्त्या फलसाधनत्वेन

प्रवृत्तिप्रसक्तावपि न क्रियानिवृत्तरेनुष्ठेयत्वं रागाद्युद्बोधकनिमित्तनिरोधे क्रियानिवृत्तिसिद्धेरित्यर्थः। निमित्तनिरोध एवानुष्ठेय इत्याशङ्क्य, परिहृतम्।– *तच्चान्वयेति*।। तच्चेति प्रयत्नस्थानं निर्दिश्यते, एवमपि स्वाभिमतसिद्धनियोगनिष्ठत्वस्य निषेध्यत्वात् तदभावे नियेगस्यानुष्ठेयत्वेनाननुष्ठेयकार्यान्वयहानेन सिद्धेऽर्थे प्रामाण्यासिद्धेरित्याशङ्क्य व्याचष्टे– *तथाप्यनुष्ठेयांशस्येति*।। "किं तद् गृहीतसंबन्धमि "त्यादिनियोगनिराकरणचर्चायां व्यक्तमिति नेह प्रतन्यते।।

श्रुतार्थापत्त्येति।। श्रुतस्वर्गसाधनत्वानुपपत्त्यनुसन्धानेनेत्यर्थः। अवगतब्रह्मणोऽपि संसारदर्शनाद ज्ञानसाध्यप्रयोजनसिद्ध्यभावाद्विध्यनङ्गीकरणं न युक्तम्; प्रयोजनासिद्धेः, अतो विधिरङ्गीकरणीय इति चोद्यस्य "नावगतब्रह्मात्मभावस्ये"ति परिहारो न युक्तः; संसारदर्शनविरोधादित्याशङ्क्य साभिप्रायमवतारयति– *प्रथमोत्पन्नं शाब्दज्ञानमिति*।। इतरेतराश्रयादिति टीकायामुक्तम्–कर्मणि सति देहग्रहणम्, देहग्रहणे सति कर्मेति।।

ननु पूर्व-पूर्वकर्मभिरुत्तरोत्तरदेहग्रहणे नेतरेतराश्रयमित्याशङ्क्याह– *अनादित्वेऽपीति*।। (टीकायाम्) *ननु* शास्त्रेण कर्मनिमित्तत्वं प्रतीयते, कथमन्धपरम्पेरति? तत्राह–पुत्रादिशरीरेष्विवेति*।। अहंमानो गौणः स्यादित्यर्थः। भवतु गौणत्वमिति, नेत्याह-- *तथानुभवेति*।। ममेति पुत्रादौ प्रतीतिर्न तथाऽत्रेति भावः।। *ननु* भेदानुभवाभावेऽप्यन्यत्रान्यशब्दप्रयोगाद्गौणत्वं निश्चीयत इत्याशङ्क्याह– *प्रसिद्धगौणत्वेति*।। *ननु* मुख्यज्ञानपूर्वकत्वाभावेऽपि राजशब्दादावन्यत्रान्यशब्दत्वेन गौणत्वनिश्चयो दृष्टः, तथात्रापीत्याशङ्क्याह– *पुत्रादिशरीरेणेवेति*।।

ननु न श्रुत्यादिसामर्थ्यात्संसारसंबन्धाभावनिश्चयः; पक्षान्तरोक्तदूषणप्रसङ्गात्, वैयर्थ्यञ्चाविद्यानिमित्तत्वसाधनेनेत्याशङ्क्योपयोगमाह– *उक्तमन्वय-व्यतिरेकाभ्यामिति*।। *ननु* श्रुत्यादिषु न संसारनिवृत्तिः प्रतीयते, कथमुदाहृता श्रुतिः? इत्याशङ्क्याह– *ते हि ब्रह्मात्मैकत्वमिति*।। *कथमेकदेशेति*।। अवधिकरणसामर्थ्यात्प्रारब्धकदेशस्य कथं स्थितिरिति चोद्यार्थः। *श्रुतस्यैवेति*।। "तावदेव चिरमि"ति श्रुत्याऽवधिः कृत, तद्बाधभयादिति भावः। *कुतः कर्मणामिति*।। ज्ञानस्य तन्निवर्तनसामर्थ्याविशेषात् स्थितिहेत्वज्ञानभावात्सुखादिसाधनविषयाभावेन प्रयोजनाभावादिति।। *ननु* प्रारब्धकर्मव्यतिरिक्तविनाशकज्ञानाभ्युपगमेऽपि तदपरोक्षमिति कथं निश्चीयते? उपासनाप्रकर्षादिना विनिवृत्तिसंभवादित्याशङ्क्याह– *नचापरोक्षदर्शनमिति*।। भवत्वारब्धकर्मणि विद्यमाने ज्ञानोदयः, तथाऽपि कथं सशरीरित्वम्? इत्याशङ्क्याह– *प्राब्धकर्मवतश्चेति*।। एवं सामर्थ्यात् सशरीरस्यापरोक्षज्ञानं प्रसाध्य प्रमाणान्तरं दर्शयति– *व्यासादीनाञ्चेति*।। *ननु* कर्मसमाप्तिपर्यन्तं

भेददर्शनस्यावस्थाननियमाभावेऽपि यावद्भेददर्शनं कर्म कर्तव्यम्; यथा देहस्याविदुषां कर्मसमाप्तिपर्यन्तमवस्थाननियमाभावेऽपि कर्मानुष्ठानम्, तद्वदित्याशङ्क्याह- *पुनःपुनस्तत्त्वदर्शनेनेति*।। *ननु* बाधात्प्रयोजनं नास्तीति वक्तुं न शक्यते; प्रत्यवायपरिहारस्य प्रजोजनत्वात्, तस्य चानुष्ठानमात्रसाध्यत्वादित्याशङ्क्याह- *प्रत्यवायस्येति*।। *कथं तर्हीति*।। इष्टप्राप्त्यनिष्टपरिहारप्रार्थनानिमित्तत्वात्प्रवृत्ति-निवृत्त्योः, विदुषश्च तदभावे प्रवृत्त्यभावाच्छरीरसंविधानं न स्यादित्यर्थः। प्रारब्धाक्षिप्तरागादिना प्रवृत्त्यादिसंविधानं चोपपद्यत इति परिहरति- *आरब्धकर्मेति*।। *ननु* पूर्वकर्मोपचयात् पुनः शरीरग्रहणमिति संसारो नित्यकर्मानुष्ठानं प्राप्नोतीत्याशङ्क्याह- *न चापूर्वकर्मोपचयस्येति*।। *ननु* आरब्धकर्मणामेव निमित्तत्वमित्याशङ्क्याह- *आरब्धकर्मणाञ्चेति*।।

तदेवमिति।। अनेनैतदुक्तम्-ब्रह्मावगमोत्तरकाले न व्यवहारः संभवति; प्रमातुर्विषयस्य चाभावादित्ययुक्तम्। नहि ब्रह्मावगममात्रेण किञ्चिन्निवर्तते, नापि प्रमातुरभावः, नित्यत्वात्तस्य, तन्नाशे वा ज्ञाने प्रवृत्तिरेव न स्यात्; एवं विषयस्यापि नाशो नोपपद्यते; तथा विधेय-प्रमाण-प्रमेयव्यवहारस्य स्वरूपेण निवृत्तौ तावन्मात्रनिवृत्तौ वा न कारणमित्याशङ्क्य व्याचष्टे- *ब्रह्मात्मापरोक्षदर्शनादिति*।।

ननु भेदाभेदेति।। अत्यन्ताभेदे तद्दर्शनेन भेददर्शनस्य निवृत्तिविरोधो भवेत् नात्र विरोध इति भावः। *ननु* भेदादेर्न भेदरूपत्वाद् बाधः, अपितु शास्त्रेण विरोधप्रतीतेर्देहारम्भकर्मणोऽज्ञानस्य च संसारासंसारहेतुत्वे भिन्नफलत्वेन विरोधादस्मत्पक्षे निवृत्तिरुपपद्यत इति, तत्राह- *भेदाभेद इतीति*।। *ननु* न स्ववचनविरोधः, परस्परोपमर्दे त्वभावादित्याशङ्क्याह- *पूर्वपक्षसिद्धान्तेति*।। *ननु तवापीति*।। बन्धमोक्षादिः सर्वो विरुद्धो भिन्नाधिकरणसाकाङ्क्षो भेदाभेदाभावे नैकस्मिन्नेव संभवेदित्यर्थः। *ननु दृश्यत इति*।। भेदाभेदप्रतीतेर्नापलापः कर्तुं शक्यते, व्यवस्था च दृश्यते, अतो न साङ्कर्यादिदूषणमिति भावः। तथा प्रतिपत्त्यभावादिति*। भिन्नाभिन्नोऽयमिति प्रतीत्यभावादित्यर्थः। *मा भूदभिन्न इति शब्दप्रयोगस्तथाप्यर्थस्तावदभेदरूपः प्रतीयत एवेति चोदयति- *नन्वितरेति*।। *तर्हीति*।। अभेदोपमर्देनेव भेदप्रतीतावभेदाभावो भेदाभावो वा भवेत्, नतूभयमित्यर्थः।। *ननु रूपभेदेतरेति*।। तेन नाभेदोपमर्दे रूपत्वमित्यर्थः।। *तर्हीति*।। अभेदशब्देन तदभावस्तद्विरोधी वा वक्तव्यः; अन्यमात्रे भेदाभेदाद्भेदसिद्धेः, चैकस्मिन् ज्ञाने सति भवतीति भावः। *अथेतरेतरेति*।। अभावस्तद्विरोधी वा भेदशब्दवाच्यो न भवति, किन्त्वन्यवाची; तत्रापि नान्यमात्रम्, अपि तु परस्परात्मत्वमित्यर्थः। *ननु* समासेऽर्थत्रयं संभवति प्रसिद्धम्, अत्र तु तदतिरिक्तः कथं वाच्यत्वेन निश्चीयत इति प्रश्नार्थः। तत्र संप्रतिपन्ने वस्तुन्येकस्मिन्नेवमभेद इत्याशङ्क्याह- *न तावदेक इति*।।

स्यादेतदिति।। प्रत्ययद्वयेन खण्ड-मुण्डाभ्यामेकस्य गोस्तादात्म्यप्रतीतेश्च भेदाभेदसिद्धिरिति भावः।। मा भूत् संभूय प्रमापकत्वम्; तथाप्येकस्य गोरेकेन ज्ञानेन खण्डात्मकत्वमपरेण मुण्डात्मकत्वमिति भदाभेदासिद्धिरित्याशङ्क्याह- *प्रत्यभिज्ञामन्तरेणेति*।। *प्रत्ययत्रयेणेति*।। खण्डो गौः, मुण्डो गौः, स एवायं गौरिति प्रत्ययत्रयमित्यर्थः।। किं प्रत्ययत्रयेण? प्रतीतिसामर्थ्याद्वेति विकल्प्य प्रथमपक्षे दूषणमाह- *प्रत्यक्षं तावदिति*।। न द्वितीय इत्याह- *नचार्थापत्तिरिति*।। *ननु* तत्रापि न भेद इति, तत्राह- *भ्रान्तिमात्रेति*।। सर्वत्र भेदं निराकृत्य, इदानीं जीवभेदं निराकर्तुमाह- *नाप्यात्मनि भेद इति*।। प्रत्यनुमानविरुद्धमिति चोदयति- *युगपज्जननेति*।। *ननु* जन्मान्तरे न शरीरभेदे शरीरभेदादननुसन्धानम्; स्तन्यपानादिप्रवृत्तिदर्शनात्, अपि तु मरणेन निःशेषं संस्काराणां निवर्तितत्वादनुसन्धानाभावः, न तथेह व्यवस्थाकारणम्; अत एकत्वेऽव्यवस्थैव स्यादित्याशङ्क्याह- *सत्यप्येकत्व इति*।। "एकत्वादि"त्यनेनानैकान्तिकत्वमुक्तम्; बिम्ब-प्रतिबिम्बधर्मवदुपाधिभेदेन व्यवस्थेति भावः।। भवतु जीव-ब्रह्मणोरभेदः, तथाऽपि प्रामाणिकोऽङ्गीकर्तव्य इत्याशङ्क्येदानीं जीव-ब्रह्मभेदेन प्रमाणमित्याह- *न च जीव-ब्रह्मभेद इति*।।

ननु श्रुत्याऽभेदः प्रतीयते, लिङ्गाद्भेदः, इति प्रमाणद्वयसामर्थ्याद्भेदाभेदाङ्गीकारो युक्तः, नान्यतरस्य बाधः; प्रमाणाविशेषादित्याशङ्क्याह- *अतुल्यप्रमाणत्वादिति*।। *ननु* न लिङ्गाद्भेदः, अपि तु श्रुत्यैवेति चोदयति- *द्वा सुपर्णेति*।। *ननु* भेदस्यापि श्रुतिसिद्धत्वेन समप्रमाणत्वे भिन्नाभिन्नात्मकत्व-मित्याशङ्क्याह- * भ्रान्तिसिद्धद्वित्वानुवादादिति*।।* ननु* अनुवादेऽपि भ्रान्तिसिद्धस्यानुवाद इति कथं निश्चीयते? इत्याशङ्क्याह- *एकत्वम्; नानात्वेति*।। मा भूच्छब्दस्य प्रमाणत्वम्, प्रत्यक्षमेव प्रमाणमित्याशङ्क्याह- *प्रत्यक्षेणेति*।। *ननु* भवतु सर्वभेदमिथ्यात्वम्, तथाऽपि नाद्वैतदर्शनेन बाधस्संभवति; अपरोक्षभ्रमस्य शाब्दज्ञानेन निवृत्त्यदर्शनादित्याशङ्क्याह- *प्रत्यक्षभ्रमस्येति*।। *ननु* फलवचनसामर्थ्यादेव मोक्षे बन्धनिवृत्तिरूपे ब्रह्मप्राप्तिरूपे वा संभवति सति, किं मिथ्यात्वनिवृत्तिसिद्धये साध्यते? इत्याशङ्क्याह- *फलवचनानामिति*।।

ननु ब्रह्मात्मज्ञानात्सर्वव्यवहारनिवृत्तौ संवादो न दर्शनीयः, अत्र कार्याभावप्रामाण्यं च लौकिकस्योक्तम्, न तु व्यवहारनिवृत्तिः, यद्वा प्रकाशत एव सर्वदा ब्रह्म; सर्वेषामात्मत्वात्, अतः कथं तज्ज्ञानात् कृत्याभावः? इत्याशङ्क्योक्तमप्यर्थं श्लोकारूढं करोति- *अद्वितीयेत्यादिना*।।

व्याख्यातो यस्त्रिनेत्रो विदितनिखिलगीस्तत्सुतो यस्य नाम।
मीमांसापारगन्तुर्जनरणनयुतो योऽर्दनस्तत्सुतेन।।

बीजं यन्नामसिद्धं तदिह वननिधेरद्वितीयेन युक्तम्।
वायोष्षष्ठं विधातुर्युतमिह दशमात्पञ्चमेनेशयुक्तः॥
मेये सुसूक्ष्मे मतिराविरासीद् गुरोः प्रसादेन कृता हि तेन।
वेदान्तसिद्धान्तविवेचनाय टीका च सर्वैश्च विभावनीया॥
मद्देहगेहं समुपेहि राम! हृत्कंजपीठेन युतं निरीह।
आराधये तत्र भवन्तमीशं भावोपचारैरखिलात्मरूपम्॥
आराधये राम कथञ्चिदात्मन्निस्साधनोऽहं सकलं त्वमेव।
क्रियाऽपि नो या विषयीकरोति कर्ताऽपि चाहं नहि भिन्नरूपः॥

इति स्वामीन्द्रपूर्णपूज्यपादशिष्य-सर्वशास्त्रविशारदजनार्दनात्मज-सर्वज्ञ- विष्णुभट्टोपाध्यायकृतौ ऋजुविवरणे समन्वयाधिकरणं नाम नवमं वर्णकं समाप्तम्॥

अथ समन्वयाधिकरणे

तत्त्वदीपनम्

तृतीये सूत्रे ब्रह्मणः शास्त्रप्रमाणकत्वमुक्तम्, अत्रापि तदेवोच्यत इति पौनरुक्त्यमित्याशङ्क्य तात्पर्यमाह- *ज्ञानेति*।। अस्मिन्नधिकरणे श्रुतीनामप्रामाण्यं विद्ध्वा, इदं ब्रह्म श्रुतिभिर्ज्ञेयमित्युच्यत इति संबन्धः। इदमा परामृष्टमर्थमाह- *ज्ञानेति*।। स्वरूपलक्षणमनूद्य तटस्थलक्षणमनुवदति-निखिलेति*।। विरिञ्च्यादीनामपि जगदुपादानत्वप्रतित्तेः कथं ब्रह्मैव जगदुपादानमिति? अत्राह-* ईशमिति* निखिलेशितृत्वं चाह- *ईशमिति*।। ईश्वरत्वमुपपादयति- *सर्वज्ञमिति*।। अप्रामाण्येऽपि विधिशेषत्वेन प्रामाण्यमित्याशङ्क्य, द्वितीयवर्णकार्थमनुवदति- *एतदिति*। एतत्कार्याविमृष्टिं च सम्यगुद्धूय ज्ञेयमित्युच्यत इति संबन्धः। एतस्मिन् ब्रह्मणि कार्याविमृष्टिः कार्यसंस्पर्शः, तमिति यावत्। उत्पत्त्यादीनां विधिफलत्वप्रसिद्धेस्तेषां चात्रानुपलम्भान्न विधिरित्याह- *नित्यमित्यादिना*।। संस्कारो द्विविधः- *दोषापनयनलक्षणो गुणाधानलक्षणश्चेति, तत्राद्यं निरस्यति-* नित्यं विशदमतितरामिति*।। *नित्यम्=सदेति यावत्। ''विशद'' शब्देनानागन्तुकस्य दोषस्य निरासः। ''अतितरामि''त्यनेनानागन्तुकस्य दोषस्यात्मन्यसंभवाद् न तन्निवृत्तिः, अनागन्तुकदोषसंभवेऽपि न क्रियानिवर्त्यत्वमित्यर्थः। द्वितीयं निरस्यति- *निगुर्णमिति*।। विकार्यत्वं निरस्यति- *निष्क्रियमिति*।। उत्पाद्यत्वं निरस्यति-* अजमिति*।। सर्वगतत्वादनाप्यत्वं च। विधेः सातिशयानित्यफलकत्वदर्शनान्मुक्तेरपि विधिसाध्यत्वे तथात्वं स्यादित्याह-* निखिलेति*।। निखिलो भवः' साध्यत्वेन वर्तते यस्यां सा, निखिलभववती; ताम्। *सम्यगिति*।। अबाधितोपपत्तिभिरित्यर्थः। तृतीयसूत्रे प्रतिज्ञातं प्रामाण्यं चतुर्थसूत्र आक्षिप्य समाधीयत इत्यपौनरुक्त्यमित्यर्थः।।

पूर्वस्मिन्नधिकरणे ब्रह्मणो वेदकारणत्वं तत्प्रमाणकत्वं चोपन्यस्तं वर्णकद्वयेन, तत्र द्वितीयवर्णकेनाक्षेपलक्षणां सङ्गतिमभिधाय वर्णप्राधान्य-संशय- पूर्वपक्षानाह-* जगत इति*।। प्रामाण्यसंभवासंभवौ च संशयकारणमिति द्रष्टव्यम्। ज्ञानकाण्डस्यापि वेदत्वाविशेषान्न प्रामाण्यप्रतिक्षेप इति शङ्कते- *नन्वाक्षेप इति*।। न खलु वेदत्वमात्रेण प्रामाण्यं निश्चेतुं शक्यम्; ''आदित्यो यूप'' इत्यादौ व्यभिचारात् किं तूपक्रमादिसमधिगततात्पर्येण; तात्पर्यं च कार्य एवेति सकलवेदतात्पर्यविज्जैमिनिवचनमेव विविच्यतामित्याह- ननु वेदान्तानामिति*।। अध्ययनविध्युपात्तत्वेनानर्थक्यानुपपत्तिमभिप्रेत्य द्वितीयं

दूषयति- * न तावदिति *।। अपेक्षितं पूरयति- *तथाऽपीति *।। ब्रह्मण: सिद्धत्वात् तत्र पर्यवसानानुपपत्तिरित्यर्थ:। सिद्धत्वमप्रयोजकमिति शङ्कते-ननु यत्रेति *।। वर्तमानविषयापेक्षया प्रत्यक्षस्य प्रामाण्यं दृष्टमित्याशङ्क्याह- *विषयस्येति *।। प्रत्यक्षज्ञानं प्रति विषयस्य कर्मकारकतया जनकत्वाद् विषयाधीनं प्रत्यक्षं प्रमाणं भवतु, परोक्षज्ञानस्य तद्विषयाजन्यत्वान्न तदधीनं प्रामाण्यमित्यर्थ:।।

लोके शब्दप्रामाण्यं संवादकप्रमाणाधीनमित्याह- *तत्राहेति *।। भविष्यद्वृष्ट्यादावपि प्रमाणान्तरप्रवृत्तेदृष्टत्वात् परिनिष्ठितविशेषणमनर्थकमित्याशङ्क्याह- *अभूदिति *।। कालत्रयान्यतमसंस्पर्शित्वं परिनिष्ठितशब्दार्थ:। अर्थान्तरमाह- *असाध्येति *।। पराभिमतकार्यविपरीतं परिनिष्ठितशब्दार्थ:। ब्रह्म, प्रमाणान्तरगम्यम्, परिनिष्ठितत्वात्; घटादिवत्। ततश्च प्रमाणान्तरसंवादे शब्दस्यानुवादकत्वम्; अन्यथा विसंवादादिलक्षणमप्रामण्यं प्रसज्येतेत्युक्ते परिनिष्ठितत्वमस्तु, प्रमाणान्तरगम्यत्वं च मा भूत्, ततश्चाप्रयोजको हेतुरिति शङ्कते- *ननु परिनिष्ठित इति *।। रसादीनां प्रतिनियतेन्द्रियग्राह्यत्वादिन्द्रियान्तरागम्यत्वेऽपीन्द्रियान्तरविषयत्वं यथा, तद्वद् ब्रह्मण: प्रमाणान्तराविषयत्वेऽपि शब्दत्वमविरुद्धमित्यर्थ:। दृष्टान्तो विषम इत्याह पूर्ववादी- *न चक्षुरादीनामिति *।। अतिप्रसङ्गलक्षणबाधकतर्कपराहतिं शङ्कते- *ननु तुच्छेति *।। विमतम्, प्रमाणान्तरागम्यम् तुच्छव्यावृत्तत्वात्, घटादिवदित्युक्ते प्रमाणान्तरयोग्यत्वमुपाधि:। न च साधनव्यापकत्वम्; असंभवादित्याह- *न साध्येति *।। प्रत्यक्षस्य वर्तमानमात्रग्राहित्वात् कार्यस्य च साध्यत्वान्न प्रत्यक्षत्वमित्यर्थ:। कार्यस्य लिङ्गादिना संबन्धाप्रतिपत्तेर्न लिङ्गादिगम्यत्वमपीत्याह- *संबन्धाग्रहणादिति *।। तुच्छव्यावृत्तत्वमप्रयोजकं चेत्याह- *तुच्छेति *।। तुच्छव्यावृत्तत्वस्य प्रतियोग्यधीनसिद्धित्वात्तस्य प्रयोजकत्वे गौरवम्, ततो भूतत्वमेव प्रयोजकमित्यर्थ:। *निरुपाधिकत्वलाभादिति *।। निरपेक्षत्वलाभादित्यर्थ:।।

कार्यवद् ब्रह्मणोऽप्ययोग्यत्वान्न मानान्तरगम्यत्वमिति शङ्कते- *ननु रूपादीति *।। भूतेऽर्थे प्रमाणान्तर-प्रसरदर्शनाद् ब्रह्मण्यपि तथात्वशङ्कायामप्रामाण्यशङ्का दुर्वारेत्याह- *तथापीति। कार्येपि प्रमाणान्तरयोग्यत्वशङ्काऽपरिहार्येत्याशङ्क्याह- *अपिचेति।। तर्हि प्रमाणान्तरसंभवाद् वेदान्तानां ब्रह्मणि प्रामाण्यं स्यादित्याशङ्क्यानुवादकत्वेन प्रामाण्यं प्रसज्येतेत्याह- * अत इति *।। एतच्च मूलग्रन्थादु बहिरेवेति द्रष्टव्यम्। संवादप्रमाणाभावे पुंवाक्यवत् श्रुतीनामप्रामाण्यमित्युक्तम्-'' तैरसंभवात् परिहारस्याभासत्वमाशङ्क्याह- *परिहरतीति *।। सम्यक् परिहारमेवाह- *अयमर्थ इति *।। समताग्राहिणा स्पार्शनप्रत्यक्षेण विसंवादे चित्र-निम्नोन्नतताग्राहिज्ञानं यथा बाध्यते, तथा ब्रह्मात्मतां बोधयन्ती जाड्य-जन्मादिधर्मवतो देहस्य प्रतीचैक्यं बोधयन्त्युपजीव्यजातीयकेन प्रत्यक्षेण बाध्यत इत्यर्थ:। पुमर्थाभावेऽप्युपेक्षाज्ञानवत् प्रामाण्यसंभवात् ''किंचे'' त्युक्तिरयुक्तेत्याशङ्क्य तात्पर्यमाह- *किंचेति *।। *साक्षादिति *।। दुग्धादीनां साक्षात् प्रजोजनपर्यन्तत्वम्, पश्वादीनां परम्परयेति विभाग:। शब्दमात्रस्य

प्रत्यक्षाद्यगोचरे न प्रामाण्यम्, शास्त्रस्य तु वैपरीत्यमित्युक्तं टीकायाम्, तदसंभवि; विशेषाभावात्, ''शब्दमात्रमि''त्यनेनापि किमुच्यत इति न ज्ञायत इति, तत्राह- *किंचेति*।। संबन्धग्रहणं वा कस्मात्? इत्याशङ्क्याह- *यथा संबन्धेति*।। संबन्धग्रहणं विनाऽप्यर्थप्रतिपत्तावपूर्वशब्दग्रहणेऽप्यर्थप्रतिपत्तिः स्यात्, न च तथेत्यर्थः। त्वन्मतेऽप्यनधिगतवस्तुप्रकाशकत्वं तुल्यमित्याशङ्क्याह- *कार्यस्य त्विति*।। न च संबन्धग्रहणाभावात् कार्यवाक्यस्याप्रमाण्यमित्यपि; आहवनीयादिवदलौकिकत्वेऽपि तत्र सङ्गति-ग्रहणसंभवादित्यर्थः। ''तस्मादनर्थकाः'' इत्येतदपेक्षितमर्थं दर्शयति- * तस्मादिति।।

वेदान्तानां न विधिशेषत्वम्; तत्प्रकरणानाम्नानात्, इत्युक्तम्; तत्र वेदान्तानां विधिशेषत्ववादिनं प्रति ''तत्प्रकरणानाम्नानादि''ति हेत्वभिधानानुपपत्तेरित्याशङ्क्याह- *यत्पुनरिति*।। किं कर्मविशेषा-पेक्षितप्रतिपादनेन तच्छेषत्वम्? अथवा कर्ममात्रशेषत्वम्? इति विकल्प्याद्यं प्रत्याह- * तावदिति*।। वेदान्तानां कर्मविशेषापेक्षितार्थानभिधायित्वादेतत्प्रकरणत्वं सिद्धमित्यर्थः। द्वितीयमुत्थापयति- *ननु सर्वेति*। किं विधिवत् तदभिधानेन तच्छेषत्वम्? आहो तदपेक्षितप्रतिपादनेन? आद्येऽपि किं सर्वत्रैकाश्रयः साधनव्यक्तिः प्रतिपाद्यते? उतैकं सामान्यम्? नाद्य इत्याह- *न सर्वेणेति*।। द्वितीयं प्रत्याह- *धर्मेति*।। श्रेयःसाधनत्वमात्रस्य लोकप्रसिद्धत्वेनाप्रतिपाद्यत्वादित्यर्थः। जुह्वाः क्रतुसंबन्धित्वात् तद्द्वारा पर्णताया अपि क्रतुसंबन्धवत् कर्तुः सकलक्रतुः संबन्धित्वादात्मप्रतिपादनेन वेदान्तानामपि क्रतुसंबन्धोऽविरुद्ध इति शङ्कते- *अस्तु तर्हीति*।। ''जुह्वा जुहोती'' ति होमाङ्गत्वेन श्रुताया जुह्वाः प्रकृतिद्रव्याकाङ्क्षापरिपूरणेन पर्णतायाः क्रत्वनुप्रवेशित्वे सिद्धे ''न स पापं श्लोकं श्रृणोति'' इत्यादेरर्थवादत्वं युक्तम्, इह त्वात्मस्तुतौ तत्प्रतिपादने च फलाभावाद मैवमित्याह- *नैतदिति*।। देहाद्यतिरिक्तमात्मानमन्तरेण पारलौकिकप्रवृत्त्यनुपपत्तेस्तेनोपकाराभावः कथम्? इत्याशङ्क्याह- * न हीति*। विनियोजक-प्रमाणाभावान्न कर्मशेषत्वमित्युपसंहरति- *तस्मादिति* वेदान्तानां न कर्मशेषत्वम्, नापि स्वार्थपरत्वं चेत्, तर्हि किम्? आनर्थक्यम् इति शङ्कते- * किंत्विति*।। क्रियाविधिशेषत्वाभावेऽप्युपा-स्तिविधिशेषत्वात्प्रामाण्यम्; इतरथाऽध्ययनविधिविरोधादित्याह- * स्वप्रकरणेति*।। उपास्तेरुपास्यसाकाङ्क्षत्वात् तदभाव उपास्त्यसंभव इत्याह- *भाष्येति*।। उपास्याभावेनोपास्त्य-नुपपत्तिविवक्षा चेत्, तर्ह्युपास्याभाव एव प्रतिपाद्यः, किमिदमुच्यते-न सर्वज्ञत्वादिसिद्धिरिति? तत्राह- * तथापीति*।। सर्वज्ञत्वादिविशिष्टं ब्रह्मोपास्यत्वेन श्रूयते, न च तदुपपद्यते; तत्संवादकप्रमाणाभावादित्यर्थः आरोपितसर्वज्ञत्वादिविशिष्टतयोपास्यं ब्रह्मेत्युक्तम्-''सत्यमि''त्यत्र उपासनाविधिशेषत्वेन वेदान्तप्रामाण्यस्य भाष्ये निर्दिष्टत्वादित्याशङ्क्याह- *न खल्विति*।। वाक्यस्योभयपरत्वासंभवादित्यर्थः। कथं तर्हि वेदान्तानां प्रामाण्यम्? इत्याशङ्क्याह- *किंत्विति*। कार्यलिङ्गानुमितकारणे सर्वज्ञत्वादिकं समारोप्य तदुपास्तिर्विधीयते वेदान्तैरित्यर्थः। ''सत्यं ज्ञानमि'' त्यादिवाक्येषूपास्तिविधिपदाश्रवणा-

दुपास्तिप्रकरणव्युत्थिततत्वाच्च न तदङ्गत्वमपीति शङ्कते- *ननु वेदान्तेति*।। प्रयोजनाकाङ्क्षया प्रकरणान्तरपठितविधिसंबन्धमाशङ्क्याह- *स्वरूपेति*।। आत्मज्ञानमात्रेण पुंसः कार्तार्थ्ये सर्वेषां तत् स्यात्, न च तदस्तीति फलान्तरं वाच्यम्; तथा च "पूषा प्रपिष्टभागः" इत्यादाविव विधिपदं कल्प्यत इत्याह- *नापीति*।। द्रव्य-देवतासंबन्धस्य यागाविनाभूतत्वाद् यागस्य च नियोगाविनाभावाद् विधिपदं कल्प्यत इति युक्तं तत्र, न च तथाऽत्र किंचित् कल्पकं श्रुतमस्तीत्यर्थः। अध्ययनविध्युपात्तत्वानुपपत्तिर्विधिपदकल्पिकेत्याह- *तत्राहेति*।। अधिकारिफलाभावाद् विधिपरत्वं सत्यादिवाक्यानामिति शङ्कानिरासायोक्तं टीकाकृता- "फलं च तत्रे"ति। "एतावदरे खल्वमृतत्वम्" "ब्रह्मविदाप्नोती"त्यादिवाक्यात् प्रतीयमानममृतत्वं साध्यत्वेन परिणमय्य तत्काम उपासीतेति कल्पनाद् न कोऽपि दोष इत्यर्थः।। समन्वयो नाम वेदान्तानां ब्रह्मप्रमितिजनकत्वम्, तदेव प्रतिज्ञातार्थ इति साध्याविशिष्टत्वम्, इत्याशङ्क्य, समन्वयशब्देन तात्पर्यवत्त्वं विवक्षितम्, शास्त्रप्रमाणकत्वमात्रं च प्रतिज्ञाविषय इत्यर्थभेद इत्युक्तम्- "तत्र तात्पर्येणे"त्यत्र, तदयुक्तम्; वेदान्तेष्वपौरुषेयेषु पुरुषाधर्मतात्पर्यानुपपत्तेरित्याशङ्क्याह- *तत्र तात्पर्येणेति*।। तात्पर्यं शब्दधर्म इति संबन्धः। शब्दधर्मत्वं संभावयितुमाह- *तदर्थप्रमितिशेषतेति* प्रतीयमानो योऽर्थः, तत्प्रमितिजननसामर्थ्यं तात्पर्यम्, तस्य शब्दधर्मत्वमुचितमित्यर्थः। स चासावर्थश्चेति तदर्थः, तत्प्रमितिशेषत्वमिति वा। शब्दधर्मत्वमाक्षिपति- *कथमिति*।। तात्पर्यस्य तदर्थप्रमितितिशेषतारूपत्वात् कथमाक्षेपः? इत्याशङ्क्याह- *विवक्षेति*।। विवक्षायां शब्दप्रामाण्यदर्शनात्, इतरथा चादर्शनाद्विवक्षा तात्पर्यम्। तस्याश्च पुरुषसंबन्धित्वान्न शब्दधर्मत्वमित्यर्थः। विवक्षाया अर्थप्रमित्युद्देशेन प्रवृत्तत्वादर्थप्रमितिशेषत्वमेव तात्पर्यमित्याह- *अर्थप्रमितीति*।। भवतु प्रयुज्यमानत्वस्य शब्दधर्मत्वम्; तथाऽपि कथं तात्पर्यस्य शब्दधर्मत्वम्? इत्याशङ्क्याह- *तत्रापीति*।। तत्र=लोक इति यावत्। लोकेऽपि तात्पर्यं न विवक्षामात्रम्, किं तु तदर्थप्रमितिशेषत्वम्, इतरथाऽपौरुषेये वचसि तात्पर्यासंभवादप्रामाण्यं दुर्वारं स्यादित्यर्थः। तात्पर्यस्य विवक्षाऽतिरिक्तत्वेऽपि तद्गम्यत्वं तावदाश्रयणीयम्, तथा च ज्ञापकाभावाद वेदे न तात्पर्यसिद्धिरित्याशङ्क्याह-तच्चेति*।। तच्च तात्पर्यमिति गम्यत इति संबन्धः। इतिपदपरामृष्टमर्थमाह- *यस्मिन्नर्थ इति*।। सर्वशाखाप्रत्ययत्वमादिशब्दार्थः। उपक्रमोपसंहारादि न तात्पर्यज्ञापकम्, किं तु प्रमेयस्य कार्यत्वम्; ततश्च भूतनिष्ठस्य वचसोऽप्रामाण्यमित्याशङ्क्याह- *नचेति*।। तत्रापि कार्यनिष्ठतयैव तात्पर्यमित्याशङ्क्य किं ज्ञातं तात्पर्यं प्रमितिजनकम्? उताज्ञातम्? इति विकल्प्याद्यं प्रत्याह- * साध्यस्येति*।। साध्ये प्रमिते तत्प्रमितिजननसामर्थ्यरूपतात्पर्यसिद्धिः तत्प्रमितौ च तदुपेताच्छब्दात् साध्यार्थप्रमितिरितीतरेतराश्रयत्वमित्यर्थः। द्वितीयमुत्थापयति- *साध्य इति*।। अज्ञाततात्पर्योपेताच्छब्दात्साध्यप्रमित्यङ्गीकारे तात्पर्यावधारणं वृथा स्यादित्याशङ्क्याह- *प्रतिबन्धेति*।। विषं भुङ्क्ष्वे"-त्यादेः

स्वार्थतात्पर्यशून्याद्विषभोजनप्रमित्यनुत्पत्तिदर्शनात्सर्वत्रापि प्रमित्यनुत्पत्तिशङ्कायां तन्निरासार्थं तात्पर्याधिगमो युक्त इत्यर्थः। अज्ञायमानतात्पर्यवच्छब्दस्य प्रमितिजनकत्वम्, तात्पर्यज्ञानं च प्रतिबन्धनिवर्तकमित्यङ्गीकृत्य प्रमेयसाध्यत्वं तात्पर्यज्ञापकमित्ययुक्तमित्याह– *तथापीति*।। *जर्तिलयवाग्वेति*।। अरण्यतिलनिर्मितयवाग्वेत्यर्थः ''अजाक्षीरेण जुहोती'' त्युपक्रमविरोधाद् ''जर्तिलयवग्वा वा जुहुयात्'' इत्यादेर्न स्वार्थे तात्पर्यम्, किं त्वर्थवादत्वमित्यर्थः। विवक्षा-साध्यत्वयोस्तात्पर्यलिङ्गत्वनिरसनफलमाह– * तस्मादिति *।। तस्मादुक्तान्येव तात्पर्ये लिङ्गानि। तानि च दृश्यन्त इति योजना। तात्पर्यलिङ्गानि स्पष्टयति– *''सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमि'' त्युपक्रम्य ''ऐतदात्म्य'' मित्यादिरुपसंहारः।। अभ्यासलक्षणतात्पर्यलिङ्गमाह– *तथेति*।। अनधिगतार्थगन्तृतालक्षणं लिङ्गान्तरमाह– *प्रमाणान्तरेति*।। ब्रह्मप्रतिपादने फलोपलम्भादपि तत्र तात्पर्यमित्याह– *आचार्यवानिति*।। आचार्योपदिष्टशब्दजनितज्ञानवान् मनन-निदिध्यासनाभ्यामसंभवनादिप्रतिबन्धे निवृत्ते ब्रह्म प्रत्यक्षेण यः साक्षात्कुरुते, तस्य तावानेव विदेहकैवल्ये विलम्बः, यावत् प्रारब्धकर्मणामुपभोगेन परिसमाप्तिरिति श्रुत्यर्थः। ब्रह्मणोऽप्रतिपाद्यत्वे ''अनेन जीवेने'' त्याद्यर्थवादोपादानं न स्यात्, अस्ति च तत्, तस्मादपि प्रतिपाद्यमित्याह– *अनेनेति*।। प्रसिद्धेन प्राणधारणात्मना तेजोऽबन्नलक्षणा देवता अनुप्रविश्य नामरूपे व्यक्तीकरोतीत्यर्थः। अश्रुतं श्रवणविषयो भवति, तत् कस्मादिति चेत्, ब्रह्मव्यतिरेकेण कार्यस्याभावात्, तज्ज्ञानेनेतरज्ञानमुचितमित्यर्थः। उपपत्तितोऽप्येकं ब्रह्म प्रतिपाद्यमित्याह– *मृल्लोहेति*।। मृदि ज्ञातायां यथा तन्मयं शरावादि प्रतीयते यथा वा लोहासवरूपे ज्ञाते तन्मयस्य सूच्यादेर्ज्ञातता; तथा ब्रह्मकारणज्ञानेन तत्कार्यमपि ज्ञातं स्यादित्यर्थः। यथाऽसत्यं ब्रुवतस्तस्करस्य बन्धः, इतरस्य मुक्तता, तद्वदसत्यं जगत सत्यं मन्यमानस्य बन्धः, इतरस्य मुक्ततेति तप्तपरशुदृष्टान्तश्रुत्यर्थः। *स्वपितिनामनिर्वचनेनेति*।। ''सता सोम्य तदा संपन्नो भवति स्वं ह्यपीतो भवती'' त्यादिना जाग्रत्स्वप्नभोगोपस्थापककर्माभावे स्वस्वरूपे व्यवतिष्ठत इत्यर्थः। तज्जात्वात्तल्लत्वात्तदनत्वाच्च ब्रह्मव्यतिरेकेण जगतोऽभावः, ततश्च तत् पूर्णमित्याह– *सृष्टीति*।। सर्वशाखाप्रत्ययत्वं दर्शयितुं शाखान्तरीयं तात्पर्यलिङ्गमाह– *तथा तैत्तिरीयक इति*।। पृथिव्यादिभूतत्रयं सत्, वाय्वादिभूतद्वयं त्यत्। अभावप्रत्ययवेद्यं त्यदिति वा। तद् ब्रह्मस्वरूपं मायया जगदाकारेण परिणमय्य, स ''स्वयमि'' ति निमित्तान्तरनैरपेक्ष्यमाह। काम्यन्त इति कामाः, तानित्यर्थः। *सृष्टिश्रुतय इति*।। ''यतो वे'' त्याद्या इत्यर्थः। उपपत्तितोऽप्येकं ब्रह्मेत्याह– *तथेति*।। अन्नमय-प्राणमय- मनोमय-विज्ञानमयानन्दमयाः कोशपञ्चकशब्दार्थः। ''को ह्येवान्यात्कः प्राण्याद् यदेष आकाश आनन्दो न स्यादि'' त्यादिना प्राणनादिव्यापारहेतुभूतं ब्रह्मास्तीति निश्चीयत इत्यर्थः। तथाच संग्रहश्लोकः–

१ २ ३ ४ ५ ६

''उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये'' ।। इति।

'' तत्र। तात्पर्येणे '' ति टीकार्थमुपसंहरति– * स्वमिति *।। पदानामित्यस्य व्यवहितान्वयं दर्शयति– * पदानामिति *।। *अर्थवैलक्षण्यमिति *।। क्रियावाक्यार्थात्सत्यादिवाक्यार्थस्य वैलक्षण्यं दर्शयति– *पदानामिति *।। *अर्थवेलक्षण्यमिति *।। क्रियावाक्यार्थात्सत्यादिवाक्यार्थस्य वैलक्षण्यं कारकसंसर्गस्या- भेदव्याप्तत्वादत्र च तदभावान्नैवमित्युक्तम्– *अव्यतिरिक्तेति *। '' उदरमन्तरं कुरुते '' इत्यत्र भेदमात्रस्य प्रतिषेधान्न तादात्म्यं वाक्यार्थ इत्याह– *नेत्याहेति *।। नियोगसाध्याभावान्न तदाकाङ्क्षेत्याह– *नेत्याहेति *।।

निर्धर्मकतिविरोश्रृधान्न लिङ्गादेस्तत्रान्वय इत्याह–नेत्याहेति *।। जगत्कारणत्वधर्मिणो ज्ञानादिगुणप्रति- पादानात्कथमुक्तं समन्वयसिद्धिः? इत्याशङ्क्याह– *जगदिति।। तत्र वेदे ज्ञानानन्दशब्दौ जगत्कारणसामान्यानुवादेनानन्दविशेषं गमयत इत्यन्वयः। कारणत्वस्य लोकसिद्धत्वान्न श्रुतिप्रतिपाद्यत्वम्। ज्ञानत्वम्, आनन्दनिष्ठम्, ज्ञाननिष्ठत्वात्; सत्तावत्, इत्यनुमानाद् ज्ञानव्यक्तेरानन्दव्यक्त्यभेदप्रतिपत्तेरानन्दस्य च ब्रह्मस्वभावत्वान्न समन्वयविरोध इत्यर्थः। *आनन्दविशेषमिति *।। दुःख–जाड्यविरोधिव्यक्तिमित्यर्थः। एकादिशब्दैरेकस्य प्रतिपादने पर्यायत्वं स्यादित्याशङ्क्य वाक्यभेदान्नैवमित्याह–एकेति *।। मिथ्याशब्दोऽपह्नववाची। द्वैतशब्देन च विजातीयो भेदः कथ्यते। *लक्षणयेति *।। वाच्यव्युदासेनेत्यर्थः। ब्रह्मणि भेदाद्यभावश्चेत्, कथं तर्हि सर्वज्ञादिशब्दाः? इत्याशङ्क्याह–सर्वज्ञ इति * । प्रपञ्चोपाधितयेति *।। प्रपञ्चापेक्षयेत्यर्थः। गङ्गापदलक्षिततीरस्यागङ्गात्ववदात्मादिपदेन लक्षितं ब्रह्मानात्मादिरूपं स्यादित्याशङ्क्याह– *अयमात्मेति *।। *मुख्यलक्षणाभ्यामिति * जहदजहल्लक्षणयेत्यर्थ। गङ्गापदस्य तीरे जहल्लक्षणया वृत्तेरात्मादिशब्दानां च जहदजहल्लक्षणयेति वैषम्यमित्यर्थः। *मुख्यलक्षणोपाधिभिरिति *। *अयमर्थः*–मुख्यवृत्त्या लक्षणावृत्त्या जहदजहल्लक्षणया उपाधिना चेति विभागो द्रष्टव्यः। ज्ञानानन्दशब्दौ व्यक्त्यंशापरित्यागेन मुख्यवृत्त्या वर्तेते, एकादिशब्दास्तु जहल्लक्षणया, तत्त्वमस्यादयो जहदजहल्लक्षणया,सर्वज्ञादयस्तूपाधित इत्यर्थः। भेदाद्यभावाभिधानद्वारेण ब्रह्मण्येकादिशब्दानां वृत्तिपक्षे भेदादेर्व्यावर्त्यसद्भावादद्वैत विहतिमाशङ्क्याह– *न चेति *।।

ननु 'सोऽयमि' त्यदिवाक्यस्थपदानामुक्तेऽर्थेऽनुगमाभावात् तदुदाहरणमनुपपन्नमित्याशङ्क्य तात्पर्यमाह– *अनेकेषामिति *।। उक्तार्थानुगमाभावेऽप्यखण्डार्थानुगमादुदाहरणत्वमुचितमित्यर्थः। एकेनोदाहरणेन विवक्षितसिद्धेः किमुदाहरणान्तरेण? इत्याशङ्क्य, तस्य प्रयोजनं दर्शयितुं वाक्यवृत्तिद्वैविध्यमाह– *तत्रेति *। *तत्र=वेदान्तेष्वित्यर्थः। तत्त्वमस्यादिवाक्यम्, अखण्डार्थम्, अकार्यकारणद्रव्यमात्रवृत्तित्वे सति समानाधिकरणवाक्यत्वात्, 'सोऽयं देवदत्तः' इत्यादिवाक्यवदित्युक्ते साध्यविकलो दृष्टान्त इत्याह– * तत्रेति *।। तत्र मूल इत्यर्थः।।

मूलप्रमाणाभावान्न 'सोऽयमि'त्यादेस्तत्र प्रामाण्यमित्याशङ्क्य समूलत्वमाह– * तथाहीति *।। प्रत्यभिज्ञाया अपि विशिष्टविषयत्वात्तन्मूलवाक्यस्यापि तद्विषयत्वमित्याशङ्क्य, प्रत्यभिज्ञाया न

विशिष्टैक्यमालम्बनमिति वक्तुं विशेषणैक्याभावं तावदाह– *तत्रेति*।। तत्फलमाह– *अत एवेति*। तदेतद्देशकालविशिष्टयोरैक्यासंभवश्चेत्, तर्हि तद्देशकालोपलक्षितस्यैतद्देशकालविशिष्टस्य चैक्यं प्रत्यभिज्ञागोचर इति शङ्कते– * किंत्विति।। उपलक्षित- विशिष्टयोरैक्ये विशिष्टत्वरूपमन्यत्रापि स्यात्, न तथा दृश्यत इत्याशयेनाह– *सोऽयमिति*।। प्रत्यभिज्ञाया अखण्डार्थत्वमभिधाय तन्मूलवाक्यमपि तथेत्याह– *प्रत्यभिज्ञातमिति*।। *स्वार्थैकदेश इति।। *स्वार्थस्यैकदेशस्तदेतद्देशकालवैशिष्ट्यलक्षणः, तस्य परित्यागेनेत्यर्थः। *एकदेशलक्षणयेति*।। देवदत्तस्य स्वरूपलक्षणयेत्यर्थः। प्रकारान्तरेण ''सोऽयमि'' त्यादेरखण्डार्थतवमाक्षिपति– *नन्विति*। एकैकस्मात् पदात् प्रथमाविभक्त्यन्तात्प्रतीयमानं यदैक्यम्, तदेव वाक्यप्रमेयम्? उतान्यत्? नाद्य इत्याह–सोऽयमिति*।। पदार्थयोर्यत्प्रत्येकमैक्यमेकैकपदाभिधेयम्, न तस्य वाक्यप्रमेयता; अनधिगतार्थवैधुर्येणानुवादकत्वप्रसक्तेरित्यर्थः। द्वितीयं दूषयति– *नेति*।। न च–तदेतद्देशादिविशिष्टयोरितरेतरैक्यं वाक्यप्रमेयमिति–शङ्क्यम्; उत्तरत्र निरस्यमानत्वादिति। प्रतिबन्द्या समाधत्ते– *प्रत्यभिज्ञायामिति*।। किमभिज्ञायामवगतं यदैक्यं तदेव प्रत्यभिज्ञया प्रत्यक्षेण बोध्यते? उतान्यत्? न तावत्तदेव; वैयर्थ्यापातादित्यभिप्रेत्य द्वितीयं दूषयति–न ह्यभिज्ञयोरिति*।। प्रमेयान्तरमाशङ्कते– *एकस्येति*।। अभिज्ञायामनवगतस्यैव प्रत्यभिज्ञाप्रमेयत्वम्, एकस्य कालद्वयसंबन्धश्च नाभिज्ञायाः, इति कालद्वयसंबन्धिपदार्थस्य तदैक्यस्य वा प्रत्यभिज्ञाप्रमेयत्वं वक्तव्यम्, न च तदुभयं संभवीत्याह– *कालद्वयेति*।।

विकल्पासहत्वान्नैतदिति शङ्कते– *स्यादेतदिति*।। किं प्रत्यभिज्ञाप्रत्यक्षप्रामाण्यमेव निराचिकीर्षितम्? अथवा प्रत्यभिज्ञाया असाधारणं प्रमेयं जिज्ञासितम्? नाद्यस्तावत्संगच्छत इत्याह– *क्षणिकत्वेति*।। द्वितीयं दूषयति– *तत्रेति।। कथं तर्हि तत्प्रामाण्यम्? तत्राह- *पदार्थेति*।। फलसमर्थनफलमाह– *अत इति*।। साम्येनोत्तरमाह– *एवं तर्हीति*।। दृष्टान्तोक्तमर्थं दार्ष्टान्तिके समर्थयति– *तथेति*।। तत्त्वमसिवाक्यस्यापि प्रामाण्यमुपपद्यत इति संबन्धः। प्रत्यग्ब्रह्मणोर्विरूद्धत्वान्न तदैक्यपरत्वं वाक्यस्येत्याशङ्क्याह– * त्वंपदेनेति*।। एकदेशपरित्यागेन लक्ष्यमाणद्रव्यस्वरूपस्य ब्रह्मस्वरूपक्य इति संबन्धः। *एकदेशपरित्यागेनेति*।। कर्तृत्वाद्यंशपरित्यागेनेति यावत्। ब्रह्मणः परोक्षत्वात्कथं तदभेदः? इत्याशङ्क्याह– *पारोक्ष्येति* ।। विरुद्धांशपरित्यागाभावे तत्त्वंपदसामानाधिकरण्यानुपपत्तिरित्यर्थः। तर्हि तन्मात्रस्य पदाभ्यां प्रतिपन्नत्वात् किं वाक्येन? इत्याह- *जी-वब्रह्मेति*।। तत्त्वंपदार्थयोः परस्परैक्यस्य पदमात्रादप्रतिपत्तेस्तद्बोधकत्वेन वाक्यमर्थवदिति शङ्कते– *ननु पदार्थयोरिति*।। किं पदार्थयोः कियानपि भेदो विवक्षितः? आहो अत्यन्ताभेदः? नाद्य इत्याह– *नैतत्सारमिति*।। ''प्रतिपादने'' इत्यत्र श्रुत्या क्रियमाण इति शेषः। *तथा स्यादिति*।। ऐक्यं प्रमेयं स्यादिति यावत्। प्रत्यग्ब्रह्मणोरतिरेके प्रमाणाभावान्नायं पक्षः साधुरिति काक्वा सूच्यते। द्वितीयं प्रत्याह– *यदेति*।। न चैवं सत्यपसिद्धान्तोऽपीत्याह– *तदुक्तमिति*।।

अधिगतप्रमितिजनने प्राणाण्यशङ्कां तुशब्देन व्यावर्तयति। कथं तर्हि प्रामाण्यम्— *निवर्तकत्वादिति *।। अज्ञाननिवर्तकत्वाद्वेदप्रामाण्यं सिद्धमित्यर्थ:। 'नीलोत्पलमि'त्यादे: संसर्गबोधकत्वेन प्रामाण्यम्, 'सोऽयमि'त्यादेरखण्डबोधकत्वेन, ततश्च तत्त्वमस्यादिवाक्यं कं पक्षमवलम्बतामिति? तत्राह— *इह त्विति *।। विधान्तरेणाखण्डवाक्यार्थमाक्षिपति— *ननु तत्त्वमिति *।। तत्त्वंपदलक्षितरूपे किमत्यन्तं भिन्ने? उत न? इति विकल्प्याद्यं प्रत्याह— *तत्त्वंपदाभ्यामिति *। द्वितीयं दूषयति— *नचेदिति *।। पदार्थ-वाक्यार्थयोरैक्ये वाक्यं व्यर्थं स्यात्, लक्षिते रूपे औपाधिकभेदस्याप्यभावादित्यर्थ:। लक्षितरूपे अत्यन्तमभिन्ने। न च पदार्थ-वाक्यार्थयो: साङ्कर्यप्रसङ्ग:; इष्टापत्तेरित्याह— *सत्यमिति *।। तर्हि पदद्वयवैयर्थ्यम्, तत्राह— *स चेति *।। लक्षणानिमित्तमाह— *मुख्येति *।। त्वंपदस्य वाच्यार्थपरित्यागेन चिल्लक्षकत्वं तत्पदसामानाधिकरण्ये सति घटते, तथा तत्पदस्यापि वाच्यांशपरित्यागेन चिल्लक्षकत्वं। त्वंपदसामानाधिकरण्ये, इति न पदद्वयवैयर्थ्यमित्यर्थ:। अखण्डवाक्यार्थसमर्थनमुपसंहरति— *तस्मादिति *।। निरस्तमिति पक्षं दूषणान्तराभिधित्सया पुनरुत्थापयति— *अत्र केचिदिति *।। व्यतिरेकमुखेनोक्तमर्थमुपपादयति— *अन्यथेति *।। श्रुतितोऽपि भेदसिद्धिरित्याह— *य आत्मनीति *।। न चात्मशब्देन बुद्धिरभिधीयत इति शङ्क्यम्; ''यो विज्ञाने तिष्ठती'' त्यादिना बुद्धेर्निर्दिष्टत्वादित्यर्थ:। विकल्पासहत्वान्नैतन्मतं साध्वित्याह—नैतदिति *।। मुक्त्यवस्थायां भेदांशस्य निवृत्ति:? उत न? आद्येऽपि किं ज्ञानेन? उत कर्मणा? ज्ञानन्विर्त्यत्वेऽपि विवेचनीयम्—किं वाक्योत्थज्ञानं निवर्तकम्? उताभ्याससमुत्थम्? अथवा तृतीयं ज्ञानम्? इति विकल्प्य, आद्यप्रथम-द्वितीयौ दूषयति— *भेदाभेदेति *।। घटज्ञानस्य घटनिवर्तकत्वादर्शनादित्यर्थ:। तृतीयमुत्थापयति— *तृतीयेति *।। शब्दज्ञानाभ्यासजनितज्ञानापेक्षया तृतीयज्ञानेनेत्यर्थ:। तस्यापि भेदाभेदविषयत्वान्न भेदनिवर्तकत्वमित्याशङ्क्याह— *अभेदमात्रेति *। तृतीयत्वं वा साधयति— *अभेदेति।। तयोर्भेदाभेदगोचरत्वादस्य चाभेदमात्रगोचरत्वात् तृतीयत्वं युक्तमित्यर्थ:। अभेदमात्रविषयत्वमसिद्धमित्याह— *न यथेति *।। तत्र हेतुमाह— अन्यथेति *।। शब्दं ज्ञानम्, भेदाभेदगोचरम्, तदभ्यासोत्थं त्वभेदमात्रविषयमित्यङ्गीकारे शब्दज्ञानवैफल्यं स्यात्, तयोर्भिन्नगोचरयोर्जन्य-जनकतानुपपत्तेरित्यर्थ:। इतोऽपि न ज्ञाननिवर्त्यो भेद इत्याह— *ज्ञानविवर्त्यत्वेनेति *।। विकल्पान्तरमुत्थापयति— *ज्ञानेनेति *।। भेदस्य कर्मनिवर्त्यत्वे ज्ञानवैयर्थ्यमित्यपि न शङ्क्यम्; ज्ञाननिवर्तकत्वेनार्थवत्त्वसंभवादित्याशयेनोक्तम्— *ज्ञानेनेति *।। श्रुतिविरोधेनोत्तरयति— *न ब्रह्म वेदेति *।। ''ब्रह्मैव भवती''त्यत्रैवकारेणाभिधीयमानस्य भेदनिरासस्य ज्ञानमात्रप्रयोज्यत्वं श्रुतम्, तद्विरुद्धं कर्मनिवर्त्याभिधानमित्यर्थ:। ''कारकाभिधेयभेदनिरासस्ये'' ति पाठे ''ब्रह्म वेदे'' त्यत्र द्वितीयाविभक्ति-लट्प्रत्ययाभ्यामभिधेयो य: कर्म-कर्तृकारणरूपेण भेद: तन्निरासस्य ज्ञानमात्रप्रयुक्तत्वादित्यर्थ:। प्रत्यग्ब्रह्मणोर्भेदाभेदावङ्गीकृत्य न भेदांशनिवृत्तिरित्युक्तम्, संप्रति पक्ष एवायमसंगत इत्याह— *येनेति *।। भेदकाकारस्याभेदकाकारादभेद:? उत भेद:? आद्ये भेदकाकारनिवृत्त्या

भेदनिवृत्तिसमयेऽभेदस्यापि निवृत्तिः स्यात्; इतरथा भेदोऽपि न निवर्तेतेत्यर्थः। द्वितीयमुत्थापयति- *आकारान्तरेणेति*।। भेदकमाकारान्तरं किं तात्त्विकम्? उतातात्त्विकम्? उभयथाऽप्यसंभव इत्याह- *तदेति*।। ''निरवयवद्रव्यस्ये''ति विशेषणेनाकारान्तराभावमभिदधौ, भावेऽपि तस्य तात्त्विकत्वान्न निवृत्तिरित्याह- *निवर्तयितुं शक्यत इति*।। अतात्त्विकत्वेपि ज्ञाननिवर्त्यत्वमसंभवीत्याह- *कर्मणेति*।। मा भूत् तर्हि भेदनिवृत्तिरिति विकल्पान्तरमाशङ्क्याह-इति भिन्नाभिन्न इति* ।। ततश्च न संसारावस्थातो मुक्तेर्विशेष इति द्रष्टव्यम्। अत्यन्तभेदे तत्त्वमस्यादिशास्त्रस्यानुपपत्तिः; अन्यन्ताभेदे च ''य आत्मनि तिष्ठन्नि''त्यादेः, तथा च भेदाभेदौ शास्त्रत एव सिद्धौ कथं निह्नूयेते? तत्राह- *न चेति*।। सत्वादिरूपेणाभेदस्य विशेषरूपेण भेदस्य च लोकप्रसिद्धत्वात् तद्दृष्टान्तेन ब्रह्मण्यपि भेदाभेदयोः सिद्धेर्न शास्त्रप्रतिपाद्यत्वमित्यर्थः। किंचत्वत्पक्षे जीवोऽपि कीदृशः? इति विवेचनीयम्-किं भेदकाकारविशिष्टः? उत तदुपलक्षितः? नाद्य इत्याह- *यदि चेति*।। न च-जीवनाशप्रसञ्जनमिष्टमित्यपि-शङ्क्यम्; फल्यभावे फलाभावप्रसक्तेरित्यर्थः। द्वितीयमुत्थाप्य दूषयति-* अथेति*।। दण्डापाये तद्विशिष्टनिवृत्तावपि चैत्रस्य स्वरूपस्थितिवद् विशेष्यचैतन्यस्थितेर्मुक्त्युपपत्तिरिति शङ्कते- *विशिष्ट इति*।। चिन्मात्रस्य मुक्त्यनुभवितृत्वे तस्यैव बन्धमोक्षवैयधिकरण्यापत्तिः, ततश्चास्मन्मतसिद्धिरित्याह- *तर्हीति*।। एकस्मिन् वस्तुनि सामानाधिकरण्यं विरुद्धमिति शङ्कामुपसंहारव्याजेन निरस्यति- *तस्मादिति*।। वाच्यभेदसंभवात् सामानाधिकरण्यं युक्तमित्यर्थः। मतान्तरमनूद्य दूषयति- *योऽपीति*।। भेदतावन्मात्रविरोधित्वमतिरेकशब्दार्थः। अतिरेकविशिष्टस्य तदुपलक्षितस्य वा जीवत्वासंभवादतिरेकानिरूपणाच्च नैतत्साध्वित्यर्थः। श्रुतिविरुद्धश्चायं पक्ष इत्याह- *एकयेति*।। तस्मादस्मदुक्तमेव परिशिष्यत इत्याह- *तस्मादिति*।।

''प्रकृष्टप्रकाशयोरि''त्यनेन तत्त्वमस्यादिवाक्य एवोदाहरणान्तरं निर्दिष्टमित्याशङ्क्य, महावाक्यस्याखण्डार्थत्वमभिधायाऽवान्तरवाक्यस्य तदाहेत्याह- *इदानीमिति*।। प्रकृष्टादिवाक्यस्य विशिष्टबोधकत्वाद् दृष्टान्तासंगतिरित्याशङ्क्याह- *तयोरिति*।। प्रकृष्ट- प्रकाशशब्दयोरेकार्थत्वे पर्यायत्वं स्यादित्यत्राह- *अयमर्थ इति*।। वाक्यभेदान्तपर्यायत्वमित्यर्थः उभाभ्यां पदाभ्यामेकव्यक्तेर्लक्ष्यमाणत्वे पदान्तरमनर्थकमित्याशङ्क्याह- *तत्रेति*।। *गुणसामान्ययोरिति*।। प्रकर्ष-प्रकाशत्वयोरित्यर्थः। प्रकृष्टशब्दान्न चन्द्रप्रातिपादिकार्थसिद्धिः प्रकृष्टं तम इति प्रकर्षशब्दस्य प्रकृष्टसंतमसेऽपि प्रयोगदर्शनात्, तथा प्रकाशशब्दादपि न तत्सिद्धिः; खद्योतादावपि तत्प्रयोगदर्शनात्। तथा च वाच्यार्थपरित्यागेनाप्रक- र्षाप्रकाशविरोधी चन्द्रप्रोतिपदिकार्थः पदद्वयेन प्रतिपाद्य इत्यखण्डार्थत्वसिद्धिः; इतरथा चन्द्रप्रातिपदिकार्थमात्रप्रश्नोत्तरतया विशिष्टमर्थ बोधयतो वक्तुरनवधेयवचनत्वं स्यात्। तथा च विमतम्, अखण्डार्थम् लक्षणवाक्यत्वात्, 'प्रकृष्टप्रकाशश्चन्द्रः' इति वाक्यवदिति सिद्धमित्यर्थः।

तत्रोक्तहेतोरप्रयोजकत्वमाशङ्कते– *ननु गुणीति*।। ब्रह्मणो निर्भेदत्वान्नैवंविधोऽन्वय इत्याह– *तत्राहेति*।। निर्भेदत्वमेव कुत:? इति वीक्षायामाह– *एकमेवेति*।। *एकधैवेति*।। एकरूपेणेत्यर्थ:। कारणे ब्रह्मणि नानाभूतस्य निषेधेऽन्यत्र स्थित्यसंभवाद् निर्भेदत्वमित्यर्थ:। उत अरमिति च्छेद:। ब्रह्मण्यत्यर्थं भेदं य: कुरुते, तस्य भेदवादिनो भयं भवति। अथशब्द आनन्तर्याभिधानमुखेन भेदज्ञानस्य हेतुत्वप्रतिपादनार्थ इत्यर्थ:। प्रमाणान्तराभावाद् ब्रह्मणि वेदान्तानामप्रामाण्ये चोदिते प्रमाणान्तराभावाऽभिधानमसंगतमित्याशङ्क्याह– *अयमाशय इति*।। *मिथ्यात्वमिति* अप्रामाण्यमित्यर्थ:।। अबोधकतालक्षणमप्रामाण्यं प्रथमविकल्पार्थ:। गृहीतसंगतिकस्य पुंस: सत्यादिवाक्यश्रवणे अबाधितानधिगतार्थप्रमितिदर्शनादबोधकत्वमसंगतमित्याह– *तत्र न तावदिति–*।। अर्थस्येति। अर्थसंबन्धि यत्प्रमाणान्तरं तस्यानुत्पाद इत्यर्थ: मिथ्यात्वमित्यत्र शब्दस्येत्यनुषङ्ग:। विपक्षे दण्डमाह– अन्यथेति *।। *द्रव्यस्येति*।। नक्षत्रध्रुवादेरित्यर्थ:। नदीतीरफलसत्तावाक्ये प्रमाणान्तराभावादप्रामाण्यमित्याशङ्क्याह– *कथंचिदिति*।।

प्रमाणान्तरसंभिन्नोऽर्थो विषयो यस्य स प्रमाणान्तरसंभिन्नार्थ:, तस्य भावस्तत्ता, तस्या अभावादित्यर्थ:। असिद्धो हेतुरिति शङ्कते–*भूतार्थेति*।। विमतं प्रमाणान्तरसंभिन्नार्थम्, भूतार्थवाक्यत्वात्, नदीतीरफलसत्तावाक्यवदित्यर्थ:। अप्रयोजको हेतुरित्याह–नेति*।। किं तर्हि मानान्तरसंभेदप्रयोजकमिति? अत्राह– *पौरुषेयेति*।। किमत्र विनिगमनकारणमिति? अत्राह–भूतार्थेति*।। पौरुषेयवचनत्वमप्रयोजकं व्यभिचारादिति शङ्कते– *ननु भूतेति*।। पौरुषेयवचनत्वं च तत्र नेति शेष:। अन्यदेव तर्हि प्रयोजनम्, इत्याह– *तर्हीति*।। लौकिकवाक्यस्य स्वार्थप्रवृत्तज्ञानान्तरजन्यत्वमेव कथम्? इत्याकाङ्क्षायामाह– *पुरुषो हीति*।। वेदवचसोऽतिवाक्यत्वात् स्वार्थप्रवृत्तज्ञानान्तरजन्यत्वम्, ततश्च मानान्तरसंभेद:, तत्राह– *न त्विति*।। ''अस्य महतो भूतस्य नि:श्वसितमेतदि''त्यादिश्रुतिविरोधाद्, न वेदस्य प्रमाणान्तरजन्यत्वमित्यर्थ: अतिप्रसङ्गलक्षणबाधकतर्कपराहतश्चायं हेतुरित्याह– *किंचेति*।। विधिवाक्यार्थ:, प्रमाणान्तरयोग्य:, तुच्छव्यावृत्तत्वात्; घटादिवत्, ततश्च विधिवाक्यसाम्यमित्यर्थ:। ननु तुच्छव्यावृत्तत्वं न प्रयोजकम्, अपि त्वविध्नार्थत्वमिति शङ्कायामाह– *लौकिकेति*।। विपक्षे दण्डमाह– *अयोग्यत्वे चेति।। प्रमाणान्तरगृहीते संबन्धग्रहणदर्शनाधीनां च मानान्तरायोग्यत्वान्न तत्र संगतिग्रहणम्, तथा च वैदिकलिङादिश्रवणादप्यर्थबोधो न स्यादित्यर्थ:। वैदिकलिङादीनां प्रमाणान्तरागोचरकार्यविषयत्वान्न सापेक्षत्वम्। न च संगतिग्रहणानुपपत्ति:, तत्र प्रवर्तकाकारमात्रे संगतिग्रहणात्। ततश्च स्वर्गकामपदसमभिव्याहारानुपपत्त्यांक्रियाविलक्षणनियोगसिद्धिरित्यभिप्रेत्याह– *ननु कार्यस्येति*।। साम्येनोत्तरमाह– *ब्रह्मापीति*।। बाधितविषयत्वमप्रयोजकत्वं वा हेतोरित्यर्थ:। ब्रह्मणि प्रत्यक्षादेरप्रवृत्तावपि प्रमाणान्तरमत्र क्रमत इत्याह– * स्वरूपज्ञानमिति*।। प्रमितिप्रमाणमिति व्युत्पत्त्या स्वरूपज्ञानस्य प्रमाणत्वमुक्तमिति द्रष्टव्यम्। किमवच्छिन्नचैतन्यं प्रमाणम्, उतानवच्छिन्नम्? आद्येऽपि किं

वृत्तिविषयानवच्छिन्नम्? उत वृत्तिमदवच्छिन्ननम्? नाद्य इत्याह– *न शब्देति*।। शब्दजन्यं च तद् ज्ञानं चेति शब्दजन्यज्ञानम् तस्य विषयः शब्दजन्यज्ञानविषयः तस्मिन् स्थितं चैतन्यं शब्दजन्यज्ञानविषयस्थचैतन्यम्, तद्रूपतयेति विग्रहः। अत्र विषयशब्देन ब्रह्मोच्यते। चैतन्यस्य तत्स्थत्वं चोपचरितम्; राहोः शिर इतिवत्। तथा च विषयावच्छिन्नचैतन्यस्य प्रमाणफलरूपत्वान्न तत्सापेक्षत्वं दोषमावहतीत्यर्थः। द्वितीयं प्रत्याह– *चैतन्यज्ञानेति*।। चैतन्यविषयं ज्ञानं चैतन्यज्ञानम्, तत्संभिन्नमिति यावत्। शब्दजनितवृत्त्यवच्छिन्नचैतन्यस्य शाब्दप्रमाणत्वान्न तेन वेदस्य सापेक्षत्वम्। तथा वृत्तिमदवच्छिन्नचैतन्यस्य प्रमातृकोटावन्तर्भावादप्रमाणत्वम् ततो न तेनापि सापेक्षत्वमिति विकल्पद्वयं बहिरेव निराकृत्यानवच्छिन्नचैतन्यस्य प्रमेयत्वाद् न तेनापि सापेक्षत्वमित्याह– * चैतन्यज्ञानेति*।। चैतन्यं च तद् ज्ञानं चेति चैतन्यज्ञानम्, तेन संभिन्ने अभिन्न इत्यर्थः। चिद्रूपात्मविषयप्रमाणस्य न चित्स्वरूपमात्रेण सापेक्षत्वमित्यत्र सांख्य-गुरुमतानुसारिणौ प्रति दूषणान्तरमाह– *पुरुषान्तरेति*।। पुरुषान्तरस्यानुमानं स्वयं प्रकाशविषयमपि न सापेक्षमिति सांख्यं प्रति, पारसंवेदनविषयमनुमानं स्वप्रकाशविषयमपि न सापेक्षमिति प्राभाकरं प्रत्युक्तमिति द्रष्टव्यम्। द्वितीयकल्पनिराकरणमुपसंहरति– *तस्मादिति*।। प्रमाणान्तरयोग्यार्थविषयत्वात्तत्सिद्धानुवादकत्वमिति विकल्पं निरस्यति– *नापीति*।। किं प्रमाणान्तरयोग्यविषयस्य प्रमाणमात्रस्यानुवादकत्वम्? उत शब्दस्य? इति विकल्प्याद्यं दूषयति– *स्पर्शेति*।। द्वितीयमुत्थापयति– *शब्देति*।। तत्रापि वक्तव्यम्, किं शब्दमात्रस्यैव स्वभावः? उत भूतार्थविषयशब्दस्य? आद्येऽतिप्रसङ्ग इत्याह– *विधिवाक्यस्यापीति*।। अनुवादकत्वमिति शेषः। तत्र हेतुमाह– *तस्यापीति*।। विधिस्तच्छब्दार्थः। लौकिकार्थस्य मानान्तरयोग्यत्वेऽपि वैदिककार्यस्य मानान्तरायोग्यत्वादनपेक्षत्वं तुल्यमित्यभिसंधाय, समाधानान्तरमाह– *शब्दावगतस्येति*।। द्वितीयं प्रत्याह– *शब्देति*।। मानान्तरयोग्ये भूते वर्तमानस्य शब्दस्यानुवादकत्ववत् शब्दसिद्धबोधिनो मानान्तरस्यानधिगतविषयत्वाभावादप्रामाण्यं कस्मान्न स्यादित्यर्थः। न च प्रमाणान्तरस्य प्रथमप्रवृत्तत्वादननुवादकत्वमित्यपि शङ्क्यम्। शब्दावगते प्रवर्तमानप्रत्यक्षादेरनुवादकत्वप्रसङ्गादित्यर्थः। ब्रह्मणः प्रमाणान्तरागोचरत्वे विधिविधुरसत्यादिवाक्यस्याप्रामाण्यापातान्मानान्तरगोचरत्वमेष्टव्यमित्यभिप्रेत्याह– *तत्र चोदयतीति*।। उच्यत इत्यत्र प्रमाणान्तराधिगत एव शब्दप्रयोग इत्यङ्गीकारोऽनुपपन्नः; वेदान्तानां ब्रह्मण्यप्रामाण्यापातादित्याशङ्क्य, विकल्पपूर्वकमवतारयति–अत्र पृच्छाम इति*।। प्रमाणान्तरगोचरः प्रमेय इत्येतद् अत्रेत्यनेन परामृष्टम्। मानान्तरागोचरेऽपि क्वचित्संबन्धग्रहणस्य दृष्टवाद् "यद्यपी" त्युक्तम्। न चैवं सत्यादिवाक्यानामप्रामाण्यमिति शङ्क्यम्; शबले गृहीतसङ्गतिकानां लक्षणया ब्रह्मणि प्रवृत्त्युपपत्तेरिति द्रष्टव्यम्। किं मानविशिष्टे संगतिग्रहणम्? उतार्थमात्रे? इति विमर्शनीयम्। विमर्शे च विशिष्टे संगतिग्रहणे मानादर्थमात्रे सामर्थ्यग्रहणं वक्तव्यमित्यभिसन्धिना कथं व्युत्पद्यत इत्युक्तम्? तत्र प्रमाणाभावोऽसिद्ध इति शङ्कते– *ननु प्रमाणान्तरेति* प्रयोगप्रत्ययदर्शनादिति*।। उत्तमवृद्धप्रयोगस्य मध्यमवृद्धप्रयोगस्य

मध्मवृद्धप्रत्ययस्य च दर्शनादित्यर्थः। व्युत्पित्सोरर्थगोचरमाने मानाभावान्न तत्र संगतिग्रह इत्याह- *नेत्याहेति*।। भवतु व्यवहारस्य व्युत्पत्तिमूलत्वम्, तथाऽपि कथं मानसंभिन्नेऽर्थे संगतिग्रहाभावः? तत्राह- *अयमर्थ इति*।। यद्यपि वक्तृप्रमाणसंभिन्ने संगतिग्रहणं पूर्वपक्षिणा विवक्षितम् ; तथाऽपि तस्य स्पष्टमनुक्तत्वाद्विकल्प इत्यभिप्रायः- *उभयोरिति*।। श्रोतृव्युत्पत्त्रोरित्यर्थः। तृतीयं पक्षमनुवदति- *प्रमाणान्तरेणेति*।। वक्तुर्मानसंभिन्ने संगतिग्रहस्य चोदितत्वात् श्रोतृज्ञानसंभेदनिराकरणमनुपपन्नम्, ज्ञानान्तरानिमित्तत्वे हेतुं च न पश्याम इत्याशङ्क्याह-अयमर्थ इति*।। *प्रत्यक्षादिव्यवहार इति*।। प्रत्यक्षादिपुरःसरस्तन्यपानादिव्यवहार इत्यर्थः। स्तन्यपानादिविशेषज्ञानात् प्रवृत्तेरनुभवात्कथमर्थमात्रज्ञानादित्युक्तम्? इत्याशङ्क्य मात्रचोऽर्थमाह- *न प्रमाणान्तरेति*।। फलितमाह- *ततश्चेति*।। प्रयोगानुपपत्त्या तन्मूलं ज्ञानमपि कल्प्यत इत्याशङ्क्य, न तस्य प्रवर्तकत्वनिश्चय इत्याह- *वक्तुः प्रमाणस्येति*।। विषयविशेषणतया वक्तृप्रमाणस्यावगम्यत्वेन प्रवृत्तिहेतुतां बालो न कल्पयतीति संबन्धः। शब्दादुत्पद्यमानं यत् श्रोतृसमवेतं ज्ञानम्, तस्य यो विषयः; तद्विषयतयेत्यक्षरार्थः। अक्षरार्थकथनेन प्रश्न-प्रतिवचनयोर्वैयधिकरण्यमुक्तं निरस्यति- *अत इति*।। *प्रमाणान्तरस्य=वक्तृसमवेतस्येत्यर्थः परिशुद्धशब्दार्थमाह- *केवलेति*।। श्रोतृपदस्य व्यवहारपदेन संबन्धान्न वैयधिकररण्यमित्युक्तं भवतीत्यर्थः इत्यर्थः इत्यत्रेतिपदं द्रष्टव्यम्। नदीतीरफलसत्ताविषयं यद् वक्तृज्ञानम्, तद्गोचरेण श्रोत्रसमवायिज्ञानेन प्रवृत्तिर्न जन्यत इति टीकार्थः। ज्ञाते शब्दस्य प्रयोग इति नियमाद् ज्ञानान्तरसिद्धार्थबोधकत्वं नेतीति कथमुक्तम्? इत्याशङ्क्य तात्पर्यमाह- *तत इति*।। व्यवहारेणेत्यर्थः। तदेव स्पष्टयति- *शब्दस्येति*।। ज्ञानान्तरसिद्धोऽयमर्थ इत्येवंविधमवबोधं शब्दः प्रतिपत्तुर्जनयतीति सामर्थ्यावगमकाले व्युत्पित्सुना नावगतमित्यर्थः। उत्तमवृद्धप्रयुक्तशब्दान्मध्यमवृद्धेनार्थमात्रं प्रतिपन्नमित्युक्तम्, तदङ्गीकृत्य संगतिग्रहणं विशिष्टविषयमेवेति शङ्कते- *ननु मा भूदिति*।। अर्थवदेव मानसंभेदस्याप्यव्यभिचारित्वात्सामर्थ्यविषयत्वमित्यर्थ। अव्यभिचारित्वेऽपि न तस्य शक्तिविषयत्वमित्याह- *नेत्याहेति*।। ज्ञानमनवगम्यैव सामर्थ्यावगम इत्युक्तम्, तत्र हेतुमाह- * प्रवृत्तीति*।। सामान्ये गृहीतसंगतिकगवादिशब्देभ्यो विशेषप्रतिपत्तिवत् समयान्तरे मानसंभेदप्रतिपत्तिः स्यादित्याशङ्कते- *नन्वर्थमात्रेति*।। सामान्यस्य विशेषं विनाऽपर्यवसानाद्विशेषप्रतिपत्तिर्न घटते, अत्र तु नैवम् मानसंभेदस्यार्थविशेषत्वाभावादित्यभिसन्धायाह* नेत्याहेति*।। मानसंबन्धग्रह इत्युक्तम् तत्र किं कार्य इति?उतेतरत्र? इति विकल्प्याद्यमङ्गीकरोति- *ननु कार्येति*।। कार्यस्य मानान्तरागोचरत्वान्न तत्संभिन्ने संगतिग्रहणमित्यर्थः। द्वितीयं दूषयति *कार्यपदेति*।। सिद्धनिष्ठे वाक्ये प्रवृत्त्या संगतिग्रहणानुपपत्तेरुपदेशादिना संगतिग्रहणमित्यर्थः। द्वितीयं दूषयति- *कार्यपदेति*।। सिद्धनिष्ठे वाक्ये प्रवृत्त्या संगतिग्रहणानुपपत्तेरुपदेशादिना संगतिग्रहणं वक्तव्यम्! ततश्च संभिन्ने संगतिरित्यर्थः। योग्येतरान्वितस्यार्थस्य सकलपदशक्तिविषयत्वात् तत्रापि शङ्का दुर्वारा स्यादित्याह- *न तेषामिति*।।

कार्यवाक्येऽपि तेषां शब्दानामर्थैः संबन्धग्रहणादिति योजना।। अर्थमात्रे संबन्धग्रहण-मित्युक्तमाक्षिपति- *अत्र केचिदिति*।। *ननु* शब्दश्रवणादर्थप्रतिपत्तिदर्शनात् कथमर्थासंस्पर्शित्वम्, तत्राह- *तथाहीति*।। अङ्गुल्यग्रादिवाक्यानां प्रमित्यहेतुत्वादितरेषामपि तथात्वम्, प्रतीतिस्त्वाभासरूपेत्यर्थः। नदीतीरफलसत्तावाक्यादर्थप्रमितिरपि दृष्टेत्याशङ्क्याह- *यत्र चेति*।।

गुरुमतानुसारेण समाधानं तावदाह- *अत्र केचिदिति*।। किं पुरुषवचोभिः साक्षादर्थो न प्रतीयत इत्युच्यते, उतार्थादपि? इति विकल्प्याद्यमङ्गीकरोति- *पुरुषवचसामिति*।। तस्यार्थासंस्पर्शित्वमित्याशङ्कते- *किं त्विति*।। वक्तृज्ञानस्यैवार्थत्वान्नैवमित्याह- *वक्तृज्ञानमिति*। कथं तर्हि स्वार्थसिद्धिः? तत्राह- *प्रमीयमाणेति*।। निर्विषयज्ञानानुपपत्त्याऽर्थसिद्धिरित्यर्थः।। अर्थवदेव वक्तृज्ञानस्यापि व्यभिचारान्न शब्दस्य तत्परत्वमपीत्याशङ्क्य, न ज्ञानमात्रलक्षणस्य प्रमेयस्य व्यभिचार इत्याह- *सर्वत्रेति*।। शब्दः सर्वत्र वक्तृज्ञानलक्षणं प्रमेयं न व्यभिचरतीति संबन्धः। ज्ञानमेवाह- *भ्रान्तिमिति*।।

कस्तर्हि पूर्वपक्षाद्विशेषः? तत्राह- *तस्मादिति*।। पूर्वत्र शब्दस्य प्रमेयमेव नेत्युक्तम्, अत्र तु वक्तृज्ञानलक्षणं प्रमेयमित्युच्यत इति विभागः।। अनन्यलभ्यस्य शब्दार्थत्वाद्वक्तृज्ञानस्यान्यथासिद्धत्वान्न शब्दार्थत्वमित्याह- *तदयुक्तमिति*।। कथमानुमानिकत्वं तस्येति शङ्कायामाह- *अयमर्थ इति*।। देवदत्तोऽर्थज्ञानपुरःसरं शब्दं प्रयुङ्क्ते; प्रयोक्तृत्वात्, मद्वदित्यनुमानेनैव मानसिद्धिरित्यर्थः। वक्तृज्ञानस्यानुमेयत्वमङ्गीकृत्य मध्यमवृद्धज्ञानवच्छक्तिविषयत्वे नैवानुमानमिति शङ्कते- *नचैवमिति*।। शक्तिविषयत्वकल्पकाभावान्नैवमित्याह- *नेत्याहेति*।। अन्वयव्यतिरेकयोस्तर्हि का गतिः? इत्याशङ्क्याह- *शब्दप्रयोगेति*।। पौनरुक्त्यशङ्कां निरस्यति- *प्रकरणेति*।। मानसंभेदस्य शक्तिविषयत्वकल्पकाभावस्तच्छब्दार्थः। वक्तृज्ञानं शब्दप्रमेयम्, तद्बलादर्थसिद्धिरिति पक्षे वेदाप्रमाण्यं चेत्याह- *किं च यदीति*।। एतच्च मूलग्रन्थाद् बहिरेव द्रष्टव्यम्।

किं वक्तृज्ञानमात्रं शब्दप्रमेयम्? उतार्थव्यावृत्तम्? इति विकल्पयति- *किंचेति*।। आद्यं दूषयति- *न तावदिति*।। द्वितीयं प्रत्याह–नापीति*।। 'नागृहीतविशेषणा विशेष्ये बुद्धिरि'ति न्यायादर्थप्रतीतिर्वक्तव्या। तस्याश्च कारणान्तरानिरूपणात् शब्द एव कारणमित्याह- *अर्थस्येति*।। अर्थज्ञानयोरपि प्रतिपत्तेरविशेषे कथमर्थस्यैवेत्यवधारणम्? तत्राह- *ज्ञानस्येति*।। शब्दरूपकार्यलिङ्गेन तत्करणभूतज्ञानानुमानमिति ज्ञानस्यान्यथासिद्धिरित्यर्थः। किं ज्ञानस्य पदार्थत्वम्? उत वाक्यार्थत्वम्? नाद्य इत्याह- *ज्ञानेति*।। द्वितीयं प्रत्याह- *न तस्येति*।। तत्र हेतुः- *पदार्थस्येति*।। ''विषं भुङ्क्ष्वे'' त्यादिवाक्यव्यतिरिक्तस्थलेष्विति शेषः। विशेषणभूतार्थज्ञानकारणान्तरानिरूपणाच्छब्दः कारणमित्युक्ते, तत्र कारणाभावोऽसिद्ध इति

शङ्कते–*पदेभ्य इति*।। * उत्प्रेक्षयेति*।। आकाङ्क्षा–सन्निधि–योग्यतावन्तः प्रायेण संसृष्टा इति ज्ञानेनेत्यर्थः। विकल्पासहत्वान्नैतच्चोद्यं संगच्छत इत्याह– *तदिदमिति*।। उत्प्रेक्षाज्ञानं किं स्मृतिः? उत संशयः? आहो विपर्ययः? अथवा प्रमाणम्? तत्र न तावत्स्मृतिः; तद्विषयस्य प्रागनवगतत्वात्, नापि संशयः; कोटिद्वयाभावात्, नापि विपर्ययरूपत्वम्; बाधानुपलब्धेः ततश्च प्रमितावन्तर्भावो वक्तव्यः। तत्राप्यक्षादिकरणत्वे शब्दवैयर्थ्यम्; शब्दकारणत्वे चास्मन्मतसिद्धिरित्यर्थः। वक्तृज्ञानं शब्दप्रमेयमित्यत्र दूषणान्तरमाह– *शब्दानामिति*।। परमतं निराकृत्य स्वमतं निगमयति– *तस्मादिति*।। शब्द एव संसर्गप्रमितौ समर्थश्चेत्तर्हि वक्तुर्ज्ञानान्वेषणं वृथेत्याशङ्क्य प्रतिबन्धनिरासायेत्यभिप्रत्याह– * वक्तृज्ञानमिति*।। अङ्गुल्यग्रादिवाक्यानामर्थासंस्पर्शनात्कथं शब्दानां संसर्गबोधित्वम्? इति शङ्कते– *कथं तर्हीति*।। कस्यचिदर्थासंस्पर्शित्वमात्रेण सकलशब्दानामपि तत्कल्पनेऽतिप्रसङ्गः स्यादित्याह– *उच्यत इति*।। समीचीनप्रत्यक्ष इत्यर्थः। रजतमित्यादिज्ञानानां दुष्टकरणान्यत्वादयथार्थत्वम्, इतरेषां च तद्वैपरीत्यान्नैवमित्याह– *शब्देऽपीति*।। शब्दमात्रस्य संसृष्टप्रमित्यजनकत्वेऽप्याकाङ्क्षा–सन्निधि योग्यतासहकृतस्य संसृष्टप्रमितिजनकत्वं युक्तमित्यर्थः। तस्माच्छब्दानामर्थसंस्पर्शित्वात् तन्मात्रे संबन्धग्रहणं न मानान्तरसंभिन्न इत्युक्तं युक्तमितीतिशब्दार्थः।

लौकिकवाक्यस्य भूतार्थस्य मानान्तराधिगते प्रामाण्यसंभवेऽपि न वेदवचसस्तथात्वमित्युक्तम्, ''अपिचे''त्यत्र तत्रानपेक्षः शब्द इति कथमुक्तम्? सङ्गतिग्रहणाद्यपेक्षादर्शनादित्याशङ्क्याह– *किं चापौरुषेयस्येति*।। प्रमाणान्तरमनपेक्ष्य शब्दोऽर्थप्रमितिं जनयतीत्युच्यते, न सहकारिणमप्यनपेक्ष्येत्यर्थः। बाधकप्रत्ययकल्प्यत्वात्–''एकमेवाद्वितीयमि''त्यादेश्च प्रत्यक्षादिपराहतत्वात् तत्र दोषः कल्प्यत इत्याशङ्क्याह– *न तत्साधूक्तमिति*।। अद्वैतावभासस्यैव दुष्टकारणजन्यत्वं किं न स्यात्? इत्याशङ्क्य, किं शब्ददोषात्तज्जनिः? उत प्रमेयदोषात्? अथवा प्रमातृदोषात्? इति विकल्प्याद्यं प्रत्याह– *शब्दस्येति*।। अपौरुषेयत्वेनानाप्तप्रणीतत्वासंभवादित्यर्थः। प्रपञ्चग्राहिचक्षुरादावपि दोषादर्शनं तुल्यमित्याशङ्क्याह– *द्वैतेति*।। चक्षुरादौ काचादिदोषस्य क्वचित्सिद्धत्वादितरत्र तच्छङ्का, अपौरुषेये तु शब्दे क्वचिदपि दोषो न दृष्ट इत्यर्थः। द्वितीयमनुवदति– *इन्द्र इति*।। प्रपञ्चस्याविद्यादोषजन्यत्वात् तद्ग्राहिणोऽप्रामाण्यम्, न तथा ब्रह्मणो दोषजन्यत्वम् इति न शब्दस्य तद्दोषादप्रामाण्यमित्यर्थः। अथवा प्रत्यक्षादौ न केवलं दोषस्य संभावना, प्रत्युत तन्निश्चयश्चेत्याह– *इन्द्र इति*।। सावकाशानवकाशयोः सावकाशं दुर्बलम्; अनवकाशं प्रबलमिति न्यायः तथा च द्वैतावभासस्य सावकाशत्वाद् दौर्बल्यमित्याह– *स्वप्नवदिति*।। अथवा द्वैतप्रत्यक्षस्य दोषजन्यत्वेऽप्रामाण्याद् व्यवहारासिद्धिरित्याशङ्क्याह– *स्वप्नवदिति*।। शब्दस्यानवकाशत्वेन प्राबल्यमाह– *शब्द इति*।। शब्दस्य किं व्यावहारिकं प्रामाण्यम्? उत तत्त्वावेदनलक्षणम्? नाद्या इत्याह– * व्यवहारातीतेति*।। द्वितीयं

दूषयति– *दोषवत्तयेति *।। दोषोत्थस्वप्नज्ञानवद् द्वैतावभासस्य व्यवहाराविसंवाद:? आहो शुक्तिरूप्यज्ञानवद्विसंवाद:? इति शङ्कायामाह– *न चेति *।। ब्रह्मसाक्षात्कारोदय: पर्यन्तमप्रतिहतव्यवहारा तद्विसंवाद: शङ्क्य इत्यर्थ:।। '' इयं शुक्तिरि'' ति ज्ञानोत्तरकालम् ''इदं रजतमि'' त्यादिज्ञानोचितव्यवहारा-भाववदद्वैतप्रतिपत्तौ न द्वैतावभासोचितव्यवहार: स्यादित्याशङ्क्याद्वैतसाक्षात्कारादर्वाक् पारमार्थिकांश-स्यैवोपमर्द इत्याह– * आगमेनेति *।। प्रातिभासिकस्य व्यावहारिकस्य च सत्त्वस्य न बाध:; प्रत्यक्षविरोधा-दित्याह–व्यवहारेति *।। प्रपञ्चस्यातात्विकत्वे तदन्त:पातिशास्त्राचार्यादेरप्यतात्त्विकत्वाद् बाष्पस्वप्नवन्न प्रमितिजनकत्वमित्याशङ्क्याह– *अद्वितीयेति *।। बाष्पस्य त्वव्याप्तत्वात्प्रमित्यहेतुत्वम्, नासत्यत्वादित्यर्थ:। कदाचिदपि तर्हि न व्यवहारोपमर्द:, इत्याशङ्क्याह– *तस्मादिति *।। यथा 'नाह मनुष्य:, इत्यपरोक्षप्रत्ययो देहात्मप्रत्ययं बाधते, तथाऽयमित्यर्थ:। द्वैतावभासस्यानेककालप्रवृत्तत्वान्न बाध्यत्वमित्याशङ्क्याह– * अन्यथेति *।। रेखासंनिवेशादिप्रमेयदोषवशाद् यथा चित्रनिम्नोन्नतज्ञानं ज्ञायमानमप्रमाणम्, तथा ब्रह्मज्ञानमपीति शङ्कते– *ननु प्रमेयेति *।। अत्र च भूतत्वादि: प्रमेयदोष इति द्रष्टव्यम्। प्रमेयस्य च प्रत्यक्षज्ञानं प्रति कर्मकारकत्वात् तद्गतदोषस्य हेतुत्वं युक्तम्, न तथा प्रकृत इत्याह– *नेत्याहेति *।। ''ग्रावाण: प्लवन्ते'' इत्यादौ विरोधाप्रामाण्यं दृष्टम्, तन्निरासार्थ विधिशेषत्वम्? आहो भूतार्थे संवादापेक्षादर्शनात्तन्निरासार्थं वेति विकल्पार्थ:। आद्यं दूषयति– *विरोध इति *।। अन्यतरस्य प्रत्यक्षादेरिति यावत्। स्वत:प्रामाण्याद् वेदस्य न संवादापेक्षेत्याह– *नेत्याहेति *।। बोधलक्षणं प्रामाण्यमिति पक्षे स्मृत्यादेरपि प्रामाण्यप्रसङ्ग:, अत्राह– *अज्ञातेति *।। अनधिगतार्थबोधकत्वेन भूतवचसामपि प्रामाण्याद् विधिवाक्यानामेव प्रामाण्यमित्ययुक्तमित्याशङ्क्याह– *ननु तत्रेति * ।। अज्ञातार्थबोधकत्वमात्रेण प्रामाण्यं सर्वज्ञजैमिनिवचनविरुद्धमित्यर्थ:। क्रियार्थत्वं विनाऽप्यनपेक्षत्वेन प्रामाण्यसिद्धेर्नेतरेतरा-श्रयत्वमित्याशङ्क्याह– *नेतरेति *।। भूतवाक्यानां प्रामाण्यं क्रियार्थत्वेन वक्तव्यम्, ततश्चेतरेतराश्रयत्वमित्यर्थ:। विधिवाक्यप्रामाण्यमन्तरेणापि क्रियार्थसिद्धेर्नेतरेतराश्रयत्वमिति शङ्कते– *ननु सूत्रकारेति *।। समन्वयसूत्रविरोधेन प्रामाण्यमेवासिद्धमित्याह– *नेत्याहेति *।। क्रियार्थत्वस्याप्रयोजकत्ववद् भूतार्थत्वमप्यप्रयोजकम्; व्यभिचारादित्याशयेन शङ्कते– *कस्तर्हीति *।। येन यत्प्रमीयते, स तस्यार्थ इति नियमाद् धर्मब्रह्मणोरन्यतरस्याम्नायार्थत्वमित्याह– *तदाहेति *।।

शास्त्रस्य प्रवर्तकनिष्ठत्वात्कार्यबोधितमप्रामाण्यमिति शङ्कते– *ननु प्रमेयेति *।। *नावबोधादिति *।। नावबोधमात्रादित्यर्थ:। प्रवर्तकनिष्ठत्वमसिद्धमित्याह–न कार्यस्येति *।। कार्यपदस्येत्यर्थ:। बोधकत्वेनापि न नित्यबोधे ब्रह्मणि वेदान्तानां प्रामाण्यमिति शङ्कते– *न तर्हीति *।।

अनुभवविरोधान्नैवमित्याह– *नेत्याहेति *।। नित्यबोधेऽपि तदाकारवृत्त्युत्पादनेन वेदान्तानां प्रामाण्यं घटत इत्याशय:। ''चोदना हि क्रियाया: प्रवर्तकं वचनमि'' त्यभिधानान्न विधेर्बोधकत्वमात्रेण प्रामाण्यमिति

शङ्कते- *ननु प्रवर्तनेति*।। प्रवर्तनालक्षणं गमकं यस्य प्रामाण्यस्य, तत्; तथोक्तम्। व्यभिचारित्वान्नैतल्लक्षणमित्याह- *नेत्याहेति*।।

प्रत्यक्षाधिगतेऽपि प्रवृत्तिदर्शनात् प्रवर्तकत्वलक्षणमेव सर्वत्र प्रामाण्यम्, ततश्चाहेत्यादिरयुक्त इत्याशङ्क्याह- *ननु भिन्नमेवेति*।। उपेक्षणीयज्ञानस्य प्रवर्तकत्वाव्यभिचारादित्यर्थः। प्रवृत्ति-निवृत्त्योस्तर्ह्याकस्मिकत्वम्, तत्राह- *प्रवृत्ति-निवृत्ती इति*।। वस्तुनि प्रतिपन्ने तस्य हिताहितसाधनत्वानुरोधेन प्रवृत्त्यादिसंभवादित्यर्थः। शब्देऽपि तर्हि तादृशं प्रामाण्यम्? तत्राह- *शब्दे त्विति*।। ततः किम्? इत्यत आह- *अत इति*।। फलविधुरत्वाद् भूतवाक्यानामप्रामाण्ये शङ्किते ऽपेक्षागोचरत्वनिरूपणमसङ्गतमिव प्रतिभातीत्याशङ्क्याह- *उच्यत इत्यादेरिति*।। सम्यक्परिहारं दर्शयितुं विकल्पयति- *इदमिति*।। द्वितीयदूषणपुरःसरमाद्यमङ्गीकरोति- *तत्रेति*।। हिताहित - प्राप्तिपरिहारमात्रस्य पुरुषार्थत्वसंभवे साध्यत्वविशेषणं व्यर्थमित्यर्थः।।

सिद्धे प्रार्थनाऽभावात्साध्यत्वमपि प्रयोजकमिति गूढाभिसन्धिः शङ्कते- *ननु सर्व इति*।। यथाश्रुतमादायाह- *नेत्याहेति*।। साधनेऽपि प्रार्थनादर्शनात् कथमुक्तं पुरुषो ह्येतावदिति? तत्राह- *फलमेव हीति*।। इष्टानिष्टप्राप्ति-परिहारयोः पुरुषार्थत्वमङ्गीकृत्य साध्यत्वं तु सर्वत्राविशिष्टमिति शङ्कते- *ननु साध्येति*।। न च- सिद्धस्य साध्यत्वं व्याहतमित्यपि-शङ्क्यम्; दध्यादिवत्साध्यत्वसंभवादित्यर्थः। दध्यादेर्भावार्थोपरक्ततया साध्यत्वम्, न स्वरूपेणेत्याशयवानाह- *नेत्याहेति*।। संप्रति गूढाभिसन्धिमाविष्करोति- *ननु सर्व इति।। सिद्धेऽपि प्रेप्सादर्शनान्नैवमित्याह- * तत्राहेति*।। प्राप्तप्राप्तादेरपि पुमर्थत्वात्साधनाधीनत्वं तुल्यमिति शङ्कते- *ननु द्विविध इति*।। स्वभावविरोधान्नैवमित्याह- *नहीति*।। प्राप्तप्राप्ति-परिहृतपरिहारयोः क्रियासाध्यत्वाद् ज्ञानसाध्यत्वं वक्तव्यम्। न च तदुपपद्यते; ज्ञानस्य ज्ञेयनिश्चायकत्वादित्याशयेन शङ्कते- *ननु ज्ञानेति* ।। किं तत्र मुख्यसाध्यत्वस्यासंभवश्चोद्यते? उतामुख्यस्य? आद्यस्त्वङ्गीक्रियत इत्याह- *तत्राहेति*।। द्वितीये तु नोपपत्तिरित्यभिसन्धिनोक्तम्,- *तदपनयनादिति*।। दृष्टान्तमाशङ्कते- *ननु हस्तगतेति*।। अनुभवविरोधान्नैवमित्याह- * नेत्याहेति*।। दृष्टान्तोक्तमर्थं दार्ष्टान्तिके समर्थयितुमाक्षिपति- * ननु ब्रह्मेति*।। ब्रह्मणः स्वभावत्वान्न तद्भावस्य क्रियासाध्यत्वम् नापि ज्ञानलभ्यत्वम्, ज्ञाने सत्यपि पुरुषार्थादृष्टेः, स्वप्रकाशासङ्गे ब्रह्मणि विपर्ययासंभवाच्चेत्यर्थः। तत्त्वसाक्षात्कारस्य भ्रमविरोधित्वात् तद्दर्शनस्य चान्यथासिद्धेर्वक्ष्यमाणत्वाद् वस्तुतोऽसङ्गस्याप्यविद्यानिमित्तानर्थसंबन्धसंभवाच्च ब्रह्मज्ञानात्पुरुषार्थो युक्त इत्यभिप्रायेणाह- *तत्राहेति*।। पुरुषार्थपर्यन्तं प्रामाण्यमित्यङ्गीकृत्योक्तं पूर्वत्र, न च तदपीत्याह- *किं च शब्दस्येति*।।

प्रवृत्ति-निवृत्त्युद्देशेन वाक्यप्रयोगात् तत्पर्यन्तं तत्प्रमाणमित्याशङ्क्य किं प्रवृत्ति-निवृत्त्योः साक्षात्फलत्वम्? उत फलानुगुणतया? नाद्य इत्याह– *न चेति* साधनमादिशब्दार्थः। तत्रैव हेत्वन्तरमाह–न च ते इति*।। द्वितीये प्रयोजनपर्यन्तं प्रामाण्यमिति किं गुरुमतानुसारिणोच्यते? उत भाट्टमतानुसारिणा? नाद्य इत्याह– *ततश्चेति*।। *तत इति*।। प्रयोजनपर्यन्तं प्रामाण्यमिति पक्ष इत्यर्थः। द्वितीयमुत्थापयति–अकरण इति*।। परस्पराश्रयप्रसक्तेनैतदित्याह– *न प्रत्यवायस्येति*।। तन्निबन्धनत्वादिति*।। विधिनिबन्धनत्वादित्यर्थः। विहितत्वसिद्धौ तदकरणनिमित्तप्रत्यवायनिवृत्तिलक्षणं फलं सिध्यति, तस्मिन् सिद्धे तदुद्देशेन विहितत्वसिद्धिरितीतरेतराश्रयत्वमित्यर्थः। इतोऽपि न पुरुषार्थपर्यन्तं प्रामाण्यमित्याह–ततश्चेति*।। प्रत्यवायनिवृत्त्यसंभवस्तच्छब्दार्थः।। अनुष्ठाने बहुतरवित्तव्ययायासाद्यनर्थप्राप्तिः, अननुष्ठानेऽनेकबहिष्करणाद्यनर्थ इत्यप्रामाण्यं नित्यादिवाक्यानामित्यर्थः। अवान्तरप्रमेयमुपसंहरति– *अत इति*।। वर्णकार्थमुपसंहरति–तस्मादिति।।

इति परमहंसपरिव्राजकाचार्याखण्डानुभूतिशिष्येणाऽखण्डानन्दमुनिना विरचिते विवरणतत्त्वदीपने वेदान्तानां ब्रह्मणि समन्वयनिरूपणं नामाष्टमं वर्णकं समाप्तम्।।

अथ नवमं वर्णकम्

भूतार्थप्रतिपादने प्रयोजनाभावात्सापेक्षत्वप्रसङ्गाच्च विधिशेषतयैव वेदस्य प्रामाण्यमित्येतत्पूर्वत्र प्रत्यक्षेऽपि, अत्रापि विधिशेषत्वशङ्का प्रतिक्षिप्यत इति पौनरुक्त्यमाशङ्क्य, वृत्तानुवर्णनपुरःसरं प्रमेयभेदं दर्शयति– *लोक इत्यादिना*।। सिद्धे संगतिग्रहणादेवाबोधकत्वं नेत्याह– *भूत इति*।। अबोधकत्वाभावेऽपि भूते प्रयोजनाभावादपुरुषार्थतालक्षणमप्रामाण्यमित्याशङ्क्याह– *लौकिकवचसामिति*।। *प्रमाणान्तरानुसारेणेति*।। *वक्त्रनुमानानुसारेणेत्यर्थः। *प्रमाणान्तराभावादिति*।। अपौरुषेयत्वेन मूलभूतवक्त्रनुमानाभावादित्यर्थः। प्रत्यक्षादीना स्वर्गाद्यनुपलब्धावपि वेदस्य विधिनिष्ठत्वाद्विधेश्च कालान्तरभाविफलोत्पादानुकूलमप्रामाण्यं युक्तमित्यर्थः।

"सदेवे" त्यादिवाक्यं किं कार्यसंसृष्टे ब्रह्मणि प्रमाणम्? उत शुद्धे? इति सिद्धे पदानां व्युत्पत्तिसंभवासंभवाभ्यां संदेहे पूर्वपक्षः प्रदश्र्यत इत्यर्थः। कार्यसंसृष्टस्वार्थस्य पदशक्तिविषयत्वमाक्षिपति– *ननु लौकिकेति* लौकिकवचसां कुतो विधिसंस्पर्श इति संबन्धः। *प्रयोगप्रत्ययदर्शनादिति*।। मध्यमवृद्धप्रत्ययस्य च दर्शनादित्यर्थः। एकग्रन्थत्वशङ्कां निरस्यति– *परिहरतीति*।। सिद्धेऽप्यर्थे प्रयोगदर्शनात्कथमनुपपत्तिरिति शङ्कायामाह– *अयं भाव इति*।। प्रवृत्त्यभावे प्रयोजनासंभवात्सा संपादनीयेत्यभिसन्धायाह– *प्रवृत्तिमिति*।। प्रवृत्तेश्च प्रवर्तकज्ञानं विनाऽसंभवात्तदपि निष्पादनीयमित्याह– *प्रवर्तकेति*।। प्रयोगस्य प्रवर्तकविषयत्वमभिधाय प्रत्ययस्यापि तद्विषयत्वमाह– *तत इति*।। प्रवर्तके सङ्गत्याग्रहणात्कथं शब्दात्प्रवर्तकत्वबोधोदयः? इत्याशङ्क्य,

संगतेस्तद्विषयत्वमुपपादयति- *प्रवर्तकज्ञानेनेति*।। भवतु प्रवर्तके सङ्गतिग्रहः, तथाऽपि कथं कार्ये सङ्गतिग्रहः? तत्राह- *तच्चेति*।। प्रत्यक्षादिनिमित्तव्यवहारेषु तच्च प्रवर्तकं कार्यमिति संबन्धः। व्यवहारस्य प्रत्यक्षादिनिमित्तत्वमुपपादयति- *शब्दव्युत्पत्तेरिति*।। कार्यस्य प्रवृत्तिनिमित्तत्वमुपपादयति- *कार्यमिति ज्ञानादिति*।। तथाऽपि कथं परकीयप्रवर्तकविशेषसिद्धिः? इत्याशङ्क्याह- *श्रोतुरिति*।। श्रोतुः शब्दज्ञानगोचरं प्रवर्तकमपि कार्यमेवेति संबन्धः। स्वप्रवृत्तिहेतुत्वे तत्समधिगतं कार्यं विहायान्यत्रान्यस्य हेतुत्वकल्पकानुपलब्धेरित्यर्थः।। पदसमुदायस्य कार्ये शक्तिग्रहश्चेत् तर्हि पर्यायत्वं स्यादित्याशङ्क्याह- *तत्रेति*।। कार्ये संसर्गिणि शक्तिग्रहेऽपि कथं पदविशेषस्यार्थविशेषे शक्तिः? इत्याशङ्क्याह- *पुनरिति*।। तुरगपदस्य प्रक्षेपे तदर्थस्यापि क्षेपः, तदुद्धरणे उद्धार इत्यर्थविशेषस्य सङ्गतिरित्यर्थः। आवापोद्धाराभ्यामपीतरमात्रान्विते शक्तिर्गृह्यताम्, तत्राह- *प्रथमेति*।। समुदायस्य शक्तिग्रहणवेलायामित्यर्थः। इतरान्वितमात्रे वा पदविशेषस्य शक्तिग्रहणपक्षे प्राथमिककार्यसंसृष्टस्वार्थप्रतिपत्तिविरोध इत्यर्थः। कार्यज्ञानस्यार्भकप्रवृत्तिहेतुत्वसिद्धौ तदनुसारेणान्यत्रापि तत्कल्पनं स्यात्, न च तत्सिद्धमिति शङ्कते- *ननु बालस्येति*।। अनिष्टसाधने प्रवृत्त्यदृष्टेरिष्टसाधनताज्ञानं प्रवृत्तिहेतुरित्यर्थः। तर्ह्युभयमपि कारणं किं न स्यात्? इत्याशङ्क्याह- *न कार्येति*।। कल्पनागौरवप्रसक्तेर्नोभयहेतुत्वमित्यर्थः। ततः किमिति? अत आह- *ततश्चेति*।। प्रवृत्तिलिङ्गानुमिते प्रवृत्तिहेतोः सामर्थ्यग्रहणम्, कार्यस्य च प्रवृत्तिहेतुत्वाभावान्न तत्र शक्तिग्रहणमित्यर्थः।।

इष्टसाधनताबोधस्य प्रवर्तकत्वे नित्य-नैमित्तिककर्मसु प्रवृत्तिर्न स्यात्; तेषां फलसाधनत्वाभावात्, ततश्च कार्यज्ञानमेव प्रवर्तकमित्याशङ्क्य, नित्यादीनामपि फलवत्त्वान्न व्यभिचार इत्याशयेनाह- *न कार्येति*।। विकल्पासहत्वान्नैतदित्याह- *नैतदिति*।। इष्टसाधनताज्ञानं किं कार्ये बोधमुत्पाद्य प्रवृत्तिं जनयति? उत साक्षात्? नाद्य इत्याह- *अभिलषितेति*।। अव्यवहितपूर्वक्षणवर्तिनः कारणत्वात् कार्यज्ञानस्य तादृक्त्वादितरस्य चानीदृक्त्वात् कार्यज्ञानमेव प्रवर्तकमित्यर्थः। द्वितीयं दूषयति- *न चेति*।। कार्यज्ञानस्यापीष्टसाधनताज्ञानं विना प्रवर्तकत्वमनुपपन्नमित्याशङ्क्य, तस्य कार्यज्ञानं प्रति हेतुतयाऽन्यथासिद्धत्वात्कार्यमेव प्रवर्तकम्, तदन्विते च पदसामर्थ्यमित्युपसंहरति- *तस्मादिति*।। योग्येतरान्वितस्वार्थस्य कार्यसंसृष्टत्वाभावेन शक्त्यविषयत्वादर्शनात्, तस्यैव प्रयोजकत्वमिति शङ्कते- *ननु सर्वत्रेति*।। *विशेषणायोगदिति*।। संभवे व्यभिचारे च विशेषणमर्थवत्, अत्र चान्वितमात्रस्य व्यभिचाराभावान्न तन्निरासाय विशेषणमुचितमित्यर्थः। कार्यस्यान्वयित्वमात्रेण हेतुत्वकल्पनायां दण्डमाह- *अन्यथेति*।। केवलव्यतिरेकाभावेऽप्यन्वयमात्राद् यथा गगनादेर्हेतुत्वम्, तद्वदत्रापीत्याह- *नैतदिति*।। तर्ह्यतिप्रसक्तिरित्युक्तमित्याशङ्क्य वैषम्यमाह- *संसृष्टेति*।। इतोऽपि न प्रमाणान्तरगृहीतत्वमित्याह- *प्रमाणान्तरेति*।। प्रतिपन्ने शक्तिकल्पना, मानान्तरगृहीतत्वस्य चाप्रतिपन्नत्वान्न संगतिग्रहणमित्युक्तम्- ''श्रोतृव्यवहारो ही'' त्यादिग्रन्थ इत्यर्थः।

कार्यसंसृष्टस्वार्थस्यापि शक्तिविषयकत्वमयुक्तमित्याह- *नन्विति*।। किं सर्वेषां पदानां कार्यसंसृष्टस्वार्थे शक्ति:? आहो कार्यपदव्यतिरिक्तानाम्? इति विकल्प्याद्यं दूषयति- *ननु कार्यसंसृष्ट इति*।। एकस्मिन् प्रयोगे कार्यस्यैकत्वान्न तदन्वितस्य स्वार्थे सामर्थ्यसिद्धिरित्यर्थ:। नापि द्वितीय:; प्रयोजकभेदप्रसङ्गादित्याह- *कार्यपदस्येति*।। आद्यं पक्षमाह- *पूर्ववादी नेति*।। तर्हि कार्यपदस्य व्युत्पत्त्यसंभव इत्युक्तम्, तत्राह- *धात्वर्थस्यापीति*।। प्रकारान्तरेण प्रयोजकभेदापत्तिं शङ्कते- *ननु लोक इति*।। ''निधिमानेष भूभाग:'' इत्यादिवाक्यादर्थप्रतिपत्तिस्तावत्सर्वजनीना, न च सिद्धे सामर्थ्यग्रहणमन्तरेण तदुपपत्ति:, इति सिद्धेऽपि सामर्थ्यमाश्रयणीयमिति प्रयोजकभेदापत्तिरित्यर्थ:। परस्पराश्रयप्रसङ्गान्नैतच्चोद्यं शोभत इत्याह- *तत्संबन्धेति*।। सिद्धार्थे संबन्धग्रहणसिद्धौ गृहीतसंगतिकाच्छब्दादर्थप्रतिपत्ति:; तस्यां च तत्र संगतिग्रहणमितीतरेतराश्रयत्वमित्यर्थ:। कथं तर्ह्यतीतादिवाक्यादर्थप्रतिपत्तिरित्याशङ्क्य कार्यपदाध्याहारादिनेत्याह- *अतीतादीति*।। संगतिग्रहणपर्यालोचनया शब्दस्य कार्यपरत्वमेव युक्तमित्युपसंहरति- *तस्मादिति*।। ''पुरुषेच्छासमुत्थापित:'' इत्यस्य शब्दप्रयोगस्य प्रयोजनवद्विषयत्वमुक्तम्, तदस्मत्पक्षेऽपि संगच्छत इत्याशङ्क्य तात्पर्यमाह- *अपि चेति*।। अथवा ''पुरुषेच्छासमुत्थापित:'' इति ग्रन्थस्य पूर्वग्रन्थैनैकग्रन्थ्यशङ्कां निराकुर्वंस्तात्पर्यमाह- *अपिचेति*।। तथाऽपि कथं नियोगपर्यवसायित्वम्? तत्राह- *प्रयोजनस्येति*।। प्रवृत्तिनिवृत्त्योर्नियोगाधीनत्वात्तत्साध्यप्रयोजनमपि नियोगाधीनमित्यर्थ:। प्रयोजनस्य प्रवृत्ति-निवृत्तिसाध्यत्वनियमोऽसिद्ध इति शङ्कते- *ननु नेदमिति*।। इदं वेदान्तोत्थज्ञानफलं न कालान्तरभावि, नापि नैयोगिकमित्यक्षरार्थ:। कालान्तरभाविफलस्य क्रियाजन्यत्वसंभवान्नियोगाधीनत्वम्, इदं च न तथेत्यर्थ:। *अन्वयव्यतिरेकेति*।। कण्ठस्थचामीकरतत्त्वज्ञानाद्विस्मृतसुवर्णप्राप्तिस्तदविद्यानिवृत्तिश्च दृष्टा, एवं ब्रह्मसाक्षात्कारस्यापि साक्षात्कारत्वादविद्यानिवृत्तिहेतुत्वमित्यर्थ:। ब्रह्मसाक्षात्कारेऽविद्यानिवृत्ति:, इतरथा नेत्येवंलक्षणार्थप्रतिपादकं 'यत्र ही' त्यादिवाक्यम्, तत्सिद्धमित्यर्थ:। अनुभवविरोधान्नैवमित्याह- *नेत्याहेति*।।

तत्त्वज्ञानेऽपि पुमर्थो नोपलभ्यत इत्येतत्-''यत्र ही''त्यादिवचनविरुद्धमिति शङ्कते- *नन्वन्वयेति*।। श्रुतिरन्यपरेत्याह- *न प्रत्यक्षेति*।। इतोऽपि न ज्ञानमात्रायत्त: पुरुषार्थ इत्याह- *अपि चेति*।। किं शाब्दज्ञानमात्रात् पुरुषार्थ:? उत साक्षात्कारात्? नाद्य इत्याह- *शाब्देति*।। नापि द्वितीय:; शब्दात् चाक्षरादेर्वा तदनुपपत्तेरिति द्रष्टव्यम्। भूतार्थनिष्ठानामपि कुतूहलादिनिवृत्तिफलानां वचसामुपलम्भान्न विधिनिष्ठत्वनियम इति शङ्कते- *ननु* लोक *इति*।। दृष्टान्तत्वात्तत्र तथात्वम्, अत्र तु नैवमित्याह- *नेत्याहेति*।। तत्रापि विधिनिष्ठत्वमेवेति पूर्वपक्षाभिसन्धि:। वेदान्तानां ज्ञानविधिपरत्वं सूत्रविरुद्धमिति शङ्कते- *नन्विति*।। तत: किम्? अत आह- *न चेति*।। शब्दगृहीत इति*।।

सौत्रब्रह्मशब्दगृहीत इत्यर्थः। *सूत्रविरोधादिति*।। ब्रह्मणो जिज्ञासाकर्मत्वप्रतिपादकसूत्रविरोधादित्यर्थः। सूत्रविरोधदोषस्य कः समाधिरित्याशङ्क्य, विधिशेषत्वेन वेदान्तैर्ब्रह्मणः प्रतिपाद्यत्वान्न विरोध इत्याशयेनाह- *तथापीति*।। सत्यादिवाक्येषु विधेरनुपलम्भात्कथं तच्छेषत्वं तेषामिति शङ्कते- *कथं पुनरिति*।। प्रतिपत्तिविध्याकाङ्क्षितविषयसमर्पणेन तच्छेषत्वमित्याह- *तदाहेति*।। सर्वेषां पदानां कार्यान्वित एव व्युत्पत्तेस्तत्रैव प्रयोजनसंभवाच्च विधिनिष्ठत्वे वेदस्य चोदिते सिद्धे अपि व्युत्पत्ति-प्रयोजने प्रतिपादनीये, किमिदं ब्रह्मकर्मकम्? इत्याशङ्क्य तात्पर्यमाह- *तत्रेति*।। *तत्र=वेदान्तेष्विति यावत्।

अथापीत्यतः प्राक्तनेन टीकाग्रन्थेन नियोगासिद्धिरभिधीयते, तत आरभ्य ब्रह्मासिद्धिः, सिद्धे व्युत्पत्त्यादिकं चेत्यभिप्रायः। *ननु* अत्र ज्ञानस्य विधेयत्वनिराकरणं लक्ष्यते, न नियोगनिराकरणमित्याह- *तत्र विधेयेति*।। ब्रह्मणि तिस्रः प्रतिपत्तयः संभवन्ति, शाब्दी, भावनात्मिका, साक्षाल्लक्षणा चेति, तत्र कीदृशं ज्ञानं विधीयते? इति किंशब्दार्थः। आद्यस्तावदयुक्त इत्याह- *तत्र तावदिति*।। अधीतस्वाध्यायस्यापि पाठकस्य ज्ञानादृष्टेः स्वाध्यायपाठात्तत्सिद्धिरित्युक्तमयुक्तमित्यशङ्क्य तात्पर्यमाह- *गृहीतपदेति*।

शब्दज्ञानमात्राद् ज्ञानोत्पत्तौ दृष्टान्तमाह- *विधिवाक्यादिति*।। वाक्यादेव ज्ञानोत्पत्तौ विचारानर्थक्यमित्याशङ्क्यासंभावनादिनिरासे तस्योपयोग इत्याह- *तदेवेति*।। विचारावैयर्थ्यमितिशब्दार्थः। शब्दात्तद्ज्ञानोत्पत्तिसंभवेऽपि विधिः किं न स्यादिति? अत्राह- *न चेति*।। अप्राप्ते शास्त्रस्यार्थवत्त्वाद् ज्ञानस्य चान्यतः सिद्धत्वान्न विधिरित्यर्थः। ज्ञानस्य क्षणिकत्वात्तदभ्यासविध्यसंभवमाशङ्क्याह- *शब्दावगत इति*।। मोक्षः प्रयोजनमित्यसंगतमित्याशङ्क्य, तददृष्टं प्रयोजनम्? उत दृष्टम्? नाद्य इत्याह- *तत्र स्मृतीति*।। *तत्र=दृष्टादृष्टप्रयोजनयोर्मध्य इत्यर्थः*। नापि द्वितीयः; अनुपलब्धेरित्याह- *दृष्टेति*।। अनुपलब्धिरसिद्धेति शङ्कते- *ननु मर्दनेति*।। विध्यानर्थक्ये को हेतुः? इति न ज्ञायत इति, तत्राह- *तर्हीति*।। विधेर्न मोक्षः प्रयोजनम्, किं तु साक्षात्कार इत्युक्तम्, तत्र कस्य साक्षात्कार इत्याकाङ्क्षायामाह- *अस्तु तर्हीति*।। साक्षात्कारस्य दृष्टरूपताया अनुक्तत्वान्नैतदिति समाधानमनुचितमित्याशङ्क्य विकल्पपूर्वं व्याचष्टे- *किं साक्षात्कारणमिति*।। *अदृष्टमिति*।। विध्यर्थानुष्ठानाद् यदपूर्वमुत्पद्यते, तत्साध्यमित्यर्थः। आद्यं दूषयति- *न चेति*।। ''यज्ञेन विविदिषन्ती'' त्युक्तत्वात्कथमदृष्टाजन्यत्वम्? इत्याशङ्क्य, किमदृष्टमात्रं जनकम्? उत कारणान्तरसहकृतम्? नाद्य इत्याह- *अदृष्टेति*।। तस्यप्रमाणत्वादित्यर्थः। द्वितीयमुत्थापति- *अदृष्टेति*।। ब्रह्मध्यानादिना जनितं यददृष्टं प्राग्जन्मनि, तत्सहकृताच्छब्दाज्जन्मान्तरे साक्षात्कारोदय इत्यर्थः। अनवगते निदिध्यासनानुपपत्तेर्निदिध्यासनसिद्ध्यर्थ यथा शब्दादवगतिजनिराश्रिता, तद्वच्छुद्धान्तःकरणस्य शब्दश्रवणादपरोक्षविद्याऽपि किं न स्यादित्याह- *तर्हीति*।। द्वितीयमनुवदति- *अथेति*।। किं संतानविधिः

साक्षात् साक्षात्कारं प्रसूते? उत परम्परया? नाद्य इत्याह- *नानुपलब्धेरिति *।। परोक्षज्ञानाभ्यासादपरोक्षज्ञानजन्मनोपलब्धमित्युक्तमयुक्तम्; तत्रार्थस्य परोक्षत्वादपरोक्षत्वानुपपत्तेः, अत्र तु ब्रह्मणोऽपरोक्षत्वादपरोक्षज्ञानं स्यादिति चेत्, मैवम्; अपरोक्षवस्तुन्यपि परोक्षज्ञानाभ्यासादपरोक्षप्रथाया अदृष्टत्वादित्यभिसन्धिः। द्वितीयमुत्थापयति- *शाब्दज्ञानेति *।। साक्षात्कारफलकं विज्ञानं किमदृष्टद्वारा जायते? उत दृष्टद्वारा? नाद्य इत्याह- *तदपीति *।। अपरोक्षज्ञानं फलं यस्य, तत्तथोक्तम्। द्वितीयं दूषयति *।। *नापि दृष्टतयेति *।। साक्षात्कारफलकज्ञानान्तरजनकोऽभ्यास इत्येतच्च विमानमित्याह- *नापीति *।। भावनात्मिकायां प्रतिपत्तौ विधिरित्यत्रैव विशेषं शङ्कते- *मा भूदिति *।।

स्मृतिसन्तान-ध्यानयोर्विशेषाभावान्न शङ्कोत्थितिरित्याह- *ननु को विशेष इति *।। विशेषभावोऽसिद्ध इत्याह- *तत्र स्मृतिसंतान इति *।। प्रमेयतोऽपि भेदमाह- *वस्तुतत्त्वविषय इति *।। ''किमर्थमि''त्यत्र किंशब्दस्याक्षेपार्थत्वमाह- *ननु तस्यापीति *।। आद्यं निरस्यति- *न तावदिति *।। द्वितीये किं साक्षात्करणम्? उतान्यत्? न तावद् द्वितीय इत्याह- *नापि दृष्टमिति *।। आद्यमुत्थापयति- *ननु ध्येयेति *।। तदपि किमदृष्टम्? उत दृष्टम्? इति विकल्प्य क्रमेण दूषयति- *तदपि नेत्यादिना *।। ध्यानस्य साक्षात्कारहेतुत्वमदृष्टमित्याशङ्क्य, ध्यानोत्कर्षस्य तद् दृष्टमित्याह- *ननु ध्यानेति *।। ध्यानमेवाभ्यासो ध्यानाभ्यासः, तस्य प्रचयसामर्थ्यादित्यर्थः। ध्यायमानस्य नापरोक्ष्यमित्युक्तम्, तत्र हेतुमाह- *विनष्टेति *।। तर्ह्यनुभवविरोध इति शङ्कते- *किंत्विति *।। अनुभवोऽन्यविषय इत्याह- *यत्पुरोदेश इति *।।

अविद्यामयस्यापि ध्यानादेवापरोक्ष्यसिद्धेः कथं ध्यानस्यातत्साधनत्वमित्याशङ्क्याह- *अत इति *।। ध्यानोत्थस्याप्यपरोक्षप्रत्ययस्य संवादकप्रमाणानुग्रहात्प्रामाण्यसिद्धिरिति शङ्कते- *ननु ब्रह्मात्मनीति *।। संवादादयथार्थत्वेन दृष्टान्तमाह- *यथेति *।। अपसिद्धान्तप्रसङ्गान्नैतच्चोद्यमित्याह- *नैतत्सारमिति *।। *तथाभूतज्ञानत्व इति *।। यथार्थज्ञानत्व इति यावत्। न च संवादाधीनं प्रामाण्यम्; अनवस्थाप्रसक्तेरित्यर्थः। दृष्टान्तोऽप्यसंप्रतिपन्न इत्याह- *न चेति *। कथं तर्हि संवादः? इत्याशङ्क्याह- *संवादस्त्विति *।। उचितसामग्रीशून्यत्वादप्रामाण्यमित्याह- *न हीति *।। ध्यानस्य साक्षात्कारः फलमित्येतत्पुरस्तादेव निरस्तम्, किमिति पुनस्तदुत्थितिः? इत्याशङ्क्य तात्पर्यमाह- *ननु विधीति *।। विधिरुद्दिश्यते यस्मिन्वाक्ये, तद्विध्युद्देशम्; तत्सामर्थ्यादित्यर्थः। ''आत्मा वा अरे द्रष्टव्यः'' इति साक्षात्कारमनूद्य निदिध्यासनं विधीयते। ततश्च ध्यानस्य साक्षात्कारफलत्वं युक्तमिति शङ्कार्थः।।

ध्यानस्य दृष्टफलताया अनुक्तत्वात्तन्निरसनमनुचितमिवेत्याशङ्क्य, विकल्पोत्तरत्वेन व्याचष्टे- *तत्रापीति *।। साक्षात्कारस्यं नियोगसाध्यतयोपचितापचितरूपत्वात्तत्साध्यस्यापि तादृक्त्वं स्यादित्याह- *नैयोगिकत्व इति *।। भवतु नाम, एतावतैवालम्, किमथापीत्यनेनेत्याशङ्क्य, विधेयाङ्गीकारस्तेन निर्दिश्यते, साक्षात्कारफलं त्वनेनेति विभागमभिसन्धायाह- *विधेयेति *।। किं शब्दः

प्रमाणम्? आहोस्विदन्य:? इति किंशब्दार्थ:। आद्यमुत्थापयति शब्द इति*।। किं शब्दस्य महातात्पर्यम्? उतावान्तरतात्पर्यम्? नाद्य इत्याह- *नेत्याहेति*।।

न्यायमात्रस्य प्रमित्यहेतुत्वात् कथं ''तथापि तत्त्वं सिद्ध्यती'' त्युक्तमित्याशङ्क्य, विकल्पान्तरपरतयाऽवतारयति- *ननु ज्ञानविधीति*।। प्रत्यक्षादीनामाभासत्वान्न तद्विरोध इति परिहारस्याभासत्वमाशङ्क्याह- *परिहरतीति*।। बलवत्प्रमाणेन बाधमन्तरेण न प्रत्यक्षादेराभासत्वम्, न चाम्नायस्य बाधकत्वम्; तस्य विधिपरत्वादित्यर्थ:। *ननु* ''श्रोतव्य:'' इत्यादेर्विधिपरत्वेऽपि वस्तुतत्त्वसिद्धिराश्रिता, तत्राह- *तस्मादिति*।। ''सत्यं ज्ञान'' मित्यादीनां ब्रह्मणि तात्पर्यात् तत्रैव ''निदिध्यासितव्य:'' इत्यादेरपि तात्पर्यम्, विधौ त्ववान्तरतात्पर्यमिति न विधिपराद् वाक्याद् वस्तुसिद्धिरित्यर्थ:। ध्यानविधिपक्षोक्तदूषणस्यातिदेश: कृत: ''पूर्वोक्तपक्षेष्वि'' ति, स नोपपद्यते; पक्षद्वयस्यैवोक्तत्वात्, पक्षेष्विति बहुवचनानुपपत्तेरित्याशङ्क्य, तयोरवान्तरभेदाभिप्रायेण बहुवचनमित्याह- *सर्वेति*।।

''यत्पुनरि'' त्यत्र शाब्दज्ञानादन्यद् ज्ञानान्तरं विधीयत इत्युक्तम्, अस्य चोद्यस्य निरस्तत्वादित्याशङ्क्याह- *स्मृतिसंतानेति*।। अपरोक्षं च तत्फलं चेति विग्रह:। ज्ञानस्य साधन-कर्मणो: प्रसिद्धत्वात् कथं चोद्यमित्याशङ्क्य तात्पर्यमाह- *तत्रेति*।। ''तमेतमि'' त्यादे: पूर्वग्रन्थशेषत्वं निरस्यति- *शङ्कत इति*।। आत्मज्ञानस्य शब्दैककरणत्वात् कथ वेदानुवचनादिकरणत्व-मित्याशङ्क्याह- *श्रवणेति*।। ''प्रमाणान्तरस्ये'' त्यत्र किं तत्प्रमाणान्तरं निर्दिष्टम्? कथं वा शब्दस्य तत्र प्रामाण्यप्राप्ति:? इत्याशङ्क्याह- *अयमर्थ इति*।। निर्विषयप्रमाऽसंभवाद् ब्रह्मविशेषितप्रमाणं प्रामाण्यं वक्तव्यम्, तथा च कथं ब्रह्मासिद्धिरित्याशङ्क्याह- *ततश्चेति*।। प्रामाणिकत्वकल्पना न दोषायेति शङ्कते- *ननु विधिविषयमिति*।। भावसाधनो निर्देश:। यद् येन प्रमीयते, तत्तत्र प्रामाणम्; नियोगस्य चात्रानुपलभ्यमानत्वान्न तत्र प्रामाण्यमिति परिहरति- *नेत्याहेति*।।

अङ्गुल्यग्रादिवाक्येऽप्यर्थप्रतीतिकार्यं दृष्टम्, न च तस्य प्रमाणत्वम्, तद्वदत्रापीत्यत आह- *गृहीतसंबन्धस्येति*।। अबाधितानधिगतासंदिग्धप्रमितिर्निश्चितप्रमितिशब्दार्थ:। विधिनिष्ठत्वस्य प्रामाण्यप्रयोजकत्वे दण्डमाह- *विषयस्येति*।। *विधेयत्वगम्य इति*।। विषयस्य विधेयत्वेन हेतुना प्रामाण्ये प्रतीयमान इत्यर्थ:। दर्श-पौर्णमासविधि:=दर्शपौर्णमासनियोग इत्यर्थ:। येन वाक्येन यो नियोग: प्रतीयते, तत्तत्र, प्रमाणम्, अग्निहोत्रवाक्ये दर्श-पौर्णमासनियोगाप्रतीतेर्न तत्र प्रामाण्यमति शङ्कते- *तत्रेति*।। तुल्यमुत्तरमित्याह- *इहापीति*।। निरस्तमपि चोद्यं प्रकारान्तरेण निराकर्तुं तदनुवदति- *ननु लौकिकमिति*।। प्रत्यक्षादिगतमित्यर्थ:। *शास्त्रीयमिति*।। शास्त्रनिष्ठमित्यर्थ:। सूत्रविरोधान्नायं विभागो युज्यत इत्याह- *नेत्याहेति*।।

किंपरमिदं सूत्रमिति न ज्ञायते? इत्याशङ्क्यार्थमाह- *अत्रेति*।। लौकिकानामिति*।। प्रस्तरादिशब्दानामित्यर्थ:।। लौकिकानां शब्दानां मुख्यवृत्त्या वेदेऽर्थाभिधानानुपपत्तौ गुणादमुख्यवृत्त्याऽप्यर्थाभिधानं युक्तम्, तत्र हेतुमाह- *संबन्धस्येति*।। लोकप्रतिपन्नसंबन्धविलक्षण-संबन्धस्याशास्त्रहेतुत्वात् शास्त्रार्थनिर्णयाहेतुत्वादित्यर्थ:। फलितमाह- *एवमिति*।। टीकापेक्षितमवान्तरप्रमेयनिराकरणोपसंहरणं दर्शयति- *तस्मादिति*।। *दृष्टफलतयेति।। साक्षात्कारलक्षण-दृष्टफलत्वेनेत्यर्थ:। नियोगस्वरूपानिरूपणादपि न तत्पर्यवसितत्वं वेदान्तानामित्याह- *ननु कोऽयमिति*।। स्वरूप-प्रमाणयोरनिरूपणादित्यर्थ:। लोकप्रसिद्धत्वान्न तत्स्वरूपं निराकार्यमित्याह- *नन्वाचार्येति*।। प्रसिद्धिमङ्गीकरोति- *सत्यमिति*।। कथं तर्हि तदनिरूपणमित्याशङ्क्य, तस्य वैदिकलिङाद्यर्थत्वासंभवं वक्तुं लौकिकनियोगस्वरूपमाह- *तत्रेति*।। तत: किमिति? अत आह- *नासाविति*।। असंभवे हेतुमाह- *अपौरुषेय इति*।। तर्ह्यन्य एव वेदे लिङाद्यर्थ इत्याशङ्क्याभिप्रायभेदस्य लोकेऽपि न प्रवर्तकत्वमित्याह- *बालस्येति*।। अभिप्रायभेदस्य व्यभिचारित्वान्न प्रवर्तकत्वम्, नापि लिङाद्यर्थत्वमित्युक्तम्, तत्रान्यदेव प्रवर्तकमिति शङ्कते- *ननु कार्येति*।। तत्र हेतुमाह- *प्रवर्तकत्वसाम्यादिति*।। अभिप्रायभेदात् कार्यस्यापि प्रवर्तकत्वान्नियोगशब्दवाच्यत्वमित्यर्थ:। कार्यमेव तर्हि विचारयेत्याह- *किमिदमिति*।। किं कृतियोग्यतामात्रं कार्यम्? उत कृतिसंसृष्टम्? आहो कृतियोग्यत्वे सत्यलौकिकत्वम्? उत प्रवर्तकाकार:? इति किंशब्दार्थ:। आद्यं शङ्कते- *यदीति*।। दूषयति- *नेति*।। कृतियोग्यतामात्रज्ञानात्प्रवृत्तौ दु:खसाधनानामपि कृतियोग्यत्वात् तज्ज्ञानादपि प्रवृत्ति: स्यादित्यर्थ:। द्वितीयमुत्थापयति- *अथेति*।। परस्पराश्रयप्रसङ्गान्नैतदित्याह- *न कृतीति*।। कार्यबुद्धौ जातायां तन्निबन्धन: कृतिसंस्पर्श:, तस्मिन् सति कार्यबुद्धिरितीतरेतराश्रयत्वमित्यर्थ:। तृतीयमुत्थापयति- *अथ कृतियोग्यमिति*।। अलौकिकमिति*।। कृत्युद्देश्यमित्यर्थ:। विकल्पासहत्वान्नैतदित्याह- *तर्हीति*।। द्वितीये संगतिग्रहणानुपपत्तिरित्यभिप्रेत्याद्यं दूषयति- *प्रतिपन्नमिति*।। निर्देष्टव्यं चेत्याह- *निदर्शनीयमितीति*।। न च कृतिसाध्यं तदुदेश्यमिति निर्देष्टुं शक्यम्; फलस्यापि तादृक्त्वादित्यर्थ:। चतुर्थमुत्थापयति- *ननु कार्यमिति*।। तथाऽपि कथं तस्य क्रियावैलक्षण्यम्? तत्राह- *तत इति*।। कार्यज्ञानोत्तरकालं प्रवृत्तिनियमात् प्रवर्तकाकार: कार्यमित्यर्थ:। अतिव्याप्त्या दूषयति- *नेति*।।

धात्वर्थमात्रस्य न प्रवर्तकत्वम्, दु:खसाधने व्यभिचारात्, इत्यभिप्रेत्य विशिनष्टि- *अभिलषितसाधनतयेति*।। कार्यबुद्धिगोचरत्वे सति प्रवर्तकत्वं लिङर्थ इत्याशङ्क्याह- *तस्यैवेति*।। शिशिरमरीचिमण्डलोदयादेरभिलषितसाधनत्वेऽपि न कार्याधीनत्वमिति तद्भेद इति शङ्कते- *नन्वन्यत् कार्यमिति*।। किमिष्टसाधनमात्रस्य कार्यधीगोचरत्वं निरस्यते? उत तद्विशेषस्य? इति विकल्प्याद्यमङ्गीकरोति- *सत्यमिति*।। द्वितीयं दूषयति- *अभिलषितेति*।। एकस्या व्यक्ते: साधनत्वं कार्यत्वं चानुपपन्नम्; कार्यस्य साध्यतारूपत्वात्, साधनस्य

चोत्पादकत्वादित्याशङ्क्याह- *नच श्रेय इति*।। कृति-श्रेयसोर्भिन्नत्वात्ताभ्यां विशेष्यमाणं कथमेकं स्यादिति वाऽऽशङ्क्याह- *न च श्रेय इति*।।

यागादिव्यक्तिषु कृतिसाध्यत्वस्य श्रेय:साधनत्वस्य च भावान्नैतावता भेद इत्यर्थ:। कृतियोग्येष्टसाधनव्यतिरिक्ते कार्ये प्रमाणं च नेत्याह- *न चेति*।। अदर्शनमसिद्धम्; फलस्य प्रवर्तकतयाऽनुभवादित्यन्वय:। कश्चित् शङ्कते- *ननु फलमिति*।। साधनस्य प्रवृत्तिव्यभिचारित्वान्न तदपि प्रवर्तकमिति वा शङ्कते- *नन्विति*।। किं तद्बाह्यप्रवृत्तेर्हेतु:? उतान्तरप्रवृत्ते:? नाद्य इत्याह- *न विशिष्टेति*।। ब्रह्मप्रवृत्तिर्विशिष्टप्रवृत्तिशब्दार्थ:। फलज्ञानं विना विशिष्टप्रवृत्त्यसंभवात्तद्धेतुरित्याशङ्क्य, तस्मिन् सत्यपि साधनज्ञानाभावे प्रवृत्त्यसंभवात् तदेव हेतुरित्याह- *अभिलषितेति*।। द्वितीयं प्रत्याह- *फलस्येति*।। एवं प्रासङ्गिकं चोद्यं निरस्य, कार्ये प्रमाणं नेत्येतत्प्रपञ्चयति- *न च कार्यमिति*।। कथमदर्शनमिति चेत्, तत्र वक्तव्यम्-किं प्रत्यक्षं तत्र मानम्? उतानुमानम्? आहो आगम:? किं वाऽनुपपत्ति? नाद्य इत्याह- *न तावदिति*।। प्रत्यक्षस्य वर्तमानविषयत्वात्कार्यस्य च तद्वैपरीत्यान्न प्रत्यक्षत्वमित्यर्थ:। द्वितीयं निरस्यति- *संबन्धेति*।।

तृतीय: प्रत्याह- *अव्युत्पन्नत्वादिति*। चतुर्थ: प्रत्याह- *अलौकिकेति*।। अनुपपत्त्यभावोऽसिद्ध इति शङ्कते- *प्रवृत्तिरिति*।। अन्यथोपपत्त्या दूषयति- *न कृतियोग्येति*।। प्रमाणविधुरत्वादिष्टसाधन-वाक्यार्थोऽपि नादेय इत्यत्राह- *न च साधनत्वमिति*।।

तर्हि फलोत्पत्ते: पुरा साधनत्वस्य दुरधिगतत्वात्कथं तत: प्रवृत्तिरिति? अत्राह- *अननुभूत इति*।। इदमेतत्साधनमेतज्जातीयत्वादमुकवदित्यनुमानात्साधनत्वसिद्धिरित्यर्थ:। कृतियोग्येष्टसाधनमिति सविशेषणप्रयोजकाङ्गीकाराद् गौरवम्, इतरत्र लाघवमित्याशङ्क्याह- *न चेति*।। ''संभवे व्यभिचारे च स्याद्विशेषणमर्थवद्'' ति न्यायाद्विशेषणकल्पनं न दोषाय। न च-निर्विशेषणप्रयोजकसंभव इतरकल्पनमयुक्तमिति-वाच्यम्; इष्टसाधनज्ञानं विना कार्यबुद्धिस्तावन्न संभवति; इष्टसाधनज्ञानमात्रस्य स्वकार्यज्ञानाहेतुत्वात् कतिपयेष्टसाधनज्ञानस्य हेतुत्वं वक्तव्यम्, तथा च तादृगिष्टसाधनस्यैव प्रवर्तकत्वमस्तु, किं तज्जन्यकार्यबुद्ध्येत्यर्थ:। प्रकृतं निगमयति- *तस्मादिति*।। वेदान्तानां कार्यपरत्वाभावेऽपि विधिपरत्वम्; एतत्साधनताया एव विधित्वादित्याशङ्क्याह- *तत्रेति*।। अस्तु को दोष:? तत्राह- *तत्राविद्येति*।।

''अथापी''त्यादिना ग्रन्थेनोपासनाविधिपरत्वं वेदान्तानां शङ्कितम्, तदयुक्तम्; पूर्वत्राप्युपासनाविधेर्निरस्तत्वादित्याशङ्क्य मतभेदाभिप्रायेणेदं चोद्यमित्याह- *इदानीमिति*।। विकारासंसृष्टत्वात्प्रदेशान्तरवर्तित्वम्, विभुत्वेन सर्वगतत्वं चेत्यर्थ:। भेदोपासनं कथमित्याशङ्क्याह- *अहं

ब्रह्मेति*।। "वाचं धेनुमुपासीते"त्यादाविवेत्यर्थः। वाग्धेन्वोरन्यत्र प्रसिद्धत्वात्समारोप्योपासनं युक्तम्, ब्रह्मणस्त्वप्रसिद्धत्वाद् वेदान्तानां च विधिपरत्वान्न तत्र प्रामाण्यमित्यनुपास्यत्वं ब्रह्मण इति शङ्कते- *नन्वेवमपीति*।। समारोप्योपासनेऽपीत्यर्थः। प्रमाणान्तरविसंवादाभावे देवताधिकरणन्यायोऽवतरति, अत्र च प्रमाणान्तरविरोधान्न वस्तुसिद्धिरित्याशङ्क्याह- *न चेति*।। सद्वितीयत्वमुपपादयति- *विकारेति*।। "अथ यदतः परः" इत्यादिना ब्रह्मणो विकारेण संबन्धोपलब्धेस्तस्य पृथक्त्वेनावस्थानम्, तथा च वेदान्तानामपि भेदपरत्वान्न मानान्तरविरोध इत्यर्थः।

फलाभावान्नोपासनविधिपरत्वमिति शङ्कते- *ननु नैयोगिकफलत्वेति*।। नित्यग्राहकप्रमाणविरोधान्नानित्यत्वमनुमेयमित्याह- *नेत्याहेति*।। नित्यत्वग्राहि प्रमाणमसिद्धमिति शङ्कते- *ननु श्रुतिरिति*।। ब्रह्मात्मभावलक्षणस्य मोक्षस्य मानान्तरागोचरत्वात्कथं तदनित्यत्वानुमानम्? इत्याह- *अत आहेति*।। यत् कृतकं तदनित्यमिति व्याप्त्या कृतकस्यानित्यत्वसिद्धावर्थाद् मोक्षानित्यत्वसिद्धेर्न त्वदभिमतसिद्धिरित्याह- *नन्वनुमानेति*।। *विरुद्धाव्यभिचारित्वादिति*।। सत्प्रतिपक्षसाधनानुमानसदृशत्वादित्यर्थः।।

टीकापेक्षितं हेतुमाह- *अनुमानादिति*।। निरपेक्षत्वे सति उत्तरभाविप्रमाणत्वादाम्नायस्य प्राबल्यमित्यर्थः। *अनुमानादागम इति*।। तर्कशब्देनानुमानमुक्तमिति व्याख्यातम्। *अभ्युदयनिःश्रेयसयोरिति*।। न केवलं मोक्षशब्दस्यानुपचरितार्थत्वसामर्थ्यान्नित्यत्वम्, अभ्युदयनिःश्रेयसयोः फलयोर्भेदसामर्थ्यादित्यपि भेदः प्रतीयते-अनित्यं फलमभ्युदयः, नित्यो मोक्ष इति। न चैतद्विहायान्यद्भेदकमित्यर्थः। स्वाभाविकत्वमशरीरत्वस्य कथमुक्तम्? सशरीरत्वप्रतीतेः स्वाभाविकत्वे फलत्वकीर्तनमपि न युज्येत, तेन व्याहतोऽयं ग्रन्थः-स्वाभाविकत्वमुच्यते, ज्ञानकार्यत्वं च; अतः फलत्वेन साध्यत्वात्कर्मसाध्यत्वमपीत्याशङ्क्याभिप्रायमाह- *किमिदं स्वाभाविकमिति*।। *ननु* स्वाभाविकागन्तुकभेदेन कथमशरीरत्वं विकल्प्यते? भेदासिद्धेः। नहि सशरीरस्य स्वाभाविकमशरीरत्वं निरूपयितुं शक्यते, इत्याशङ्क्य भेदकं दर्शयति- *शरीरात्मनोरिति*।।

ननु किमिति यागफलवदिति।। नोपासनासाध्यस्याप्युपचितापचितत्वं निरूपयितुं शक्यते। नह्येकस्मिन्नुपासनासाध्ये मोक्षे कारणमुपचितापचितत्वे संभवतीत्यर्थः। *साङ्गदर्शपूर्णमासपरिमितिवदिति*।। चतुर्दशपूर्णमास आहुतयो हूयन्ते, त्रयोदशामावास्यायामितिवदित्यर्थः।।

ननु सेवादौ साधनवैषम्येऽपि फलैक्यं दृश्यते, तद्वदिहापि स्यादिति चोदयति- *अथ साधनवैषम्येऽपीति*।। *अनुष्ठानवैफल्यमिति*।। अयमर्थः-न लोकसाधर्म्येण वैदिकार्थनिश्चयः; तत्र भिन्नसाधनेषु फलैक्यं दृष्टत्वादङ्गीकृतम्, इह तु कल्प्ये फले न साधनोपचयापचये फलैक्यं युक्तमित्यर्थः।

अत्रापि शास्त्रसामर्थ्याद्विधीयमानस्योपासनस्यैकरूपं फलं प्रतीयतेऽपरोक्षज्ञानम्, तद्द्वारा मोक्षश्च। न च तत्रोपचयापचयौ संभवत इति दर्शयति- *अथोपासनाऽपीति*।। एतदुक्तं क्षेति*।। स्वमते मुक्तेरेकरूपत्वमुपपाद्य परमते तद् दुर्लभमित्युपसंहरति- *तस्मादिति*।। इतिशब्दो विचारसमाप्त्यर्थः। तथाचोक्तं दूषणं तदवस्थमित्याह- *विधीयमानेति*।। मुक्तेरुपचितापचितत्वमभिधाय शरीरेन्द्रियादिमत्त्वं दर्शयति- *सुखेति*।। लौकिकसुख-दुःखयोर्यथा शरीरादिसाध्यत्वं विनाशित्वं च, तथा मुक्तेरपि तादृशत्वं दुर्वारमित्यर्थः। शास्त्रावगतं मुक्तिनित्यत्वं न तर्कनिरस्यमित्युक्तम्- ''यत्पुनरि''त्यत्र, तदसंभवि; तर्कनिग्राह्यस्यानित्यत्वसाधकस्य ''तद्यथेहे''त्यादेर्दर्शनादित्याशङ्क्य तात्पर्यमाह- *ननु श्रुतीति*।। श्रुत्यनुमाने एव दर्शयति- *तद्यथेत्यादिना*।। 'सामान्य-विशेषविषयप्रमाणयोर्विशेषविषयस्य बलीयस्त्वम्, इतरस्य दौर्बल्यमि'ति न्यायमाश्रित्याह- *अपुनरावृत्तीति*।। ''तदयुक्तम्'' इत्यत्र 'स न पुनरावर्तते' इति शास्त्रस्य प्रमाणान्तरसापेक्षत्वमुक्तम्, तत् कस्मात्? न च वर्तमानापदेशत्वं सापेक्षत्वप्रयोजकम्; ''औदुम्बरो यूपो भवती'' त्यादिषु तददर्शनादित्याशङ्क्य तात्पर्यमाह- *तत्र तावदिति*।।

वेदान्तानां विधित्वे तत्र वेदान्तेषु याः फलश्रुतयः, ता अर्थवादा इति संबन्धः। अर्थवादत्वमस्मदनुकूलम्, न प्रतिकूलम्; अर्थं वदन्तीत्यर्थसाधकत्वात्, इत्याशङ्क्याह- *न चेति*।। अर्थबोधकत्वमात्रं नार्थवादशब्दार्थः, किंतु विध्यपेक्षितस्तुतिनिन्दार्थवादित्वम्। न च तादृशस्य प्रतीयमानेऽर्थे प्रामाण्यसंभव इत्यर्थः। अत्र दृष्टान्तमाह- *द्रव्येति*।। ''यस्य पर्णमयी जुहूर्भवती'' त्याद्या द्रव्ये फलश्रुतिः, ''यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते'' इत्याद्या गुणेषु फलश्रुतिः, 'वर्म वा एतद्यज्ञस्य क्रियते' इत्याद्या कर्मसु, इति विभागः। दृष्टान्ते फलश्रुतीनामप्रामाण्येनार्थवादत्वं हेतुरिति शङ्कते- *ननु नार्थेति*।। अर्थवादादपि विग्रहवद्देवतादिसिद्ध्युपगमादित्यर्थः। किं तर्ह्यप्रामाण्यकारणमिति शङ्कते- *किंत्विति*।। प्रमाणान्तरविरोधित्वमित्याह- *विवर्तमानेति*।।

प्रतिषेधस्य प्रसक्तिपुरःसरत्वं दृष्टम्, अत्र च प्रसक्त्यभावान्न प्रतिषेधश्रुतेः प्रामाण्यमित्याह- *इहापीति*।। तर्हीहापि नार्थवादानां प्रामाण्यमिति संबन्धः। तत्र हेतुः- *न च पुनरावर्तत इति*।। संयोगस्य विप्रयोगावसानत्वात् कथमावृत्तिप्रसक्तिः? तत्राह- *तथाहीति*।। ''न स पुनरावर्तते'' इत्यस्य किं यथाश्रुतोऽर्थः? उतान्यथा? आद्यं दूषयति- *ब्रह्मलोकमिति*।। द्वितीयमुत्थापयति- *न च पुनरावर्तिष्यत इति*।। अविरोधमपेक्ष्य कल्पना प्रसरति, अत्र न विरोधान्न कल्पनेत्याह- *श्रुतार्थेति*।। उक्तन्यायमन्यत्रातिदिशति- *एवमिति*।। ''एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते'' इत्यादीनि वाक्यान्तरशब्देन सङ्गृह्यन्ते। अस्मिन् कल्प आवृत्त्यभावस्य पुराऽनुक्तत्वात् ''किंचेत्यु'' क्तिरयुक्तेत्याशङ्क्याह- *सामन्येति*।। *विशेषणसामर्थ्यादिति* ।। इममिहेति विशेषणसामर्थ्यादित्यर्थः।। विशेषणबलादस्मिन् कल्प आवृत्त्यभावप्रतिपत्तावपि कल्पान्तर आवर्तिष्यन्त इत्यत्र किं मानम्?

इत्याशङ्क्याह- *इममिहेति*।। वाक्यभेदप्रसङ्गान्न कल्पान्तरावृत्तिसाधकत्वमिति शङ्कते- *नन्वस्मिन् कल्प इति*।। *सोपहासमुत्तरयति*- *अनभिज्ञ इति*।। 'नीलमुत्पलमि'त्यादिवाक्यान्नीलत्वविधावरुणत्वव्यावृतिसिद्धिरित्याह- *यत इति*।। उत्पलस्य नैल्यसंसर्गं बोधयद्वाक्यमर्थादितरव्यावृतिं बोधयति, कुतो वाक्यभेदः? इत्याह- *अथेति*।। तुल्यमत्रापीत्याह- *तर्हीति*।। अस्मिन्कल्पेऽनावृत्तिः, कल्पान्तरे त्वावृत्तिरित्यस्माद्वाक्यान्निश्चेतुमशक्यम्, तत्कल्पवर्तिश्रुतिसामर्थ्यात्तत्राप्यनावृत्तिप्रतीतेरिति शङ्कते- *ननु कल्पान्तर इति*।। *श्रुतिसामान्यादिति*। इममित्यादिश्रुतेरुभयत्रैकरूपत्वादित्यर्थः। श्रुत्येकत्वमङ्गीकरोति- *सत्यमिति*।। तर्ह्यावृत्त्यसिद्धिरिति चेत्, तत्र वक्तव्यम्-अस्मिन् कल्पे ये ब्रह्म प्राप्ताः, तेषां कल्पान्तरेऽनावृत्तिः? उतान्येषाम्? नाद्य इत्याह- *अस्माकमिति*।। *प्रतिपन्नानामिति*।। अत्र ब्रह्मेत्यस्यानुषङ्गः। द्वितीयं प्रत्याह- *इदानीमिति*।। *कल्पान्तरप्रतिपत्तॄणामिति*।। कल्पान्तरे ब्रह्मप्रतिपत्तॄणामित्यर्थः। इत्थंशब्दसूचितमर्थमाह- *अस्मिन् कल्प इति*।। व्यवस्थायां हेतुमाह- *अन्यथेति*।।

''अपिचे'' त्यत्र विद्यानन्तरं मोक्ष इत्युक्तम्, तत्र वक्तव्यम्-किं शब्दज्ञानं विद्या? उतापरोक्षम्? अथवोपासनम्? नाद्यः; अनिष्टेः, अनुपलब्धेश्च। नापि द्वितीयः; साक्षात्कारहेतुत्वेनाभ्यासे विधेराश्रयणीयत्वात्, नापि तृतीयः; तस्या अप्रमाणत्वादित्याशङ्क्याह- *अपि चाभ्युपेत्येति*।। अन्वय-व्यतिरेकसिद्धत्वान्नाभ्यासे विधिरित्याह- *सुखसंवेदनत्वादिति*।। उपासनैव वेदनं किं न स्यादित्यत्राह- *यदा पुनरिति*।। स्वमतं निगमयति- *अत इति*।। *लक्षणहेत्वोरित्यादेरयमर्थः*-क्रियायाः क्रियान्तरं प्रति लक्षणत्वे हेतुत्वे च गम्यमाने लक्षणहेतुभूतक्रियावाचकाद्धातोरुपरि शतृप्रत्ययः स्मर्यत इत्यर्थः। *क्रियाहेतुभूतादिति*।। क्रियाहेतुभूतवाचकाद्धेतोरित्यर्थः। ''तिष्ठन् गायती'' त्यत्र स्थितिक्रियाया गीतिक्रियाहेतुत्वाभावाद्दृष्टान्तो विषम इत्याशङ्क्याह- *न स्थितिक्रियेति*।। ''न क्रियासाध्यमि'' त्यत्र किं ज्ञानक्रियासाध्यत्वम्? उत तदतिरिक्तक्रियासाध्यत्वम्? नाद्यः; ''तरति शोकमात्मवित्'' ''ब्रह्म वेदे'' त्यादौ ज्ञानक्रियासाध्यत्वप्रतीतेः। न द्वितीयः; तदनङ्गीकृतेरित्याशङ्क्य तात्पर्यमाह- *अपि च ब्रह्मविद्येति*।। अथवा-''तरति शोकमात्मविदि'' त्युपक्रम्य ''तमसः पारं दर्शयती'' त्यभिधानादात्मज्ञानस्याविद्यानिवर्तकत्वमुपलभ्यते, न च तदुपपद्यते; अनुपलब्धेः। तथा च ब्रह्मज्ञानस्याविद्यानिवर्तकत्वश्रुतिविरोधश्च। न चात्मविद्या ब्रह्मविद्येत्यपि शङ्क्यम्; ब्रह्मविद्यायां सत्यामप्यविद्यानिवृत्त्यनुपलम्भादित्याशङ्क्य तात्पर्यमाह- *अपिचेति*।। ब्रह्मविद्यायां सत्यामप्यात्मन्यविद्या न निवर्तत इत्युक्तं चोद्यं निरस्यति- *स चेति*।। विधीयमानोपासनाया एवाविद्यानिवर्तकत्वं किं न स्यादिति? तत्राह- *यदा पुनरिति*।। *तत्त्वज्ञानमिति*।। आत्मज्ञानमित्यर्थः। अतत्त्वज्ञानमिति वा छेदः। ''तमसः पारं दर्शयती'' त्यत्र तमसः पारदर्शनमात्रं लक्ष्यते, यथा देवनद्यां पारं दर्शयतीत्युक्ते परकल्पप्रदर्शनात्रं लक्ष्यते, तद्वत्। न च-''तरति

शोकमात्मविदि'' त्युपक्रमसामर्थ्यान्निवृत्तिरेवोच्यत इत्यपि शङ्कनीयम्; अत्रापि दु:खतरणमात्रोपलम्भदित्याशयेन शङ्कते- *नन्वविद्येति*।। उपक्रमे निवृत्ते: श्रुतत्वादुपसंहारोऽपि तद्विषय इत्याह- *नैष इति*।। तत: किमिति? अत आह- *यदीति*।। शोक-तमसोर्भिन्नत्वाच्छोकनिवृत्त्युपक्रममात्रेण कथं तमोनिवृत्तेर्निश्चय:? इत्युक्तं दूषयति- *अत इति*।। ज्ञानाज्ञानयोर्विरोधप्रसिद्धे: शोकस्य चाज्ञानात्मकत्वात्तन्निवृत्तिमन्तरेण निवृत्त्यनुपपत्ते: शोकतारणेऽज्ञाननिवृत्तेरेवोपक्रम इति निश्चीयते, ततस्तदनुरोधेनोपसंहारेऽप्यविद्यानिवृत्तिरुक्तेति निश्चिनुम इत्यर्थ:। ''अविद्याया: पारं तारयसी'' त्यत्राविद्यानिवृत्ति: पारतरणत्वेनोक्ता, तथा च ''तमस: पारं दर्शयती'' त्यत्राप्यविद्यानिवृत्तिर्निर्दिष्टेत्याह- *तथेति*।। इतश्च ''एतदेवमि'' त्यत्र मिथ्याज्ञाननिवृत्त्या दु:खनिवृत्तिरिति प्रतिज्ञामात्रमुपन्यस्तमित्याशङ्क्याह- *श्रुत्यनुसारेणेति*।। मिथ्याज्ञाननिवृत्त्या दु:खनिवृत्तिप्रतिपादकं न्यायकृद्वचनमुदाहरति- *अयमर्थ इति*।। दु:खं च जन्म च प्रवृत्तिश्च दोषश्च मिथ्याज्ञानं चेति दु:ख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानि, तेषां मध्ये मिथ्याज्ञाननिवृत्तौ तन्मूलरागद्वेषादिदोषनिवृत्ति:, तथा च त्रिविधप्रवृत्त्युपरम:, प्रवृत्त्युपरमे च तन्निमित्तपुण्यपापाभावाज्जन्माभाव:, ततो निवृत्तिरिति सूत्रार्थ:।।

ननु तैरनादिभावरूपाज्ञान-तन्निवृत्ती नोपेयेते, कथं तदुदाहरणादभिलषितसिद्धि:? इत्याशङ्क्य, मिथ्याज्ञाननिवृत्तिमात्रं स्वीकृतमित्याशयेन मिथ्याज्ञानशब्दार्थमाह- *आत्मेति*।। अर्थशब्देन पृथिव्यादयो निर्दिश्यन्ते। *मरणम्=प्रेत्यभाव:। *फलम्=सुखम्*। किं तस्य निवर्तकम्? तत्राह- *तस्येति*।। आत्मनो नित्यत्वाज्जन्माप्रसक्ते: कथं न जायत इत्युक्तमिति? तत्राह- *शरीरसंबन्धमिति*।। मिथ्याज्ञानापाये मोक्ष इत्येतत्तन्त्रान्तरपर्यालोचनयाऽप्यवसीयत इत्याह- *तथेति*।। तद्वृत्तित्वे सति तदितरवृत्तित्वं सालक्षण्यम्, तद्वृत्तित्वे सति तदितरावृत्तित्वं वैलक्षण्यम्, देहादावात्मबुद्धिरविद्या, अहमस्मीत्यभिमानविशेषोऽस्मिता। *अनुसन्धानकल्पनयेति*।। अनुसन्धीयत इत्यनुसन्धानम्, स्थायित्वम्; तत्कल्पनयेत्यर्थ:। दोषानेव विशिनष्टि- *प्रवृत्तीति*।। *तत्त्वपरिभावनयेति*।। क्षणिक-शून्य-स्वलक्षण-दु:खपरिभावनया निवृत्तेष्वित्यर्थ:। विशुद्धं च तद्विज्ञानं चेति विशुद्धविज्ञानम्, तच्च चरमक्षण इति विशुद्धविज्ञानचरमक्षण:, तदुदय इत्यर्थ:। तत्त्वज्ञानस्याविद्यानिवर्तकतायां सर्ववादिसंमतत्वादुपास्तेर्न मुक्तिसाधनत्वमित्युपसंहरति -*तदेवमिति*।।

तत्त्वज्ञानस्य मुक्तिसाधनत्वमङ्गीकृत्य प्रत्यग्ब्रह्मैक्यज्ञानस्य मुक्तिसाधनत्वमाक्षिपति- *ननु प्रदर्शितमिति*।। *अन्यत्=अन्यदेव मिथ्याज्ञाननिवर्तकं तत्त्वज्ञानं प्रदर्शितमिति संबन्ध:। यादृशं तत्त्वज्ञानं निवर्तकमिति, येनाभिधीयते, ततोऽन्यथाऽन्येनेति निवर्तकस्य नैकरूप्यमित्यर्थ:। *द्वादशपदार्थेष्विति*।। आत्मशरीरादिष्वित्यर्थ:। अविद्यानिवृत्तावपि कर्मणां भावात् कथं मुक्ति:? इत्याशङ्क्याह- *पूर्वोपचितानीति*।। द्विविधं कर्म-पुण्यं पापं चेति, तत्रापुण्यस्य

निवृत्तिमाह- *तत्त्वपरिभावनेति*।। इतरनिवृत्तिमाह- *तत्प्रकर्षेति*।। तत्त्वपरिभावना तच्छब्दार्थः। सहार्थे तृतीया। तथा च क्लेशेनानन्देन च सह वर्तमानस्य पुंसः प्राक् संचितानि कर्माणि क्लेशानन्दोपभोगेन निवर्तन्त इत्यर्थः। कथं तर्हि कर्मणां निवृत्तिः? तत्राह- *ततश्चेति*।। मिथ्याज्ञान-तन्मूलरागादीनां निवृत्तेः कर्मान्तरानुदय इत्यभिप्रेत्य प्राक्संचितनिवृत्तिमाह- *पूर्वोपचितेति*।। पदार्थानां परिभावना, तन्निमित्तः परिक्लेशः=फलं येषां तानि, तेषामित्यर्थः। द्विविधः समाधिः-संप्रज्ञातोऽसंप्रज्ञातश्च। प्रत्ययोपरमे तत्संस्कारमात्रावशेषतया चित्तस्यावस्थानमसंप्रज्ञातः समाधिः- *पुरुषाकारेति*।। प्रकृतिसम्बन्धं विहाय चिन्मात्रमित्यर्थः। *ऐकभविकन्यायेनेति*।। प्रयाणसमयेऽभिव्यक्तं सत्कर्मजातमेकं शरीरमारभत इति तस्मिन् शरीरे प्रारब्धफलस्योपभोगेन क्षयः, काम्य-निषिद्धयोस्त्वननुष्ठानान्नित्यनैमित्तिकाननुष्ठानेन तदकरणमिति प्रत्यवायाभावः, ततश्च मुक्तिरित्यर्थः। स्वलक्षणम्=सङ्गि। अज्ञानव्यतिरिक्तं सर्वं दुःखसाधनमित्येतद् दुःखमार्गशब्देनोच्यते। *असत्यम्=तुच्छमित्यर्थः। क्षणिकभावनाविपरीतस्वरूपमाह- *स्थायित्वेति*।। स्वलक्षणविपरीतस्वरूपमाह- *कार्यत्वेति*।। दुःखसाधनभावनाविपरीतस्वरूपमाह- *प्रवृत्तीति*।। असत्यभावनाविपरीतस्वरूपमाह- *विषयेति*।। पूर्वपक्षमुपसंहरति- *तदेवमिति*।। उक्तेऽर्थे हेतुं पृच्छति- *ननु प्रदर्शितेति*।। ब्रह्मज्ञानस्य मिथ्याभूतस्य यथा भेदावभासनिवर्तकत्वम्, तथा तस्यापि निवर्तकत्वं स्यादित्याशङ्क्याह- *भेददर्शनस्येति*।। अस्मन्मते ज्ञानस्य स्वरूपेण मिथ्यात्वेऽपि विषयस्य सत्यत्वात् तन्निवर्तकत्वम्, भेददर्शनस्य तु विषयतोऽपि मिथ्यात्वान्न निवर्तकत्वमित्यभिप्रायः। ''अथापि स्यादि'' त्यत्रैकत्वज्ञानस्य निवर्तकत्वमङ्गीकृत्य संपदादिरूपत्वमुक्तम्, तत् कस्मात्? इति शङ्क्यामाह- *नन्वद्वितीयेति*।। अध्ययनविध्युपात्तत्वाद् नैरर्थक्यानुपपत्तेस्तच्छास्त्रं तत्परमेष्टव्यमिति शङ्कते- *किंत्विति*। विधान्तरेणार्थवत्त्वमाह- *जीवेत्यादिना*।। वस्तुद्वयसिद्धावन्यस्यान्यत्र दृष्टिर्घटेत, न तथा वस्तुद्वयं समस्ति; प्रमाणाभावादित्याशङ्क्याह- *जीवेति*।। ''य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति'' ''द्वा सुपर्णे'' त्यादिवाक्यं शास्त्रशब्देन निर्देष्टव्यम्। विधिपरस्य कार्यब्रह्मपरत्वमित्याशङ्क्याह- *प्रमाणान्तरेति*।। प्रमाणविरोधसहकृततात्पर्याभावस्य प्रयोजकत्वम्? उत तात्पर्याभावमात्रस्येति विकल्पयति- *तत्र वक्तव्यमिति*। नाद्य इत्याह- *न तावदिति*।। जीव-परयोर्विषयीकरणमन्तरेण प्रमाणान्तरं कथं तद्विरोधं गोचरयतीत्यर्थः।। तर्हि संसार्यसंसार्यादिभावेन भेदप्रतिभासः कथं निर्वहेत्? इत्याशङ्क्योपाधित इतयाह- *भेदावभास इति*।। द्वितीयं दूषयति- *न चेति*।। *अर्थपरत्वाभाव इति*।। अर्थप्रामाण्याभावः; इतरथा साध्यावैशिष्ट्यमित्यर्थः।।

ब्रह्मैक्यपरत्वमेव कुतः समधिगतम्? इत्याशङ्क्योपक्रमादिनेत्याह- *तथाहीति*।। शाखान्तरपर्यालोचनयाऽपि प्रत्यग्ब्रह्मैक्यपरं शास्त्रमित्याह- *अथेति*।। अत्रैव बृहदारण्यकगतं वाक्यान्तरं पठति- *तथैव इति*।। तैत्तिरीयकवाक्यमुदाहरति- *तथा स य इति*।। तत्रैव भेददर्शनस्यापोद्यमानत्वादपि

शास्त्रस्य तत्र तात्पर्यमित्याह- *तथादर्शमिति *।। ऐतरेयकवाक्यमुदाहरति- *तथैतमेवेति *।। ''ततममि'' त्यत्र मकारश्छान्दस:। ततमित्यर्थ:। *सीमानमिति *।। मूर्द्धन्यनाडीमित्यर्थ:। शाखान्तरीयवाक्यानि चैक्यपराणि द्रष्टव्यानीत्याह- *तदेवमिति *।। तात्पर्यलिङ्गास्तित्वे च तात्पर्यप्रत्याख्यानमशक्यमित्याह- *नहीति।। इतोऽप्यैक्यपरं शास्त्रं न संपत्परमित्याह- *किं चेति *।। ''अविद्याया: परं तारं तारयसि'' ''ब्रह्म वेद ब्रह्मैव भवती'' त्यादिवाक्यादविद्यानिवृत्त्यादिसिद्धिरित्यर्थ:। तत: किमिति? अत आह- *न चेति *।। पूर्वरूपे स्थिते नष्टे वाऽन्यस्यान्यात्मकत्वं विरुद्धमित्यर्थ:। अविद्यानिवृत्त्यसंभवं हेतुमाह- *अप्रमाणत्वादिति *।।

प्रत्यग्ब्रह्मैक्यमङ्गीकृत्यात्यन्ताभेदमाक्षिपति- *अत्र कश्चिदिति *।। उक्तेऽर्थे प्रमाणमाह- *ततश्चेति *।। स्रष्टृत्वानुपपत्तिरप्यत्र प्रमाणमित्याह- *अत्यन्तेति *।। इतोऽपि नात्यन्ताभेद इत्याह- *विरुद्धा चेति *।। यद्यप्यौपाधिकभेदेनोक्तव्यवस्थासंभव:, तथाऽपि दूषणान्तरविवक्षया भेदाभेदपक्ष: समुत्थापित चति द्रष्टव्यम्। प्रत्यग्ब्रह्मणो: काल्पनिकभेदसंभवात्सृष्टेरविद्यात्मकत्वाच्च न दोषगन्धोऽपीत्याह- *अत्रोच्य इति *।। दुर्निरूपश्चायं पक्ष इत्याह- *किमात्मिकेयमिति *।।

प्रत्यग्ब्रह्मणो: किं जातिव्यक्ति-गुणगुणि-कार्यकारण-विशिष्टस्वरूपांशांशितान्यतमत्वेन भिन्नाभिन्नत्वम्? उत प्रकारान्तेणेति किंशब्दार्थ:। आद्यं दूषयति- *न तावदिति *।। प्रत्यग्ब्रह्मणोर्द्रव्यत्वान्न जातिव्यक्तिता, गुणगुणिता वा संभवति। नापि कार्यकरणता; जीवस्यानादित्वात्। नापि विशिष्टस्वरूपभाव:; दण्ड्यादिवत्पारतन्त्र्याप्रतिपत्ते:। नाप्यशांशिता: तत्र प्रमाणाभावादित्यर्थ:। द्वितीयं दूषयति- *प्रकारान्तरेणेति *।। जीव-ब्रह्मणोर्भेदाभेदावंशांशितानिबन्धनौ, न च तत्र प्रमाणाभाव इत्याह- *ममैवेति *।। श्रुति-स्मृत्यो: श्रुते: प्राबल्यात्तद्विरोधेन स्मृते: प्रामाण्यमित्याह- *न निष्कलमिति *।। श्रुत्यनुगृहीतस्मृत्यांशांशिभावसिद्धिमाशङ्क्याह- *पादोऽस्येति *।। ''गायत्री वा इदं सर्वं भूतमि'' त्युपक्रम्य ब्रह्मण: पूर्णताप्रतिपादनान्न भाग-भागिता। पुरुषसूक्तेऽपि ''उतामृतत्वस्येशान:'' इत्यनवच्छिन्नवस्तुप्रतिपत्तेर्नाशांशिभावविवक्षेत्यर्थ:। किंच ब्रह्मण्यंशित्वं किं स्वाभाविकम्? उतोपाधिनिमित्तम्? नाद्य इत्याह- *सांशत्व इति *।। द्वितीयमुत्यपयति- *नन्विति *।। निरंशस्य स्वाभाविकत्वादंशांशिताया़श्चोपाधिनिमित्तत्वाद् न स्मृते: श्रुतिविरोध इत्यर्थ:।। औपाधिकोऽप्यंशांशिभाव: किं तात्त्विक:? उत कल्पित:? नाद्य इत्याह- *न तावदिति *।। किंच किं ब्रह्मोपाधिं सृष्ट्वा स्वयं संसारमनुभवति? आहो अन्यस्य संसारिण: संसारमापादयति? इति विकल्प्याद्यं दूषयति- *उपाधिभिरिति *।। द्वितीयं प्रत्याह- *नचोपाधीनामिति *।। उपाधिसृष्टे: प्रागौपाधिकजीवरूपाभावान्न तदर्थमुपाधिसृष्टिरित्याह- *अन्याभावादिति *।। ब्रह्मणो भावात्तदभिन्नो जीवोऽप्यस्तीत्याशङ्क्याह- *प्रागभिन्नेति *।। जीवस्य ब्रह्ममात्रत्वे वस्तुतस्तदन्यत्वं न स्यात्, न खलु कलशस्य स्वस्मादन्यत्वं दृष्टमित्यर्थ:। किमन्त:करणं भेदकम्? उत कर्म? आहो मिथ्याज्ञानम्, अथवा तत्संस्कार:? नाद्य:; सुषुप्तौ तदभावादित्यभिप्रेत्य

पक्षान्तराणि निरस्यति- *द्रव्येणेति *।। द्रव्येण परश्वादिना वृक्षादीनां विदारणं दृष्टम्, कर्मादीनां चाद्रव्यत्वान्न विदारकत्वमित्यर्थः। विदारणात्प्राग् जीवाभावान्न तदाश्रितं कर्म। यद्यस्ति, तर्हि नौपाधिकमित्यभिप्रेत्योक्तम्- *सतामपीति *।।

"औपाधिकः" इत्यनेन शब्दोपाधितो जायमानत्वं नोच्यते, किं तूपाधिप्रयुक्तत्वम्, यथा द्रव्यत्वस्य गुणवत्त्वप्रयुक्तत्वम्, तद्वदिति शङ्कते- *अथ भेद इति *।। अनिष्पन्न इति छेदः। द्रव्यत्ववद्भेदस्याप्यनादित्वं स्यादित्याह- *तर्हीति *।। अस्तु, को दोष इति? अत्राह- *सचेति *।। जाति-व्यक्त्यादिभावाभावेऽपि नील-पीतयोर्यथा व्यावृत्तत्वम्, तद्वदिति शङ्कते- *नीलपीतेति *।। अत्यन्तभेदशङ्कां निरस्यति- *द्रव्यत्वेति *।। भिन्नयोर्द्रव्ययोरभेदस्य घटादावदृष्टत्वात्प्रत्यग्ब्रह्मणोरपि तदनुपपत्तिरित्याह- *तर्हीति *।। किं च "तत्सृष्ट्वा तदेवानुप्राविशदि" त्यादौ ब्रह्मण एव बुद्ध्याद्यनुप्रवेशेन संसारित्वेन प्रतिपत्तेर्भेदाभेदावित्याह- *तस्येति *।। श्रुत्यनुग्राहकमनुमानमप्यस्तीत्याह- *एकत्वेति *।। अलक्तकाद्युपाधिसंसर्गजनितस्फटिकलोहितताप्रतिभासवद् भेदप्रतिभासोऽपि भ्रम इति पक्षान्तरमुत्थापयति- *न निष्पन्न इति *।। इष्टापत्त्योत्तरयति- *स. तर्ह्यतस्मिन्निति *।। किंच स्वाभाविके भेदे किं प्रत्यक्षादि प्रमाणम्? उतागमः? नाद्य इत्याह- *नचेति *।। "तयोः प्रत्यक्षागोचरत्वादि" त्यत्रोक्तमित्यर्थः। द्वितीयं दूषयति- *आगम इति *।। चशब्दस्त्वर्थः। आगमस्य न भेदे प्रामाण्यम्, किं तु तन्निषेध इत्यर्थः। निषेधवचनान्यन्यविषयाणीति शङ्कते- *अभेदेति *।।

अभेदप्रतिपादनात् पृथग्भेदस्य निषिध्यमानत्वाद् न निषेधस्याभेदविषयत्वमित्याह- *न हीति *।। *अत्यन्ताभेदमिति *।। "द्वा सुपर्णे"त्यादिना भेदस्यापि प्रतिपत्तेर्नात्यन्ताभेद इत्याशङ्क्याह- *कथं वेति *।। अव्यवस्थायां हेतुमाह- *नहीति *।। अत्यन्ताभेदाभावाद् व्यवस्था सिध्यतीति शङ्कते- *ननु भेदादिति *।। अत्यन्तभेदाभावादव्यवस्थापि स्यादित्याह- *तर्हीति *।। अविद्याद्यसंसृष्टे ब्रह्मणि न तत्संसर्गः संभवेत्; विरुद्धत्वात्, वह्नौ शैत्यवदिति शङ्कते- *ननु विरुद्धमिति *।। त्वन्मते विरोध एवासिद्ध इत्याह- *कोऽयमिति *।। कथं विरोधाभावः? इत्याशङ्क्य किमभेद इत्यत्र नञा भेदभावो विकल्प्य विधीयते? उत तदन्य इति? आद्ये विरोधासिद्धिरित्याह- *एकेति *।। द्वितीयमुत्थापयति- *अभेद इति *।। *ननु* अभेदस्याभावे मुख्यत्वान्नार्थान्तराभिधायित्वं घटते, तथाऽपि तदङ्गीकृत्याह- *तथापीति *।। 'अहं मनुष्यः' इत्यैक्यस्य भेदज्ञानेन बाधः, 'द्वौ चन्द्रावित्यत्र भेदस्यैक्यज्ञानेन बाधो दृश्यते, तथाऽत्रापि भेदाभेदयोरिति। अंशांशित्वपक्षे दोषान्तरमाह- *किंचेति *।। "निश्चयादि" त्यस्य जीवसमवायिभिर्मलैरवयवि ब्रह्म मलभूयिष्ठमिति निश्चीयत इत्यनेन संबन्धः। *ननु* जीवस्यैव मलवत्त्वमसिद्धम्:; "लिप्यते न स पापेने" त्यादिना मलसंबन्धराहित्यप्रतिपत्तेरित्याशङ्क्याह- *फलवचनानामिति *।। इतोऽपि ब्रह्मणि मलसंसर्गो दुर्वार इत्याह- *किं च ब्रह्मणीति *।। "अतिभक्ती" त्यत्र भेदाभेदयोरिति शेषः। "न लिप्यते लोकदुःखेन बाह्यः" इत्येतद्विरोधान्न मलाभिन्नं ब्रह्मेति शङ्कते- *निरवद्येति *।। निरवद्यत्वेऽपि

श्रुतिविरोधस्तुल्य इत्याह- *न सर्वात्मत्वेति*।। *विरुद्धत्वे त्विति*।। विरुद्धत्वादुभयोः प्रामाण्यमयुक्तमित्याशङ्क्य भेदाभेदेऽन्यतरप्रामाण्याङ्गीकरणे कारणाभावात्पक्ष एवायं त्याज्य इत्याशयेनाह- *अत एवेति*।। व्यवस्थितविषयत्वात् श्रुतिद्वयमप्यविरुद्धमिति शङ्कते- *ननूपाधीति*।। *उपाधिभेदेनेति*।। *उपाधिकृतभेदेनेत्यर्थः। औपाधिकभेदस्य किं परमार्थत्वम्? उत न? नान्त्य इत्याह- *नार्थत इति*।। नापि प्रथमः; औपाधिकस्य स्फटिकलौहित्यवत् परमार्थत्वासंभवादित्यर्थः। त्वयाप्यौपाधिकभेदेन व्यवस्थाऽऽस्थितेत्याशङ्क्याह- *मिथ्येति*।। प्रत्यग्ब्रह्मणोरभेदाद् ब्रह्मण्यपि संसार इत्युक्तम्, तत्र संसार्यभिमानाभावान्न ब्रह्मणः संसारित्वमित्याशङ्क्याभेदे सोऽपि दुर्वार इत्याह- *किंच ब्रह्मेति*।। द्वितीयेऽपीदं निरूपणीयम्- किमभेदवद् भेदमपि पश्यति? उत नेति? तत्रान्त्यं दूषयति- *न चेदिति*।। आद्यं दूषयति- *पश्यति चेदिति*।। द्वितीयाद्यमुत्थापयति- *ननु भेदमपीति*।। विरोधापातान्नैवमित्याह- *तर्हि ब्रह्मेति*।।

इतोऽप्यात्मन्नि संसारसंबन्धोऽपरिहार्य इत्याह- *किं च सत्यपीति*।। *सत्येनेति*।। परमार्थत एवाभेदाभिमाने सतीत्यर्थः। दृष्टान्ते भेदज्ञानस्य परोक्षत्वात् तस्मिन् सत्यप्यभेदाभिमानोचितकार्यं स्यात्, इह तु भेदज्ञानस्यापरोक्षत्वान्न तदुचितकार्योपपत्तिरित्याशङ्क्याह- *न हीति*।। शुक्तिकां साक्षात्कुर्वतस्तद्विपरीतरूप्यसाक्षात्कारवदभेदं करतललग्नबिल्वफलवदपरोक्षतया पश्यतस्तद्विपरीतभेदापरोक्ष्यानुपपत्तिरित्यर्थः। रजतस्य समारोपिततदधिष्ठानतत्त्वसाक्षात्कारेऽनवभासनं युक्तम्, इह तूभयोरपि सत्यत्वान्नैवमित्याशङ्क्याह- *किं च सर्वेति*।। संबन्धाभावान्न सर्वदर्शनं संभवतीति शङ्कां निरस्यति- *सर्वाधारस्येति*।। संबन्धाभावेऽपि तज्ज्ञानाभावान्न संसारित्वमित्यत्राह- *सर्वज्ञस्येति*।। भ्रान्तदृष्टिवैलक्षण्यमाह- *सत्यतयैवेति*।।

एवं भेदाभेदमते संसाराव्यवस्थामभिधाय मुक्त्यवस्थामाह- *किं चेति*।। किमेकोपाधिप्रविलयान्मुक्तिः? उत सकलोपाधिविलयात्? नाद्य इत्याह- *ज्ञानध्यानेति*।। ज्ञानं प्रसिद्धम्, ध्यानं सजातीयप्रत्ययप्रवाहः, तस्यापि प्रविलये तत्संस्कारमात्रावस्थानं समाधिरित्यर्थः। द्वितीयं दूषयति- *न च सर्वेति*।। त्वन्मतेऽप्युक्तानुपपत्तिस्तुल्येत्याशङ्क्य जीवभेदं तावदाश्रित्याह- *मम पुनरिति*।। *जीवसंसारैरिति*।। जीवान्तरसंसारैरित्यर्थः। तत्र हेतुमाह- *मिथ्यात्वेनेति*।।

जीवभेदेन व्यवस्थासंभवेऽप्येकजीववादे कथं सेत्याशङ्क्याह- *स्वप्नादिवदिति*।। सकलोपाधीनामविद्यात्मकत्वात्तस्याश्चैक्याद्विद्यया निवृत्तौ सर्वविलयोपपत्तिरित्यर्थः। एकजीववादे किमितः प्राक् केषाञ्चिन्मुक्तिरस्ति? उत न? द्वितीये 'वामदेवो मुक्तः' इत्यादिश्रुत्या विरोधः स्यादित्यभिप्रेत्याद्यं दूषयति- *वामदेवेति*।। त्वत्पक्षेऽप्ययं दोषः सम इत्याह- *एकैकेति*।। इदानीं

संसारस्योपलभ्यमानत्वात्प्राग् न सर्वमुक्तिरित्याशङ्क्याह- *इदानीं संसारेति*।। यद्यपि संसारो दृष्टः; तथाप्यनुपपन्नः स इत्याशङ्क्याह- *अनुपपत्तिरिति*।। पक्षद्वयेऽप्यनुपपत्तिसाम्ये कथमन्यतरपरिग्रहः? तत्राह- *निरुपाधिकेति*।। अनवच्छिन्नचैतन्यं ब्रह्माऽविद्यातत्कार्यानुरागाद्बद्धम्, तथांचोपाधिभेदाज्जीवरूपं भिन्नत्वेन व्यवह्रियते, यथोदभाजनभेदेन सूर्यप्रतिबिम्बम्। ततश्चाविद्यानिवृत्तिमन्तरेण वामदेवादेर्मुक्तेरनुपपत्तेः साऽऽश्रयणीया, न च साऽऽस्थातुं शक्यते, इदानीन्तनसंसारोपलभ्यविरोधात्, तथा च वामदेवादेर्मुक्तिप्रतिभासो विभ्रम इत्यर्थः। तर्हि तन्मुक्तिश्रुत्यादिविरोध इति यदुक्तम्, तत्राह- *तद्विषयेति*।।

ननु एकमुक्तौ सर्वमुक्तावपि कस्यैकस्य मुक्तिरिति विनिगमनाभावादायासबहुले श्रवणादौ न प्रवृत्तिर्घटत इति, तत्राह- *निरुपाधिकेति*।। प्रष्टुस्तव तावदज्ञत्वं स्पष्टम्, त्वदज्ञानपरिकल्पिताश्चेतरे चैतन्यभेदाः; स्वप्नद्रष्टृविद्याकल्पितनरान्तरवत्, ततश्च मुक्त्यवस्थानुयायिनस्तवैव बन्धो नेतरेषामित्यर्थः। अन्योऽप्येवमेव ब्रवीतीत्याशङ्क्याह- *एवमिति*।। अन्यशब्देन किं निरुपाधिकं चैतन्यं विवक्षितम्? उतावच्छिन्नम्? आद्ये तस्यैकत्वान्न संशीतिः, द्वितीये त्ववच्छिन्नस्य तत्संशयादेश्च चिदविद्यामूलत्वान्न मुक्त्यादिसंदेह इत्यर्थः।।

स्वमतस्य निरवद्यतामभिधाय परमतस्य सावद्यत्वमुक्तमपसंहरति- *तस्मादिति*।। प्रसङ्गागतं चोद्यं निरस्य टीकाव्याख्यामेव प्रस्तौति- *तदेवं ब्रह्मेति*।। शाब्दज्ञानमवगमशब्दार्थः। ब्रह्मणोऽपरोक्षस्वरूपत्वान्नापरोक्ष्यस्य फलत्वमिति शङ्कते- *किं तर्हीति*।। अज्ञानान्तर-तत्कार्यनिवर्तकशुद्धबुद्धिवृत्तिप्रतिबिम्बिततया तस्य फलत्वव्यपदेश इत्याह- *तदाहेति*।। फलाभावाद् विधौ निरस्ते, पुनः कथं तच्चोद्यम्? इत्याशङ्क्य विकल्पपूर्वं व्याकरोति- *ननु प्रयोजनेति*।। आद्यं दूषयति- *प्रयोजनं त्विति*।। द्वितीयं प्रत्याह- *न; कर्मकारकत्वाभावादिति*। न विधिसंबन्ध इति शेषः। भाष्यकारेणैव निरस्तं चोद्यम्, नास्माभिः प्रयतितव्यमस्तीत्याह- *भाष्यमेवेति*।। ज्ञानविषयत्वाभावेऽपि शास्त्रकारणत्वसंभवादाहेति चोद्यानुपपत्तिमाशङ्क्य तात्पर्यमाह- *ननु विदिक्रियेति*।। अविद्यानिवर्तकत्वेन शास्त्रप्रामाण्यमुक्तम्, तदसंभवि, तद्विषयत्वमन्तरेण तदविद्यानिवर्तकत्वासंभवादित्याशङ्क्य तात्पर्यमाह- *स्वयंप्रकाशमानतयेति*।। *ज्ञानाकारतयेति*।। ज्ञानं प्रत्याकारप्रदत्वेनेत्यर्थः। तद्व्यावर्तकस्य= तद्विशेषणस्येत्यर्थः। निवर्तकत्वेन शास्त्रप्रामाण्यमनुपपन्नम्; प्रमाणलक्षणविरोधादिति शङ्कते- *नन्वनधिगतेति*।। ''सिद्धं तु निवर्तकत्वादि'' त्यत्र निवर्तकत्वेनापि प्रामाण्योक्तेनैतच्चोद्यमित्याह -*अत्राहेति*।। दृष्टान्ताऽसंप्रतिपत्तिमाशङ्कते- *ननु तत्रेति*।। टीकापेक्षितं हेतुमाह- *उक्तमेतदिति*।। निवर्त्याभावान्न निवर्तकत्वेन प्रामाण्यमिति शङ्कते- *ननु ब्रह्मेति*।। ब्रह्मणो निरवद्यत्वात्तदभिन्नत्वस्यापि निरवद्यत्वमित्यर्थः। वस्तुतोऽवद्याभावेऽप्यविद्ययाऽवद्यं विद्यत इत्याह- *अत आहेति*।। 'अहमि'त्यात्मनि ज्ञातेऽपि विपर्यासदर्शनान्नात्मज्ञानस्य निवर्तकत्वमित्याशयेन शङ्कते- *केन तर्हीति*।। *प्रमाणाकारेणेति*।।

प्रमाणगताकारेणेत्यर्थः। अधिष्ठानविशेषज्ञानं निवर्तकमित्याह- *तदाहेति*।। त्वंपदार्थस्य न तत्पदार्थैक्यम्; विरोधादित्याशङ्क्य, विरुद्धांशपरित्यागेनैक्यबोधनं युक्तमित्याह- *तत्त्वंपदाभ्यामिति*।।

अनुत्पन्नस्य ज्ञानस्य निवर्तकत्वासंभवादुत्पन्नस्य निवर्तकत्वं वक्तव्यम्, न च तदुपपद्यते; सहावस्थितेरिति शङ्कते- *किं तर्हीति*।। तदुत्तरत्वेन टीकामप्यवतारयति- *तदाहेति*।। उक्तचोद्यस्य कः समाधिः? इत्याशङ्क्याह- *प्रमाणेति*।। विषयाकारेणोदयमन्तरेण ज्ञानस्य व्यापारानिरूपणाज्जन्मैव व्यापार इत्यर्थः। तथापि कथं निवृत्तिरिति? तत्राह- *प्रमीयमाणेति*।। शास्त्रजनितप्रमायामभिव्यक्तं यद्वस्तु, तद्बलादित्यर्थः। अन्धकारनिवर्तनेन दीपोत्पत्तिवद् विपर्यासनिवर्तनेन ज्ञानोदय इत्यर्थः। अथवा निवर्त्य-निवर्तकयोः सजातीयत्वान्न निवर्त्य-निवर्तकेति शङ्कते- *किं तर्हीति*।। तथाभूतविषयत्वात् प्रमाणस्य निवर्तकत्वं युज्यत इति समाध्यभिप्रायः।।

अन्तःकरणवृत्तेर्जडत्वाद् नाज्ञाननिवर्तकत्वम्, नापि चैतन्यस्य; तस्य सदा भोक्तृत्वात्, न च वृत्तिविशिष्टस्य निवर्तकत्वम्; विशेषण-विशेष्यतत्संबन्धातिरिक्तविशिष्टस्यानिरूपणात्। ततश्च प्रमाणजन्या संविन्निवर्तिकेत्येष्टव्यमिति शङ्कते- *ननु* ज्ञात्रिति*।। तर्हि स एव निवर्तकोऽस्तु, तत्राह- *नित्ये चेति*।। फलासंभवं दर्शयितुं नित्य इति विशेषणम्। चैतन्यस्य नित्यत्वात्कथं फलत्वमिति? अत आह- *प्रमाणेनेति*।। अर्थचैतन्ययोर्भेदाभावेऽप्युपचारादर्थगतत्वमुक्तमिति द्रष्टव्यम्। लोके जन्यस्य फलत्वं प्रसिद्धमित्यत्राह- *लोकेऽपीति*।। ब्रह्मचैतन्यस्यानात्मासंबन्धात् तन्निवर्तकत्वं कथम्? तत्राह- *अत इति*।। काल्पनिकसंबन्धसंभवात्तयोर्निवर्त्य-निवर्तकतेत्यर्थः। चैतन्यस्य निवर्तकत्वे कथं तदवच्छेद इति? अत्राह- *अवच्छेदेति*।। ब्रह्माकारवृत्त्युत्पत्तेः पूर्वमवच्छेदः, उत्तरक्षणे निवृत्तिरित्यवच्छेदोपपत्तिरित्यर्थः। इदमत्र विवक्षितम्-यद्यपि वृत्तेर्जडत्वम्, चैतन्यस्य तु सदातनत्वम्; तथाऽप्यागन्तुकवृत्तिविशिष्टस्य निवर्तकत्वं कथ्यते। न च-विशिष्टस्यानिरूपणाद् न तस्य निवर्तकत्वमित्यपि-शङ्क्यम्; वास्तवविशिष्टासंभवेऽनुभवानुरोधेन समारोपितस्य विशिष्टस्येष्टत्वादिति।। *ननु* फलस्यापि किं निवर्तकान्तरमस्ति? उत न? आद्येऽनवस्थेत्यभिसन्धाय द्वितीयं दूषयति- *ननु फलं चेदिति*।। ततश्चाद्वैतविरोध, इत्यर्थः। कारणनिवृत्तौ कार्यस्यापि निवृत्तेर्नाद्वैतक्षतिरित्याह- *नेत्याहेति*।। उपसंहारव्याजेनोक्तचोद्य-परिहारौ स्पष्टयति- *ननु शास्त्रेति*।। निवर्तकत्वेन प्रामाण्ये हेत्वभावान्नैवमिति शङ्कते- *ननु किमितीति*।। असिद्धो हेतुरित्याह- *तत्राहेति*।। टीकासूचितमन्त्रब्राह्मणवाक्यं दर्शयति- *अविज्ञातमिति*।। ब्रह्म ज्ञानकर्मेति ये मन्यन्ते, तेषां ब्रह्माज्ञानं स्यात्; विषयस्याब्रह्मत्वादित्यर्थः। ब्रह्म बोधयितुं प्रवृत्तवाचस्तत्र स्फुरणातिशयमाधातुमसमर्थाः, यतो वाचो निवर्तन्ते, तद् ब्रह्मेत्यर्थः। विषयत्वस्यापि श्रुतत्वान्न तन्निकारणमिति शङ्कते- *ननु मनसेति*।। विरुद्धार्थत्वेनोभयोः प्रामाण्यानुपपत्तेरन्यतरपरित्यागायोगाच्च व्यवस्था स्वीकार्येत्याह- *नैष इति*।। युक्तितोऽपीत्थं

व्यवस्थेत्याह- *न हीति*।। प्रकाशो गुणो यस्य स प्रकाशगुण:, तस्मिन्नित्यर्थ:। अविद्यानिवर्तनेन शास्त्रस्य प्रामाण्यमुक्तम्, तदाक्षिपति- *नन्वविद्येति*।। साध्यत्वेऽपि प्रध्वंसस्य नित्यतादर्शनान्नैवमित्याह- *नेत्याहेति*।। आत्मनो नित्यमुक्तत्वमसहमान: शङ्कते- *ननु कोऽयमिति*।। जीवेशादिविवाददर्शनाद् विमर्शोपपत्तिरित्यर्थ:। जीवस्वरूपनिरूपणस्येह क: प्रसङ्ग:? इत्याशङ्क्याह- *यस्य स्वरूपमिति*।। यद्यपि जीवस्वरूपं बहुशो निरूपितम्; तथाऽपि मिथ्याज्ञानोपहतचेतसां तत्र विस्मरणसंभवात्पुनस्तन्निरूपणमित्यर्थ:। ''ब्रह्म वा इदमग्र आसीदि'' त्यादिश्रुतिसमधिगतं रूपमाह- *ब्रह्मैवेति*।। प्रतिबिम्बितस्य जीवस्य बिम्बभावो विरुद्ध इत्याशङ्क्याह- *ततश्चेति*।। एकेन पदेन विवक्षितसिद्धे: पदान्तरमनर्थकमित्यत्राह- *नचैतदिति*।। पदद्वयसामानाधिकरण्याद्विरुद्धार्थप्रतिपत्तौ तन्निरसनेनाखण्डं वस्तु प्रतिपादयितुं शक्यते, नान्यथा, एकपदप्रयोगमात्रेण विरोधप्रतिपत्तेर्लक्षणानुपपत्तेरित्यर्थ:।।

अखण्डं ब्रह्म शास्त्रप्रमेयमित्युक्तमाक्षिपति- *ननु भिन्नाभिन्नतेति*।। तत: पदद्वयमर्थवत्स्यादित्यर्थ:। भेदवादिमते पुरुषार्थो न सेत्स्यति, पदद्वयस्यार्थवत्त्वं त्वन्यथापि घटत इत्यभिसन्धायाह- *न तथा सतीति*।। *लक्षणयेति*।। विरुद्धांशपरित्यागेनोत्पन्नज्ञानेनेत्यर्थ:। ''भिद्यते हृदयग्रन्थि:'' ''तरति शोकमात्मविदि'' त्यादिशास्त्रेण ज्ञानादध्यासनिवृत्तेरुपलभ्यमानाया: कथमपलाप:? इत्याशङ्क्याह- *वर्तमानेति*।। ज्ञानमात्रस्य शरीराद्यध्यासनिवर्तकत्वं न ब्रूम:, किं त्वन्त्यावस्थायामुत्पन्नज्ञानेनेति चेत्, मैवम्; तत्र प्रमाणाभावाज्जीवन्मुक्तिप्रतिपादकशास्त्रविरोधाच्चेत्यर्थ:। भिन्नाभिन्नं ब्रह्मेति वदतेदं पर्यालोचनीयम्-किं सर्वदा भिन्नभिन्नम्? उत संसारावस्थायामेव आद्ये न मुक्ते: संसारावस्थातो विशेष:। द्वितीयेऽपि भेदांशस्य किं निवर्तकम्? इति वक्तव्यम्-किं शब्दज्ञानम्? उत कर्म? आहो उपासना? अथवाऽपरोक्षानुभव:? इति विकल्प्याद्यं दूषयति- *भिन्नाभिन्ने इति*।। द्वितीय-तृतीय-चतुर्थान् निरस्यति- *कर्मेति*।। संसारावस्थायां भेदाभेदप्रतिपादकत्वेनागमोऽन्यथासिद्ध इत्याशङ्क्य, तत्कल्पकाभावान्नैवमित्याह- *आगमस्येति*।। कल्पकाभावोऽसिद्ध इत्याह- *यत्त्विति*।। 'अहं ब्रह्मास्मी''ति ज्ञानं ज्ञानशब्दार्थ:। ब्रह्मात्मभावो मोक्ष:। अविद्यानिवृत्तिरादिशब्दार्थ:। अत्यन्ताभेदेऽत्यन्तभेदे च मुक्ति-बन्धव्यवस्थासिद्धेर्भिन्नाभिन्नत्वमास्थेयम्, तथा चागमस्य संकोच: सेत्स्यतीत्यर्थ:।। व्यवस्थाया अन्यथाप्युपपत्तेर्न तद्बलाद् भेदाभेत्सिद्धिरित्यभिप्रायेणाह- *तन्मन्दचेतनोपच्छन्दनमात्रमिति*।। मन्दबुद्ध्यनुसरणमात्रमित्यर्थ:। न केवलमन्यथोपपन्नार्थापत्ति:, किं त्वन्यथैवेत्याह- *तथाहीति*।। किं भेदाभेदाभ्यामंशी जीव:? उतांशद्वयसमुदाय:? आद्येऽपि किमभेदांशो ब्रह्म? उत ततोऽर्थान्तरम्? इति विकल्प्याद्यमूनद्य दूषयति- *यदि भेदाभेदाभ्यामिति*।। *विपरीतोऽर्थ इति*।। जीवस्य निरवयवत्वप्रतिपादकश्रुतिविरुद्धम्, ब्रह्मांशो जीव इति स्वाभ्युपगमविरुद्धं चेत्यर्थ:। आद्यद्वितीयं दूषयति- *अभेदांशस्येति*।। समुदायपक्षं निरस्यति- *न चेति*।।

समुदायिनो भेदाभेदाभ्यां समुदायस्य दुर्निरूपत्वाज्जीवस्याप्यवस्तुत्वं स्यादित्यर्थः। मा भूत् तर्हि समुदायो जीव इति चेत्, तत्र वक्तव्यम्-किमभेदांश एव जीवः? उत भेदांश एव? अथवोभावप्यंशाविति? तत्राद्यं दूषयति- *न चेति*।। अन्तिमपक्षेऽपि किं तौ भिन्नौ? उताभिन्नौ? नाद्य इत्याह- *न चोभाविति*।। मध्यमं निरस्यति- *न च भेदांश इति*।। फलितमाह- *तत्र तत्त्वेति*।। विकल्पान्तरमनुवदति- *भेदाभेदेति*।। किं तयोरत्यन्ताभेदः? उत भेदाभेदौ? नाद्य इत्याह- *यद्यभिन्नाविति*।। द्वितीयमुत्थापयति- *अथ भेदेति*।। यौ तयोर्भेदाभेदौ? तावपि किं भिन्नौ? अथवा भिन्नाभिन्नौ? प्रथम-द्वितीययोः पूर्वसमानयोगक्षेमत्वमित्यभिप्रेत्य तृतीयं दूषयति- *नैवमिति*।। भेदाभेदनिर्वाहकभेदाभेदोपस्थितौ, तत्रापि भेदांशनिर्वाहकत्वेनाभेदांशनिर्वाहकत्वेन च भेदाभेदौ कल्प्यौ, एवमितरत्रापीति प्राण-मुक्तिहीनमनन्तभेदादिकल्पनं स्यादित्यर्थः। अंशिपक्षोक्तो दोषः कल्पान्तरेऽपि स्यादिति तदनुवादपूर्वकमाह- *किं चांशिन इति*।। उपदेशपर्यालोचनयापि नायं पक्षो निरूपणपथमवतरतीत्याह- *किंचेति*।। किमभेदांशस्योपदेशः? इति विकल्पयति- *कस्यायमिति*।। आद्यं प्रत्याह- *न तावदिति*।। द्वितीयं प्रत्याह- *नापीति*।। भेदांशेऽभेदस्य विद्यमानत्वात्तथाप्रतिपत्त्युपपत्तिरित्याशङ्क्य, किं मुक्तौ तस्य विद्यमानता? उत सदा? नाद्यः; पूर्वरूपे स्थिते नष्टे वा तस्याभेदांशभजनानुपपत्तेरित्याह- *नचेति*।। द्वितीयं निरस्यति- *ब्रह्मण्येवेति*।। अभेदांशस्याप्यविद्ययोपदेश इत्याशङ्क्याह- *कस्य चायमिति*।। भेदांशः किमुपाधिनिमित्तः? उत स्वाभाविकः? नाद्य इत्याह- *उपाधीति*।। द्वितीयमुत्थापयति- *स्वत एवेति*।। पक्षान्तरमाह- *अंशिनि चेति*।। मुक्ति-बन्धयोरैकाधिकरण्यनियमाद् मुक्त्यवस्थायां तस्यावस्थानमिष्यते? आहो मुक्ति-संसारावस्थयोर्वैलक्षण्यसिद्ध्यर्थं नेष्यते? इति। तत्राद्यं दूषयति- *तद्विनाश इति*।। *बन्धविनाशे=मुक्तावित्यर्थः*।। जीवनाशः स्यादिति कल्पे भावः स्यादित्यर्थः। तत्र हेतुमाह- *मोक्ष इति*।। भेदांशनाशेऽप्यभेदांशस्य मुक्तिरित्याशङ्क्याह- *अभेदांशस्येति*।। आद्यमुत्थापयति- *किं चात्रापीति*।। श्रुतिविरुद्धत्वान्नेदमादेयमित्याह- *ब्रह्म वेदेति*।। युक्तिविरुद्धं चैतदित्याह- *संसारादिति*।। शोच्यश्चायं भेदाभेदवादीत्याह- *किंचायमिति*।। स्वर्गादीनसांकर्येण व्यवस्थापयितुं प्रवृत्तोऽयं व्युत्पन्नमतिषु कथं नापत्रपेतेति संबन्धः। तत्र हेतुमाह- *सर्वत्रेति*।। असतो भेदाभावान्न सांकर्यमिति शङ्कते- *भेदेनेति*।। अभेदप्रयुक्तकार्याभावान्नाभेदकल्पनं फलवदित्याह- *किमनेनेति*।। बन्ध्यायमानत्वमाह- *स्वप्रयुक्तेति*।। किं च किं भेदाभेदौ भिन्नयोर्धर्मिप्रतियोगिनोस्तिष्ठतः? उताभिन्नयोः? तत्राद्यं दूषयितुं भेदस्य धर्म्यादितन्त्रतामाह- *धर्मीति*।। भेदोपाधेरिति। भेदव्यवस्थापकस्येत्यर्थः। ततः किमिति? अत्राह- *उपाधिभेदेनेति*।। *व्यवस्थेति*।। विविक्ततयाऽवस्थानं स्थितिरित्यर्थः। भेदाभेदनिर्वाहक-भेदस्यापि भिन्ननिष्ठत्वादनवस्थेत्यर्थः। अथाभिन्नयोर्धर्मिप्रतियोगिनोर्भेदस्थितौ तस्यापि स्थित्यर्थं भेदान्तरकल्पनं स्यादित्याह- *धर्मीति*।। इतोऽपि नायं पक्षः समञ्जस इत्याह- *उपाधीति*।। यस्मिन्

भेदनिवेशस्तस्मिन्नेवाभेदनिवेश:? उतान्यत्र? नाद्य:; विरोधादित्यभिसन्धाय द्वितीयं निरस्यति- *उपाधीति*।। द्वितीयं प्रत्याह- *धर्मीति*।। धर्मिप्रतियोगिनोर्भेदादिति विग्रह:। एकस्मिन् धर्मिप्रतियोगिभावासंभवान्नाभिन्नयोर्भेदस्थितिरित्यर्थ:। शास्त्रविरुद्धा चेयं कल्पनेत्याह- *शास्त्रं पुनरिति*।। अभेदपरं तद्वचनमित्याशङ्क्य पृथगभेदप्रतिपादनान्नैवमित्याह- *एष त इति*।। त्वत्पक्षे शास्त्रप्रामाण्यं च दुर्लभमित्याह- *न च सत्त्वादीति*।। कनक-कटकादिषु सामान्याकारेणाभिन्नत्वं विशेषाकारेण भिन्नत्वं चेत्येतल्लोकप्रसिद्धम्, तेन दृष्टान्तेन प्रत्यग्ब्रह्मणोरपि तादृक्त्वसिद्धे: शास्त्रवैयर्थ्यमित्यर्थ:।।

भेदाभेदमते सांकर्यमित्युक्तम्, तत्परमतेऽपि तुल्यमिति शङ्कते- *नन्विति*।। संकीर्यत एवेति संबन्ध:। मन्मते संकरश्च नेत्याह- *न ममेति*।। काल्पनिकभेदाङ्गीकारान्नाद्वैतिमते सांकर्यप्रसञ्जनं शोभत इत्याह- *नैवमिति*।। अभेदवचनं तर्हि किंविषयमिति? अत आह- *आत्मन एवेति*।। तात्त्विकाद्वैतविषयं तदित्यर्थ:। एकदेशिमतनिराकरणमुपसंहति- *तस्मादिति*।। गुणदोषविवेकावधारणासमर्थत्वादपि न त्वन्मतमादेयमित्याह- *बहुवेणुभारेति*।। स्वमतमुपसंहरति- *तस्मादिति*।। मृदादिवद् ब्रह्मणोऽप्युपादानत्वात्तत्र क्रियानुप्रवेशोऽयुक्त इति शङ्कते- *ननु ब्रह्मण इति*।। मोक्षस्योत्पाद्यत्वादिरूपत्वाभावेऽपि क्रियानुप्रवेश: किं न स्यादित्याशङ्क्य, विकल्पोत्तरत्वेन व्याकरोति- *तन्नेदमित्यादिना*।। मोक्ष:, अनित्य:, उत्पत्तिमत्त्वात्; घटादिवदित्युक्ते क्रियासाध्यत्वमुपाधिरिति केषांचित्प्रत्यवस्थानमाह- *अत्र केचिदाहुरिति*।। साधनव्यापकत्वं निरस्यति- *मोक्षस्येति*।। ज्ञानसाध्यस्यानित्यत्वे प्रमाणं च न पश्याम इत्याह- *न च ज्ञानेति*।। ज्ञानस्याविद्यानिवर्तकताया लोकसिद्धत्वान्न तत्र विधिरर्थवानित्याशङ्क्याह- *न चेति*।। अभूत्वा भावान्न ब्रह्मभाव: साध्य इति शङ्कते- *ननु जीवस्येति*।। स्वाभाविकत्वमसिद्धमित्याह- *नेति*।। ''स्वं ह्यपीतो भवती''त्यादिना स्वाभाविकत्वं लक्ष्यत इत्याशङ्क्य, तत्तादात्म्यविषयमित्याह- *तादात्म्यस्येति*।। तादात्म्य-तद्भावयो: को भेद:? इत्याशङ्क्याह- *भेदेति*।। भेदसहाभेदस्तादात्म्यम्, भेदासहाभेदस्तद्भाव इति भेद:। तद्भावस्य तादात्म्यातिरेकसाधनफलमाह- *ज्ञानेनेति*।। अविद्यानिवृत्ति-ब्रह्मभावयोर्ज्ञानसाध्यत्वे श्रुतिं प्रमाणयति- *तरति शोकमिति*।। विकल्पासहत्वाद् नैतत्साध्वित्याह- *अत्रोच्यत इति*।। तत्रान्त्यं निरस्यति- *न तावत्तद्भावेति*।। किं तज्ज्ञानमपरोक्षम्? उत परोक्षम्? आद्ये ज्ञानात्प्राक् तद्भावाभावेऽपरोक्षज्ञानानुत्पत्ते: स एष्टव्य इत्याह- *तस्येति*।। द्वितीये सर्वेषां तद्भव: स्यादित्यर्थ:। आद्य: कल्पो निरूपणं न सहत इत्याह- *यदि तादात्म्येति*।। विकल्पासहत्वान्नैतत्साध्वित्याह- *अत्रापीति*।। आद्येऽपीदमालोचनीयम्-किं तादात्म्यनिवर्तकं तज्ज्ञानम्? आहो स्विदन्यत्? आद्यमुत्थापयति- *निवृत्ते चेदिति*।। अपसिद्धान्तापत्तेर्नैवमित्याह- *ज्ञानस्येति*।। न च तदिष्टमित्यपि शङ्क्यम्; अतिप्रसङ्गात्, ज्ञानस्य स्वगोचरघातिताऽदर्शनात्। स्वविषयघातितेष्टावपि न दोषाद्विमोक्ष इत्याह- *ज्ञानेति*।। ज्ञानस्य

वस्तुनिवर्तकत्वादर्शनादित्यर्थः। न द्वितीयः; निवर्तकान्तरानुपलब्धेरित्यर्थः। अन्तिममपवदति- *अनिवृत्त इति*।। अनुपपत्तिमेव स्फोरयति- *न हीति*।। तादात्म्यानिवृत्तौ तद्भाव इत्येतदितोऽप्यसङ्गतमित्याह- *किं चेति*।। तदभावः किं निवृत्तिरेव? उत तदन्यः? इति विमर्शार्थः। आद्ये न फलद्वैविध्यासिद्धिरित्याह- *निवृत्तिरेवेति*।। ज्ञाननिवर्त्यत्वेन तादात्म्यस्याविद्यात्मकत्वात्तन्निवृत्तिर-विद्यानिवृत्तिरिति यावत्। द्वितीयमुत्थापयति- *अन्यश्चेदिति*।। तद्भावस्य तादात्म्यनिवृत्त्यन्यत्वे निवृत्तिस्वरूपं वाच्यमित्याह- *तर्हीति*।। अभाव एव निवृत्तेः स्वरूपमित्याशङ्क्याह- *न हि जीवेति*।। जीव-ब्रह्मणोस्तादात्म्यनिवृत्तौ तद्भावोऽत्यन्तभेदो वा स्यात्, न च तदुभयम्; अत्यन्तभेदानिष्टे; निवृत्तिसमये तद्भावानिष्टेश्चेत्यर्थः। प्रकारान्तरेण तद्भावं दूषयितुं विमृशति- *कश्चायमिति*।। तद्भावः किं ब्रह्म? उत जीवः? आहो अन्यः? इति किंशब्दार्थः। तद्भावस्य साध्यत्वाद् ब्रह्मणश्चासाध्यत्वात्तयोरन्यत्वमित्याह- *न तावदिति*।। उक्तं दोषं मतान्तरेऽतिदिशति- *अत एवेति*।। तृतीयेऽपि किं स चेतनः, उताचेतनः? उभयथाऽप्यनुपपत्तिरित्याह- *नच तृतीय इति*।। जीव-ब्रह्मान्यचेतनस्यासंभवादनङ्गीकाराच्च। अचेतनत्वे च न तस्य पुरुषार्थत्वमित्यर्थः। इतोऽपि न भेदाभेदपक्षो युक्त इत्याह- *किं चेति*।। किं तादात्म्यविशिष्टो जीवः? उत तदुपलक्षितः? इति विकल्प्यानुवादेनोत्तरमाह- *यदीति*।। द्वितीयेऽस्मन्मतप्रवेश इत्याह- *निष्कृष्टेति*।। तत्र हेतुमाह- *अत्यन्तेति*।। प्रमाणं चात्र न पश्याम इत्युपसंहरति- *तस्मादिति*।। *तत्तादात्म्यस्येति*।। तेन तादात्म्यं यस्य तस्येत्यर्थः। *ननु* ''तत्त्वमसी'ति तादात्म्यं लक्ष्यत इत्याशङ्क्य, किं वाच्ययोस्तादात्म्यम्? उत लक्ष्ययोः? नाद्यः; तयोर्विरोधादित्यभिप्रत्य द्वितीयं दूषयति- *न चेति*।। पदद्वयवैयर्थ्यशङ्कां निरस्यति- *भिन्नेति*।। भिन्नोपाधि-परामर्श एवं कस्मादित्याशङ्क्याह- * न चैकेनेति*। भेदनिवृत्तिफलं तत्त्वमस्यादिवाक्यम्, न चैकेन पदेन भेदभ्रमो निवर्तते । तथा च भिन्नोपाधिपरामर्शेन भ्रमनिवर्तकं पदद्वयमर्थवदित्यर्थः।। 'ब्रह्मैव भवती'त्यादिषु ब्रह्मभावस्य साध्यत्वश्रवणात् कथमसाध्यत्वमित्याशङ्क्याह- *फलश्रुतय इति*।। चिकित्सादिना रोगादिनिवृत्तौ स्वास्थ्यं जातमितिवत् प्रतिबन्धकाविद्यानिवृत्तिमपेक्ष्य ब्रह्मैव भवतीत्यादिव्यपदेश इत्यर्थः। ज्ञानसाध्यस्यानित्यतादर्शनान्न मोक्षस्यानित्यत्वमिति यत्तूक्तं तत्राह- * न चेति। भावनालक्षणसंस्कारस्य ज्ञानजन्यस्याप्यनित्यत्वाद् ब्रह्मभावस्याप्यनित्यत्वमित्यर्थः। संस्कारत्वस्याविशेषाद्वेगादिवद् भावनापि क्रियाजन्येत्याशङ्क्याह- *न च संस्कारस्येति*।। ज्ञाने सति भवनोत्पद्यते, नान्यथेत्यन्वय- व्यतिरेकाभ्यां भावनाया ज्ञानसाध्यत्वमनुभूयते, तद्विरोधश्चेत्याह- *।। न च- संस्कारस्य ज्ञाननाशक्रियाजन्यत्वात् स्मृतिजनकत्वमित्यपि- *शङ्क्यम्; नाशस्य क्रियात्वाभावादित्यर्थः। का तर्ह्यनुमानस्य गतिरिति शङ्कते- अब्रह्मेति*।। ब्रह्मज्ञानेतरसाध्यत्वादित्यर्थः। दूषणान्तराभिधित्सयैतत्पुनरुत्थापितमिति द्रष्व्यम्। व्यभिचारित्वादाभासत्वं तस्येत्याह- *क्रियायामिति*।। साध्यतामात्रस्यानित्यत्वप्रयोजकत्वसंभवे क्रियेति विशेषणं व्यर्थं चेत्यभिप्रायेणाह- *तस्मादिति*।। प्रतिबन्धनिरासेनाऽऽप्यत्वमुक्तमिति शङ्कां

निरस्यति– *तृतीयमिति*।। उत्पत्तिविकारापेक्षा तृतीयमित्यर्थः। आत्मस्वरूपस्याऽऽप्यत्वानभिधानात्तन्निषेधोऽसङ्गत इत्याशङ्क्य विकल्पपूर्वकं व्याचष्टे– *तत्रेदमिति*।। *तत्र=आप्यस्वरूप इत्यर्थः। द्वितीयकल्पाद्यकल्पमनुवदति– *व्यतिरेकेऽपि सर्वगतमिति*।। किं तादात्म्यलक्षणाऽऽप्तिः साध्यते? संयोगलक्षणा वा? नाद्य इत्याह– *संयोगेति*।। अन्यस्यान्यात्मत्वं पूर्वरूपे स्थिते नष्टे वा न संभवतीत्यर्थः। नापि द्वितीय इत्याह– *संयोगो नित्यसिद्ध इति*।। सर्वगतत्वाद्विकारदेशेऽवर्तमानत्वाभिधानमयुक्तमित्याशङ्क्याह– *तत्र वक्तव्यमिति*।। किं प्रयोजनानुरोधात् परिच्छिन्नत्वम्? उत प्रमाणानुरोधात् इति विकल्पार्थः। द्वितीयं दूषयति– *शास्त्रं पुनरिति*।। ''आकाशवत्सर्वगतश्चे''त्यादिशास्त्रे सर्वगतत्वप्रतिपत्तेः, ''अथ यदतः परः'' इत्यादिवाक्यं त्वन्यथासिद्धमित्यभिसन्धिः। आद्यं दूषयति– *नचेति*।। रशनादेशे वर्तमानेनापि पन्नगेन न रशनाया यथा संस्पर्शः। तद्वद् ब्रह्मणोऽपि कार्यासंस्पर्श इत्यर्थः। सर्वगतत्वात्कथं ब्रह्म विकारावर्तीति शङ्कायामाह– *अथ सर्वगतत्वस्येति*।। अथ यदतः परः'' इत्यादेरन्यार्थत्वादर्शनात्। परिच्छिन्नमपि सर्वगतमित्युपचर्यत इत्यर्थः।। टीकाग्रन्थाद् बहिरेव दूषणमाह– *न मध्यमेति*।। विकल्पप्रयोजनमाह *दूषयतीति।। प्रतीचो ब्रह्मतादात्म्यस्य साध्यत्वपक्षे कथं स्वरूपनाशः? जीवस्य भावादिति दूषणाभासत्वशङ्कायामाह– *प्रथम इति*।। दूषणविधां पृच्छति *कथमिति*।। किं जीवस्य ब्रह्मभावस्ताभ्यामन्यः।। उतान्यः? आद्ये साध्यत्वायोग इत्याह– *तत्र तावदिति*।। द्वितीयं प्रत्याह–नापीति*।। *द्रव्यान्तरमिति*।। पदार्थान्तरमित्यर्थः। आरम्भकत्वमङ्गीकृत्य दूषणमवादि, न चारम्भकत्वमपीत्याह– *सर्वगतस्येति*।। परिच्छिन्नास्तन्तवः पटारम्भका दृष्टाः, ब्रह्म चानीदृगिति 'नारम्भकमित्यर्थः। तादात्म्यस्य संबन्धरूपत्वान्न स्वरूपविनाशप्रसक्तिरित्याशङ्क्याह– *नापि जीवेति*।। संबन्धः संयोगः? उत समवायः? न तावदन्त्य इत्याह– *द्रव्ययोरिति*।। द्रव्यत्वेऽपि मृद्घटयोरिव समवायः? तत्राह– *भिन्नेति*।। मृद एव घटत्वोपगमान्न दृष्टान्तसिद्धिरित्यर्थः। न च संयोग एव संबन्धः; ''तस्य स्वरूपेणावस्थाने'' इत्यत्र– निरसिव्यमाणत्वादित्यर्थः। किंच किं जीवस्य स्वपरिमाणे स्थिते ब्रह्मभावः? उत नष्टे? नाद्य इत्याह– *नापि जीव इति*।। द्वितीयं दूषयति– *अनवस्थित इति*।। कटके स्थिते तत्परिमाणाविनाशादित्यर्थः ऐकग्रन्थ्यं निरस्यति– *द्वितीय इति*।। 'संयोगो विप्रयोगान्तः इति न्यायः श्रुतिविरोध आभासीभवतीति। शङ्कते– *ननु शास्त्रेति*।। श्रुतेः 'स्वतः प्रमाणत्वात् प्रमाणान्तराभावेऽपि प्रामाण्यमित्याशङ्क्य, किं यथाश्रुतोऽर्थः स्वीक्रियते? उत कल्प्यार्थः? नाद्य इत्याह– *यथाश्रुतेति*।। प्राप्तिसमये पुनरावृत्तेरप्राप्त्वान्न तत्प्रतिषेध इत्यर्थः। द्वितीयं प्रत्याह– *नावर्तिष्यत इति*।। कल्पना ह्यविरोधापेक्षया प्रसरति, तथा च विरोधे सति कथं कल्पनोत्थितिरित्यर्थः।। किंच किं तदवस्थायां ब्रह्मसमानमैश्वर्यम्?उतन? आद्य न कस्यापि सर्वेश्वरत्वं सिद्ध्येत्, इत्यभिप्रायेणाह–तस्यैवेति* द्वितीये साधनवैयर्थ्यमित्यभिसन्धायाह– *तस्मादिति*।। प्रदेशान्तरवर्तिब्रह्मप्राप्तेः श्रुतिसमधिगतत्वात् कथं तन्निरसनमिति शङ्कते– *ननु तयेति*।। मूर्द्धन्यनाड्येत्यर्थः।। आपेक्षिकामृतत्वविषयमेतद्वचनं न

परामृतत्वविषयम्; इतरथाऽतिप्रसङ्गः स्यादित्याह– * तर्हीति *।। आ अमानवपुरुषात्=अमानवपुरुषपर्यन्तमित्यर्थः। अप्रतीकोपासनाद् ब्रह्मप्राप्तेः। श्रवणादितेरेषां तु नाडीभिर्निःसरणमात्रमिति वैषम्यमित्याशयेन शङ्कते– *ननु स एनानिति *।। अस्मिन्नपि वाक्ये न परब्रह्मणः प्रदेशान्तरवर्तित्वं भाति, किं कार्यस्येत्याह– *न कार्येति *।। ''परं जैमिनिर्मुख्यत्वादि''ति सूत्रावष्टम्भेन शङ्कते– *ननु ब्रह्मशब्देति *।। ब्रह्मार्थस्य मुख्यत्वं नाम किं वृद्धव्यवहारे परब्रह्मणो परब्रह्मशब्दप्रयोगविषयत्वम्? उत बृहतिधात्वर्थस्य तत्र परिपूर्णत्वम्? इति विकल्प्याद्यमनूद्य दूषणमाह– * यदि तावदित्यादिना *।। प्रयोगमुख्यत्वतो निष्प्रयोगविषयाख्यं मुख्यत्वं ब्रह्मशब्दार्थमुख्यत्वमित्यर्थः। वृद्धव्यवहारे ब्रह्मशब्दप्रयोगस्य कार्य-परयोरविशेषादित्यर्थः। द्वितीयमुत्थापयति– *अथावयवेति *।। ब्रह्मशब्दस्यावयवो बृहतिधातुः तदर्थस्य ब्रह्मण्यन्वयेनेत्यर्थः। विकल्पासहत्वान्नैतदित्याह– * मैवमिति *।। किं योगवद् रूढिरप्याश्रीयते? उत योग एव? इति विकल्प्याद्ये दूषणमाह– *एकस्येति *।। द्वितीये रूढेः पुरःस्फूर्तिकत्वादितरस्य चतद्विपरीतत्वाद् रूढिराश्रयणीया, तथा च कार्यं ब्रह्म न सेत्स्यति, इत्यभिप्रायेणाह– *प्रयोगेति *।। रुढेरुभयत्राविशेषे कार्यं ब्रह्मैवेत्यवधारणं कथम्? इत्याशङ्क्य, उक्तार्थोपोद्बलकानि लिङ्गान्याह– * किं च स एनानिति *।। तेषु ब्रह्मलोकेषु, परावतः परानिन्द्रादीनवतीति परावान्, तस्य परावतः, प्रजापतेः समा वसन्तीत्यर्थः। *तृतीयस्यामिति *।। पृथिव्यपेक्षया तृतीये द्युलोके परब्रह्मणोऽवस्थानं विरुद्धम्; सर्वगतत्वात्, तथा च कार्यब्रह्मैव द्युसंस्थं गन्तव्यमित्यर्थः। तत्रैव लिङ्गान्तरमाह– *तथेति।। इरा अन्नरसः, तेन निर्मितमैरम् मदीयं मदकरम् *ऐरं च तन्मदीयं चैत्यैरंमदीयम्। तस्याश्वत्थस्य विनश्वरस्य, सोमममृतं सूते इति सोमसवनस्तस्य। *अपराजिताया इति *।। अपरैर्न जिताऽपराजिता, तस्या इत्यर्थः। *अरस्य=अरसंज्ञकस्य *।। ण्यस्य= *ण्यसंज्ञकस्य। ब्रह्मणो लोको ब्रह्मलोक इति हैरण्यगर्भो लोकः कस्मादुपादीयते? ब्रह्मैव लोको ब्रह्मलोक इति परब्रह्म कस्माद् न गृह्यत इति? तत्राह– * न च ब्रह्मेति *।। यौगिकत्वाङ्गीकारेऽपि कार्यलोक इत्याह– * यौगिकत्वेऽपीति *।। ब्रह्मलोकशब्दस्य कार्ये पुरःस्फूर्तिकत्वादित्यर्थः।। भोगभूमौ प्रसिद्धलोकशब्दसमभिव्याहारादपि ब्रह्मशब्दः कार्यपर इत्याह– * ब्रह्मणीति *।। श्रुति- लिङ्गयोर्विरोधे श्रुतेर्बलीयस्त्वात्कथं लिङ्गववशान्कार्यपरिग्रहः? तत्राह– * नचैतेषामिति *।।

अनेकलिङ्गानुगृहीतश्रुतिविरोधात्प्रसिद्धोऽर्थस्त्याज्य इत्यर्थः। इतोऽपि न ब्रह्मशब्दः परब्रह्मपर इत्याह– *किंच पञ्चाग्निविदामिति *।। *ननु* ''स एनान् ब्रह्म गमयती'' त्येतच्छब्देन पञ्चाग्निविदतिरिक्ता गृह्यन्त इत्याशङ्क्याह– *नच स एनानिति *।। सन्निहितत्वेऽप्ययोग्यत्वात् तदग्रहणमित्याशङ्क्याह– *तेषामिति * तर्हि फलान्तरं कल्प्यमित्याशङ्क्याह– *किंच गायत्रीति *।। फलैक्येऽप्युपासनोपचयापचयौ किं न स्यातामित्याशङ्क्याह– *न हीति *।। द्वितीयमुत्थापयति– *अथ पलेति *।। निर्विशेषं ब्रह्म गन्तव्यमित्येतद्गतमित्याह– तर्हि न विकारेति *।। *तदभावादिति *।। उपचयापचयाभावादित्यर्थः। इतोऽपि न परं ब्रह्म गन्तव्यमित्याह– * किंचेति *।।

वैश्वानरोपासनया त्रैलोक्यशरीरं संप्राप्य विकारावर्ति ब्रह्म प्राप्नोतीत्याशङ्क्याह– *किंच पित्रादीति *।। संकल्पश्रुतिविरोध इति। '' संकल्पादेवास्य पितरः समुत्तिष्ठन्ती'' त्यादिश्रुतिविरोध इत्यर्थः। आद्यं दूषयति– *स्याच्चेदिति *।। इतोऽपि न परब्रह्म गन्तव्यमित्याह– * किं च विकारावर्तीति *।। आप्तकामस्यापि नृपतेः क्रीडार्थप्रवृत्तिवद् ब्रह्मणोऽपि तथात्वं स्यादित्याशङ्क्य, तात्कालिकप्रयोजनवद् ब्रह्मणोऽपि तद्भावः स्यादित्याह– * स्वार्थेति *–कलाप्रविलयश्रुतिरिति *।। ''षोडश कलाः पुरुषायणाः' पुरुषं प्राप्यास्तं गच्छन्ती'' त्याद्येत्यर्थः। किं च ब्रह्म प्राप्तस्य लिङ्गशरीरोच्छित्तौ किं निमित्तमस्ति? उत नेति विवेचनीयमित्याह– * किंच तत्रेति *।। आद्येऽपि किं च ब्रह्म प्राप्तस्य लिङ्गशरीरोच्छितौ किं निमित्तमस्ति? उत नति विवेचनीयमित्याह– * किंच तत्रेति *।। आद्येऽपि किं वि निमिंत्तम्? उतान्यत्? आद्ये दूषणमाह– *विद्येति *।। विद्यायां सत्यामप्युत्क्रान्तेरर्वाग्यथा तस्य न विलयस्तथोत्क्रान्तावपीत्याशङ्क्याह– * तदेति *।। प्राक् प्रतिबन्धसंभवादनिवृत्तिः, उत्क्रान्तौ तदभावान्निवृत्तिरित्यर्थः। द्वितीयमनूद्य दूषयति– *अमानवेति *।। अमानवकरसंस्पर्शस्य विद्युत्स्थाने श्रवणादित्यर्थः। त्रिपाद ब्रह्म गन्तव्यमिति सम्बन्धो निवर्तक इत्याशङ्क्य तत्र मानाभावान्मैवमित्याह * न चेति *।। गन्तृपर्यालोचनायामपि न परब्रह्म गन्तव्यमित्याह–किं जीवः सर्वगतः? उत परिच्छिन्नः? आद्ये गत्यनुपपत्तिः। द्वितीयेऽपि स्वतः परिच्छिन्नः? उतोपाधितः? आद्ये विनाशप्रसक्तिरित्यभिप्रेत्य दूषयति– *औपाधिकेति *।। तत्र हेतुमाह– *निरवयवेति *।। निरवयवस्य ब्रह्मणोऽवच्छेदरूपस्येत्यर्थः। घटादुद्धृत्य यथा गगनं न नीयते, तद्वदुपाधित उद्धृत्य ब्रह्मस्वभावो जीवो न नेतुं शक्य इत्यर्थः। विपक्षे दण्डमाह– * उद्धरणे चेति * कथं तर्ह्यात्मनः स्वर्गादिगमनमि? त्याशङ्क्याह– *तस्मादुपाधीति *।। उपाधेरपि गमनानुपपत्तिं शङ्कते– *ननूपाधेरिति *।। किं तत्त्वतो गमनानुपपत्तिः? उत कल्पनयाऽपि? तत्राद्यस्त्वङ्गीक्रियते, द्वितीयस्त्वनुपपन्न इत्याह– *एवं तर्हीति *।। संकल्पश्रुतिविरोधादित्यर्थः।

श्रुतेस्तर्हि का गतिरिति शङ्कते–किंत्विति *।। लौकिकानन्दस्य ब्रह्मानन्दावच्छेदत्वादवच्छिन्नस्यानवच्छिन्नान्तर्भावप्रतिपादनपरा श्रुतिरित्याह– *यावांस्तत्रेति *।। अनेकलिङ्गानुगृहीतानेकश्रुतिविरोधाद् ब्रह्मशब्दस्याश्रौतोऽर्थस्त्याज्य इत्याह– *एकस्येति *।। इतोऽपि न ब्रह्मशब्दस्य मुख्यार्थतेत्याह– *शास्त्रेति *।। ''संकल्पादेव तु तच्छ्रुतेरि''त्यादिभ्य उपासनाफलं निरूप्यते, तद्धि न स्वीकृतं स्यात् त्वन्मत इत्यर्थः। आप्ते क्रियाफलत्वनिराकरणमुपसंहरति– *तस्मादिति *।।

''आदर्शे मलसंभवात्तन्निरासेनाभिव्यक्तिकरणं युक्तम्, आत्मनस्तु निर्मलत्वादभिव्यक्तस्वरूपत्वाच्चाभिव्यक्तेर्न क्रियासाध्यत्वम्, ततश्च–''अथे'' ति चोद्यानुपपत्तिरित्याशङ्क्याऽऽगन्तुकदोषाभावेऽप्यनाद्यविद्यामलेनाभिव्यक्तेः प्रतिबन्धात् संस्कारो युक्त इति शङ्कते– *दोषेति *।। आदर्शे क्रियाभावेऽपि संस्कार्यत्ववदात्मनोऽपि संस्कार्यत्वं किं न स्यादित्याशङ्क्य विकल्पपूर्वकं व्याचष्टे– *तत्र

वक्तव्यमिति*।। 'निरवयवस्ये''त्यत्र सर्वगतस्येत्यपि द्रष्टव्यम्। प्रत्यक्त्वमात्रेण कथमन्यक्रियासंस्कार्यत्वाभिधानम्? तत्राह- *न चान्येति*।। इष्वादिक्रियायाः स्वाश्रययुक्तेऽतिशयजनकत्वं दृष्टम्, आत्मनस्तु प्रत्यक्त्वेन तत्त्वतः पराक्संबन्धाभावाद् न तत्संस्कार्यत्वमित्यर्थः। ध्यानस्य निवर्तकताया अदृष्टत्वात्कथमीश्वरध्यानं तथेत्याशङ्क्यादर्शनमसिद्धमित्याह- *ननु मन्त्रेति*।। परमार्थस्यापरमार्थस्य च मलस्य ध्यानानिवर्त्यत्वे निर्दिष्टे ''न च स्नानादिक्रियये''त्यनेन किं निर्दिष्टमिति न ज्ञायते? तत्राह- *ननु शास्त्रीयेति*।।

इदमंशस्य संस्कार्यत्वाभिधानमयुक्तम्, कर्मणां कर्तृसंस्कारकत्वात्, चेतनस्य च कर्तृत्वादित्याशङ्क्य तात्पर्यमाह- *अयमर्थ इति*।। प्रेरयिताऽपि चेतन एवेत्याशङ्क्याह- *स चेति*।। संवलित इति*।। चैतन्यैक्याध्यासमुपगत इत्यर्थः। केवलचेतनस्याचेतनप्रेरयितृत्वानुपपत्तेः शबलस्य प्रेरयितृत्वं वक्तव्यमित्यर्थः। चित्संनिधानाद् बुद्धेः कर्तृत्वे प्रमाणमाह- *विज्ञानमिति*।। *ननु* अहंकारस्य विलीयमानत्वादकृताभ्यागमादिदोषप्रसक्तेर्न बुद्धेः कर्तृत्वमित्यत आह- *स चेति*।। चशब्दः शङ्कानिवृत्त्यर्थः। सुषुप्तावपि तस्याः सूक्ष्मरूपेण स्थितत्वान्नाकृताभ्यागमादिदोषानुषङ्ग इत्यर्थः। अविच्छेदप्रतिपा- दनफलमाह- *इति भोग इति*।। कर्तृत्ववद् भोगोऽप्युपपन्न इत्यर्थः। धर्मादेरात्मनि समवेतत्वात्कर्तृत्वादिरपि तत्रेत्याशङ्क्याह- *तत्र चेति*।। चैतन्यसंवलितबुद्धावित्यर्थः। निर्विकारेति हेतुगर्भविशेषणम्।।

''ननु ज्ञानस्येत्यादिचोद्य-परिहारौ पुनरुक्तावित्याशङ्क्याह- *ननु ज्ञानस्येति*।। अजन्यफलत्वाभिधानमात्रेण कथं वैलक्षण्यम्? इत्याशङ्क्याह- *जन्येति*।। ज्ञानं न चोदनाजन्यमित्यत्र प्रतिज्ञामात्रं प्रतिभाति, न हेतुरित्याशङ्क्याह- *चोदनाजन्यमिति*।। प्रत्यक्षादनुमानादेर्ज्ञानत्वेनाविशेषादेकं वस्तुजन्यम्, इतरत्र तथेत्युक्तमयुक्तमित्याशङ्क्याह- *ननु शब्देति*।। शब्द- लिङ्गादिकमवर्तमानबोधजनकमपि दृष्टम्, न च तत्र विषयस्य जनककोटावन्तर्भावः; वर्तमानस्यैव जनकत्वसंभवात्, तथा च न प्रत्यक्षेतरस्य विषयजन्यत्वमित्यर्थः।

लिङ्गादिजन्यज्ञाने चोदनालक्षणशब्दजन्यत्वाभावस्य तेनापीष्टत्वान्न चोदनाया अनुप्रवेश इत्यसंगतमित्याशङ्क्याह- *तत्रापीति*।। क्रिया-ज्ञानयोर्वैलक्षण्योक्तिरयुक्ता, क्रियाया एवाभावादिति शङ्कते- *ननु संयोगेति*।। मानाभावान्नातिरिक्तक्रियासिद्धिरित्यर्थः। मानाभावोऽसिद्ध इति शङ्कते- *ननु चलतीति*।। *एतदिति*।। चलनमित्यर्थः। अनुभवमङ्गीकरोति- *सत्यमिति*।। तर्हि तद्बलात् क्रियासिद्धिः, तत्राह- *तदपीति*।। तदपि चलतीति प्रत्यक्षं संयोगविभागालम्बनमिति संबन्धः। पादभूतलसंयोगविभागयोश्चलतीति बुद्धिदर्शनादितरथा चादर्शनात् संयोगाद्यालम्बनमित्यर्थः। संयोग-विभागयोः सतोरपि स्थाण्वादौ चलतीति बुद्ध्यदृष्टेः प्रत्यक्षस्यातिरिक्तक्रियाविषयत्वमिति

शङ्कते-*ननु स्थाणाविति*।। न संयोगविभागमात्रं चलतीति प्रत्यक्षालम्बनमाचक्ष्महे, किं तु स्वाश्रयसंयोगादिति, अतो नातिप्रसङ्ग इति समाधत्ते पूर्वपक्षी-*न स्वदेश इति*।। स्वस्याश्रयभूतो यो देशः स स्वदेशस्तेन संयोगविभागावालम्बनं यस्य प्रत्यक्षस्य स स्वदेशसंयोगाविभागलम्बनः, तस्य भावस्तत्त्वम्; तस्मादित्यर्थः। तथाऽपि कथमतिप्रसक्तिनिरासः? तत्राह-*स्थाणोरिति*।। श्येनो देशो यस्य स श्येनदेशः, तस्य भावस्तत्त्वम्, तदभावादिति। श्येनानाश्रयत्वादिति यावत्। स्वाश्रयसंयोग-विभागालम्बनमित्ययुक्तम्, स्थाण्वादिकमनाश्रित्य विहायसि विहरमाणश्येनादौ चलतीति बुद्धिदर्शनादित्याशङ्क्याह-*सर्वस्येति*।। श्येनादेर्गगनाश्रयत्वात्तत्संयोगविभागयोश्चलतीति बुद्धिर्युक्तेत्यर्थः। संयोगविभागग्रहणं तावदाश्रयग्रहणपुरःसरम्। ततश्च संतमसावस्थायामाश्रयाप्रतीतावपि चलतीति प्रतीतेर्न संयोगाद्यालम्बनमिति सिद्धान्तयति-*न बहलेति*।।

संयोगाद्यतिरिक्तां क्रियामाश्रित्य तस्या अनुमेयत्वं मन्वानस्य गुरोर्मतमुत्थापयति-*यस्त्विति*।। स्वदेशसंयोगविभागवतीति शेषः। अनुमानप्रकारं पृच्छति-*कथमिति*।। अथवा किं विशेषतो दृष्टमनुमानम्? उत सामान्यतोदृष्टम्? न तावदाद्यः; प्रत्यक्षायोग्यत्वात् क्रियायाः, न द्वितीयः; तद्व्याप्तलिङ्गादर्शनादिति शङ्कते-*कथमिति*।। सामान्यतोदृष्टं प्रमाणमित्याह-*द्रव्येति*।। ''संयोगविभागावि''त्युक्ते संयोगजसंयोगे विभागे च स्वाश्रयगतसंयोगाद्यतिशयपुरःसरत्वस्य सिद्धत्वात् सिद्धसाधनत्वम्, तद्व्यावृत्त्यर्थम्-''द्रव्ये''ति विशेषणम्। संयोगविभागाजन्यौ संयोगविभागाविति विवक्षितम्। अतिशयपुरःसरावित्युक्ते ईश्वरेच्छापुरःसरत्वेन सिद्धसाधनत्वम्, तदर्थम्-''कादाचित्के''ति। एतावत्युक्ते पूर्वलक्षणातिशयपुरःसरत्वेन सिद्धसाध्यत्वम्, तदर्थम्-''स्वाश्रये'' इति।। न चात्मगतसंयोगविभागयोस्तद्गतादृष्टजन्यतया सिद्धसाध्यत्वमित्यपि शङ्क्यम्; अव्यवहितपूर्वक्षणोत्पन्नस्य कादाचित्कशब्देन विवक्षितत्वादित्यर्थः। व्यवस्थितद्रव्यनिष्ठत्वे सति कादाचिकत्वादिति हेत्वर्थः। ''कादाचित्कत्वादि'' त्युक्ते कारणेन सहोत्पन्नधर्मेषु व्यभिचारः, तदर्थम्-''व्यवस्थिते'' ति। एतावत्युक्ते गगनगतमहत्त्वादौ व्यभिचारः, तद्व्युदासार्थम्-''कादाचित्कत्वादि'' ति। तत्र वक्तव्यम्-किं यावान् स्वाश्रयस्तद्गतातिशयजन्यत्वं साध्यते? उताश्रयमात्रातिशयपुरस्सरत्वम्? तत्राद्ये दूषणमाह-*तस्येति*।। जलप्रवाह आधारो येषां ते जलप्रवाहाधाराः, तेष्वित्यर्थः। साध्याभावमाह-*स्थिरेति*।। तस्यैव व्याख्या-''अचले''ति। नापि द्वितीयः; आश्रयान्तरे तादृगतिशयमन्तरेणापि संयोगादिजन्मवदन्यत्रापि हेत्वन्तराज्जन्मसंभवाद् न क्रियासिद्धिरित्यर्थः। इतोऽपि न क्रियानुमानं साध्वित्याह-*किंच संयोगेति*।। अनुमानस्य किं दूषणमिति? अत्राह-*इत्यनैकान्तिक इति*।। क्रियायामेव व्यभिचार इत्यर्थः। द्वितीयं दूषयति-*अतिशयान्तरेति*।। ततश्चाप्रयोजको हेतुरित्यर्थः। सिद्धसाध्यं चैतदित्याह-*पादाश्रयस्येति*।। प्रयत्नवांश्चात्मा चेति प्रयत्नवदात्मा, तस्य पादेन यः संयोगः, तस्येत्यर्थः। *ननु* व्यधिकरणमेतत्;

अन्यसंयोगस्थान्यसंयोगजनकत्वानुपपत्तेः, इत्याशङ्क्य प्रतिबन्द्योत्तरमाह- *पादाश्रयेति*।। भूसमवायी यः पादसंयोगः स भूसमवायिपादसंयोगः, स्वाश्रयासंबन्धी च भूसमवायिपादसंयोगश्चेति तथोक्तः, तस्यारम्भ इवेत्यर्थः। कर्माश्रयमात्रं संबन्धित्वं च स्वाश्रयासंबन्धिशब्दार्थः। स्वमतमुसंहरति- *तस्मादिति*।।

क्रियायाः प्रत्यक्षत्वमप्यनुपपन्नमिति शङ्कते- *ननु क्षणिकस्येति*।। कर्मणः किं पूर्वापरविभागविकलकलावस्थितिलक्षणं क्षणिकत्वं विवक्षितम्? उताशुतरविनाशित्वम्? नाद्यः, अनङ्गीकृतेरित्यभिसन्धाय द्वितीयेऽविरोधमाह- *शब्देति*।। प्रकृतं निगमयति- *तस्मादिति*।। प्रमाणसद्भावस्तच्छब्दार्थः।।

प्रमाणवस्तुपरतन्त्रतायामेव ब्रह्मज्ञानस्य सम्यग्ज्ञानत्वमित्युक्तम्, तत्र सम्यक्त्वमेव मा भूदिति मन्वानं प्रत्याह- *किंच वेदान्तेति*।। सम्यग्ज्ञानस्यैव मुक्तिसाधनत्वम्, तच्च प्रमाणवस्तुतन्त्रतायां घटते, नान्यथेत्यर्थः। पुनरुक्तिशङ्कां निरस्यति- *दार्ष्टान्तिकमिति*।। लिङादीनां विधौ स्मरणान्न भावनाविधिनिरसनं घटत इति शङ्कते- *ननु ब्रह्मेति*।। श्रुतेः संभाविते़ऽर्थे प्रामाण्यादत्र च संभावनाभावान्न विधिरित्याह- *अत्रेति*।। अध्ययनविध्युपात्तत्वानुपपत्त्या विधिपरत्वमेष्टव्यमित्याह- *नन्वनुष्ठेयेति*।। अन्यथासिद्ध्या दूषयति- *नेत्याहेति*।। अध्ययनविधिविरोधान्न ज्ञानादौ विधिनिरसनं घटत इति शङ्कते- *नन्विति*।। अर्थाभावोऽसिद्ध इत्याह- *नेत्याहेति*।। श्रवणादिस्वरूपप्रदर्शनमत्रानुपयुक्तमित्याशङ्क्य तात्पर्यमाह- *तथा च श्रवणमिति*।। आत्मनः श्रवणादिविषयत्वमात्रेणं कथं स्तुतत्वमिति शङ्कते- *ननु श्रवणेति*।। श्रवणादीनामात्मसाक्षात्कारहेतुत्वात्तैः स्तवनं युक्तमित्याह- *तदाहेति*।।

''कः पुनरि'' त्यत्र किंशब्दसूचितमाक्षेपमाह- *ननु विधेयस्येति*।। स्तुतिः प्रवृत्त्यर्था, सा च विध्यधीनेति सिद्धस्यार्थवादसंबन्धानुपपत्तिशङ्कायां तन्निरसनमन्तरेण आत्मन ईप्सिततत्वप्रतिपादनं कुत्रोपयुक्तमित्याशङ्क्य तात्पर्यमाह- *फलप्रशंसाया इति*।। फले प्रशस्ते तत्साधनं प्रत्यौन्मुख्यं दृश्यते, तथा चात्मनोऽपि फलत्वात् तत्संस्तवे तदवगतिहेतुश्रवणादौ प्रवृतिंसंभवात् सिद्धस्याप्यर्थवादसंबन्धो युक्त इत्यर्थः। श्रवणादेः क्रियारूपत्वात्तत्र विधिरेव युक्त इति शङ्कते- *ननु सम्यग्दर्शनस्येति*।। तस्यार्थवादतेति*।। द्रष्टव्य इति वाक्यार्थवादतेत्यर्थः। कस्तर्हि विवादः? इत्याशङ्क्याह- *श्रवणादय इति*।।

अन्वय-व्यतिरेकसिद्धत्वान्न श्रवणादावपि विधिरित्याशङ्क्यावहननादाविव विधिर्घटत इत्याह- *सम्यग्दर्शनस्येति*।। *दृष्टादृष्टेति*।। दृष्टादृष्टाभ्यामुपकारितयेत्यर्थः। अङ्गीकारेणोत्तरयति- *तदाहेति*।। नच भाष्यविरोधः, अपूर्वविधिनिरसनस्य भाष्यार्थत्वादित्यर्थः। अनुबन्धचतुष्टयमेव प्रथमसूत्रेण सूचितम्, न तु विधिसूत्रं दृश्यत इत्याशङ्क्याह- *मनननिदिध्यासनेति*।। श्रवणविध्यभावे प्रसञ्जकाभावाद्विचारारम्भ एव न संभवेदित्यर्थः। ''द्रष्टव्यः'' इत्यस्य

विधायकत्वनिराकरणेन स्तावकत्वं दर्शयताऽर्हाद्यर्थत्वमर्थादुक्तम्, तथाचापिचेत्येतत्पुनरुक्तमित्याशङ्क्य तात्पर्यमाह- *विधीनामिति*।। "वाचं धेनुमुपासीते" त्यादाविवात्मोपास्तावपि विधिः स्यादिति शङ्कते- *ननु मा भूवन्निति*।। शाब्दी साक्षात्कारलक्षणा वा प्रतिपत्तिर्ज्ञानशब्दार्थः। अन्वय-व्यतिरेकसिद्धत्वान्न तत्र विधिरित्याह- *नेत्याहेति*।। अवहननादाविव विधिः किं न स्यादिति? तत्राह- *सर्वत्रेति*।। सविशेषणवाक्यस्य विशेषणपरत्वान्न विधिपरत्वमित्यर्थः। कस्तर्हि वाक्यार्थ इति? अत्राह- *अहमिति*।। उपासीतेति यदिदमुपासनम्, तदात्मन्येवेत्यर्थः। उक्तोपसंहरणस्य "तस्मादि" त्यत्रोच्यमानत्वादत इत्ययं ग्रन्थो व्यर्थ इत्याशङ्क्यावान्तरप्रमेयस्योपसंहरणान्मैवमित्याह- *अत इति*।। "तस्मान्न प्रतिपत्तिविधिविषयतये" त्यत्र प्रतिपत्तिशब्दस्य प्रमाणमात्रपरत्वादितर-प्रतिपत्तेर्विधेयत्वमित्याशङ्क्य प्रतिपत्तिशब्द्रः साधारण इत्युक्तं टीकाकृतेत्याह- *भाष्यमिति*।। "सत्यं ज्ञानमि" त्यादिवाक्यस्य केवलवस्तुवादिनो दर्शनात् कथं तदभावः? इत्याशङ्क्य वृत्तसंकीर्तनपूर्वकं तात्पर्यमाह- *उक्तमिति*।। स्वरूपग्राहिवेदभागाभावे को हेतुरिति शङ्कते- *कथमिति*।। किं कर्त्रादिरूप आत्मा वेदान्तप्रतिपाद्यः? आहो अशनायाद्यतीतः? इति विकल्पयति- *किमहंप्रत्ययेति*।।

सिद्धे दध्यादावपि प्रवृत्तिर्दृष्टेत्याशङ्क्य, आद्येऽस्मदिष्टसिद्धिरित्याह- *तदेति*।। द्वितीयमुत्थाप्य दूषयति- *अथेत्यादिना*।। प्रतिपाद्यमित्यत्रेतिशब्दो हेत्वर्थः, स च प्रतिपादनं न स्यादित्यनेन संबध्यते। *ननु* तर्ह्युद्दिश्यैव प्रतिपाद्यतामित्याशङ्क्य प्रसिद्धस्योद्देश्यत्वादौपनिषदस्य च प्रमाणान्तराग्राह्यत्वान्नैवमित्याह- *उद्देश्यताऽभावादिति*।। दूषणान्तरमाह- *तस्यापीति*।। क्रियायामेव वेदानां प्रामाण्यमित्यत्राभियुक्तोक्तिं प्रमाणयति- *तथाचेति*।। तद्वाक्यं दर्शयति- *त्रैविद्यवृद्धानामिति*।। वेदवृद्धानामित्यर्थः।।

तत्रेति।। वेदेष्वित्यर्थः। उच्चैरुत्कृष्टफलाय।। *नीचैर्निकृष्टफलाय*।। अग्निहोत्रफला इति। कर्मार्था इत्यर्थः। शीलं वृत्तं चेति शीलवृत्ते, ते फलं यस्य तत्तथोक्तम्। श्रौत-स्मार्तकर्मणी शीलवृत्तशब्देन निर्दिश्येते। औपनिषदस्यानन्यशेषत्वं कथमिति शङ्कायामाह- *अहंप्रत्ययेति*।। *ननु* अहंप्रत्ययविषयो ह्यात्मा, औपनिषदस्याप्यात्मत्वे तथात्वम्, तथाच कर्माङ्गत्वं दुर्वारमिति शङ्कायामाह- *नन्वसाविति*।। अहंप्रत्ययसाक्षित्वान्नात्मनस्तद्गम्यत्वम्, ततश्च च कर्माङ्गत्वमित्याह- *नेत्याहेति*।। प्रमाणान्तरागम्यत्वेऽपि प्रयाजादिवत्कर्माङ्गत्वं स्यादिति शङ्कते- *ननु शास्त्रेति*।। प्रयाजादीनामङ्गत्वप्रतिपादकमन्यत् स्वरूपप्रतिपादकं चान्यत्, न तथाऽत्र प्रमाणभेदोऽस्तीत्याह- *अत आहेति*।। "स्वर्गकामो यजेते" त्यादिवाक्यं यथा विध्यधिकार्यादिकं प्रतिपादयति तथैतदपि स्यादित्याह- *अधिकारिणमिति*।। स्वामिनं कर्तारं चेत्येतौ प्रमाणान्तरसिद्धावनूद्येत्यन्वयः। *विधिमात्रेति*।। इष्टसाधनत्वमात्रेत्यर्थः। व्यतिरेकमुखेनोक्तेऽर्थे हेतुमाह- *अन्यथेति*।।

भूतार्थनिष्ठवाक्यस्य प्रमाणान्तरगोचरत्वं दृष्टम्, ब्रह्मणश्च प्रमाणान्तरागोचरत्वान्न वाक्यप्रमेयत्वमिति शङ्कते- *ननु चेतन इति*।। गृहीतसङ्गतिकस्योपनिषत्पदसंदोहश्रवणानन्तरमर्थप्रतिपत्तिदृष्टेमैंवमित्याह- *नेत्याहेति*।। वेदस्य स्वरूपमात्रनिष्ठत्वमभियुक्तवचनविरुद्धमिति यदुक्तम्, तदनुवदति- *ननु सर्व इति*।। प्रत्यक्षवेदवचनविरोधात् स्मृतिवचनस्य कर्मकाण्डमात्रविषयत्वमप्रामाण्यं चेत्याशयेनाह- *अत आहेति*।। वेदान्तानां विधिपरत्वेऽप्यात्मन औपनिषदत्वविशेषणं न घटते; संज्ञापरत्वेनापि तदुपपत्तेरित्यत्राह- *तद्धितेति*।। वेदस्य ब्रह्मपरत्वे वाक्यान्तरमुदाहरति- *तथेति*।। कर्मकाण्डस्यान्तःकरणशुद्धिद्वारा ज्ञानजननाद् ब्रह्मणि तात्पर्यस्य विवक्षितत्वमित्यर्थः। *अत एवेत्यादिटीकाया अयमर्थः*-अत एवानन्यविषयत्वादौपनिषदत्वं विशेषणम्। ततः किमिति? अत आह- *तच्चेति*।। वेदान्तानां विधिपरत्व औपनिषदत्वनिर्देशो न स्यात्। न च-औपनिषदस्यानूद्यमानत्वाद् विशेषणोपपत्तिरिति-शङ्क्यम्; मानान्तरागोचरत्वेनानूद्यमानत्वानुपपत्तेरित्यर्थः। ब्रह्मज्ञानस्याङ्गुल्यग्रादिवाक्योत्थज्ञानोपमत्वान्नादेयत्वमिति शङ्कते- *ननु पदेति*।।

ब्रह्मणि विचारशस्त्रप्रवृत्तौ प्रत्यक्षादीनामात्मासविषयत्वम्, वेदान्तानां च तत्त्वविषयत्वमिति व्यवस्था घटते, सैवानुपपन्नेति शङ्कते- *ननूद्देश्येति*।। प्रसिद्धस्योद्देश्यत्वादस्य च तद्वैपरीत्यान्नोद्देश्यत्वमित्यर्थः। *उपादेयमिति*।। अनधिगतमित्यर्थः। अहंप्रत्यये प्रतीचो भासमानत्वाद् ब्रह्मणश्च तद्रूपत्वात्प्रतिपादनमुचितमित्याभिप्रायेणाह- *अत आहेति*।। टीकायां चशब्दः शङ्काव्यावृत्त्यर्थ इति द्रष्टव्यम्। इत इति शब्दः प्रयोगादित्यनेनानुषज्यते।। प्रत्यगुद्देशेन शास्त्रप्रवृत्तावाश्रीयमाणायां वाक्यस्य सन्निष्ठत्वं स्यात्, प्रतीचोऽवस्तुत्वादिति शङ्कते- *नन्वहंप्रत्ययेति*।। किं निराकर्ता कश्चिदस्ति? उत न? अन्त्ये निराकरणासिद्धिः, आद्ये मदिष्टसिद्धिः, निराकर्तुरेवात्मत्वादित्याशयवानाह- *नेत्याहेति*।।

* नच तस्येति टीकाया अयमर्थः- आत्मनः प्रलयात्प्रागवस्थानेऽपि प्रलये लयमाशङ्क्याह- * न च तस्येति*।। तदाऽपि किं तन्नाशः सहेतुकः? उत निर्हेतुकः? नाद्य इत्याह-अभावेति।। न तावत्समवायिकारणनाशान्नाशः; तदभावात्, नाप्यसमवायिकारणनाशात्; अवयवसंयोगो हि द्रव्यासमवायिकारणम्, नचास्यारम्भका अवयवाः सन्ति, येन तत्संयोगनाशान्नाशः स्यात्, न च नाशकान्तरम्; मानाभावादित्यर्थः। द्वितीयं दूषयति- *न चेति*।। *पुरुषावधिरिति*।। पुरुषपर्यन्त इत्यर्थः तस्मिन्नर्थे श्रुतिमुदाहरति-* सा काष्ठेति*।। अवधिरित्यर्थः। सकलालौकिकानन्दानां तन्मात्रत्वादात्मस्वरूपमेवसंभजनीयमित्याह- *सा परेति*।। परमप्रकृतमुपसंहरति *तदेवमिति*।। *ननु* अधीतिविध्युपात्तस्याक्षरमात्रस्यापि नैरर्थक्यानुपपत्तेः कथमानर्थक्यमुक्तम्-''नन्वाम्नायस्ये'' त्यादिना? इत्याशङ्क्य तात्पर्यमाह- *ननु सूत्रेति*।। अक्रियार्थत्व आनर्थक्यापाताद् वेदस्य क्रियार्थत्वमिति शङ्कार्थः। पौरुषेयवचनानुरोधेन कथं वेदार्थो व्यवस्थापनीयः? शब्दार्थसंबन्धस्य शक्तिलक्षणतया

यावच्छब्दभावित्वादिति शङ्कते- *ननु पौरुषेयेति*।। शक्तेर्यावच्छब्दभावित्वेऽपि तद्धानस्य वृद्धव्यवहाराधीनत्वात्तदनुरोधेन वेदार्थस्य व्यवस्थावचनमुचितमित्याह- *उच्यत इति*।। अक्रियार्थानामानर्थक्याभिधानमनुभवविरुद्धमिति शङ्कते- *ननु शब्देति* किं प्रतीतिमात्रस्यानुपपत्त्याऽर्थवत्त्वम्? उत तद्विशेषस्य? नाद्य इत्याह- *नेत्याहेति*।। द्वितीयमुत्थापयति- *नन्वज्ञातेति*।। ''आदित्यो यूपः'' इत्यादिवाक्योत्थज्ञानवदप्रामाण्यं स्यादित्याह- *तत्राहेति*।। प्रमाणान्तराभावेऽपि भूतवाक्यस्य तत्र प्रामाण्यं किं न स्यादिति? तत्राह- *शब्देति*।। भूतवाक्यस्य न स्वार्थे प्रामाण्यं सिध्येत्; शक्त्यग्रहात्, तथाभूतवाक्यप्रामाण्यस्य संवादाधीनत्वदृष्टेस्तदभावादप्रमाण्यं चेत्यर्थः। सामर्थ्याभावोऽसिद्ध इति शङ्कते- *ननु भूत इति*।। न च संवादकाभावाद् वेदवचसोऽप्रामाण्यम्; पौरुषेयत्वे तदपेक्षणादित्यर्थः। ऐकग्रन्थ्यशङ्कां निरस्यति- *परिहरतीति*।। शक्तिग्रहणमप्रयोजकमिति शङ्कते- *ननु धूमस्येति*।। पर्वतनिष्ठोऽग्निर्विशेषशब्दार्थः। पक्षधर्मताबलाद्विशेषसिद्धेरङ्गीकरणान्नागृहीतसंगतिकस्य लिङ्गस्य बोधकत्वम्; इतरथाऽतिप्रसक्तिरित्यभिप्रायेणाह- *नेत्याहेति।। कार्यवत् सिद्धेऽपि संगतिग्रहणमविशिष्टमिति शङ्कते- *तर्हि भूत इति*।। संबन्धग्रहणस्य संबन्धिग्रहणाधीनत्वात् तस्य च परवर्तिनोऽप्रत्यक्षत्वान्मैवमित्याह- * नेत्याहेति*।। *ज्ञानकार्योन्नेयमिति*।। ज्ञानलक्षणकार्योन्नेयमित्यर्थः। *ननु* यथाऽनुमिते प्रत्यये संगतिग्रहणं त्वन्मते, तद्वन्ममापीति शङ्कते- *ननु भूत इति*।। प्रवृत्तेरेवाभावान्न तथाऽनुमानमित्याह- *नेत्याहेति*।।

सिद्धे दध्यादावपि प्रवृत्तिर्दृष्टेत्याशङ्क्य, तस्य क्रियोपरक्ताकारेण प्रवृत्तिविषयत्वम्, न स्वरूपेणेत्याह- *साध्य इति*।। उपक्रमादिपर्यालोचनया सूत्र-भाष्ययोः कार्यपरतावगतेः कथं तदभिप्रायेऽनधिगतिरित्याशङ्क्याह- *उच्यत इति*।। परिहारप्रकारं पृच्छति- *कथमिति*।। सूत्र-भाष्यकाराभिप्रायाधिगतेर्वार्तिकाधीनत्वाद् वार्तिकं च सिद्धसाध्ययोरविशिष्टमिति दर्शयितुमभिहितान्वयं वार्तिककारपरिगृहीतमाह- *लौकिकेति*।। अभिहितान्वयस्वरूपमाह- *पदेभ्य इति*।। संसृष्टस्वार्थे पदसामर्थ्याधिगतेः पदार्थानां कथं संसर्गबोधकत्वम्? इत्याह- *तत्र श्रोतुरिति*।। संसर्गज्ञानमन्तरेण प्रवृत्त्यसंभवात् प्रथमं संसर्गज्ञानं कल्पयति, तस्य च कारणान्तरानिरूपणात् शब्दकारणकत्वं कल्पयति, शब्दस्य च तत्र सामर्थ्याभावे तद्धानजननायोगात् सामर्थ्यं पश्चान्निश्चिनोतीत्यर्थः। तथाऽपि कथं पदार्थानां संसर्गबोधकत्वसिद्धिः? तत्राह- *तत्र गामिति*।। बन्धनेऽपि गोमात्रस्यान्वयाद् गोशब्दस्य तत्र संबन्धं प्रतिपद्यत इत्यर्थः। पदार्थवत्पदानामप्यन्वयव्यतिरेकवत्त्वात्संसर्गबोधकत्वमित्याशङ्क्य, तयोरन्यथासिद्धिमाह- *शब्दावगतेति*।। नच-प्रत्यक्षावगतघटादीनां संसर्गबोधकत्वमदृष्टमित्यपि-शङ्क्यम्; शब्दावगतपदार्थानां संसर्गबोधकत्वनियमादित्यभिसन्धिः।।

ततः किमिति? अत्राह- *तत्र यदीति*।। निपातानामनेकार्थस्मरणाद्यदीतिपदं किमर्थं द्रष्टव्यम्।। अप्रतीतिपक्षस्यानुभवविरुद्धत्वात्प्रतीतिपक्ष आदेय इत्याह- *अथेति*।। अथशब्दस्य प्रकृतादर्थादर्थान्तरार्थतया प्रसिद्धत्वात्प्रतीतिपक्षपरिग्रहार्थत्वमथशब्दार्थः। तर्हि निरालम्बत्वमानर्थक्य-मित्येतद्गतमित्याह- *नालम्बनाभाव इति*।। द्वितीयमनुवदति- *अथाक्रियार्थानामिति*।। क्रियायाः स्वरूपेण प्रयोजकत्वात्तद्विधुरवाक्येषु फलविधुरत्वं विवक्ष्यते? आहो क्रियायाः फलसाधनत्वात्? इति विकल्प्याद्यं दूषयति- *न क्रियाया इति*।।

द्वितीयमुत्थापयति- *अथ क्रियेति*।। किं केषाञ्चित् क्रियाद्वारं प्रयोजनम्? उत सर्वेषाम्? तत्राद्यमङ्गीकरोति- *सत्यमिति*।। *तदर्थक्रियानुपयोग्यर्थवाचिनामिति*।। पुरुषार्थसाधनभूता या क्रिया तदनुपयोगिनो येऽर्थास्तद्वाचिनामित्यर्थः। द्वितीयमनुवदति- *ननु सर्वमिति*।। साक्षात्कारमात्रात्फलसिद्धेः श्रुति-स्मृति-न्यायानुभवसिद्धत्वाद् न क्रिया समाश्रयणीयेत्याह- *नेत्याहेति*।। वार्तिककारीयप्रस्थानपर्यालोचनया भूतेऽप्यर्थे पदानां सामर्थ्यं सिद्धमिति मूलग्रन्थापेक्षितमुपसंहरणं दर्शयति- *अत इति*।।

कार्यविशेषसंसर्गव्यभिचारेऽपि कार्यमात्रसंसर्गस्याव्यभिचारात्तत्रैव पदानां सामर्थ्यमिति शङ्कते- *अत्र प्राभाकर इति*।। यद्यपि प्रवर्तकाद्वाक्यात्पदानां भूतार्थे सामर्थ्याधिगतिः; तथाऽपि कार्यसंसृष्टे तदेष्टव्यमिति टीकायोजना। कार्यसंसृष्टे भूते पदसामर्थ्याधिगतावपि शुद्धभूतार्थप्रतिपत्तिः पदेभ्यः किं न स्यादिति शङ्कते- *ननु भूतार्थ इति*।। भूतानां संसर्गो भूतसंसर्ग इत्यर्थः। कार्यसंसृष्टे सामर्थ्यं चैतदनुरोधेन। तस्यैव प्रतिपत्तिर्युक्ता न शुद्धस्येत्याह- *नेत्याहेति*।। अज्ञातस्य भूतार्थस्यावगतिसंभवो नेत्युक्तं टीकायाम्, तदङ्गीक्रियत इत्याशङ्क्याह- *भूतार्थेति*।। सङ्गतिग्रहणसमये शुद्धसिद्धस्य शक्तिविषयतया प्रतिपन्नत्वान्न तद्ग्रहणमित्यर्थः। 'प्रसूतस्ते सुतः' इत्यादौ शुद्धसिद्धे सामर्थ्यग्रहणात् तत्प्रतिपत्तिर्युक्तेति शङ्कते- *ननु संसृष्टेति*।। तत्राप्यध्याहारादिना कार्यस्यैव प्रतिपत्तिरित्यभिप्रायेण परिहरति- *नेत्याहेति*।। क्रियाया वाक्यार्थत्वानङ्गीकरणात् क्रियार्थतेत्युक्तमयुक्तमित्याशङ्क्य, क्रियत इति व्युत्पत्त्या नियोगोऽभिधीयत इत्याह- *नियोगेति*।। योग्येतरान्वितस्वार्थस्योभयत्र संमतत्वात् तस्यैव प्रयोजकत्वमिति शङ्कते- *ननु कार्येति*।। कार्यस्याव्यभिचारात्प्रयोजकान्तराभाव इत्याह- *नेत्याहेति*।। गोपदस्याऽऽकृतिमात्रे तद्विशिष्टे वा सामर्थ्यग्रहणान्नान्यार्थतेति युक्तम्, अत्र तु योग्येतरान्वित एव शक्तिग्रहणात्तत्प्रतिपत्तिरेव युक्ता, ततो दृष्टान्तो विषम इत्याशङ्क्याह- *अयमाशय इति*।। आवापोद्वापाभ्यां पदानामर्थमात्रे सामर्थ्यं परोक्तं निरस्यति- *पुनश्चेति*।। आनयन-तत्संसर्गयोर्व्यभिचाराद् न शक्तिविषयत्वमित्याशङ्क्याह- *आनयनेति*।।

पदानां पदार्थस्मारकत्वेन तदन्वय-व्यतिरेकयोरन्यथासिद्धत्वात्पदार्थानामेव संसर्गबोधकत्व-मित्याशङ्क्याह- *एवं चेति*।। चशब्दः शङ्काव्यावृत्त्यर्थः। शब्दानां संगतिग्रहणसमये यदवगतं संसर्गबुद्धिजनकत्वम्, तस्यैवं सत्यनपवादादिति योजना। अभिहितान्वयवादे दोषान्तरमाह- *मध्ये चेति*।। शब्दव्यापारवाक्यार्थ-प्रतिपत्त्योर्मध्य इत्यर्थः। पदानां पदार्थबोधनशक्तिमत्त्वम्, पदार्थानां च संसर्गप्रमितिजननसामर्थ्यमिति व्यवधाने कल्पनागौरवं दुर्वारं स्यादित्यर्थः। अस्मन्मते तु नायं दोष इत्याह- *पदानामेवेति*।। पूर्वपक्षमुपसंहरति- *तस्मादिति*।।

तदुत्तरत्वेनोत्तरग्रन्थमवतारयति- *तदेतदिति*।। गोपदस्य गोमात्रे सामर्थ्यप्रतिपत्तिः, ततो न दृष्टान्तवैषम्यमित्याशङ्क्य तात्पर्यमाह- *न हि प्रयोगेति*।। कार्यसंसृष्टस्वार्थे गोपदसामर्थ्यग्रहणात् तत्प्रतिपत्तिवद् गुणादिसंसर्गस्यापि प्रतिपत्तेः कथं कार्यसंसृष्ट एव सामर्थ्यग्रहणमित्यर्थः। गुणादिसंसर्गप्रतीतिमेवाभिनयति- *तथाहीति*।। शुक्लामिति गुणः संसर्गः, गामिति द्वितीयाविभक्त्याऽभिहितकर्मकारकेण संसर्गः, धात्वभिहितानयनक्रियया च संसर्गः, ततः कार्यसंसर्ग इत्यर्थः। गुणादिसंसर्गस्य कार्यसंसर्गोत्तरकालत्वात्कार्यसंसर्गस्यैव प्राथम्यमित्याह- *तत्राव्यवहितेति*।। कार्यव्यवधानं विनां गवाकृतेर्गुणादिना संसर्गसिद्धय इत्यर्थः। अन्यान्वितस्वार्थे सामर्थ्यग्रहश्चेत्, तर्हि संसर्गस्यानेकत्वादेकवाक्यार्थो न सेत्स्यतीत्याशङ्क्याह- *क्रमेणेति*।। *यथायोगम्= योग्यताऽनुसारेणेत्यर्थः। यावदन्त्यपदोच्चारणपरिसमाप्तिस्तावत् क्रमेण गुणादिसंसर्गोऽवभासमानो भवतीति संबन्धः। *एकप्रयोजनेति*।। देवदत्तकर्तृक-दण्डकरणकगोकर्मकानयनक्रियाकर्तव्यतालक्षणैकवाक्या-र्थप्रमितिहेतुतयैकवाक्यमित्यर्थः। अव्यभिचारात्कार्यशक्तिविषयत्वमित्युक्तं निरस्यति- *प्रमाणान्तरेति*।। प्रमाणान्तरप्रतिपत्तेः शब्दयोगान्यथाऽनुपपत्त्या मानान्तरग्राह्यत्वस्यान्वयवत् कार्यत्वस्यापि प्रवृत्तिहेतुत्वेनानुगतिर्न शक्तिविषयत्वेन। एतच्च परमतमाश्रित्योक्तमित्यर्थः।।

मानान्तरविषयत्वस्य शब्दादप्रतीयमानशक्तिविषयत्वम्, कार्यस्य च तद्वैपरीत्यमित्याशङ्क्य गौरवप्रसङ्गाद् मैवमित्याशयेनाह- *तस्मादिति*।। विपक्षे दण्डमाह- *अन्यथेति*।। प्रसङ्गमेवाह- *कार्येति*।। शक्तिग्रहणवेलायां यावानर्थः प्रतीयते, तावानेवान्यदापि प्रतीयते? उताधिकोऽपि? नाद्यः; अनुवादकतापातादित्यर्थः। द्वितीयं दूषयति- *न च कार्येणेति*।। कार्यान्वितस्वार्थे सकलपदसामर्थ्यप्रतिपत्तावपि कालान्तरे तद्विशेषसिद्धिरित्येतदयुक्तम्; पदार्थानां कार्येण संसर्गानिरूपणादित्यर्थः। संबन्धाभावोऽसिद्ध इति शङ्कते- *अस्तीति*।। शेषशेषित्वमेव दुर्निरूपमित्याह- *केयमिति*।। किं स्वस्वामिता शेषशेषिता? उताऽङ्गाङ्गिता? अथवा साध्य-साधनता? इति किंशब्दार्थः। आद्यं प्रत्याह- *न तावदिति*।। द्वितीयं दूषयति- *नापीति*।। प्रमाणाभावादित्यर्थः। तृतीयमुत्थापयति- *अथ साध्यतेति*।। शेषता च साधनतेत्यर्थः। किं साक्षात्साधनत्वं विवक्षितम्? उत

परम्परया? आद्ये दूषणमाह- *क्रियैवेति*।। द्वितीयं दूषयति- *अथ परमेति*।। कार्येणाव्यवहितसंबन्धानिरूपणादन्यान्वितस्वार्थे पदानां सामर्थ्यं वक्तव्यम्, तत्र च केषाञ्चित्संसर्गः केषाञ्चित्परम्परयेत्याह- *तस्मादिति*।।

इतोऽपि न कार्यान्वितस्य सकलशब्दशक्तिविषयत्वम्। तथाहि- किं सर्वेषां पदानां कार्यान्वितस्वार्थे सामर्थ्यम्? उत कार्यपदव्यतिरिक्तानाम्? नाद्य इत्याह- *किंच कार्यस्येति*।। कार्यपदस्य न कार्यान्वितस्वार्थे सामर्थ्यम्; कार्यान्तराभावादित्यर्थः। तस्माद् द्वितीयपक्षः परिशिष्यत इत्याह- *अन्यान्वय इति*।। तथा च प्रयोजकद्वैरूप्यमित्यर्थः। धात्वर्थस्य कार्यत्वात् कार्यपदस्यापि तदन्वितस्वार्थाभिधायित्वमिति न प्रयोजकभेद इति शङ्कते- *धात्वर्थेति*।। धात्वर्थस्य कार्यत्वमसिद्धमित्याह- *न नियोगेति*।। यागविषयनियोगे लिङादिना प्रतिपन्ने तस्य साक्षात्कृतिसाध्यत्वानुपपत्तेस्तन्निर्वाहकत्वेन यागः कृतिसाध्यतां भजते, ततश्च नियोगान्वयादर्वाग्यागस्य न कार्यत्वम्। न च-तन्नियोगान्वयोत्तरकालीनत्वमित्यपि-शङ्क्यम्; परस्पराश्रयादित्यर्थः। धात्वर्थान्वयमन्तरेण नियोगप्रतीत्यनुपपत्तेः कथं नियोगाधीनत्वं तस्य? इत्याशङ्क्याह- *नियोगस्य त्विति*।। यागमात्रे प्रतिपन्ने तद्विषयनियोगस्यापि प्रथा युक्तेत्यर्थः।।

"प्रमाणान्तरग्राह्यत्ववदि"त्यत्र प्रमाणान्तरग्राह्यमिव न कार्यमपि शक्तिविषय इत्युक्तम्, तत्र दृष्टान्तदार्ष्टान्तिकौ स्पष्टयति- *किंचेति*।। अनन्यथासिद्धत्वस्य साधकत्वम्, अत्र च तथात्वाभावान्नैवमिति शङ्कते- *प्रयोगेति*।। प्रमाणेनार्थमुपलभ्य तत्र शब्दप्रयोगदर्शनादन्यथासिद्धिरित्यर्थः। तुल्यमुत्तरमित्याह- *कार्यत्वस्यापीति*।। प्रवृत्तिलक्षणं लिङ्गं प्रवृत्तिलिङ्गम्, तस्य हेतुः प्रवृत्तिलिङ्गहेतुः, तस्य भावस्तत्ता, तयेत्यर्थः। इतोऽपि न नियोगाधीनः संसर्गबोध इत्याह- *किं च भूतसंसर्ग इति*।। विषयसप्तमी। प्रतीतिमात्रेणार्थासिद्ध्याशङ्कायामाह- *तत्रेति*।। "व्यवस्थाप्यतामि" त्यत्र निरूपणीयमित्यनुषङ्गः। भूतसंसर्गप्रतीतेर्भ्रान्तित्वमित्येतदयुक्तमित्याह- *अबाधितेति*।। अध्याहारप्रमाणान्तरकल्पनयोरयोग इत्याह- *कल्पनालाघवादिति*।। इतोऽपि न कार्यस्य प्रयोजकत्वमित्याह- *अगृहीतेति*।। "देवदत्तो भुक्त्वा निर्गतः" इत्यत्र शब्दशक्तिविषयत्वेन कार्यमेव प्रतिपन्नमित्यर्थः। यत्रापि तत्प्रतिपत्तिः, तत्रापि तस्य न प्रयोजकता; विप्रतिपत्तेरित्याह- *विप्रतिपन्नेति*।। *निरूपणीयमेतदिति*।। कार्यान्वितसामर्थ्यं निरूपणीयमित्यर्थः।। इतोऽपि कार्यान्विते शक्तिरित्याह- *किं चेति*।। 'आखण्डलः पुरुहूतः पृतनाषाडि'त्येवमादौ प्रसिद्धेन्द्रादिपदसमभिव्याहारानुपपत्त्याऽप्यपूर्वोऽप्याखण्डलादिपदार्थोऽधिगम्यते, तथा रघोरपत्यं राघव इति व्याकरणाद् निश्चीयते, तथा पित्राद्युपदेशाच्च गवादिशब्दार्थ इत्यर्थः। भूतार्थसंसर्गस्य क्वचित् कार्याविनाभावादितरत्रापि तत्कल्पनाद् न तस्य व्यभिचार इति शङ्कते- *क्वचित् कार्येति*।। वैपरीत्यं किं न स्यादित्याह- *नान्यत्रेति*।। "देवदत्तो भुक्त्वा निर्गतः" इत्यादौ पदार्थसंसर्गमात्रस्योपलब्धत्वाद् "गामानये" त्यत्रापि पदार्थान्तरसंसर्गमात्रस्य प्रयोजकत्वमित्यर्थः। किमत्र

विनिगमनमित्याशङ्क्याह-*अदृष्टप्रयोजकेति*।। ''देवदत्तो निर्गतः'' इत्यादावन्यत्र प्रमाणतोऽदृष्टस्योपसंहरणाद्गरं गामानयेत्यत्र दृष्टस्यान्यान्वितस्वार्थलक्षणस्य प्रयोजकस्योररीकरणमुचितमित्यर्थः। स्वमतमुपसंहरति-*तस्मादिति*।। कार्यसंसर्गस्य प्रयोजकत्वकल्पकाभावस्तच्छब्दार्थः।। अन्यान्वितस्वार्थे पदसामर्थ्यमुक्तमसहमानोऽभिहितान्वयवादी प्रत्यवतिष्ठते-*ननु गोपदस्यापीति*।। पदाभ्यामनेकसंसर्गप्रतिपत्तेर्न वाक्यश्रवणान्नियतप्रवृत्तिरित्यर्थः। पदस्मारितपदार्थमात्रसंसर्गस्य वाक्यप्रतिपाद्यत्वाद् नोक्तदोषानुषङ्ग इत्याह-*नैष इति*।। एकैकपदस्याप्यन्वितार्थबोधनसमर्थत्वात्सर्वोऽपि संसर्गो भासेतेति, तत्राह-*नह्येकैकेति*।। शक्तस्यापि सहकारिपदान्तरापेक्षया कार्यकरत्वं दृष्टम्, तथा च पदस्यापि सहकारिपदान्तरापेक्षया कार्यकरणम्, नान्यथेत्यर्थः। योग्येतरान्वितस्वार्थे पदानां सामर्थ्ये पर्यायत्वेन सह प्रयोगानुपपत्तेरर्थमात्रे सामर्थ्यमिति शङ्कते-*नन्वेवमिति*।। पर्यायत्वमेवाह-*तथा हीति*।। सर्वेषां पदानां संभूय संसर्गबोधजनकत्वाभ्युपगमान्न पर्यायत्वमित्याह-*नैतत्सारमिति*।। *एकस्मात्पदादिति*।। सहकारिपदान्तरनिरपेक्षादित्यर्थः।। गोपदेनानयनसंसृष्टे स्वार्थेऽभिहित आनयतिपदं गोसंसृष्टस्वार्थं ब्रूयाच्चेत्, तर्हि पर्यायत्वम्, न चैवमिति; युगपदुभयोरेकसंसर्गबोधकत्वात्, इति समाध्यन्तराभिधित्सया निरस्तमपि चोद्यं पुनरुत्थापयति-*ननु गोपदेति*।। सामर्थ्यविशेषात् सर्वोऽपि संसर्गः किं न भातीत्यर्थः। वैषम्येणोत्तरयति-*अन्वयव्यभिचारादिति*।। गामानय, गां चारय, इत्यादिप्रयोगेषु गोपदस्य गोत्वाव्यभिचारितया तदनुभवजनितसंस्कारभूयस्त्वाद्गोपदोच्चारणे गोत्वस्मरणम्, नेतरेषामित्यभिसन्धिः। विधान्तरेणान्विताभिधानमाक्षिपति-*नन्विति*।। किं पदानि पदान्तराभिहितेतरसंसृष्टं स्वार्थं प्रतिपादयन्ति? उतानभिहितेतरसंसृष्टस्वार्थम्? इति विकल्प्याद्यमनूद्य दूषयति-*अभिहितेनेति*।। इतरेतराश्रयत्वं स्पष्टयति-*गोत्व इति*।। द्वितीये विशेषणभूतार्थान्तराप्रतीतौ तद्विशिष्टप्रतीत्यनुदय इत्यर्थः। आद्यं पक्षमादाय समाधते-*नैष दोष इति*।। तर्हीतरेतराश्रयप्रसङ्ग इति यत्तूक्तम्, तत्राह-*क्रमेणेति*।। तत्र हेतुमाह-*अव्यभिचारिण इति*।। पदानां पदार्थमात्रबोधकत्वे संसर्गबोध आकस्मिकः स्यादित्याशङ्क्याह-*अन्त्यपदेति*।। एकैकपदोपलम्भजनितसंस्काराः संभूय सकलपदविषयामेकां स्मृतिं जनयन्ति, तस्यां च स्मृतावुपारूढानि पदान्यभिहितपदार्थं संसर्गबोधं जनयन्तीत्यविरोध इत्यर्थः।।

''यश्चोभयोः समो दोषः परिहारोऽपि वा समः। नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे।।'' इति न्यायमभिसन्धायाह-*पदार्थेष्विति*।। अभिहितान्वयवादिनेदमभिधानीयम्-किमत्रानभिहितानां संसर्ग-बोधकत्वम्? उताभिहितानाम्? नाद्यः; सदा प्रसङ्गात्, नापि द्वितीयः; पदार्थबोधस्य क्रमभावित्वादिति चोद्ये, एकैकेन पदेनैकैकपदार्थबोधे जाते सकलपदार्थबोधसंस्कारोत्थस्मृतौ भासमानाः पदार्थाः संसर्गं बोधयन्तीति वक्तव्यम्, ततश्चास्मान् प्रत्येवं न चोदनीयमित्यर्थः। अभिहितान्वयवादे च पदानां

पदार्थप्रतीतिजनकत्वसाम्याद् मतसाङ्कर्यमित्याशङ्क्याह- *पदानामिति*।। पदाभिहितपदार्थानामेव संसर्गबोधकत्वमित्यभिहितान्वयवादी मन्यते, पदान्येव पदार्थस्मृत्युत्पादनद्वारा संसर्गबोधकानीत्यन्विताभिधानवादी मन्यत इति विभागः। परमप्रकृतमुपसंहरति- *तदेवमिति*।। उपवर्णितेऽर्थे टीकामवतारयति- *तदेतदिति*।। भूतार्थमात्रदर्शनविभ्रमत्वात्, तथा च समन्वयो दृश्यत इत्यनुपपन्नमित्याशङ्क्याङ्गीकारविरोधान्मैवमित्याह- *वेदेऽपीति*।। अङ्गीकारोऽसिद्ध इति शङ्कते- *ननु कर्तव्य इति*।। भूतार्थसंसर्गेऽवगते नैरर्थक्यानुपपत्त्या कर्तव्यपदाध्याहारस्वीकरणात् क्रियान्वयं विनाऽपि संसर्गप्रमितिरङ्गीकृतेत्याह- *तत्राहेति*।। सूत्रस्य पुंमतिप्रभवत्वान्न तद्बलादर्थनिश्चयः, ततश्च यत्तूक्तम्- ''तद्भूतानामि''ति तदनुपपन्नमित्याशङ्क्याह- *ननु सूत्रेति*।। अनादिवृद्धव्यवहारानुरोधेन जैमिनिना सूत्रं प्रणीतम्, न तूत्प्रेक्षामात्रेणेत्यर्थः। सूत्रभावानभिज्ञो भवानित्याह- *तत्राहेति*।। ''यतो दर्शितः समन्वयः'' इत्यत्र केनेति न ज्ञायते, इत्यत्राह- *भाष्यकारेणेति*।। शाबरभाष्यकारेणेत्यर्थः। शुक्लः पटः, खण्डो गौरित्येवं विशेषण-विशेष्यभावेन समन्वयं दर्शितवानित्यर्थः। भाष्यवचनं सूत्रविरुद्धमिति शङ्कते- *ननु क्रियार्थेनेति*।। धर्मविचारस्य प्रक्रान्तत्वात् तदनुसारेण तत्प्रतिपादकवाक्यसमन्वयमेवोचिवान्, न भूतसमन्वयाभावाभिप्रायेणेत्याह- *अत आहेति*।। शारीरकारम्भसमर्थनस्यात्र कोऽवसरः? इत्याशङ्क्य तात्पर्यमाह- *किञ्च जैमिनीयेति*।। वेदान्तानां ब्रह्मणि तात्पर्य निरूपयितुं शारीरकशास्त्रमारब्धं भगवता, तदनुपपन्नं विधिपरत्वे इत्यर्थः।। ''तद्भूतानामि''त्यत्र भूतार्थसमन्वयविवक्षायामपि न पृथगारम्भसिद्धिरिति शङ्कते- *नन्वर्थेति*।। विधिवाक्यार्थनिरूपणाय पूर्वतन्त्रं प्रवृत्तम्, उत्तरं तु ज्ञानकाण्डवाक्यार्थनिरूपणायेत्याह- *तत्र विभागमिति*।। प्रथमाविभक्त्या कर्ता तावत्प्रतीयते, कर्ता च क्रियाविशिष्टः, तथाच ब्रह्मणि क्रियान्वयसिद्धिरिति शङ्कते- *ननु प्रातिपदिकेति*।। *तदर्थेति*।। प्रथमाविभक्त्यर्थाविनाभूता याऽस्तिक्रिया, तत्कर्तृकारकत्वान्वय इत्यर्थः। प्रथमाविभक्तेः प्रातिपदिकार्थमात्रे विधानात् तद्बलात्कर्तृत्वसिद्धिरित्याह *नेत्याहेति*।। तथाऽपि लिङ्ग-संख्यादीनां प्रथमाविभक्तिसामर्थ्यादुपलभ्यमानत्वादद्वैतविरोध इत्याशङ्क्याह- *तत्रेति*।। *अर्थादिति*।। विभक्तिसामर्थ्यादित्यर्थः।। विधान्तरेण वेदान्तानां क्रियानिष्ठत्वं शङ्कते- *ननु क्रियान्तरेति*।। बाह्यक्रियाभावेऽपीत्यर्थः। प्रातिपदिकार्थान्वय उपगढ इत्यर्थः, ''सत्यं ज्ञानमि'' त्योदेर्नास्त्यर्थनिष्ठत्वमपीति शङ्कायामाह- *अस्तिरिति*।। अस्तिशब्दो धातुपरः। *भवन्तीपर इति*।। लट्पर इत्यर्थः। प्राचामाचार्याणां भवन्तीशब्दो लट्संज्ञत्वेन प्रसिद्ध इत्यर्थः। प्रथमपुरुष इति मध्यमोत्तमपुरुषयोरुपलक्षणम्। प्रथमपुरुषकीर्तनं ''शेषे प्रथमः'' इति सूत्रव्याख्यानरूपत्वाद् वार्तिकस्य। अगम्यमान इति च्छेदः। वाक्ये क्रियावाक्ये क्रियान्तराभावे प्रतीयमानेऽपि अस्तिर्लट्परः प्रथमपुरुषादिघटितः कल्प्यत इत्यर्थः। कर्तर्यपि समन्वय इत्याह- *नेत्याहेति*।। अस्तिक्रियाया अव्यभिचारित्वात्सैष्टव्या; अन्यथा समन्वयासिद्धिरिति शङ्कते- *नन्वस्तिक्रियामिति*।। अदर्शनमसिद्धमित्याह- *तत्राहेति*।। साकाङ्क्षत्वव्युदासार्थ

तत्राप्यस्तिक्रिया कल्प्येति शङ्कते-*ननु तत्रेति*।। अन्थाऽपि निराकाङ्क्षत्वसिद्धेर्न तत्कल्पनमित्याह-*नेत्याहेति*।।

दार्ष्टान्तिकमांक्षिपति-*कथं पुनरिति*।। संबन्धाभावान्न संबन्धपर्यवसानमित्यर्थः। कारणमात्रस्य प्रसिद्धस्य सर्वज्ञत्वादिसंबन्धे त्वंपदार्थस्य च तत्पदार्थसंबन्धे पर्यवसानमित्याह-*तदाहेति*।।

निषेधवाक्यस्याक्रियार्थताया अनुक्तत्वात् ''किंचे'' त्येतदयुक्तमित्याशङ्क्य तात्पर्यमाह-*उक्तं तावदिति*।। अत्यन्तभेदराहित्यमव्यतिरिक्तशब्दार्थः। तादात्म्यराहित्यमेकरसपदेनोच्यते। निषेधवाक्यस्य भूतार्थनिष्ठत्वमुक्तम्, तदसंभवीति शङ्कते-*ननु ब्राह्मणेति*।। अहननस्य निवृत्तिरूपत्वात्क्रियार्थत्वमिति द्रष्टव्यम्। टीकापेक्षितं हेतुमाह-*प्राप्तेति*।। अहननस्य क्रियानिवृत्तिरूपत्वान्न क्रियात्वम्; अत एव न क्रियासाधनत्वमपीत्यर्थः। प्रतिषेधवाक्यस्यापि संकल्पविधिपरत्वात् क्रियार्थत्वमस्खलितमित्याह-*ननु नेक्षेतेति*।। दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्याद् मैवमित्याह-*नेत्याहेति*।। उपक्रमानुरोधेन ''नेक्षेते'' त्यस्य विधिपरत्वमुक्तम्, तत् कस्मात्? तदन्य-तदभाव-तद्विरुद्धानां नञः साधारणत्वादित्याशङ्क्याह-*अयमर्थ इति*।। शक्तित्रयकल्पनाप्रसङ्गाद् न नञः साधारणत्वम्, किं त्वभाव एव तस्य मुख्योऽर्थ इत्यर्थः। कथं तर्हि क्रियापरत्वाभिधानं टीकायाम्? तत्राह-*अनुष्ठेयेति*।। निवृत्तिपरत्वे उपक्रमभङ्गात्क्रियापरत्वमित्यर्थः। तर्ह्यत्रापि लक्षणया नञ्पदं संकल्पे वर्तताम्, तत्राह-*तथेति*।। गवादिशब्दानामनेकार्थ-प्रतिपादकत्वदृष्टेर्नञोऽपि तथात्वं स्यादिति शङ्कते-*ननु संसृज्यमानादिति*।। गत्यन्तराभावाद्गवादिशब्दानामनेकार्थत्वं न तथाऽत्रेत्याह-*नेत्याहेति*।। संकल्पविधिपरताया नञो निरस्तत्वाद् न च स्वभावेति ग्रन्थाऽनुपपत्तिरित्याशङ्क्य तद्व्यावर्त्यां शङ्कां दर्शयति-*अत्र प्राभाकर इति*।। आद्यं दूषयति-*तत्रेति*।। धात्वर्थे नञः संबन्ध इति पक्षं निरस्यति-*न च हननेति*।। उपस्थितं हननं न प्रतिषेध्यम्, क्रियायाः क्षणिकत्वेन स्वतो विनाशादित्याह-*तस्येति*।। प्रतिपादयतीति पदमत्रानुषज्यत इति द्रष्टव्यम्। फलं प्रार्थ्यतेऽनेनेति फलप्रार्थना, फलसाधनत्वमित्यर्थः। स्वमतमनुसृत्याह-*कार्यबुद्धेरिति*।। कस्तर्ह्यर्थः? इति वीक्षायामाह-*तत इति*।। शास्त्रसंस्कारमन्तरेण रागादेव प्राप्तो यो हन्त्यर्थः, तदनुरागेणेत्यर्थः। कस्तर्हि प्रत्ययार्थः? इत्याह-*सा चेति*।। इतोऽपि नाभावनिष्ठं वाक्यमित्याह-*न चाभावो नामेति*।। भावस्यैवाभावान्न तस्य नञर्थत्वमिति यत्तूक्तं तत्राह-*न चाभाव इति*।। अभावानुभवविरोधान्न तदपलाप इत्यर्थः। अथाभावस्वरूपं न निराकुर्मः किं तु तस्याभावातिरेकमित्याशङ्क्याह-*न च भावान्तरमिति*।। भवत्वभावस्तथापि कथं वाक्यस्य तन्निष्ठत्वम्? तत्राह-*अभाव एवेति*।। तदन्य-तद्विरोधिनोरपि नञः प्रयोगात्कथमभावस्यैव मुख्यत्वम्? तत्राह-*अर्थान्तरेति*।। वाच्याऽविनाभावस्य लक्षणानिमित्तावगममङ्गीकृत्याह-*अभावेति*।। अभाव एव

नञो मुख्योऽर्थ इत्युक्तम्, तत्र वार्तिकविरोधं शङ्कते- *ननु नामेति*।। नञ्पदं न निषेधकं चेत् किं तर्हि प्रतिपादयतीत्यत आह- *वदतीति*।। अर्थान्तरे नञ्शब्दस्य वृत्तिमुक्तामङ्गीकरोति- *सत्यमिति*।। कथं तर्ह्यभाव एवार्थस्तत्राह- *तत्रापीति*।। *ननु* नञर्थे नियोग इत्यत्र नञा निर्दिष्टसंकल्पक्रियायां नियोगः शङ्कित इति शङ्का स्यात्, न च सा युज्यते पौनरुक्त्यात्, इत्याशङ्क्य तात्पर्यमाह- *आह प्राभाकर इति*।। अभावस्य नियोगविषयत्वमङ्गीकृत्योक्तमिति द्रष्टव्यम्। अभावस्यापि क्रियातत्साधनवन्नियोगनिर्वर्तकत्वात्तद्विषयत्वं युज्यते, ततश्च "वार्तमि" त्येतदेव वार्तमित्याशङ्क्याह- *दूषयतीति*।। दूषणमेव स्पष्टयति- *भावार्थ इति*।। विधिविषयतयेति। नियोगविषयतयेत्यर्थः। *अननुष्ठेयत्वादिति*।। अननुष्ठेयत्वप्रसङ्गादित्यर्थः। यागादिः स्वयं कृत्या साध्यः सन्नियोगकारणतां भजते, न तथाऽभावस्य कृतिसाध्यता, अनादित्वादित्यर्थः।। अर्थस्य विधिनिष्ठत्वमिष्टमेवेत्याशङ्क्याह- *विधिप्रतिषेधेति*।। न तत्र विधिगन्ध इत्यत्र विधिशब्दार्थं दर्शयन् व्याचष्टे- *तस्मादिति*।। नञोऽभावार्थतायाः सिद्धत्वात्तच्च संसृज्यमानमित्यादेर्नैष्फल्यमित्याशङ्क्याह- *प्रकृत्यर्थस्येति*।। भवतु उपसर्जनत्वम्, कथं प्रत्ययार्थेन संबन्धः? तत्राह- *प्रधानेनेति*।। विधिनिमन्त्रणादीनामसंभवे हेतुमाह- *प्रत्यक्षादीति*।। अनुष्ठातृव्यतिरिक्तपुरुषान्तरसंभवे विध्यादिकं दृष्टम्, न च प्रत्यक्षानुमानपूर्वकव्यवहारस्यानुष्ठानव्यतिरिक्तपुरुषान्तरजन्यता, ततो न विध्यादिरित्यर्थः। हननस्याप्रतिपाद्यत्वात् प्रतिपाद्यधर्म इति कथमुक्तम्? तत्राह- *अनुष्ठेयेति*।। प्रत्ययार्थस्य प्रतिषिध्यमानत्वात् कथं प्रतिषिध्यमानक्रियेत्युक्तम्? तत्राह- *प्रतिषिध्यमानेति*।। *ननु* लिङाद्यर्थस्य प्रतिषिध्यमानत्वात् कथं क्रियाया निवर्त्यमानत्वमित्याशङ्क्यार्थान्निवृत्तिरित्याह- *प्रत्ययार्थेति*।। प्रार्थनाया लिङर्थत्वं सिद्धान्तविरुद्धमित्याशङ्क्याह- *प्रार्थ्यत इति*।। अक्षरार्थमभिधाय वाक्यार्थं दर्शयति- *ततश्चेति*।। निषेधप्रकारमभिनयति- *ब्राह्मणहननमिति*।। हननस्येष्टसाधनताया अनुभूयमानत्वात्कथं तन्निषेधः? इति शङ्कते- *ननु प्रत्यक्षमिति*।। इष्टसाधनशब्दार्थाऽनभिज्ञो भवानित्याह- *नादृष्टेति*।। इष्टमिति शब्दो यस्य तदिष्टशब्दम्, तस्य भावस्तत्त्वम्, तस्मादित्यर्थः। इष्टशब्दार्थमभिधाय वाक्यार्थमाह- *इदमदृष्टेति*।। *ननु* सर्वस्यानर्थसंभिन्नत्वाद् हननमनर्थसंभिन्नमपीष्टसाधनमिति तत्प्रतिषेधः साधीयानित्याशङ्क्याह- *सर्वत्रेति*।। भवत्वेवम्, ततः किमित्यत आह- *तत्र पुरुषार्थेति*।। पुरुषार्थाऽपुरुषार्थयोरेवं विभागो यस्मात्तस्मादित्यर्थः। तथापि हननस्याऽनर्थसाधनत्वाप्रतिपत्तेर्न निवृत्तिरित्याशङ्क्याह- *ततश्चेति*।। कुतस्तर्हीष्टसाधनताप्रतिपत्तिनिरोधः? इत्याशयेन शङ्कते*किं तर्हीति*।। निमित्तनिरोधस्याऽनुष्ठेयत्वात्तस्य विधेयत्वं स्यादिति शङ्कते- *स एवेति*।। *अन्वय-व्यतिरेकाभ्यामिति*। निरोधस्यान्वयव्यतिरेकायत्तत्वे न शाब्दत्वमित्युक्तम्, तत्र किंविषयावन्वय-व्यतिरेकौ? इत्याकाङ्क्षायामाह- *हननमिति*।। *हननोद्बोधेति*।। हननसंस्कारोद्बोधनिमित्तरागादिनिरोधस्येत्यर्थः।

इतोऽपि निरोधकर्तव्यता न वाक्यगम्येत्याह- *निमित्तेति*।। अनर्थस्यापि वाक्यगम्यत्वं स्यादिति शङ्कते- *नन्वनिष्टेति*।। अतिप्रसक्तेर्नैतदित्याह- *नेत्याहेति*।। नञर्थे नियोगस्य निरस्तत्वादयं पुनरित्याद्यनुपपन्नमित्याशङ्क्य दूषणान्तराभिधित्सया प्रागुक्तस्याभ्युपगम इत्याह- *अङ्गीकरोतीति*।। अन्वयव्यतिरेकसिद्धेऽप्यवहननादौ यथा विधिस्तथाऽत्रापि स्यात्, तथा च भवतु तथापीत्यदूषणमित्याशङ्क्याह- *दूषयतीति*।। दूषणप्रकारमेवाह- *तथापीति*।। तत्र नियमापूर्वस्यालौकिकस्य संभवाद् विधिर्युज्यते, न तथाऽत्रेत्याशयः।

नियोगाभिधायित्वेन लिङादीनां प्रतिपन्नत्वात्कथमत्र तदप्रतिपत्तिरिति शङ्कते- *ननु प्रत्ययेनेति*।। किं लोके तथा प्रतिपन्नत्वम्? उत वेदे? इति विकल्पयति- *क्वैतदिति*।। आद्यं दूषयति- *न तावदिति*।। द्वितीयमुत्थापयति- *ननु स्वर्गेति*।। तृप्तिकामस्य तदसाधनपर्वतारोहणादावप्रवृत्तिवद्यागस्य स्वर्गासाधनत्वेनात्र प्रवृत्त्यनुपपत्तिरित्यर्थः। भवतु तर्हि यागस्य स्वर्गसाधनत्वमिति चेत्, तत्र वक्तव्यं किं साक्षात्साधनत्वम्? उत व्यवधानेनेति? तत्र नाद्य इत्याह- *तच्चेति*।। *मध्यवर्तीति*।। कर्मस्वर्गमध्यवर्त्तीत्यर्थः। तस्माद् द्वितीयपक्ष आश्रयणीय इत्याह- *इति श्रुतेति*।। *श्रुतार्थापत्त्येति*।। श्रुतस्वर्गसाधानतानुपपत्तेरित्यर्थः। प्रत्ययस्य किं क्रियाकर्तव्यताऽभिधायित्वं लोकेऽवगतम्? उत न? तत्राद्यस्तावदसमञ्जस इत्याह- *सोऽयमिति*।। बकबन्ध इति। बकबन्धसमानन्याय इत्यर्थः। बकग्रहणे क उपाय इति केनचित्पृष्टे खरतरदिनकरसंपर्कात्तन्मस्तकनिहितनवनीतबिन्दुभिर्नयनयोः पूर्णतायां तद्ग्रहणं सुकरमिति कश्चित्तुच्छमतिः प्रतिवक्ति, न च तदुपपद्यते, बकग्रहणमन्तरेण तन्मस्तके नवनीतप्रक्षेपानुपपत्तेः, तस्मिंश्च परिगृहीते तत्प्रक्षेपोऽपि मुधा, तथा च लौकिकव्युत्पत्त्यनुरोधेन क्रियाकर्तव्यतायां प्रत्ययाभिहितायाम् अपूर्वेण संगतेर्ग्रहणोपपादनमसमञ्जसमित्यर्थः। द्वितीयमुत्थापयति- *अथ नाभिहितेति*।। क्रियाकर्तव्यताया अप्रतिपत्तौ तदनुपपत्त्या नापूर्वप्रतिपत्तिरिति न तत्र संगतिसंवित्तिसंभव इत्याह- *न तर्हीति*।। आद्यं पक्षमेवादाय शङ्कते- *ननु यागेति*।। अतिप्रसक्तेर्नैतदित्याह- *तर्हि तदपीति*।। अनन्यलभ्यस्य शब्दार्थत्वं दृष्टम्, शरीरादिसंबन्धस्यान्यथासिद्धत्वान्न प्रत्ययार्थत्वप्रसक्तिरिति शङ्कामुद्भाव्य दूषयति- *अर्थापत्तीति*।। 'यश्चोभयोः समो दोषः' इति न्यायमनुसृत्याह- *अपूर्व इति*।। कस्तर्हि प्रत्ययार्थः? इत्यत्राह- *तस्मादिति*।।

ब्रह्मावगतौ सत्यामपि संसारस्यानुभूयमानत्वाद् नावगतब्रह्मात्मभावस्येत्ययुक्तम्, तादृग्ज्ञानस्य च विध्यायत्तत्वात्तन्निरसनमप्ययुक्तमित्याशङ्क्याह- *प्रथमेति*।। अधीतवेदस्य गृहीतसंगतिकस्य श्रवणमात्रादेव प्राथमिकज्ञानोत्पत्तिसंभवान्न तदर्थं विधिरेष्टव्य इत्यर्थः। नापि संताने विधिरित्याह- *तत्संतान इति*।। ज्ञानस्याज्ञाननिवर्तकनियमात्तदकार्यशरीराद्यनिवर्तकत्वम्, ततश्च ज्ञानवैयर्थ्यमिति शङ्कते- *ननु

कर्मेति*।। शरीरसंबन्धमन्तरेण कर्मसंबन्धस्यानुपपत्तेर्न तन्निमित्तः शरीरसंबन्ध इत्याह- *अत आहेति*।। तर्हि शरीरसंबन्धपुरःसर एव कर्मसबन्धोऽस्त्विति शङ्कायामुक्तमितरेतरेति। कर्मसंबन्धसिद्धौ तन्निमित्तः शरीरसंबन्धः सिद्ध्येत्, तस्मिंश्च सिद्धे तत्सिद्धिरिति इतरेतराश्रयत्वमित्यर्थः। कौटस्थ्यविरोधादपि न परमार्थतः कर्मादिसंबन्ध इत्याह- *क्रियेति*।।

ननु प्राक्तनकर्मापेक्षया इदानीन्तनः शरीरसंबन्धः, तच्च ततः प्राक्तनशरीरसंबन्धात्, स च प्राक्तनदेहसंबन्धोत्थकर्मणेति कथमितरेतराश्रयत्वमित्याशङ्क्योक्तमनादित्वेऽपीति। प्रमाणविधुरत्वान्नेयं परम्परा शोभत इत्यर्थः। कर्मनिमित्तत्वमङ्गीकृत्य दूषणमाह- *तन्निमित्तत्वेति*।। *गौणत्वेति*।। गौणत्वप्रसङ्गो नानिष्ट इत्याह- *प्रसिद्धेति*।। ज्ञानभेदयोरभेदावभासस्य गौणत्वव्यापकत्वादत्र व्यापकाभावान्न गौणत्वमित्यर्थः। इतोऽपि न गौणत्वमित्याह- *पुत्रादीति*।। तथा चेत्यत्र संसारसंबन्धाभावे प्रमाणान्तरमुच्यते इति चशब्दप्रयोगाद्भाति, न च पूर्वं किंचित्प्रमाणमुपन्यस्तमित्याशङ्क्याह- *उक्तमिति*।। अद्वैतदर्शिनो द्वैतदर्शनं विरुद्धमित्याशङ्क्य, प्रमाप्रतिपन्ने नानाश्वास इत्याह- *ते हीति*।।

हेत्वभावे फलाभावप्रसिद्धेः कथमेतदिति शङ्कते- *नन्वपरोक्षेति*।। अज्ञानविनिवृत्तावप्यारब्धकर्मलेशवशाद् द्वैतदर्शनं युज्यत इत्याह- *तत्राहेति*।। 'क्षीयन्ते चास्य कर्माणी'ति शास्त्राद ज्ञानोत्तरकालं कर्माभावप्रतिपत्तेः कथं तदनुसारित्वं द्वैतदर्शनस्येति शङ्कते- *ननु कर्मणामिति*।। ''तस्य तावदेव चिरमि'' त्यत्र ज्ञानिनोऽपि विदेहकैवल्यप्राप्तौ विलम्बप्रतिपत्तेः कर्मस्थितिः, अन्यथा तदप्रामाण्यप्रसङ्गादित्याशयेनाह- *नैष इति*।। प्रत्यक्षश्रुति तदर्थापत्त्योः श्रुतेः प्राबल्यान्न कर्मावस्थानप्रतिपत्तिरिति शङ्कते- *ननु सर्वेति*।। अर्थापत्तिबाध्यत्वपक्षे श्रुतेरेव बाधान्न सा बाध्येत्याह- *अर्थापत्तीति*।। विरुद्धार्थयोः श्रुत्योः प्रामाण्यानुपपत्तेः श्रुतिबाध इष्ट इत्याशङ्क्योभयोः प्रामाण्यसंभवेऽन्यतरस्याप्रामाण्यकल्पनमसाध्वित्याह- *तस्मादिति*।। अनारब्धकर्मवदारब्धकर्मणामप्यविद्याकार्यात्वात्तन्निवृत्तौ निवृत्तिरेवेति शङ्कते- *ननु अपरोक्षेति*।। अविद्यायाः कात्स्न्येन निवृत्तिरयुक्तेत्याह- *उच्यत इति*।। संतमसबहुलालोकयोः साहित्यानुपपत्तिवदनयोरपि साहित्यस्यानुपपत्तिस्तुल्येति शङ्कते- *ननु ब्रह्मेति*।। साहित्यानुपपत्तिरिष्टा वेत्याह- *उच्यत इति*।। तर्हि जीवन्मुक्त्यभावः प्राप्त इत्याशङ्क्याह- *कदाचिदिति*।। *असंप्रज्ञातेति*।। प्रत्यक्षादिप्रमाणैरनधिगतं निर्विशेषं ब्रह्म, तस्य प्रतीचश्चैकत्वसाक्षात्करणमित्यर्थः।। प्रयाणावस्थायामेव तत्त्वसाक्षात्कारसंभवान्न जीवन्मुक्त्याशेति शङ्कते- *ननु नास्तीति*।। अनेकश्रुतिस्मृतिविरोधादेतन्मतमुपेक्ष्यमित्याह- *नारब्धेति*।। दर्शनसंभवेऽपि कथमपरोक्षदर्शनमित्याशङ्क्याह- *न चेति*।। तथाऽपि कथं सशरीरस्य तत्सिद्धिरिति?

अत्राह- *प्रारब्धेति*।। अतिप्रसङ्गान्न विदुषि द्वैतदर्शनं युज्यत इत्याह- *नन्विति*।। विहितकर्मानुष्ठानस्य नियतदेशादिसापेक्षत्वादस्मिंश्च तदनुपपत्तेर्नैतदित्याह- *न नियतेति*।। अधिकरोतीत्यधिकार: स्वामी। तत: किमिति? अत आह- *तत्त्वदर्शिन इति*।। फलाभावादनपेतस्य कर्मानुष्ठानमित्याह- *पुन: पुनरिति*।। विहितकर्माकरणनियतप्रत्यवायपरिहारार्थं तदनुष्ठानमित्याशङ्क्याह- *प्रत्यवायस्येति*।। यथेष्टचेष्टा-निवृत्त्यर्थस्तस्य शास्त्रीयो नियम एष्टव्य इत्याशङ्कते- *नन्विति*।। चेष्टा तावद्रागाधीने प्रसिद्धा, सकलानन्दैकनीडं ब्रह्माऽऽत्मत्वेनानुभवत: कथं क्षुद्राभिलाषोद्भव:? इत्याह- *न हितेति*।। तर्हि अशनायादिप्रवृत्त्यसंभवात्सद्य: शरीरपात: स्यादित्याह- *कथमिति*।। अन्यथासिद्ध्योत्तरमाह- *आरब्धेति*।। न चैवं कर्मान्तरं देहान्तरारम्भकं स्यादित्यपि वाच्यमित्याह- *न चेति*।। न चारब्धफलकर्माण्येव तद्धेतूनीत्यपि वाच्यमित्याह- *आरब्धेति*।।

श्रवणोत्तरकालं मननादिविधानानुपपत्त्या विदुषोऽपि साध्यान्तरमस्तीत्युक्तमनुवदति- *ननु श्रवणेति*।। तयो: साक्षात्कारार्थत्वान्न तदुत्तरकालं साध्यान्तरसंभव इत्याह- *नेत्याहेति*।। साक्षात्कारस्य शब्दकरणत्वात् कथं तत्फलत्वम्? इत्याशङ्क्यासंभावनादिप्रतिबन्धनिरासद्वारा तयोरुपयोग इति समर्थितमित्याह- *उक्तमिति*।। ''एवं चे''त्यत्र चशब्दं हेत्वन्तरपरतया व्याचष्टे- *अपि चेति*।। वेदान्तानां विधिनिष्ठत्वेऽपि शास्त्रारम्भ: सिद्ध्यतीति गूढाभिसन्धि: शङ्कते- *नन्विति*।। भूतव्यावृत्तं प्रवर्तकं प्रवर्तकविशेषशब्दार्थ:? आहो केवलमानससाध्यम्? इति विकल्प्याद्यं प्रत्याह- *नेत्याहेति*।। गूढाभिसन्धिं विवृणोति- *नन्वन्यदिति*।।

ब्रह्मज्ञानोत्तरकालमपि लौकिकवैदिकव्यवहारदर्शनावगमात्प्रागेवेति कथमुक्तम्? इत्याशङ्क्याह- *ब्रह्मेति*।। अद्वैतबोधोत्तरकालं द्वैतबोधनिवृत्तिरित्युक्तम्, तदाक्षिपति- *नन्विति*।। अतिप्रसक्तेर्नैतदित्याह- *न तर्हीति*।। घटभावाभाववद् भेदाभेदयोरपि विरुद्धत्वान्नैकत्र समावेश इत्याह- *भेदाभेद इति*।। अतिप्रसक्त्यन्तरमाह- *पूर्वपक्षेति।। ब्रह्मातिरिक्तवस्त्वभावात्त्वन्मतेऽपि साङ्कर्यं स्यादित्याह- *नन्विति*।। प्रातीतिकभेदभावान्न मन्मते साङ्कर्यमित्याह- *न प्रपञ्चस्येति*।। न तर्ह्यद्वैतगी:, तत्राह- *ब्रह्मण इति*।। अद्वैतं तात्त्विकम्, द्वैतं तु समारोपितमिति न विरोध:। भेदाभेदयो: प्रत्यक्षतोऽनुभूयमानत्वाज्ज्ञानानां स्वत: प्रामाण्याच्च तत्त्वत एव भेदाभेदाविति शङ्कते- *नन्विति*।। तर्हि प्रत्यक्षमेव विवेचयेत्याह- *किं तदिति*।। किं ''खण्डो गौरि''त्येकस्मात्प्रत्ययात्तत्सिद्धि:? उत 'खण्डो गौ:' 'मुण्डो गौरि'ति द्वाभ्याम्, अथवा 'खण्डो गौ:' 'मुण्डो गौ:' 'स एवायं गौरि' ति ज्ञानत्रयेणेति विकल्प्याद्यं प्रत्याह- *न तावदिति*।। अनुवृत्त-व्यावृत्तरूपेण तयोर्भेदप्रथावदभेदोऽपि प्रथत इत्याह- *नन्विति*।। अवधारणस्य प्रतिभासत इत्यनेन संबन्ध:। अभेदस्येतरेतरात्मत्वे भेदस्येतरेतरानात्मत्वं वक्तव्यम्, न च

तद्युज्यते, विरोधादित्यभिसन्धायाह- *तर्हीति*।। इतरेतरात्मत्वेनाभिन्नता, अनुवृत्त-व्यावृत्ततालक्षणरूपभेदेन भिन्नता, ततो न विरोध इत्याशयेनाह- *नन्विति*।। भेदाभेदयोः परस्परप्रतिस्पर्द्धित्वेन भावत्वाभावत्ववद् रूपभेदेन भेदत्वं तद्विपरीतरूपैक्यादभेद इति वक्तव्यम्, तथाच न त्वदिष्टसिद्धिरित्याह- *तर्हीति*।। रूपभेदैक्ययोरविरुद्धत्वान्मैवमित्याह- *अथेति*।। अभेदस्येतरेतरात्मतायाः क्वचिदप्यनुपलब्धत्वान्मैव-मित्याह- *क्व दृष्टमिति*।। घट-पटावित्यत्र भेद एव प्रथते, एको घट इत्यत्र त्वभेदो भासते, न त्वितरेतरात्मत्वमित्याह- *न तावदिति*।। द्वितीयं कल्पमुत्थापयति- *स्यादिति*।। एकस्मिन् क्षण उभयोर्ज्ञानयोः स्थित्यनुपपत्तेर्नैतदपि साध्वित्याह- *न ज्ञानयोरिति*।। 'कथं तर्हि सोऽयं देवदत्तः' इत्यादावैक्यम्? इत्याशङ्क्य 'सः' 'अयमि'ति ज्ञानद्वयमैक्यग्राहि नेष्यते, किं त्वेकं प्रत्यभिज्ञाख्यमित्यभिप्रायेणाह- *प्रत्यभिज्ञामिति*।। प्रत्ययत्रयं भेदाभेदसाधकमिति कल्पमुत्थापयति- *तर्हि प्रत्ययेति*।। *अर्थादिति*।। निरालम्बनत्वानुपपत्तेरित्यर्थः। किं प्रत्ययत्रयं साक्षाद्भेदाभेदसाधनम्? उतानुपपत्त्या सह कृतम्? नाद्य इत्याह- *प्रत्यक्षमिति*।। तत्र हेतुः- *खण्डस्येति*।। सामानाधिकरण्यं तद्ग्राहीत्यत्राह- *सामानाधिकरण्यस्येति*।। द्वितीयं निरस्यति- *न चेति*।। एवं सर्वं भिन्नाभिन्नमिति मतं निराकृत्यात्मानो बहव इति वैशेषिकादिमतं निरस्यति- *नापीति*।। किं प्रत्यक्षेण तद्भेदो गृह्यते? उत लिङ्गेन? अथवाऽनुपपत्त्या? नाद्यः; आत्मनः प्रत्यक्षागोचरत्वेन तदघटितभेदस्यापि मानागोचरत्वादित्यर्थः। उक्ततर्कस्य विपर्ययापर्यवसायित्वशङ्कां निराकर्त्तुमभेदे प्रमाणमाह- *विवादेति*।। भागे सिद्धसाध्यत्वं निराकर्तुं विवादेति विशेषणम्। आत्मवत्त्वमात्रे सिद्धसाध्यत्वम्, तदर्थम्- ''प्रतिवादीति'' विशेषणम्। शरीरविशेषत्वादित्यर्थः। तदनेन जीवच्छरीरत्वादित्युक्तं भवति। द्वितीयमुत्थापयति- *युगपदिति*।। आत्मनो जात्यादिविधुरतायाः श्रुत्यादिसिद्धत्वादाभासमानस्य जात्यादेश्च गात्राश्रयत्वादव्यधिकरणासिद्धत्वमित्याह- *न शरीरेति*।।

औपाधिकभेदाद् व्यवस्थेत्यत्र दृष्टान्तान्तरमाह- *सत्यपीति*।। एवमात्मनामितरेतरभेदं निराकृत्यात्म-ब्रह्मणोर्भेदं निराचष्टे- *न चेति*।। तयोः प्रत्यक्षागोचरत्वात् तद्घटितभेदोऽपि न प्रत्यक्ष इति द्रष्टव्यम्। विमते, भिन्ने, विरुद्धधर्माधिकरणत्वात्; दहन-तुहिनवदित्याशङ्क्य, किं काल्पनिकधर्माश्रयत्वं हेतुः? उत वास्तवधर्माधिकरणत्वम्? नाद्य इत्याह- *विरुद्धेति*।। द्वितीयमुत्थापयति- *नियन्त्रिति*।। श्रुतिविरोध इत्याह- *नान्योऽत इति*।। न चोभयोरनुग्रहार्थं प्रत्यग्ब्रह्मणोर्भेदाभेदावास्थेयावित्यपि वाच्यमित्याह- *अतुल्येति*।। भेदोऽपि श्रौत इति शङ्कते- *द्वा सुपर्णेति*।। बलवदभेदवचनविरोधे तद्विपरीतभेदवचनमन्यथा नेयमित्याह- *नेति*।। इतोऽपि न तस्य भेदे प्रामाण्यमित्याह- *भ्रान्तीति*।। अज्ञातार्थाधिगन्तृप्रमाणम्, भेदश्च ज्ञातः, इति न तत्र प्रामाण्यमित्यर्थः। प्रमाणशब्दश्च भावपरः।। नानात्वे प्रमाणत्वाभावादिति वक्तव्ये एकत्वग्रहणं दृष्टान्तार्थम्। भ्रान्तिसिद्धत्वमुपपादयति- *प्रत्यक्षेणेति*।। भेदस्य

समारोपितत्वादपि न तत्त्वतो भेदाभेदावित्याह- *तस्मादिति*।। भेदस्य काल्पनिकत्वसमर्थनफलमाह- *इतीति*।। उपजीव्यद्वैतदर्शनस्योपजीवकेन श्रौतज्ञानेन कथं बाध:? इत्याशङ्क्य दृष्टान्तमाह- *प्रत्यक्षेति*।। ''हिरण्यदा अमृतत्वं भजन्ते'' इत्यादिश्रुतिबलात् कर्मणैव मोक्ष इति शङ्कां निरस्यति- *फलेति*।। ब्रह्मज्ञानोत्तरकालमपि प्रमातृत्वादिकं किं न स्यात्? इत्याशङ्क्यान्त:करणैक्याध्यासनिबन्धनं हि प्रमातृत्वं तस्मिन् सत्येव भवेत्, नान्यदेत्यभिसन्धायाह- *तदेवेति*।। ज्ञाने सत्यपि प्रमातृत्वादिकं दृष्टमित्याशङ्क्य तात्पर्यमाह- *अद्वितीयेति*।। सकलशास्त्रव्यवस्थासिध्यर्थ सोपाधिकं निरुपाधिकं च रूपमनूदितमिति द्रष्टव्यम्।।

इति परमहंसपरिव्रजकाचार्याखण्डानुभूतिशिष्येणाऽखण्डानन्दमुनिना विरचिते विवरणतत्त्वदीपने समन्वयाधिकरणं नाम नवमं वर्णकं समाप्तम्।।

वार्तिकम्

समन्वयसूत्रमवतारयितुं हेत्वसिद्धिमाशङ्कते–कथं पुनरित्यादिना*।। तेन पूर्वोत्तरसूत्रयोराक्षेपिकी सङ्गतिर्दर्शिता भवति। *ननु*–जन्मादिसूत्रेणावसरसङ्गतिरस्य वर्णिता;सत्यं वर्णिता; प्रथमसूत्रेण, ''शास्त्रयोनित्वादि'' त्यनेन चाक्षेपसङ्गतिरेवेत्यदोषः। अयमभिप्रायः–भवेत् शास्त्रप्रमाणकमुक्तलक्षणं ब्रह्म यदि शास्त्रेण प्रतिपाद्येत, नचैतदस्ति; भूतत्वेन शास्त्राविषयत्वात्। अनधिगतार्थगन्तृ हि शास्त्रम् अनधिगतार्थगन्तृ च वाक्यं तदेव भवति, यत् पुरुषस्य प्रवृत्ति–निवृत्त्यन्यतरोपदेशकम्, नान्यत्। कुतः? तयोः प्रमाणान्तरानधिगतत्वात्, भूतवस्तुनः प्रमाणान्तरयोग्यस्य तद्विषयत्वध्रौव्यादपूर्वत्वाभावात्, तदयोग्यस्य च वन्ध्यापुत्रवदसत्वाच्छास्त्रविषयत्वानुपपत्तेः। तथाचोक्तम्–

'' प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमिति कथ्यते।।'' इति।।

एतेन– उपनिषदां ब्रह्मप्रतिपादकत्वेन शास्त्रत्वम्– *प्रत्याख्यातम्*; अक्रियार्थत्वात्तासाम्। अत एवार्थवादाधिकरणे जैमिनिना–''आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते'' इति पूर्वपक्षयता सिद्धवत्कारेण–'' आम्नायस्य क्रियार्थत्वादि'' ति तत्र हेतुं वदता समग्रस्य शास्त्रस्य क्रियापरत्वं दर्शितम्; अन्यथाऽन्यतरासिद्धत्वाद् हेतुतया तदुपन्यासानुपपत्तेरिति, तदिदमुक्तम्– ***यावताऽऽम्ना यस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति क्रियापरत्वं शास्त्रस्य प्रदर्शितमिति *।।**

ननु –भवतु नाम ''सोऽरोदीत्'' इत्याद्यर्थवादवाक्यानामक्रियार्थत्वेनानर्थक्यादप्रामाण्यम्, उपनिषदां तु, ''आत्मेत्येवोपासीत'' ''आत्मानमेव लोकमुपासीत'' '' आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'' इत्याद्यानां क्रियार्थत्वदर्शनान्नानर्थक्यमित्यत आह– ***अतो वेदान्तानामानर्थक्यम्; अक्रियार्थत्वादिति *।।** समानाधिकरणे पञ्चम्यौ।।

अयमभिप्रायः–भवतु नाम ''स्वर्गकामो यजेते'' त्यादिवाक्यवद् ''आत्मानमेव लोकमुपासीते'' त्यादिवाक्यानां क्रियार्थत्वेन सार्थक्यम् तथाऽपि वपाखननादिवाक्यवत् '' सत्यं ज्ञानमनन्तं ब्रह्म'' ''विज्ञानमानन्दं ब्रह्म'' ''तत्त्वमसि'' ''अहं ब्रह्मास्मी'' त्यादिवाक्यानामानर्थक्यमेव; आख्यानादिरूपत्वेनानित्यसंयोगदर्शनाच्च। न च ''आत्मानमेव लोकमुपासीते'' त्यदिवाक्यानामपि क्रियार्थत्वं सम्भवति; फलाश्रवणात्, जीवनादिनिमित्ताश्रवणाच्च। एतेन प्रायश्चित्तरूपताऽपि प्रत्युक्ता; दोषसंयोगाश्रवणात्। आत्मन ईप्सिततमत्वश्रुतेस्तत्संस्कार एव फलमिति चेत्, न; अनुपयोगात्। तदेव हि संस्क्रियते, यदुपयुक्तम्, उपयोक्ष्यमाणं वा। तद्यथा '' व्रीहिभिर्यजेते'' तिवाक्येन विनियुक्तानां व्रीहीणां ''व्रीहीन् प्रोक्षती'' ति संस्कारो विधीयते। यथा वा ''आहवनीये जुहोती'' ति वाक्यान्तरेण

विनियोक्ष्यमाणस्य संस्कारविशिष्टस्याग्नेः संस्कारो ''वसन्ते ब्राह्मणोऽग्नीनादधीते'' ति। न चैवं केनचिद् वाक्येन कस्मिंश्चित् कर्मण्यात्मा विनियुक्तो विनियोक्ष्यमाणो वा, येनोपासनया तत्संस्कारः स्यात्।।

आख्यातोपस्थितभावनया कर्तुराक्षेपाद विनियुक्तः कर्तेति चेत्, सत्यम्; तथाऽपि विनियोजकाभावेनोपासनायास्तत्संस्कारत्वानुपपत्तेः, ''आत्मानमेव लोकमुपासीते'' त्यादेरनारभ्याधीतत्वात्। अनारभ्याधीतत्वेऽपि वाक्येन जुहूद्वारा पर्णत्ववदात्मद्वारोपासनान्वय इति चेत्, न; जुहूवदात्मनः क्रत्वव्यभिचाराभावात्, लौकिकक्रियायामपि कर्तृत्वात् तद्द्वारा क्रत्वन्वयानुपपत्तेः। *एतेन*–सक्तुवाक्यवद् निनियोगभङ्गाद् भावनाप्राधान्यम्–*प्रत्युक्तम्*; फलाश्रुतेः। रात्रिसत्रवदर्थवादगतमोक्षफलेनान्वयान्न फलाश्रवणामिति चेत्, न; मोक्षस्य क्रियासाध्यत्वेऽनित्यत्वापत्तेस्तत्फलत्वानुपपत्तेः। अस्तु तर्हि विश्वजिन्न्यायेनानित्यस्वर्गफलाध्याहार इति चेत्, न; वैषम्यात्। ''विश्वजिता यजेते'' त्यत्र भावनायाः प्राधान्यश्रवणात् कस्यचित् प्रकरणेऽपाठात्, जीवनादिनिमित्ताश्रवणाच्चाङ्गत्वनित्यत्वानुपपत्तेः, किमंशापूरणात्, तत्पूरणापेक्षायां ''स स्वर्गः'' स्यात् सर्वान् प्रत्यविशेषादि'' ति न्यायेन तत्पूरणं क्रियते। अत्र तु भावनाया अन्यत्र गुणीभावाद् न स्वातन्त्र्येण किमंशापेक्षाऽस्तीति न तत्कल्पनावकाशः। तस्मात् ''जर्तिलयवाग्वा वा जुहुयात्'' विष्णुरूपांशु यष्टव्योऽजामित्वाये'' त्यादि वाक्यवद् ''आत्मानमेव लोकमुपासीते'' त्यादिवाक्यानामपि विधिसरूपत्वादर्थवादमात्रत्वम्। तथा चानर्थक्यम्। अतः सर्ववेदान्तानामक्रियार्थत्वेनानर्थक्यात् सम्यगभिहितम्–*अतो वेदान्तानामानर्थक्यम्। अतः सर्ववेदान्तानामक्रियार्थत्वेनानर्थक्यात् सम्यगभिहितम्–* **अतो वेदान्तानामानर्थक्यमक्रियार्थत्वादिति** *।।

एवं तावदर्थवादाधिकरणपूर्वपक्षमाश्रित्याऽऽनर्थक्यमुपनिषदामभिहितम्, संप्रति तत्सिद्धान्तमाश्रित्य तासां क्रियार्थत्वेन सार्थक्यमाह–***कर्तृ-देवतादिप्रकाशनार्थत्वेन वा क्रियाशेषत्वम्, उपासनादिक्रियान्तरविधानार्थत्वं वेति***।। अयमभिसन्धिः– ''स्वाध्यायोऽध्येतव्यः'' इति स्वाध्यायाध्ययनविधेरध्ययनगृहीतस्वाध्यायस्यार्थज्ञानहेतुत्वेन दृष्टार्थतया प्रामाण्यमुपपादितम्–'' अथातो धर्मजिज्ञासे''त्यत्र। तत्र यदि तावदधीतस्वाध्यायस्याक्षरमात्रमपि निरर्थकं स्यात्, तदा तावतैव स्वाध्यायविधेरप्रामाण्यप्रसक्तौ विधिवाक्येऽप्यनाश्वासः स्यात्। अतस्तत्प्रामाण्यमभ्युपगच्छता ''तुल्यं'' तु ''सांप्रदायिकमि' ति न्यायेन स्वध्यायाक्षरमात्रस्याप्यानर्थक्यं नाशङ्कनीयम्।। *ननु*–उक्तमर्थवादादिवाक्यानां प्रवृत्ति-निवृत्तिशून्यपरिनिष्ठितवस्त्वभिधायकत्वेनाक्रियार्थत्वान्नार्थवत्वमिति, *नैष दोष*; विधिवाक्यवत् साक्षात् क्रियार्थत्वाभावेऽप्येषां परम्परया तदर्थत्वोपपत्तेः, तत्रार्थवादानामधिकारविधेः प्रवर्तकत्वांशकथंभावपूरणेन क्रियार्थत्वम्।।

अस्ति च विधे रूपद्वयं सङ्क्षेपतः, विस्तरतस्तु रूपचतुष्टयमिति। तत्र सङ्क्षेपेण रूपद्वयं तावत्–अज्ञातज्ञापकत्वम्, अप्रवृत्तप्रवर्तकत्वं च। प्रथमं तावदज्ञातां त्र्यंशामार्थीं भावनीं ज्ञापयति पुरुषम्–एतत् फलिका, एतत्कणिका, एतदितिकर्तव्यताका त्वदीया कृतिरिति। तदेतदज्ञातज्ञापकत्वमुच्यते। पश्चात् तद्बोधेन फलरागं सम्पाद्य तस्यां पुरुषं प्रवर्तयति; तदेतदप्रवृत्तप्रवर्तकत्वमुच्यते– यां प्रवर्तनाख्यां शाब्दी भावनां विधे रूपमाहुः। साऽप्यप्रवृत्तप्रवर्तकत्वलक्षणा शाब्दी भवना त्र्यंशैव–किम्? केन? कथमिति? तत्र किमंश अर्थभावनया पूर्यते। करणांशस्तु 'मामेवं वेदो ज्ञापयती'ति तज्ज्ञानेन। कथमंशस्तु प्राशस्त्यबोधेन रागोत्पत्तिद्वारेति। प्राशस्त्यबोधश्चार्थवादैर्लक्षणया जन्यत इत्युपपद्यतेऽर्थवादानां क्रियार्थत्वम्। तथाचोक्तमभियुक्तैः–

''लिङोऽभिधा सैव च शाब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः।
सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते।।'' इति।।

तदेव च विधे रूपद्वयमुत्पत्ति-विनियोगाधिकार- प्रयोगलक्षणव्यपारभेदात् चतुर्धा व्यपदिश्यते– तत्र कर्मस्वरूपमात्रं ज्ञापयन् विधिरुत्पत्तिरित्युच्यते; तस्याङ्गसम्बन्धं ज्ञापयन् स एव विधिर्विनियोगः; स एव च फलसम्बन्धं ज्ञापयित्वा तत्र पुरुषं प्रवर्तयन्नधिकारः, क्रमान्तं सर्वमुपसंहृत्यानुष्ठापयन् प्रयोग इति। तत्र प्रयोगविधौ कथमंशो मन्त्रेण पूर्यते–अनुतिष्ठेत्, किम्? क्रमान्तं साङ्गं कर्म, केन? पदार्थानां स्मरणेन, कथम्? मन्त्रैरिति। नामधेयैस्त्वधिकारविधौ कारणांशविशेषपूरणम्। भावयेत्, किम्? स्वर्गम्; केन? यागेन, केन तेन? ज्योतिष्टोमेनेति। अतो मन्त्र-नामधेययोरपि क्रियार्थत्वं सिद्धम्।। उपनिषदां तु क्रियार्थत्वे द्वारं वक्तव्यमवशिष्यते। तद्वक्तव्यम्, तत्राह- ***कर्तृ-देवतादिप्रकाशनार्थत्वेन वा क्रियाशेषत्वमिति***।। वाशब्दो वक्ष्यमाणपक्षान्तरापेक्षया। ''योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतमि'' त्यादिवाक्यानां प्रयोगविध्यपेक्षितकर्माङ्गकर्तृप्रतिपादकत्वम्, ''सत्यं ज्ञानमनन्तं ब्रह्म'' ''यः सर्वज्ञः सर्वविदि'' त्यादीनां तु तदपेक्षितदेवताप्रतिपादकत्वम्; ''सोऽश्नुते सर्वान् कामानि'' त्यादीनां च तत्फलप्रतिपादकत्वम्; अत उपपन्नमुपनिषदामपि क्रियार्थत्वमिति।। तदसत्; कर्तुर्लोक-वेदक्रियासाधारणत्वेन क्रतुव्यभिचारित्वादित्युक्तम्। कर्तृमात्रस्य व्यभिचारेऽपि देहव्यतिरिक्तः कर्ता न व्यभिचरति; देहात्मनैव दृष्टार्थं लौकिकक्रियोपपत्तेः; वैदक्यिास्त्वदृष्टार्थ-त्वात्तद्व्यतिरिक्तकर्त्रपेक्षणादिति- चेत्, न; ''वसन्ते ब्राह्मणोऽग्नीनादधीत'' ग्रीष्मे राजन्यः'' शरदि वैश्यः'' इति ब्राह्मणत्वादिविशिष्टस्यैवाधानकर्तृत्वश्रवणात्तत्कर्तुरेव यागत्कतृत्वात्, देहव्यतिरिक्तात्मकर्तृत्वासिद्धेः, क्रियामात्रस्य काय-वाङ्भनःसङ्घातनिष्ठत्वाच्च। कृत्याश्रयस्य कर्तृत्वविवक्षायामपि नातिरिक्तकर्तृत्वसिद्धिः; कृतेरपि सङ्घातनिष्ठत्वात्। तदतिरिक्तनिष्ठत्वेऽपि लोक-वेदसाधारण्येन व्यभिचारावश्यम्भवात्, ''ब्राह्मणो यजेते'' त्यादिशास्त्रविरोधाच्च।।

ननु—न वयं ब्राह्मणादिदेह आत्माभिमानरहितस्य यागकर्तृत्वं ब्रूमः; तदात्माभिमानवत एव तच्छ्रुतेः किं तर्हि? यथा विधिः पुरुषप्रवृत्तौ जनयितव्यायां स्वेतिकर्तव्यतया प्रशस्त्यज्ञानमपेक्षते, तद्वदिहलोकमात्रस्थाद्विदेहव्यतिरिक्तपरलोकसम्बन्धिताज्ञानमपि; तज्ज्ञानमन्तरेण परलोकसम्बन्धिफल - भोगेच्छानुपपत्तेः, स्वतन्त्रस्य पुरुषस्याप्रवृत्तेः। अतस्तदर्थमुपनिषदां विनियोग इति—चेत्, न; तज्ज्ञानस्य विधिसामर्थ्यादेव सिद्धेरुपनिषदां तत्र विनियोगानुपपत्तेः। यदि ब्रूयात् —यथा "वसन्ताय कपिञ्जलानालभते" इत्यादौ विधिसामर्थ्यात्, प्राशस्त्यलाभेऽपि "वायव्यं श्वेतमालभेत भूतिकामः" इत्यादावर्थवादादेव प्राशस्त्यज्ञानं कल्प्यते, न विधिसामर्थ्यात् कुत एतत्? श्रुतत्रादेव तत्सिद्धौ सामर्थ्यस्य दुर्बलत्वेनाकल्पकत्वात्, अन्यथाऽर्थवादवैयर्थ्यात्, श्रुतहान्यश्रुतकल्पनापत्तेः तद्वदुपनिषदां सार्थकत्वाय विधिसामर्थ्याद् देहव्यतिरिक्तात्मज्ञानं सत्यपि तस्मिन् कल्प्यत इति- चेत्, न; वैषम्यात्। प्रकरणस्था ह्यर्थवादश्रुतिर्विधिसामर्थ्यं बाधते, नाप्रकरणस्था; अन्यथा कपिञ्जलवाक्येऽप्यप्रकरणस्थयाऽर्थवादश्रुत्या विधिसामर्थ्यबाधापत्तेः। तथाऽप्रकरणस्थेन विध्यन्तेन कथमित्याकाङ्क्षापूरणात् चोदकबाधापत्तेश्च। अतोऽप्रकरणस्थेनोपनिषद्वाक्येन न विधिसामर्थ्यबाधो युक्तः॥

अस्तु वैवम्, तथाऽपि "योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतमि" त्यादिवाक्यानामेव तथात्वं भवेत्, नत्वशनायाद्यतीतात्मतत्त्वप्रतिपादकानां भूयसाम्; विरोधात्। नहि परलोकसम्बन्धिकर्मफलभोक्तृबोधनार्थं प्रवृत्तानां तत्प्रातिकूल्येन तदभोक्तृत्वबोधनं युक्तम्; तद्बोधने वा " विषं भुङ्क्ष्वे" तिवत् तद्विपरीतपरत्वम्; अतिप्रसङ्गात्, प्रवृत्तिप्रातिकूल्यध्रौव्याच्च। *एतेन*—देवतापरत्वं तद्वाक्यानाम्—*प्रत्याख्यातम्*; तेषां चात्मपरत्वस्य वक्ष्यमाणत्वात्, अभोक्तृत्वादिगुणस्य कर्तृत्ववद्देवतात्वानुपपत्तेश्च। हविर्भोक्तृत्वात्तासाम्, "तमशनायपिपासाभ्यामन्व- वार्छन्, ता एनमब्रुवन्नायतनं नो देही" त्यादिश्रुतेश्च। तस्माद् नोपनिषदां कर्तृ- देवतादिप्रकाशनेन=क्रियाकर्तृ—देवतादिप्रकाशनेन क्रियाशेषत्वमध्यवसातुं शक्यत इत्यस्वरसेन पक्षान्तरमाह—*उपासनादिक्रियान्तर विधानार्थत्वं वेति*॥ आदिशब्देनोपनिषत्पठितप्रवर्ग्यश्रीमन्थ- पुत्रमन्थादिक्रिया गृह्यन्ते। अन्तरशब्दो ज्योतिष्टोमादिकर्मकाण्डपठितक्रियाऽपेक्षया॥

ननु—"यतो वा इमानि भूतानि जायन्ते" "सत्यं ज्ञानमनन्तं ब्रह्मे" त्यादिवाक्यानामुपासनादिक्रियाप्रकरणेऽपाठात् तत्र तद्वाचकपदाभावाच्च कथमुपासनादिक्रियान्तर- विधानार्थत्वमपि स्यात्? अतः स्वार्थपरत्वमेवैषां वाक्यानामिति, नेत्याह—*नहि **परिनिष्ठितवस्तुप्रतिपादनं सम्भवति; प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः। तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावादिति***॥ यदि परिनिष्ठितवस्तुप्रतिपादनेऽपि पुरुषार्थपर्यवसानं स्यात्, तर्ह्यर्थवादानामपि स्वार्थपरत्वं स्यात्। न चैतदस्ति; अर्थवादाधिकरणसिद्धान्तविरोधादित्याह—***अत एव**

'सोऽरोदीदि' त्यादीनामानर्थक्यं मा भूदिति ''विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युरि'' ति स्तावकत्वेनार्थवत्त्वमुक्तमिति *।। *अत एव=परिनिष्ठितवस्तुप्रतिपादने पुरुषार्थाभावादेवेत्यर्थः। न केवलमर्थवादाधिकरणविरोधः किन्तु मन्त्राधिकरणविरोधश्चेत्याह– ***मन्त्राणाञ्चेषे त्वा इत्यादीनां क्रिया-तत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तमिति *।।** चकारान्नामधेयाधिकरणविरोधोऽपि सूचितः, उक्त हेत्वनुषङ्गश्च।।

ननु– भवतु नामार्थवाद-मन्त्र-नामधेयानां क्रियाप्रकरणपठितत्वात् परम्परयाऽपि तदर्थत्वम्, 'सत्यमि'त्यादिवाक्यानां त्वनारभ्याधीतत्वात् स्वप्रकरणे च क्रियाभावाद् न क्रियार्थत्वमित्युक्तमिति–चेत्, तत्राह– ***न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वेति *।।** उपपत्त्यभावस्तूक्त एवाधस्तात्। स्वार्थ एव तर्हि तेषां विधीयताम्, नेत्याह– ***न हि परिनिष्ठिते वस्तुस्वरूपे विधिःसम्भवति; क्रियाविषयत्वाद्विधेरिति *।।** विधेः क्रियाविषयत्वं भावार्थाधिकरणन्यायेन सिद्धम्।।

तथाच प्रयोगः– विवादगोचरापन्नं वेदवाक्यम्, न विधिसंस्पर्शमन्तरेण प्रमाणं भवितुमर्हति, वेदवाक्यत्वात्, अर्थवादादिवाक्यवदिति। तस्मात् प्रतिष्ठावाक्यवद् 'ब्रह्मविदाप्नोति परमि'' ति स्वप्रकरणगतार्थवादवाक्यादुपासनाविधिं ज्ञानविधिं वा कल्पयित्वा तद्गुणसमर्पकत्वेन सत्यादिवाक्यानां तच्छेषत्वोपपत्तेर्न काचिदनुपपत्तिरित्याशयेनोपसंहरति– ***तस्मात् कर्मापेक्षितकर्तृस्वरूप-देवतादिप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम्। अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते, तथाऽपि स्ववाक्यगतोपासनादिकर्मपरत्वम्। तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति *।।**

एवमुत्सूत्रं पूर्वपक्षयित्वा तदुत्तरत्वेन सूत्रमवतारयति– ***इति प्राप्ते उच्यते तत्तु समन्वयादिति *।।** सर्वाणि वेदान्तवाक्यान्यस्य सूत्रस्य विषयः। संशयस्तु पूर्वोत्तरपक्षप्रदर्शनेनैव दर्शितो भवतीति पृथग् नोक्तः। तेन पञ्चाङ्गताऽस्याधिकरणस्य दर्शिता भवति; तदेकाङ्गविकलस्याधिकरणत्वानुपपत्तेः। तथा चोक्तम्–''विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम्। सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्'' इति। चतुर्भिः सूत्रैर्वा ब्रह्मजिज्ञासासमर्थनादेकमधिकरणमिति।। अत्र तुशब्दः परपक्षनिषेधार्थ; अव्ययानामनेकार्थत्वात्। सर्वत्र चैवं प्रायेण तुशब्द- वाशब्दौ सूत्रे परपक्षनिषेधार्थौ ज्ञातव्यौ। सर्वनाम्नोक्तलक्षणं ब्रह्म शास्त्रं वा विप्रतिपन्नं परामृश्यते। सम्यग् अन्वयः=सम्बन्धः समन्वयः। शास्त्रेण ब्रह्मणोऽनधिगतस्य शक्तितात्पर्याभ्यां ततोऽधिगम्यमानत्वम्, तेन च शास्त्रस्य ताभ्यामेव तदधिगन्तृत्वसामार्थ्यम्, तत्त्वेनैकवाक्यत्वापन्नत्वमिति वा।।

तेन तदोपात्तमुक्तलक्षणं ब्रह्म विप्रतिपन्नं शास्त्रं वा पक्षः। तुशब्दोपात्तं परपक्षप्रतिषेधलक्षम्–न शास्त्राप्रमाणकम्, नोक्तलक्षणब्रह्माविषयकमिति वा साध्यम्। यत्र सूत्रे साध्यनिर्देशकं पदान्तरं न श्रूयते,

तत्र सर्वत्रैवं परपक्षनिरासितुशब्दादिरेव तन्निर्देशक इति बोद्धव्यम्। अनधिगततत्वे सति शक्तितात्पर्यतस्ततोऽधिगम्यमानत्वात् शक्तितात्पर्यतस्तदधिगन्तृत्वसामर्थ्यात्, तत्वेनेकवाक्यत्वाद्वेति समन्वयपदोपात्तो हेतुः; यदेवम्, तदेवम्, यथा धर्मः; तच्छास्त्रं वेत्युदाहरणावयवो बहिरेवोपसंहर्तव्यः।।

''अग्निर्हिमस्य भेषजमि''त्यादौ व्यभिचारो मा भूदित्यत उक्तम्– ***अनधिगततत्वे सतीति** *।। तथापि ग्रावप्लवनादौ व्यभिचारो मा भूदित्यत उक्तम्,– ***तात्पर्यत इति** *।। न चतात्पर्यतस्ततोऽधिगतत्वादित्येतावतैवाग्निहिमभैषज्यादिवारणमिति–वाच्यम्; तन्मन्त्रस्य प्रास्ताविकत्वेनानुवाद एव तात्पर्यात्, अश्वविवसनस्थान ऋत्विजां परस्परसंवादे तस्य विनियोगात्। आर्थिकार्थे व्यभिचारवारणाय शक्तीत्युक्तम्। नचाश्रयासिद्धिः; ब्रह्मपदव्युत्पत्या तत्प्रसिद्धेरुभयवादिसिद्धत्वादिति। नापि साध्याविशेषत्वम्; भावाभावकृतरूपभेदात्, सामान्य- विशेषरूपभेदाच्च। समितिविशेषणात् स्वपक्षे श्रुतेस्तात्पर्यं वदन् परपक्षे तदभावं दर्शयति भगवान् सूत्रकारः। यथा चैतत्, तथा भाष्यव्याख्यान एव दर्शयिष्यामः। तदेवं फलितमर्थं भाष्यकारः सूत्रपदादि व्याख्याय दर्शयति– ***तुशब्द इत्यादिना** *।। शास्त्रादवगम्यत इति साध्यनिर्देशं कुर्वता। तच्छब्दार्थेन तुशब्दार्थस्यान्वयःप्रदर्शितः तात्पर्येणाऽप्युपसर्गार्थप्रदर्शनम्– ***तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानीति** *।। शास्त्रनिष्ठतया समन्वयपदार्थं व्याकुर्वन् शास्त्रपक्षकमपि न्यायं सूचयति। तेन हेतोर्न व्यधिकरणताशङ्काऽपि। *ननु*–एवमपि न ब्रह्मपक्षकहेतुसिद्धिः; तात्पर्येणैतस्यार्थस्याप्रतिपादकत्वादिति *।। अत एवार्थात्तात्पर्येण तत्प्रतिपाद्यत्वादिति हेतोर्लाभात् समनुगतानि=समर्थानि, परस्परमेकवाक्यतां गतानीति वाऽर्थः। प्रयोगद्वयं तु पूर्वमेव दर्शितमस्माभिः। क्रमेण वेदचतुष्टयगतवाक्यानि दर्शयति– ***सदेवेत्यादिना।।** *ननु*–उक्तं क्रत्वपेक्षितकर्तृदेवतादिप्रतिपादकत्वेनापि सम्यगन्वयस्तेषां भविष्यतीति, नेत्याह– * **नच तद्र तानां पदानामिति** *।। अनेन शक्तिरपि पदानां ब्रह्मोपस्थापकत्वे दर्शिता भवतीति द्रष्टव्यम्। किं दूषणम्; तत्राह– ***श्रुतहान्यश्रुतकल्पनाप्रसङ्गादिति** * एतदेव कुतः ? इत्याशङ्क्य, किं कर्तृपरत्वमेव विधीनां वाक्यानामभ्युपगम्यते? किं वा देवतापरत्वम्? आहोस्वित् प्रकरणगतोपासनाशेषत्वम्? इति विकल्प्याद्यं प्रत्याह– ***नच तेषामिति** *।। कुतो नेति? अत आह,– * **तत् केन कमिति** *।। **केनेति** करणकारकं निषिद्धम्, **कमिति** कर्मकारकम्, **पश्येदिति** कर्तृकारकं क्रिया तत्फलं चेति। एवं ''केन कं जिघ्रेदि''त्यादावपि बोद्धव्यम्। तदभावे हेतुः श्रुत्या स्वयमेवोपन्यस्तः ''यत्र त्वस्य सर्वमात्मैवाभूदि''ति *ननु*–उक्तं क्रियाऽसंस्पर्शिपरिनिष्ठितवस्तुप्रतिपादनं वेदवाक्यानां न सम्भवति; शास्त्रत्वव्याहतेः, तस्य प्रत्यक्षादिगोचरत्वेनापूर्वविशयत्वाभावात्, हेयोपादेयशून्यत्वेन निष्प्रयोजनत्वाच्चेति; अतः स्वारस्येन तद्वाक्यानां क्रत्वपेक्षितकर्तृप्रतिपादकत्वेऽपि ''देवस्य त्वा सवितु'' रित्यादि पदानां निर्वापप्रकाशकत्वद् यथा कथञ्चित् तत्प्रतिपादकत्वमेव तेषामुचितमित्याशङ्क्य, किं ब्रह्मणोऽपूर्वत्वाभावात् शास्त्राविषयत्वम्? किं

वा निष्प्रयोजनत्वात्? तत्राद्येऽपि किं परिनिष्ठितवस्तुत्वमेव प्रमाणान्तरविषयत्वप्रयोजकम्? उत ब्रह्मणोऽपूर्वत्वाभावः? किं वा तदप्रयोजकत्वेऽपि ब्रह्मणः प्रमाणान्तरविषयत्वं दृष्टमिति? तत्र नाद्य इत्याह– **नच परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वमिति** *॥ स्वर्ग-यूपाहवनीयादौ व्यभिचारादित्याशयः। न च–स्वर्गादेः परिनिष्ठितत्वेऽपि क्रियान्वयित्वादपूर्वत्वमविरुद्धमिति–वाच्यम्; क्रियान्वयित्वेऽपि व्यभिचारावारणात्। अपिच क्रियान्वयमन्तरेणैव स्वर्गादिपदार्था "यन्न दुःखेने" त्यादशिास्त्रेण प्रतिपाद्यन्ते; पदार्थावबोधपूर्वकत्वाद्वाक्यार्थबोधस्य, अन्यथाऽन्योन्याश्रयात्– स्वर्गादिपदार्थोपस्थितौ क्रियान्वयबोधः, तदुपस्थितौ च स्वर्गादिपदार्थोपस्थितिरिति। *–**एतेन–न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वेति–प्रत्युक्तम्** *; स्वर्गस्य फलत्वेनाविधेयस्य प्रतिपादकवाक्यस्यार्थवत्तादर्शनात्। नापि द्वितीय इत्याह– ***तत्वमसीति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वादिति** *॥ "तत्वमसी" ति प्रतिपाद्यमानस्य कर्तुर्ब्रह्मात्मभावस्येत्यर्थः। संसारिस्वरूपस्य प्रत्यक्षादिगोचरत्वादर्थतोऽप्यसंसारिब्रह्मात्मभावस्य शास्त्रैकगम्यत्वेन प्रत्यक्षादिगोचरत्वदर्शनाभावादित्यभिप्रायः। हेयोपादेयशून्यत्वेन ब्रह्मणो निष्प्रयोजनत्वान्न शास्त्रविषयत्वमिति द्वितीयपक्षं दूषयितुमनुवदति– ***यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमितीति** *॥ तत्र वक्तव्यम्–किं यद्यद् हेयोपादेयव्यतिरिक्तविषयं वचनम्, तन्निष्प्रयोजनमेवेति नियमदर्शनाद्धेयोपादेयशून्यब्रह्मप्रतिपादकवचनानामपि तथात्वं स्यादित्युच्यते? किं वा तादृशवस्तुप्रतिपादके 'सप्तद्वीपा वसुमती 'त्यादावुपदेशे कुत्रचिद्यथा-फलाभावो दृष्टः, तथा ब्रह्मप्रतिपादनेऽपीति तद्वैयर्थ्यमिति? तत्र नाद्यः; " नायं सर्पो रज्जुरेवेयमि' त्यादौ व्यभिचारादित्यभिप्रेत्याह– *नैष दोष इति*॥ न द्वितीय इत्याह– ***हेयोपादेयशून्यब्रह्मात्मावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेरिति** *॥ एवकारेणान्ययोगव्यवच्छेदकेन साधनान्तरसमुच्चयं वारयति; " तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाये" तिश्रुतेः। एतेन–तत्फलाभावदर्शनम्–प्रत्युक्तम्*; तत्फलस्य श्रुति-स्मृति न्याय- विद्वदनुसिद्धत्वात्। तस्माद् नायमपि पक्षः साध्रीचीन इति भावः। तस्मान्न क्रत्वङ्गकर्तृप्रतिपादनपरत्वं वेदान्तवाक्यानामिति। अस्तु तर्हि देवता- फलादिप्रतिपादकत्वमुपनिषदामिति द्वितीयः पक्ष इत्याशङ्क्य, किं क्रत्वपेक्षितदेवतादिप्रतिपादकमुच्यते? किं वा स्ववाक्यगतोपासनापेक्षितदेवतादिप्रतिपादकत्वमिति? तत्र नाद्यः स्ववाक्यगतदेवतादिनैव तदाकाङ्क्षायाः पूरणात् क्रत्वपेक्षाया अभावात्। आमिक्षा-वाजिनयोरिवोत्पत्तिशिष्टोत्पन्नशिष्टयोर्विकल्पानुपपत्तेश्च। द्वितीयेऽपि किमुपासनावाक्यगतवस्वादिदेवताप्रतिपादकानां तत्फलप्रतिपादकानां च वाक्यानां तथात्वमुच्यते? किं वा निर्गुणब्रह्मप्रतिपादकानां वाक्यानामिति? तत्राद्यस्त्विष्ट एवेत्याह– * **देवतादिप्रतिपादनस्य तु स्वावाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोध इति** *॥ द्वितीयस्तु न जाघटीतीत्याह– ***ननु तथा ब्रह्मण उपासनाशेषत्वं सम्भवति; देवतादिरूपेणेति शेषः** *॥ अनेन–स्वप्रकरणगतोपासनाशेषत्वं ब्रह्मण इति तृतीयपक्षोऽपि– ***प्रत्याख्यातो द्रष्टव्यः** *॥

कुतो नेत्याकाङ्क्षायां विरोधादित्याह– ***एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेरिति***॥ *उपपत्तेः=आपत्तेरित्यर्थः। ज्ञातस्य हि ब्रह्मण उपासनायां विनियोगो देवतादिरूपेण वक्तव्यः; अज्ञातस्य विनियोगासम्भवात्। तथा च तस्मिन् ज्ञाते सर्वक्रियाकारकादिद्वैतविज्ञानोपमर्दापत्तेरुपासनानुपपत्तिः; "यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदि"त्यादिश्रुतेरित्यर्थः। एतदेव स्पष्टीकृत्य दर्शयति– ***न ह्येकत्वविज्ञानेनोन्मथितस्य द्वैतविज्ञानस्य पुनः सम्भवोऽस्ति, येनोपासनाविधिशेषत्वं ब्रह्मणः प्रतिपद्येतेति। *ननु*–उक्तं न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वा। न च परिनिष्ठितवस्तुस्वरूपे विधिः सम्भवति; क्रियाविषयत्वाद्विधेरिति, तत्राह–यद्यप्यन्यत्र वेदवाक्यानां विधिसंस्पर्शमन्तरेण प्रमाणत्वं न दृष्टम्; तथाऽप्यात्मविज्ञानस्य फलपर्यन्तत्वाद् न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं प्रत्याख्यातुमिति***॥ ब्रह्मात्मस्वरूपादन्यत्र विषये वायुक्षेपिष्ठत्वादौ देवतादौ च युक्तं वेदवाक्यानामर्थवाद-मन्त्र- नामधेयानां विधिसंस्पर्शमन्तरेणाप्रामाण्यमानर्थक्यलक्षणम्। कुतः? हेयोपादेयशून्यतज्ज्ञानमात्रेण पुरुषार्थपर्यवसानादर्शनात्, नैवं ब्रह्मात्मैकत्वे तत्प्रतिपादकानां वाक्याना-मानर्थक्यलक्षणमप्रामाण्यं विधिसंस्पर्शाभावापराधेन शक्यं वक्तुम्; तदात्मविज्ञानादेव परमपुरुषार्थसिद्धेर्दृष्टत्वादित्यर्थः। तथा च पूर्वोक्तानुमानं विद्वदनुभव-श्रुति-स्मृति-न्यायविरोधात् कालात्ययादिष्टमित्यभिप्रायः। अपिच शास्त्रस्य सार्थकत्वलक्षणं प्रामाण्यं नानुमानगम्यम्; तथात्वे विधिवाक्यानामप्यानर्थक्यापत्तेः। कथम्? लोके हि स्वाव्यवहितफलैव सर्वा क्रिया दृश्यते। न च तैलपानादौ व्यभिचारः; तत्फलस्य धातुसाम्यस्य तत्कालीनत्वेन व्यभिचाराभावात्, पुष्ट्यादेश्चाहारपरिणामकार्यत्वात्, तत्फलत्वाभावात्, धातुसाम्यद्वारत्वेन तत्फलत्वोपचारात्। तथा च वैदिक्या अपि दर्शादिक्रियायाः क्रियात्वात् स्वाव्यवहितफलत्वमनुमेयम्, तद्विरोधाच्च विधिवाक्यानामानर्थक्यम्। इतोऽपि नानुमानगम्यं शास्त्रप्रामाण्य-मित्यभिप्रेत्याह– ***न चानुमानगम्यं शास्त्रप्रामाण्यम्, येनान्यत्र दृष्टं निदर्शनमपेक्षेतेति***॥

हेतुसमर्थनमुपसंहरति– *तस्मात् सिद्धं ब्रह्मणः* शास्त्रप्रमाणकत्वमिति*॥

इति शारीरकमीमांसाभाष्यवर्तिके वेदानां ब्रह्मणि समन्वयनिरूपणं संपूर्णम्॥

एवं तावत् सूत्राक्षरव्याख्यानेनात्यन्तबहिर्मुखान्निराकृत्य हेत्वसिद्धिः परिहृता। संप्रति तत्तात्पर्यतो विधिसंस्पर्शमन्तरेणैव वेदान्तानां ब्रह्मबोधकत्वमित्यस्मिन्नर्थे विप्रतिपन्नैकदेशिनो निराकर्तुमुत्थापयति– ***अत्रापरे प्रत्यवतिष्ठन्त इति***॥ *अत्र=विधिसंस्पर्शमन्तरेणैव वेदान्ता ब्रह्मणि प्रमाणमित्यस्मिन्नर्थे॥ *अपरे=एकदेशिनः*॥ *प्रत्यवतिष्ठन्ते=प्रतिकूलाश्रया अवतिष्ठन्ते; प्रतिकूला भवन्तीति यावत्। तेषामेकदेशित्वं दर्शयन् प्रत्यवस्थानप्रकारमाह– ***यद्यपि शास्त्रप्रमाणकं ब्रह्म, तथाऽपि***

प्रतिपत्तिविधिविषयतयैव शास्त्रेण ब्रह्म समर्प्यत इति*॥ तथा च सिद्धार्थैकदेशस्वीकारात् सिद्धमेषामेकदेशित्वमिति भाव:। यद्यपि वेदान्तानामानर्थक्यासम्भवात् शास्त्रप्रमाणकत्वम्; तथाऽपि न विधिसंस्पर्शमन्तरेण शास्त्रेण तत् प्रतिपादयितुं शक्यते; प्रवृत्ति-निवृत्तिप्रयोजनत्वाच्छास्त्रस्येत्युक्तत्वात्। अत **''आत्मा वा अरे द्रष्टव्य:''** इति प्रतिपत्तिविधौ, कोऽसावात्मेति तद्विषयापेक्षायाम्-''एवं वा अरे महद्भूतमपारमनन्तमनन्तरमबाह्यं कृत्स्नं प्रज्ञानघनमेवे'' त्यादिवाक्यानां तद्विषयतयैव ब्रह्मसमर्पकत्वम्। तथा ''ब्रह्मविदाप्नोति परमि'' त्यर्थवादोन्नीतप्रतिपत्तिविधौ किं तद् ब्रह्मेति तद्विषयापेक्षायां ''सत्यं ज्ञानमनन्तं ब्रह्मे'' त्यादिवाक्यानां तद्विषयतयैव तत्समर्पकत्वम्। एवं वेदान्तान्तरेष्वप्यूह्यम्-इति।

न च-एवं विधिशेषत्वे योषिदग्न्यादिवाक्यवदारोपेणापि तद्विषयसिद्धे: स्वार्थे प्रमाणं न स्यादिति-वाच्यम्; वैषम्यात्। उपासना हि मानसी क्रिया, न प्रमाणम्। अतो यथाविषयमारोपेणापि तत्सिद्धि:, प्रतिपत्तिस्तु प्रमाणं वस्तुविषयैव। अतस्तद्विषयस्यालौकिकत्वात्, सङ्गतिग्रहाभावाद् विधिवाक्यस्थात्मब्रह्मादिपदात्तदनुपस्थितौ कोऽसावात्मादिपदोपस्थाप्य:? यो विधेयप्रतिपत्तेर्विषय:, इत्यपेक्षायां यूपाहवनीयादिवदलौकिकस्यापि तस्य-''एवं वा अरे महद् भूतमपारम्'' ''सत्यं ज्ञानमनन्तमि'' त्यादिवाक्यान्तरैस्तत्समर्पणादुपपद्यते स्वार्थप्रामाण्यम्। यथा हि ''यूपे पशुं बध्नीत'' ''आहवनीये जुहोति'' ''स्वर्गकामो यजेते'' त्यादिविधौ श्रूयमाणयूपाहवनीय-स्वर्गादिपदार्थानामलौकिकत्वेन तत्पदेभ्योऽनुपस्थितौ केऽमी यूपाहवनीय-स्वर्गादिपदार्था:? इत्यपेक्षायां ''यूपं तक्षति'' ''खादिरो यूपो भवति'' ''यूपमष्टाश्रीकरोति'' ''वसन्ते ब्राह्मणोऽग्नीनादधीत'' ''यन्न दु:खेने'' त्यादिवाक्यान्तरैस्तत्समर्पणेनापेक्षापूरणात् तत्र तेषां विध्येकवाक्यतया प्रामाण्यम्, तद्वत्।

ननु आत्मपदार्थो लौकिक एव, *सत्यम्*; न स विधेयप्रतिपत्तिविषय:; तस्य स्वभावसिद्धप्रत्यक्षविषयत्वेन तद्विषयत्वानुपपत्ते:। अतस्तदन्यथानुपपत्त्याऽपूर्वोऽस्त्यात्मा तच्छब्दाधिगम्य इत्यध्यवस्यति। तथा चोपपद्यते तदाकाङ्क्षेति न कश्चिद् दोष:। तस्माद् विधेयप्रतिपत्तिविषयसमर्पकत्वेनैव ब्रह्मबोधकवेदान्तानां प्रामाण्यम्, न स्वातन्त्र्येण। एवं च सति शास्त्रतात्पर्यविदामपि वचनमुपपन्नं भवति। अन्यथा तद् विरुध्येत, यत: सर्वोऽप्याम्नायोऽविशेषेण क्रियाबोधनपर एव, इति तद्वचनार्थोऽध्यवसीयते। तथा च शबरस्वामिवचनम्-''दृष्टो हि तस्यार्थ: कर्मावबोधनम्'' ''चोदनेति क्रियाया: प्रवर्तकं वचनमिति''*। जैमिनिवचनञ्च-''तस्य ज्ञानमुपदेश:'' ''तद्भूतानां क्रियार्थेन समाम्नाय:'' ''आम्नायस्य क्रियार्थत्वादि''ति। वार्तिकवचनमपि-''प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसा येनोपदिश्येत तच्छास्त्रमिति कथ्यते॥'' तस्मात् क्वचिद् विषयविशेषे पुरुषं प्रवर्तयत् कुतश्चिद् विषयविशेषाच्च निवर्तयदर्थवच्छास्त्रं भवति। यच्चाप्यर्थवादादिवाक्यं साक्षान्न पुरुषस्य प्रवृत्ति-निवृत्तिजनकम्, तदपि तच्छेषतयैव तयोरुपयुक्तमित्युक्तमधस्तात्। अतोऽर्थवादादिवाक्यसमानयोगक्षेमत्वाद् वेदान्तवाक्यानामपि

प्रतिपत्तिविधिशेषतयैवार्थवत्वमुचितं स्यात्।। *ननु*-उक्तं हेयोपादेयशून्यब्रह्मात्मैकत्वबोधादेव वेदान्तेभ्यः पुरुषार्थसिद्धेर्न तेषां विधिशेषत्वकल्पनं युक्तमिति, *न*; श्रवणादिमतोऽपि पूर्ववत् संसारस्योपलम्भात्, अन्यथा ज्ञानिनः सद्यः शरीरपातप्रसङ्गात्। ततः पुरुषार्थाभावादानर्थक्यमेव स्यात्। *ननु*-तत्प्रतिपत्तिश्चेन्न फलोपलब्धिः, हन्त तर्हि विधिपक्षेऽप्ययंतुल्यो दोषः; विधितः सम्पाद्य प्रतिपत्तेरूर्ध्वमपि मोक्षाभावदर्शनस्य तुल्यत्वादिति-चेत्, *नायं दोषः; अस्मन्मतेऽग्निहोत्रादिवत् प्रतिपत्तेर्वैधत्वे दृष्टफलाभावेऽप्यदृष्टफलस्य सम्भवादित्यभिप्रेत्याह- ***सति च विधिपरत्वे यथा स्वर्गादिकामस्याग्निहोत्रादि स्वर्गादिसाधनं विधीयते, एवममृतत्वकामस्य ब्रह्मज्ञानं विधीयत** इति युक्तमिति*।। *ननु*-भूत-भव्यभेदेन नित्यानित्यभेदेन च धर्म-ब्रह्मजिज्ञासयोः फल-जिज्ञास्यभेदस्योक्तत्वाद् नाग्निहोत्रादिज्ञानवद् ब्रह्मज्ञानस्यानुष्ठानापेक्षमदृष्टं फलं कल्पयितुं युक्तम्। किं तर्हि? रज्जुज्ञानात् सर्पनिवृत्तिवत् तज्ज्ञानादेवानुष्ठाननिरपेक्षाद् नित्यमेवानर्थनिवृत्तिलक्षणं मोक्षाख्यं दृष्टं फलं भवितुमर्हति; अन्यथा मोक्षस्यानित्यत्वापत्तेरिति सिद्धान्ती शङ्कते-*नन्विह **जिज्ञास्यवैलक्षण्यमुक्तमित्यादिना** *।। कार्यान्वितस्यैव ब्रह्मणो वेदान्तैः प्रतिपाद्यमानत्वात्, अन्यथा तेषां प्रमाणान्तरसंवाद-विसंवादाभ्यामप्रामाण्यात्तत्प्रतिपादनानुपपत्तेः कार्य एव तयोरभावेन शब्दस्य प्रामाण्यात् फल-जिज्ञास्यभेदोऽसिद्ध इत्याशयेनैकदेशी परिहरति- ***नार्हत्येवं भवितुमिति** *।। के तावत् कार्यविधयः? कथं वा ब्रह्मणस्तत्प्रयुक्तत्वम्? कथं वा वेदान्तानां तत्प्रयुक्तं ब्रह्मप्रतिपादनम्? के वा ते वेदान्ताः? इत्यपेक्षायां क्रमेणाह- ***आत्मा वा अरे द्रष्टव्य इत्यादि** *।। *ननु* एवमपि विधिवाक्यान्वितवेदान्तवाक्यश्रवण-समनन्तरमेव ब्रह्मप्रतीतेर्जायमानत्वात् किमन्यत् कार्यमवशिष्यते? यदनुष्ठानाद् अग्निहोत्राद्यनुष्ठानात् स्वर्गादिफलवददृष्टो मोक्षो भविष्यतीत्यत आह- ***तदुपासनाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति** *।। *अयमभिप्रायः*-न ब्रह्मप्रतिपत्तिमात्रात् पुरुषार्थसिद्धिः; तद्वतोऽपि पूर्ववत् संसारोपलब्धेः, अतस्तद्विधिसामर्थ्याद् ''आत्मानमेव लोकमुपासीते''ति साक्षात् तदुपासनाविधिश्रवणाच्च विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययसन्तानलक्षणस्य ब्रह्मोपासनस्य विधीयमानस्याऽऽमरण-मनुष्ठानाददृष्टोऽपि मोक्षो वैधत्वेन शास्त्रदृष्टवात् फलं भविष्यति। तथा च न फल-जिज्ञास्यवैलक्षण्यमिति। एवं स्वपक्षमुपपाद्य सिद्धान्तिपक्षे दोषमाह- ***कर्तव्यविध्यननुप्रवेशे त्विति** *।। वस्तुमात्रकथनेनानर्थक्यं 'नायं सर्पो रज्जुरेवेयमि'त्यादौ व्यभिचरति; तत्र वस्तुमात्रकथनत्वे सत्यप्यानर्थक्याभावात्। अतोऽसिद्धोऽयं नियमः; सत्प्रतिपक्षसम्भवाच्चेत्याशङ्कते- ***ननु*-वस्तुमात्रकथनेऽपीति** *।। अदृष्टफलत्वे सति वस्तुमात्रकथनत्वस्य प्रयोजकत्वोक्तेर्व्यभिचाराभावात्, परानुमानस्य चानुपलब्धिविरोधात्, श्रवणोत्तरं मनन-निदिध्यासंनविधिविरोधाच्च दृष्टफलत्वोपाधिपराहतत्वाच्च नैवमिति परिहरति- ***स्यादेतदेवमिति** *।। एकदेशी स्वमतमुपसंहरति- ***तस्मादिति** *।। अनेन-धर्म-ब्रह्मविद्ययोरधिकार-भेदोऽप्याक्षिप्तो-*वेदितव्यः*।। धर्म-ब्रह्मविद्याफलयोरनुष्ठानापेक्षत्वेनादृष्टफलत्वने चावैलक्षण्याद्

विधिशेषतयैव वेदान्तानां ब्रह्मबोधकत्वमित्येकदेशिनाऽभिहिते हेत्वसिध्या सिद्धान्ती तन्मतमपाकरोति- ***अत्राभिधीयते, न; कर्म-ब्रह्मविद्याफलयोर्वैलक्षण्यादिति***॥ यद् भवता फलवैलक्षण्यादविशेषेण विद्ययोर्नियोगशेषत्व- मभिहितम्, तत्र वदाम:-नैतदेवम्; तयो: फलवैलक्षण्यस्य सत्त्वात्। तद्वैलक्षण्यमेव प्रपञ्चयन् प्रथमं तावद् जिज्ञास्यकर्म-तत्फलाधिकारिणां तरतमभावेन विद्यमानानां सातिशयत्वमत एव क्षयित्वं च दर्शयति- ***शारीरमित्यादिना***॥ *ननु* एवं तर्हि जिज्ञासाया विशेषविषयत्वात् प्रतिषेध-चोदनार्थो न विचारित: स्यादिति, नेत्याह- ***अधर्मोऽपीति***॥ त्रिविध इति शेष:। तथा च जिज्ञासासूत्रे धर्मपदं विधि-निषेधचोदनार्थमात्रोपलक्षणपरम्। चोदनासूत्रे त्वर्थग्रहणसामर्थ्यादेव तत्प्रतियोगितयाऽनर्थो लभ्यत इति। तमेतमर्थं विशेषणद्वयेन धर्माधर्मौ विशिंषन् दर्शयति- ***तयोश्चोदनालक्षणयोरर्थानर्थयोर्धर्माधर्मयोरिति***॥ कर्मसाधनस्यैव शरीरादेर्भोगसाधन- त्वान्नात्मनि स्वतो भोगोऽस्तीति दर्शयितुम्- ***शरीरवाङ्मनोभिरेवोपभुज्यमाने इत्युक्तम्***॥ तत्र शरीरेण तावत् शुभाशुभस्पर्शादिना सुख-दु:खभोग:। वाचा च शुभाशुभाध्ययनादिना। मनसा च शुभाशुभाभिमानादिनेति-बोद्धव्यम्। तत्र धर्मफलस्य सुखस्य तारतम्यं श्रुतिसिद्धं दर्शयन् तन्मूलधर्म- तदधिकारिणोस्तारतम्यमनुमानेनाह- ***मनुष्यत्वादारभ्येति***॥ अनुश्रूयते-''अथ ये ये शतं मनुषाणामानन्दा:। स एको गन्धर्वलोकेष्वानन्द:'' इत्याद्यानन्दमीमांसायामिति शेष:। अनुग्रहणं सुखतारतम्यस्य वैदिकत्वसूचनार्थम्। उक्तानुमानं प्रमाणान्तरेणानुगृह्णाति- ***प्रसिद्धञ्चेति***॥ ''यदेव विद्ययोपनिषदा करोति तदेव वीर्यवत्तरं भवती'' त्यादिश्रुतिसिद्धमित्यर्थ:। तन्मार्गगतावविशेषेऽप्यवान्तरतारतम्यमाह- ***तत्रापीति***॥ एवं धर्म-तत्फलतदधिकारिणां तारतम्यमुक्त्वाऽधर्म-तत्फल-तदधिकारितारतम्यं दर्शयति- ***तथोर्ध्वगतेष्वधोगतेषु चेति***॥ तारतम्यप्रदर्शनस्य फलमाह- ***एवमविद्यादिदोषवतामिति***॥ एवं विधि-प्रतिषेध-चोदनालक्षणफलस्य सर्वस्याविद्यात्मकत्वं संसाररूपत्वमनित्यत्वञ्च दर्शयित्वा मोक्षस्य तद्वैलक्षण्यं दर्शयन् चोदनालक्षणधर्मकार्यत्वं निराकरोति- ***अशरीरं वाव सन्तमिति***॥ शङ्कते- *अशरीरत्वमेव धर्मकार्यमिति चेदिति*॥ अयमभिप्राय:-भवेदेषा मोक्षस्य धर्मकार्यत्वे प्रियाप्रियस्पर्शप्रतिषेधानुपपत्ति:, यदि सुखमात्रं धर्मकार्यं स्यात्, अशरीरत्वानुपपत्तिश्च; सुखस्य शरीरद्वयसाध्यत्वात्। न चैवमस्ति; सुख-तत्साधनवद् दु:ख-तत्साधनाभावयोपरपीष्टत्वेन धर्मकार्यत्वात्, इष्टसाधनत्वस्य तद्विषयनिश्चयस्य वा विधित्वात्। तथा च मोक्षस्य दु:ख-तत्साधनलक्षणशरीरद्वयाभावकार्यतया नित्यत्वोपपत्तेर्धर्मकार्यत्वमविरुद्धम्। अत:-''अशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत:'' इति शरीरप्रतिषेध:, प्रियाप्रियस्पर्शनप्रतिषेधश्च मोक्षे धर्मकार्यत्वेऽप्युपपन्न इति, न; तस्याशरीरत्वस्य स्वत: सिद्धत्वाद् धर्मकार्यत्वानुपपत्ते:। **''अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति''॥ ''अप्राणो ह्यमना:''**

''परतः परः''। ''अचक्षुःश्रोत्रं तदपाणिपादम्''। ''स पर्यगाच्छक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धमि'' त्यादिश्रुतिशतेभ्यो हि शरीरावस्थानकालेऽपि तदभावं वदन्तीभ्यः स्वाभाविकं मोक्षस्याशरीरत्वं सिद्धम्। *ननु* अशरीरत्वं शरीरद्वयध्वंसः, स कथमात्मनः स्वभावः स्यात्? तस्याभावरूपत्वात्, जन्यत्वाच्चेति-चेत्, *न*; आरोपिताभावस्याधिष्ठानैकस्वरूपत्वादभावत्वा-सिद्धेः।*एतेन*-तस्य जन्यत्वमप्यसिद्धम्। शरीरद्वयमात्मनः पारमार्थिकमेव, नारोपितमिति चेत्, न; उदाहृतश्रुतिशतविरोधात्, आरोपितत्वस्याध्यासभाष्य उपपादितत्वाच्च। न च तत्पारमार्थिकत्वमङ्गीकुर्वतो मोक्ष उपपद्यते; तन्निराकरणकारणाभावात्। धर्म एवोक्तस्तन्निराकरणकारणमिति-चेत्, न; धर्मस्य शरीद्वयहेतुत्वनियतत्वेन वैपरीत्यात्तद्धेतुत्वानुपपत्तेः।। *ननु* उक्तमिष्टमात्रस्य धर्मो हेतुः। इष्टं च द्विविधम्-सुखम्, दुःखाभावश्च। तत्र यदा सुखमुद्दिश्य धर्मः क्रियते, तदा तद्भोगायतनतया शरीरद्वयमपि तेन धर्मेणोपजन्यते; तदन्तरेण तत्फलभोगानुपपत्तेः। अत एव 'जात्यायुर्भोगलक्षणं कर्मफलमि'त्याहुः। यदा तु स एव धर्म आत्यन्तिकदुःखनिवृत्तिमुद्दिश्य क्रियते, तदा शरीरद्वयनिवृत्तिमन्तरेणात्यन्तिकदुःखानिवृत्तेस्तत्फलस्यासम्भवात्, ''न ह वै सशरीरस्य सतः प्रियाप्रिययोरुपहतिरस्ती''ति श्रुतेः, तन्नान्तरीयकतया शरीरद्वयाभावोऽपि तेन धर्मेण जन्यत इति। अत एव 'एकविंशतिप्रभेदं दुःखमि'त्याहुः। न च-धर्मस्यात्यन्तिकदुःखाभावसाधनत्वे नास्ति मानमिति-वाच्यम्; ''धर्मं व्याख्यास्यामः'' इति प्रतिज्ञाय, को धर्मः? इत्यपेक्षायां ''यतोऽभ्युदय-निःश्रेयससिद्धिरि''ति तल्लक्षणं वदतः कणादस्य स्मृतेरेव तन्मानत्वादिति-चेत्, *न*; सुख-तत्साधनान्यतरमुद्दिश्यैव सर्वत्र वेदे धर्मविधानस्य दर्शनात्, तन्नान्तरीयकतयैव दुःखाभावस्य ततः सिद्धत्वात्, स्वातन्त्र्येण तत्साधकत्वे प्रमाणाभावात्। **न च-कणादस्मृतिरेव तत्र प्रमाणमिति-वाच्यम्; तत्स्मृतेः साधर्म्य-वैधर्म्यलक्षणधर्माभिप्रायत्वात्, विविदिषाद्वारा ज्ञानोत्पादेन परम्परया धर्मस्य मोक्षसाधकत्वाभिप्रायत्वाद्वा ततो धर्मस्य साक्षान्मोक्षहेतुत्वासिद्धेः।।** *एतेन*-इष्टमात्रमुद्दिश्य धर्मो विधीयत इति-*अपास्तम्*; स्वर्गादीष्टविशेषोद्देशेनैव तत्तद्धर्मविशेषाणां विधानात्। आत्मोपासनाख्यो धर्मविशेषो मोक्षोद्देशेन विधीयत इति-चेत् न; तद्विधेर्निराकरिष्यमाणत्वात्। अपि च नाभावः कर्मसाध्यः; तस्य कर्म-तत्फलनिरासरूपत्वात्। स्वस्वफलनिरासस्य कर्मसाध्यत्वाभ्युपगमे वा कदाऽपि संसारो न स्यात्। कर्मान्तरसाध्यत्वाभ्युपगमे चानवस्थानात् कदापि संसारनिवृत्तिर्न स्यात्। तस्मात् स्वापादिवत् कर्मोपरमे स्वयमेव संसारोपरमो वाच्यः, न कर्मसाध्यः; अन्यथा स्वाप-प्रलययोरपि कर्मसाध्यत्वापत्तेः। कारणे कार्यलयो न कर्मसाध्यः; तदुपरमसाध्यत्वात्। सह कारणेन तु कार्यलयो धर्मसाध्यो भविष्यतीति-चेत्, न; कारणलयहेतोरेव तल्लयसिद्धेः पृथग् धर्मस्य तद्धेतुत्वकल्पनानुपपत्तेः। अस्त्वेवम्, तथाऽपि धर्म एव कारणलये हेतुरिति-चेत्, नः विकल्पासहत्वात्।

तथाहि-तत् किं कारणमविद्या? किं वान्यत्? नाद्यः; तस्य ज्ञानैकनाश्यत्वेन धर्मनाश्यत्वानुपपत्तेः। अन्यत्वेऽपि सादि? अनादि वा? नाद्यः; दत्तोत्तरत्वात्, तस्य स्वतः कारणनाशाद्वा लयसिद्धेरित्युक्तत्वात्। द्वितीयोऽपि किं भावः? अभावो वा? इति। भावत्वेऽपि किमनिर्वचनीयः? सत्यो वा? इति। नाद्यः तस्याविद्यात्मकत्वेन तदन्यत्वासिद्धेः, सिद्धौ वा तस्याप्यविद्यासमानयोगक्षेमत्वेन ज्ञानैकनाश्यत्वात्। न द्वितीयः; तादृशपदार्थे प्रमाणाभावात्, सत्यस्यानादिभावस्य नित्यत्वनियमविरोधाच्च। न द्वितीयः; तस्य प्रतियोग्येकनाश्यत्वाद् धर्मनाश्यत्वानुपपत्तेः, अभावस्य जगत्कारणत्वानुपपत्तेश्च। आद्येऽपि किमात्मा? अन्यो वा? नोभयथाऽपि तस्य धर्मनाश्यत्वमुपपद्यते; नित्यत्वव्याघातात्। तस्माद्वार्तमेतत्, यद् धर्मनिबन्धनमात्मनोऽशरीरत्वम्। अतो नित्यमेवात्मनो मोक्षाख्यमशरीरत्वं सिद्धमिति। तदिदमाह भगवान् भाष्यकारः- ***न; तस्य स्वाभाविकत्वादित्यादिना***॥ *ननु* आत्मैकस्वभावत्वेनाशरीरत्वाख्यस्य मोक्षस्य नित्यत्वेऽपि पराभिमतपृथिव्यादिवत् परिणामि नित्यं तद् भविष्यति। तथा च तत्परिणामस्य धर्मसाध्यत्वादुपपद्यते मोक्षस्य धर्मकार्यत्वम्। अत एव नित्यसुखाभिव्यक्तिर्मुक्तिरित्याशङ्क्य, ''अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत् तत् पश्यसि तद्वद॥'' ''अज आत्मा महान् ध्रुवः।'' ''एष नित्यो महिमा ब्राह्मणस्य। न कर्मणा वर्धते नो कनीयान्'' इत्यादिश्रुतिशतेभ्यस्तस्य कूटस्थनित्यत्वसिद्धेर्नैवमित्याह- ***तत्र किञ्चित् परिणामिनित्यमित्यादिना***। *तत्र=नित्येषु मध्य इत्यर्थः।* *जगन्नित्यत्ववादिनाम्=मीमांसकानामिति यावत्। *गुणाः*=सत्वरजस्तमांसि साम्येन वैषम्येण व परिणममाना नित्या एवेति। *ननु*-उदाहृतश्रुतिभिर्ब्रह्मणोऽशरीरस्य धर्माद्यतीतत्वेन कूटस्थनित्यता प्रतिपाद्यते, न मोक्षाख्यस्याशरीरत्वस्य। तथाच तस्य परिणामिनित्यत्वाद् धर्मसाध्यत्वे किं बाधकमिति? नेत्याह- ***अतस्तद् ब्रह्मेति***॥ जिज्ञास्यब्रह्मण एवाशरीरत्वलक्षणमोक्षत्वात्, तस्य व कूटस्थनित्यत्वात्, मोक्षस्य तद्रूपत्व-सिद्धेरित्यभिप्रायः। *ननु*-भवतु नाम मोक्षाख्यमशरीरं कूटस्थनित्यम्, न कर्तव्यविध्यनुप्रवेशि; धर्माद्यतीतत्वात्। जिज्ञास्यं ब्रह्म तु परिणामिनित्यत्वात् कर्तव्यविध्यनुप्रवेशि भविष्यतीति-नेत्याह- ***अतस्तद्ब्रह्मेत्यादि***॥ यत एव धर्माद्यतीतत्वेन कूटस्थनित्यतया स्वयंज्योतिष्ट्वादिरूपेण च मोक्षाख्यमशरीरं सिद्धम्, अतस्तदेव प्रस्तुतं जिज्ञास्यं ब्रह्म भवितुमर्हति; तादृशादन्यत्र ब्रह्मत्वासिद्धेरित्यर्थः। भवत्वेवम्, तावताऽपि परस्य किमनिष्टं स्यात्? तत्राह- ***तद्यदीत्यादिना***॥ *तत्=जिज्ञास्यत्वेन प्रस्तुतमुक्तलक्षणं ब्रह्मेत्यर्थः। तथाचोदाहृतश्रुतिशतविरोध इति भावः। न केवलं श्रुतिविरोध एव, सर्वतन्त्रसिद्धान्तविरोधश्चेत्याह- ***नित्यश्च मोक्षः सर्वैर्मोक्षवादिभिरभ्युपगम्यत इति***॥

न च-पृथिव्यादिवत् परिणामिनित्यत्वं ब्रह्मणः, येन नित्यसुखाभिव्यक्तिलक्षणो मोक्षः क्रियातो भविष्यतीति-वाच्यम्; दृष्टान्तासिद्धेः। नहि परिणामि, अथ न नित्यमिति सम्भवतिः, विरोधात्। परिणामो

हि वस्तुनस्तत्वतोऽन्यथाभावः। न च पूर्वरूपापरित्यागे वस्तुनस्तत्वतोऽन्यथाभावः सम्भवति। नहि दुग्धरूपमपरित्यजद् दुग्धं दधिभावमनुभवति? बीजरूपमपरित्यजद्वा बीजं वृक्षभावम्; प्रत्यक्षविरोधात्, दुग्धादिनित्यत्वापाताच्च। अपिच स्वरूपमनवहायापि चेद्वस्तुनोऽन्यथाभावोऽङ्गीक्रियते शुक्तेरिव रजतभावः, तर्हि विवर्तवादापत्तिः। *ननु* यद्धि वस्त्वन्यथाऽन्यथा परिणमते, अथ च तत्र तत्र स्वबुद्धिव्यपदेशौ न जहाति, तत् परिणामि नित्यमित्युच्यते; पृथिव्यादिमहाभूतानि च तथा, यतो वृक्ष-घट-गवादिरूपेणान्यथा परिणममानान्यपि न पृथिवीत्यादिबुद्धिव्यपदेशौ जहति। न चैवं दुग्धादि; दधिबुद्धिव्यपदेशकाले तद्बद्धिव्यपदेशाभावात्। अत एव न तन्नित्यत्वापत्तिः। नापि प्रत्यक्षविरोधः। न चैवं विवर्तवादापत्तिः; बाधाभावाद् इति-चेत्, *न*; एवमपि सुवर्णादेः परिणामिनित्यत्वप्रसङ्गात्। सुवर्ण-देहादीनां स्वस्तिकरुचक-बाल्य-कौमारादिभेदेन परिणममानानां तत्र तत्र स्वबुद्धिव्यपदेशापरित्यागात्। नच-एवमस्तु तन्नित्यत्वमिति-वाच्यम्; भौतिकत्वविरोधात्, अपसिद्धान्ताच्च, देहात्मवादप्रसङ्गाच्च। देहस्य परिणामिनित्यत्वाभ्युपगमे तेनैवात्मना स्वर्गाद्युपभोगोपपत्तौ तदतिरिक्तपरिणामिनित्यात्मकल्पने प्रमाणाभावात्। 'अहं मनुष्यः' इत्यादिप्रत्यक्षविरोधेन, ''ब्राह्मणो यजेते'' त्यादिशास्त्रविरोधेन च कल्पनाया अप्रसराच्च। *अथैवं मन्यसे* औषधादिना सुवर्णे भस्मीकृते परिणते च देहे भस्मीभूते तद्बद्धिव्यपपदेशौ व्यभिचरतः, नैवं पृथिव्यादौ; सर्वदा सर्वावस्थायां तयोः सत्वादिति-चेत् *न*; तददृष्टान्तेनं महाभूतेष्वपि कदाचित् तयोरभावस्यानुमानात्, तेषु तद्व्यभिचाराभावासिद्धेः। तथाहि-पृथिव्यादिमहाभूतानि, कदाचित् स्वबुद्धिव्यपदेशानर्हाणि, भूतत्वात्, परिणामिद्रव्यत्वाद्वा; देहादिवत्। न चैवं भौतिकत्वमुपाधिः; लाघवाद् भूतत्वस्यैव प्रयोजकत्वेन साध्याव्यापनात्, मन्त्रार्थवाद-पुराणेतिहासाद्यनुग्रहाच्च। तेभ्यो हि-इदं जगदग्रे नामरूपरहितमव्याकृतमासीत्, पश्चान्नाम-रूपाभ्यां व्याक्रियतेति स्वरसतोऽवगम्यते। अतस्तैरिदमनुमानमनुगृहीतं भवति; अन्यथा तेषां बाधापत्तेः। अपिच भूत-भौतिकयोरभेदस्याप्यङ्गीकाराद् भौतिकनाशे भूतनाशोऽप्यावश्यक एव; अन्यथा तयोरत्यन्तभेदाद् गवाश्ववत् कार्य-कारणभावानुपपत्तेः। तस्मात् श्रुति-स्मृति-न्यायविरोधात् परिणामिनः पृथिव्यादेर्नित्यत्वं मनसाऽपि न चिन्तयितुं शक्यम्, दूरत एव प्रतिपादयितुमिति।।

एतेन-सांख्यानां गुणनित्यत्वमपि-*प्रत्याख्यातम्*।। तस्मान्न पृथिव्यादिदृष्टान्तेन मोक्षस्य परिणामिनित्यत्वाभिधानं युक्तम्? इति। अपिच का तावन्नित्यसुखाभिव्यक्तिरुच्यते, यस्याः परिणामिनित्यत्वमभ्युपगतं भवता। किं नित्यस्य सुखस्याभिव्यक्तिः? किं वानित्या सुखस्याभिव्यक्तिरिति? अभिव्यक्तिरपि किमुत्पत्तिः? ज्ञप्तिर्वा? तत्र न तावद् नित्यस्य सुखस्याभिव्यक्तिः; अभिव्यक्तिश्चोत्पत्तिरिति; नित्यस्योत्पत्तिविरोधात्। ध्वंसवदविरोध इति-चेत्, न; नित्यभावस्योत्पत्तिविरोधात्, ध्वंसस्याभावत्वाच्च। समाकारेण परिणाम एव नित्यसुखस्योत्पत्तिरिति-चेत्, न; नित्यस्य परिणामप्रतिषेधात्, संसारदशायामपि

तत्परिणामप्रसङ्गाच्च। अविद्यादिप्रतिबन्धान्न तस्यां तत्परिणाम इति चेत्, माऽऽस्तां परिणामः, नित्यसुखं तु कूटस्थमुपलभ्येत। तदुपलम्भोऽप्यविद्यादिप्रतिबन्धान्नेति चेत्, तर्हि मोक्षेऽपि तदुपलम्भकेन्द्रियादेरभावादेव तनदुपलम्भः स्यात्। तदनुपलम्भेऽपि तत्परिणाम उपलभ्यत एवेति- चेत् न; तुल्योगक्षेमत्वात्। करणाद्यभावे उपलम्भानुपपत्तिस्तुल्यो दोषः। परिणामानुपपत्तिश्चाधिकः। मोक्षकाले स्वप्रकाशं तत् सुखमिति चेत्, सत्यम्; संसारदशायामपि तत्प्रसङ्गात्। नह्यग्निः कदाचिदुष्णस्वभावः कदाचिच्च शीतस्वभाव इति घटते; स्वभावहानापत्तेः। संसारदशायां स्वप्रकाशमपि मेघावृतादित्यवदविद्यावृतत्वान्न प्रकाशत इति चेत्, न; तत्प्रतिबन्धकल्पने भवतां प्रमाणाभावात्। ''न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूवे'' त्यादिश्रुतिरेव संसारदशायां स्वप्रकाशनित्यात्मस्वरूपसुखप्रतिबन्धे प्रमाणमिति चेत्, *सत्यम्*; आगतं तर्हि भवता श्रौतमार्गे। एवं च सति ज्ञानेन प्रतिबन्धनिरासे स्वयंप्रभनित्यसुखानुभवे श्रौते सिद्ध इष्टासौ निष्प्रामाणिकी निर्युक्तिका वाऽश्रौती तत्परिणामकल्पना भवतः। *एतेन*-नित्या सुखस्य ज्ञप्तिः, नित्या वा सुखस्योत्पत्तिः, ज्ञप्तिर्वेति पक्षा अपि प्रत्याख्याता- *वेदितव्या*; तेष्वपि पक्षेषूक्तदोषानतिवृत्तेः। तथाहि-नित्यसुखस्य ज्ञप्तिर्यदि नित्या, तदा संसारदशायामपि तत्प्रसङ्गः। प्रतिबन्धकल्पनायां चास्मन्मतप्रवेशः नित्या चेत्, मोक्षकरणाभावादसम्भवः। तथा यदि नित्योत्पत्तिः, व्याघातः, उत्पत्तिश्च नित्या चेति व्याहन्यते। सन्तानरूपेणाव्याघात इति चेत्, न; सन्तानस्यातिरिक्तस्य सन्तानिभ्योऽसत्त्वात्, सत्वे वा तस्यैव वक्तव्यत्वात्, मोक्षदशायां करणाद्यभावेन सुखोत्पत्तिसन्तानस्यासम्भवाच्च। नित्या ज्ञप्तिरिति पक्षस्तु प्रत्याख्यात एवेत्यास्ताम्। सर्वथाऽपि मोक्षो न ज्ञानातिरिक्तं साधनान्तरमपेक्षते; ज्ञान-तत्फलमोक्षयोरव्यवहितानन्तर्यश्रवणादित्याह- ***अपि च ब्रह्म वेदेत्यादिना***॥

व्यापारवद्दीपतमोनिवृत्तिवत्तत्समकालत्वश्रवणादपि न मध्ये व्यापारन्तरकल्पनमित्याह- *तथा **''तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे'' इत्यादि***॥ *ननु*-मोक्षस्य साध्यत्वोक्तेर्न ज्ञानमात्रात्तत्सिद्धिः; तस्याभिव्यञ्जकत्वेन कारकत्वानुपपत्तेरित्यत आह- *''**त्वं हि नः पिते**'' त्यादि*॥ तथा च ज्ञानादविद्याप्रतिबन्धनिवृत्तिमात्रेण मोक्षस्य साध्यत्वोपचारः, न परमार्थतस्तस्य साध्यत्वमस्ति; अनाद्यन्तत्वादिति भावः। तत्वज्ञानादपि केवलाद् मिथ्याज्ञाननिवृत्तिमात्रेणैव मोक्षः, न ततो व्यापारान्तरमपेक्षते, इत्येतावत्यर्थे गौतमप्रणीतं सूत्रं प्रमाणयति- ***तथाचाचार्यप्रणीतं न्यायोपबृंहितं सूत्रमिति***॥ इदं हि न्यांयशास्त्रस्य प्रयोजनपरीक्षापरं द्वितीयं सूत्रम्। प्रथमसूत्रेण हि **प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभस-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः'' इत्यनेनात्मतत्वसाक्षात्काराद् मोक्षप्राप्तिर्भवतीति** प्रयोजने सूचिते, मैवम्; कृतात्मसाक्षात्कारस्यापि व्यासादेः पूर्ववत्संसारोपलब्ध्येर्न तत्त्वज्ञानान्मोक्ष इत्याशङ्क्य, मैवम्; तत्त्वज्ञानिनां पूर्ववत्संसारोपलब्ध्यसिद्धेः, तत्त्वज्ञानेन हि मिथ्याज्ञानं निवर्तते, इति

सर्वानुभवसिद्धम्, तन्निवृत्तौ हि तन्निबन्धन-रागद्वेषादिनिवृत्तिः, देहादावहंममाभिमानलक्षणमिथ्याज्ञाननिबन्धनत्वाद्राग-द्वेषादेः, तदपाये च धर्माधर्मलक्षणप्रवृत्त्यपायः; निर्दुष्टपुरुषे धर्मानुत्पत्तेः, दोषमूलत्वात्तयोः, प्रवृत्त्यपाये जन्मापायः; तस्य धर्माधर्ममूलत्वात्, तदपाये च दुःखापायः; तस्य शरीरमूलत्वात्, व्यासादेश्च प्रारब्धाधिकारनिबन्धनत्वात् शरीरस्थितेस्तदपाये चापवर्गसिद्धिरित्याह- **''दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामिति*॥** दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरत्वं तु मिथ्याज्ञानादेः सौत्रपाठक्रमेण, तदनन्तरत्वं च दोषादेरिति बोद्धव्यम्।। तर्हि किं गौतमाभिप्रेततात्वज्ञानान्मिथ्याज्ञानापायोऽभ्युपेतः? नेत्याह- ***मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवतीति*॥ श्रुतिविरोधेन** तदभिप्रेतं ज्ञानं तत्त्वज्ञानमेव न भवति, भ्रान्त्या तु तत्र तत्त्वज्ञानत्वाभिमानः। अतो न ततो मिथ्याज्ञान्ननिवृत्तिरित्याशयः।।

ननु अभियुक्ताभिमततत्त्वज्ञानविरोधादिदमेव ब्रह्मात्मैकत्वविज्ञानमतत्त्वज्ञानं किं न स्यात्? न चैवं श्रुतिविरोधः स्यादिति वाच्यम्; तद्विज्ञानस्य संपदादिरूपत्वेनापि श्रुत्युपपत्तेः। दृष्टानि हि श्रुतौ तादृशानि संपदादिलक्षणनि बहूनि विज्ञानानि। तथाहि-संपन्नाम यत्किंचिद्धर्मसामान्येनान्यस्य रूपं संपाद्य चिन्तनम्। तद्यथा-''अनन्तं वै मनोऽनन्ता विश्वे देवाः'' इति मनसो विश्वदेवानां चानन्तत्वधर्मसामान्याद् मनसि विश्वदेवत्वं संपाद्य चिन्तनं विधीयते; एवं ''तत्त्वमसी'' त्यादावपि चेतनत्वादिधर्मसामान्यादात्मनि ब्रह्मत्वं संपाद्योपासनं संपद्रूपं भविष्यति, *अध्यासो वा भविष्यति*।। अध्यासो नाम स्वरूपातिरस्कारेणान्यस्मिन्नन्यतामारोप्य चिन्तनम्। तद्यथा-''मनो ब्रह्मेत्युपासीत,'' ''आदित्यो ब्रह्मेत्यादेशः'' इत्यादौ मनआदित्याद्यधिष्ठानरूपमतिरस्कृत्यैव तस्य ब्रह्मत्वेनानुचिन्तनम्। तद्वज्जैवं रूपमात्मनोऽतिरस्कृत्यैवाहं ब्रह्मास्मीति ब्रह्मत्वमारोप्य चिन्तनं भविष्यति। एतेनाध्यास-संपदुपासनयोर्भेदो दर्शितः। यत्किञ्चिद्धर्मसामान्यापुरस्कारेणाधिष्ठानप्राधान्येनाध्यासः प्रवर्तते। यथा शालग्रामस्य यद्रूपं तदेव विष्णो रूपमिति। यत्किच्चिद्धर्मसामान्यपुरस्कारेणाधिष्ठानरूपं तिरस्कृत्याधिष्ठेयरूपप्राधान्येन च संपत् प्रवर्तत्ते, यथा विश्वे देवा एव मनः; उभयमनन्तगुणकमिति। विशिष्टक्रियायोगनिबन्धनं वा जीवब्रह्माभेददर्शनं भविष्यति; यथा ''वायुर्वाव संवर्गः'' इत्यत्र विश्वसंवरणक्रियायोगाद्वायु-प्राणयोरभेदेनोपासनम्, तद्वज्जीवस्यापि स्वादृष्टद्वारा ब्रह्मवज्जगत्स्रष्टृत्वात् तादृशक्रियायोगेनाभेदेनोपासनं तयोरविरुद्धमिति। ***फलं न श्रुतमिति चेत्***=*अथैवं मन्यसे 'अनन्तं वै मनोऽनन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति'' इत्यादौ संपदाद्युपासने फलं स्वप्रकरणं श्रुतम्, नैवम्-'अहं ब्रह्मास्मी' त्युपासने फलं स्वयोग्यं किञ्चित्स्वप्रकरणे श्रुतम्; अतो व्यर्थाऽसावुपासनाकल्पनेति चेत्, *न*; स्वप्रकरणपठितार्थवादगतमोक्षफलसद्भावात्तदश्रवणासिद्धेः। *तदयोग्यं तत्फलमिति चेत्, आह-भवेदर्थवादगतं फलं तस्य, यदि तद्योग्यं भवेत्, न चैवम्; क्रियाफलस्यानित्यत्वोक्तेः, मोक्षस्य

नित्यत्वोक्तेश्चेति चेत्, *एवं तर्हि* विश्वजिन्न्यायेन फलं तद्योग्यं स्वर्गः कल्प्यताम्। *अस्तु वाऽऽज्यावेक्षणन्यायेन क्रियाङ्गकर्तृसंस्कारो मदभिप्रेततत्वज्ञानाङ्ग कर्तृसंस्कारो वा; यथा ''पत्न्यवेक्षितमाज्यं भवती'' त्यत्र पत्न्यवेक्षणेन। क्रियाङ्गकर्तृमाज्यं संस्क्रियते, तथा 'ब्रह्माहमस्मी' त्युपासनाविज्ञानेन क्रियाङ्ग तत्त्वज्ञानाङ्गं वा कर्ता संस्क्रियत इति। तस्मान्नास्त्यार्षतत्त्वज्ञानस्य श्रुतिविरोधेनातत्त्वज्ञानत्वमिति। तदेतत्सर्वमाशङ्कितं प्रत्याह- ***नचेदं ब्रह्मात्मैकत्वविज्ञानं संपद्रूपमित्यादिना***॥ कुतो नैते पक्षा भवेयुरिति? तत्राह- ***संपदादिरूपत्वे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने ''तत्त्वमस्यहं ब्रह्मास्म्यमात्मा ब्रह्मे'' त्येवमादीनां वाक्यानां ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमन्वयो बाध्येतेति***॥

एतानि हि ''तत्त्वमसी'' त्यादीनि वाक्यानि महावाक्यानि भवन्ति; सर्वेषामवान्तरपदार्थप्रतिपादकानां वाक्यानामेतदाकाङ्क्षयैतैरेकवाक्यतापन्नत्वात्, यथा समिदादिवाक्यानां दर्श-पौणमासवाक्येन तदाकाङ्क्षयैकवाक्यतापन्नत्वाद् भवति ''दर्श-पौर्णमासाभ्यां यजेत स्वर्गकामः'' इति वाक्यं तेषां महावाक्यमिति, तद्वत्। तथा च सर्वोऽपि वेदान्तगतो ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरः पदसमुदाय एतेषामेव ''तत्त्वमसी'' त्यादिमहावाक्यानां भवतीत्यतो वस्तुप्रकाशकसर्ववेदान्तभागस्यापि पीडाऽनेन दर्शिता भवति। वस्तुग्रहणेनारोपितब्रह्मात्मैकत्वप्रतिपादनपरत्वं वारयति॥

कथं पुनः-''तत्त्वमसी'' त्यादिवाक्यैकवाक्यतापन्नपदसमन्वयस्य ब्रह्मात्मैकत्वप्रतिपादनपरत्वमवधार्यते? उपक्रमोपसंहारादिषड्विधलिङ्गादिति ब्रूमः। तथा चोक्तम्-''उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये''॥ इति। तदेव हि लोके वेदे वाऽतत्परमित्युच्यते, योऽर्थो येन न विवक्ष्यते; यथा विषभोजनवाक्यम्, यथा वा वायुक्षेपिष्ठादिवाक्यम्; स्वार्थस्याविधित्सितत्वात्। विधित्सितत्वाविधित्सितत्वे एव हि विवक्षितत्वाविवक्षितत्वे इति मन्तव्यम्। एतच्च ग्रहाधिकरणवार्तिके सुविस्पष्टम्। विधित्सितत्वमप्यज्ञातज्ञापनमेवेत्यवधार्यम्। तथा च तत्प्रतीतिशेषत्वमेव लोकवेदसाधारणं तात्पर्यमुक्तं भवति। वक्ष्यमाणरीत्या प्रमाणान्तरसंवादाद्यभावो वा तात्पर्यमित्यन्यदेतत्॥

अविवक्षा तु तत्रैव भवति, यत्र प्रमाणान्तरसंवाद-विसंवादौ प्रयोजनाभावो वा, यत्र यद्वस्तु लोके वेदे वोपक्रम्य मध्ये वा परामृशन्ति, उपसंहरन्ति च, तत्र प्रमाणान्तरसंवादाविसंवादौ प्रयोजनाभावो वा नान्यतरोऽपि दृष्टः, यथा ज्वरितस्य कषायपानादौ, यथा वा स्वर्गकामस्य ज्योतिष्टोमादाविति स्वाभाविकप्रतिबन्धग्रहादुपक्रमोपसंहारौ भवति तात्पर्यस्य लिङ्गम्। एवमभ्यासादावपि। तत्रैव तदभावेन व्याप्तिर्द्रष्टव्या। न ह्यतात्पर्यविषयं वस्तु पुनः पुनः कथ्यते। न वा तदपूर्वम्, नापि फलवत् न च श्रूयते, नाप्युपपत्तिभिरुपपाद्यते, इति कुत्रचिल्लोके वेदे वा दृष्टचरमिति॥

उपक्रमोपसंहारयोस्तु नैकैकस्य तात्पर्यलिङ्गत्वम्; व्यभिचारात्। दर्श-पौर्णमासवाक्ये व्रतेनोपक्रम-दर्शनात्, छान्दोग्य-मुण्डकयोर्गार्हस्थ्याश्रमशिरोव्रताभ्यामुपसंहारदर्शनादिति। तथा-चैकैकमप्येतेषां यत्रास्ति, तत्र नातात्पर्यं वक्तुं शक्यते, किमु वक्तव्यमेतानि लिङ्गानि यत्र संभूय वर्तन्त इति। वर्तन्ते चैतानि संभूय ब्रह्मणि श्रुतेस्तात्पर्यलिङ्गानि।।

तथाहि-छान्दोग्यषष्ठप्रपाठके-''सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमि''मि तदुपक्रमः। ''ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीति'' तस्यैवोपसंहारः। तस्यैव ''तत्त्वमसीति'' नवकृत्वोऽभ्यासः। अपूर्वत्वन्तु तस्य प्रमाणान्तरानधिगतत्वात् सुप्रसिद्धमेव। तद्विज्ञानफलकीर्तनं च-''आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये'' इति। ''येनाश्रुतं श्रुतं भवती'' त्याद्यर्थवादः। उपपत्तिप्रदर्शनं च ''यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि'' त्यादि।।

बृहदारण्यकेऽपि मैत्रेयीब्राह्मणे ''नवा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'' इत्यात्मन उपक्रमः। ''विज्ञातारमरे केन विजानीयादि'' ति तस्यैवोपसंहारः। ''आत्मनि दृष्टे श्रुते मते विज्ञाते'' ''अयमात्माऽनुच्छित्तिधर्मा'' ''सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदे'' त्यादिस्तस्यैवाभ्यासः। अपूर्वत्वं तु सुप्रसिद्धमेव। ''यत्र त्वस्य सर्वमात्मैवाभूदि'' ति सर्वात्मभावलक्षणफलकीर्तनम्। ''एतावदरे अमृतत्वमि'' त्यर्थवादः। ''यथा दुन्दुभेर्हन्यमानस्ये'' त्याद्युपपत्तिः। एवमन्यत्राप्यूह्यम्। एवं च सति षड्भिर्लिङ्गैर्वेदान्तवाक्यानां पदसमन्वयस्य ब्रह्मात्मैकत्ववस्तुप्रतिपादनपरत्वावधारणात्संपदादिरूपत्वे तद्विज्ञानस्य कल्प्यमाने स्यादेव तद्विरोधः।।

न स्यात्; तद्वाक्याद् ब्रह्मात्मैकत्ववस्तुविषयप्रमाया एवानुत्पद्यमानत्वात्, पदार्थयोः परस्परान्वययोग्यताविरहात्। तथाहि-''तत्त्वमसी'' तिवाक्ये तावत्तत्त्वंपदयोरेकविभक्त्येकवचनान्तत्वेन सामानाधिकरण्यात्तत्पदार्थयोर्विशेषण-विशेष्यभावेनान्वयो वाच्यः। स च न तादात्म्यं समवायो वा नीलोत्पलादाविव; अकार्यकारणद्रव्ययोस्तदसंभवात्, नाप्यभेदः; विरुद्धयोस्तदयोगात्, सर्वज्ञत्वादिगुणविशिष्टं हि सत्पदवाच्यं पूर्वोक्तं परोक्षं तदा परामृश्यते, त्वमा तु तद्विपरीतगुणको जीवः श्रोतुरात्माऽपरोक्षोऽभिधीयते। न चैवंविधयोरैक्यं शीतोष्णयोरिव संभावयितुमपि शक्यम्; किं पुनः श्रुतिप्रमाणेन प्रमाणयितुमिति!! विरुद्धधर्मवत्त्वस्य भेदव्याप्तत्वात्। *एतेन*-लक्षणया विरुद्धांशं परित्यज्याविरुद्धयोर्विशेष्ययोरैक्यप्रतिपादनमिति- *अपास्तम्*; विरुद्धधर्मयोरैक्यासंभवादेव। *ननु* न तयोर्विरुद्धधर्मत्वं पारमार्थिकम्; अविद्याकृतत्वादित्युपपादितमधस्तात्। तथा च तयोः परमार्थत

एकस्वभावत्वात्तदैक्योपपादनं श्रुतेर्लक्षणयोपपन्नमिति चेत्, न; अन्योन्याश्रयात्। उक्तविधया श्रुत्या तदैक्यसमर्पणे सति भेदकधर्माणामविद्यात्मकत्वसिद्धिः, तत्सिद्धौ च श्रुत्या तदैक्यसमर्पणमिति।

स्यादेतत्-महावाक्यं ह्येतदवान्तरवाक्यैः पदार्थशोधकैरेकवाक्यतां गच्छद्भिर्दृश्यत्वाद्युक्तहेतुभिश्चोपाधीनामविद्यात्मत्वप्रदर्शनेन षड्विधैर्लिङ्गैर्वस्तुपरत्वावधारणेन च शोधिततत्त्वंपदार्थयोरैक्यं लक्षणया बोधयन्नान्योन्याश्रयमावहतीति चेत्, *सत्यम्; तथाऽपि लक्षणैव न संभवति। लक्षणावृत्तिर्हि द्विधा भवति-जहदजहत्स्वार्थभेदात्। तत्र जहत्स्वार्था नाम-स्वार्थं हित्वा तदविनाभूते वृत्तिः। तद्यथा-"छत्रिणो गच्छन्ती" त्यत्रैकसार्थवाहित्वलक्षणेन प्रवृत्तिनिमित्तान्तरेणाच्छत्रिच्छत्रिसमुदाये छत्रिशब्दस्य वृत्तिः। *एतेन*-स्वार्थविनाभावो न सर्वत्र लक्षणायामपेक्ष्यते; 'छत्रिणो गच्छन्ती" त्यत्र व्यभिचारादिति तार्किकडिम्भभाषितम्=*अपास्तम्*॥ सामीप्यवदेकसार्थवाहित्वस्याविनाभूतत्वात्। तथा चाहुः-"अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते" इति। एवं "काकेभ्यो दधि रक्ष्यतामि" त्यादावपि दध्युपघातकत्वादिनिमित्तेनाजहत्स्वार्था बोद्धव्या। न चैतयोरेकतरलक्षणाऽपि प्रकृते संभवति॥

तथाहि-न तावत्तत्वंपदाभ्यां जहल्लक्षणया जीवेश्वरत्वरूपैक्यं बोधयितुं शक्यते; तयोः स्वार्थैकदेशत्वात्, नाप्यजहल्लक्षणया; अंशतो विरोधादिति। जहदजहल्लक्षणया बोध्यतामिति चेत्, न; तादृशलक्षणावृत्यन्तरकल्पने प्रमाणाभावात्। "सोऽयं देवदत्तः" इत्यादौ प्रत्यभिज्ञामूलके वाक्ये क्लृप्ता सेति चेत्, नः असिद्धेः। तत्तेदन्ताविशिष्टयोः पदार्थत्वाद्विशेषणयोश्च परस्परविरोधादन्वयानुपपत्तेः। भागलक्षणायान्तु विशेष्यमात्रयोस्तत्सद्भावात्कथमसिद्धिरिति चेत्, नः विशेषणयोस्तत्तेदन्तयोः पदार्थत्वावच्छेदकत्वेन प्रधानान्वयाप्रतियोगित्वाद्विरोधाभावात्; अन्यथा 'गामानय' 'गौर्गच्छति' 'राजपुरुषमानये' त्यादावपि लक्षणापत्तेः; गोत्वस्यामूर्तत्वेनानयनाकर्मत्वात्, राज्ञश्चानयनान्वये द्वन्द्वसमासापत्तेस्तत्पुरुषाभावप्रसङ्गात्। तस्माद्भागलक्षणाया अभावाद् लक्षणान्तरासंभवाद्विरुद्धयोस्तत्वंपदार्थयोरैक्यासंभवात्संपदादिविज्ञानविधानपरमेव तत्त्वमस्यादिवाक्यमिति।

मैवम्; "सोऽयं देवदत्तः" इत्यादावेव भागलक्षणायाः क्लृप्तत्वात्। तथाहि-"सोऽयमि" त्यभिलापमूलप्रत्यभिज्ञाप्रत्यक्षेण तावन्न तत्तेदन्ताविशिष्टयोरभेदो विषयीकर्तुं शक्यते; विरोधादतिप्रसङ्गाच्च। बाधाद् भ्रन्तित्वापत्तेः, किन्तर्हि? तदुपलक्षितदेवदत्तस्वरूपमात्रयोः; अबाधात्। एवं च सति तन्मूलप्रत्यभिज्ञाप्रत्यक्षेण यदभेदो विषयीकृतः, वाक्येनापि परप्रत्यायनार्थेन स एव विषयीकर्तव्यः; अन्यथा मूलमूलिनोर्भिन्नविषयत्वेन वाक्याप्रामाण्यापत्तेः, तद्वक्तुः प्रतारकत्वापत्तेश्च, स्वयमन्यथा प्रतीत्य परं प्रत्यन्यथोक्तत्वात्। न च "सोऽयमि" ति पदाभ्यां तत्तेदन्ताविशिष्टवाचकाभ्यां लक्षणामन्तरेणाविशिष्टदेवदत्तमात्राभेद उपस्थापयितुं शक्यते; पदोपस्थितपदार्थसंसर्गस्यैव वाक्यार्थत्वात्। न च-ताभ्यां विशिष्टोपस्थापनेऽपि योग्यतया विशेष्ययोरेवाभेदप्रतियोगित्वत्, न तद्विशेषणयोः,

पदार्थावच्छेदकत्वेनैव तयोरन्वयादिति-वाच्यम्; योग्यता हि पदार्थयोरेवान्वय उपयुज्यते, नापदार्थयोः; अतिप्रसङ्गात्, सर्वत्र लक्षणाभावप्रसङ्गाच्च, "गङ्गायां घोषः प्रतिवसती" त्यादौ शब्दात्प्रतीयमानप्रवाहाक्षिप्ततीरेण योग्यतया घोषवसतेरन्वयात्, गङ्गायास्तु तीरावच्छेदत्वेन योग्यतयान्वयापपत्तेर्लक्षणाबीजाभावात्। तस्माद्येन रूपेण पदाभ्यां पदार्थावुपस्थितौ, तयोः पदार्थयोरेवान्वयबोधे जनयितव्ये योग्यतायां तद्बोधः, असत्यां च तद्योग्यतायां बाधः, लक्षणया वा तद्योग्यपदार्थान्तरं कल्पयित्वा तद्बोध इति वक्तव्यम्, प्रकृते च ततेदन्ताविशिष्टावेव पदशक्त्योपस्थितौ पदार्थौ, न विशेष्यमात्रौ; पदार्थैकदेशस्यापदार्थत्वात्, अन्यथा 'ग्रामो दग्धः' 'पटो दग्धः' इत्यत्रापि लक्षणाया अभावप्रसङ्गात्; तत्रैव भागलक्षणायाः सर्वैरङ्गीकरणावश्यकत्वात्। अपिच तत्तेदन्तयोः किं पदार्थत्वावच्छेदकत्वात् पदार्थशरीर एव न प्रवेशोऽस्तीत्युच्यते, तथा च न विरोधः? किं पदार्थशरीरे प्रवेशेऽपि न वाक्यार्थशरीरे प्रवेशः, ततश्च न विरोध इति? नाद्यः, पदार्थत्वावच्छेदकत्वस्यापि पदार्थत्वाङ्गीकारात्, अन्यथा घटत्वादेरपदार्थत्वप्रसङ्गात्। अपि च तदेव हि पदार्थत्वावच्छेदकम्, यच्छब्दप्रवृत्तौ निमित्तम्। निमित्तं च तदेव भवति, यदवधारणं शब्दादन्यतस्तत्काले न नियमेन संभवति; अन्यथातिप्रसङ्गात्। तथा च यच्छक्यत्ववशाद् व्यक्तीनां शक्यत्वावधारणम्, स एव कथमपदार्थः स्यात्? उपजीव्यविरोधात्, *एतेन*-तदुपलक्षिते शब्दशक्त्यवधारणमिति-*अपास्तम्*; उपस्थितस्यैवोपलक्षणत्वात्, प्रमाणान्तरस्योपस्थापकस्यासंभवोक्तेः शब्दादुपस्थितावुपलक्षणत्वासिद्धेः। *ननु* शब्दशक्त्योपस्थितस्याप्यवच्छेदकधर्मस्योपलक्षणमविरुद्धम; नहि विशेषणत्वेनोपलक्षणत्वेन वा शक्त्या तदुपस्थितिः, किन्तर्हि? स्वरूपेण शक्त्या तदुपस्थितौ पश्चाद् योग्यतया विशेषणतयोपलक्षणतया वाऽन्वय इति चेत्, न; विशेषण-विशेष्यभावेनैव शब्दशक्त्या तदुपस्थितेः, अन्यथा तस्य शब्दशक्त्यवच्छेदकत्वानुपपत्तेः। अपिच विशेषणविशेष्यभावं विना स्वातन्त्र्येण घटपदाद् घट-घटत्वयोरुपस्थितौ गवादिशब्दवत्तस्यापि नानार्थत्वप्रसङ्गः। न चैदिष्टम्; लोक-वेदविरोधात्, अपसिद्धान्तप्रसङ्गाच्च। प्रवृत्तिनिमित्ताभेदान्नैवमिति चेत्, न; स्वातन्त्र्येण घटत्वाभिधाने तस्य प्रवृत्तिनिमित्तस्यैवायोगात्। अपिच यदि स्वरूपेण घटादिशब्दाद्धर्म-धर्मिणोरुभयोरुपस्थितिः, न विशेषण-विशेष्यभावेन, तर्हि घट-घटत्वशब्दयोः पर्यायतापत्तिः, नियमेन ताभ्यां यथासङ्ख्यं घटत्वविशेषण-विशेष्यकप्रतीत्योरनुपपत्तिश्च स्यात्। न च-घटत्वशब्देन धर्ममात्रमभिधीयते, न तद्विशेषणतया धर्म्यपीति-वाच्यम्; प्रकृति-प्रत्ययाभ्यामुभयार्थोपस्थापकत्वात्, प्रत्ययस्य च प्रकृत्यर्थान्वितस्वार्थबोधकत्वात्।।

एतेन-योगो नाम न रूढितो वृत्त्यन्तरमस्ति, विशिष्टार्थोपस्थितिस्तु वाक्यादेवेति-*निरस्तम्*; सर्वप्रत्ययस्य प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्य स्वशक्त्या तेनाप्यङ्गीकारात्, अन्यथा

वाक्यार्थस्यापूर्वत्वात्तद्व्युत्पत्तिं विनैव तदुपस्थितिप्रसङ्गात्, व्याकरणादिवैयर्थ्यप्रसङ्गाच्च। अवयवशक्तिग्रहार्थमेव व्याकरणादि, न विशिष्टशक्तिग्रहार्थमिति चेत्, न; वृद्धव्यवहारादेव तत्सिद्धेः। वृद्धव्यवहारसिद्धस्यैवापशब्दाद्विवेकार्थं व्याकरणादीति चेत्, न; रूढितोऽप्रसिद्धशब्दस्यापि व्युत्पादनार्थत्वाद् व्याकरणादेः; अन्यथा व्याकरणमित्यादिसंज्ञाव्याघातापत्तेः। प्रकृत्यर्थस्य लोकतः प्रसिद्धत्वेऽपि प्रत्ययार्थोऽप्रसिद्धः, अतो व्युत्पाद्य तत्प्रदर्शनार्थं व्याकरणादीति चेत्, अस्त्वेवम्; तथाऽपि प्रकृत्यन्विततयैव तदर्थान्वितस्वार्थोपस्थापकत्वात् सर्वप्रत्ययानामित्युक्तत्वात्, अन्यथा साधुत्वार्थापत्तेः, विशिष्टपदस्य विशिष्टार्थशक्तेरावश्यकत्वात्। *ननु*-प्रत्ययस्य विशिष्टार्थवाचकत्वे प्रकृतिरनुवादिका सती साधुत्वार्था स्यात्, तथा च विशिष्टशब्दस्य विशिष्टार्थवाचकत्वमसिद्धम्। विशेष्यस्य प्रकृतेरवाचकत्वादिति-चेत्, *न*; वैश्वदेवीपदलब्धद्रव्यस्यामिक्षापदेनेव प्रकृत्या तद्विशेषोपस्थापकत्वान्मिलित्वाभिधानान्तरसिद्धिरित्यास्ताम्। अपिच पङ्कजमित्यत्र योगरूढिलक्षणं वृत्तिद्वयं तैरेवाङ्गीकृतम्। अतः स्ववचनविरोधादपि योगो नास्तीत्यभिधानं साहसमात्रमिति। सर्वथाऽपि प्रकृति-प्रत्ययाभ्यां विशिष्टार्थोपस्थितेर्न घटत्वशब्देन धर्ममात्रमभिधीयते। किं तर्हि, घटविशेषणकस्तदसाधारणो धर्मः, घटशब्देन च घटत्वविशेषणको घट इति वाच्यम्; अन्यथा पर्यायतापत्तिरपरिहार्या स्यात्। अतोऽस्ति तदवच्छेदकतयोपस्थितस्याप्यवश्यं तत्पदार्थकोटावन्तर्भाव इति। अथ पदार्थकोटावन्तर्भावेऽपि पदार्थतावच्छेदकधर्मस्य न वाक्यार्थकोटावन्तर्भावः; तत्त्वादेवेति द्वितीयः पक्षः, सोऽपि न; संसृष्टपदार्थस्यैव वाक्यार्थत्वात्, पदार्थकोटावन्तर्भावावश्यकत्वात्। ''सोमेन यजेते''त्यादिविशिष्टविधानाभावप्रसङ्गाच्च, सोमस्य यागान्वयित्वेन भावनान्वयायोगात्। अपिच द्रव्यावच्छेदकस्याप्यारुण्यगुणादेः क्रियान्वयायोग्यस्य निरपेक्षतृतीयाश्रुत्या क्रियाकरणत्वं श्रुतम्-''अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाती''ति, तच्च तव मते विरुध्येत; पदार्थावच्छेदकत्वेन क्रियान्वयासंभवात्। तत्र च साक्षात्क्रियान्वयायोग्यस्यारुण्यगुणादेः कारकावच्छेदकत्वेन कारकत्वाभ्युपगमेऽन्यत्रापि न तद्दण्डवारितं स्यात्। एवं पर्णत्वादिजातेरपि जुह्वाद्यवच्छेदकत्वेन क्रियान्वयित्वमुदाहर्तव्यम्। *एतेन*-'गामानय' 'गौर्गच्छती'त्यादौ लक्षणाप्रसक्तिरपि-*निरस्ता*; गोत्वस्य पर्णत्ववद् द्रव्यावच्छेदकत्वेन क्रियान्वयोपपत्तेरनुपपत्त्यभावात्। न चैवं सति ''गौर्नित्ये''त्यत्रापि लक्षणाया अभावप्रसङ्गः; जातिमात्रशब्दार्थत्वपक्षे तु व्यक्तेः कथञ्चिदपि नित्यत्वान्वयायोग्यत्वाद् लक्षणावश्यंभावात्। यदप्युक्तम्-पदार्थावच्छेदकस्य प्रधानान्वयप्रतियोगित्वे ''राजपुरुषमानये'' त्यत्र राज्ञोऽप्यानयनान्वयित्वं स्यात्-इति, तदपि मन्दम्; नह्यवच्छेदकमात्रस्य प्रधानान्वयान्वयित्वमस्माभिरुच्यते, येनोक्तप्रसक्तिः स्यात्, किं तर्हि? विशेषणतयावच्छेदकस्य। न च राज्ञोऽत्र पुरुषविशेषणम्; पुरुषं प्रति प्राधान्येन तदुपसर्जनत्वानुपपत्तेः। किं तर्हि? स्वसंबन्धोपलक्षणत्वम्; राजपदेन षष्ठ्यर्थस्य लक्षितत्वात्,

तत्संबन्धस्यैव पुरुषविशेषणत्वात्, तस्य चावच्छेदकत्वेन क्रियान्वयित्वाविरोधात्। अत एव कर्मधारयातिरिक्तसमासे सर्वत्र लक्षणाङ्गीकृता तद्विद्भिः। नचैवं सति "सोऽयमि"ति वाक्येऽपि लक्षणां विनैव तत्तेदन्तयोरूपलक्षणतया तदवच्छेदकत्वम्; विशिष्टे पदशक्तेरुक्तत्वात्। तस्मात्- "सोऽयमि" त्यत्र पदोपस्थितयोस्तत्तेदन्ताविशिष्टयोर्विरोधादभेदबोधानुपपत्तेस्तदुपलक्षितयोस्तु विरोधेन तत्सिद्ध्यर्थमवश्यमकामेनापि भागलक्षणाऽङ्गीकरणीया। तथाच तद्वत्-"तत्वमसी" त्यादिवाक्येऽपि साऽविरुद्धा भविष्यति।।

यत्तु हठी(१) लक्षणां विनैव "सोऽयमि"ति वाक्येऽभेदान्वयमविरुद्धं मन्यते, अस्तु नाम, नास्माकं काचित् क्षतिरस्ति; "तत्त्वमसि" वाक्येऽपि तद्वदेवान्वयोपपत्तेः। नह्यस्माभिर्लक्षणा तत्र व्यसनितया स्वीक्रियते, अपितु विरोधपरिहारार्थम्। स चेद्विरोधो लक्षणां विनैव तार्किकेण निराकृतः, न तादृशं तार्किकशिष्यं प्रत्यस्माभिर्महावाक्ये लक्षणा प्रदर्शनीयेति। अथ कस्तत्त्वंपदयोर्वाच्योऽर्थः, को वा लक्ष्यमाणार्थ इति? *उच्यते*-आकाशादिभौतिकजगत्कारणं सर्वज्ञं "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्, तत्तेजोऽसृजत," "सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः", "एतदात्म्यमिदं सर्वं तत्सत्यम्, स आत्मे" त्यादिश्रुतिप्रकाशितं मायासंवलितं परोक्षं ब्रह्म तच्छब्दस्य वाच्योऽर्थः। कार्यकारणसङ्घातात्माभिमान्यविद्याविशिष्टस्तद्धर्मेषु कृतात्मधर्मत्वाभिमानः सन् सुखी, दुःखी, कामी, काणः, कुण्ठः, रोगी, गौरः, स्थूलः, मनुष्यः, ब्राह्मणश्चण्डालोऽज्ञो मूढोऽभिज्ञः, शास्यः, जीवः, इत्याद्यभिमानशताकुलोऽपरोक्षो जीवस्त्वंपदस्य वाच्योऽर्थः। मायाविद्ययोस्तु भेदो गुणवैषम्यकृत उक्तोऽधस्तात्। "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्म" "नेति नेति" "अस्थूलमनण्वह्रस्वमि" त्यादिवाक्यप्रकाशितं ब्रह्म तत्पदस्य लक्ष्योऽर्थः। "दृष्टेर्द्रष्टा, श्रुतेः श्रोता, मतेर्मन्ता, विज्ञातेर्विज्ञाता, विज्ञातारमरे केन विजानीयात्", "तत् केन कं पश्येत्?" "स वा अयं महानज आत्माऽजरोऽमरोऽभयः" इत्यादिश्रुतिप्रकाशितनिष्कृष्टोपाधिकं साक्षिचैतन्यं त्वंपदस्य लक्ष्योऽर्थ इति।।

ननु तत्त्वंपदयोर्लक्ष्येऽर्थे "सत्यमि" त्यादिपदान्यभिधया वर्तन्ते? लक्षणया वा? नाद्यः; "यतो वाचो निवर्तन्ते" इति श्रुतिविरोधात्। अबाधितत्वज्ञानत्वादिप्रवृत्तिनिमित्तेन च लोके सत्य-ज्ञानादिशब्दप्रवृत्तेः, शुद्धे च तदनङ्गीकारात्। नापि द्वितीयः; पदान्तराभिहित एव लक्षणया लोके शब्दप्रवृत्तिदर्शनादिति चेत्, *न*; असिद्धेः, मीमांसकनये पदान्तरानभिहितेऽपि वाक्यार्थे लक्षणादर्शनात्। नहि नानापदार्थघटितोऽपूर्वो वाक्यार्थः केनचित् पदेनाभिधातुं शक्यते। न वा तद्वाचकं पदमस्ति; तदशाब्दत्वव्याघातात्, तार्किकादिनयेऽपि गुडमाधुर्यादिजातिविशेषे पदान्तरानभिधेयेऽपि लक्षणया मधुरादिसामान्यशब्दप्रयोगदर्शनात्। न च-सामान्यशब्दाद् विशेषस्याभिधयैवोपस्थितिरिति-वाच्यम्; सामान्याकारेण तया तदुपस्थितावपि विशेषकारेण तन्मात्रविवक्षया लक्षणां

विनोपस्थित्यनुपपत्तेस्तैरप्यङ्गीकारात्। तस्माद् न लोके पदान्तराभिहित एव लक्षणेति नियमसिद्धिरिति। अपिच सर्वत्र लोके वेदे चाभिधेयाविनाभूते लक्षणेति सामान्यनियमः। तच्चाविनाभूतं पदान्तरोपस्थितं भवतु, मा वा भूत्, इति नात्रादरः क्रियते; पदान्तरादुपस्थितेऽप्युक्तनियमसत्त्वे लक्षणाप्रवृत्तिसंभवात्। प्रकृते चास्त्यविनाभावः; ज्ञानत्वादिविशिष्टाविनाभूतत्वात् शुद्धचिन्मात्रस्वरूपस्य। यद्यपि ज्ञानत्वं नाम सामान्यं न शुद्धचिन्मात्रे सम्भवति; व्यक्तेरभेदात्, अन्तःकरणवृत्तीनां च बहुत्वेनाज्ञानत्वात्, ज्ञानोपाधित्वेन च ज्ञानत्वोपचारात्; तथाऽप्यविद्यैकस्यापि चिन्मात्रस्य विषयसम्बन्धोपाधिभेदान्नानाव्यक्तित्वेन तदनुगतत्वेन च सामान्यत्वेन प्रतीतेराध्यासिकं तदस्त्येवेति न काचिदनुपपत्तिः। *एतेन*-सत्तासामान्यमपि-* व्याख्यातम्*।। तथा च यथा 'प्रकृष्टप्रकाशश्चन्द्रः' इत्यत्र प्रकर्षगुणप्रकाशत्वसामान्यवाचकाभ्यां प्रकृष्टप्रकाशपदाभ्यां जाति-गुणादिमात्रशब्दार्थत्वपक्षे जहल्लक्षणया, विशिष्टशब्दार्थत्वपक्षे च जहदजहल्लक्षणया चन्द्रप्रातिपदिकार्थमात्रं बोध्यते; तद्वत् सत्य-ज्ञानपदाभ्यामप्यत्र लक्षणया ब्रह्मस्वरूपं बोध्यत इति श्लिष्टम्।। अनन्तपदे च 'नास्ति अन्तस्त्रिविधः परिच्छेदो यस्ये'ति बहुव्रीहिसमासान्निषेध-मुखेनान्यपदार्थलक्षणार्थतयाऽस्येष्टैव लक्षणेति न पृथग् विभाव्यते। एवं ''विज्ञानमानन्दं ब्रह्मे'' त्यादिवाक्येऽपि पूर्वोक्तरीत्या लक्षणा द्रष्टव्या।।

यदपि तत्र केनचिद् मन्देन वेदार्थानभिज्ञेनोक्तम्-''विज्ञानमानन्दं ब्रह्मे'' त्यत्र विज्ञानशब्दो न भावसाधनः; द्रव्य-गुणयोरभेदानुपपत्तेः, किं तर्हि? अधिकरणसाधनः; तयोराश्रयाश्रयिभावसंभवात्, आनन्दशब्दोऽपि मत्वर्थीयाच्प्रत्ययान्तः; उक्तहेतोः, क्लीबलिङ्गतादर्शनाच्च, गुणवचनत्वे तु नित्यपुंलिङ्गत्वात् तदनुपपत्तेः-इति, तदयुक्तम्; भाने विज्ञानशब्दस्य रूढत्वात्, ''गौः'' इतिवद् व्युत्पत्यनादरात्। न च-द्रव्य-गुणयोरभेदासंभवेन रूढ्यनाश्रयणमिति-वाच्यम्; पूर्वप्रतिज्ञातस्य प्राधान्याद् गुणत्वासिद्धेः, दृश्यस्य दर्शनार्थत्वात्, वैशेषिकपरिभाषायाश्चावैदिकत्वेनानादरणीयत्वात्, आश्रयाश्रयितया प्रतीतेश्च सुखात्मनोः परस्परव्याप्तिनिबन्धनत्वादित्युक्तत्वात्, ''विज्ञानघन एव'' इत्यादिश्रुतिशतविरोधाच्च। *एतेन*-सुखरूपत्वमपि ब्रह्मणोऽनुपपन्नम्। वदति च-''आनन्दमयोऽध्यासादि''-त्यत्र। न च क्लीबलिङ्गतानुपपत्तिः; लिङ्गव्यत्यासस्य श्रुतिषु बहुधा दर्शनात्, ''आनन्दं ब्रह्मणो रूपम्'' इत्यत्रैव तस्योभयवादिसिद्धत्वात्, नहि तत्र परेण मत्वर्थीयाच्प्रत्ययोऽङ्गीकृतः; गुणाभिप्रायेणैव तेन तत्राऽऽनन्दपदस्याङ्गीकरणात्। तस्माद् यत्किञ्चिदेतत्।।

ननु-एकेन पदेन लक्षणयोक्तलक्षणब्रह्मसिद्धेः पदान्तरोपादानं निरर्थकम्; नह्युक्तज्ञानलक्षणं ब्रह्माऽऽनन्दादिलक्षणं व्यभिचरति, नाप्यानन्दलक्षणं ज्ञानादिलक्षणम्, एवमन्यत्राप्यूहम्; न च-तद्विरुद्धव्यावृत्तिरेव प्रयोजनमिति-वाच्यम्; तस्या अप्यर्थसिद्धत्वादिति-चेत्, *सत्यम्*; तथाऽपि शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते, इति न्यायात् श्रुतशब्देनैव तदाकाङ्क्षापूरणं युक्तम्, अर्थतस्तु कल्पनायाः

पृथक्त्वेनाप्रसरात्। यावन्ति पदानि, तावन्ति वा सन्तु ब्रह्मलक्षणानि; अनेकलक्षणाभिभानस्य तत्त्वसंवादार्थत्वात्।।

ननु-चिन्मात्रात्मके ब्रह्मणि लक्ष्यतावच्छेदकाभावात् कथं लक्षणाप्रवृत्तिः स्यादिति-चेत्, *न*; अनियमात्। यत्र हि लक्ष्यमनेकम्, तत्र लक्ष्यतावच्छेदकमपेक्ष्यते-यथा छत्र्यच्छत्रिसमुदाये, यत्र त्वेकं लक्ष्यम्, तत्र न; यथा ''गभस्तिभिः सविताऽभ्यधावात्''। यथा घटादिशब्दोऽभिधेयानेकत्वात्प्रवृत्तिनिमित्तं घटत्वादिकमपेक्ष्यैव स्वार्थमभिधत्ते, न तथाऽऽकाशशब्दोऽभिधयैव; तेनाऽऽनन्त्यव्यभिचारादिदोषाभावात् तत्कल्पनस्याप्रसरात्, असंभवाच्च। आकाशत्वं संभवति तदिति चेत्, न; व्यक्त्यभेदेनाऽऽकाशत्वजातेरसंभवात्। शब्दाश्रयत्वमुपाधिराकाश इति चेत्, न; आकाशत्वावच्छेदेन शब्दाश्रयत्वग्रहात् तस्य तत्त्वानुपपत्तेः। तस्मात् 'पुरुषस्य चैतन्यमि'तिवद् आकाशस्वरूपमेव व्यवहारार्थं तथा व्यपदिश्यत इति वाच्यम्। तथा च न तच्छब्दप्रवृत्तिनिमित्तं परमार्थतो भवति। तस्मादभिधावल्लक्षणायामपि प्रवृत्तिनिमित्तनियमभावात् तदभावेऽप्युपपन्ना ब्रह्मणि लक्षणेति।।

ननु-एवं तर्हि शुद्धतत्त्वंपदार्थोपस्थापकावान्तरवाक्यैरेव ब्रह्मात्मबोधादनुवादकत्वेन महावाक्यमनर्थकं स्यात्, अखण्डार्थाभ्युपगमेन पदार्थस्यैव वाक्यार्थत्वादिति-चेत्, *न*; महावाक्यस्य भेदभ्रमनिरासित्वेन सार्थकत्वात्। अविद्या ह्येकमपि तत्त्वमाश्रय-विषयभावेन व्यवच्छिद्य भेदभ्रमरूपापन्ना संसारकारणमित्युक्तम्। स च भेदभ्रमो द्विचन्द्रभ्रमवद् एकचन्द्रसाक्षात्कारात् तयोरैक्यसाक्षात्कारादेव निवर्तते, नान्यथा।।

तत्साक्षात्कारश्च ''दशमस्त्वमसी'' ति वाक्यवद् महावाक्यादेव भवति। यथाहि-कश्चिन्महामना दशभिर्मिलित्वाऽरण्यं गतः। तत्र स्वीयानां व्याघ्रादिनाऽपहरणशङ्कया गणनां कुर्वन् एक-द्वि-त्रिक्रमेण नवपर्यन्तगणनया नवसंख्यकानां ज्ञान आत्मानं पश्यन्नपि न दशमत्वेन प्रतिपद्यते। अप्रतिपद्यैव सहायसङ्घस्थो दशमश्चोरेण व्याघ्रेण वा हत इति मन्यमानः शिरस्ताडमाक्रन्दति। तं चाक्रन्दन्तमनु सर्वे तत्सङ्घस्था आक्रन्दन्ति। एवं परस्परमभिवीक्ष्याक्रन्दमानेषु तेषु तदाक्रन्दं श्रुत्वा कश्चिदुपगत्य प्रधानं रोदनकारणं पृष्टवान्। तेन चोत्तरितस्तद्भ्रान्तिं बुद्ध्वा 'दशमस्त्वमसी' त्युपदिदेश। तदुपदेशाच्च साक्षादात्मानं दशमत्वेन प्रतिपद्यते। प्रतिपन्नश्च भ्रमकृतक्रन्दनादीन् जहाति।।

एतेन-शब्दश्रवणानन्तरं चक्षुषा मनसा वा तस्य दशमत्वविषयकसाक्षात्कारः, नतु शब्दात्, ततः सर्वक्लेशान् जहाति। शब्दस्य परोक्षज्ञानजननस्वभावादिति-अपास्तम्; तत्पूर्वमपि विषयेन्द्रियसन्निकर्षे सत्यपि चक्षुर्मनोभ्यां ज्ञानादर्शनात्, तदुत्तरकाले च तद्दर्शनादन्वय-व्यतिरेकाभ्यामुपदेशस्यैव तज्ज्ञापकत्वात्, अनुभवविरोधाच्च। ब्रवीति चैवं स एव भ्रान्त एवैवमर्थमनुभूय-''अहमेतावन्तं कालमात्मानं विस्मृत्याऽसम्, त्वदुपदेशाच्चात्मानं साक्षादुपलभ्य गतमोहस्सुखं संवृत्तोऽस्मीति। स चानुभवस्तव मते विरुद्ध्येत। न च तस्य भ्रान्तित्वं कल्पयितुं शक्यते; अबाधात्।। शब्दस्य परोक्षज्ञानजननस्वाभाव्याद् युक्त्या

तद्बाध इति चेत्, न; प्रत्यक्षेणैव युक्तेर्बाधोपपत्तेर्वैपरीत्यात्। बलवता हि दुर्बलं बाध्यते, नतु दुर्बलेन बलवत्। प्रत्यक्षं तु युक्त्यपेक्षया बलवदिति वैपरीत्यात्। दुर्बलयापि युक्त्या देहात्मप्रत्यक्षं बाधितं दृष्टमिति चेत्, न; असिद्धेः। नहि श्रुतिप्रमाणनिरपेक्षया देहादिव्यतिरिक्तात्मसिद्धिरित्युक्तमेवाधस्तात्। श्रुतिप्रमाणं तु दोषशङ्कारहितत्वात् सर्वापेक्षया बलवदित्युक्तमेव॥

अत एव न परोक्षज्ञानजननस्वाभाव्यनियमः शब्दप्रमाणस्य; परोक्षविषय एव तन्नियमात्, अन्यथान्यथा नियममन्यथा दर्शयतोऽप्रामाण्यापत्तेः। परोक्षत्वापरोक्षत्वे ह्यात्मानात्मवस्तुस्वभावलक्षणे एव भवतः। स चात्मवस्तुकृतोऽविद्यात्मकत्वेन; नित्यपरोक्षस्वाभाव्याया अविद्यायाः साक्षात्त्वान्तरायत्तत्वेन नित्यपरोक्षत्वरूपत्वात्, "अन्यद् युष्माकमन्तरं बभूव नीहारेण प्रावृताः"."तमसा गूढम्" इत्यादिश्रुतेः। आत्मवस्तु तत्वमित्यपरोक्षस्वाभाव्यम्; विद्यास्वरूपत्वात्, "यत्साक्षादपरोक्षाद् ब्रह्म" इति श्रुतेश्च। तत्रैवं सति यत्नात्मन्यपि ब्रह्मणि परोक्षत्वं भासते, तद् अविद्यया तदनात्मत्वापादनादेव, यत्र वा देहान्तःकरणादावनात्मनि नित्यापरोक्षज्ञत्वम्, तत्र तत् तथा तदात्माभेदसंपादनादेव। एवं च घटादौ पराग्विषये नित्यपरोक्षस्वभावेष्वपरोक्षस्वभावत्वमन्तःकरणादिद्वाराऽऽत्माभेदादेवेत्यवोचाम प्रतिकर्मव्यवस्थायाम्॥

तत्रैवं सत्यनात्मनि नित्यपरोक्षे प्रवर्तमानं शब्दादि प्रमाणं प्रत्यक्षवदन्तःकरणादिद्वाराऽऽत्माभेदेन बोधयितुमशक्यत्वात् स्वरूपेण परोक्षतया वा बोधयदप्रमाणत्वं जहाति; अनात्मवस्तुस्वरूपस्य तादृक्तवात्, आत्मनि तु नित्यापरोक्षस्वभावे प्रवर्तमानं परोक्षत्वेनान्यथारूपेण शुक्तिकां रजतत्वेनेव तं बोधयत् कथं नाप्रमाणं भवेत्? अतः प्रत्यक्षवद् यत्प्रमाणमात्मनि शब्दो वाऽनुमानं वाऽर्थापत्तिर्वा प्रवर्तते, तत्सर्वमन्यत्र परोक्षजननसामर्थ्येऽपि तस्मिन् स्वप्रामाण्यायापरोक्षबोधमेव जनयतीति शिलष्टम्। तथा च "दशमस्त्वमसि" इति वाक्यादात्मविषयापरोक्षज्ञानमेवोत्पद्यते, न परोक्षज्ञानम्, अन्यथा तस्मादपरोक्षभ्रमाच्छेदानुपपत्तेरिति। एवं "सत्यमि" त्यादिवाक्यादुक्तविधयाऽनवच्छिन्नावखण्डौ तत्त्वंपदार्थौ पश्यन्नपि महावाक्याद्विना भेदभ्रमतिरोहितनेत्रत्वाद् न तयोरभेदमध्यवस्यति; भेदभ्रमबीजं तु तयोः परोक्षत्वापरोक्षत्वे इत्यवोचाम। तथा च 'दशमस्त्वमसि' इति वाक्यादात्मनो दशमत्वज्ञानेनादशमत्वबोधनिवृत्तिवत् "तत्त्वमसि" इति वाक्याद् ब्रह्मण आत्मत्वबोधेनैव तदनात्मत्वबोधो निवारणीयो भवति, नान्यथा; लक्षणवाक्यतो ब्रह्मबोधेऽप्यनात्मत्वभ्रमानिरासादिति सर्वानुभवसिद्धत्वात्॥

ननु-ब्रह्मणो लक्षणवाक्यादात्मत्वानध्यवसाने ब्रह्मत्वसिद्धिरेव न स्यात्, अनात्मनोऽब्रह्मत्वादिति चेत्, *सत्यमध्यवस्यति*; किन्तु पारोक्ष्येऽप्यपरोक्षत्वभ्रमप्राकट्याद् नाध्यस्यतीव। यस्य तु पुरुषधौरेयस्य तत एव परोक्षभ्रमनिवृत्तिः, तस्य तु न महावाक्यापेक्षा। किं बहुना? यस्य तु वामदेवादेः स्वानुभवादेव जन्मान्तरीयसंस्कारपाकाद् वस्त्वध्यवसानम्, तस्य तु न लक्षणवाक्यस्याप्यपेक्षेत्यवोचाम- 'नित्यानित्यवस्तुविवेकवार्तिके'। न चैवमेकं पुरुषं प्रति श्रुतिवाक्यं निरर्थकमिति कृत्वाऽन्यं प्रत्यपि निरर्थकं भवति, येन तस्याप्रामाण्यप्रसक्तिः स्यात्। नहि सर्वं वाक्यमुपदेष्टारं प्रति निरर्थकमित्युपदेश्यं प्रत्यपि निरर्थकं भवति; तथा सति शब्दप्रमाणोच्छेदापत्तेः॥

एतेन-तत्त्वंपदार्थौ वाक्यार्थाद् भिन्नौ? अभिन्नौ वा? आद्येऽखण्डार्थत्वहानि:, द्वितीय एकेनैव पदेन तत्सिद्धेर्वाक्यं व्यर्थमिति-*अपास्तम्*, वाक्येनैव भेदभ्रमनिरासिज्ञानजननात्, पदमात्रस्य स्वार्थस्मारकत्वेनाप्रमाणत्वाच्च। न च-पदार्थ-वाक्यार्थयोरेकत्वे वाक्यार्थापूर्वत्वव्याहतेर्वाक्य-स्याप्यप्रमाणत्वं तुल्यमिति-वाच्यम्; पदार्थ-वाक्यार्थयोरेकत्वेऽपि ''भेदो भिन्न:'' ''प्रमेयत्वं प्रमेयम्'' इत्यादावपूर्वबोधदर्शनात् प्रामाण्याक्षते:।।

एतेन-अखण्डवाक्यार्थत्वं न कुत्रापि दृष्टमित्यपि-*निरस्तम्*; ''भेदो भिन्न:'' इत्यादावेव तद्दर्शनात्, एकस्य कल्पनया विशेषण-विशेष्यभावेनाप्यखण्डत्वाव्याहते:। प्रकृतेऽपि वाक्यार्थबोधात्पूर्व कल्पनाया: सत्त्वाद् उत्तरकाले तदसत्त्वस्यादोषकरत्वादित्यास्तां विस्तर:।। तस्मादुपपन्नस्तत्त्वंपदार्थ-योरैक्यबोध इति।।

अस्त्वेवम्; तथाप्यसिपदं किमर्थम्? न च-''सर्वं वाक्यं क्रियया परिसमाप्यते'' इति न्यायाद् वाक्यपरिसमाप्त्यर्थं तदिति-वाच्यम्; प्रकृते क्रियाया असंभवित्वेन तदनुपपत्ते:, उक्तन्यायस्य क्रियापरवाक्याभिप्रायत्वादिति-चेत्, *न*; सर्वशब्दसंकोचे प्रमाणाभावात्। न च-सिद्धार्थप्रतिपादके क्रियाया असंभव एव तत्संकोचे मानमिति-वाच्यम्; धात्वर्थस्य क्रियात्वेनाभिमतत्वात्, अस्त्यर्थसिद्धार्थप्रतिपादनेऽपि संभवात्।।

कोऽस्तेरर्थ:? ''अस् भुवि'' इत्यनुशासनात् सत्ता।। *ननु* प्रकृतेऽसि सा कस्य सत्ता प्रतिपाद्यते?* मध्यमपुरुषनिर्देशादुपदेश्यस्य ब्रह्मात्मैकत्वसत्तेति ब्रूम:। *ननु*-तत्सत्ता ततो भिन्ना? अभिन्ना वा? भिन्ना चेत्, अखण्डार्थत्वव्याहति:; अभिन्ना चेत्, अभिन्नत्वे तत्त्वंपदाभ्यामेव तदुपस्थिते: पुनरपि प्राप्तमसिपदवैयर्थ्यमिति-चेत्, *मैवम्; एकार्थत्वोपपत्ते:।।

यथाहि-तत्त्वंपदयोरेकार्थत्वेऽपि भेदभ्रमनिरासार्थत्वाद् नैकेनान्यवैयर्थ्यम्, तद्वत् ''तत् त्वमि'' त्येतावत्युक्ते किं तदहमासमित्युपदिशति? किं वाऽतदप्यहं संपदाद्युपासनाया वा तदहं भविष्यामीति। किं वा त्रिष्वपि कालेषु तदहमस्मि? इति संशयात्तदर्थाप्रतिपत्ते:, असिपदोपादाने तु तत्संशयोच्छेदात् सर्वदा संसारासंसारदशायां तदैक्यं प्रतिपाद्यते; नित्ययोरैक्यसत्तायास्सर्वकालीनत्वात्, इति भिन्नप्रयोजनत्वाद् ''असिपदं सार्थकमिति*।।

एवम्-''अहं ब्रह्मास्मी'त्यादि वाक्यं व्याख्येयम्, परंतु ''तत्त्वमसी'' त्युपदेशवाक्यम्, ''अहं ब्रह्मास्मी'' त्यनुभववाक्यमिति भेद:। तस्मादुक्तविधया तत्त्वमस्यादिवाक्यानां वस्तुपरत्वे संपदादिपरत्वानुपपत्ते: सम्यगभिहितम्- ***संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञानेऽभ्युपगम्यमाने ''तत्त्वमसि'' ''अहं ब्रह्मास्मी'' त्येवमादीनां वाक्यानां ब्रह्मात्मैकत्व-वस्तुप्रतिपादनपर: पदसमन्वय: पीड्येतेति*।।**

अपिच यदि ब्रह्मात्मैकत्वविज्ञानं संपदादिरूपं स्यात्, तर्हि तत: सकार्याऽविद्यानिवृत्ति: फलं प्रतीयमानं बाध्येत; तस्या: सम्यग्ज्ञानफलत्वेन तत्फलत्वानुपपत्ते:। न च स्तुमित्रत्वम्; श्रुतिव्याकोपापत्तेरित्याह-

***भिद्यते हृदयग्रन्थिरिरिति ***।। आदिशब्देन-''तरति शोकमात्मवित्'' ''तमस: परं पारं तारयति भगवान् सनत्कुमार:'' ''तस्याभिध्यानाद्याजनात्तत्वभावाद भूयश्चान्ते विश्वमायानिवृत्ति:'' इत्यादीनि श्रवणानि गृह्यन्ते।।

अपि च ''ब्रह्म वेद ब्रह्मैव भवति'' ''ब्रह्मैव सन् ब्रह्माप्नोति'' इत्येवमादीनि हि वचनानि ब्रह्मभावापत्तिं तद्विदो दर्शयन्ति। तानि च संपदादिपक्षे सामञ्जस्येन न सङ्गच्छेरन्। न ह्यन्यस्यान्यथाभाव: शतधा चिन्त्यमानोऽपि भवितुमर्हति; स्वभावविरोधात्। शास्त्रप्रामाण्याद् भविष्यतीति चेत्, न; शास्त्रस्याकारकत्वात्। नहि शास्त्रं विरुद्धस्वभावामपि योषितं बलादग्निं करोति; तस्य दीपवद् वस्तुयाथात्म्यव्यञ्जकत्वेनाकारकत्वात्। *ननु* शास्त्रस्यातथात्वेऽपि तद्विहितोपासिक्रियाया अस्ति तथा सामर्थ्यम्, यदन्यस्यान्यरूपसमर्पकत्वम्। तथा च तद्बोधकं शास्त्रम्-''तं यथा यथोपास्ते'' ''तस्य तस्य तदनु तद्देवतासायुज्यं तत्सारूप्यं तत्सालोक्यं वा फलं भवती'' ति। तच्च यागादिफलान्न विशिष्यते; मरणोत्तरकालीनतत्तद्देहादिप्राप्तिसामान्यात्। यथाहि-यागेनेन्द्रादिदेहं तत्सलोकतां फलं तत्कारी मृत्वाऽनुभवति, यथा वा ब्रह्मवधादिना निषिद्धेन कर्मणा श्व-सूकरादिदेहं मृत्वा तत्कार्यनुभवति, एवमग्न्यादिदेवतोपासक: सगुणब्रह्मोपासको वा तद्देहसायुज्यादिफलमनुभवतीत्यविशिष्टम्। न चान्यस्यान्यभावलक्षणे विरोधोऽस्ति; स्वस्वभावमपरित्यज्यैव मनुष्यादिशरीरपरित्यागेन देवादिशरीरपरिग्रहात्। अत एव सगुणब्रह्मोपासकानामपि जगद्व्यापारवर्जसावग्रहैश्वर्यं न्यायेन व्युत्पादयिष्यते। तस्माद् नोपास्तिक्रियात: संसारिणामसंसारिब्रह्मभावसिद्धि:, तत्त्वज्ञाने तु मिथ्याकल्पितान्यभावस्य निवृत्तेस्तद्भावसिद्धि: स्यादेवेत्यभिप्रेत्याह- ***ब्रह्म वेद ब्रह्मैव भवतीति चैवमादीनि तद्भावापत्तिवचनानि संपदादिपक्षे सामञ्जस्येन नोपपद्यरेन्निति ***।। **ब्रह्मात्मकत्व-विद्यायास्संपदादिरूपतानिराकरणमुपसंहरति- *तस्मान्न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानमिति ***।।
*तस्मात्=उदाहृतश्रुतिविरोधादित्यर्थ:।।

माऽस्तु संपदादिरूपम्; तत्त्वाभावात्, किं तव सिद्धमिति? अत आह- ***अत इति ***।। प्रत्यक्षादिप्रमाणस्य विषयो यद् घटादिवस्तु, तस्मिन् तज्जन्यज्ञानवदित्यर्थ:। ब्रह्मविद्याया: पुरुषतन्त्रत्वाभावे फलितमाह- ***एवं भूतस्य च ब्रह्मणस्तज्ज्ञानस्य चेति ***।। यद्वाऽऽज्यावेक्षणवत् संस्कारकर्मत्वपक्षं निराकरोति- ***एवंभूतस्य च ब्रह्मणस्तज्ज्ञानस्य चेति ***।। अशनायाद्यतीत-सत्यज्ञानानन्तादिरूपस्य ब्रह्मण: पुरुषातन्त्रस्य च तादृशब्रह्मज्ञानस्य चेत्यर्थ:। एकश्चकारस्समुच्चयार्थ:, अपरस्तूभयत्र एवंभूतपदानुषङ्गार्थ:।

***कयाचिदुक्त्या**= ''आत्मानमेव लोकमुपासीत'' ''आत्मा वा अरे द्रष्टव्य:'' इत्याद्युक्त्येत्यर्थ:। ''कयाचिद्युक्त्ये''ति पाठे पूर्वोक्तयुक्तीनामन्यतमया युक्त्येत्यर्थ:। यद्वा- *ननु* ''आत्मानमेव लोकमुपासीत'' इत्यादिश्रुतेर्ब्रह्म-तज्ज्ञानयो: कार्यानुप्रवेशात् कथमपुरुषतन्त्रा ब्रह्मविद्येति? नेत्याह- ***एवंभूतस्य चेति ***।। कार्यानुप्रवेशित्वे वस्तुसिद्धिरेव न स्यादित्युक्तम्, विधिश्रुतेस्तु वक्ष्यमाणरीत्योपपत्तेरिति भाव:। *ननु* उक्तं विदिक्रियाकर्मत्वेन ब्रह्मण: कार्यानुप्रवेश:, अवान्तरवाक्यैश्च

यूपाहवनीयादिवत्तत्सिद्धिरिति न कश्चिद् विरोध इत्याशङ्क्याह- ***न चेति***॥ किम्-''आत्मा वा अरे द्रष्टव्य:'' इत्यादिवाक्यबलाद् विदिक्रियाकर्मत्वेन कार्यानुप्रवेशित्वं ब्रह्मणोऽभ्युपगम्यते? किं वा-''आत्मानमेव लोकमुपासीत'' इत्येवमादिवाक्यबलादुपास्तिक्रियाकर्मत्वेन? नाद्य इत्याह- ***अन्यदेव तद्विदितादिति***॥ न द्वितीय:; विषयत्वस्थापनादित्याशङ्कते- ***अविषयत्वे ब्रह्मण इति***॥ अविषयतया स्वत: सिद्धस्यापि ब्रह्मात्मत्वस्याविद्याकल्पितभेदप्रतिबद्धत्वादित्युक्तत्वात्। शास्त्रजनितान्त:करणवृत्तिविशेषेण तत्प्रतिबन्धनाशमात्रेण शास्त्रप्रमाणकत्वोपचारात्। ''यद्वाचानभ्युदितमि'' त्यादिश्रुतेस्तु फलव्याप्यत्वलक्षणतत्कर्मत्वरूपविषयत्वप्रतिषेधपरत्वाद् न न्यायविरोध:; भिन्नविषयत्वादिति परिहरति- ***अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्येति***॥ ***इदन्तया विषयीभूतमिति***॥ स्वजनितविदिक्रियाकर्मत्वेन स्वविषयीभूतं कृत्वेत्यर्थ:। अनाधेयातिशयप्रत्ययस्वप्रकाशचैतन्यरूपत्वेनासंभवादित्यभिप्राय:। *ननु* एवं तर्हि वृत्तिव्याप्यत्वमपि ब्रह्मणो न स्यात्; वाङ्मनसागोचरत्वात्। न च-फलाव्याप्यत्वेन तदविषयत्वाभिधानमिति-वाच्यम्; असंभवस्योभयत्र तुल्यत्वात्॥

तथाहि-चिदात्मके ब्रह्मणि न चिद्व्याप्ति: संभवति; दीपयोरिव समयो: परस्परानतिशयाधायकत्वात्, तदभिन्नत्वाद्वा। तथा वाङ्मनसजन्यक्रियाव्याप्तिरपि; निरतिशयत्वान्निरञ्जनत्वाच्च। यया क्रियया हि यत्रातिशय आधीयते, तया तद्व्याप्तिरित्युच्यते, यथा गतिक्रियया ग्रामे चक्रादिक्रियया च घटादिविषये, इति ताभ्यां तयोर्व्याप्तिरिति। न चैवं ब्रह्मणि वृत्त्या कश्चिदतिशय आधीयते; निरञ्जनत्वश्रुतिव्याकोपात्। सातिशयत्वेनानित्यत्वप्रसङ्गात्। भेदाभ्रमनिरास एव तज्जन्यातिशय इति चेत्, न; आरोपिताभावस्याधिष्ठानानतिरेकस्यासकृदुक्तत्वात्, कर्मणि क्रियाजन्यातिशयस्य भावत्वनियमाच्च। अपिच यदि ब्रह्मवृत्तिकर्म स्यात्, स्यादेव तर्हि चैतन्यकर्मापि, तत्कर्मत्वनियतत्वाऽतदुपहितचैतन्यकर्मत्वस्य, चैतन्यस्य स्वतो निरञ्जनत्वेन कर्मासम्बन्धात्। अपिच कथं वा परिच्छिन्ना मनोवृत्तिरपरिच्छिन्नं ब्रह्म व्याप्नुयात्? परिच्छिन्नं हि द्रुतताम्रमिव मूषां घटादि मनोवृत्तिर्व्याप्तुं शक्नोति; तदपेक्षया व्यापकत्वात्, नापरिच्छिन्नम्; स्वयं परिच्छिन्नत्वात्, अन्यथा क्रियात्वव्याहते:, परिच्छिन्नस्य मनसोऽपरिछिन्नाकारपरिणामानुपपत्तेश्च। तस्माद् न ब्रह्मणश्चिद्व्याप्यत्वमिव वृत्तिव्याप्यत्वमपि। तथा च तदभावे कथं तमसस्तमसो निवृत्ति: स्यादिति-चेत्, *न*; अन्यथा वृत्तिव्याप्यत्वाङ्गीकारात्।

व्याप्तिर्नाम-प्रकृते स्वरूपैक्यापादिनी यथा दुग्धस्योदकव्याप्ति:, विपरीता वा परस्परव्यावृत्तत्वाद् यथा रजते शुक्तिकाया व्याप्ति:। न च-रूपादिविषयस्य निरवयवत्वात् समानाकारासिद्धिरिति-वाच्यम्; गुणगुण्यादेरभेदाद्रूपादेर्निरवयवत्वासिद्धे:; अन्यथा क्षीर-नीररूपयो: परस्परसामानाधिकरण्याभावात् परस्परविविक्ततयोपलम्भप्रसङ्गात्। *ननु* चैतन्यव्याप्तिरन्त:करणवृत्ते रजतस्येव शुक्तिव्याप्ति: परस्पराव्यावृत्ति:, *न*; स्वप्रत्यक्षतया स्वसाक्षितया वा स्वीकारात्, निरवयवचैतन्येन समानाकारद्वाराऽसंभवात्, तावतैव तदावरणभङ्गात्। अत एव घटादिज्ञानं घटादिरूपेण बोधरूपेण च भासते।

सेयं द्विप्रकारा व्याप्तिरन्यथा घटादिष्वन्यथा च तत्फलात्मके बोधे। यद्यपि स्वप्रत्यक्षत्व-साक्षित्वाभ्यां घटादिबोधेनैव तद्वृत्तिर्व्याप्यते; तथा च श्रुतिः-''न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारंशृणुयाः'' इति।। तथाऽपि रजतेनेव शुक्तेः प्रतीत्यनुसारेण तद्व्याप्तिर्बोधस्योच्यते, न परमार्थाभिप्रायेण। अत एव विपरीतविषयविषयिभावात् तदावरणभङ्गमात्रेण तत्तद्विषयत्वमाह भगवान् भाष्यकारः। तथा च घटादिबोधं प्रत्यञ्चं स्वसाक्षिणं तदाकारा वृत्तिस्तत्स्वरूपेणात्मैक्यापादनादावरणभङ्गाद् व्याप्नोतीवेत्युपचर्यते। तेन परमार्थतो न व्याप्नोति; वैपरीत्यात् प्रत्यग्विषयं च व्याप्नोति; अन्यथा निरात्मकत्वेन तत्प्रथानुपपत्तेः। शब्दमाहत्म्याद् ज्ञायमानसत्य-ज्ञानानन्दानन्ताद्वयब्रह्माहमस्मीति ब्रह्मात्मैकत्वाकारा तु वृत्तिस्तदावरणभङ्गं कुर्वती सर्वस्य जनिमतो विश्वस्य तदात्मकत्वात् स्वसाक्षित्वाच्च स्वप्रयुक्तेन स्वसाक्षित्वेनापि तत्स्वीकुर्वती ब्रह्म व्याप्नोतीत्युपचर्यते, न पुनः स्वतो व्याप्तिरस्ति; वैपरीत्यादित्युक्तत्वात्। न हि बल्बजैर्वह्निर्दह्यते, किन्तु वह्निना बल्बजानि दह्यन्ते; नापि सुशिक्षितोऽपि नटः स्वस्कन्धमारोढुं शक्नोति। तदेवेदमभिप्रेत्याह भगवान् भाष्यकारः-*किं तर्हि? प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्य-वेदितृ-वेदनादिभेदमपनयतीति*।। तथा च श्रुतिः-''तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति''। येनेदं सर्वं विजानाति तं केन विजानीयात्? ''विज्ञातारमरे केन विजानीयात्'' इति च। शास्त्रान्तरं चोदाहृतं भाष्ये द्रष्टव्यम्। *ननु* भवतु नाम शास्त्रजनितान्तःकरणवृत्तौ सर्वप्रत्यक्त्वेन स्फुरतो ब्रह्मणः तत्प्रत्यक्त्वेन स्फुरणम्। सर्वस्य जनिमतस्तदात्मनैवात्मवत्त्वात्, तथाऽपि तद्वृत्तौ तत्राध्यासात् सर्वस्य जनिमतस्तदधिष्ठानत्वात्, अन्यथा तदात्मनाऽऽत्मवत्त्वानुपपत्तेर्घटादाविव तत्फलाकारं ब्रह्म सविकल्पतयैव भायात्, न निर्विकल्पात्मना। तथा च स्वरूपानुपस्थितेर्न ततो वेद्यवेदित्रादिभ्रमनिवृत्तिरिति चेत्, न; निर्विकल्पब्रह्मात्मनैव वृत्तेर्जायमानत्वात् ततो भेदभ्रमनिवृत्तिसिद्धेः। यत्रापि घटादौ क्रिया-कर्मकर्तृ-भेदमवगाह्य वृत्तिरुदेति, तत्र विषयेणैव सविकल्पता, न तु स्वतः; कुतः? विषयैकरूपत्वात्तस्याः, स्वतो रूपान्तराभावात्। ततो यदि निर्विकल्पकं तस्या विषयः, तर्हि स्वयमपि निर्विकल्पिकैव जायते। अथ घट-घटत्वादिवैशिष्ट्यं सविकल्पकं विषयः, तर्हि सविकल्पिकैवेति। यदा बहिर्वृत्तौ सकर्मिकायामप्येवं कथा, तत्र किमु वक्तव्यम्-वेद्य-वेदित्रादिभेदशून्यप्रत्यङ्मात्रसतत्त्वायामात्माकारवृत्तौ निर्विकल्पकत्वमिति!! न च ब्रह्मणा स्वसम्बन्धः स्वेन ग्रहीतुं शक्यते, येनापि सविकल्पकत्वं स्यात्; आत्मग्रहप्रसङ्गेन तदनुपपत्तेः। नह्यात्मानमगृहीत्वा स्वसम्बन्धग्रहः स्वेन भवति; प्रतियोगिग्रहसापेक्षत्वात् सम्बन्धग्रहस्य। न चात्मनाऽऽत्मा ग्रहीतुं शक्यते; कर्तृ-कर्मभावविरोधात्; सर्वनिर्विकल्पप्रत्ययोच्छेदप्रसङ्गाच्च। ज्ञेयेन च ज्ञानेन स्वसम्बन्धग्रहे सर्वनिर्विकल्पप्रत्ययोच्छेदप्रसङ्गात्। न च ब्रह्मणो ज्ञेयत्वमप्यस्ति; प्रत्यक्त्वादित्यवोचाम।

ननु एवमपि निर्विकल्पेन तेन कथं सविकल्पाध्यासनिवृत्तिः? लोकेऽदर्शनात्, इति चेत्, *न*; आत्मन्यविद्याध्यासस्य सविकल्पत्वासिद्धेस्तस्यापि निर्विकल्पकत्वात् ततस्तन्निवृत्युपपत्तेः। अत एव सुषुप्तौ निर्विकल्पात्माधिष्ठानत्वाद् निर्विकल्पतयैवाविद्याऽवभासते, जागरादौ च सविकल्पान्तःकरणसम्बन्धात्

सविकल्पतया भानमात्मन इवाविद्याया अपीत्यन्यदेतत्। सविकल्पभेदभ्रमनाशस्तु ज्ञानेन स्वकारणनाशादेव भवति, न साक्षाज् ज्ञानात् इति न काचिदनुपपत्तिः। तस्मादुपपन्ना "तत्त्वमसी" त्यादितस्तद्भेदभ्रमकारणाविद्यानिवारणपटीयसी निर्विकल्पिका ब्रह्माकाराऽन्तःकरणवृत्तिरिति। इयमेव यदा प्रत्ययान्तररैननुभूता सती स्थिराऽवतिष्ठते, तदा निर्विकल्पकसमाधिरित्यभिधीयते। तथा च श्रुतिः-"तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्।" "अध्यात्मयोगाधिगमेन धीरो मत्वा धीरो हर्ष-शोकौ जहाती"ति।।

ननु चित्तवृत्तेः क्षणिकत्वात् स्थिरत्वं कथम्? *न*; स्वतोऽक्षणिकत्वात्। वृत्तिर्हि वित्तस्य परिणामो दुग्धस्येव दधि। स च द्रव्यात्मकत्वात् स्वभावतो न क्षणिकः; कथं तर्हि चित्तस्य सजातीयविजातीयानेकवासनाबडिशाकृष्टत्वेन चञ्चलत्वात् परिणामान्तरारम्भः? युगपत् परिणामद्वयासंभवात्, पूर्वपरिणामनाशेनैव तदुत्पत्तेस्तस्य क्षणिकत्वमर्थसिद्धम्। यदा तु क्षीणवासनं चित्तं ब्रह्माकारतां गत प्रहरम्, दिनम्, पक्षम्, मासम्, संवत्सरम्, युगम्, कल्पं वा व्याप्य न परिणामान्तरमारभेत, तदा तस्य सिद्धं स्थिरत्वं न केनाप्यपवार्यते। अत एव पुराणेषु योगिनां युग-मन्वन्तर-कल्पादिपर्यन्तं समाधिः श्रूयते, तस्यामवस्थायां चित्तस्य ज्ञेयाकारापन्नत्वेन तदैकरूप्येणावस्थानाद् न ज्ञान-ज्ञेयादिभेदकल्पनाऽस्ति। तदुक्तमधस्तात्। सेयमात्मनस्तत्स्वभावापत्तिः, यया सर्वानर्थनिवृत्तिस्तस्य भवति। अन्तःकरणं हि स्वतो विद्यमानं सर्वानर्थाय भवति; तदभावे सुषुप्तावनर्थादर्शनात्, भावे च जागरादौ दर्शनात्। तस्मिंस्तदन्तरायनिवृत्तेश्च तत्तदुपाधिकस्यात्मनस्तत्त्वभावः स्वतः सिद्ध एव। तथाच श्रुतिः-"तस्याभिध्यानाद् योजनात् तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरि"ति।।

तस्योक्तलक्षणस्य ब्रह्मणोऽभिध्यानं नाम=चित्तस्य विषयाभिमुखलक्षणप्रमादनिराकरणेन तत्प्रवणताकरणम्, यन्निदिध्यासनमित्याचक्षते निदिध्यासनिनः, "नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गात्।" इत्यादि श्रुत्यन्तरात्। भूयः शब्दो भिन्नक्रमो योजनादित्यनेन सम्बध्यते। भूयो योजनं नाम=तत्त्वैकाग्रस्य चित्तस्य गुरुमुखश्रुतेन महावाक्यप्रयाणेन पुनःसंयोजनम्। "यस्यानुविद्धः प्रतिबुद्ध आत्मे"ति श्रुत्यन्तरात्। तत्त्वभावो नाम=चित्तस्य निष्प्रतिबद्धव्याख्यातनिर्विकल्पक-ब्रह्मात्मैकत्वाकारपरिणामः। चकाराद् भूयःशब्दोऽत्रापि संबध्यते। तदुक्तम्-गुरूपदेशकालेऽपि तत्त्वभावस्य जायमानत्वात्, परन्तु तस्य प्रतिबद्धत्वात् कार्याक्षमत्वमित्यन्यदेतत्। अन्ते=तदनन्तरम्, विश्वाकारपरिणताया मायाया निवृत्तिरित्यर्थः। पञ्चमीत्रयं पूर्वपूर्वस्योत्तरोत्तरहेतुत्वसिद्ध्यर्थं द्रष्टव्यम्। तत्त्वभावलक्षणश्चित्तस्य परिणामो योगानामुत्तमो योगः। तथाचोक्तम्-"लये संबोधयेच्चित्तं विक्षेपे शमयेत् पुनः" इति।।

ननु "योगश्चित्तवृत्तिनिरोधः" इति योगविदः सूत्रम्, कथं तद्विरुद्धमुच्यते-तत्त्वभावलक्षणा वृत्तिश्चित्तस्य योग इति चेत्, *न*; प्रलयस्यापि योगविदः सूत्र्यत्वप्रसङ्गात्। बुद्धिपूर्वकस्तन्निरोधो विवक्षित इति चेत्, *सत्यम्*; प्रकृतेऽपि तद्भावात्, विषयप्रवणतानिरोधात्, सर्वात्मना निरोधे बुद्धिपूर्वकत्वस्यैवासिद्धेः। नियमेनान्यत्तत्त्वमवलम्ब्यान्यवस्तूपसंहारो हि बुद्धिपूर्वकनिरोधो नाम।

तदालम्बनबुद्धौ वा सत्यां कथं स एव भवेत्; कारणं बिना कार्यानुपपत्तेः। सत्यमासीत् साऽन्यवृत्तिनिरोधा स्वयमपि निरुध्यत इति चेत्, वक्तव्यं तर्हि तन्निरोधकारणम्। दग्धेन्धनानलवत् स्वयमेवोपशाम्यतीति चेत्, न; दृष्टान्तासिद्धेः। नह्यनलः स्वयमेवोपशाम्यति, अपि तु स्वाश्रयेन्धनस्यासत्त्वात्। न चात्र स्वाश्रयस्य चित्तस्याविद्यावद् विद्यासमकाले नाशोऽस्ति; यावत्प्रारब्धं तस्य सत्त्वात्, अन्यथा तत्क्षणादेव देहादिनाशात् कस्य समाधानं स्यात्? *ननु* अविद्यानाशे स्वाश्रयनाशात् कथं चित्तादिस्थितिरिति-चेत्, *न*; द्रव्यनाशे तदाश्रितानां कार्याणामनाश्रयतयैकक्षणस्थायित्वकल्पनवदनेकक्षणस्थायित्वस्यापि कल्प्यत्वात्, श्रुतिसिद्धत्वाच्च। तथा च श्रुतिः-''तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये'' इति यावत्प्रारब्धक्षयमवधिं दर्शयति। अत एव-''क्षीयन्ते चास्य कर्माणि'' ''ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन।'' इत्यादिश्रुति-स्मृत्योः प्रारब्धेतरसर्वकर्मक्षयविषयत्वमवधार्यते। समारब्धफलस्य कर्मणो यावत्फलं लक्ष्यैषुवद् यावद्वेगक्षयं प्रवृत्तेः। नहि लक्ष्यस्येषोरग्रे प्रयोजनाभाव इति कृत्वा यावद्वेगक्षयं न प्रवर्तते; तद्वत् प्रारब्धप्रवृत्तेस्तं प्रत्यप्रयोजनत्वेऽप्यविरोधः। तस्मात् प्रारब्धशेषात् चित्ते यावत्तद्विरोधिवृत्त्यन्तरं नोदेति, तावत् तन्नाशकाभावाद् दग्धवस्त्राकारा वृत्तिरवतिष्ठते। तत्संस्कारेण तन्नाश इति चेत्, न; संस्कारस्य तज्जन्यत्वात् तन्नाशकत्वानुपपत्तेः, अन्यथाऽन्योन्याश्रयापत्तेः-संस्कारेण तन्नाशः, तन्नाशेन च संस्कार इति॥

ननु एवं तर्हि ब्रह्मविदां सुप्तावस्था न स्यात्; तद्बुद्धेः कारणस्याविद्याया विलयेन कारणात्मनाऽवस्थानासंभवात् स्वापावस्थायास्ताद्रूप्यात्। प्रारब्धशेषाद् ब्रह्माकारवृत्तौ हि तदाकारतयाऽवस्थानं समाधिरेव, ततः प्रच्यावे च जाग्रत्स्वप्नयोरन्यतरविक्षेप इति चेत्, इष्टापत्तेः। ब्रह्माकारतया चेतोऽवस्थानस्यैव विदुषां स्वापत्वात् तदतिरिक्तस्वापास्तित्वे प्रमाणाभावात्। तथा च भगवद्गीता-''**या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥**'' **इति॥**

न च स्वापः प्रारब्धकार्यम्, येन तदङ्गीकारोऽपि स्यात्। सर्वकार्योपरमलक्षणस्य स्वापस्य जाग्रत्स्वप्नभोगप्रदकर्मोपरमनिमित्तकत्वेन तत्कार्यत्वानुपपत्तेः। न च-स्वापाभावेऽविश्रान्तेर्जाग्रत्स्वप्नानुपपत्तिरिति-वाच्यम्; ब्रह्मणि विश्रान्तिसत्वेन तदविश्रान्त्यसिद्धेः। ये तु संस्कारशेषामविद्यां प्रारब्धनिर्वाहिकामङ्गीकुर्वन्ति, तन्मते स्वापावस्थाऽप्युपपद्यते विदुष इति श्लिष्टम्। सर्वथाऽपि निर्विकल्पकसमाधिश्चित्तस्य वृत्तिद्वारा ब्रह्मात्मनाऽवस्थानमेव; वृत्तिहीनस्य चित्तस्यावस्थानानुपपत्तेः, चित्तत्वविरोधात्॥

ननु एवं निर्विकल्पक-सविकल्पकसमाध्योः को वा भेदः? अस्ति भेदः-निर्विकल्पकसमाधौ ज्ञातृ-ज्ञानयोर्ज्ञेयाभेदेनैव भानम्, सविकल्पकसमाधौ तु भेदेनेति तद्विभागदर्शनात्॥

ननु एवं तर्हि ब्रह्मणि सविकल्पकसमाधिः कदापि न स्यात्; ज्ञातृ-ज्ञानप्रत्यक्त्वेनैव तद्भावनात् तद्भेदेन तद्ग्रहानुपपत्तेरिति चेत्, *सत्यम्*; यदा ब्रह्मप्रत्ययः प्रत्ययान्तरैर्नाभिभूयते, तदैवमेव; यदा तु विपरीतवासनासत्वात् ताभिः पुरेव न्यायेन तद्विरोधिप्रत्ययान्तराणि मध्ये जायन्ते, तदा विपरीतप्रत्ययोऽयं लयो

वा चित्तस्येतिताननुसन्धाय तन्निराकरणेन ब्रह्माकारवृत्तिकरणात्सविकल्पकसमाधिर्भवति। तथा चोक्तम्-''लये संबोधयेच्चित्तं विक्षेपे शमयेत् पुन:'' इति, यं मननं निदिध्यासनं नाऽऽचक्षते ध्यायिन:, तयोरेव ब्रह्मणि सविकल्प्यकसमाधिरूपत्वात् तदुत्तरकाले तत्र तदसंभवात्, परमात्मन्येव विदुषां सर्वभावात्। तथा चाह वसिष्ठ:-''देहाभिमाने गलिते विज्ञाते परमात्मनि। यत्र यत्र मनो याति तत्र तत्र समाधय:।।'' इति। यस्य तु प्रारब्धवैचित्र्यात्तदुत्तरमपि विक्षेपप्राधान्यं दृश्यते, तस्य तु तदुत्तरमपि विक्षेपप्राधान्यं दृश्यते, तस्य तदुत्तरमपि सविकल्प्यकसमाधिर्भवन्न निवार्यते। वस्तुतस्तु मनने निदिध्यासने वा गत्वा पर्यवस्यति; अन्यथा ब्रह्मणि सविकल्पप्रत्ययानुपपत्तेरुक्तत्वादित्यास्तामयं चर्च:। सर्वथाऽपि शास्त्रं ब्रह्म बोधयत् सर्वप्रत्यक्तयैवोपस्थापयति, न तु विषयवदिदन्तयेति स्थिति:। एवं सत्यस्मन्मतं मोक्षात्मके ब्रह्मण्युपासनादिक्रियाया अप्रवेशाद् न तस्यानित्यत्वदोषोऽपीत्याह-**अतोऽविद्याकल्पितभेदनिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणाद् न मोक्षस्यानित्यत्वदोष इति**। समानाधिकरणे पञ्चम्यौ। शास्त्रेणेति शेष:।।

अपिच क्रियाफलस्योत्पाद्यादिचातुर्विध्यनियमाद् मोक्षस्यापि तत्त्व उत्पाद्यत्वं विकार्यत्वमाप्यत्वं संस्कार्यत्वं वा स्यात्, न चैतद्युक्तम्; नित्यत्वात्, अनाधेयातिशयत्वाच्च मोक्षस्य।।

ननु ''न च पुनरावर्तते'' इति श्रुतेर्नित्य एव ब्रह्मलोकलक्षणो मोक्षो ज्ञान-कर्मभ्यामुत्पद्यत इति हैरण्यगर्भा:। संसार्येव परमार्थतो जीवो भगवदुपासनावशादसंसारिस्वरूपेण विक्रियते। स च तस्य नित्यो मोक्ष इति वैष्णवा:। विकारभूतो जीवोऽविकृतं ब्रह्मार्चिरादिना मार्गेण गत्वा प्राप्नोतीति भास्करीया:। विद्यमानस्यैवेहाष्टकैश्वर्याविर्भावो मोक्ष इति तौष्टिका:। पशुपतेराराधनयाऽविद्याकाम-कर्मलक्षणपशु-पाशविनिर्मोको मोक्ष इति पाशुपता मन्यन्ते। तत् कथं मोक्षे न कर्मापेक्षा? कथं नोत्पाद्याद्यन्यतमो न मोक्ष:? इत्याशङ्क्य, तेषां मतं क्रमेण दूषयति- ***यस्य तूत्पाद्यो मोक्ष इत्यादिना** *।। तत्रानदितप्रथमपक्षे दोषमासच्जयति- ***तयो: पक्षयोरिति** *।। ''नास्त्यकृत: कृतेन'' ''तद्यथेह कर्मचितो लोक: क्षीयते, एवमेवामुत्र पुण्यचितो लोक: क्षीयते'' इत्यादिश्रुतेरित्याशय:। व्याप्तिविरोधश्चेत्याह- ***नहीति** *।। तृतीयपक्षमनूद्य दूषयति- ***नचाप्यत्वेनापीति** *।। स किमात्मैव? उत तद्भिन्न:? नाद्य इत्याह- ***स्वात्मस्वरूपत्वे सत्यनाप्तत्वादिति** *।। नित्यप्राप्तत्वात्तस्येति शेष:। द्वितीयपक्षेऽपि नाप्यत्वसिद्धिरित्याह- ***स्वरूपातिरिक्तत्वेऽपीति** *।। संस्कार्यत्वपक्षमादाय तदन्तर्गतचतुर्थ-पञ्चमपक्षौ दर्शयित्वा क्रमेण निराकरोति- ***नापि संस्कार्यो मोक्ष इत्यादिना** *।। गुणा अणिमादय:, तदाधानेनेत्यर्थ:; लोके संस्कारस्य द्विधा दर्शनादित्याशय:।।

ननु न वयमदृष्टानां गुणानां तत्रोत्पत्तिं गुणाधानं ब्रूम:, किं तर्हि? विद्यमानानामेव सतामभिव्यक्तिम्, अतो नोक्त दोष इत्याशङ्कते- ***स्वात्मधर्म एव सन्निति** *।। क्रिया हि स्वाश्रये स्वविषये च फलमाधत्ते, नान्यत्र, कर्तृ-कर्मनिष्ठत्वात् क्रियाफलस्य। तत्रैवं सत्यात्मानो गुणाभिव्यक्तिलक्षण-क्रियाफलाश्रयत्वेऽभ्युपगम्यमाने तत्कर्तृत्वं वा स्यात्? तत्कर्मत्वं वा? नाद्य इत्याह- *न

क्रियाश्रयत्वानुपपत्तेरात्मन इति*।। तदनुपपत्तिमुपपादयति- ***यदाश्रया क्रियेति***।। द्वितीयपक्षं दूषयति- ***अन्याश्रयायास्त्विति***।। आत्मनस्तदविषयत्वमसिद्धमिति शङ्कते- ***ननु देहाश्रययेति***।। **दृष्टः***।। शास्त्रप्रमाणेनेति शेषः। किं शुद्धस्यात्मनस्तत्क्रियया संस्कार्यत्वमुच्यते? किं वा देहादिसङ्घाते कृतात्माभिमानस्य? नाद्यः; तस्यानाधेयातिशयत्वादित्युक्तत्वात्। न द्वितीयः; तस्य देहादिभिन्नाश्रयक्रियाफलाश्रयत्वासिद्धेस्तद्विषयत्वाभावात् संस्कार्यतयैव तदाश्रयत्वादिति परिहरति- ***न देहसंहतस्यैवेति***।। कश्चित् प्रतिबिम्बकल्पोऽनिर्वचनीय इत्यर्थः।।

ननु क्रियाया देहनिष्ठत्वेऽपि तत्फलस्य संस्कारस्य तदसंहतात्मनिष्ठत्वं भविष्यतिः शास्त्रप्रामाण्यात्, अन्यथा तद्देहापगम आत्मनि शुद्ध्याद्यनुवृत्तिर्न स्यादिति चेत्, *न*; शुद्ध्यशुद्ध्यादिफलस्याभिमानकृतत्वात्, तस्य च देहद्वयसंहतनिष्ठत्वाद् जन्मान्तरेऽपि देहान्तरेण संहतत्वात् तदभिमानानुवृत्तेः शुद्ध्याद्युपपत्तेः शास्त्रप्रामाण्योपपत्तेरित्यभिप्रायेण सदृष्टान्तं तदुपपादयति- ***यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलमहमरोग इति यत्र बुद्धिरुत्पद्यत इति***।। यत्र देहसंहत आत्मन्यहमरोग इति बुद्धिरुत्पद्यते, तत्संहतस्यैव तदभिमानिनो देहाश्रयचिकित्सानिमित्तेन धातुसाम्येनारोग्यफलमिति यथा, एवं तादृशात्मनो यज्ञोपवीतादि नेति योजना। देहद्वयविशिष्टस्यैवाहंकर्तुः क्रियाफलभोक्तृत्वम्, नासंहतस्येत्यत्र श्रुतिं प्रमाणयति- ***तयोरन्य इत्यादि***।। भवतु ब्रह्मणो नित्यशुद्धता, प्रकृते किमायातम्? अत आह- ***ब्रह्मभावश्च मोक्षः; तस्मान्न संस्कार्योऽपि मोक्ष इति***।। मोक्षस्य चतुर्विधक्रियाफलत्वनिराकरणस्य फलमाह- ***अतोऽन्यन्मोक्षं प्रतीति***।। द्वारान्तराभावादित्याशयः। प्रकृतमुपसंहरति- ***तस्मादिति***।।

ननु मोक्षं प्रति ज्ञानस्यानुप्रवेशेऽङ्गीक्रियमाणे क्रियानुप्रवेशो भवतोऽनिच्छतोऽप्यापतित एव, कुतः? ब्रह्मज्ञानस्योपासनादिक्रियावदन्तःकरणपरिणामत्वेन मानसक्रियात्वात्। तथा च तद्विधिश्रुतिरप्युपपन्नेति चेत्, *कोऽभिप्रायः*? यदि तावत्प्रमाणजन्यज्ञानस्य कामादेरिव मनःपरिणाममात्रत्वाद् मानसक्रियात्वमभिधीयते? तदिष्टमेव; अस्माकमपि ब्रह्माकारान्तःकरणवृत्तेस्तत्परिणामत्वाभ्युपगमात्। न चैतावता भवदिष्टसिद्धिः; तस्याः कामादिवदपुरुषतन्त्रत्वेनाविधेयत्वात्, अन्यथा कामादेरपि तत्प्रसङ्गात्। *अथ* देवतादिध्यानवत् श्रौतज्ञानत्वाविशेषाद् विधेयभावनाव्याप्यमानसक्रियात्वमुच्यते, *तत्र*; पुरुषतन्त्रत्व-वस्तुतन्त्रत्वाभ्यां दृष्टान्त-दार्ष्टान्तिकयोर्वैलक्षण्याद् ब्रह्मज्ञानस्य तादृशक्रियात्वासिद्धेः। तद्धि ज्ञानं पुरुषभावनाव्याप्या मानसी क्रिया नाम भवति, यत्र सा वस्तुस्वरूपमनपेक्ष्यैव चोद्यते। तद्यथा-''यस्यै देवतायै हविर्गृह्णीयात् तां मनसा ध्यायेद् वषट्करिष्यन्'' ''सन्ध्यां मनसा ध्यायेत्'' इति चैवमादिषु। यद्यपि ध्यानं स्मृतिसन्तानलक्षणं चिन्तनं मानसं ज्ञानं भवति; तथाऽपि वस्तुनिरपेक्षचोदनामात्रतन्त्रत्वात् पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यम्; विधेयपुरुषव्यापारतन्त्रत्वात्। न चैतादृशं निर्विशेषब्रह्मात्मज्ञानम्। तद्धि चक्षुरादिजन्यज्ञानवद् भूतवस्तुविषयत्वात् प्रमाणमात्रजन्यम्, न विधितन्त्रपुरुषव्यापारापेक्षमित्यसकृदवोचाम। अतस्तज्ज्ञानं न पुरुषेण कर्तुमकर्तुमन्यथा वा कर्तुं शक्यम्, केवलं वस्तुतन्त्रमेव तत्;

वस्तुतन्त्रस्य पुरुषतन्त्रत्वानुपपत्तेः, अनिच्छतोऽपि दुर्गन्धादेरुपलम्भदर्शनात्। न चापुरुषतन्त्रस्य चोदनातन्त्रत्वमस्ति; तयोरविनाभूतत्वात्। तस्माद् ब्रह्मज्ञानस्य मानसज्ञानत्वेऽपि चोदनातन्त्रमानसज्ञानतो महद्वैलक्षण्यमिति।।

ननु असिद्धमेतद् महद् वैलक्षण्यम्; देवताध्यानादेरपि वस्तुविषयत्वाङ्गीकारात्; अन्यथा देवताधिकरणविरोधात्, उद्गीथादिविद्यायां तत्तदुपास्यायास्यत्वानिगुणगणविशिष्टप्राणादिदेवताया महता प्रबन्धेन व्यवस्थापनाच्चेति चेत्, *सत्यम्*; यत्र नास्ति प्रमाणान्तरविरोधः, तत्र व्रीह्यदिद्रव्यवत् पृथिव्यादिलोकवच्च सिद्ध्यत्येव तद्विषयः, नैतावता विषयसत्त्वमात्रेण प्रमाणज्ञानेन ध्यानस्यावैलक्षण्यम्। तथात्वेऽपि तमनपेक्ष्यैव विधितः पुरुषव्यापारतन्त्रतया ध्यानस्य जायमानत्वाद् वैलक्षण्यसिद्धेः, तद्यथा "पुरुषो वाव गौतमाग्निरि" त्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी केवलचोदनाजन्यक्रियात्वात् पुरुषव्यापारतन्त्रैव, न वस्तुतन्त्रा; तादृशवस्तुनोऽसत्त्वात्, तद्वत्। यत्रापीन्द्रादिदेवतालक्षणं वस्त्वस्ति "यस्यै देवतायै हविर्गृह्णीयादि" त्यादौ तदनपेक्ष्यैव चोदनाधीनपुरुषव्यापारवशात् तदुत्पत्तिरिति। या तु प्रसिद्धेऽग्नौ प्रत्यक्षादिप्रमाणाद् वस्तुबुद्धिरुत्पद्यते, सा न चोदनातन्त्रा, नापि पुरुषव्यापारतन्त्रा। कथं तर्हि? प्रत्यक्षादिविषयवस्तुतन्त्रैवेति वस्तुविषयज्ञानमेव तत्, न पुरुषभावनाव्याप्या मानसी क्रिया भवति। एवं सर्वप्रमाणविषयवस्तुज्ञानं वेदितव्यम्। तथा च सति तथाभूतब्रह्मात्मविषयज्ञानमपि न चोदनातन्त्रम्, नापि पुरुषतन्त्रमिति सिद्धं वैलक्षण्यम्। तथा च हेयोपादेयशून्यवस्तुविषयत्वात्, दृष्टफलत्वादपुरुषतन्त्रत्वाच्च ब्रह्मज्ञान-तद्विषययोरन्यतरस्याप्यननुष्ठेयत्वात्-"आत्मन्येवात्मानं पश्येत्" "आत्मा वा अरे द्रष्टव्यः" इति श्रूयमाणा अपि **लिङादय** उपले प्रयुक्त**क्षुरतैक्ष्ण्यवदनियोज्यविषयत्वात् कुण्ठीभवन्तीति**।।

यस्तु-एतद्भाष्यमुपादाय क्रियाया ज्ञानत्वमेव नास्तीतिं तत्परतया व्याकृतवान्, स लौकिकवैदिकव्यवहारौ बाधते। लोके ह्युपासनं ज्ञानमिति व्यवहरन्ति सर्व आगोपालपण्डितं जनाः। वेदेऽपि "यदुपास्ते" "य एवं विद्यात्" "एवं जानीयादि" त्यादावविगानेन प्रयोगो दृश्यते। न च-तेषां भिन्न-विषयत्वमिति-वाच्यम्; "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्युपासिनोपक्रम्य "पिता ह वै कामानां भवति य एवं वेद" इति विदिनोपसंहारदर्शनाद् भिन्नविषयत्वासिद्धेः।।

मानसवृत्तित्वसाम्यात् तज्ज्ञानत्वोपचार इति चेत्, न; कामादावपि तत्प्रसङ्गात्। *अथ* एवं मन्यसे-उपासि-विदिक्रिययोर्मानसत्वसामान्याद् "अग्निर्वै ब्राह्मणः" इतिवज्जातियोगादुपासनायां लोके वेदे च ज्ञानशब्दः प्रयुज्यते, न शक्त्येति-चेत्, *नैवम्*; कामादवप्युपचारेण तत्प्रयोगप्रसङ्गात्, मनोजत्वगुणस्योभयत्र तुल्यत्वात्। न च तत्र लोके वेदे च ज्ञानशब्दः प्रयुज्यते। प्रयोगे सति निमित्तानुसरणमिति चेत्, न; प्रयोगाभावस्यान्यथाप्युपपद्यमानत्वात्, अन्यथाऽन्योन्याश्रयापत्तेः-उपचारकल्पनासिद्धावुपासनाया ज्ञानभिन्नत्वसिद्धिः, तत्सिद्धावुपचारकल्पनासिद्धिः-इति। एवं सत्यन्यत्रापि सर्वत्रोपचारासिद्धिरिति चेत्, तस्य प्रमाणान्तरेणार्थभेदसिद्ध्यधीनत्वादन्यत्र तदुपपत्तेः। न चात्रोपासनायाः

प्रमाणान्तरेणाज्ञानत्वं सिद्धमस्ति। पुरुषतन्त्रत्वमेव तदज्ञानत्वप्रयोजकमिति चेत्, न; अप्रयोजकत्वात्, स्मृतिविशेषे व्यभिचाराच्च, ''सदृशादृष्ट-चिन्ताद्याः स्मृतिबीजस्य बोधकाः'' इत्यभ्युपगमात् चिन्ताजनितस्मृतेः पुरुषतन्त्रत्वात्, चिन्तायाः पुरुषव्यापारत्वात्, सहकारित्वमात्रस्यैवोद्बोधकत्वशब्दार्थत्वात् तदन्यथासिद्धिकल्पनाया असंभवात्, प्रत्यक्षेणोपास्तिक्रियाया ज्ञानत्वानुभवात्, कालात्ययापदिष्टत्वाद्वा। तस्माल्लिङ्गमेतत्-यत् पुरुषतन्त्रत्वमिति। अपिच शब्दप्रमाणेन यद्गुणविशिष्टो यादृशोऽर्थश्चिन्तनीयत्वेनोपस्थापितः, तस्यैवार्थस्य प्रयत्नपूर्वकमन्यविषयवृत्तिनिराकरणेन पुनःपुनःस्मारणमेवोपासनमुच्यते। तथा च स्मृतिसन्तानस्योपासनत्वात् कथं तदज्ञानं भवेत? यदि वा न ज्ञानम्, कथं तर्हि स्वविषयं प्रकाशयेत्? नहि गमिक्रिया स्वविषयं ग्रामं प्रकाशयति। *एतेन*-शब्दप्रमाणाजन्यत्वादज्ञानत्वमित्यपि- *अपास्तम्*; शब्दप्रमाणजनितज्ञानस्यैवा- वर्त्यमानस्योपासनत्वात् तदजन्यत्वासिद्धेः। शब्दस्य विधिपरत्वात् तदर्थो न विवक्षित इति चेत्, न; विधिपराच्छब्दादप्यर्थसिद्धेः, अन्यथा यागादेस्ततोऽसिद्धिप्रसङ्गात्।।

अथ यागादेरेवार्थस्य तत्रानुष्ठेयत्वात् तदभावे विधेरेवासंभवात् तत्सिद्धिः, अत्र तु ज्ञानस्यैवानुष्ठेयत्वाद् विषयारोपेणापि तत्सिद्धेर्न नियमेनार्थसिद्धिरिति, *अस्त्वेवम्*; ज्ञानं तु सिद्धमेव, नैतावता तस्य ज्ञानत्वमपैति। न चारोपितविषयस्याज्ञानत्वम्; भ्रमादेरज्ञानत्वप्रसङ्गात्, तस्य ज्ञानत्वाङ्गीकारात्, तर्कादेरिवाहार्यारोपेऽपि ज्ञानत्वाक्षतेः। तस्मादसदेत्-यदुपासनाया न ज्ञानत्वमिति। तस्मात् प्रमाणवस्तुतन्त्र-पुरुषतन्त्रज्ञानयोस्तत्कृतिजन्यत्वाजन्यत्वाभ्यां क्रियात्वाक्रियात्वाभिधानं भाष्यकृता कृतं कृतितन्त्रक्रियाया एव विधेयत्वेन पुरुषकार्यत्वात्, न तयोः क्रियात्व-ज्ञानत्वभावाभावाभ्याम्, उभयोरपि मनःपरिणामत्वेन क्रियात्वात्, स्वविषयप्रकाशकत्वेन ज्ञानत्वाच्च। यथा चायमर्थो भाष्यस्य, तथाऽस्माभिर्भावव्याख्यानेन प्रदर्शित एव।।

अपिच यदि भाष्यकारेणात्रोपासनाया ज्ञानभिन्नक्रियात्वं विवक्षितं स्यात्, तर्हि योषित्पुरुषयोरग्निबुद्धिर्मानसी भवतीति तत्र बुद्धिशब्दो न प्रयुज्यते; बुद्धिशब्दस्य निश्चयापरपर्यायत्वादज्ञानात्मिकायां तत्प्रयोगानुपपत्तेः। तस्माद् यथाव्याख्यातमेव मन्तव्यमिति।।

ननु आत्मज्ञानस्यानियोज्यविषयत्वादपुरुषतन्त्रत्वाददृष्टफलत्वाच्च नास्ति चेद्विधिः, तर्हि ''आत्मन्येवात्मानं पश्येत्'' ''आत्मा वा अरे द्रष्टव्यः'' इत्यादिवाक्यानि तद्विधिच्छायापन्नानि निरर्थकानि स्युः, न चैतद् युक्तम्; स्वाध्यायविध्युपात्तानां नैरर्थक्यानुपपत्तेः। एवं तर्हि ''इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधीमादत्ते'' इतिवत् परिसङ्ख्यार्थानि तानि भवन्तु; अनात्माभिमुख्यवारणार्थत्वात्।। साधनचतुष्टयसंपन्नस्यात्मप्रेप्सोः कथम्-''आत्मा ज्ञातव्यः'' इति जिज्ञासायामनात्मा न द्रष्टव्य इति? स्वाभाविकाविद्यादिदोषवशाद् बहिर्विषयाभिमुखान्तःकरणतो विनिवृत्तिस्तदुद्देशेन विधीयते? तेषु हि देहादिभ्यो बहिर्विषयेभ्यो विनिवृत्तेष्वात्मा-''इदं सर्वं यदयमात्मा'' इत्यादितत्त्वावेदकप्रमाणेन ग्रहीतुं

शक्यते। तथा च श्रुतिः-''यदा पञ्चैव लीयन्ते ज्ञानानि मनसा सह। बुद्धिश्च नेङ्गते तत्र परमात्मानमश्नुते''।। इति।।

यद्यपि साधनचतुष्टयसंपन्नस्यात्मप्रेप्सोस्तन्निवृत्तिरपि प्राप्तैव शम-दमादिवत्; तथाऽपि दोषप्राबल्यात् प्रमादकृतात् तदनिवृत्तिः स्यात्। तथा च श्रुतिः-''नायमात्मा बलहीनेन लभ्यो नच प्रमादात् तपसोऽवाप्यलिङ्गात्।'' इति। अतः पञ्चपञ्चेतरनखभोजनवत् तदर्थेयं परिसङ्ख्या।।

यद्वा-''आनर्थक्यात्तदङ्गेषु'' इत्यङ्गावतरणन्यायेन शमदमादेः श्रवणादेश्च तत्साधनस्य नियमपराण्येतानि विधिवाक्यानि, इति न काचिदनुपपत्तिः। यथा चैतत् तथा-''आत्मेत्येवोपासीत'' ''आत्मानमेव लोकमुपासीत'' ''सोऽन्वेष्टव्यः'' इत्यादि श्रुतिभाष्ये स्पष्टम्, तेनात्यन्ताप्राप्तविषयत्वाद् विधेः-''विधिरत्यन्तमप्राप्तावि'' त्यभियुक्तवचनादपूर्वविधित्वमेव विद्याप्रकरणे वाक्यानां भाष्यकारेण निराक्रियते, न नियमादिपरत्वमिति ध्येयम्। तथा च ''सहकार्यन्तरविधिः पक्षेण तृतीयम्'' इति सूत्रमप्युपपन्नं भवति; अतो यद् भाष्यवाक्यार्थानभिज्ञतयैव तत्साधननियमादिपरत्वमपि तद्वाक्यानां नास्तीत्येतद्भाष्याभिप्रायः कैश्चिद् वर्ण्यते, तच्च तेषामेव शोभते स्वाध्यायविधिविरोधमपश्यतां श्रुति-सूत्र-भाष्यविरोधमपश्यतां चेत्यास्ताम्। सर्वथाऽपि नास्ति ब्रह्मात्मैकत्वविज्ञाने विधिरिति।।

यदपि प्रतिपत्तिविधिवादिनोक्तम्-यद्यकर्तव्यप्रधानमात्मवाक्यं स्यात्, तर्हि ''सप्तद्वीपा वसुमती'' इत्यादिवद् न हानायोपादानाय वेति निरर्थकमेव स्यादिति, तन्मन्दम्; हानायोपादानाय वा न भवेदित्यङ्गीकृतमस्माभिः; अलङ्कारत्वात्; यतः- *ब्रह्मात्मावगतौ सत्यां कर्तव्यताहानिः कृतकृत्यता च। तथा च श्रुतिः-''आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमुनसंज्वरेदि''-त्यादि। स्मृतिरपि-''एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारते'' त्यादि। *एतेन*-नैरर्थक्यमपि-*अपास्तम्*; हानोपादानशून्याद् रज्जुज्ञानादिव सर्पभयादिनिवृत्तेर्ब्रह्मज्ञानात्सर्वानर्थनिवृत्तेर्दृष्टत्वाच्च, दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यशङ्काया अग्रे परिहरिष्यमाणत्वात्। तस्माद् न प्रतिपत्तिविधिशेषतया वेदान्तैर्ब्रह्मसमर्पणम्, किं तर्हि? सर्वप्रत्यक्तयैवेति सिद्धम्।।

यत्तु नियोगाभिनिवेशान्नियोगवादिन आहुः-प्रवृत्ति-निवृत्तिविधिशेषव्यतिरेकेण केवलसिद्धार्थवादी वेदभागो नास्ति; तत्र शक्तिग्रहासंभवेन तत्प्रतिपादनानुपपत्तेः-इति,

तत्र वक्तव्यम्-कोऽभिप्रायो भवताम्? किमौपनिषदस्यात्मनः क्रियाशेषत्वमभिप्रेयते? (१) किं वा तत्फलत्वम्? (२) किं वा नास्त्येव तादृशं वस्त्विति तदसत्त्वमेव?(३) अथवा सत्त्वेऽपि तस्योपनिषद्भिरप्रतीयमानत्वम्? (४) प्रतीयमानत्वे वाप्रमाणान्तराधिगतत्वाद् वायुक्षेपिष्ठत्वादिवद-

प्रमेयत्वम्?(५) प्रमेयत्वे वाऽन्यशेषतया तत्प्रमेयत्वम्? (६) अन्याशेषत्वे वा हेयोपादेयशून्यतया निष्प्रयोजनत्वमिति (७)।

नाद्यः; स्वप्रकरणस्थत्वेनानन्यशेषत्वात्, असंभवाच्च। नापि द्वितीयः; उत्पाद्यादिचतुर्विधद्रव्यविलक्षणत्वेन तस्यापि प्रत्युक्तत्वात्। नापि तृतीयः; ''स एष नेति'' ''एष सर्वभूतान्तरात्मा'' इति च तस्यात्मत्वश्रुतेः केनापि प्रत्याख्यातुमशक्यत्वात्। नह्यात्मा केनापि निराकर्तुं शक्यते। य एव निराकर्ता, येन न हेतुना निराकरणम्, तस्य तस्यैव प्रत्यगात्मा स व्यवतिष्ठते, इति न शक्यते 'नास्ति' केनापि निराकर्तुम्। तथा चाह भगवती श्रुतिः-''असन्नेव स भवति असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरि''ति। नापि चतुर्थः; उपनिषद्भ्यस्तदधिगमस्य सर्वप्रत्यक्षसिद्धत्वेनापह्नोतुमशक्यत्वात्। नापि पञ्चमः; प्रमाणान्तरानधिगतस्य तस्य पूर्वमेव प्रदर्शितत्वात् तस्यैवात्रानुसन्धेयत्वात्।।

ननु अहंप्रत्ययवेद्य आत्मा, कथं तस्य प्रमाणान्तरानधिगतत्वादौपनिषदत्वम्? इति चेत्, ***न***; **तत्साक्षित्वेन प्रत्युक्तत्वात्***, उक्तमेतदधस्तात्, अहंप्रत्ययसाक्षिण एवात्मत्वेन तद्विषयस्याहंकारस्य दृश्यत्वेन घटादिवदनात्मत्वात्। *एतेन*-विधिकाण्डान्यथानुपपत्त्याऽनुमानेन वा तत्सिद्धिः-प्रत्युक्ता; तयोरप्यहंप्रत्ययविषयकर्तृमात्रविषयत्वेन तत्साक्षिविषयत्वासंभवादित्युक्तत्वात्, प्रमातृप्रमाणयोरपि तदात्मकत्वात्। अतः सर्वस्यात्मत्वेनोपनिषत्प्रमाणमात्रसमधिगम्यो न स केनापि प्रत्याख्यातुं शक्यः; सर्वात्मत्वादेव। अत एव च न हेयो नाप्युपादेयः। *ननु* सर्वस्यात्मा चेदयम्, हन्त सर्वस्य जनिमतो नाशेऽस्य नाशः स्यादिति चेत्, *न*; नाशहेत्वभावात्। उक्तमेतद् नाशहेतोरप्ययमात्मेति। यं यं हि हेतुं मम प्रतीचो नाशार्थं भवान् विवक्षति, तस्य तस्य भवतश्च प्रत्यक्तयाऽहं स्वरूपमिति कथं ममोपनिषद्भिर्गीयमानसतत्त्वस्य भवता निराकरणं स्यात्? तस्मात् ***सर्वं हि विकारजातं विनश्यत् पुरुषान्तं विनश्यति पुरुषस्तु विनाशहेत्वभावाद्, न विनाशी*; विक्रियाहेत्वभावाच्च कूटस्थनित्यः। अत एव नित्यशुद्ध-बुद्ध-मुक्तस्वभावः***।। न चैतादृशस्य क्रियाशेषत्वं सचेतसाऽध्यवसातुं शक्यते; सर्वस्यैतच्छेषत्वात्। तथा च श्रुतिः-''पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।'' इति।।

अन्यशेषत्वे चैतन्नोपपद्येत। अपिच यदि स्वप्राधान्येनोपनिषद्भिर्ब्रह्म न प्रतिपाद्येत, ततः-''तं त्वौपनिषदम्'' इत्यौपनिषदत्वविशेषणं ब्रह्मणो नावकल्पेत; अन्यपरत्वादुपनिषदाम्। तस्माद् वस्तुपरो वेदभागो नास्तीति बहिर्मुखानां यत् प्रलपनम्, तत्साहसमात्रमेव। अतो न षष्ठः पक्षः साधीयानिति।

अथानन्यशेषस्य हेयोपादेयत्वशून्यभूतवस्तुप्रतिपादनं निरर्थकमिति सप्तमः पक्षोऽपि न; सर्वानर्थमूलमिथ्याज्ञाननिवृत्तिप्रयोजनस्यासकृदावेदितत्वात् तदर्थमन्यशेषताभ्युपगमस्यायुक्तत्वात्।।

ननु उपनिषदां भूतवस्त्वभिधानपरत्वे-''आम्नायस्यं क्रियार्थत्वादानर्थक्यमतदर्थानाम्''''दृष्टो हि तस्यार्थः कर्मावबोधनं नाम'' इत्यादि शास्त्रतात्पर्यविदामनुक्रमणं विरुध्येतेत्युक्तमिति चेत्, *न*; प्रकृतविधि-निषेधशास्त्राभिप्रायत्वादाम्नायपदस्य; यथा चैतत् तथोक्तमधस्तात्। अतो न तदनुक्रमणविरोधः।

अपिच यद्यक्रियार्थानामानर्थक्यमेकान्तेनाभ्युपगम्यते भवता, कर्मकाण्डेऽपि यूपाहवनीय-स्वर्गादिभूतोपदेशानर्थक्यप्रसङ्गः। अथ तदानर्थक्यपरिहाराय प्रवृत्ति-निवृत्तिव्यतिरिक्तं भूतमपि द्रव्य-देवतादिकं भव्यार्थत्वेन शास्त्रेणाभिधीयत इत्यभ्युपगम्यते; अन्यथा तत्प्रकाशकमन्त्रा-देरशास्त्रत्वापत्तेः, तदसिद्ध्या भव्यासिद्धेश्चेति चेत्, एवं तर्हि स्वप्रकरणस्थं नित्यं भूतवस्तु शास्त्रेण नोपदिश्यत इति को हेतुः? नहि भूतमुपदिश्यमानं क्रिया भवति। *अथैव मन्यसे* अक्रियार्थत्वेऽपि द्रव्य-देवतादीनां भूतानां कियासाधनत्वात् तदर्थमुपदेशः स्यादिति, *आस्तां क्रियार्थत्वम्*; किं तावता? **क्रियानिर्वर्तनशक्तिमन्ति** भूतानि वस्तूनि शास्त्रेणोपदिष्टान्येव, अक्रियार्थत्वं तु-तेषां प्रयोजनम्। न चैतावता तानि नोपदिष्टानि। न च तानि न भूतानि। उपदिश्यतां कर्मप्रकरणे तदर्थतया भूतं वस्तु शास्त्रेण, तावताऽपि किमिष्टं तव सिद्धमिति चेत्, उच्यते-प्रमाणान्तरानधिगतात्मवस्तूपदेशस्तथैव भविष्यति। न च तस्य क्रियार्थत्वाभावे निरर्थकत्वशङ्काऽस्ति; तदवगतिमात्रेण संसारहेतोरविद्याया निवृत्तेः प्रयोजनस्य सत्वात् सार्थकत्वोपपत्तेः। अपि चाक्रियार्थानामक्रियारूपाणां च स्वर्गादिफलानां कर्मकण्ड उपदेशः क्रियते यथा, तद्वद् आत्मतत्त्वस्याप्युपदेशो न विरोत्स्यते। यदि ब्रूयात् स्वर्गादेः स्वतः प्रयोजनरूपत्वाद् न प्रयोजनान्तरापेक्षा, ब्रह्मात्मैकत्वस्यापि निरतिशयसुखरूपत्वाद् न प्रयोजनान्तरापेक्षेति समः समाधिः।।

'*ननु* कार्यान्विते कार्यान्वयान्वयिनि वा शक्तिग्रहनियमात् शक्तिग्रहानुसारेण च वाक्यार्थावधारणात् कथं केवलं वस्तूपदिश्यताम्? अतोऽस्ति वैषम्यमिति चेत्, *न*; 'पुत्रस्ते जातः''नदीतीरे पञ्च फलानि सन्ती' त्यादिवाक्येषु व्यभिचाराद् लाघवाच्चेतरान्वित एव शक्तिग्रहादुक्तनियमासिद्धेः। न च-तत्र प्रवृत्तिलिङ्गाभावात् कथं तत्र शक्तिग्रह इति-वाच्यम्; हर्षपुत्रोत्सवकरणादिलिङ्गस्य तद्ग्राहकत्वात्। न च-जायासुखप्रसवादेरर्थान्तरस्यापि हर्षहेतोः संभवाद् न हर्षस्य पुत्रजन्मलिङ्गतेति-वाच्यम्; हर्षमात्रस्य तथात्वेऽपि तादृशलिङ्गविशेषेणानुमितहर्षविशेषस्य तथात्वोपपत्तेः। *एतेन*-जातकर्मादौ वक्तुरभिप्रायाद् लक्षणया तत्परमेवैतद्वाक्यमिति-*अपास्तम्*; तदनियतत्वात्। नहि सर्वेषां जातकर्मादौ प्रवृत्तिरस्ति, येन यद्वाक्येन तल्लक्ष्येत; अत्रैवर्णिकेषु नास्तिकेषु न तददर्शनात्। न च वक्तुरपि तदभिप्रायः संभवति; बाहुल्येन पुत्रजन्मख्यापनस्यैवाभिप्रेतत्वेन सर्वानुभवसिद्धत्वात्। *एतेन*-तत्पदाध्याहारोऽपि-*प्रत्याख्यातः*; प्रमाणाभावात्, निरर्थकत्वाच्च, पुत्रजन्मावगममात्रादेव परमप्रीतिलाभात्प्रयोजनसिद्धेः। *एतेन*-नदीतीरवाक्येऽपि कार्यपदाध्याहारः-*प्रत्याख्यातो द्रष्टव्यः*; तावतैव वाक्यस्य पर्यवसानात्,

प्रत्यक्षादिविषय इव रागत एव प्रवृत्तिसिद्धेः, तदभावे विधौ सत्यपि प्रवृत्त्यदर्शनात्। अपिच कार्यान्वित एव शक्तिग्रह इति नियमे कार्यपद एव लिङ्गादौ शक्तिग्रहो न स्यात्; कार्यस्य कार्यान्तरानन्वयात्, अन्यथा स्वातन्त्र्यव्याघातात्, स्वस्य स्वान्वयासंभवादात्माश्रयापत्तेः। तदन्वयाभावेऽपि तत्र शक्तिग्रहे कार्यपद एव व्यभिचारः। अत एव न कार्यान्वयान्वयिनि शक्तिग्रहनियमः; कार्यान्तरस्यान्वयविशेषणत्वे स्वातन्त्र्यव्याहतिरन्योन्याश्रयणादिदोषप्रसङ्गश्च, स्वस्यैव स्वान्वयविशेषणत्व आत्माश्रयदोषः। स्वोपलक्षितान्वयान्वयित्वे नायं दोष इति चेत्, तर्ह्यन्वितमात्रे शक्तिग्रहः स्यात्, गता कार्यान्विते शक्तिग्रहकथेति सिद्धं नः समीहितम्॥

अपिच किं वा भवता कार्यत्वेनाभिमतम्? तदुच्यताम्। नियोग इति चेत्, ननु नियोग एव कः? यस्मिन् प्रतीते नियुक्तोऽहमिति मत्वा पुरुषः प्रवर्तते, स नियोग इति चेत्, ननु तर्हि स्वर्गादिलक्षणं क्रियाफलमेव नियोगः स्यात्; तत्प्रयुक्ततया पुरुषस्य तत्साधनेषु प्रवृत्तेः। तथा चोक्तम्-''येन प्रयुक्तः पुरुषः प्रवर्तते, तत्प्रयोजनमि''ति। फलरागो वा स्यात्; तेन नियुक्ततया ग्रहगृहीतवत् पुरुषस्य प्रवृत्तेः। नित्ये नास्तिफलं तद्रागो वेति चेत्, न; प्रत्यवायपरिहारफलस्य विद्यमानत्वात्, ''कर्मणा पितृलोकः'' इति फलान्तरस्यापि सत्त्वाच्च। *एतेन*-फलरागोऽपि तत्र- *व्याख्यातः*; प्रत्यवायजिहासादेस्तत्र संभवात्। इष्टसाधनताज्ञानं वा नियोगः स्यात्; तत एव सर्वत्र प्रवृत्तिदर्शनात्। अत एवेष्टसाधनत्वं विधिरिति वृद्धाः॥

ननु नियोजका लिङ्-लेट्-तव्यादयः, नतु नियोगः; नियोगस्याज्ञादिवत् प्रयोजकव्यापारत्वेन तद्भिन्नतया सिद्धत्वादिति चेत् *एवमपि* फलरागादेव प्रवर्तकत्वेन नियोगस्य प्रवर्तकत्वानुपपत्तेः, तद्व्यापारत्वेन स्वातन्त्र्यव्याहतेश्च। तथा चापसिद्धान्तः। आज्ञादिवन्नियोजकव्यापारत्वेऽपि प्रवर्तकत्वमस्त्येवेति चेत्, सत्यम्; तथाऽपि स्वातन्त्र्यहतिस्त्वपरिहार्यैव। अपिच नियोगस्यापि प्रवर्तकत्वेन नियोजकत्वाद् नियोगाव्यवस्थाप्रसङ्गः; एकस्यां क्रियायां प्रवर्तकानेकत्वेन तद्व्यापारानेकत्वाद् नियोगानेकत्वप्रसङ्गाच्च। नियोगव्यञ्जकाश्चैते प्रयोजकव्यापाराः, ध्वनय इव वर्णव्यञ्जकाः; नतु स्वतो नियोगाः। तदभिव्यञ्जकत्वेन तु नियोगा इत्युच्यन्ते बुद्धिवृत्तय इव ज्ञानानीति। तदभिव्यङ्ग्यस्तु नियोगः। स च स्वतन्त्र एकश्चेति नोक्तदोष इति चेत्, न; तादृशनियोगकल्पने प्रमाणाभावात्। सर्वोऽपि शब्दस्तत्र प्रमाणमिति चेत्, न; ''पुत्रस्ते जातः'' इत्यादिषु व्यभिचारात् तेषामपि कार्यपरत्वकल्पनेन व्यभिचारपरिहारे चान्योन्याश्रयापत्तेः,-सर्ववाक्यानां कार्यार्थत्वसिद्धौ तेषामपि कार्यपरत्वकल्पनम्, तेषामपि कार्यरत्वकल्पने सर्ववाक्यानां कार्यार्थत्वसिद्धिरिति। अपिचोपसर्जनान्वितप्रधानपदार्थस्तयोः परस्परान्वयो वा वाक्यार्थोऽभ्युपगन्तव्यः; तद्व्यतिरिक्तवाक्यार्थस्य व्यवहारगोचरत्वेन व्यवहारभूमौ कल्पयितुमशक्यत्वात्। अत एव नास्माकं ब्रह्मणि व्यभिचारः; तस्याप्यपदार्थत्वात् स्ववाक्यार्थत्वानङ्गीकाराच्च, ''यतो वाचो

निवर्तन्ते'' इत्यादिश्रुतेरित्यसकृदावेदितमस्माभिः। न च परकल्पितनियोगोऽपि तथा; तस्य सिद्धत्व आत्मत्वे वाऽस्मदभिमतं ब्रह्मैव नामान्तरेणाभ्युपगतं कार्यवादिभिः, इति न विवदामहे, कार्यत्वव्याहतेश्च। तद्वैपरीत्ये च शशविषाणकल्पत्वान्निष्प्रमाणकमेव तत्।।

ननु एवं तर्हि उपसर्जनान्वितप्रधानपदार्थ एव वाक्यार्थो नियोगोऽस्तु; क्रिया-कारकादेस्तदुपसर्जनत्वादिति चेत्, *न*; 'गामानय' 'नीलमुत्पलम्' इत्यादिवाक्येषु क्रिया-द्रव्ययोरेव प्राधान्यदर्शनात् तदतिरिक्तप्रधानपदार्थकल्पने प्रमाणाभावात्। *ननु* अपूर्वः खलु वाक्यार्थो भवति; अनधिगतार्थगन्तृत्वाद्वाक्यस्य; अन्यथाप्रामाण्यव्याहतेः। न च क्रियाद्रव्यादेरपूर्वत्वमस्ति; प्रत्यक्षादिप्रमाणान्तरगोचरत्वात्, अतो य एव प्रमाणान्तरानधिगतो वाक्यार्थः स नियोग इति चेत्, *न*; विशिष्टक्रिया-द्रव्यादेरेव तत्काले प्रमाणान्तरानधिगतत्वेनापूर्वत्वात् कालान्तरे प्रमाणान्तरप्रवृत्तावपि पूर्वस्य प्रमाणत्वाव्याहतेः, अन्यथा चक्षुरादेरप्रामाण्यप्रसङ्गात्, तद्विषये प्रमाणान्तरप्रवृत्तिदर्शनात्। न च-एवं सति वाक्यस्य कुत्राप्यनुवादकता न स्यादिति-वाच्यम्; पूर्वं प्रमाणान्तरेणाधिगते विधेये तत्त्वाङ्गीकारात्।।

ननु भवतु नाम लौकिकवाक्यानां वस्तुगत्या प्रमाणान्तरगोचरोऽपि क्रियादिस्तत्कालेऽनधिगतत्वमात्रेण विषयः, वैदिकवाक्यानां तु कालत्रयासंस्पर्शित्वेन सर्वात्मना प्रमाणान्तराविषयोऽर्थः प्रतीयते। न च दर्शादिक्रिया, नवा तत्साधनद्रव्यादिः; तयोरनुष्ठानकाले प्रत्यक्षादिप्रमाणान्तरेणाधिगम्यमानत्वादिति चेत्, *न*; केवलस्य दर्शादेः प्रमाणान्तराधिगम्यत्वेऽपि स्वर्गादिफलसाधनतया प्रमाणान्तरेण कदाप्यनधिगमादपूर्वत्वसिद्धेः, तत्फलसाधनत्वस्यैव नियोगत्वाङ्गीकारेऽस्मदभिमतसिद्धेः, इष्टसाधनत्वस्यैवास्माभिर्लिङाद्यर्थत्वेन विधित्वाभ्युपगमात्।।

ननु ''दर्श-पूर्णमासाभ्यां यजेत'' ''ज्योतिष्टोमेन यजेत'' इत्यादितृतीयादिविभक्त्यैव दर्शादेरभिलषितसाधनत्वसिद्धेर्लिङादिना तदभिधाने पौनरुक्त्यं स्यात्, अतस्तेनातिरिक्तो नियोगाख्यो विधिरभिधीयत इति चेत्, न; सामान्य-विशेषभावेन तदभिधानादपौनरुक्त्यसिद्धेः। लिङादिना स्वसंसृष्टप्रकृत्यर्थस्य यजिमात्रस्याभिलषितसाधनत्वेऽभिहिते, को वा यजिस्तत्साधनम्? इत्यपेक्षायाम्-'ज्योतिष्टोमेन' इति समानाधिकृततृतीयान्तनामपदेन तद्विशेषः समर्प्यते-यथा किमिष्टम्? इति विशेषापेक्षायां स्वर्गपदेनेष्टविशेषः समर्प्यते; तद्वत्। यद्यपि नामप्रातिपदिकार्थमात्रादेव यज्यर्थयागविशेषलाभात् तदन्वितमभिलषितसाधनत्वं लिङाभिधीयमानं विशेषेऽवतिष्ठते, अतो न तदर्थं तृतीयाविभक्तेरपेक्षा; तथाऽपि विभक्तिं विना प्रातिपदिकस्यासाधुत्वाद् विभक्त्यन्तरकरणे च व्यधिकरणतयैवान्वयानुपपत्तेः करणत्वांशानुवादेन लिङ्गांशानुवादेन च संख्यामात्रमभिदधती तृतीयाविभक्तिः साधुत्वायावतिष्ठते; लिङ्गस्य प्रातिपदिकार्थत्वात्। लोके च ''शुष्केन दण्डेन गामभ्याज''

इत्यादौ तथा प्रयोगदर्शनात्। अतो न पौनरुक्त्यदोषः।। अपिच नियोगवादिमते तृतीयाविभक्तिर्नोपपद्यते। द्वितीयाविभक्तिरेव युज्येत; नियोगविषयत्वेनैव यागान्वयाभ्युपगमात्, कस्य? कुत्र नियोगः? इत्याश्रय-विषयसापेक्षत्वाद् नियोगस्य, यागस्य तद्विषयत्ववत् तत्करणत्वमप्यङ्गीकृतम्। ''कृति-तत्कार्यमध्यस्थो यागादिविषयो मतः। कार्ये संघटिताकारे करणत्वेन सम्मतः।।'' इति चेत्, न; तत्करणत्वस्यार्थकत्वाभ्युपगमेन तृतीयया तदभिधानानुपपत्तेः, साधिकारस्य सविषयस्यापि नियोगस्यासिद्धत्वात्। अर्थात् स्वविषयमेव यागादि स्वविषयसिद्ध्यर्थं करणत्वेनाङ्गीकरोति, नियोग इति नियोगवाद्यभ्युपगमः। न चैवं प्रथमापेक्षितमन्यतोऽप्राप्तं कर्मत्वं परित्यज्यार्थप्राप्तं करणत्वं श्रुत्याऽभिधातुं युक्तम्; उन्मत्तवाक्यवत् श्रुतेरनादेयवचनत्वापत्तेः। अतो न तव मते तृतीयोपपत्तिः स्यात्, नियोगकरणस्यैव यागस्य फलकरणत्वात्, पृथक्करणत्वकल्पने च स्वातन्त्र्येण फलद्वयापत्तेर्नियोगफलयोः परस्परसम्बन्धो न स्यात्। तथा च फल-नियोगत्वासिद्धिः।

अपिच नाम-यजिपदयोः सामानाधिकरण्येनान्वयो न स्यात्; यजेर्नियोगकर्मत्वेनान्वयाद् नाम्नस्तु फलकरणत्वेन। अस्त्वेवमिति चेत्, न; असामानाधिकरण्ये नामत्वव्याघातात्। तथा च नामधेयोक्तन्यायव्याघातः, तस्मादपीष्टसाधनत्वमेव विधिः, न परकल्पितो नियोग इति। इष्टसाधनत्वस्य विधित्वे ''समिधो यजति'' ''तनूनपातं यजति'' इत्यादौ द्वितीयाविभक्त्यनुपपत्तिरिति चेत्, न; कर्तृव्यापारापेक्षया तत्कर्मत्वात्तदुपपत्तेः। सर्वं हि करणं कर्तृव्यापारस्य कर्म भवति; कर्तृव्यापारविषयस्यैव करणत्वात्। अतः स्वसाध्यकरणमपि समिदादि पुरुषकृतिमपेक्ष्य कर्मतया व्यपदिश्यते-समिदादिकं कुर्यादिति। अत एवात्र वर्तमानापदेशाद् न साक्षाद् विधिः श्रूयते। किं तर्हि? अपूर्वत्वात् पञ्चमलकारमुन्नीय स कल्प्यत इति समञ्जसम्। तस्माद् न कुत्रापि नियोगो वाक्यार्थः।

अपिच नियोगस्य वाक्यार्थत्वे लिङादिना तदभिधानं व्यर्थं स्यात्; वाक्यत एव तल्लाभात्, अन्यथा पौनरुक्त्यप्रसङ्गात्, अपूर्वत्वव्याहतेश्च। सामान्य-विशेषरूपेण कार्योपस्थितौ सामान्यरूपस्यार्थसिद्धत्वात्, सामान्यमन्तरेण विशेषवृत्तेः। न चैतदस्ति; घटशब्दाद् घटोपस्थितावर्थाद् घटत्वोपस्थितिवद् लिङादिपदमन्तरेण कार्यबुद्धिप्रसङ्गात्। नहि लिङादिपदरहितेषु वाक्येषु श्रुतेषु कस्यचित् सामान्यतो विशेषतो वा कार्यबुद्धिर्दृश्यते।

अपिच गृहीतशक्तिकेन लिङादिना कार्यमुपस्थाप्यते? अगृहीतशक्तिकेन वा? नान्त्यः; अति प्रसङ्गात्, घटादिपदानामपि शक्तिग्रहं विनैव स्वार्थोपस्थापकत्वप्रसङ्गात्। आद्येऽपि न तावत् प्रत्यक्षादिना शक्तिग्रहः; अपूर्वत्वव्याहतेः। श्रोत्रियादिपदेष्विव वाक्येनैव तत्र शक्तिग्रह इति चेत्, न चैवं स्यात्; ''यश्छन्दोऽधीते स श्रोत्रियः'' इत्यादौ प्रमाणान्तरप्रसिद्धार्थकेन 'छन्दोऽधीते' इति वाक्येन वेदाध्ययनकर्तृत्वाद्यर्थोपस्थितौ तत्र श्रोत्रियपदस्य शक्तिग्रहो भवति। न चैवं वाक्यस्य धात्वर्थाद्यतिरिक्तकार्यप्रत्यायकत्वमस्ति;

तथाऽदर्शनात्। दर्शने वा तद्वदेव सहप्रयोगो न स्यात्। नहि च्छन्दोऽध्ययनकर्तृत्वबोधकं यदा श्रोत्रियपदं प्रयुज्यते, तदा 'छन्दोऽधीते' इति वाक्यं तेन सह प्रयुज्यते; तदा तेन सह श्रोत्रियपदमिति समानार्थकत्वेन पौनरुक्त्यात्; एवं लिङ्प्रयोगकाले वाक्यप्रयोगो न स्यात्; स्ववाक्यप्रयोगकाले लिङ्प्रयोगे पौनरुक्त्यात्, पूर्ववदपूर्वत्वव्याघाताच्च। लिङ्रहितेन वाक्येन 'छन्दोऽधीते' इति वाक्येन श्रोत्रियपदरहितेन श्रोत्रियत्वोपस्थितिवद् न कार्योपस्थितिरस्तीति वैषम्यम्। लिङ्सहितवाक्यस्य तदुपस्थापकत्वकल्पने चान्योन्याश्रयः-तत्सहितवाक्येन कार्योपस्थितौ तत्र लिङादीनां शक्तिग्रहः, तत्र लिङः शक्तिग्रहे व कार्योपस्थितिरिति।

अपिच सिद्ध एवार्थे लिङः शक्तिर्गृह्यते? असिद्धे वा? नाद्यः कार्यत्वव्याहतेः, सर्वदा फलसिद्धेर्यागाद्यनुष्ठानवैयर्थ्याच्च। सिद्धो विनियोगो यागादिनाऽभिव्यज्यते, अभिव्यक्तश्च फलं जनयति। अतश्च न कार्यत्वव्याघातोऽपि; अभिव्यक्त्युपाधिना कार्यत्वादिति चेत्, न; कार्यत्वस्य सोपाधिकत्वे स्फटिकालौहित्यवद् मिथ्यात्वापत्तेः।।

अपि च का तावदभिव्यक्तिर्यागादिना जायते? किं सा नियोगतो भिन्ना? अभिन्ना वा? भिन्नत्वेऽपि किमुत्पत्तिः? ज्ञप्तिर्वा? नाद्यः; सिद्धत्वव्याहतेः; सिद्धस्योत्पत्यनभ्युपगमात्। न चासिद्धत्वमेवास्त्विति वाच्यम्; असिद्धस्य यागादिविषयकतया प्रतीत्यनुपपत्तेः। नह्यसिद्धमिच्छादीष्टादिविषयकतया प्रतीयते। असिद्धविषयकं तु स्यात्। स्वयं तु सिद्धमेव। *एतेन*-असिद्धे लिङः शक्तिग्रह इति पक्षोऽपि- *निरस्त*; विषयासिद्धेरेव। तत्सिद्धेरेव तत्सिद्धिरिति चेत्, एवं तर्ह्यभिव्यक्तेरप्यौपाधिकत्वेन मिथ्यात्वापत्तिः। न ह्यन्योत्पत्त्याऽन्योत्पत्तिः पारमार्थिकी भवति। तथा च पूर्ववदेव कार्यत्वव्याघातः। नापि ज्ञप्तिः; यागस्य तत्करणत्वाभ्युपगमविरोधात्, तदप्रमाणत्वाच्च। न च यागस्य कार्याविनाभूतत्वेन तत्प्रामाण्यम्; अन्योन्याश्रयात्=यागस्य कार्याविनाभावसिद्धौ तेन कार्यसिद्धिः, कार्यसिद्धौ च यागस्य कार्याविनाभावसिद्धिरिति। *एतेन*-अर्थाभिन्नाऽभिव्यक्तिरिति पक्षोऽपि- *निरस्तः*; सिद्धत्वव्याघातात्। असिद्धस्य शशविषाणकल्पस्याभिव्यक्तित्वानुपपत्तेरित्यास्ताम्। सर्वथाऽपि परकल्पिते नियोगे नास्ति मानमिति। तस्मात् सिद्धार्थेऽपि शक्तिग्रहादुपपद्यते शब्दप्रमाणस्य कार्यान्वयं विनाऽपि हेयोपादेयशून्यसिद्धवस्तुबोधकत्वमिति।।

अपिच ''आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्'' इति पूर्वपक्षसूत्रेणाविशेषतया सर्वेषामक्रियार्थानां वेदवाक्यानामानर्थक्यं यदि बोध्येत, हन्त तर्हि निवृत्तेः क्रियातत्साधनान्यतरत्वाभावाद् ''ब्राह्मणो न हन्तव्यः'' इत्यादिनिवृत्त्युपदेशपराणां सर्वेषां निषेधवाक्यानामानर्थक्यमेव प्रसञ्जितं स्यात्। न च भवता तदिष्टम्। अतोऽपि नैवमभिधातुं युज्यते।।

ननु ''नेक्षेतोद्यन्तमादित्यमि'' तिवद् ''ब्राह्मणो न हन्तव्यः'' इत्यत्रापि स्वभावप्राप्तहन्त्यर्थानुरागेण नञः पर्युदासवृत्त्या तद्विरुद्धाप्राप्तक्रियान्तरपरत्वं कल्प्यते। न च-एवं तद्वाक्यस्य निवृत्तिपरत्वं न स्यादिति-वाच्यम्; हननविरुद्धक्रियाया एव निवृत्तिलक्षणत्वात्। तथा च क्रियार्थत्वान्नानर्थक्यप्रसक्तिरिति चेत्, *न*; प्रसक्तक्रियाऽनुत्पादनाया एव निवृत्तिशब्दार्थत्वात्। तथाहि-नञो ह्येष स्वभावः-यत् स्वसम्बन्धिनोऽभावं बोधयति; तत्र शक्यत्वात्। प्रकृते च स्वसम्बन्धी प्रकृत्यर्थान्वितः प्रत्ययार्थ एव; योग्यत्वात्। यत्रापि पर्युदासेनार्थान्तरे वर्तते, तत्र स्वार्थाविनाभावाद् लक्षणैव; यथा प्रजापतिव्रते तत्प्रकरणावरोधात्, स्वार्थपरत्वे तु वाक्यभेदापत्तेः, पृथक् फलकल्पनापत्तेः। तथा च तद्विरोधः स्यात्। अतस्तदन्यथानुपपत्त्या तत्र लक्षणा क्लिष्टाऽप्यङ्गीक्रियते। न चात्र काप्यनुपपत्तिरस्ति, येन स्वार्थपरित्यागेन लक्षणया तदविनाभूतार्थान्तरपरत्वकल्पना स्यात्, तावतैव हननानुत्पादनापरपर्यायतन्निवृत्तिप्रयोजनसिद्धेः। स्वभाव-रागादिदोषेण भ्रान्त्या ब्राह्मणहननं ममेष्टसाधनमिति मत्वा तच्चिकीर्षोर्यदा निषेधशास्त्रस्मरणाद् ब्राह्मणहनने नेष्टसाधनमिति बुद्धिरुदेति, तदा शुक्तिबुद्ध्येव रजतबुद्धिः, शरबुद्ध्येव च कुशबुद्धिस्तया शास्त्रजनितया प्रमाणबुद्ध्या हननेष्टसाधनत्वभ्रान्तिर्बाधिता सत्युपशाम्यति। निवृत्तायां तु तस्यां कारणाभावात् तच्चिकीर्षोपशमलक्षणौदास्ये सिद्धेऽनादिसिद्धा हननानुत्पादनालक्षणा निवृत्तिः प्रयोजनं सिद्धैवेति न काचिदनुपपत्तिः। ***तस्मादन्यत्र प्रजापतिव्रतादिभ्यः प्रसक्तक्रियानुत्पादनालक्षणनिवृत्तिकारण** तच्चिकीर्षानिवृत्तिल**क्षणमौदासीन्यमेव ''ब्राह्मणो न हन्तव्यः'' इत्यादिनिषेध**वाक्येषु निषेधस्य प्रयोजनमनुसन्धेयम्। अतो निषेधवाक्यानामक्रियार्थत्वेऽप्यानर्थक्याभावात् पुरुषार्थानुपयोग्यु-पाख्यानादिरूपार्थवादविषयमेवानर्थक्याभिधानं पूर्वपक्षसूत्रार्थ इति द्रष्टव्यम्। अत एव ''विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः'' इति सिद्धान्तसूत्रेऽर्थवादानामेव विध्येकवाक्यातामा-पन्नानामानर्थक्यपरिहारः कृतः; अन्यथा सर्वेषामक्रियार्थानामविशेषेणानर्थक्यपरिचोदनाद् अविशेषेण तत्परिहारः कृतः स्यादिति॥

ननु यदि प्रसक्तक्रियाया इष्टसाधनत्वाभावमात्रं निषेधवाक्येनोपदिश्यते, हन्त तर्हि तत्क्रियाया नरकाद्यनिष्टसाधनत्वं न सिध्येत्; तत्साधकप्रमाणाभावात्, अर्थात्, तत्सिद्धिरिति चेत्-अथैवं मन्यसे शब्देन ब्राह्मणहननादीष्टसाधनत्वाभावे बोधितेऽर्थादनिष्टसाधनत्वं सिद्ध्यति, तत्र; अविनाभावाभावात्, नहि यदिष्टं च साधयति, तदनिष्टं साध्यतीति नियमोऽस्ति; निरर्थकाया उपेक्षणीयफलिकायाश्च क्रियाया लोके दर्शनात्, *न*; वैदिकनिषेधबलादेव तत्कल्पनात्। सर्वो हि वेदः पुरुषस्य फलवदर्थज्ञानपर्यवसन्न इत्युक्तम्। तत्र चाक्षरमात्रेणापि निरर्थकेन न भवितव्यम्। फलमपि द्विविधम्-सुखं दुःखाभावश्चेत्युक्तम्। तत्र ब्राह्मणहिंसादेः सुखसाधनत्वस्य प्रत्यक्षसिद्धत्वात् तदंशे च तस्या भ्रान्तेरभावाद् न तत् श्रुत्या निषेद्धुं शक्यते।

अत: परिशेषाद् दु:खाभावसाधनत्वं भ्रान्त्या प्राप्तं प्रतिषिद्ध्यते। प्रतिषिद्धे च तस्मिन् अर्थान्निषिद्धाया: क्रियाया दु:खसाधनत्वं सिद्ध्यति। एवं सत्यर्थवत्त्वं निषेधशास्त्रस्येति न· काचिदनुपपत्ति:।। *एतेन*-नञ्युक्तविधिप्रत्ययेन हिंसादेरनिष्टसाधनत्वाङ्गीकारे पर्युदासोऽङ्गीकृत: स्यादिति- *अपास्तम्*; तदनिष्टसाधनत्वस्यार्थिकत्वेन तदभिधानानङ्गीकारादुक्तदोषाभावादिति। तस्माद् निषेधवाक्यवदुपनिषद-मिप्यक्रियापरत्वमविरुद्धम्।।

यदप्युक्तम्-कर्तव्यविध्यननुप्रवेशे वस्तुमात्रपरत्वात् ''सप्तद्वीपा वसुमती'' इत्यादिवदुपनिषदामानर्थक्यमिति, तदपि परिहृतम्। ''रज्जुरियं नायं सर्प:'' इति वस्तुमात्रवचनाद् भयकम्पादिनिवृत्तिवदवगतब्रह्मात्मभावस्य संसारनिवृत्तिप्रयोजनस्य दृष्टत्वोक्ते:।।

ननु श्रुतब्रह्मणोऽपि पूर्ववत् संसारानुवृत्तिदर्शनाद् विषमो दृष्टान्त इत्यप्युक्तमिति चेत्, *न*; अवगतब्रह्मात्मभावस्य यथापूर्वं संसारित्वस्य ब्रह्मात्मभावविरोधेन दर्शयितुमशक्यत्वाद् दृष्टान्तावैषम्यात्। देहादिष्वात्माभिमानकृतो हि तद्गतसुखदु:खादिसंसारानुभव आत्मन इत्यसकृदावेदितम्। तस्मिंश्च वेदान्तजनितब्रह्मात्मज्ञानेन निरस्ते निमित्ताभावात् कुतो नैमित्तिकदु:खादेस्तत्र संभव:? धनित्व-कुण्डलित्वाभिमानकृतस्य सुखस्येव तदभिमानवियोगे। श्रुतिरपीममेव न्यायसिद्धमर्थमनुवदति-''अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशत:'' इति।।

ननु अशरीरस्य तदस्पर्शं वदति श्रुति:, नतु शरीर आत्माभिमानशून्यस्य, अशरीरत्वं च शरीरपाते सति भवति, नतु विद्यमान एव शरीरे; विरोधात्। अस्ति च ज्ञानिनामपि शरीरम्, अतो न प्रियाप्रियादिसंसारापगमस्तेषामिति चेत्, *न*; सशरीरत्वस्य मिथ्याज्ञानकृतत्वात्। न ह्यात्मन: शरीरात्मताभिमानलक्षणं मिथ्याज्ञानं परित्यज्यान्यत् सशरीरत्वं कल्पयितुं शक्यं केनापीत्युपपादितमधस्तादस्माभि:। नित्यात्मस्वरूपमेवात्मनोऽशरीरत्वम्, न कर्मनिमित्तमित्यप्यवोचाम।।

ननु आत्मकृतधर्माधर्मनिमित्तमेव सशरीत्वम्, न मिथ्याज्ञानमात्रम्; जात्यायुर्भोगानां धर्माधर्मारब्धत्वात्। तथा च तदुपशमोऽपि कर्मापेक्ष इति चेत्, *न*; अन्योन्याश्रयात्-नहि शरीरादिसंहतस्यात्मनो धर्माधर्मकारित्वमस्ति, न वा केनचिदभ्युपगम्यते। तथा च शरीरादिसम्बन्धसिद्धौ धर्माधर्मसिद्धिरात्मन:, तत्सिद्धौ च तत्कृतशरीरादिसम्बन्धसिद्धिरित्यन्योन्याश्रय:। बीजाङ्कुरवददोष इति चेत्, न; अन्धपरम्परात्वेन तद्वैलक्षण्यादित्युक्तत्वात्। मिथ्याज्ञानकृतत्वं तु सशरीरत्वस्य प्रत्यक्षसिद्धम्; स्वापादौ तदभावेऽभावात्, भावे व जागरादौ भावात्, अक्रियत्वादात्मन: कर्तृत्वानुपपत्तेश्च।।

राजप्रभृतीनामिव भृत्यादिसन्निधानमात्रेणाक्रियस्याप्यात्मनो देहादिसन्निधानमात्रेण कर्तृत्वमविरुद्धमिति चेत्, न; वैषम्यात्। धनदानादिनोपार्जितभृत्यादिसम्बन्धित्वादराजप्रभृतीनां तत्प्रयोजकत्वेन तत्कर्तृत्वोपपत्तिः, न तथाऽऽत्मनो धनदानादिवत् शरीरादिभिः स्वस्वामिसम्बन्धकारणं किञ्चिदमिथ्याज्ञानमन्तरेण तददृष्टादि शक्यं कल्पयितुम्; प्रमाणाभावात्, अन्योन्याश्रयाच्चेत्यवोचाम। मिथ्याहंममाभिमानस्तु देहादिसम्बन्धहेतुः प्रत्यक्षसिद्ध एवेति न तत्र प्रमाणान्वेषणा। तस्मात् स्वप्नप्राप्तराज्योपकरणादिवदमिथ्याभिमानकृतमेवात्मनि कर्तृत्वम्, न पारमार्थिकम्।।

एतेन-कर्तृत्वस्य मिथ्याभिमानहेतुत्वव्याख्यानेनात्मनो यजमानत्वस्यापि तद्धेतुत्वम्- *व्याख्यातम्*; कर्तुरेव क्रियाफलस्वामित्वेन यजमानत्वात्।।

ननु देहादिष्वहमिति शब्द-प्रत्ययौ गौणौ भवतः; न मिथ्या; तथा चात्मनि तद्धेतुकर्तृत्वादेर्न मिथ्यात्वमिति चेत्, *न*; मुख्यार्थात्प्रसिद्धभेदे वस्तुनि तच्छब्दप्रत्यययोर्गौणत्वप्रसिद्धेः। तद्यथा-केसरादिमतः सिंहात्प्रसिद्धभेदे देवदत्ते सिंहशब्द-प्रत्ययौ शौर्यादिगुणयोगात्प्रवर्तमानौ गौणौ भवतः। न चात्मना देहादेर्भेदः प्रसिद्धोऽस्ति, शुक्तेरिव रजतस्य भेदस्तत्प्रत्ययशब्दप्रयोगकाले। तस्मान्मिथ्याज्ञानमेवैतत्; शुक्तिरजतादिप्रत्ययवत्, न गौणौ। यथा चैतत् तथोपपादितमध्यासभाष्यवार्तिके, न पुनर्विस्तार्यते; पुनरुक्तभयात्। तस्माद् अशरीरत्वस्यात्मनो मिथ्याज्ञानकृतत्वाद् विदुषस्तन्मिथ्याज्ञानाभावात् सिद्धं तस्य जीवतोऽशरीरत्वम्, तत्प्रदर्शकश्रुतिस्मृतिवादास्तु भाष्ये। *अतोऽवगतब्रह्मात्मभावस्य न पूर्ववत्संसारित्वम्, यस्य तु मन्दमतेः श्रुतब्रह्मणोऽपि पूर्ववत्संसारित्वं प्रतिभाति, नासौ ब्रह्मात्मभावमवगतवानिति द्रष्टव्यम्। "श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युरि"ति श्रुतेः, "आश्चर्यवत्पश्यति कश्चिदेनम्" इत्यादि स्मृतेः। अत एव तं प्रति मननादिनियमश्रुतिः-"मन्तव्यो निदिध्यासितव्यः" इति। *एतेन*-यदुक्तम्-श्रवणात्पराचीनमनननिदिध्यासनविधानाद् विधिशेषत्वम्, अतो न तत्प्रतिपादकवाक्यानां स्वरूपपर्यवसायित्वमिति, तदपि-*अपास्तम्*; तयोरपि श्रवणवत् तदवगत्यर्थत्वात्, अवगतस्य ब्रह्मणोऽन्यत्र विनियोगाऽसम्भवस्योक्तत्वात्, अनवगतस्य सुतरामविनियोगात्। तस्माद् न प्रतिपत्तिविधिविषयतया ब्रह्मणः शास्त्रप्रमाणकत्वं सम्भवति, किं तर्हि? स्वातन्त्र्येणैव तदवगतत्वत्; सामर्थ्यात्, इति सिद्धम्।।

यस्त्वेकदेशी प्रतिपत्तिविधिशेषत्वेन ब्रह्मसमर्पणात् तत्परत्वं वेदान्तानामिति मन्यते, तन्मते-"**अथातो ब्रह्मजिज्ञासे" ति पृथक् शास्त्रारम्भो नोपपद्येत;** तत्प्रतिपत्तेर्विधेयत्वेन यागादिवद् धर्मत्वाविशेषात्-"**अथातो धर्मजिज्ञासा**" इत्यनेनैव तदारम्भसिद्धेः। यदि ब्रूयाल्लक्षणान्तरारम्भवत्

संकर्षकाण्डारम्भवच्च तत्त्वेऽपि पृथगारम्भो न विरुध्यते, एवम्-"**अथातः क्रत्वर्थ-पुरुषार्थयोर्जिज्ञासा**" इत्यादिवदेव-"अथातः परिशिष्टधर्मजिज्ञासा" 'अथातः प्रतिपत्तिजिज्ञासा' इत्येवारभ्येत, नतु-"अथातो ब्रह्मजिज्ञासा" इति। ब्रह्मणस्तच्छेषत्वेन स्वातन्त्र्येण जिज्ञास्यत्वप्रतिज्ञानुपपत्तेः॥

ननु नैवं सूत्रणीयं प्राप्नोति-'अथातः परिशिष्टधर्मजिज्ञासा' इति, 'अथातः प्रतिपत्तिजिज्ञासा' इति वा, कुतः? सामान्यतो धर्मजिज्ञासासूत्रणेनैव तल्लाभात्, किं तर्हि? तच्छेषाणां क्रत्वर्थत्वपुरुषार्थत्वादिनिरासात् प्रतिपत्तिविधिशेषस्य ब्रह्मणोऽस्तित्व-नास्तित्वजिज्ञासनादुपपद्यते-"अथातो ब्रह्मजिज्ञासा" इति तत्सूत्रणमिति चेत्, *न*; काकदन्तपरीक्षावत् तत्परीक्षाया निष्प्रयोजनत्वात्। अनुष्ठानोपयोगितया हि शेषाणां क्रत्वर्थत्व-पुरुषार्थत्वादि जिज्ञास्यते; तज्ज्ञानमन्तरेण तदर्थतयाऽनुष्ठातुं तेषामशक्तेः। न चैवं ब्रह्मणोऽस्तित्वज्ञानं विना तत्प्रतिपत्तिर्नानुष्ठातुं शक्यते; योषिदग्न्यादिभाववदारोपेणापि तत्प्रतिपत्त्यनुष्ठानोपपत्तेरित्युक्तत्वात्। अतो निष्प्रयोजनत्वेन क्रत्वर्थत्वादिचिन्तावैलक्षण्यात् काकदन्तवद् ब्रह्मणोऽस्तित्वं न परीक्षणीयम्। भूतार्थप्रतिपत्तेस्तदस्तित्वमन्तरेणानुपपत्तिरिति चेत्, न; तस्याविधेयत्वे भूतार्थत्वस्यैवासिद्धेः। अभूतार्थत्वेऽविद्यानिवर्तकत्वं न स्यादिति चेत्, अस्त्वेवं तव मते। का नो हानिः? त्यज्यतां वा विधिपरत्वाग्रहः। अपिच कुतो वा प्रमाणाद् ब्रह्मास्तित्वावधारणम्? प्रतिपत्तिविधिवाक्यजनितज्ञानादिति चेत्, न; तस्य विधिपरत्वेन तदस्तित्वावधारणपरत्वानुपपत्तेः॥

किञ्च तदेव ज्ञानं तेन वाक्येन विधेयम्? ज्ञानान्तरं वा? नाद्यः; तस्य द्विकरतापत्तेः। नह्येकेन वाक्येन स्वयं प्राप्तत्वेन ज्ञानमुत्पाद्य तदेव स्वजन्यं ज्ञानमनुष्ठेयत्वेन ज्ञापयितुं शक्यते; द्विकरत्वासम्भवात्, संभवे वा ज्योतिष्टोमादिवाक्यानामपि तथात्वप्रसङ्गात्। ततश्च यागाद्यनुष्ठानलोप एव। ज्ञानान्तरञ्च न मानसम्; ब्रह्मणोऽतीन्द्रियत्वेन मनोऽगोचरत्वस्यासकृदुक्तत्वात्, तत्संयोगानाधारत्वेन संस्कृतमनोगोचरत्वस्यापि प्रत्युक्तत्वात्, विधितस्तदयोग्यविषये तदनुष्ठानेऽपि चक्षुषा रसबुद्धिवद् अप्रमाणत्वेन तद्बुद्धेरविद्यानिवर्तकत्वानुपपत्तेः। न च परम्परया शब्दप्रमाणमूलत्वेन तत्प्रामाण्यम्; भावनाजनितयोषिदग्निसाक्षात्कारस्यापि परम्परया शब्दमूलत्वात् प्रामाण्यापत्तेः। विधिपरत्वेन तन्मूलशब्दस्य स्वार्थे प्रामाण्यं प्रकृतेऽपि तुल्यम्। *एतेन*-अवान्तरवाक्याद् ब्रह्मास्तित्वावधारणम्-*प्रत्युक्तम्*-

अपि चानुष्ठानमन्तरेण शब्दप्रामाण्यात् तदवभासनमुत्पद्यत इत्यङ्गीक्रियते चेत्, तर्हि तदेवास्तु; प्रामाणिकत्वात्, अविद्यानिवर्तकत्वं तु न; विधेयमानसप्रत्यक्षत्वात्, तन्मूलकल्पनायान्तु बकबन्धप्रयासापत्तेश्च। अपरोक्षत्वं तु ब्रह्मणि शाब्दज्ञानस्य पूर्वमेवोपपादितम्। अत उपपद्यतेऽविद्यानिवर्तकत्वमित्यास्ताम्। सर्वथाऽपि प्रतिपत्तिविधिवादिनो न ब्रह्मजिज्ञास्यत्वोपपत्तिः;

निष्प्रयोजनत्वोक्तेः।" अतो युक्तमुक्तं भाष्ये- ***आरभ्यमाणञ्चैवमारभ्येत-अथातः परिशिष्टधर्म-जिज्ञासेति; ''अथातः क्रत्वर्थ-पुरुषार्थयोर्जिज्ञासेति'-वदिति***॥ अस्मन्मते तु स्वातन्त्र्येण वेदान्तानां ब्रह्मात्मैक्यावगतिपरत्वात् सा च पूर्वं शास्त्राद् ज्ञाता, इति तदर्थो युक्त एव शास्त्रारम्भः-''***अथातो ब्रह्मजिज्ञासेति***॥

ननु वेदान्तानां ब्रह्माद्वैतपरत्वे कर्मविधयो व्याकुप्येरन्; तेषां कर्त्रादिभेदसापेक्षत्वात्, प्रत्यक्षादिप्रमाणानि च; तेषां तद्भेदगोचरत्वात्, स्वविरोधश्च; ज्ञातृ-ज्ञेयादिभेदमपेक्ष्योपनिपत्प्रमाणस्यापि प्रवर्तनादिति चेत्, *न*; जाग्रद्बोधात् प्राक् स्वप्नधियः प्रामाण्यवद् 'अहं ब्रह्मास्मी' त्यद्वितीयब्रह्मात्मबोधात्प्रागविद्याकल्पिततद्भेदसत्त्वात् तमादाय सर्वप्रमाणानां प्रामाण्योपपत्तेः, तदुत्तरकालञ्च तदप्रामाण्यस्येष्टत्वात्, विषयाश्रययोरभावेन तेषामभावात्। **नहि हेयोपादेयत्वशून्याद्वितीयब्रह्मात्मावगतौ निर्विषयाण्यप्रमातृकाणि च प्रमाणानि स्थातुं प्रवर्तितुं वाऽर्हन्तीति।** यथा च प्रमाणानामविद्यावद्विषयत्वम्, तथाऽऽवेदितमध्यासभाष्ये। भेदमिथ्यात्वञ्च- ''तदनन्यत्वमारम्भणशब्दादिभ्यः'' इत्यत्र सम्यग् निवेदयिष्यते। तस्माद् ''अहं ब्रह्मास्मी''ति ब्रह्मात्मैक्यावगतिपर्यन्त एव सर्वेषां विधीनां तदितरप्रमाणानाञ्च व्यापारः, न तदुत्तरकालमपि; आत्मन्यविद्याकल्पितप्रमातृत्वादिनवविधसंसारस्य स्वोदयसमय एव नाशादिति। अपिचाहुरस्मिन्नर्थे सम्प्रदायविदो गौडपादाचार्याः-

''गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात्।

सद्ब्रह्माऽहमित्येवंबोधे कार्यं कथं भवेत्॥

अन्वेष्टव्यात्मविज्ञानात् प्राक्प्रमातृत्वमात्मनः।

अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः॥

देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।

लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्॥'' इति।

गौण आत्मा पुत्रकलत्रादिः; प्रसिद्धभेदे तस्मिन् पुत्रादौ विकले सकले वाऽहमेव विकलस्सकला वेत्यात्मप्रत्ययदर्शनात्। मुख्य आत्मा देहादिः; प्रसिद्धभेदत्वात्। तथा चैवमन्वयः-सद् ब्रह्माहमित्येवं बोधे सत्यविद्याकल्पितपुत्र-देहादिबाधनाद् गौणमिथ्यात्मनस्तस्य पुत्रदेहादेरसत्वे सति तन्निर्वर्त्यं यागादिकार्यं तस्य विदुषः कथं भवेत्? न कथमपीत्यर्थः। तथाऽपि ब्रह्मावबोधे ज्ञातृज्ञेयाद्यपेक्षणात्, अन्यथा तदनुत्पत्तेर्न

तेनात्मनि प्रमातृत्वादिबाधः; उपजीव्यविरोधापत्तेरिति, नेत्याह- ***अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मनः*॥** कुतः? यतः स चात्मा ***अन्विष्टः स्यात् प्रमातैव=प्रमातृत्वादिपाप्मदोषादिवर्जितस्सन् सम्भवेदित्यर्थः।** तथा च ब्रह्मात्मावगतेः पाश्चात्त्योपजीव्यविरोधो न दोषायेति भावः।

ननु एवं सति प्रत्यक्षादिलौकिकप्रमाणानां बाधितविषयत्वादप्रामाण्यं भवेत्, न च-एवमस्तीति-वाच्यम्; तत्र सर्वजनीनप्रमाणत्वव्यवहारविलोपादिति, नेत्याह- ***देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितं लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चायादिति*॥** आत्मनिश्चयादि पदच्छेदः।।

''नारायणीयमेतद्धि युज्यते शङ्करे नये।

को ह्यन्यः पुण्डरीकाक्षाद् वेत्ता शङ्करहृद्ग तम्॥''

इति शारीरकमीमांसाभाष्यवार्तिके समन्वयाधिकरणं संपूर्णम्।।

भाष्यभावप्रकाशिका

तदिदं प्रतिज्ञातं शास्त्रप्रमाणकत्वं सूत्रेणोपपादयितुमुत्सूत्रं पूर्वपक्षयति भाष्यकारः ***कथं** पुनरिति*।। काऽऽनुपपत्तिरिति? अत आह– ***यावतेति***।। अध्ययनविधिपरिगृहीतानामानर्थक्ययुक्तमित्यत आह– *कर्त्रिति*।। अतत्प्रकरणपठितानां कथं तच्छेषतेति? अत्राह– ***उपासनेति*।।**

ननु वेदान्तानां क्रियापरत्वमुपक्रमादिलिङ्गावगतेन सिद्धवस्तुबोधनतात्पर्येण विरुद्धमिति, तत्राह– ***नहीति*।।** प्रत्यक्षादिसंवादेऽनुवादकतया तद्विसंवादे चित्र–निम्नोन्नतादिविषयचाक्षुषज्ञानस्येव स्पार्शनज्ञानविरोधे प्रामाण्यायोगादिति भावः। किंच प्रयोजनशून्यतया तात्पर्यायोगादवस्तु–योगादवस्तुनिष्ठतेत्याह– ***एवेति*।।** *ननु* विधिस्तावकत्वमन्तरेणापि प्रामाण्यं मन्त्राणामिव स्यादित्यत आह– ***मन्त्राणामिति*।।** कर्मकाण्डपठितानां विधिशेषत्वेन प्रामाण्येऽपि वेदान्तवाक्यानां स्वार्थबोधकत्वेन प्रामाण्यं स्यादित्यत आह– *** न क्वचिदिति*।।** कल्प्यतां तर्हि विधिः ''पूषा प्रविष्टभागः'' इत्यादिष्विवेत्याशङ्क्याह– ***न चेति*।।** उपसंहरति– ***तस्मादिति*।।** अत्रारुचिकार–णमुक्त्वा पक्षान्तरमुपसंहरति– ***तस्मान्नेति*।।** सूत्रेण सिद्धान्तयति–*एवं प्राप्ते उच्यते तत्तु समन्वयादिति*।।

तदेतद् व्याचष्टे– ***तुशब्द इति*।।** तदित्युत्तरपक्षप्रतिज्ञां विभजते– *तद्ब्रह्मेति*।। पूर्वपक्षे दुष्टाभिसन्धिः पृच्छति– ***कथमिति*।।** कुतः *कथमिति*।। सिद्धान्ती स्वपक्षहेतुप्रकारभेदमाह– ***समन्वयादिति*।।** सम्यगन्वयः समन्वयः, तस्मात्। सम्यक्त्वं चापुनरुक्तानेकशब्दानामखण्डैकरसार्थपर्यवसायित्वम्। तदेव दर्शयति– ***सर्वेषु हीति।।** वेदान्तानामेकान्ततो ब्रह्मपरत्वं दर्शयितुं बहूनि वाक्यान्युदाहरन्ति– ***सदेवेत्यादिना*।।** *ननु*–तेषामपि द्रव्यादिप्रकाशनेन विधिशेषत्वमेव; विधिव्यतिरेकेण प्रामाण्यायोगात्, इत्यत आह– ***नचेति*।।** *ननु*–विधिशेषत्वेऽपि ''सोऽरोदीदि''त्यादीनामिव श्रुतहानाश्रुतकल्पने न भवत इत्याशङ्क्याह– ***नच तेषामिति*।।** सापेक्षत्वेनाप्रामाण्यं पूर्वपक्षोक्तमनूद्य दूषयति– ***न च परिनिष्ठतेति*।।** अयं भावः–भूतार्थत्वेऽपि वेदान्तानां प्रत्यक्षादीनामिवानपेक्षत्वोपपत्तेः पुंवाक्यवत्पुरुषबुद्धिप्रभवत्वाभावाद् मूलप्रमाणानपेक्षत्वात्, परिनिष्ठितविषयत्वेऽपि न संवादविसंवादाभ्यामप्रामाण्यमिति। द्वितीयं पूर्वपक्षबीजमनुभाष्य दूषयति– ***यत्त्विति*।। य**च्चोपासनाविधिशेषत्वं वेदान्तानामुक्तम्, तत्किं कतिपयानाम्? उत सर्वेषाम्? यद्याद्यस्तावदङ्गीक्रियते, इत्याह– *नेति*।। द्वितीयस्तु न संभवतीत्याह– ***नत्विति*।।** अस्तु तर्हि तथाभूतविज्ञानोत्तरकालमुपासनमिति, तत्राह– ***नह्येकत्वेति*।।** *ननु* वेदान्ताः, स्वार्थेऽप्रमाणम्, विधिरहितवाक्यत्वात्; ''सोऽरोदीत्'' इत्यादिवाक्यवदित्याशङ्क्य, स्वार्थे फलशून्यत्वं

तत्रोपाधिरित्याह– ***यद्यपीति***।। *ननु* वेदान्ताः, सिद्धबोधकाः, प्रमाणभूतवेदवाक्यत्वात्, संप्रतिपन्नवाक्यवदित्याशङ्क्याह– ***नचानुमानेति***।। अबाधितानधिगतासन्दिग्धबोधजनकत्वं प्रमाणत्वम्, नतु विधिबोधकत्वमिति भावः। पूर्व सिद्धार्थे शब्दानां प्रामाण्यं न संभवतीति ये मन्यन्ते, तन्मतं निरस्तम्।।

इति पूज्यश्रीचित्सुखमुनिकृतौ शारीरकमीमांसाभाष्यव्याख्यायां भाष्याभावप्रकाशिकायां वेदान्तानां ब्रह्मणि समन्वयनिरूपणं नाम प्रथमं वर्णकं संपूर्णम्।।

इदानीं कार्यान्वित एव स्वार्थे पदानां सङ्गतिग्रहात् शास्त्रप्रमाणकमपि ब्रह्म कार्यशेषतयैव प्रामाणिकमिति मतान्तरमुत्थापयति– ***अत्रापर इति***।। *ननु* विधिपरत्वे न ब्रह्मपरता स्याद्वेदे; वाक्यभेदप्रसङ्गादित्यत आह– ***यथा यूपेति***।। ''यूपे पशुं बध्नाति'' इति बन्धनाय विनियुक्ते यूपे तस्यालौकिकत्वात् कोऽसौ यूपः? इत्याकाङ्क्षायां ''खादिरो यूपो भवति'' ''यूपं तक्षति'' ''यूपमष्टाश्रीकरोति'' इत्यादिभिर्वाक्यैस्तक्षणदिविधिपरैरपि संस्काराविष्टसंस्थानं दारु यूप इति गम्यते, एवं यज्जुहोति, तदाहवनीये जुहोतीत्यादिवाक्यैर्विधिपरैराहवनीयादयोऽप्यवगम्यन्ते, तद्वद् विधिपरैरपि विशिष्टंब्रह्मावबोध्यत इत्यर्थः।।

ननु ''निधिमानेष भूभागः'' इत्यादिवाक्येषु निधिं विनाऽपि प्रयोग-प्रत्ययौ दृष्टौ, तद्वदिहापि स्यादित्याक्षिपति– ***कुत इति***।। ''प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते।।'' इति वचनाद्वेदान्तानां शास्त्रवाचकनिष्ठत्वमङ्गीकर्तव्यमिति परिहरति– ***प्रवृत्तीति***।। *तस्य ज्ञानमुपदेश इति*।। *तस्य=धर्मस्य, ज्ञायतेऽनेनेति ज्ञानम्, प्रमाणम्, उपदेशः=उपदिश्यतेऽनेनेति व्युत्पत्त्या विधिवाक्यम्।। ***तद्भूतानामिति***।। तस्माद्भूतानामपरिनिष्ठितानामर्थानामित्यर्थः।।

ननु भवत्वेवं कर्मकाण्डगतानाम्, वेदान्तवाक्यानां तु किमायातमिति? अत आह– ***तस्सामान्यादिति***।। *ननु*-विधेयभावार्थाभावाद् नियोज्याभावाच्च कथं विधिरिति? अत आह– ***सति चेति***।। ब्रह्मज्ञानस्य नित्यसिद्धविषयतयाऽसाध्यफलत्वादग्निहोत्रादिवन्न विधेयत्वमिति शङ्कते– ***नन्विति***।। स्वरूपेणासाध्यत्वेऽपि विधेयक्रियोपकारकतया ब्रह्मणोऽपि साध्यत्वाद् मैवमिति परिहरति– ***नार्हतीति***।। कार्यविधिः=कृतियोग्यभावार्थनियोगः। *ननु* विधिरेव वेदान्तेषु न श्रूयते, कथं तच्छेषतया ब्रह्मसिद्धिरिति? अत आह– ***आत्मेति***।। स्वरूपप्रतिपादकानां सत्यादिवाक्यानां कथमन्वय इति? अत आह– ***कोऽसाविति***।। *ननु*-तत्फलं दृष्टम्? अदृष्टं वा? दृष्टं चेत्, विधिरनर्थकः, अदृष्टं चेत्, किं तत्र प्रमाणमिति? तत्राह– ***तदुपासनादिति***।। विपक्षे दोषमाह– *कर्तव्येति*।। श्रवणोत्तरकालं मनननिदिध्यासनयोर्विधानान्यथानुपपत्तिरपि न वाक्यार्थज्ञानमात्रात् कृतकृत्यतेति गमयतीत्याह– *श्रोतव्य

इति*।। अयं भाव:-अज्ञातसङ्गतित्वेन शास्त्रत्वेनार्थवत्तया। मननादिप्रतीत्या च कार्यार्थाद् ब्रह्मनिश्चय:।। इति उपसंहरति- *तस्मात्प्रतिपत्तीति*।।

तदेतदेकदेशिमतं दूषयति- ***अत्राभिधीयत इति***।। नेत्युक्तस्य निषेध:। तत्र हेतु:- ***कर्म-ब्रह्माविद्याफलयोर्वैलक्षण्यादिति***।। फलवैलक्षण्यं दर्शयितुं कर्मण: स्वरूपमाह- ***शारीरमिति***।। उपासनमपि कर्मेत्याह- ***मानसमिति***।। उपासनातत्फलयोरपि वेदान्तेषु प्राधान्येन विचार्यत्वं धर्म-मीमांसयैवार्थाद्विचारितत्वादित्यभिप्रेत्याह- ***यद्विषयेति***।। अप्रतिज्ञातत्वादुपासनस्यापि जिज्ञास्यत्वमित्याशङ्कामनुवदति- ***अधर्मोऽपीति***।। अथवा धर्मस्वरूपनिर्णये कारणमभिधायाधर्मस्वरूपनिर्णयेऽपि कारणमाह- ***अधर्मोऽपीति***।। कर्मफलस्वरूपमाह- ***तयोरिति***।। अत्र विशेषणैर्ब्रह्मविद्याफलत्वात् कर्मफलस्य वैलक्षण्यं प्रदर्श्य, तरतमभावादपि विलक्षणमित्याह- ***मनुष्यत्वादिति***।। साधनतोऽपि वैलक्षण्यमाह- ***ततश्चेति***।। अधिकारितोऽपि वैलक्षण्यमाह- ***धर्मेति***।। न केवलं प्रसिद्धत्वादधिकारितारतम्यम्, किन्तु दक्षिणोत्तरमार्गगमन-श्रवणानुपपत्त्याऽपीत्याह- ***तथा चेति***।। संपतत्यनेनास्माल्लोकादमुं लोकमिति संपात:=कर्म। एवं सुखस्योत्कर्षात् तारतम्यमभिधायापकर्षतारतम्यमाह- ***तथेति***।। इदानीं-दु:ख तत्साधन- तदनुष्ठातृणां तारतम्यमाह- ***तथोर्ध्वगतेष्विति***।। कर्मफलं ब्रह्मविद्याफलवैलक्षण्याय प्रपञ्चितमुपसंहरति- ***एवमिति***।। ''शरीरजै: कर्मदोषैरि'' त्याद्या स्मृति:। न्यायश्च दृष्टहेतुसाम्येऽपि सुख-दु:खादिफलवैचित्र्यं कार्यं तथाभूतमेवालौकिकं हेतुं कल्पयति। विद्याफलं दर्शयति- *अशरीरमिति*।। कथम्? अनुपपत्त्येत्याह- ***धर्मकार्यत्व इति***।। कर्मणो विचित्रपश्वादिफलत्वदर्शनाद् अशरीरत्वमपि धर्मकार्यं किं न स्यादिति शङ्कते- ***अशरीरत्वमिति***।। मिथ्याज्ञानलक्षणत्वात् शरीरित्वस्य तन्निवृत्तिर्न धर्मकार्यम्; विद्यामात्रसाध्यत्वात्, पारमार्थिकस्तु शरीरसंबन्धभाव: स्वभावत एव सिद्धत्वादसाध्य इत्याह- ***न तस्येति***।। स्थूलशरीराभावे प्रमाणमाह- ***अशरीरमिति***।। सूक्ष्मशरीराभावे प्रमाणमाह- ***अप्राण** इति*।।

फलितमाह- ***अत इति***।। नित्यत्वेऽपि विक्रियावत्त्वाद् विधेयक्रियानुप्रवेश इत्याशङ्क्य परिणामिनित्यतां दर्शयितुमाह- ***तत्र किञ्चिदिति***।।

परिस्पन्दक्रियाऽभावमाह- ***व्योमवदिति***।। फलार्था विक्रिया न कल्प्या; तृप्तिफलस्य सदा भावादित्याह- ***नित्यतृप्तमिति***।। परिणामायोग्यतामाह- ***निरवयवमिति***।। प्रकाशार्थाऽपि विक्रिया नास्तीत्याह- *स्वयंज्योति:*।। अथवा ***कूटस्थनित्यमिति*** निर्वर्त्यकर्मतामपाकरोति। *सर्वव्यापीति* प्राप्यकर्मताम्। ***सर्वविक्रियारहितमिति*** विकार्यताम्। ***न निरवयवमिति*** संस्कार्यकर्मताम्।

क्रियासाध्यः संस्कारो यत इति। नित्यतृप्तमिति दुःखरहितं सुखमुपलक्षयति। पुरुषार्थत्वं दर्शयितुम्। दुःखनिवृत्तिसहिते सुखे तृप्तिशब्दप्रयोगात्। सुखं च प्रतीयमानं न पुरुषार्थ इत्यत आह- ***स्वयज्योतिरिति***॥ धर्माधर्मयोः सकार्ययोः ब्रह्मधर्मतानिषेधादपि न धर्मकार्यत्वं मुक्तेरित्याह- ***यत्रेति***॥

ननु-ब्रह्मणि क्रियानुप्रवेशाभावेऽपि जीवस्य विकारित्वात्तस्यानन्दाविर्भावलक्षणे मोक्षे क्रियानुप्रवेशः किं न स्यादिति? अत आह- ***तद् ब्रह्मेति***॥ *ननु*-कर्मणां विविधसस्यादिफलत्वदर्शनान्निःश्रेयसमपि कर्मफलं किं न स्यादिति? अत आह- ***तद्यदीति***॥ भवत्वनित्यता, अनित्यस्यापि स्वर्गादेः पुरुषार्थत्वदर्शनादित्यत आह- ***तत्रेति***॥ भवत्वेवमपीति चेत्; तत्राह- ***नित्य इति***॥ ब्रह्मविद्या-तत्फलयोः समकालीनत्वस्य श्रूयमाणत्वं नैयोगिकज्ञानापूर्वजन्यत्वे न संभवति; नैयोगिकफलस्य समकालीनताऽसंभवात्। अतो ब्रह्मज्ञानमविधेयम्, तत्फलं च दृष्टमेव मोक्षाख्यमशरीरत्वम्; ***ब्रह्मदर्शन- सर्वात्मभावयोर्मध्य इति***॥ क्रियाहेतुभूतार्थाद्धातोः शतृप्रत्ययस्य स्मरणादव्यवहिते च हेतुमति क्रियाहेतुत्वात् पश्यन्निति शतृप्रत्ययः कालान्तरभावित्वं सर्वात्मभावस्य वारयतीत्यर्थः। यद्यपि न स्थितिक्रियासामर्थ्याद् गीतिक्रिया, किन्तु प्रयत्नान्तरात् मध्ये शब्दतः क्रियान्तरं न प्रतीयत इत्याह- ***तिष्ठन् गायतीति***॥ किंच ब्रह्मविद्यायामविद्यानिवृत्तिफलत्वश्रवणादुपासनात्मकत्वे चाप्रमाणतया तदयोगात् प्रमाणज्ञानमेव ब्रह्मविद्या वेदान्तवाक्येभ्यो जायत इत्याह- ***त्वं हीत्यादिना***॥

एतावता श्रुत्यनुसारेणाविद्यानिवृत्तिफलत्वात् तत्त्वज्ञानं ब्रह्मविद्येत्युक्तम्, इदानीं तर्कशास्त्रानुसारेणापि तथैवाभ्युपेयमित्याह- *तथाचेति*॥ *ननु*-तर्कशास्त्रानुसारेण भेददर्शनमेव मिथ्याज्ञाननिवर्तकम्, न तत्त्वज्ञानमित्यत **आह- *मिथ्याज्ञानेति***॥ भेददर्शनस्याज्ञानविलसितत्वेन तत्प्रतिपक्षत्वाभावाद-द्वितीयब्रह्मात्मदर्शनमेव तन्निवर्तकमिति भावः। *ननु*-एकत्वविज्ञानमपि न प्रमाणजन्यम्; वेदान्तानां तत्र प्रमाणान्तरविरुद्धे तात्पर्यासंभवात्, किन्तु संपदादिरूपमित्याशङ्क्याह- ***नचेति***॥ संपन्नाम-अल्पे वस्तुन्यालम्बने केनचित् सामान्येन महावस्तुदर्शनम्, यथा मनसोऽनन्तत्वसामान्येन विश्वदेवत्वदर्शनम्, एवं जीवस्यापि चिद्रूपसामान्येन ब्रह्मरूपतासंपादनम्। अध्यासे त्वालम्बनस्यैवेति विशेषः। ***न विशिष्टेति***॥ अग्न्यादीनां संहरणाद्वायोः संवर्गत्वम्, वागादीनां च संहरणात् प्राणस्य संवर्गत्वम्; एवं जीवात्मनि बृंहणक्रियाया ब्रह्मदृष्टिरित्यर्थः। ***नाप्याज्यावेक्षणेति***॥ यथा दर्श-पूर्णमासप्रकरणे ''पत्न्यवेक्षितमाज्यं भवति'' इति सामाम्नातं प्रकरणिना न गृहीतमुपांशुयागाङ्गभूताज्यद्रव्यसंस्कारतयाऽवेक्षणं गुणकर्म विधीयते, एवं कर्तृत्वेन क्रत्वङ्गभूत आत्मनि-''आत्मा वा अरे द्रष्टव्यः'' इति दर्शनं गुणकर्म विधीयत इत्यर्थः॥

अत्र किं प्रमाणान्तरविरोधात् संपदादिपरत्वं कल्प्यते? किं वा वेदान्तानां स्वार्थे तात्पर्याभावात्? न तावदाद्यः; जीव-ब्रह्मणोः प्रमाणान्तरगोचरतया तद्भेदस्यापि प्रमाणान्तरगोचरत्वात्। बिम्ब-प्रतिबिम्बयोरिव भेदावभाससंभवात्। अथ तात्पर्याभावात्, अत्राह- ***संपदादीति***॥ ''तत्त्वमसी''ति नवकृत्वोऽभ्यासात्-

*अनेन जीवेने'' ''ति चार्थवादोपादानात्–''अथ येऽन्यथा ते विदुरि'ति भेददर्शननिन्दनात्, अन्यत्रापि–''अहं ब्रह्मास्मि''''स एष इह प्रविष्ट''''योऽन्यां देवतामि'' त्यादिश्रवणाद् एकत्वे वेदान्तानां तात्पर्यमवगम्यत इत्यर्थः। किंच विद्याया अविद्यानिवृत्तिब्रह्मात्मभावफलकत्वश्रवणाद् न संपदादिरूपा ब्रह्मविद्येत्याह– ***भिद्यत इति***। संपदादिरूपविज्ञानस्याप्रमाणत्वादविद्यानिवर्तकताऽयोगात् परमार्थतो भिन्नस्यात्मनो ब्रह्मात्माऽसंभवात् तस्य नष्टस्य परमात्मतायोगाच्चेति भावः। यतो न संपदादिरूपा, अतो न पुरुषतन्त्रेत्याह– ***अत इति***॥ *ननु*– प्रयोजनाभावादविधिसंबन्धः? किं वा ब्रह्मकारकत्वाभावात्? न तावद्विधिसंबन्धे प्रयोजनाभाव; विदिक्रियायाः कर्मकारत्वादित्याह– ***न च विदिक्रियेति***॥ मा भूद् विदिक्रियाकर्मत्वेन आह– ***तथोपास्तिक्रियेति***॥

निवृत्तिपरत्वमेव प्रपञ्चयति– ***नहीति***॥ अत्रैवार्थे श्रुतीरूदाहरति– ***तथाच शास्त्रमिति***॥ एवं सत्यस्मन्मत एव ब्रह्मणः शास्त्रप्रमाणकत्वम्, मोक्षस्य च नित्यत्वमुपपन्नमिति।

प्रकृतमुपसंहरति– ***अतोऽविद्येति***॥ अविद्यानिवृत्तिलक्षणं मोक्षं विना क्रियासाध्यो मोक्ष इत्यभ्युपगच्छतः क्रियायास्तत्र फलाभावादन्वये न संभवतीत्येतदाह– ***यस्य त्विति***॥ तर्हि क्रियानुप्रवेशायोगादुत्पाद्यत्वं विकार्यत्वं वा मोक्षस्य गमिष्यतीत्यत आह– ***तयोः पक्षयोरिति***॥ दृष्टान्तमाह– ***नहीति***॥ अथानित्यत्वपरिहाराय पूर्वसिद्धस्यैव ब्रह्मणः प्राप्त्वं ग्रामादेरिव स्यादित्याशङ्क्याह ***न चेति***॥ तत्र वक्तव्यम्–किं ब्रह्म प्रत्यगात्मभूतम्? अन्यद्वा? आद्यपक्षे दूषणमाह– ***स्वात्मेति***॥ द्वितीये सर्वगतम्? परिच्छिन्नं वा? इति विकल्प्य, सर्वगत्वपक्षे तत्प्राप्तिः संयोगः? तादात्म्यं वा? इति पुनर्विकल्प्य, संयोगपक्षे दूषणमाह– ***सर्वगतत्वेनेति***॥ तादात्म्यपक्षस्तु बहिरेव दूषणीयः। स्थितस्य नष्टस्य वाऽन्यस्यान्यतादात्म्यं न संभवति, इत्यविकृतप्रदेशप्रतिपत्ति-तयाऽपरिच्छिन्नत्वेऽपि ब्रह्मणः संयोगलक्षणं चेत्, तर्हि तत्प्राप्तेरनित्यत्वमित्यत आह– ***नापीति***॥ संस्कारस्यासंभवं दर्शयितुं तस्य द्वैविध्यमाह– ***संस्कारो हीति***॥ इह द्विविधोऽपि संस्कारो न संभवतीत्याह– ***न तावदिति***॥ *ननु* यद्यप्यागन्तुको गुणो दोषो वा न संभवति, तथाऽपि स्वाभाविकंविद्यादोषापनयो भविष्यतीति शङ्कते– ***स्वात्मेति***॥ स्वाभाविकस्यापि तस्य क्रियाभिव्यक्तौ दृष्टान्तमाह– ***यथेति***॥ किं स्वाश्रयक्रियया संस्कारः? किं वाऽन्याश्रययेति विकल्प्य, न तावदाद्यः; निरवयवस्य सर्वगतस्य च ब्रह्मणः परिणामपरिस्पन्दयोरसंभवादित्याह– ***तच्चेति***॥ भवतु तर्ह्यन्तःकरणाश्रयया संस्कार इति, तत्राह– ***अन्येति***॥ स्वाश्रयद्रव्येण संयुक्ते क्रियया संस्कार्यत्वम्, अतोऽन्याश्रयक्रियाया अतिशयाधायकत्वाद् न ब्रह्मणस्संकार्यकर्मत्वम्; ब्रह्मणस्तत्संयोगायोगादिति भावः। अत्र व्यभिचारं चोदयति– ***नन्विति***॥ परिहरति– ***न देहीति***॥ देहादिव्यतिरिक्तस्यात्मनोऽविद्यया देहादिष्वध्यासात्तदभिन्नस्यैव तद्गतक्रियया संस्कार्यत्वम्, अतो न व्यभिचार इत्यर्थः। देहाश्रयक्रियया

नान्यस्य संस्कार्यत्वम्, अतो न व्यभिचार इत्यर्थः। देहाश्रयक्रियया तत्संहत एव परमार्थतोऽनात्माऽविद्ययाऽऽत्मत्वेन गृहीतः संस्क्रियते, नासंहत आत्मेत्युक्तम्॥

इदानीं देहाश्रयैव क्रिया नासंहतात्माश्रयेत्यत्र प्रमाणमाह- *प्रत्यक्षं हीति*॥ उक्तमर्थं दृष्टान्तेनोपपादयितुमनुवदति- **तथेति*॥ दृष्टान्तमाह- *यथेति*॥ आरोग्यमप्यसंहतात्माश्रयं किं न स्यादित्याशङ्क्याह- *अहमिति*॥ संस्कारोऽप्यनात्मभूतदेहादिसंहतात्माश्रयः, न पुनरसंहतात्माश्रय इत्यत्रानुभवमाह- *अहं शुद्ध इति*॥ कथं तर्हि स्नानादीनां कर्तृसंस्कारप्रसिद्धिरित्याशङ्क्य, तथाभूतस्यैव कर्तृत्वादित्याह- *तेनैव हीति*॥**

ननु भोक्तुरात्मन एव कर्तृत्वम्; अकर्तुरभोगादित्याशङ्क्य, भोक्तापि स एवेत्याह- ***फलमिति***॥ असंहतस्याभोक्तृत्वे प्रमाणमाह- ***तयोरन्य इति***॥ इदानीं संहतस्य भोक्तृत्वे प्रमाणमाह- *आत्मेन्द्रियेति*॥ अत्रात्मेति देह उच्यते। निर्गुणत्वान्निर्दोषत्वाच्च चतुर्विधोऽपि संस्कारोऽनुपपन्न इत्युक्तम्। इदानीं गुण-दोषयोरभावपरौ मन्त्रौ पठति- ***एको देव इति***॥ स पर्यगात्=परितोऽगात्सर्वत्र व्याप्त इत्यर्थः। *शुक्रम्=दीप्तिमत्। ***अकायमिति***॥ सूक्ष्मशरीररहितमित्यर्थः। अव्रणमस्नाविरमिति-द्वाभ्यां प्राणवतस्सिराबहुलस्थूलशरीरस्य निषेधः। अत्र च-शुक्रमकायमित्यादि प्रथमार्थे द्वितीया; ''स पर्यगादि''ति पुंलिङ्गेनोपक्रम्य ''कविर्मनीषी'' त्यादिपुंलिङ्गेनोपसंहारात्। *अव्रणम्=दुःखरहितम्। *अस्नाविरम्=अविगलितम्; अविनाशीति वाऽर्थः। भवत्वेविधत्वं ब्रह्मणः; मोक्षस्य किमायातमिति? अत आह- *ब्रह्मेति*॥ *ननु* मा भूदुत्पत्त्यादिचतुर्विधकर्मफलान्तर्भावो मोक्षस्य, प्रकाराणान्तरेण तु कर्मसाध्यता स्यादित्यत आह- ***अतोऽन्यदिति***॥ तथाविधस्य क्रियाफलस्य लोक-वेदयोरदृष्टत्वादित्यर्थः। *ननु* तर्हि मोक्षे क्रियानुप्रवेशाभावे तदर्थाः प्रवृत्तयोऽनर्थिकाः स्युरित्याशङ्क्योपसंहारव्याजेन परिहरति- ***तस्माद् ज्ञानमेकमिति***॥ *ननु* ज्ञानस्यापि क्रियात्वादस्त्येव क्रियानुप्रवेश इति शङ्कते-*नन्विति*॥ *नैवम्*; जन्याजन्यफलत्वेन भेदादिति परिहरति- ***न; वैलक्षण्यादिति***॥ पुरुषेच्छा-प्रयत्नसाध्या क्रिया, अतथाभूतं च ज्ञानमित्यपरं वैलक्षण्यमाह- ***क्रियेति***॥ *यत्र=विषये। वस्तु चेन्न कारणम्, किं तर्हि कारणमिति? तदाह- ***पुरुषेति***॥ *ननु* मानसत्वाविशेषाद् ध्यानमपि ज्ञानमेवेत्यत्राह- ***यथेति***॥ ***मानसमिति***॥ मानसक्रियात्वेनाविशेषेऽपि ज्ञान-ध्यानयोर्गो-बलीवर्दन्यायेन भेद इत्यभिप्रायः। अत्रोदाहरणमाह- ***यथेति***॥ अत्र पूर्वोदाहरणे देवताया वस्तुनोऽवगतिमात्रम्, योषिद्दृष्टौ तु वस्तुनो विपर्यय इति विशेषः। अत एव मानसत्वेऽपि न ज्ञानत्वमित्याह- ***केवलेति***॥ क्रियैवेत्येवकारणे वस्तुतन्त्रत्वं निराकरोति। ज्ञानं पुनरनेवंभूतमित्याह- ***या तु प्रसिद्ध इति***॥ **किं तर्हीति***॥ अतो वैलक्षण्यं युक्तमित्याह- ***इति ज्ञानमेवैतद् न क्रियेति***॥ *ननु* भवत्वेवं प्रत्यक्षज्ञाने शब्दादिजन्यत्वाभावाद् वस्तुतन्त्रता, नैवं शब्दजन्यज्ञाने;

ततश्चोदनादिजन्यत्वमित्याशङ्क्य, तत्रापि विध्यधीनपुरुषेच्छाप्रयत्ननिरपेक्षमेव लिङ्गादिजन्यं ज्ञानमित्याह- ***एवं सर्वेति***॥

दार्ष्टान्तिकं निगमयति- ***तत्रैवमिति***॥ ***ननु*** ''आत्मा वा अरे द्रष्टव्यः'' इत्यादि विधिश्रवणाद् विधेयेनात्र भवितव्यम्; श्रूयमाणस्य विधेस्तर्केण निराकरणायोगादिति, तत्राह- ***तद्विषय इति***। *कुण्ठीभवन्तीति*॥ ''विष्णुरुपांशु यष्टव्यः'' इत्यादिवत् स्तुत्यर्थवादतथाऽवतिष्ठन्त इत्यर्थः॥ *ननु* अनुष्ठेयाभावाद्विधेरभावे स्तुतेरप्यसंभवाद्विधिशब्दवैयर्थ्यं स्यादिति शङ्कते- ***किमर्थानीति***॥

उत्तरमाह- ***स्वाभाविकेति***॥ एतदेव प्रपञ्चयति- ***यो हीति***॥ इष्टानिष्टप्राप्तिपरिहारार्थं प्रवृत्तिनिरोधकत्वे तेषामनर्थकरत्वं स्यादित्याशङ्क्याह- ***नच तत्रेति***॥ सर्वानपि पुरुषान् किमिति न प्रवर्तयतीति? तत्राह- ***तमात्यन्तिकेति***॥ *स्रोतस्तया=आभिमुख्येन। तदेवं फलभूतात्मदर्शस्तावकतया तदुन्मुखीकरणायान्यतः प्राप्ता एव श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्ते। अतो विधिकार्यलेशाभावाद् विधिच्छायान्येतानीति भावः। प्रतिपाद्यमानवस्तुनो विध्ययोग्यत्वादपि विधेर्न संभव इत्याह- *तस्यात्मेति*॥ इदानीं पूर्ववादिनोक्तमनुवदति- *यदपीति*॥ तत्र किं हानोपादानाभावः प्रसाध्यते? उत क्रियाप्रयोजनाभावः? आद्यस्त्वङ्गीक्रियत इत्याह- *तत्तथेति*॥ द्वितीयस्त्वसिद्ध इत्याह- *अलङ्कार इति*॥ अनुसंज्वरेत्=अनुतपेदित्यर्थः। अतः प्रमाणाप्रमाणरूपप्रतिपत्तिविधिसंबन्धो ब्रह्मणो नास्तीत्युपसंहरति- *तस्मादिति*॥ इदानीं प्रवृत्ति-निवृत्तिप्रयोजनत्वाच्छास्त्रस्येत्यत्र सूचितं पूर्वपक्षमनुवदति- *यदपीति*॥ किमिह वेदान्तवेद्यं वस्त्वेव नास्ति, तथाविधस्याप्रसिद्धत्वात्तदुद्दिश्य प्रतिपादनायोगादित्युच्यते? किं वा वेदान्तवेद्यवस्तुनः क्रियाशेषत्वम्? इति विकल्प्योभयमपि समाधत्ते- *तन्नेति*॥

तत्प्रपञ्चयति- ***योऽसाविति***॥ तस्यापि चेतनत्वात् कर्तृत्वेन क्रियाविधिशेषत्वमिति शङ्कां निराचष्टे- ***असंसारीति***॥ कर्तृत्वेन नान्वेतीति चेत्, तर्हि कर्मकारकत्वेनान्वयो भविष्यतीति, तत्राह- ***उत्पाद्यादीति***॥

विनियोजकप्रमाणाभावादपि नान्वय इत्याह- ***स्वप्रकरणस्थ इति***॥ अस्तु तर्हि वाक्याद्विनियोगः पर्णमय्या इवेति, तत्राह- ***अनन्येति***॥ जुह्वादिवदव्यभिचरितक्रतुसंबन्धिनाभावादात्मन इति भावः। आत्मत्वात् तस्योद्देश्यत्वमपि न संभवतीत्याह- ***स एष इति***॥ तथापि कर्मकाण्डे तर्कशास्त्रेषु च तस्य प्रसिद्धत्वात् कथमुपनिषत्स्वेव वेद्यत्वमिति? तत्राह- ***नह्यहमिति***॥ अहंकर्तुरेव तत्र प्रसिद्धत्वमित्यर्थः। अहंप्रत्ययस्य विषयोऽहंप्रत्ययविषयः, अहंप्रत्यय विषयश्चासौ कर्ता चेत्यत्मोच्यते। एवंभूतोऽपि साक्षी जैनदर्शने प्रसिद्ध इत्याशङ्क्याह- ***सर्वभूतस्थ इति***॥ तेषामात्मा देहपरिणामत्वात् सर्वभूतस्थ इत्यर्थः।

सर्वगतत्वेन सर्वभूतस्थो नैयायिकादिमते प्रसिद्ध इत्यत आह- ***सम इति***।। तर्हि सांख्यदर्शने सिद्ध इत्यत आह- ***एक इति***।। चेतनाचेतनसर्वप्रपञ्चतादात्यापन्न इत्यर्थः। तथाऽपि भर्तृप्रपञ्चादिभिरभ्युपगतत्वात्परिणामीत्यत आह- ***कूटस्थेति***।। कथं तर्हि निषदमि''ति तद्धितप्रत्ययोऽपि मानान्तरासिद्धत्वेनोपनिषत्प्रतिपाद्यत्वमात्मनो गमयतीत्याह- ***तन्त्विति***।।

तस्य जगत्कारणत्वमिति? तत्राह- ***सर्वस्येति***।। प्रपञ्चविभ्रमाधिष्ठानत्वात् कारणत्वव्यपदेशो रजतविग्रहाधिष्ठानभूतशुक्तेरिवेति भावः। फलितमाह- ***अत इति***।। हेयोपादेयविषयौ विधिनिषेधौ न तद्विपरीतमात्मतत्त्वं विषयीकुरुत इत्याह- ***आत्मत्वादेव चेति***।।

ननु पुरुषस्यापि विनाशित्वाद्धेयत्वमित्याशङ्क्याह- *सर्वं हीति*।। अथवा सर्वस्य प्रपञ्चजातस्यात्मैव तत्त्वमित्युपपादयति- ***सर्वं हीति***।। शुक्त्यादितत्त्वान्तं विनाशभाजां रजतादीनां शुक्त्यादिरेव यथा तत्त्वम्, तथाऽत्मान्तं विनश्यतो विकारजातस्यात्मैव तत्त्वमित्यर्थः। *ननु* न तदन्तो विनाशः, तस्यापि विनाशित्वादित्यत आह- ***पुरुष इति***।

*ननु पुरुषस्य स्वरूपाविनाशेऽपि तद्धर्मस्य विनाशित्वात् तद्विशिष्टस्यात्मनो हेयत्वमुपादेयत्वं च स्यादित्यत आह- *विक्रियाहेत्वभावादिति*।। धर्मावस्था-परिणामाख्यविक्रियाशून्य इत्यर्थः। *ननु* तथाप्यशुद्धत्वादिरूपभावेन शुद्धत्वादिरूप उपादेय इति, नेत्याह- *अत एवेति*।। पुरुषावधिः सर्वस्य विनाश इत्युक्तम्, तत्र श्रुतिमाह- ***पुरुषादिति***।। पूर्वोक्तविशेषणादित्यर्थः। ''औपउपनिषदामर्थवत्त्वमभियुक्तवाक्यविरुद्धमिति यदुक्तम्, तदनूद्य समाधते- ***यदपीत्यादिना***।। ''दृष्टो हि तस्यार्थः प्रयोजनवदर्थावबोधनमि''ति वक्तव्ये धर्मजिज्ञासायाः प्रक्रान्तत्वात्, धर्मस्य च कर्मत्वात् कर्मावबोधनमित्युक्तम्। नैतावता सिद्धरूपब्रह्मात्मावबोधनं व्यावर्त्यत इति भावः।।

अपि चानर्थक्यं नामाभिधेयराहित्यम्? प्रयोजनशून्यत्वं वा? यद्याद्यः, तत्राह- ***अपिचेति***।। भूतोपदेशानां ''वषट्कर्तुः प्रथमभक्षो'' ''देवदत्तो भुक्त्वा निर्गतः'' इत्यादीनां द्रव्यादिवाचिनां शब्दानां संबन्धयोग्यताभिधायिविभक्तियुक्तानां साक्षात्कार्यार्थताभावात् तेनैव प्रयोजकेन सिद्धवस्तूपदेशोऽपि संभवतीत्यभिप्रत्याह- ***कूटस्थनित्यमिति***।। भव्यम्। *ननु* किमपि भूतं नोपदिशति, सर्वस्य कार्यसंसृष्टतया कार्यत्वात् कार्यमेवोपदिशतीत्याशङ्क्याह- ***नहीति***।। क्रियाशब्देन कार्यमुच्यते। न तादात्म्यलक्षणः संसर्गः कार्येण द्रव्यादिपदार्थानाम्, किंतु प्रयोजन-प्रयोजकत्वलक्षणः। तद्विषयेण च भावार्थेन क्रियाकारकलक्षणः, न तु भूतानां कार्यत्वमित्यर्थः।।

ननु प्रवर्तकवचनश्रवणसमनन्तरं श्रोतुः प्रवृत्तिमुपलभ्य प्रवृत्तिलिङ्गेन प्रवृत्तिप्रत्यये पदसमुदायस्य सामान्यतः सामर्थ्यमधिगम्य पुनरावापोद्वापाभ्यां च प्रत्येकं कार्यान्विते पदानां

सङ्गतिग्रहणादानयनादिलक्षणकार्यविशेषव्यभिचारेऽपि कार्यमात्रस्य सर्वत्राव्यभिचारात् तदन्वितस्वार्थेषु पदानां सामर्थ्यमिति कार्यशेषतयैव भूतानामभिधानमिति शङ्कायामाह- ***अक्रियात्वेऽपीति***॥ कार्यस्य कार्यान्तराभावात् कार्यपदस्य तदन्वितस्वार्थाभिधायित्वासंभवाद् भावार्थकार्यान्वयस्य च कार्यान्वयोत्तरकालीनत्वादन्वितस्वाभिधायित्वाभावाच्च कार्यपदस्य योग्येतरान्वितस्वार्थाभिधेयत्वमङ्गीकरणीयम्॥

तथासत्येकप्रयोजकत्वाय सर्वत्र योग्येतरान्वय एव समर्थस्तत्प्रसादसामर्थ्यविषय इत्येहाभ्युपगन्तव्यम्। कार्यमात्रस्याव्यभिचारेऽपि सर्वत्र मानान्तर-तद्विषयशब्दयोरिव न शब्दार्थत्वम्; प्रयोगनिमित्ततया तयोरन्यथासिद्धिवत् प्रवृत्तिलिङ्गहेतुतयैव कार्यस्यान्वयनियमोपपत्तेरित्यभिप्रेत्य परिहरति- ***नैष दोष इति***॥ क्रियार्थत्वेऽपीत्यपिशब्देनात्रारुचिं सूचयति। पुत्रस्ते जात इत्याद्यप्रवर्तकवाक्यादपि हर्षादिलिङ्गेन तद्धेतुप्रत्ययः; कार्यविषयेऽपि सामर्थ्यग्रहणादर्शनात्॥ *ननु* तथापि न स्वतन्त्रभूतोपदेशसंभवः; क्रियाशेषत्वेनैवान्यत्रोपदेशादित्यत आह- ***क्रियार्थत्वमिति***॥ *ननु* कार्यशेषत्वाभावे प्रामाण्यमनुपपन्नमित्याशङ्क्यानधिगतार्थगन्तृत्वात् प्रामाण्यं प्रत्यक्षादिवदुपपन्नमित्याह- ***नचैतावतेति***॥ *ननु* सर्वस्य प्रयोजनस्य क्रियाद्वारत्वात् प्रयोजनपर्यन्तत्वाच्च वाक्यप्रमाणस्य कार्यशेषत्वे शब्दस्याप्रामाण्यमनुपपन्नमिति शङ्कते- ***यदि नामेति***॥ परिहरति- ***उच्यत इत्यादिना***॥ ***तथैवेति***॥ यथा क्रियासाधनवस्तूपदेशः प्रयोजनपर्यवसायितया प्रमाणम्, तथा वेदान्तवाक्यस्यापि प्रयोजनवद्वस्तूपदेशाद् प्रयोजनवत्त्वमित्याह- ***तदवगत्येति***॥ निगमयति- ***इत्यविशिष्टमिति*** ॥ सकलस्याम्नायस्य क्रियापरत्वे निषेधवाक्यानि निरवकाशानि स्युः, अतः क्रियान्वयाभिधानवादिनापि भूतेऽर्थे निषेधवाक्यसमन्वयः स्वीकर्तव्य इत्याह- ***अपिच ब्राह्मण इति***॥ कृतेर्भावार्थविषयत्वादिवदभावार्थाभावात् कृतिनिवृत्तौ तदविनाभूतकार्यमपि निवर्तत इति भावः।

ननु कस्मान्निवृत्तिरेव कार्यं न भवति? तत्साधनं वा? इत आह- ***नच सेति***। "प्राप्तक्रियादिवृत्तिरूपत्वादि" ति भाष्ये क्रियाशब्दः कार्यवचनः, ततः किमायातमिति? अत आह- ***अक्रियार्थानामिति***॥ *ननु* अत्र हननं न कुर्यादिति वाक्यार्थो न भवति, किंत्वहननं कुर्यादिति। ततश्च हननविरोधिनी सङ्कल्पक्रियाहननं न कुर्यामिप्येवंरूपा कर्तव्यता प्रत्ययेन विधीयत इत्याशङ्क्याह- ***नच स्वभावेति***॥ स्वभावप्राप्त इति*॥ शास्त्रमनपेक्ष्य रागत एव प्राप्त इत्यर्थः। एवंभूतहन्त्यर्थेन हननेन नञोऽनुरागो नञः संबन्धो यदा भवति, तदा भवत्यहननमिति, तत्कर्तव्यमित्युक्ते हननविरोधितया, हननसङ्कल्पक्रिया, हननप्रवृत्तेर्विधारकः प्रयत्नो वा कर्तव्य इति विधीयते। विधिमन्तरेणाप्राप्तत्वादित्ययं पक्षोऽनुपपन्न इति भावः। तर्हि त्वत्पक्षे किं पर्यवसितमिदं वाक्यमिति? तदाह- ***हननक्रियेति***॥ औदासीन्यं स्वभावतोऽप्यस्तीति प्रसक्तक्रियानिवृत्त्योपलक्ष्य

विशिनष्टि- ***हननक्रियानिवृत्त्यौदासीन्येति***॥ कुतो न शक्यमित्यत आह- *नञश्चेति*॥ चकारोऽवधारणार्थो भिन्नक्रमः। एष एवेति। न च तदन्य-तद्विरोधिनोरपि मुख्ययैव वृत्त्या नञोऽभिधायकत्वादवधारणमयुक्तमिति वाच्यम्; अभावार्थत्वेऽपि नञः स्वेन संसृज्यमानादन्य-तद्विरोधिनोरभावसंबन्धिनोर्लक्षणयापि वृत्तिसंभवे तत्रापि शक्तिकल्पनाया गौरवप्रसङ्गात्, अतोऽब्रह्मणा धर्मावन्याविरोधिनावित्यपि वाक्यस्य लक्षणयैवार्थान्तरे नञो वृत्तिप्रदर्शकत्वादिति भावः॥

ननु तर्हि नञर्थे हननाभावे नियोगोऽस्तु, ततो नियोगनिष्ठमिदं वाक्यमिति, तत्राह- ***अभावबुद्धिरिति***॥ भावार्थो दध्यादि गुणो वा नियोगविषयतया तन्निष्पत्तिहेतुः, नत्वभावः; अभावस्यानादिसिद्धत्वात्तद्विषयत्वे नियोगस्याननुष्ठेयत्वप्रसङ्गात्। न चास्य प्रागभावस्य परिपालनं कर्तव्यम्; स्वास्थ्यादप्रच्युतिलक्षणौदासीन्येनैव तत्परिपालनोपपत्तेरनुष्ठेयाभावादिति भावः। आस्ताम्, *न* प्रकृत्यर्थेन नञ्संबन्धः, किन्तु प्रत्ययार्थेन; प्रत्ययार्थस्यैव प्रधानत्वात्, प्रधानेनैवेतरेषामन्वयात्, प्रकृत्यर्थस्य चान्योपसर्जनत्वेनाप्रधानत्वात्; अतो हननक्रियाया यदिष्टसाधनत्वं प्रवर्तकम्, तदेव प्रत्ययेनानूद्य नञा प्रतिषिध्यते-ब्राह्मणहननमिष्टसाधनं न भवतीति। एतदाह- ***अभावबुद्धिरिति***॥ का तर्हि हननक्रियानिवृत्तिरिति? तत्राह- ***सा चेति***॥ प्रत्ययार्थभूतेष्टसाधनताया निषेधे प्रकृत्यर्थाद् हननात् स्वयमेव निवर्तते। आपाततोऽभिमतसाधनत्वबुद्ध्या प्रवृत्तस्य ततोऽधिकतरानर्थहेतुत्वावगमे पुंसः प्रवृत्त्ययोगादिति भावः॥

एवं वा योजना- ***न च हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण नञशक्यमप्राप्तक्रियार्थत्वं कल्पयितुम्;*** कुतो न शक्यमिति अत आह- ***स्वभावप्राप्तहन्त्यर्थानुरागेण नञ इति***। अयमर्थः-हननपरोऽपि विधिप्रत्ययः प्रतीयमानो न तद्विधत्ते; तस्य रागतः प्राप्तत्वात्, न च नञः प्रसज्यप्रतिषेधो विधेयः; तस्याप्यौदासीन्यस्वरूपस्य सिद्धतया प्राप्तत्वात्। न च विधारकः प्रयत्नः; तस्याश्रुतत्वेन लक्ष्यमाणत्वात्, सति संभवे च लक्षणया अन्याय्यत्वात्, विधिविभक्तेरप्राप्तविषयकत्वनियमेन रागतः प्राप्तप्रवृत्त्यनुवादकत्वेन विधिविषयत्वायोगात्। तस्माद् यद् हन्यादित्यनूद्य तत्रेति निषेधेन तदभावो ज्ञाप्यते, नतु नञर्थो विधीयत इति॥ *ननु* ''न हन्तव्यः'' इति नञर्थोऽभावः साध्यत्वने प्रतीयमानत्वाद् विधिविषय इति, तत्राह- ***नञश्चैष इति***॥ अयमर्थः-अभावः स्वविरोधिभावनिरूप्यतया भावानुकारित्वेन सिद्धे भावे सिद्धवत् साध्ये च साध्यवदवभासत इति साध्यविषयो नञर्थः साध्यवद् भासते। अतो नञर्थः कार्य इति भ्रमः, नतु तस्य कार्यतेति। *ननु* संबन्धिनोऽभावबोधनेऽपि हननोन्मुखानां मनो-वाग्-देहानां कुतोऽस्मान्निवृत्तिरिति? तत्राह- ***अभावबुद्धिरिति***॥ *औदासीन्यकरणम्*= औदासीन्यपालनकारणमिति यावत्। ***अयं भावः***-लोके प्रवृत्ति-निवृत्तिहेतुवाक्यश्रवणसमनन्तरं मध्यमवृद्धस्य प्रवृत्ति-निवृत्ती बालोऽनुमिमीते। इच्छाद्वेषहेतुके, अस्य प्रवृत्ति-निवृती,

स्वतन्त्रप्रवृत्ति-निवृत्तित्वात्; मदीयस्वतन्त्रप्रवृत्तिवदिति। अतस्तयोरिच्छाद्वेषयो: कर्तव्यतैकार्थ-समवेतेष्टानिष्टसाधनभावावगमपूर्वकतामध्यवस्यति, प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्वेषत्वाद् मत्प्रवृत्तिनिवृत्ति-हेतुभूतेच्छाद्वेषवदिति, न जातु शब्दात्तद्व्यापारपुरुषाशयत्रैकल्यानवच्छिन्नभावनापूर्वकताम्; स्वगतेच्छाद्वेष-योस्तत्प्रत्ययपूर्वकतानवगमात्। स चावगम: शब्दान्वय-व्यतिरेकानुविधायी शब्दजन्य इत्यध्यवस्यति। अतो लिङादिप्रत्ययानां कृतियोग्येष्टसाधनपरत्वादिष्टसाधनतां कर्तव्यतां च शब्दोऽवगमयति; अनन्यलभ्यत्वादुभयो:, अनन्यलभ्यस्य च शब्दार्थत्वात्। यत्र तु कर्तव्यताऽन्यत एव लभ्यते, यथा 'न हन्यात्' 'न पिबेत्' इत्यादौ; हननप्रवृत्ते रागत एव प्राप्तत्वात्, तत्र तदनुवादेन लिङ्विभक्तिर्नञ-न्विताऽन्योऽप्राप्तामनर्थहेतुतामवगमयति। अतो रागादिप्राप्तकर्तव्यतानुवादेनानर्थसाधनताबोधकमिदं वाक्यम्। निषेध्यस्य चानर्थसाधनताबुद्धिरेव निषेध्याभावबुद्धि:; प्रकृत्यर्थस्य हितसाधनत्वावगमेऽप्य-धिकतरामनर्थहेतुतामालापयति, तत औदासीन्यमात्मनोऽवस्थापयतीति।।

ननु अभावबुद्धिश्चेदौदासीन्यस्थापनकारणम्, तर्हि यावदौदासीन्यमनुवर्तेत, कारणाभावे कार्यावस्थानायोगात्, न चानुवर्तते; उदासीनस्यापि विषयान्तरव्यासक्तचित्तस्य तदभावादित्यत आह- ***सा चेति*।।** एतदुक्तं भवति न साक्षादौदासीन्यानवस्थानकारणमभावबुद्धि:, अपित्वागन्तुकतद्विनाशहेतुनिरासेन, तेन स्तम्भादीनां प्रासादावस्थानकारणताऽभावात्, शस्त्रप्रहारनिरासेन राजजीवनावस्थानहेतुकवचादिवत् स्वावस्थानप्रतिबन्धकनिरासेनावस्थापनकारणत्वात्, कवचापगमेऽसति च शस्त्रप्रहारे जीवनावस्थानवदौदासीन्यावस्थानं न विरुध्यत इति।। निषेधवाक्यानामर्थमित्थमुपपाद्य सिद्धवस्तुविषयत्वमित्युपसंहरति- *तस्मादिति*।।

ननु ''नेक्षेतोद्यन्तमादित्यमि'' त्यादावीक्षणविरोधिनी संकल्पक्रिया 'नेक्षे' इत्येवंरूपा विधीयते, तथाऽत्रापि हननक्रियाविरोधिनी 'न हन्यामि'ति सङ्कल्पक्रिया विधीयतामित्याशङ्क्याह- ***अन्यत्र प्रजापतीति*।।** मुख्यवृत्त्या संसृज्यमानाभावप्रतिपादकस्य नञशब्दस्यानुष्ठेयाभिधायिव्रतशब्दोप-क्रमानुसारेण लक्षणया विरोधिक्रियान्तरे वृत्तिराश्रिता तत्र, अत्र तु न स हेतु:; तदापादकाभावात्, ततो विरोधिक्रियायां लक्षणावृत्तिमङ्गीकृत्यानुष्ठानपर्यवसायित्वं वाक्यस्य नाभ्युपगन्तव्यमिति भाव:। तर्ह्यभियुक्तवचसां का गति:? इत्याशङ्क्योपसंहारव्याजेन गतिं दर्शयति- ***तस्मात् पुरुषार्थेति*।।** उपनिषदां तु पुरुषार्थब्रह्मरूपावगमपर्यवसानमुक्तमिति भाव:। पूर्ववादिनोक्तमनुवदति- *यदप्युक्तमिति*।। निगूढाभिसन्धि: पूर्वोक्तं परिहारं स्मारयति- ***ननु श्रुतब्रह्मणोऽपीति*।।** श्रवणमात्रज्ञानोत्तरकालं संसारित्वमुच्यते? किं वा तत्त्वसाक्षात्कारज्ञानोत्तरकालम्? इति विकल्प्य, तत्राद्योऽङ्गीक्रियते, उत्तरपक्षस्तु न संभवतीत्याह- ***नावगतेति*।।** तत् प्रपञ्चयति- ***नहीति*।।** अत्रैव दु:खसुखानुत्पादे भेदेनोदाहरणद्वयमाह- ***नहि धनिन इति*।।** अत्रैव श्रुतिमुदाहरति- ***तदुक्तमिति*।।**

जीवतोऽशरीरत्वमनुपपन्नमिति चोदयति- ***शरीर इति***॥ परिहरति- ***सशरीरत्वस्येति***॥ यदि वास्तवं सशरीरत्वं भवेत्, न जीवतस्तन्निवर्तेत, मिथ्याज्ञाननिमित्तं तु तत्त्वतो जीवतोऽप्युत्पन्नतत्त्वज्ञानेन निवर्तयितुं शक्यमिति भावः॥ ततश्च सशरीरत्वमज्ञाननिमित्तमित्याह- ***नित्यमिति***॥ कर्मनिमित्तः शरीरसंबन्धो न मिथ्याज्ञाननिमित्त इति शङ्कते- ***तत्कृतेति***॥ *ननु* इदानीन्तनशरीरसंबन्धः, प्राक्तनकर्मनिबन्धनः, तच्च कर्म प्राक्तनशरीरसंबन्धात्, सोऽपि प्राक्तनकर्मवशात्, न चानवस्था दोषाय; बीजाङ्कुरवदनादित्वादिवत्, इत्याशङ्क्याह- ***अन्धपरम्परेति***॥ कर्मसंबन्धस्य शरीरसंबन्धस्य वाऽऽत्मनि केनापि प्रमाणेनादृष्टत्वादिति भावः॥

ननु आत्मनः स्वत एव कर्तृत्वाद् धर्माधर्मयोस्तत्कृतत्वसिद्धेर्नेतरेतराश्रयत्वादिदोष इति, तत्राह-***क्रियेति***॥ *उपार्जनम्=स्वीकरणम्। इतरसंबन्धे यद्यपि प्रमाणाभावः; तथाऽपि त्वदभिमतसंबन्धो न सिध्येत्; तत्रापि प्रमाणाभावात्, इत्याशङ्क्याह- ***मिथ्येति***॥ ममेदमिति प्रतिपत्तिसमर्थमधिकारिणं कर्तारं चोद्दिश्य यागादिविधानाच्चेतनस्यैव कर्तृत्वमिति, तत्राह- ***एतेनेति*** एतेन क्रियासमवायित्वनिराकरणेन यजमानत्वमप्यात्मा सक्रियत्वात्प्रपद्यते, न परिस्पन्द एवैकः क्रिया नः; कणभोजिवत्, इति यदुच्यते, तन्निराकृतमित्यर्थः॥ अथवा-शरीरसंबन्धस्य मिथ्याज्ञाननिमित्तत्वप्रदर्शनेन ब्राह्मण्यादिविशिष्टस्य यजमानत्वं परमार्थतो नास्तीति दर्शितमित्यर्थः। आत्मीयतयैव देहादावात्मसंबन्धो भवति, ततस्तस्यात्मीयदेहादौ क्षतेरिव राज्ञ आत्मबुद्धिः, ततः स्वकीयदेहादिनिबन्धनं कर्तृत्वं प्रमातृत्वं च पारमार्थिकमिति मन्वानः शङ्कते- ***देहादीति***॥

परिहरति- ***न प्रसिद्धेति***॥ प्रसिद्धो वस्तुभेदो यस्य पुरुषस्य, स तथोक्तः। तदेव प्रपञ्चयति- *यस्य **हीति***॥ *नाप्रसिद्धवस्तुभेदस्येति*॥ गौणत्वलक्षणाभावाद् न गौण इत्यर्थः। पूर्वं संशये समारोपितं निश्चितरूपमुदाहृत्य विपर्ययज्ञाने निश्चितमुदाहरति- ***यथावेति***॥ *अकस्मादिति*॥ संशये विपर्यये च दृष्टस्य हेतोः साधारणधर्मदर्शनसंस्कारोद्बोधहेतुसादृश्यादेः समानत्वेऽप्यदृष्टवशाद् विपर्ययो जायत इत्यर्थः॥ *ननु* विवेकिनोऽप्यहंशब्दप्रत्ययदर्शनादज्ञाननिमित्तत्वाभावे गौणोऽयमित्याशङ्क्याह- ***आत्मानात्मविवेकिनामिति***॥ आत्मीयेऽपि देहादावात्मबुद्ध्यैवात्मीयत्वं तिरोहितं भवति। सर्पबुद्धाविव रज्जुत्वमित्यर्थः। परमप्रकृतमुपसंहरति- ***तस्मान्मिथ्येति***॥ न केवलं यौक्तिकोऽयमर्थः, श्रुतिस्मृतिप्रतिपन्नोऽपीति दर्शयति- ***तथाचेति***॥ *निर्ल्वयनी=निर्मोकः। अचक्षुस्सचक्षुरिवेत्यादि योजना॥

ननु ब्रह्मात्मत्वावगमः संसारिणामस्माकमसिद्ध इति, तत्राह- ***यस्य त्विति***॥ श्रुतस्य ब्रह्मणोऽनेन निदिध्यासनकर्तव्यशेषत्वेन समर्पणाद्विधिशेषत्वमुक्तमनूद्य दूषयति- ***यत्पुनरिति***॥ एतदेव स्पष्टयति- ***यदीति***॥ श्रुतमात्रस्य मननादिसंबन्धः, नावगतस्येति भावः। उक्तेऽर्थे सूत्रं योजयति- ***अत**

इति *।। ''तत्तु समन्वयात्'' अस्त्येवेति प्रथमवर्णके योजना। समन्वयादेवेति द्वितीये। शास्त्रारम्भभेदोऽपि विधिनिरपेक्षभूतवस्तुप्रतिपादकत्वं वेदान्तानां गमयतीत्याह-**एवंचेति** *।। अन्यथानुपपत्तिमाह- ***प्रतिपत्तिविधीति** *।।

ननु शरीरादिनिर्वर्त्यो विधिभेद: कर्मकाण्डे निरूपित:, इह तु केवलं मनस्साध्यो निरूपित इत्यत आह- ***आरभ्यमाणं चेति** *।। त्वन्मतेऽपि मतं पृथगारम्भ इति शङ्काया सङ्कर्षकाण्डस्य क्रियाखिलन्यायनिरूपणस्य फलैक्येऽपि प्रमेयभेदादिष्ट: पृथगारम्भ:, इह तु प्रमेयफलभेदात् सुतरामारम्भे भेदासिद्धिरित्याह- ***ब्रह्मेति** *।। न केवलं सिद्धरूपत्वाद् ब्रह्मात्म्यैक्यस्य धर्मादन्यत्वम्, अपितु तद्विरोधादपीत्युपसंहारव्याजेनाह- ***तस्मादहमिति** *।। इतिकरणेन ज्ञानं परामृशति। *अद्वैतज्ञानस्य भेदाधिष्ठानकर्मविरोधित्वादित्यर्थ:। न केवलं विधीनामियं गति:, अपितु-सर्वेषां प्रमाणानामित्याह- ***सर्वाणि चेति** *।।

तदेतदुपपादयति- ***नहीति** *।। प्रमातृ-विषययोरभावादित्यर्थ:।

उक्तन्यायमभियुक्तोक्तिभि: **संगृह्णाति**- ***अपिचाहुरिति** *।। प्रसिद्धभेदत्वाद् गौणोऽहंभाव: पुत्रादौ, अत: स गौणात्मा, देहादावप्रसिद्धभेदेऽहंभावो मिथ्या; अनात्मन्यात्माभिमानत्वात्, अत: स मिथ्यात्मा; तयोर्मुख्यपरमार्थात्मावगमे तदाधारपुत्रदेहादिबाधनादसत्त्वे तन्निमित्तं नियोज्यत्वं न भवतीत्यर्थ:। तत्त्वज्ञानात्प्रागेव कर्तव्यशेषानुवृत्ति:, नोत्तरकालमित्येतत्कथमित्याशङ्क्य, तत्त्वज्ञानस्य प्रमातृत्वादिनिवर्तकत्वादित्याह- ***अन्वेष्टव्येति** *।। ''य आत्मा अपहतपाप्मेत्यादिश्रुतिप्रतिपादित आत्माऽन्वेष्टव्य:; ''सोऽन्वेष्टव्य: इति श्रुते:, यदि प्रमातृत्वादिव्यवहार: कल्पित:, कथं तर्हि प्रत्यक्षादीनां प्रामाण्यम्? आत्मावबोधजनकत्वं च श्रुतेरिति? तत्राह- ***देहात्मेति** *।। यथा कल्पितोऽपि देहात्मभावे लोकव्यवहाराङ्गतया प्रमाणमिव भाति, अर्थक्रियाकारी च; तथा व्यवहाराङ्गत्वाद् व्यवहारे बाधाभावाच्च तत्त्वावेदकप्रामाण्याभावेऽपि प्रत्यक्षादीनां व्यावहारिकप्रामाण्यम्, आत्मबोधजनकत्वं च श्रुते: सिध्यतीत्यर्थ:।।

इति पूज्यश्रीचित्सुखमुनिकृतौ शारीरकमीमांसाभाष्यव्याख्यायां भाष्यभावप्रकाशिकायां

समन्वयाधिकरणं नाम नवमं वर्णकं संपूर्णम्।।

प्रदीप

ननु– जगत्कारणं संसारिव्यतिरिक्तमुपासनादिक्रियासम्बन्धयोग्यमेव ''जन्माद्यस्य यतः'', ''शास्त्रयोनित्वादि'' ति सूत्रद्वयप्रतिपाद्यम्, न तु निर्विशेषं प्रत्यगभिन्नं वा स्वरूपचैतन्यमात्र-मुपासनादिक्रियासम्बन्धायोग्यम्। *तदयं निष्कर्षः:* ब्रह्म न स्वप्राधान्येन शास्त्रसमधिगम्यम्; प्रवृत्तिनिवृत्त्यन्यतरानुपयोगित्वात्, आर्थवादिकवायुक्षेपिष्ठत्वादिवत्। सिद्धपदार्थस्य हि प्रवृत्तिनिवृत्त्यन्यतरशेषत्वं विधेयक्रियाशेषत्वेन, तदशेषत्वेऽप्याश्रयक्रियाद्वारा स्वफलसाधनत्वेन वा भवति। आद्यं ब्रीह्यादीनाम्, द्वितीयं गोदोहनादीनाम्, इति कर्माङ्गकर्तृस्तावकं ब्रह्मत्वेन जीवोपासनापरमेव वा वेदान्तशास्त्रमिति स्वीकर्तव्यम्। तत्र च ब्रह्मपदार्थ एवं पारमार्थिकः कश्चन स्वतन्त्रोऽप्रसिद्धः, इति जिज्ञास्यं प्रत्यगभिन्नं भवति। प्रत्यगभिन्नं हि ब्रह्म प्रत्यक्षादि प्रमाणान्तरगम्यम्, इति मानान्तराधीनमेव सिद्धार्थबोधकत्वेऽपि वेदान्तवाक्यानां लौकिकवाक्यानामिव। प्रामाण्यमापद्येत। ततश्च वेदान्तानां प्रामाण्यमपि वैदिकविधिवाक्यानामिव क्रियाद्वारकमेव वक्तव्यम्, इति कथं ब्रह्म शास्त्रगम्यम्? इत्यभिप्रायेणाशङ्कते–**कथं पुनरिति** *।। *एतेन*–पूर्वाधिकरणेनास्याक्षेपिका सङ्गतिरिति सूच्यते। शास्त्रपदं प्रमाणान्तरनिरपेक्षत्व-प्रवृत्तिनिवृत्त्यन्यतरशेषत्वयोः स्वविषय एवोपस्थापनेन पूर्वपक्षकोट्युपस्थापकमिति निष्कर्षः। जिज्ञास्यत्वं शास्त्रयोनित्वमुभयं च परस्परविरुद्धमिति कोटिद्वयोपस्थापनात् संशयः। शास्त्रपदसूचिताः पूर्वपक्षयुक्तीः सप्रमाणं निर्दिशति– ***यावतेति** *।। शास्त्रस्य क्रियापरत्वम्–आम्नायस्य क्रियार्थत्वादि'' ति सूत्रेण प्रदर्शितमिति 'सूत्रेण'-पदाध्याहारेण योजना। *आम्नायस्य=वेदस्य, *क्रियार्थत्वात्=साध्य-साधनेतिकर्तव्यतान्यतमपर्यवसायित्वनियमात्, *अतदर्थानाम्= साध्य-साधनेतिकर्तव्यतान्यतमाबोधकानामर्थवादानाम्, *आनर्थक्यम्= अबोधकत्वम् अप्रमाणत्वमिति यावदिति सूत्रार्थः। इदं च सूत्रं वेदान्तवाक्येष्वपि यदि साक्षाद्योजनीयम् तर्हि कर्माङ्गकर्तृ-देवतास्तावकं वेदान्तशास्त्रम्,इति वेदान्तानामर्थवादतया प्रामाण्यमिति पूर्वपक्षे पर्यवसानम्। सति चार्थवादत्वे–''विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरि'' ति विधेय-तदुपकारान्यतरस्तावकतयाऽर्थवादानामपि सतां वेदान्तानां नाप्रमाणता भविष्यति, इति वेदान्तानामर्थवादत्वमेव युक्तमिति मीमांसकमतेन पूर्वपक्षः। तदुक्तं तन्त्रवार्तिकेऽर्थवादाधिकरणे– * ''एतेन* उपनिषदो व्याख्याताः'' इति। इमं पूर्वपक्षं दर्शयिष्यन् सिद्धान्ते वेदान्तानामानर्थक्यमापादयति– *अत इति*।। क्रियार्थत्वस्यावश्यकत्वाद् वेदान्तानां प्रत्यगभिन्नाब्रह्मार्थत्वे *आनर्थक्यम्=अप्रामाण्यं स्यादिति योजना; कुत इति? अत आह- ***अक्रियार्थत्वादिति** *।। *ननु* तर्हि कागतिरिति? अतः प्रथमं पूर्वपक्षं मीमांसकदृष्ट्या निर्दिशति– *कर्तृ-देवतादीति*।। भाट्टमते ह्यध्ययनविधिर्नाक्षरग्रहणपर्यवसायी, किन्त्वर्थज्ञानपर्यवसायीति सर्वविदितमिदम्। न ह्यपुरुषार्थोऽक्षरग्रहणं फलतामर्हतीति तदाशयः। सति चार्थज्ञानार्थत्वे तस्य

प्रयोजनवत्त्वनिर्वाहार्थमात्मज्ञानमपि कर्माङ्गकर्तृस्तावकतया प्रयोजनवदिति स्वीकर्तव्यमिति भावः। ये तु पुनरध्ययनविधेरक्षरग्रहणपर्यवसायित्वमेव, अर्थज्ञानं तु 'ज्ञेयश्चे'ति विध्यन्तरबोध्यमेवेति बदन्ति, तन्मतेऽर्थज्ञानं न क्रतोरङ्गम्, इति न वेदान्तानामात्मज्ञानद्वारा कर्माङ्गत्वम्, किन्तु स्वतन्त्रोपासनाविधिपरत्वमेव। तत्र च जीवो ब्रह्मत्वेनोपास्य इत्यारोपितं ब्रह्मत्वमुपास्यतया "मनो ब्रह्मेत्युपासीते"त्यादि स्थल इव विवक्षितम्। सर्वथा तु जीवातिरिक्तब्रह्मबोधने बेदान्तानां तात्पर्यमित्येव फलतीत्यभिप्रायेण पूर्वपक्षान्तरं संगृह्णाति–**उपासनादिक्रियान्तरविधानार्थत्वं वेति***॥ ब्रह्मत्वेन जीवोपासनादिक्रियापरत्वं वेत्यर्थः। "अत्रापरे प्रत्यवतिष्ठन्ते" इत्युत्तरग्रन्थे तु पारमार्थिकस्वतन्त्रब्रह्मोपासनाविधिरेव पूर्वपक्षिणोपक्षिप्यत इति विवेकः। तथा च सिद्धवस्तुबोधकत्वेनैव यदि विधिसम्बन्धोऽङ्गीकर्तव्यः, तर्ह्यर्थवादत्वम्, अन्यथा तु सिद्धवस्तुबोधकत्वं विधित्वं च विरुद्धमेव। सति चैवमज्ञातज्ञापकत्वेन वेदान्तानां प्रामाण्यं यदि स्वीकर्तव्यम्, तर्ह्यनर्थवादत्व उपासनाविधिपरत्वमेव युक्तमिति प्रथमपूर्वपक्षप्रकारद्वयनिष्कर्षः। *ननु* सिद्धार्थत्वेऽप्यज्ञातज्ञापकत्वरूपं विधित्वं कथं न संभवतीति? अत आह ***नहीति***॥ केवलपरिनिष्ठितवस्तुप्रतिपादनं निष्प्रयोजनत्वादनुपपन्नमिति भावः। *ननु* परिनिष्ठितस्यापि वस्तुनो ज्ञापनार्थं शस्त्रमपेक्षितमेवेत्यत आह–*प्रत्यक्षेति*॥ प्रत्यक्षादिप्रमाणान्तरेणापि परिनिष्ठितवस्तुज्ञानसंभवात् शास्त्रवैयर्थ्यमपरिहरणीयमेवेति भावः। *ननु* पुरुषार्थोपयोगिसिद्धार्थज्ञानजनकत्वेन वेदान्तानां प्रामाण्यमित्यत आह–*तत्प्रतिपादने चेति*॥ प्रवृत्ति-निवृत्त्यन्यतरसाध्यत्वात्पुरुषार्थस्य प्रवृत्ति-निवृत्त्यन्यतरायोग्यवस्तुज्ञानं न पुरुषार्थाय कल्पत इति भावः।*तत्प्रतिपादने= परिनिष्ठितवस्तुज्ञापने, *हेयोपादेयरहिते= स्वसाध्यज्ञानद्वारकप्रवृत्ति-निवृत्त्यन्तरायोग्यगोचरे, *पुरुषार्थाभावात्=प्रवृत्तिनिवृत्त्यन्यतरसाध्यफलाभावात्, न हि परिनिष्ठितवस्तुप्रतिपादनं संभवतीति योजना। चशब्दस्य पुरुषार्थाभावादित्यनेन सम्बन्धः। तथा च परिनिष्ठितवस्तुप्रतिपादनाभावे हेतुद्वयं विवक्षितम्–परिनिष्ठितवस्तुनः प्रत्यक्षादिविषयत्वम्, हेयोपादेयरहिते तस्मिन् पुरुषार्थाभावश्चेति। *ननु यदि– "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते" इति सूत्रेणार्थवादानामानर्थक्यं वर्णितम् तर्ह्यर्थवादत्वपक्षे वेदान्तानामप्यानर्थक्यमेव युक्तम्, इति कथं कर्मापेक्षितकर्तृस्तावकतया प्रामाण्यमपि न तत्सूत्रविरुद्धमिति? अत आह– ***अत एवेति***॥ सिद्धवस्तु-प्रतिपादने प्रयोजनाभावादेवेत्यर्थः। ***सोऽरोदीदित्यादीनामानर्थक्यं मा भूदिति***॥ अयं भावः– "आम्नायस्य क्रियार्थत्वा" दिति पूर्वपक्षसूत्रम्, न तु सिद्धान्तसूत्रम्। तथा च क्रियार्थत्वेनाप्रामाण्यस्य पूर्वपक्षिसम्मतस्य निराकरणाय प्रवृत्तम्, यत्–"विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरि" ति सूत्रम् ततो हि वेदवक्यानां सर्वेषां " स्वाध्यायोऽध्येतव्यः" इति परिगृहीतानामप्रामाण्यायोगादर्थवादानामप्यानर्थक्यं मा भूदिति विधिसम्बन्धिस्तावकतया प्रामाण्यस्य व्यवस्थापनाद् वेदान्तवाक्यानामप्यर्थवादत्वेनैव तेन न्यायेन कर्मापेक्षितकर्तृस्तावकतया प्रामाण्यमेव

युक्तमिति। तमिममर्थं विशदयन्नाह- ***विधिना त्वेकवाक्यत्वादिति ***॥ *विधीनाम्=विधेय-तदुपकारकादीनाम्, *स्तुत्यर्थेन= स्तुतिरूपार्थबोधनद्वारेण, विधिना लिङर्थप्रवर्तनया सहैकवाक्यात्,*स्युः=अर्थवादाः प्रमाणं स्युरित्यध्या- हारेण सूत्रयोजना। *ननु* स्तुत्यर्थत्वेन प्रामाण्यमानर्थक्येन समानमेवेति मन्त्रवदेव प्रामाण्यं भवत्विति चेत्, तत्राह-* मन्त्राणामिति*। प्रयोगसमवेतार्थस्मारकत्वेनैव मन्त्राणां प्रामाण्याद् मन्त्राणामपि क्रियासम्बन्धं विना न प्रामाण्यमिति भावः। *ननु* अप्रवृत्तप्रवर्तनमेंव न विधिः, किन्त्वज्ञातज्ञापनमपि। अत एव-''अग्निहोत्रं जुहोती'' त्यादिकर्मस्वरूपविधिरुपपद्यते, तथा चोत्पत्तिविधिवद् वेदान्ता ब्रह्मस्वरूपविधिपरा भवन्त्विति, अत आंह- ***न च परिनिष्ठित इति ***॥ उत्पत्तिविधावपि विनियोग-प्रयोगादयोऽस्पष्टरूपेण प्रतीयन्ते तथाच यत्राप्रवृत्तप्रवृत्त्यादियोग्यता तत्र कर्मस्वरूप एवोत्पत्तिविधिः संभवति, नतु ब्रह्मस्वरूपे, तस्य विनियोग-प्रयोगादिविधियोग्यत्वाभावादिति भावः। तदेतदाह- ***क्रियाविषयत्वादिति ***। प्रकृतपूर्वपक्ष-प्रकारद्वयमुपसंहरति- ***तस्मादिति ***॥ *ननु विधिसन्निधिपठितानामेवार्थवादानां विधिनैकवाक्यत्वम्, न तु प्रकरणान्तरपठितानाम्। वेदान्ताश्च न कर्मविधिप्रकरणे वर्तन्ते, इति प्रकरणान्तरस्थत्वं वेदान्तानामुपपन्नं स्यात्, इति तद्भयान्नार्थवादन्यायस्यात्र प्रसर इत्याशङ्क्य पक्षान्तरमाह- ***अथेति ***॥ *प्रकरणान्तरभयात्=वेदान्तवाक्यानां प्रकरणान्तरत्वात् ततो भीतेरित्यर्थः। ***स्ववाक्यगतोपासनार्थत्वम्***= स्वप्रकरणस्थोपासनार्थत्वमित्यर्थः। सर्वथा तु न ब्रह्मणः शास्त्रयोनित्वमिति पूर्वपक्षमुपसंहरति- ***तस्मादिति ***॥ सिद्धान्तसूत्रवमतारयति-**इति प्राप्त इति ***॥ उच्यते=प्रत्युच्यत इत्यर्थः। सूत्रावयवान् विभज्य व्याचष्टे- *तुशब्द इति। पूर्वपक्षव्यावृत्त्यर्थः=पूर्वपक्षनिषेधार्थः। तत्पदेन जिज्ञास्यं ''यतो वे'' ति वाक्यलक्षितं विवक्ष्यत इत्याह- ***तद्ब्रह्मेति। सर्वज्ञमिति ***॥ अनेन च प्राथमिकसूत्रद्वयार्थः परामृश्यते। शास्त्रयोनित्वनिर्णयात् पूर्वं ''जन्माद्यस्य यतः'' इति सूत्रस्यानन्दवाक्यान्तविषयत्वकल्पनाऽसंभवाद् ''यतो वे'' त्यादिकारणवाक्यमात्रगम्यस्यैव ब्रह्मणो विवक्षणीयत्वाच्चात्र ''सर्वज्ञं सर्वशक्ती'' ति सगुणमात्रपरामर्शः। अनेन पूर्वपक्षनिर्देशः क्रियते। शास्त्रयोनिपदानुकर्षणलभ्यं साध्यमाह- ***वेदान्तशास्त्रादेवावगम्यत इति ***॥ तथा च ब्रह्म आनन्दादिनिर्विशेषरूपेण वेदान्तशास्त्रसमधिगम्यमिति योजना। हेतुनिर्देशं विना सूत्रेण न्यायस्वरूपं न प्रदर्शितं भवतीति हेतुं पृच्छति- ***कथमिति ***॥ कुत इत्यर्थः समन्वयादिति पदम्, उपक्रमोपसंहारादितात्पर्यग्राहकप्रमाणावगततात्पर्यविषयत्वादित्यर्थपरतया व्याचष्टे- ***सर्वेषु वेदान्तेष्विति ***॥ सर्वासु ब्रह्मविद्यासु। ***वाक्यानि***=कर्म-सृष्ट्युपासना- प्रपञ्चनिषेधपराणि वाक्यानि। *तात्पर्येण=उपक्रमाद्यवगततात्पर्येण। ***एतस्यार्थस्य***= प्रत्यगभिन्नब्रह्मस्वरूपार्थस्य। ***प्रतिपादकत्वेन समनुगतानि।** दृश्यन्त इति योजना। प्रत्यगभिन्नब्रह्मस्वरूप- प्रतिपादकत्वरूपतात्पर्यवन्ति सर्वाणि वाक्यानीति भावः। अनेन च पक्षे हेतुसमन्वयः समर्थितः अत्र 'तात्पर्येण समनुगतानी' ति वाक्येन तात्पर्यविषयत्वमेव

वाक्यजन्यज्ञानविषयत्वे तन्त्रम्, न तु तात्पर्यविषयसंसर्गत्वमिति सूच्यते, इति तत्त्वमस्यादिवाक्यानामखण्डार्थत्वं व्याख्यातम्। अत्र विवक्षितानि महावाक्यानि मुख्यानि "तत्त्वमसि" (छा) " प्रज्ञानं ब्रह्म" (ऐतरेय) "अयमात्मा सर्वानुभूः" (बृहदा) "ब्रह्म वेद ब्रह्मैव भवति" (मुण्डक) इति॥

ननु-अस्तु नाम वाक्यजन्यज्ञानविषयत्वे तात्पर्यविषयत्वमेव तन्त्रम्, एवमपि "तत्त्वमसी"ति वाक्यस्याखण्डार्थत्वं न संभवति। तथाहि-जीवब्रह्माभेदो हि न शास्त्रार्थः, "नाहं सर्वज्ञः" इत्यनुभवेन भेदसिद्ध्या प्रमाणसिद्धस्य तस्य बाधायोगात्, अबाधेनोपपत्तौ बाधकल्पनं हि न युक्तम्। ***एतेन***-जीवेश्वरौ, भिन्नौ, परस्परविरुद्धधर्माधिकरणत्वात्; दहनतुहिनवत्, इत्यनुमानमपि-व्याख्यातम्*। न च-अयं भेदो न तात्त्विकः, किन्तु कल्पित एवेति-वाच्यम्;भेदस्यापि षड्विधतात्पर्यलिङ्गोपेत "द्वा सुपर्णा" दिश्रुतिगम्यस्यातात्त्विकतायोगात्, एकतरबाधे च कर्तव्ये सखण्डवाक्यानां बहुत्वाद् '**विप्रतिषेधे भूयसां स्यात्** स्वधर्मत्वमि'ति न्यायेनाभेदबाध एव युक्तः॥

तथाहि-आथर्वणे "द्वा सुपर्णे" त्युपक्रमः "परमं साम्यमुपैती"त्युपसंहारः, " तयोरन्यः पिप्पलम्" "अनश्नन्नन्यः" इत्यन्यशब्दाभ्यासः, शास्त्रैकगम्येश्वरप्रतियोगिकभेदस्यापूर्वत्वम्, "पुण्य-पापे विधूये" ति फलम्, " अस्य महिमानमिति वीतशोकः" इति स्तुतिरूपोऽर्थवादः "अत्ति," "अनश्नन्नि"ति भेदे युक्तिश्च विद्यन्ते। अत्रोपक्रमे द्विशब्दो हि यदि भेदवाचको यदि वा द्वित्वसंख्यावाचकः, उभयथाऽपि भेदस्योपक्रमो वर्तते। एतेन-उपसंहारोऽपि व्याख्यातः; सादृश्यस्य भेदमन्तरेणानुपपत्तेः। पारम्यविशेषणन्तु बहुभिर्धर्मैः सादृश्यं गमयितुम्। 'अन्योऽन्यः * अन्यमि'त्यभ्यासोऽप्यन्यशब्दस्य भिन्नपरत्वाद् भेदविषय एव। एवं च षड्विधतात्पर्यलिङ्गोपेतत्वं भेदश्रुतेः सिद्धमेव॥

एतेन- अन्तर्यामिब्राह्मणमपि व्याख्यातम्; "वेत्थ नु त्वं गार्ग्ये" त्युपक्रमस्य, "एष त आत्माऽन्तर्याम्यमृतः" इत्युपसंहारस्य, "एष त आत्माऽन्तर्यामी"त्येकाविंशतिकृत्वोऽभ्यासस्य, अन्तर्यामित्वस्य प्रमाणान्तरानधिगततयाऽपूर्वत्वस्य, "स वै ब्रह्मवित्सर्वविदि"ति फलस्य, "तच्चेत्त्वं याज्ञवल्क्यसूत्रमविद्वांस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यती" ति निन्दारूपार्थवादस्य "यस्य पृथिवी न वेदे" त्युपपत्तेश्चान्तर्यामितात्त्विकतायां तात्पर्यग्राहकाणां विद्यमानत्वात्॥

"तत्त्वमसी" ति वाक्यन्तु न जीवब्रह्माभेदपरम्। तथाहि-सदेव सौम्येदमि" त्यादिसन्दर्भो नाद्वितीयब्रह्मपरः; "उत तमादेशमप्राक्ष्यः" "सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" "एतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसी" त्युपक्रम-मध्यपरामर्शोपसंहाराणां सविशेषब्रह्मपरत्वात्। न हि जीवनियमनानुकूलव्यापाररूपशासनकर्तृत्वं निर्विशेषे संभवति। नापि

प्रजाशब्दोदितानां जीवानां निर्विशेष ब्रह्मणश्च मूल-मूलिभाव: संभवति। नापि वा ''तत्सत्यमि''ति प्रपञ्च सत्यत्वावधारणं संबोध्य-संबोधकभावेन श्वेतकेतूद्दालकयोर्भेदप्रतिपादनावगतं जीवनानात्वं निर्विशेषात्मवादे युज्यते। अत: ''तत्त्वमसी''तिवाक्यं''यतो वा''''ब्रह्मणे त्वा महस आत्मानं युञ्जीते''ति श्रुत्यनुसारेण ''तस्मात् त्वमि'' ति वा, ''स कारणं करणाधिपाधिप:'' इति श्रुत्यनुसारेण 'तस्य त्वम्' इति वा, ''सन्मूला: सौम्येमा: प्रजा: सत्प्रतिष्ठा: इति श्रुत्यनुसारेण 'तस्मिंस्त्वम्' इति वा, अन्तर्यामिब्राह्मणानुसारेण शरीरशरीरिभावपरतया वा योजनीयम्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा यद्यपि कार्यस्वरूपाणां विशेषाकारेण कारणाद्भेदेन द्वैतिनां मते न संभवति; तथाऽपि तदवस्थाविशिष्टं कारणमेव कार्यमित्यारम्भणाधिकरणे निरूप्यमाणं कार्यकारणानन्यत्वं स्वीकृत्य ब्रह्मणि ज्ञात उपादानतया कार्यानुप्रविष्टो ब्रह्माकारो भवतीति सद्ब्रह्मण उपादानतानिरूपणपरं'' यथा मृत्पिण्डेने''त्यादिवाक्यमिति मन्तव्यम्। न च-''एकमेवाद्वितीयमि''ति वाक्यानुपपत्ति:; ''असिद्वितीयोऽनुचचार पाण्डव:'' इत्यत्रेव द्वितीयशब्दस्य सहायपरत्वेन''एके मुख्यान्य-केवला:'' इति कोशानुसारेणैकशब्दस्यान्यपरत्वाङ्गीकारेण चासहायत्वेनान्यत्वेन चैव ब्रह्मण: प्रतिपाद्यमानत्वात्। न च- ''तत्त्वमसी'' तिवाक्यस्य शरीर-शरीरिभावपरत्वे जीवशरीर: परमात्मेत्यर्थस्यैव विवक्षणीयत्वात् त्वंपदार्थस्य क्रियायामनन्वयाद् ''असी''ति मध्यमपुरुषप्रयोगानुपपत्तिरिति-वाच्यम्, युष्मच्छब्दसामानाधिकरण्यमात्रेण संबोध्यार्थपरत्वाभावेऽपि परम्परया क्रियान्वयमादायापि तदुपपत्ते:। विस्तृतं चैतत् पाराशर्यविजय इति तत एव द्रष्टव्यम्।

एतेन-''ब्रह्म वेद ब्रह्मैव भवती'' ति वाक्यमपि-*व्याख्यातम्*; ब्रह्मैवेत्येवकारो हि नावधारणार्थ:, ''इव वत्-वैवे'' त्येवकारस्यापीवपर्यायत्वात्। अन्यत्र सादृश्येनाभेदे 'सोऽयं देवदत्त:' इत्यत्रेव तात्पर्यानुसारेणाखण्डार्थाविवक्षायां त्ववधारणार्थोऽपि न विरोधी। एवं च सर्वेषामपि वेदान्तानां सद्वितीयब्रह्मण्येव तात्पर्याद् न तत्त्वमस्यादिवाक्यमखण्डार्थमित्यत आह- *तात्पर्येणेति*।।

अयं भाव:-न हि वेदान्तानां जीव-ब्रह्मभेदे तात्पर्यम, ''नाहं सर्वज्ञ:'' इत्यनुभवो ह्यन्त:करणावच्छिन्नचैतन्यस्य मायावच्छिन्नचैतन्यभेदमवगाहते, नतु शुद्धचैतन्यस्य विगलितान्त:-करणादिनिखिलोपाधिकचैतन्यभेदम्,इति जीव-ब्रह्मभेदे ''नाहं सर्वज्ञ:'' इति प्रत्यक्षं न प्रमाणम्। प्रत्यक्षं हि भेदं न वयं निषेधाम:, किन्तु तत्तात्त्विकत्वमेव। न हि प्रत्यक्षबाधमन्तराऽद्वितीयादिश्रुतिप्रामाण्यं सिद्ध्यतीत्यपच्छेदन्यायेन बाध्यमेव प्रत्यक्षमूरीकुर्म:। परीक्षितं हि प्रत्यक्षं न बाध्यं नापरीक्षितम् यथा च काम-संकल्प-दु:खादिकं नात्मधर्म:, किन्त्वन्त:करणधर्म:, तथा पूर्वमेव निरूपितमिति विगलितोपाधिशुद्धचैतन्ययोर्जीवब्रह्मणोर्विरुद्धधर्माधिकरणत्वाभावात्-''जीवेश्वरौ, भिन्नौ, विरुद्धधर्माधिकरणत्वात्'' इत्यनुमानमपि हेत्वसिद्धिदूषितं न प्रयोजकमिति बोध्यम्। अदुष्टत्वेऽपि वा तात्विकभेदस्य दृष्टान्तेऽदृष्टत्वेन साध्यवैकल्याद् भेदमात्रसाधने च सिद्धसाधनान्नाद्वैतविरोधीदमनुमानम्।

न च–''द्वा सुपर्णे''ति षड्विधतात्पर्यलिङ्गोपेतश्रुतिसिद्धस्य भेदस्य कल्पितत्वायोग इति–वाच्यम्; आथर्वणे प्रथममुण्डके ''कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती''ति शौनकप्रश्नानन्तरं ''द्वे विद्ये वेदितव्ये'' इति विद्याद्वयमवतार्य ऋग्वेदादिरूपामपरां विद्यामुक्त्वा, ''अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमश्रोत्रमवर्णमि'' त्यादिना परविद्याविषयत्वमक्षरस्य वर्णितम्। अक्षरशब्दस्तु ' अक्षरमम्बरान्तधृतेरि'' त्यत्र निर्गुणब्रह्मपरतया भगवत्पादैर्व्यवस्थापितः, इत्युप्रक्रमोऽभेदपरः। एवं द्वितीयमुण्डके ''पुरुष एवेदं विश्वं ब्रह्मैवेदं विश्वमिदं वरिष्ठमि''ति मध्येऽभेद एव परामृष्टः। तथा तृतीयमुण्डकेऽप्यन्ते परेऽव्यये सर्व एकी भवन्ति। स योह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवती '' त्यभेद एवोपसंहृतः, इत्युपक्रमपरामर्शोपसंहारैर्मुण्डकत्रयात्मिकाया उपनिषद ऐक्यपरत्वं निर्णीयते। एवं च यथा ''त्रीन् प्रयाजानिष्ट्वा, समानयते जुह्वामौपभृतमि''ति प्रयाजाङ्गविशेषं विधाय, 'अभिक्रामञ्जुहोती'ति विहितमभिक्रमणम्–''यो वै प्रयाजानां मिथुनं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते समिधो बह्वीरिव यजति तनूनपातमेकमिव मिथुनम्'' इत्यादिना ''यत्प्रयाजानिष्ट्वा हवींष्यभिधारयती'' ति पुनरपि प्रयाणधर्माम्नानात्संदशन्यायेन प्रयाजाङ्गमेव, अत एव ''तन्मध्यपतितस्तद्ग्रहणेन गृह्यते'' इति वैयाकरणपरिभाषा, एवं पूर्वोत्तराभेदवाक्याविरोधेनैव'' द्वा सुपर्णे''ति वाक्यस्य योजनीयतया व्यावहारिकभेदपरत्वमेवास्य वाक्यस्याङ्गीकरणीयम्, नतु तात्त्विकभेदपरत्वम्। ''तयोरन्यः'' ''अनश्नन्नयः'' इत्यादिकमपि न तात्त्विकभेदपरम्। एतेन–अन्तर्यामिब्राह्मणमपि व्याख्यातम्; 'आत्मेयेवोपासीते''ति सूत्रितब्रह्मविद्याविवरणरूपायां चतुरध्याय्यां''अनेन ह्येतत् सर्वं वेदे''त्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय, ''ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मी''त्युपक्रमेण षष्ठाध्यायान्ते मैत्रेयीब्राह्मणे ''यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्'' इत्याद्युपसंहारेण चाभेदपरत्वनिर्णये सति पूर्वोक्तरीत्या सन्दंशन्यायेनाभेदाविरोधेनैव नेयत्वात्। एतेन–''भेदव्यपदेशाच्चे''त्यादिसूत्राविरोधोऽपि–व्याख्यातः। ''अथातो ब्रह्मजिासे''ति निर्विशेषब्रह्मविचारोपक्रमेण ''अनावृत्तिः शब्दादि'' ति निगुर्णब्रह्मात्मभाव- प्रयुक्तानावृत्तिनिरूपणेनाभेदोपसंहारेण च सूत्राणामप्यद्वैत एवं तात्पर्यावगमात्।

एतेन-तत्त्वमसीति वाक्यमपि–व्याख्यातम्;''उत तमादेशः'' इत्यत्र ह्यादेशशब्दार्थ उपदेशमात्रगम्यत्वं निर्विशेषं एव संभवति। अत एव–''आचार्यवान् पुरुषो वेदे''त्युपसंहारोऽप्युपपद्यते। ''सदेव सौम्येदमग्र आसीदि'' त्यत्रापि निष्प्रपञ्चात्मतत्त्वमेवोपक्षिप्यते। अत्र हि सच्छब्दो न सत्ताश्रयतयेदंपदार्थे पर्यवसितः, किन्तु ब्रह्मणि;''ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः इति स्मृतेः'' सन्मूलाः सौम्ये'' ति सच्छब्देन ब्रह्मण एव परामर्शाच्च। न च–अयं सच्छब्दः सविशेषपर इति–वाच्यम्; ''सदेवेदमि''ति वाक्योपक्रमे ''एकमेवाद्वितीयमि''ति विशेषणेन निर्विशेषपरत्वावगमात्। सदेवेतीदंतादात्म्यं सद्रूपस्य ब्रह्मणो यत्प्रतिपादितम्, तत्-'इदं रजतमित्यादविव बाधायां सामानाधिकरण्येनैव गमनीयम्, इति तदेकवाक्यतानुसारेणैकपदस्यापि भेदशून्यपरतयैव व्याख्यानं युक्तम्, न तु भेदपरतया। एतेनाद्वितीयपदमपि

व्याख्यातम्। द्वितीयपदेन सहायविवक्षा न शक्त्या, किन्तु गौण्येति मुख्यार्थत्यागेन गौणार्थकल्पनं न युक्तम्। अस्तु वा द्वितीयपदस्य सहायार्थेऽपि मुख्यता, एवमपि प्रकृत एकपदैकवाक्यतया सजातीयशून्यपरतैवाऽऽस्थेया। "आत्मा वा इदमग्र आसीदि"ति श्रुत्यन्तरे सत्पदस्थान आत्मशब्दप्रयोगोऽप्यत एवोपपद्यते। एवं च 'सदेवेत्येवकारार्थप्राधान्येन "नेति नेती"ती निर्गुण सिद्धार्थकथनपूर्वकं प्रलयनिरूपणं प्रलयकालस्य तदाधेयसूक्ष्मप्रपञ्चस्य च वस्तुसत्तां निराकर्तुमेव। प्रलयोपक्षेपस्तु प्रपञ्चः कदाचित् सूक्ष्मावस्थः कदाचित् स्थूलावस्थ इत्यनेकविकारात्मकत्वादनृत इति ज्ञापनार्थः। यदाहुः-मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा। उपायः सोऽवताराय नास्ति भेदः कथंचन।।" इति।।

एतेन– वाचारम्भणादिश्रुतिरपि–व्याख्याता; अत एव-

"वस्त्वस्ति किं कुत्र चिदादिमध्यपर्यन्तहीनं सततैकरूपम्।
यच्चान्यथात्वं द्विज याति भूयो न तत्तथा तस्य कुतो हि तत्त्वम्।।

मही घटत्वं घटतः कपालिका कपालिका चूर्णरजस्ततोऽणुः।
जनैः स्वकर्मस्तिमितात्मबोधैरालक्ष्यते ब्रूहि किमत्र वस्तु।।

सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत्"।

इत्यादिविष्णुपुराणवचनान्युपपद्यन्ते। मृदादिदृष्टान्तास्तूपादानस्वरूपे ज्ञाते तदात्मनोपादेयं ज्ञातं भवतीत्यभिप्रायाः। एवं चोपक्रमे तावदुपदेशैकगम्यं निष्प्रपञ्चात्मतत्त्वं प्रतिपादतिमिति सिद्धम्; एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अन्यथाऽनुपपत्तेः। " अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी" ति मध्यपरामर्शोऽपि जीव–परमात्मनोरभेदस्यैव। सगुणवाक्यान्यप्यध्यारोपापवादन्यायेन निष्प्रपञ्चात्म-पराण्येव। "सन्मूलाः" इति तु व्यावहारिकभेदेनोपपद्यते।। *एतेन*– " तत्सत्यमि"ति सामानाधिकरण्यमपि– * व्याख्यातम्*; 'इदं रजतमि' त्यत्रेव बाधयामेवेदं सामानाधिकरण्यमित्यङ्गीकारात्। एवं च तत्त्वमसीति वाक्यं जीवब्रह्माभेदपरतयैव व्याख्येयम्।

"तस्मै त्वमि"त्यादिविवरणे हि त्वंपदार्थस्यैकदेशस्यासिपदेनान्वयासंभवः। *एतेन*–शरीराशरीरिभावेन सामानाधिकरण्यमपि– *परास्तम्*; न हि शरीरवाचकानां पदानां शरीरिपर्यन्तत्वं प्रमाणान्तरसिद्धम्, सिद्धावपि तस्य नियमस्य शरीरवाचकानां विशेषणत्व एव प्रवृत्तिः ; न तु विशेष्यत्वे; 'शरीरं नष्टमि'त्यत्रापि शरीरिणो ग्रहणप्रसङ्गात्, 'तत्त्वमसी" त्यत्र तु शरीरवाचकं त्वमिति पदं न विशेषणम्; आख्यातसामानाधिकरण्यासंभवेनासीति मध्यमपुरुषैकवचनासाधुताप्रसङ्गात्। न हि परम्परया

क्रियान्वयेऽपि युष्मत्पदसामानाधिकररण्यमात्रेण मध्यमपुरुषप्रयोगः? 'त्वमहमस्मि' इत्यत्रापि तदापत्तेः। एवं च जीवब्रह्माभेदपरत्वमेवोक्तवाक्यस्याङ्गीकरणीयम्, शुद्धचैतन्यपरत्वेऽपि त्वंपदस्य मध्यमपुरुषप्रयोगोपपत्तिस्तु सिद्धान्ते वाच्यार्थान्वयमादायोपपादनीयम्। शक्यार्थमादाय खलु ''गङ्गायां घोषः'' इत्यत्र गङ्गापदाट्टाबुपपत्तिः संपद्यते। सर्वथा च ''तत्त्वमसी'' ति वाक्यम्,, -''सदेव सौम्येदमग्र आसीदि'' त्युपक्रमेण, ''त्त्वमसी'' त्युपसंहारेण, ''तत्त्वमसी''ति नवकृत्वोऽभ्यासेन, ''येनाश्रुतं श्रुतं भवती'' त्यर्थवादेन, तप्तलोहपरश्वादिदृष्टान्तपूर्वकयोपपत्त्या, ''आचार्यवान्पुरुषो वेदे'' ति फलवचनेन च जीवब्रह्माभेदपरिमिति सिद्धम्। शब्दान्तरादिकं तु कर्मभेदस्यैव साधकम्, न तु ब्रह्मभेदस्य। तथा च तत्त्वमस्यादिवाक्यस्याखण्डार्थत्वे नानुपपत्तिलेशोऽपीति सूचयन् ''सदेवे'' त्याद्युपक्रमवाक्यमात्रमत्रानु-सन्धत्तेसदेवेति सदासीत्। यद् वस्तुगत्यैकमेवाद्वितीयम्-स्वगतधर्मशून्यम्, विजातीयभेदरहितम्, सजातीयभेदरहितं चेति सजातीय- विजातीय-स्वगतभेदशून्यं ब्रह्मैकमेव पारमार्थिकमित्युपक्रमः। अत्रोपक्रमवाक्योक्तं सत्तादात्म्यं बाधायां सामानाधिकरण्यमेवेत्युपसंहारवाक्येन-''एतदात्म्यमिदं सर्वमि'' त्येनेनापि बोध्यते। अनेन हि सर्वस्य प्रपञ्चस्य सद्रूपात्मस्वरूपातिरेकेण स्वरूपान्तरं नास्तीति बोधात् शुक्तिव्यतिरेकेण रजताभाववद् ब्रह्मव्यतिरेकेण प्रपञ्चाभावज्ञापनाद् अध्यारोपापवादन्यायेनैव सर्वाणि वेदान्तवाक्यानि प्रवृत्तानीति विज्ञायत इति प्रत्यगभिन्नं ब्रह्मैव वेदान्ततात्पर्यविषय इति भावः। न केवलं तत्त्वमसीति वाक्यम्, किन्तु '' प्रज्ञानं ब्रह्मे''ति वाक्यमपि तादृशमेवेति सूचनार्थं तदीयमत्युपक्रमवाक्यमात्रमनुसन्धत्ते- *आत्मा वेति*।। अत्रापि पूर्ववद् इदंशब्दविशेषणत्वेनेदंतादात्म्यापन्न आत्मैवाग्र आसीदित्येव योजनस्य विवक्षितत्वादध्यारोपेणोपक्रमः, ''नान्यत्किंचनमिषत्'' इतीतरप्रपञ्चनिषेधपुरः सरः सर्वस्य ब्रह्मात्मत्वोपसंहारपूर्वं प्रवृत्तस्य ''प्रज्ञानं ब्रह्मे''ति वाक्यास्याद्वितीयब्रह्मपरतायां गमक इति निष्कर्षः। बृहदारण्यकद्वितीयाध्यायगतम्-''अयमात्मा ब्रह्म सर्वानुभूरि''ति वाक्यमपि तादृशमेवेत्यपि सूचनार्थ तत्प्रथमाध्यायगतं ''नैवेह किंचनाग्र आसीत्, मृत्युनैवेदमावृतमासीत्'' इत्युपक्रमवाक्यं मनसि निधाय तदेकवाक्यतापन्नमुपसंहारवाक्यमात्रमनुसन्धत्ते- ***तदेतदिति***।। इदमुपसंहारवाक्यम्। मुण्डकोपनिषदोऽप्यद्वैत एव स्वारस्यमिति निरूपणेन ''ब्रह्मैव सन् ब्रह्माप्येती'' ति वाक्यस्य प्रत्यगभिन्नब्रह्मपारमार्थिकताबोधन एव स्वारस्यामिति वर्णयितुम्- *अथ परा यया तदक्षरमधिगम्यते, यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः'' इति निर्विशेषोपक्रमेण प्रवृत्तम्, विद्वान्नामरूपाद्विमुक्तः '' इति प्रपञ्चमिथ्यात्वोपसंहारेण च प्रवृत्तं ''ब्रह्मा वेद ब्रह्मैव भवती''ति वाक्यन्तु तृतीयमुण्डकस्य ''द्वा सुवर्णा सयुजा सखाया'' इति भेदोपक्रमेण प्रवृत्तत्वेऽपि पूर्वोक्तप्रकारेण नाद्वैतविरोधीति ज्ञापयितुमुपक्रमोप-संहारानुगुणं मध्यपरामर्शमत्रानुसन्धत्ते- *ब्रह्मैवेदमिति*।। आदिपदेन ''सत्यं ज्ञानमि'' त्याद्युपक्रमादिवाक्यानां परामर्शः। अत्र भाष्यकाराः कुत्रचनोपक्रमवाक्यम्, कुत्रचनोपक्रमवाक्यम्,

कुत्रचन मध्यतनवाक्यं चानुसन्दधाना उपसंहारादिवाक्यानि स्वयं संग्रहणीयानि मन्यन्त, इति तान्यपि यथासंभवं संगृहीतानि। तदेवं सूत्रार्थवर्णनव्याजेन ब्रह्मणि वेदान्तानां तात्पर्यवर्णनेन ब्रह्ममात्रविवक्षेति सूचनात् कार्यार्थतया ब्रह्मणो वेदान्तेषु परामर्श इति पूर्वपक्षानवसरोऽप्यर्थसिद्ध इत्याह– *न च तद्गतानामिति*।। तात्पर्यविषयार्थबोधकत्वमेव वाक्यानां प्रामाण्यप्रयोजकम्, न तु क्रियार्थत्वम्। अर्थवादानामपि तात्पर्यविषयप्राशस्त्यबोधकत्वेनैव प्रामाण्यम्। विधिना तु सहार्थवादानां वाक्यैकवाक्यत्वमेव, न तु पदैकवाक्यत्वम्; तथाऽपि सत्यामेव परस्परापेक्षायां वाक्यैकवाक्यत्वस्य युक्तत्वाद् वेदान्तवाक्यानान्तु स्वरूपचैतन्यबोधनमात्रेण निराकाङ्क्षत्वाद् न वाक्यान्तरैकवाक्यता सार्थक्यार्थमपेक्षिता, इति न क्रियासम्बन्धः कल्पनीय इति भावेनाह– *अर्थान्तरकल्पनेति*।। प्रयोजनान्तरकल्पनेत्यर्थः। अर्थवादानां प्राशस्त्यजनकत्वेनैव न सप्रयोजनत्वम् किन्तु प्रवर्तकत्वेनापीति प्रयोजनान्तरं कल्प्यते, न त्वत्र तथा प्रयोजनान्तरं कल्पनीयमिति भावः। *ननु* तत्त्वमस्यादिवाक्यानां स्वरूपचैतन्यमात्रपरत्वं लक्षणयैव, न तु शक्त्येति खलु भवतां मतम्। तत्र च श्रुतहान्यश्रुतकल्पना प्रसज्यते। कार्यविधिशेषत्वे तु वाच्यार्थकल्पनयैव निर्वाहान्न श्रुतहान्यश्रुतकल्पने इति चेत्, केयं श्रुतहान्यश्रुतकल्पना नाम? प्रतीयमानार्थपरित्यागेनार्थान्तकल्पनमिति चेत्, वेदान्तार्थवादत्वपक्षेऽपि समानमेतत्। तत्रापि हि प्राशस्त्यलक्षणैव विवक्षिता। *ननु* तात्पर्यविषयत्वात् प्राशस्त्यस्य न लक्षणा दोषः, किन्तु गुण इति चेत्, आयातं मार्गेण; यतस्तात्पर्यविषयार्थबोधकत्वे न श्रुतहानिर्न वाऽश्रुतकल्पना, तात्पर्यविषयाबोधन एव श्रुतहानिरश्रुतकल्पना च दोष इति स्वीकारात्। किमतः? इदमतो भवति, यद् अद्वितीयस्वरूपचैतन्य एव वेदान्तानां तात्पर्यस्यावगमाद् अन्यत्र चातात्पर्यावगमात् पूर्वपक्षिणामेव मते श्रुतिहानिरश्रुतकल्पना च, नास्माकं मते, इति श्रुतहान्यादिवारणं कामयतां सर्वेषामस्मन्मतादरणमेव युक्तमित्यभिप्रायेणाह– ***श्रुतहान्यश्रुतकल्पनाप्रसङ्गादिति***।। अन्यथेत्यादिः। कर्त्रादिस्तावकत्वेऽपि तात्पर्याविशेषात् कथमस्मन्मते श्रुतहान्यादिः, किन्त्वप्रसिद्धवाक्यार्थव्यवस्थापनाद् भवतामेवेति शङ्कातत्समाधाने आह– ***नचेति***।। नचावसीयत इत्यन्वयः। कुत इत्यत **आह**– ***तत्केनेति****तत्=विद्याकाले*कः=कर्ता *केन=करणेन *कम्=विषयं पश्येत्? इति श्रुतेरर्थः। अनेन च ज्ञानकाले कर्ता, करणम्, विषयः, कर्म वा नास्तीति कर्त्रादिनिराकरणमेव ज्ञानकार्यं गम्यते, न तु कर्त्रादिस्तुतिः, इति वेदान्तानामात्मज्ञानपराणां कर्तृस्तावकतयाऽन्वयो बाधित एव, इति स्वरूपचैतन्यपरतापक्ष एव समुचित इति भावः। *ननु* एवमपि सिद्धब्रह्मबोधकत्वे वेदान्तानामनुवादत्वापत्तिरित्याशङ्क्याह– ***न च परिनिष्ठितवस्तुस्वरूपत्वेऽपीति***।। अत्रापिशब्दप्रयोगाद् न प्रमाणान्तरवेद्यत्वं परिनिष्ठितत्वप्रयुक्तम्, किन्तु वस्तुस्वभावप्रयुक्तमिति सूच्यते। तेन च वेदान्ताः, प्रमाणान्तरसापेक्षाः, भूतार्थविषयवाक्यत्वात्, इति, पूर्वपक्षिणामनुमानेऽप्रयोजकत्वशङ्का प्रदर्शिता भवति। सत्यं लौकिकेषु वाक्येषु भूतार्थपरेषु प्रमाणान्तरसापेक्षत्वं दृश्यते; परन्तु पौरुषेयत्वप्रयुक्तमेव तत् न

भूतार्थवाक्यत्वप्रयुक्तम्, पौरुषेयेष्वेव हि वाक्येषु ''अर्थंबुद्ध्वा शब्दरचने'' ति न्यायात् प्रमाणन्तरापेक्षासंभवः। तथा च भूतार्थत्वेऽपि वेदान्तानामपौरुषेयाणां न प्रमाणान्तरापेक्षत्वप्रसङ्गः; अन्यथा लौकिकेषु पाकादिक्रियापरेष्वपि वाक्येषु प्रमाणान्तरापेक्षत्वं वर्तते, इति क्रियार्थत्वोरीकरणेऽपि प्रमाणान्तरसापेक्षत्वमापद्यते, इति ब्रह्म मानान्तरायोग्यत्वाद् न प्रमााणान्तरगम्यं भवति। ततश्च तत्पराणां वेदान्तवाक्यानामपि नानुवादकत्वमिति भावः॥

ननु जन्माद्यधिकरणे जगत्कारणं ब्रह्मानुमानादिप्रमाणान्तरस्यापि विषय इत्यनुपदमेव भवद्भिर्वर्णितम्, कथमिदानीं ब्रह्मणः प्रमाणान्तराविषयत्वमुच्यते?. इति पूर्वापरविरोधापत्तिरित्याशङ्क्य समाधत्ते- ***तत्वमसीति ब्रह्मात्मभावस्येति***॥ मुख्यतात्पर्यविषये ब्रह्मणि प्रमाणान्तराविषयत्वमत्रोक्तम्, पूर्व त्ववान्तरतात्पर्यविषय एवानुमानावसरः प्रतिपादितः, इति न पूर्वापरविरोध इति भावः। यथा प्रत्यगभिन्ने महावाक्यार्थे नानुमानादिप्रमाणावसरः, तथा जन्माद्यधिकरण एव प्रपञ्चितम्। ***तत्त्वमसीति***॥ तत्त्वमसीतिवाक्यगम्यप्रत्यगभिन्नब्रह्मस्वरूपस्येत्यर्थः। ***शास्त्रमन्तरेणेति***॥ वेदान्तशास्त्रामतिरिच्य शास्त्रान्तरेणानवगम्यत्वादित्यर्थः॥ अनेन च मानान्तरायोग्यत्वं ब्रह्मणो विशदीक्रियते॥

ब्रह्मणो निष्प्रयोजनत्वान्न स्वरूपेण विना क्रियासम्बन्धं वेदार्थत्वसंभव इति शङ्कान्तरं पूर्वतनमनुवदति- ***यत्त्विति***॥ ब्रह्मणः प्रवृत्ति-निवृत्त्यन्यतरद्वारेति च शेषः। तथा च ब्रह्मणः प्रवृत्ति-निवृत्त्यन्यतरद्वारा हेयोपादेयरहितत्वाद् उपदेशानार्थक्यमिति योजना। प्रवर्तकवाक्यानां हि प्रवर्तकत्वमात्रेण न प्रामाण्यम्; प्रतारकविधिवाक्यानामपि प्रामाण्यापत्तेः, किन्तु सफलप्रवृत्तिजनकत्वेन। तथा च प्रवृत्तिप्रयोजनकत्वमेव प्रामाण्यप्रयोजकम्? अथवा सप्रयोजनत्वमेव विधिवाक्यानां प्रामाण्यप्रयोजकमिति स्थिते, वयं मन्यामहे-सप्रयोजनत्वमेव वाक्यानां प्रामाण्यप्रयोजकम्। तच्च केवलज्ञानद्वारकम्, अथवा ज्ञानप्रवृत्त्युभयद्वारकमिति तु विशेषो न विवक्ष्यते, इति वेदान्तवाक्यानामपि ज्ञानद्वारा विनैव प्रवृतिं सकलसंसारबन्धनिबर्हणत्वेन सप्रयोजनत्वान्न प्रामाण्यमविरुद्धमिति भावेन समाधत्ते- *नैष दोष इति*॥ *एषः=हेयोपादेयाभावः, *न दोषः*, न दूषणम्; किन्तु भूषणमेवेति भावः। तमेव भूषणप्रकारं दर्शयति- ***हेयोपादेयशून्येति***॥ *अवगमादेव=विना प्रवृत्तिमित्येवकारेण प्रवृत्तिर्वार्यते। परम्परया सप्रयोजनस्यापि सप्रयोजनत्वादेव प्रामाण्यात् साक्षात् सप्रयोजनस्य प्रामाण्यमयत्नसिद्धम् इति हेयोपादेयशून्यत्वं भूषणमेव, नतु दूषणमिति भावः। *ननु* ''अथ य एषोऽन्तरादित्ये हिरण्मयश्मश्रुः'' इत्यादिसगुणवाक्यानामपि ब्रह्मस्वरूपमात्रे पर्यवसानेनापि वेदान्तप्रामांण्यसंभवात् तेषामपि न क्रियाशेषतयाऽन्वयोपपत्तिः, इत्यन्तर्यामिब्राह्मणादिसिद्धं शरीर-शरीरिभावादिकं सत्यकामत्वादिकं वा सर्वं पारमार्थिकं स्यात्, इति नाद्वितीयब्रह्मसिद्धिरित्याशङ्क्याह- ***देवतादिप्रतिपादनस्य त्विति***॥ उपासनावाक्यानां स्वरूपवाक्यानां च

विरोधे कल्पितेनापि गुणेनोपसनोपपत्त्योभयाविरोधेनोपपत्त्यर्थमुपासनावाक्यानि कल्पितगुणपराणीत्यङ्गीकारात्, तेषामुपास्यब्रह्मपरतैव युक्ता; तावता स्वरूपचैतन्यवाक्यानामपि तु नाप्रामाण्यम्; न वोपासनाविधिशेषतयैवान्वय इत्यभिप्रायः सगुणवाक्यानामपि निर्गुणवाक्यशेषत्वस्य स्वीकाराद् विरोधो न हि प्रसज्यत इति भावः। तदिदमाह– ***न विरोध इति*।।** *ननु* विनिगमनाविरहात् स्वरूपचैतन्यपराणामेवोपासनाविधिशेषतयाऽन्वयेन विरोधः परिह्रियताम्, किमिति सगुणवाक्यानामेव निर्गुणवाक्यशेषतयाऽन्वयेन विरोधः परिह्रियते? इत्याशङ्क्याह– ***न तु तथेति*** तथा= सगुणवाक्यानां निर्गुणवाक्यशेष त्ववदित्यर्थः। ब्रह्मणः=स्वरूपचैतन्यस्य निर्गुणवाक्याधिगम्यस्येत्यर्थः। *उपासनाविधिशेषत्वम्*।। उपास्यविशेषांशोपस्थापनद्वारेणेति शेषः। न चात्र विनिगमनाविरहः; यतो ब्रह्मण उपासनाविधिशेषता बाधितेत्याह– ***एकत्व इति*।।** निर्विशेषं प्रत्यगभिन्नं वा चैतन्यं ज्ञानमात्रेण सर्वकारकोपमर्दकम्, इति तज्ज्ञानदशायां नोपासक उपासनोपास्यं वा, इति नोपासनायां प्रत्यगभिन्नस्य स्वरूपचैतन्यस्यान्वयः, इति बाधितत्वान्न विनिगमनाविरह इति भावः। *ननु* ब्रह्मज्ञानदशायामुपासनाविधानं न विवक्ष्यते, येन तदानीमुपास्योपासकादिभेदनिर्वाहोऽनुपपन्नः, किन्तु ज्ञातस्य तस्य कालान्तर उपासनया साकमन्वयेनोपास्यता स्वीक्रियतामित्यत आह– ***ह्येकत्वविज्ञानेनेति*।।** तथा चोपास्योपासकादिभेदसम्बन्धायोग्ये ब्रह्मणि नोपासनाक्रियाशेषत्वं संभवदुक्तिकम्, इति प्रत्यगभिन्नस्वरूपबोधेनैव वेदान्तानां पर्यवसानमिति निष्कर्षः। *ननु* प्रवृत्त्ययोग्यस्वरूपपरं वाक्यं कुत्रापि वेदे न दृष्टम्, इति कथं वेदान्तानामपि वैदिकानां तादृशस्वरूपपरत्वमित्याशङ्कामनूद्य परिहरति– ***यद्यपीति*।।** क्रियार्थत्वं वेदप्रामाण्यव्यापकमिति शङ्काहृदयम्। सप्रयोजनत्वेमेव वेदप्रामाण्यव्यापकम्,, नतु क्रियार्थत्वम्। तच्च वेदान्तेष्वविशिष्टमित्युक्तमेव स्मारयन् समाधानमनुसन्धत्ते– ***तथापीति*।।** यत्र यत्र वेदार्थत्वम्, तत्र तत्र क्रियार्थत्वमिति नायमुत्सर्गः। पक्ष एव हि व्यभिचारेणोत्सर्गत्वसाधनं न युक्तम्, यावदन्यत्र व्यभिचारो न प्रदर्श्यते। तथा च वेदान्ताः, क्रियार्थाः, वेदवाक्यत्वादित्यनुमानाद् वेदान्तवाक्यानामपि क्रियार्थत्वमेवोरीकर्तव्यम्; अन्यथा वेदवाक्यत्वमेव न स्यादिति वेदान्तानामप्रामाण्यमापद्येतेत्याशङ्कायामाह– ***नचानुमानगम्यमिति*।।** स्वतः प्रामाण्याद् अनुमानाधीनं न वेदप्रामाण्यमिति लौकिकवाक्यदृष्टान्तेन प्रमाणान्तरसापेक्षत्वमिव वैदिकवाक्यैकदेशदृष्टान्तेन क्रियार्थत्वसाधनमपि न संभवदुक्तिकम्। सति चैवं तात्पर्यविषयार्थबोधकत्वेनैव वेदप्रामाण्याद् वेदान्तानां प्रत्यग्ब्रह्मपरत्वमेवोपपन्नम्, न जीवस्तावकत्वेनार्थवादत्वम्, ब्रह्मत्वेन जीवोपासनाविधिपरत्वं वा, इति न ब्रह्मणः शास्त्राप्रमाणकत्वम्। तथा च शास्त्रयोनित्वाद् जगत्कारणत्वद्वारा लक्षितं ब्रह्मैव जिज्ञास्यमिति न दोष इति निष्कर्षः। वर्णकार्थमुपसंहरति– ***तस्मादिति*।।** वेदान्तानामपि विधिवाक्यवत् सप्रयोजनत्वेन विनाऽपि विधिशेषत्वं प्रामाण्यसंभवादित्यर्थः। ***ब्रह्मणः*।।** केवलस्येति शेषः। शास्त्रप्रमाणकत्व शास्त्रयोनित्वं सिद्धिमिति योजना।।

अत्र सर्वाणि निर्विशेषवाक्यानि विषय:। तेषां निर्विशेषबोधकत्वं भवति, न वेति संशय:। उपक्रमादितात्पर्यग्राहकसत्त्वाद् भावकोटे:, आम्नायस्य क्रियार्थत्वानियमाद्भावकोटेश्चोपस्थितिरिति संशयोपपत्ति:। आम्नायस्य क्रियार्थत्वनियमात्, सिद्धार्थत्वे वेदान्तानामनुवादकत्वापत्ते:, स्वरूपमात्रबोधे हेयोपादेयराहित्यात् चैतन्यमात्रबोधकत्वं न युक्तमिति पूर्वपक्ष:। आम्नायस्य सप्रयोजनत्वनियमेऽपि क्रियार्थत्वस्यानियमात्, सिद्धार्थत्वेऽपि वेदान्तानामपौरुषेयत्वेन प्रामाण्यसंभवात्, हेयोपादेयराहित्येऽपि ज्ञानमात्रेण पुरुषार्थोपयोगित्वाच्च सिद्धेऽपि स्वरूपचैतन्ये वेदान्ता: प्रमाणमिति सिद्धान्त:। पूर्वाधिकरणसिद्धशास्त्रयोनित्वस्याक्षेप-समाधानाभ्यां व्यवस्थापनादाक्षेपसङ्गतिरनन्तरसंगति:। अध्याया-दिसङ्गतयस्तु पूर्ववत्। तत्, शास्त्रयोनि, उपक्रमाद्यवगतशास्त्रतात्पर्यविषयत्वादिति सूत्रार्थ:। "*सर्वेषु वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानी" ति* भाष्येणोक्तविधं समन्वयस्वरूपमेव बोध्यते।।

इति ब्रह्मसूत्राशङ्करभाष्यटिप्पणे प्रदीपे वेदान्तानां ब्रह्मणि समन्वयनिरूपणं समाप्तम्।

एतावता वेदान्तवाक्यार्थवादत्वाक्षेप:, जीवस्य ब्रह्मत्वेनारोपितेनोपास्यतापक्षो वा सिद्धेऽपि वाक्यानां बोधकत्वमूरीकृत्य पूर्वपक्षिणोपक्षिप्तो निवारित:, साम्प्रतं तु आचार्यदेशीयानां सिद्धसंगतिग्रहासंभवेन कार्यपराणामेव वाक्यानां प्रामाण्यं लोकवेदयोरुभयोरपीति पक्षमनुसृत्य स्वतन्त्रब्रह्मोपासनं मोक्षप्रयोजनं वेदान्तेषु विधीयते। निर्विशेषचैतन्यस्वरूपबोधकानि तु वेदान्तवाक्यान्युपास्यविशेषसमर्पणविधयोपासना-विधिपराण्येवेति मतमनुसृत्य पूर्वपक्षमुत्थापयति- ***अत्रापर इति***।। आचार्यदेशीयत्वादेव प्रत्यगभिन्नं ब्रह्म सत्यमेव मन्यते, परन्तु न तज्ज्ञानमात्रेण मुक्ति:, किन्तूपासनादेवेति भगवत्पादसिद्धान्ताद्विशेष:। तथा च निर्गुणोपासनान्मुक्तिरिति पूर्वपक्षे, निर्गुणसाक्षात्कारादेव मुक्तिरिति सिद्धान्ते च प्रयोजनभेदोऽपि निरूपितप्राय: तथा च यत्रोपासनाविधिर्न दृश्यते, तत्रापि तत्कल्पनं कर्तव्यमिति पूर्वपक्षहृदयम्। एतन्मते हि जीव-ब्रह्मणोरभेद इव भेदोऽपि वर्तते, इति भेदाभेदवादस्वीकाराद् न ज्ञानमात्रात् क्रिया-कारकादिनिवृत्ति:, इति वेदान्तविज्ञातस्यापि निर्गुणस्योपास्यत्वं न विरुद्धम्। तथाचात्रापरे प्रत्यवतिष्ठन्त इति शास्त्रयोनित्वाक्षेपेण न वर्णकान्तरमिदम्, किन्तु "तत्तु समन्वयादि"ति सूत्रस्य योजनान्तरपरं वृत्तिकारमतमेव निरसनार्थमनूद्यते; यथा आनन्दमयाधिकरणे, इति पूर्वपक्षनिरूपणावसरे पूर्वमुपक्षिप्ता एव युक्तयोऽत्रापि पुनरुक्ताश्चेदपि न पौनरुक्त्यम्। यतोऽत्र विशदरूपेण ता एव युक्तय उपक्षिप्यन्ते विशदरूपेण च सम्यग् निरसनार्थमिति वस्तुस्थिति:। तमिमं भावं सूचयन् वृत्तिकाराणां मतमुपक्षिपति- ***यद्यपि शास्त्रप्रमाणकमिति***।। तथा चानेन विवरणेन शास्त्रप्रमाणकत्वमाक्षिप्यते, तस्याङ्गीकारादिति नास्य वर्णकान्तरत्वमिति भाव:। *ब्रह्म*=निर्विशेषमेव ब्रह्मेत्यर्थ:। शास्त्रप्रमाणकत्वे समानेऽपि नोपास्यता तस्येति नेदमङ्गीकारयोग्यमिति वृत्तिकारमतस्य

स्वमताद्विशेषमाह- ***प्रतिपत्तिविधिविषतयैवेति***॥ उपास्यतयैवेत्यर्थः। *शास्त्रेण= निर्विशेषबोधकवाक्यजातेन। उपासनाप्रकरणपठितानां तु नोपास्यस्वरूपपरत्वं विप्रतिपन्नमिति न सगुणवाक्यशेषतयैव निर्गुणवाक्यानामप्यन्वय इति भावः। तथा च निर्गुण ब्रह्मोपास्यतयैव वेदान्तप्रतिपाद्यम्, उपासनाविधिपरोपक्रमादिलिङ्गकतात्पर्यविषयत्वात्, इति सूत्रार्थो विवक्षितः। *ननु* वेदान्तानां निर्विशेषोपासनाविधिपरत्वे निर्विशेषस्य प्रमाणान्तरेणाप्रसिद्धस्यापि बोधनमावश्यकमित्युभयविधाने वाक्यभेदाद् निर्विशेषं न प्रामाणिकम्, न वोपासनं विवक्षितमिति वक्तव्यमिति कथं निर्विशेषोपासनाविधिरिति? अत आह- ***यथेति***॥ विधिवाक्यानि हि प्रमाणान्तरप्रसिद्धप्रतिपादकार्थमादाय तत्साधनत्वमात्रं तत्साध्यत्वमात्रं वा कानिचन निरूपयन्ति, कानिचन तु प्रातिपदिकार्थस्य प्रमाणान्तराप्रसिद्धत्वे तत्स्वरूपतत्साधनत्वाद्युभयसाधकानि दृश्यन्ते, यथा ''व्रीहीन् प्रोक्षति, ''दध्ना जुहोती'' त्यादौ दध्यादीनां प्रमाणान्तरप्रसिद्धानां साधनत्वादिमात्रं विवक्ष्यते, ''अध्वर्युं वृणीते,'' ''यूपं तक्षत्यष्टाश्रीकरोति,'' ''अग्नीनादधीत'' त्यादिवचनैस्तु दृष्टादृष्टोभयरूपाध्वर्य्वादिस्वरूपं तेषां वरणादिसंस्कार्यत्वमुभयं च बोध्यते। तत्र च समभिव्याहारादिना पदार्थनिर्णयोऽपि क्रियत इति वस्तुस्थितिः। सति चैवं तेन न्यायेन सत्यज्ञानादिवाक्यान्युपासनाविधिपराण्यपि ब्रह्मपदार्थमपि प्रमाणान्तरप्रसिद्धं सत्यज्ञानादिपदसमभिव्याहारादिना बोधयन्तीति न कोऽपि विरोध इत्यभिप्रायः। ***यूपाहवनीयादीनीति***॥ ''यूपे पशुं बध्नाति'' इत्यत्र बन्धनाधिकरणतया निर्दिश्यमानो यूपपदार्थः, ''यदाहवनीये जुहोती'' त्यत्र होमाधिकरणतया निर्दिश्यमान आहवनीयपदार्थः, ''ऐन्द्रं दधी'' त्यादिस्थले दध्यादिद्रव्योद्देश्यतया बोधितेन्द्रपदार्थश्च न लौकिकः। न हि स्तम्भमात्रं यूपपदार्थः, किन्तु संस्कृतस्तम्भविशेषः, एवमग्निसामान्यं नाहवनीयपदार्थः, किन्तु संस्कृताग्निविशेषः, इति यूपादिसिद्धपदार्था दृष्टादृष्टोभयरूपास्त-त्तत्संस्कारविधायकानां वाक्यानां ''यूपं तक्षती'' त्यादीनां पर्यालोचनेन निर्णेयाः। तत्र च यूपाहवनीयादिपदार्थाप्रसिद्धावपि संस्कारविध्यन्यथाऽनुपपत्त्या संस्कृतस्तम्भविशेषादिकमेव तदर्थ इति निर्णीयत इति वस्तुस्थितिः। तत्र यूपपदार्थो दृष्टादृष्टरूपः, आहवनीयस्तु केवलादृष्टरूपः, इन्द्रादिदेवतास्वरूपमपि तु तादृशमेव। अत एव ''न देवताग्निक्रियमदृष्टार्थत्वादि'' त्याहवनीय-देवतयोः प्रतिनिधिनिरास उपपद्यते। अदृष्टरूपमपि देवतादिस्वरूपं ''वज्रहस्तः पुरन्दरः'' इति वाक्यगतगुणविशेषसमालोचनेन तादृशगुणविशिष्टः कश्चनादृष्टः पुरुषविशेष इति निर्णीयत इति वेदान्तिनो मन्यन्ते। अतस्तेषामलौकिकत्वमिति भावः। *विधिशेषतया=''यूपं तक्षती'' त्यादिविधिशेषतया। *शास्त्रेण तक्षणादिविधिपरेणैव शास्त्रेण *ननु* किमिति वेदान्तानां ब्रह्मोपासनाविधिपरत्वमङ्गीकर्तव्यम्? कुतो वा ज्ञानमात्रेण न पर्यवसानम्? इत्याशयेन शङ्कते- ***कुत एतदिति***॥ उपासनाविधिशेषत्वं ब्रह्मणः कुत इत्यर्थः। समाधत्ते- ***प्रवृत्तिनिवृत्तिप्रयोजनत्वादिति***॥ शास्त्रत्वं हि प्रवृत्ति-निवृत्त्यन्यतरप्रयोजनकवाक्यत्वमेव। तद्यदि वेदान्तानां प्रवृत्तिनिवृत्त्यनुपयोगित्वम्, तर्हि शास्त्रत्वमेव न स्यात्।

शास्त्रयोनित्वादिति च सूत्रकारः शास्त्रत्वं वेदान्तानां सूत्रयन् विधिपरतयैव प्रामाण्यमभिप्रैतीति शास्त्रत्वान्यथानुपपत्तिरेव कारणं वेदान्तानां विधिपरत्वे। शास्त्रत्वं क्रियाबोधकत्वेनैवेत्यत्र शबरस्वामिनां वाक्यमुपष्टम्भयति- ***तथाहीति** *।। *शास्त्रतात्पर्यविदः=शबरस्वामिनः।

चोदनेति।। वेद इति क्रियायाः प्रवर्तकं वचनम्। अत्र चोदनापदेनापि वेदपरेण शास्त्रमेव विवक्ष्यते।। *तस्य=धर्मस्य, *ज्ञानम्=ज्ञापकप्रमाणम्, उपदेशः=उपदेशो नाम वेदः शास्त्रमेव। एतैर्हि वाक्यैः प्रवर्तकत्वेनैव वेदवाक्यानां प्रामाण्यमिति व्यवस्थापनात् प्रवृत्ति-निवृत्त्यन्यतरप्रयोजनत्वं शास्त्रत्वमिति विशदीक्रियते। न केवलं वेदे, किन्तु लोकेऽपि कार्यपराणामेव वाक्यानां प्रामाण्यमित्यत्र प्रमाणमाह- ***तद्भूतानामिति** *।। पदार्थेषु विद्यमानानां पदार्थबोधकानामेव पदानां क्रियार्थेन=कार्यार्थेनं समाम्नायः =विशिष्टः प्रयोग इति तद्भूतानामिति सूत्रार्थः। अनेन हि वाक्यमात्रं क्रियार्थेनैव प्रमाणमिति व्यवस्थाप्यते, इति कथं वा वेदस्यापि क्रियार्थत्व इदं सूत्रं न प्रमाणम। ***आम्नायस्येति** *।। व्याख्यातमेतत्। अयं भावः-वाक्यानां प्रामाण्यं हि सप्रयोजनत्वेनैव। प्रयोजनन्तु न सिद्धम्, किन्तु साध्यमेवेति न प्रवर्तकत्वं निवर्तकत्वं वा विना कस्यापि वाक्यस्य प्रामाण्यम्। तथा च शास्त्रत्व एतादृशस्यैवार्थवत्त्वस्य प्रयोजकत्वाद् वेदान्तानामपि सार्थक्यमन्यथा नोपपद्यते, इति विधिपरत्वमेव युक्तमिति। तदिदमाह-*अत इति*।। विधि=निषेधपरवाक्यस्यैव शास्त्रत्वादित्यर्थः। द्रव्यादिपदान्यपि वैदिकानि परम्परया प्रवृत्त्युपयोगीन्येवेति न दोष इत्याह- ***तच्छेषतयेति** *।। सिद्धवस्तु=द्रव्यादि। तमेव न्यायं पूर्वोक्तप्रकारेणात्रातिदिशति वेदान्तानामपि विधिपरत्वमुपपादयितुम्- ***तत्सामान्यादिति** *।। ज्योतिष्टोमादिविधिवाक्येषु स्वर्गकामपदवदत्रापि नियोज्योऽपेक्षित इत्यत आह- ***सति चेति** *।। धर्मपराणां वाक्यानां दृष्टान्तेन वेदान्तानां कार्यपरत्वं पूर्वमेव निरस्तं जिज्ञासासूत्रे जिज्ञास्यवैलक्षण्यप्रतिपादनेनेत्युक्तमेव स्मारयन् वेदान्तानामविधिपरत्वमाशङ्कते- ***नन्विहेति** *।। अनेन हीदमेव विवक्ष्यते, यत्, विनाऽपि प्रवर्तकत्व-निवर्तकत्वादि सप्रयोजनत्वं वेदान्तानां ज्ञानमात्रेण पुरुषार्थपर्यवसायिनां भविष्यतीति शास्त्रत्वेनार्थवत्त्वं न वेदान्तानां विधित्वप्रयोजकमिति। यदि सिद्धस्य वस्तुनो क्रियासम्बन्धं वेदान्तवाक्यैरवबोधः स्यात्, तर्हि युक्तं विनाऽपि प्रवर्तकत्वं निवर्तकत्वं वा सप्रयोजनत्वं संभवतीति। पदानां तु कार्यान्वित एव शक्तिग्रहात् सिद्धे च वस्तुनि शक्तिग्रहाभावाच्च न वाक्येन सिद्धपदार्थज्ञानमेव भवतीति कार्यान्वितपदार्थशक्तिवादिनां मतेन समाधानमाह- ***नार्हत्येवमिति** *।। कार्यविधिप्रयुक्तस्यैव विधिकार्यकार्यान्वितत्वेन ब्रह्मणः सिद्धस्य प्रतिपाद्यमानत्वात्= प्रतिपादनयोग्यत्वादित्यर्थः। अनेन च ब्रह्मणः कार्यानन्वये वाक्यगम्यत्वमेव न भविष्यतीति बोध्यते। तदेवं वेदान्तानां विधित्वेनैव पर्यवसाने द्वितीयं कारणं निर्दिष्टम्-यत्, सिद्धे पदार्थमात्रे संगतिग्रहासंभव इति। ब्रह्मणो विधिप्रयुक्तत्वं दर्शयितुं तद्विधिपराण्येव वेदान्तवाक्यानि निर्दिशति- ***आत्मेति** *।। अत्र ''द्रष्टव्यः श्रोतव्यो मन्तव्यः'' इति च न विधिः, साक्षात्काररूपस्य दर्शनस्याहंप्रत्ययस्वरूपस्य मनोजन्यत्वात्,

वेदान्तश्रवणस्याप्यध्ययनविधिप्रयुक्तत्वेनात्र विधानासंभवाद् न दर्शनादिकं यद्यपि विधेयम्; तथाऽपि "निदिध्यासितव्यः" इति ध्यानविधानाद् न ब्रह्मणि विध्यसंभवः। एवं सोऽन्वेष्टव्य इत्यादावप्यूहनीयम्। "ब्रह्म वेद ब्रह्मैव भवति," "तत्त्वमसी" त्यादौ तु फलवाक्यत्वाद् रात्रिसत्रन्यायेनार्थवादान्यथानुपपत्त्या विधिकल्पनान्न दोषः। "आकाशवत्सर्वगतश्च नित्यः" इत्यादीनां तूपास्यगुणपरतया यथासंभवमन्वयः, इति सर्वेषां वेदान्तानां विधिपरत्वे न कोऽपि दोषः। *ननु* वेदान्तानां ब्रह्मोपासनापरत्वे तज्जन्यो मोक्षोऽनित्यः स्यात्, क्रियाजन्यत्वात् स्वर्गादिवत्, इत्यत आह- ***तदुपासनाच्चेति। शास्त्रदृष्ट इति***॥ सत्यं क्रियाजन्यत्वेन मोक्षानित्यत्वमनुमीयते, परन्तु प्रबलप्रमाणशास्त्रबाधितत्वाद् नेदमनुमानं प्रमाणमिति न मोक्षानित्यत्वापत्तिः; अन्यथा केवलाद्वैतमते प्रत्यक्षविरोधात् प्रपञ्चमिथ्यात्वश्रुतिरप्यप्रमाणं स्यादिति भावः। वस्तुतस्तु-यत्रानुमान-श्रुत्योरुभयोरपि प्रमाणत्वावसरः, तत्रैवानुमानेन व्यवस्था कर्तव्या, मोक्षे तु न श्रुतिं विहाय प्रमाणान्तरस्य धर्म इवास्त्यवकाश इत्याह- ***अदृष्ट इति***॥ प्रमाणान्तराविषय इत्यर्थः। अन्यथा लौकिकेषु मर्दनादिषु तत्कालिकमेव सुखं दृष्टमिति चित्रादियागस्यापि तात्कालिकमेव फलमनुमीयेतेति वेदप्रामाण्यमेव निरवकाशं स्यात् चित्राक्षेपन्यायेनेति भावः। *ननु एवं सति उपासनाफलमपि स्वर्गादितुल्यं सातिशयसुखविशेष एव स्यादित्यत आह- ***मोक्ष इति***॥ आत्यन्तिकदुःखध्वंसपूर्वकसुखविशेषो निरतिशयो मोक्षः फलमिति भावः। तदेवं विधित्वाङ्गीकारे प्रयोजनमुक्त्वा विपक्षे बाधकमाह- ***कर्तव्यविध्यननुप्रवेश इति***॥ *आनर्थक्यमेव=प्रतिपाद्यार्थशून्यत्वमापद्येतैवेत्यर्थः। वृद्धव्यवहारेणैव शक्तिग्रहात् तस्य च 'गामान्ये' त्यादिकर्तव्यविधिमूलमेव प्रवृत्त्या च वस्तुमात्रे शक्तिग्रहोपायाभावात् सिद्धवस्तुबोधकं वाक्यं सर्वमनुमानविधयैव प्रमाणं न शब्दविधयेति ब्रह्मापि न वेदान्तवेद्यम्, किन्त्वनुमानगम्यमेवेति स्यात्। ततश्च शास्त्रप्रमाणकत्वं बाधितमिति भावः। *ननु* वृद्धव्यवहारादेव संगतिग्रहे यद्यपि वृद्धव्यवहारस्य प्रथमस्य विधिवाक्यमुखेन प्रवृत्तत्वेन विधिसंस्पर्शमन्तरेण न कस्यापि पदस्य शक्तिग्रह इति युक्तम्, परन्तु 'पुत्रस्ते जातः, कन्या ते गर्भिणी' त्यादिसिद्धार्थबोंधनपरादपि वाक्यात् श्रोतुः सुख-दुःखादिदर्शनेन संगतिग्रहो दृश्यत एव। तथाच ज्ञानमात्रेण विनाऽपि प्रवृत्तिं सप्रयोजनानि वाक्यानि बहूनि दृश्यन्ते। अत एव 'रज्जुरियं नायं सर्पः' इति वाक्याद् ज्ञानमात्रेण भय-कम्पादिनिवृत्तिरनुभूयते, इति सिद्धेऽपि वस्तुनि सङ्गतिग्रहे व्याकरणोपमानकोशादयो बहवो हेतवो वर्तन्त इति न दोषः। तथा च वेदान्तैरपि सिद्धवस्तुबोधसंभवाद् विनापि विधित्वं सप्रयोजनत्वं भवत्येवेति कथं विधित्वम्? इत्याशयेन शङ्कते- ***नन्विति***॥ सत्यं सिद्धवस्तुन्यपि वाक्यानां सप्रयोजनत्वे विधित्वमन्तरापि बोधकत्वं भवति, परन्तु वेदान्तवाक्यानां श्रवणमात्रेण सप्रयोजनज्ञानसाधनत्वाद् विधित्वमेव स्वीकर्तव्यमित्याशयेन समाधत्ते- ***स्यादेतदेवमिति***॥ *एतत्=कार्यान्वयं विनाऽपि सिद्धेऽपि वस्तुनि प्रामाण्यम्। *एवम्=ज्ञानमात्रेण फलजनकत्वे। स्यात्=वेदान्तानामपि भवेत्; कदा? यदि वेदान्तश्रवणमात्रेण संसारभ्रान्तिर्नानुवर्तेत। तथा च वेदान्तानां विधित्वेनान्वयोऽपि नापेक्षणीय एव। *ननु*

तर्हि कथं विधित्वं स्थाप्यत इति? अत आह- ***न निवर्तत** इति*।। संसारभ्रान्तिर्न निवर्तत इत्यर्थः। *ननु* शास्त्रे श्रवणविधिर्वर्तते। तस्य च प्रयोजनमवश्यं स्वीकर्तव्यम्। तच्च संसारभ्रमनिवृत्तिरेवेति कल्प्यते, इति कथं श्रवणं निष्प्रयोजनमिति? अत आह- ***श्रुतब्रह्मणोऽपीति***।। ब्रह्म श्रुतवतोऽपि इति संसारनिवृत्तिर्न श्रवणफलम्। तथा च श्रवणांशे दर्शनांश इव तव्यप्रत्ययोऽविवक्षित एवेति भावः। *ननु* सम्यक्श्रवणस्यैव संसारनिवृत्तिः प्रयोजनम्, तथा च येषां ब्रह्मश्रवणानन्तरमपि संसारोऽनुवर्तते, ते न सम्यग् ब्रह्म श्रुतवन्त इत्यनुमीयते। तथा च श्रवणस्यापि संसारनिवृत्तिः फलमेवेति कथं वेदान्तानामुपासनाविधित्वमिति? अत आह- ***श्रोतव्यो मन्तव्य इति***।। अयं भावः-श्रवणानन्तरं मनननिदिध्यासने अपि विधीयेते। तद्यदि श्रवणेन संसारभ्रमनिवृत्तिः, तर्हि मननादिविधिवैयर्थ्यमापद्येत। तथा च मननादिविध्यन्यथानुपपत्तिस्तृतीयं निमित्तं वेदान्तानां विधिपरत्वे। तदेवं कार्यार्थादेव वेदान्ताद् ब्रह्मनिश्चय इति वृत्तिकारणां मतम्। तत्र शास्त्रत्वेनार्थवत्त्वम्, सिद्धार्थेऽज्ञातसङ्गतित्वम्, मननादिविध्यन्यथानुपपत्तिरिति त्रीणि निमित्तानि, यानि भाष्य एव विशदीकृतानि। तदत्र भामतीसंग्रहश्लोकः-**''अज्ञातसङ्गतित्वेन शास्त्रत्वेनार्थवत्तया। मननादिप्रतीत्या च कार्यार्थाद्ब्रह्मनिश्चयः।।''** इति। अज्ञातसङ्गतित्वेनेत्यस्य भाष्ये द्वितीयतयोल्लेखेऽपि वृत्तानुगुण्यबुद्ध्या प्रथमतया निर्देशः। तदेवमुपासनाविधिशेषतयैव वेदान्तानामन्वय इति वृत्तिकारीयं मतमुपसंहरति- ***तस्मादिति***।। *ननु* सर्वमेतद् उपसनाजन्यत्वेऽपि मोक्षस्य नित्यत्वासिद्धौ संभवति। अत इदमेवात्रालोचनीयम्-कर्मजन्यस्य शास्त्रदृष्टस्याप्यदृष्टस्य फलस्य नित्यत्वं भवितुमर्हति वा? न वेति? आद्ये तु ज्योतिष्टोमादिजन्यसुखविशेषस्य हिंसादिजन्यनरकविशेषस्य धर्माधर्मप्रयुक्तस्य नित्यत्वमापद्येत। न केवलमेतावत्-किन्तु एकैककर्मजन्यस्यापि जन्मान्तरीयतिर्यग्भावादि हिरण्यगर्भभावपर्यन्तस्य कर्मजन्यत्वात् समानत्वमापद्येतेति तरतमभावो निर्मूल एव स्यात्। तत्र च तिर्यग्भावादिब्रह्मभावपर्यन्तेषु तरतमभावः किन्निबन्धन इति वक्तव्यम्। यदि धर्माधर्मतारतम्यनिबन्धनः, तर्हि कथं शास्त्रदृष्टत्वाविशेषे सर्वेषां धर्माधर्माणाम्, तेषामेष तरतमभावः? अधिकारिभेदेन यदि धर्माधर्मादितारतम्यम्, तर्हीदं वक्तव्यं समापतति-यद् धर्माधर्माद्यनुष्ठानस्य शरीर-वाङ्मनोऽभिमाननिमित्तत्वात् तत्फलमपि शरीरविशेषाद्यभिमाननिबन्धनमेवानुभूयत इति। ततश्चेदमेवात्र पर्यवस्यति-यत् शरीरवाङ्मनोभिरुपभुज्यमानत्वमनित्यत्व- सातिशयत्व-तारतम्यादिप्रयोजकमिति। तद्यद्युपासनासाध्योऽपि मोक्षः शरीरवाङ्मनोभिरुपभुज्यते, तर्हि सातिशय एव स्यात्; अन्यथा तु निमित्तं वक्तव्यम्-उपासनस्यापि धर्मत्वाविशेषात् कथं तत्फलमात्रं नानित्यं भवतीति। यदि नित्यत्वश्रवणात् श्रुतिप्रामाण्येन व्यवस्था, तर्हि ''अपाम सोमममृता अभूम'' ''अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवती''ति श्रुतिप्रमाणैः स्वर्गस्यापि नित्यत्वमवगतमिति मोक्षविशेषः स्वर्गः स्याद् इति समापद्येत। अथ यदि ''तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये, ब्रह्म वेद ब्रह्मैव भवती'' त्यादिश्रुतिप्रामाण्याद् अशरीरित्वमेव मोक्षाख्यमुपासनासाध्यमिति, तर्हीदं विवेचनीयम्-यत्, कथमुपासना शरीरबन्धं निवर्तयति-किं दृष्टविधया?

उतादृष्टविधया? यद्यदृष्टविधया, तर्हि स्वर्गादिकमपि कथं नाशरीरत्वम्। शरीरं हीदं भौतिकं नष्टमिति कथं तत्रापि नाशरीरत्वमदृष्टाधीनं न भवति। अविद्यावशत्वात् स्वर्गिणां न तथा कल्पनमिति चेत्, उपासकानां कथमविद्योच्छेदः? ज्ञानाधीना ह्यज्ञाननिवृत्तिः, न धर्माधीना। कथमन्यथा स्वर्गादिभोगकालेऽपि नाविद्योच्छेदः। तथा च मोक्षानित्यत्वापत्त्या नोपासनापरतयैव वेदान्तानां पर्यवसानमित्यभिप्रायेण प्रतिविधत्ते- ***अत्राभिधीयत इति। न; कर्मब्रह्मविद्याफलयोर्वैलक्षण्यादिति ***।। कर्मफलं विद्याफलं च विलक्षणमवगम्यते। इदं च वैलक्षण्यं ब्रह्मविद्याया अपि धर्म-विशेषरूपोपासनासाध्यत्वे नोपपद्येत इति भावः। तत्र प्रथमं कर्मफलं सातिशयं विवेचयितुं कर्मपदार्थमाह- ***शरीरमिति ***।। शरीर-वाङ्मनोभिमानोपभागार्हत्वं ब्रह्मविद्याफलाद् विशेषं द्योतयन् कर्मफलानि तरतमभावापन्नानि निर्दिशति- ***तयोश्चेति ***।। भिन्नभिन्नशरीरवाङ्मनोभिरुपभुज्यमानत्वं साधयितुं कर्तृतारतम्यं कर्मसु नियतं प्रतिपादयति सत्यामपि प्रयोजनेच्छायां सत्यपि चार्थज्ञाने सत्यपि वाऽग्निमत्त्वे राजसूये ब्रह्म-वैश्ययोः, वैश्यस्तोमे ब्रह्म-क्षत्रयोः, वसन्तकालिक आधाने क्षत्रिय-वैश्ययोर्वा नाधिकार इति हि वस्तुस्थितिः। ब्रह्मविद्यायां त्वधीतवेदान्ताः साधनचतुष्टसम्पन्नाश्च सर्वेऽधिकारिण इति नाधिकारतारतम्यं वर्तते, इति ब्रह्मविद्यायां न स्वरूपतः, न वाधिकारतस्तारतम्यं वर्तते। *ननु* कर्मसु शरीराद्यपेक्षेषूक्तविधतारतम्यसत्त्वेऽपि नोपासनासु स्वरूपतोऽधिकारतः फलतो वा तारतम्यं स्वीक्रियत इत्युपासनाख्यधर्मसाध्यत्वे नोक्तायाः शङ्काया अवसार इत्यत आह- *तथा च यागाद्यनुष्ठायिनामेव विद्यासमाधिवशादिति*।। अत्र विद्यावशादिति वर्णनेनोपासनाविशेषस्यापि स्वफलानुभवार्थं धर्मविशेषस्येव लोकान्तरगमनापेक्षाया उपक्षेपाद् धर्मान्तरसाम्यमेवोपासनानामिति सूच्यते। ***इष्टापूर्तेति ***।।

> **''अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम्। आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते।।**
> **वापीकूपतटाकादिदेवतायतनानि च। अन्नप्रदानमारामः पूर्वमित्यभिधीयते।।**
> **शरणागतसन्त्राणं भूतानां चाप्यहिंसनम्। बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते।।''**

इति वचनलक्षितानीष्टापूर्तदत्तलक्षणानि साधनानि। तैरिष्टापूर्वदत्तसाधनैरित्यर्थः। तथा चोपासनाफलस्यापि मार्गप्राप्यत्वाद् मोक्षोऽपि ब्रह्मोपासनाफलत्वे मार्गप्राप्य एव स्यादिति स्वर्गवदनित्यत्वापत्तिरिति भावः। *ननु* मार्गप्राप्यत्वेऽपि मोक्षस्य नानित्यत्वम्; पुनरावृत्तिशून्यत्वात्, नित्यदेवादिभावापत्त्या न कोऽपि दोष इत्यत आह- ***तत्रापि सुखतारतम्यमिति ***।। देवादिभावेऽपि सुखतारतम्यं वर्तत एवेति भावः। संप्रति धर्माधर्मफलं संसाररूपमेवेति प्रकृतमुपसंहरति- ***एवमिति ***।। धर्माधर्मफलस्य कारणमाह- ***अविद्यादिदोषवतामित्यादिना ***।। तथा चाविद्यानिरासं विना न शरीरादिनिवृत्तिरिति नोपासनायाः क्रियारूपायास्तन्निवर्तकत्वमिति सिद्धान्तयुक्तिः सूच्यते। स्पष्टीकरिष्यते

चेयमुपरिष्टात्-''दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये पूर्वपूर्वापायादपवर्गः'' इति काणादसूत्राद्यवलम्बनेन। शरीरवाङ्मनोभिरुपभुज्यमानं दुःखमिश्रं सुखमेवेति प्रदर्शयति- ***तथा च श्रुतिरिति***॥ *ननु* मोक्षेऽपि शरीरं वर्तत इति शङ्कायामाह- ***अशरीरं वावेति***॥ तथा च श्रुतिविरुद्धमिदम्-उपासनासाध्यो मोक्षः, इति शास्त्रदृष्टत्वाद् अनुमानबाधेनापि मोक्ष उपासनासाध्यश्च नित्यश्चेति शङ्काऽप्यनवसरेति सूचितम्। *ननु* अशरीरत्वमपि ब्रह्मोपासनाकार्य भवत्विति शङ्कते- ***अशरीरत्वमेवेति***॥ स्यादेतदेवं यद्यशरीरत्वं साध्यम्, नत्वेतदस्ति। स्वाभाविकं ह्यशरीरत्वमाम्नायोऽनुवदति। अतश्च नोक्ताशङ्काऽत्रावसरतीत्याह- ***न; तस्य स्वाभाविकत्वादिति***॥ अनया श्रुत्या शरीरावस्थानकालेऽप्यशरीरस्य व्यवस्थापनाद् अशरीरत्वं स्वाभाविकमिति गम्यते। श्रुत्यन्तराण्यपि मुक्तस्य ब्रह्मभावमापन्नस्याशरीरत्वनिरूपणपराण्युदाहरति- ***अप्राण इति***॥ वस्तुतस्तु मोक्षदशायां भोक्तृत्वमेव नास्तीत्याह- ***असङ्ग इति***॥ प्रकृतमशरीरत्वाख्यमोक्षनित्यत्वमुपसंहरति- ***अत एवेति***॥ स्वाभाविकत्वादेव। *ननु* नित्यत्वं न जन्यत्वविरुद्धम्; यत आकाशादिकं जन्यमपि श्रुतौ नित्यतया व्यवह्रियते-''आकाशवत्सर्वगतश्च नित्यः'' इति-चेत्, किमिदं नित्यत्वमाकाशादीनाम्? यदि पुनः पुनरेकेनैकेन रूपेणावस्थापनम्, तर्हि मोक्षस्यापि रूपभेदेन विपरिवृत्तिरापद्येत। एकरूपो हि नित्यो मोक्षः सर्वैर्वादिभिरभ्युपगम्यते। यतश्च नाकाशादिवद् न जन्यत्वं नित्यत्वं चोभयमत्र विरुद्धं संभवतीति निरूपयिष्यन् नित्यं विभज्य दर्शयति- ***तत्रेति***॥ परिणामिनित्यं कूटस्थनित्यं च नित्यं द्विविधम्। तदेवेदमिति बुद्धिविषयत्वं विक्रियमाणत्वेऽपि यस्य, तत्परिणामिनित्यम्। एकरूपत्वे सति तदेवेति बुद्धिविषयत्वं कूटस्थ-नित्यत्वमिति विवेकः। अशरीरत्वं तु कूटस्थपारमार्थिकनित्यमेवेत्याह- ***इदन्त्विति***॥ पारमार्थिकमिति।। परिणामिनित्यता हि न पारमार्थिकी; अनिर्वचनीयत्वादिति भावः। ***कूटस्थमिति***॥ कूटवत् तिष्ठतीति कूटस्थम्। कूटः स्वर्णकारैः स्वर्णादीनां ताडनेन प्रथनार्थमाधारतया रक्ष्यमाणमयःपिण्डं स्वर्णादीनां विकारेऽपि स्वयं न विकुरुत इति ब्रह्माध्यस्ताविद्यादिपरिणामेऽपि न ब्रह्म विकुरुत इति भावः। इदमेव कूटस्थपदं गृहीत्वा ब्रह्मविवर्तोपादानतापक्षस्योत्थितिः। अनेन हि ब्रह्मापि स्वतन्त्रमभेदप्रतीति-योग्यमित्युपस्थापनात् तस्य च कार्य-कारणभावमन्तराऽसंभवाद् ब्रह्माप्यपरिणामिकारणं चेति स्वीकरणीयत्वे विवर्तोपादानतायां पर्यवसानं भवति। *ननु* ''आकाशवत्सर्वगतश्च नित्यः'' इति ब्रह्मण आकाशतुल्यस्यैव नित्यत्वस्याम्नानात् कथं ब्रह्मणि न परिणामिनित्यत्वमिति? अत आह- ***व्योमवत्सर्वव्यापीति***॥ आकाशवदिति वाक्ये आकाशसाम्यं व्यापकत्वांशमादायैव, न तु नित्यत्वांशमादायेति नाकाशवत्परिणामिनित्यब्रह्मस्वरूपाभिन्नो मोक्ष इति भावः। तदेवोपपादयति- ***सर्वविक्रियारहितमिति***॥ कथं वा न ब्रह्म परिणमत इति? अत आह-**निरवयवमिति***॥ *ननु* यदि ब्रह्म न परिणामिकारणम्, तर्हि प्रपञ्चः कस्य परिणामः, कथं च तर्हि ब्रह्मणोऽभिन्ननिमित्तोपादानत्वोपपत्तिरिति? अत आह- ***स्वयंज्योतिः स्वभावमिति***॥ अनेन च

चैतन्यस्वरूपत्वबोधनेन–"आश्रयत्वविषयत्वभागिनी निर्विभागचितिरिव केवला" इति सिद्धान्तोपक्षेपद्वारा चैतन्याश्रिताविद्यापरिणामत्वं प्रपञ्चस्य, ब्रह्मणश्च तादृशाविद्यावृतत्वाद्विवर्तोपादानत्वं तदध्यासाधिष्ठानत्वेनेति सूच्यते। एतादृशे च मोक्षस्वरूपे न धर्माधर्मयोरवसरलेशोऽपीति श्रुतिरेवाहेत्याह– ***यत्र धर्माधर्माविति *॥ अन्यत्र धर्मादिति च *। कृताकृतात् *॥** कृतं चाकृतं चानयोः समाहारः। कृताकृताच्च भिन्नं ब्रह्मेत्यर्थः। शशशृङ्गवैलक्षण्यं द्योतयितुमकृतभेदोऽपि दर्शितः। ***भूताच्चेति *॥** यद्यपि ब्रह्म भूतं सिद्धरूपमिति पूर्वमुक्तम्? तथाऽपि व्यवहारदृष्ट्यैव भूतत्वव्यवहारोऽपीति भावः। अनेन च–"परिनिष्ठितस्वरूपत्वेऽपी"ति भाष्यं कृत्वाचिन्तयैव प्रवृत्तमिति द्योत्यते। अपिशब्दोऽपि तत्रत्योऽत एव सम्यगुपपद्यते। वस्तुगत्या तु ब्रह्मणि सिद्धरूपत्वस्याप्यभावाद् न मानान्तरशङ्काया अवसरलेशोऽपीति "अथातो ब्रह्मजिज्ञासे"ति सुष्ठु सूत्रितमिति प्राप्तावसरः सूचयति– ***अतस्तद्ब्रह्मेति *॥ *जिज्ञासा प्रस्तुतेति *।** वेदान्तविचारं विना नोक्तरूपस्य ब्रह्मणो निर्णय इति भावः। सति चैव "अथातो ब्रह्मजिज्ञासे" ति जिज्ञास्यत्वप्रतिज्ञामात्रेणापीदमेव विज्ञायते–यद् ज्ञेयमेव ब्रह्म, नोपास्यम्, इति नोपास्यसमर्पणार्थं वेदान्तशास्त्रं ब्रह्ममीमांसा वेति निष्कर्षः। *ननु* "अथातो धर्मजिज्ञासे"ति जिज्ञास्यत्वेन प्रतिज्ञातोऽपि धर्मो यथा कर्तव्यशेष एव, एवं ब्रह्मापि कर्तव्यशेष एव भवितुमर्हति, जिज्ञासाशब्दपूर्वकमेव स्वविचारस्य प्रतिज्ञायमानत्वादित्याशङ्क्य, अनुष्ठानापेक्षफलकत्व–तदनपेक्षफलकत्वाभ्यां धर्म–ब्रह्मजिज्ञासयोर्वैल- क्षण्यमनुपदं विवेचयिष्यन् उपासनासाध्यत्वपक्षे प्रथमं दूषणमाह–**तद्यदीति *॥ *कश्चिदतिशय इति *।** मोक्षनित्यत्वश्रुतिः "अक्षय्यं ह वै" इत्यादि श्रुतिरिव बहुकालावस्थायित्वपरतयैव नेया स्यादिति भावः। एतावतोपपत्तितः कर्तव्यविध्यननुप्रवेशं मोक्षे निरूप्य, श्रुतिरपि स्पष्टं कर्तव्यविध्यसम्बन्धं मोक्षस्य प्रतिपादयतीत्याह– ***अपिचेति *॥** कथं वोक्तश्रुतयः कर्तव्यविधिसम्बन्धं मोक्षस्य वारयन्तीति? अत आह– ***ब्रह्मविद्याऽनन्तरमिति *॥** *ननु* उक्तश्रुतिषु कथं वा कर्तव्यव्यापारान्तरस्य वारणं क्रियत इति? अत आह– ***यथा तिष्ठन्निति *॥** मोक्षप्राप्तिरज्ञाननिवृत्तिमात्राधीनेत्यत्र न केवलं श्रुतयः, किन्तु गौतमसूत्रमपि **प्रमाणमित्याह– *तथाचेत्यादिना–अपवर्ग इत्यन्तेन ग्रन्थसन्दर्भेण *॥** अत्र प्रकरण उदाहृताः श्रुतयो न्यायनिर्णये विशदं व्याख्याता इति तदीयमेव विवरणमत्र संगृह्णीमः–

भरद्वाजादयः षड् ऋषयः परमविद्याप्रदं पिप्पलादं गुरु विद्यानिष्कर्षार्थमन्यमनुरूपमपश्यन्तः पादयोः प्रणम्योचिरे–त्वं खल्वस्माकं पिता; ब्रह्मदेहस्याजरामरस्य विद्यया जनयितृत्वात्, इतरौ पितरौ देहमेव जनयतः। जनयितृत्वमपि सिद्धस्यैवाविद्यानिरासादित्याह–यस्त्वमस्मानविद्यामहोदधेः परम्, अपुनरावृत्तिरूपं पारं तारयसि प्रापयसि विद्याप्लवेनेति। प्रश्नोपनिषदमुक्त्वा सनत्कुमारनारदसंवादात्मिकां छान्दोग्योपनिषदं पठति– ***श्रुतं हीति *॥** तत्र 'तारयतु' इत्यन्तमुपक्रमस्थम्, शेषमुपसंहारस्थमिति भेदः। मम भगवत्तुल्येभ्यः

श्रुतमेवेदं यत्तरति शोकं मनस्तापम्, अकृतार्थबुद्धिमात्मविदिति। सोऽहमनात्मवित्त्वाच्छोचामि। अतस्तं मां शोचन्तं शोकसागरस्य पारमन्तं तारयतु भगवानात्मविज्ञानोपदेशेनेति नारदेन प्रार्थितः सनत्कुमारस्तस्मै वैराग्यादिना निरस्तसमस्तदोषाय योग्याय तमसोऽविद्यासागरस्य पारं परमार्थतत्त्वं दर्शितवानित्यर्थः। आदिशब्देनं ''यो वेद निहितं गुहायाम्'' इत्याद्याः श्रुतयो गृहीताः, तासां तात्पर्यमाह- ***मोक्षेति***॥ विद्याफलमविद्याध्वस्तिः श्रुता। न चामानात्तद्ध्वस्तिः। तथाचोपास्तेरन्या मानमेव ब्रह्मधीर्न विधेया, तत्फलं च मुक्तिर्न वैधीत्यर्थः। श्रुत्यनुसारेणाविद्याध्वस्तिफलत्वाद् ब्रह्मधीस्तत्त्वधीरित्युक्तम्॥

इदानीं तर्कशास्त्रानुसारेणापि तथैवेत्याह- ***तथा चेति***॥ दुःखं प्रतिकूलवेदनीयम्, बाधा, पीडा, ताप इत्यनेकविधम्। जन्म देहेन्द्रियादीनां निकायविशिष्टः प्रादुर्भावः। प्रवृत्तिसाध्यौ धर्माधर्मौ प्रवृत्तिपदार्थः। रागद्वेषेर्ष्याऽसूया-मान-लोभादयो दोषाः। मिथ्याज्ञानमतस्मिंस्तद्बुद्धिः। तेषां पाठक्रम उत्तरोत्तरस्यापाये तदनन्तरस्य पूर्वस्य पूर्वस्यापायाद् विनाशाद् अपवर्गो निःश्रेयसम्। अत्र मिथ्याज्ञानादयो दुःखान्ता अविच्छिन्नाः संसारपदार्थाः। सति चैवं तत्त्वज्ञानाद् मिथ्याज्ञानमपैति, ततो हेत्वभावे फलाभावाद् दोषापायः, तदपाये प्रवृत्तिसाध्यधर्माधर्माभावः, तदपाये जन्मापायः, तदपाये दुःखापायः, इति तत्त्वज्ञानान्मिथ्याज्ञाननिवृत्तिमात्रेण मोक्ष इति गौतमसूत्रार्थः। अनेनापि हि मोक्षोऽज्ञाननिवृत्तिमात्रं ज्ञानापेक्षमपेक्षते, नतु कर्मेति सूच्यते। यतः, धर्माधर्मापायमेव मोक्षार्थं गौतमोऽप्यपेक्षते, न तु धर्माधर्मौ, इति ब्रह्मोपासनारूपधर्मसाध्यो मोक्ष इति दर्शनान्तरसम्मतमपि नोचितमिति भावः। एवं च मोक्षानित्यत्वापत्त्या च प्रतिपत्तिविधिविषयतया शास्त्रेण ब्रह्म समर्प्यत इति प्रतिपत्तिविधिविषयत्वे ब्रह्मणो मोक्षानित्यत्वापत्तिरेकं दूषणम्। परमार्थतस्तु निर्विशेषं ब्रह्मोपास्यमिति वाद एव न क्षोदक्षमः। उपासनं हि सम्पद्रूपम्, प्रतीकालम्बनमिति द्विविधम्। तत्रापि संपदुपासनं किञ्चित्कर्माङ्गम्, किंचित्तु स्वतन्त्रफलसाधनमिति वस्तुस्थितिः। तत्र स्वतन्त्रं संपदुपासनमेकगुणकत्वेन साम्यप्रयुक्तम्। यथा वायोः संवर्गरूपेणोपासनम्, मनसो वाऽनन्तत्वगुणयोगेन विश्वदेवत्वोपासनम्। इदन्तु सगुणस्यैव ब्रह्मणः संभवति, न निर्विशेषस्येति न संभवदुक्तिकमपीत्याह- ***न चेदं ब्रह्मात्मैकत्वविज्ञानमिति***॥ प्रत्यगभिन्ननिर्विशेषोपासनमित्यर्थः। संपद्रूपम्=गुणसाम्यप्रयुक्ततद्रूपोपासनमित्यर्थः। निर्विशेषत्वं गुणसाम्यप्रयुक्ततदात्मभावश्च विरुद्ध इति भावः। प्रतीकोपासनत्वमप्यत्र बाधितमित्याह- ***नाप्यध्यासरूपमिति***॥ मनसि ब्रह्मत्वमिव जीवे ब्रह्मत्वमारोपितमिति हि तदा स्यात्, तत्र च ब्रह्मैव बाधितं स्यादिति प्रतीकपदस्थानेऽध्यासपदप्रयोगेण सूच्यते। गुणसाम्यप्रयुक्तमिव क्रियासाम्यप्रयुक्तमपि संपदुपासनं नात्र प्रसरतीत्याह ***नापि विशिष्टक्रियेति***॥ प्रत्यगभिन्ने हि ब्रह्मणि क्रियालेशस्याप्यसंभवाद् नोक्तरूपमप्युपासनमत्र भवति। उद्गीथोपासनादिवत् कर्माङ्गमिदमुपासनं सम्पद्रूपम्, अत्र च न गुणसाम्यं क्रियासाम्यं वा नियतमिति शङ्काऽपि न सावसरा, यतः कर्माङ्गत्वं सन्निपत्योपकारकत्वरूपं न प्रामाणिकम्, भिन्नप्रकरणस्थत्वादित्याह-

नाप्याज्यावेक्षणादिवदिति॥ आज्यावेक्षणं दर्शपूर्णमासप्रकरणे ''पत्न्यवेक्षितमाज्यं भवती''ति विहितमुपांशुयागाङ्गभूताज्यसंस्कारतया गुणकर्मेति याज्ञिका मन्यन्ते। तेन न्यायेन प्रत्यगभिन्नपरमात्मस्वरूपज्ञानमपि क्रत्वङ्गकर्तृसंस्कारकतया गुणकर्म भवतु, इति सन्निपत्योपकारकतामात्मज्ञानस्याशङ्क्य निरासार्थमिदं वाक्यं प्रवृत्तम्। अत्रापि युक्तिस्तन्मतस्य स्वरूपव्याक्रियैव पराक्रियैवेति न्याय एव। न हि कर्माङ्गकर्ता प्रत्यगभिन्नं ब्रह्मेति तज्ज्ञानं नाज्यावेक्षणवत् सन्निपत्योपकारकतामर्हतीति भावः। तदेतदाह- ***संपदादिरूपे हीति***॥ 'तत्त्वमसि' 'अहं ब्रह्माऽस्मि' 'अयमात्मा ब्रह्म' 'प्रज्ञानं ब्रह्म' इत्यादिवाक्यानि हि निर्विशेषमेव बोधयन्तीति वदन्तो हि वृत्तिकारा न गुणक्रियानिमित्तं संपदाद्युपासनरूपं ब्रह्मविज्ञानं स्वीकर्तुं शक्नुवन्ति। तन्मते हि ज्ञानगुणयोगाद् वृद्धिक्रियायोगाद्वा ''तत्त्वमसी''ति गौणो व्यवहार इति खलु वक्तव्यम्। तत्र च मुख्याभेदतात्पर्यमुपक्रमाद्यवगतं परित्यक्तव्यमेव स्यात्, तच्च न युक्तमिति भावः। स्पष्टीकृतश्चायमेव भाष्यकारैरपि ''ब्रह्मात्मैकत्वप्रतिपादनपरः पदसमन्वयः पीड्येते''ति वदद्भिः। गौणत्वे ह्यस्य वाक्यसमुदायस्य जीवातिरिक्तं ब्रह्मैवासिद्धं स्यादिति ब्रह्मोपासनमिदमन्ततो गत्वाऽध्यासरूपमेव स्यादिति भावः। *ननु* भवतु तर्ह्यध्यासरूपमेव ब्रह्मोपासनमित्यत आह- ***भिद्यत इति***॥ **अविद्यानिवृत्तिफलश्रवणादिति***॥ अविद्यानिवृत्तिर्हि तत्त्वज्ञानसाध्या, नाध्याससाध्येति न प्रतीकोपासनमध्यासरूपमत्र विवक्षणमप्यर्हतीति भावः एतावता च निर्गुणोपासनमेवाप्रसिद्धमिति प्रतिपत्तिविधिविषयता न ब्रह्मण इति विवेचितम्। तथा च ब्रह्मण उपासनाविधिविषयत्व उपासनस्वरूपनिर्वचनासंभवो द्वितीयं दूषणं सूचितं भवति। अन्तस्त्वशरीरत्वाख्यनित्यमोक्षस्य ब्रह्मोपसनाफलत्वानुपपत्तिरूपं प्रथमं दूषणमपरिहरणीयमवतिष्ठत एवेत्युपसंहारसौकर्यार्थ मुपक्षिपति- ***ब्रह्म वेदेति***॥ तदेवमुपासनाविध्यविषयत्वमुपसंहरति- *तस्मादिति*॥ *ननु* तर्हि ''आत्मा वा अरे द्रष्टव्यः श्रोत्व्यो मन्तव्यो निदिध्यासितव्यः'' ''आत्मेत्येवोपासीते'' त्यद्वितीयात्मनो विशद विधिविषयत्वनिर्देशानुपपत्तिः, यद्युपासनाविधिरपि च विवक्षित इत्यत आह-*अतो न पुरुषव्यापारतन्त्रेति*॥ यथा हि वृत्तिकाराः-द्रष्टव्यः, श्रोतव्यः, मन्तव्य इति च तव्यप्रत्यये सत्यपि न दर्शनादिविधय इति मन्यन्ते, एवं वयं निदिध्यासितव्य इत्यपि श्रवण-मननादिनिर्वर्त्यप्रत्ययप्रवाहरूपं निदिध्यासनमभ्यस्यमानसाक्षात्कारधारैव स्वीक्रियत इति न ब्रह्मविद्या परा कथमपि विधेयेति न तव्यप्रत्ययाद्यनुपपत्त्या ब्रह्मज्ञानविधिः कल्पयितुं शक्यते। तत्र ध्यानपदप्रयोगस्तु विजातीयनान्तरितत्वसाम्याद् धारावाहिकज्ञानवदिति न दोषः। ज्ञानस्य पुरुषातन्त्रत्वे कथमुत्पत्तिरित्याशङ्कते- ***किं तर्हीति***॥ तर्हि किन्तन्त्रं ज्ञानमित्यर्थः। वस्तुतन्त्रैव ब्रह्मविद्या, प्रमात्वात्, घटादिज्ञानवदित्याह- ***प्रत्यक्षादीति***॥ अयं भावः-स्वाकारवृत्त्यवच्छिन्नं प्रत्यगभिन्नं ब्रह्मचैतन्यमेव ब्रह्मविद्या। तत्र चैतन्यं नित्यत्वान्न पुरुषव्यापारतन्त्रम्। वृत्तिरपि तु प्रमाणजन्यैव, न पुरुषजन्या। सत्यामपीच्छायामिन्द्रियाद्यसंप्रयोगे ज्ञानं कदापि नोदेति,

एवमनिच्छायामपि सत्यामिन्द्रियसंप्रयोगे दुर्गन्धादिज्ञानमवर्जनीयमेवेति न वृत्तिर्न वा चैतन्यं पुरुषव्यापारतन्त्रमिति। सति चैवं किं वृत्तिविधिरत्र विवक्ष्यते? उत ब्रह्मविधिः? इति विकल्प्य नोभयविधिरपि संभवतीत्याह- *एवं भूतस्येति*।। तद्ज्ञानस्य वृत्तिरूपस्य वेत्यर्थः। *कार्यानुप्रवेशः*।। पुरुषव्यापारविषयत्वयोग्यत्वरूपविधेयत्वसम्बन्धः। न हि ब्रह्म साधनत्वेनान्वयमर्हति; निर्विशेषत्वात्। *ननु* तर्हि फलत्वेनान्वयो भवतु, इत्याशङ्क्याह- ***नापि विदिक्रियाकर्मत्वेनेति*।।** विदितत्वं हि वृत्त्यवच्छिन्नचैतन्यविषयत्वम्। विदितपदं कार्यपरम्। अविदितपदं कारणपरम्। कार्यकारणातिरिक्तं ब्रह्मेत्यर्थः। कार्यकारणातिरिक्तत्वबोधनावसरे विदितत्वनिषेधोऽपि ब्रह्मणो विदिक्रियाकर्मत्वासंभवाभिप्रायेणैवेति कर्मत्वेन ब्रह्मणो ज्ञानविध्यनुपपत्तिरिति भावः। उपास्तिक्रियाकर्मत्वनिषेधोऽपि श्रुतिसिद्ध इत्याह- ***तथोपास्तीति*।। तदेवेति*।।** यदिदं देवतादिकं सगुणं सर्व उपासते, नेदं ब्रह्म, किन्तु वाङ्मनसामतीतमेवेति त्वं जानीहीत्युक्तश्रुतेरर्थः। अनेन चोपास्यस्य ब्रह्मत्वनिषेधः क्रियते। अयं च निषेधो धर्म्यंशमादाय, यतः सगुणं निर्गुणं च स्वरूपतो धर्म्यंशेनाभिन्नमेव, किन्तूपास्यत्वरूपधर्मस्यैव निषेध इति ब्रह्मणोऽनुपास्यत्वमुक्तवचनसिद्धमिति भावः। शास्त्रमप्युपहितमेव ब्रह्म प्रमाणयति, न तु शुद्धं ब्रह्मेति बोधयितुं शङ्कते- ***अविषयत्वे इति*।।** ब्रह्मणो वृत्त्यवच्छिन्नचैतन्यरूपज्ञानाविषयत्व इत्यर्थः। *शास्त्रयोनित्वानुपपत्तिः=शास्त्रप्रमाणकत्वानुपपत्तिः। चैतन्यं न प्रमा, न वा वृत्तिः, किन्तु वृत्त्यवच्छिन्नमेव चैतन्यम्। तज्जनकत्वेनैव चक्षुरादीनामपि प्रमाणत्वमिति ह्यद्वैतिनां प्रक्रिया। तथा च महावाक्यानामखण्डाकारसाक्षात्कारजनकत्वमपि न स्यात्, इति निखिलसंसारबन्धमूलाविद्यानिवृत्तिरप्यनुपपन्नेति शङ्काहृदयम्। प्रत्यक्षप्रमा तु चैतन्यमेवेति हि वेदान्तिनां प्रक्रिया। तथा च शुद्धचैतन्यांशप्रमात्वं सार्वदिकमेव वर्तते। तथा च शुद्धचैतन्यांशप्रमात्वं न प्रमाणप्रयुक्तमस्माभिरूरीक्रियते। अज्ञाननिवर्तकत्वमात्रेण वृत्तेरपि गौणं ज्ञानत्वमूरीक्रियते। तथा च वेदान्तवाक्यानां तादृशवृत्तिजनकत्वमात्रेण प्रमाणत्वव्यपदेशः। न हि वृत्तिविशिष्टमखण्डाकारसाक्षात्कारविषयः, किन्तु तदुपलक्षितम्। अतो न दोषलेशोऽपीत्यभिप्रायेण समाधत्ते- ***अविद्याकल्पितेति*।।** घटादिस्थलेऽपि वृत्तिरज्ञाननिवृत्तिं जनयति, निवृत्ते चाज्ञाने चैतन्यं घटादिकमपि भासयति। ब्रह्मणि तु स्वप्रकाशत्वात् स्वभिन्नं न चैतन्यं भानप्रयोजकम्, किन्त्वज्ञाने निवृत्ते स्वयमेव ब्रह्म प्रकाशते। अतोऽज्ञाननिवर्तकं वृत्तिमात्रमपेक्षते। तथा च शास्त्रं ब्रह्माकारवृत्तिमात्रमविद्यानिवृत्तिक्षमं जनयति। घटादिवद् ब्रह्म वृत्त्यवच्छिन्नचैतन्यविषय इति भावः। एतदेव भाष्यं गृहीत्वा-''फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्। ब्रह्मण्यज्ञाननाशार्थं वृत्तिव्याप्यत्वमिष्यते।।'' इति विवरणानुसारिणां सिद्धान्तः। भामत्यनुयायिनस्तु-शुद्धचैतन्यस्य शास्त्रयोनित्वमपि नास्तीत्युपहितब्रह्मण्येव शास्त्राणां प्रवृत्तिरिति निरूपणेन वृत्तिविषयत्वमपि शुद्धब्रह्मणो नास्तीति मन्यते। **''अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छा**स्त्रस्ये''ति वाक्यं हि विवरणानुसारिणां मतेन

विकल्पितभेदनिवृत्तिप्रयोजकवृत्तिमात्रोपयोगित्वाच्छास्त्रस्येति व्याख्येयम्। **भामतीमतेऽपि** त्वविद्याकल्पितभेदनिवृत्तिप्रयोजकोपहितस्वरूपबोधकत्वात् शास्त्रस्येति। तत्र प्रथममते शुद्धब्रह्मण एवाधिष्ठानत्वात् तत्साक्षात्कारेणैवाज्ञाननिवृत्तिः। द्वितीयमते त्वविद्योपहितस्यैवाधिष्ठानत्वाद् वृत्त्युपहितब्रह्मज्ञानमेवाज्ञाननिर्वाणजनकमिति विवेकः। अधिकं चाद्वैतसिद्ध्यादौ व्यक्तम्। एतन्मतेऽविद्योपहितस्यैवोपादानत्वात् शास्त्रवेद्यत्वाच्चोपादानत्वस्य स्वरूपलक्षणत्वेऽपि न दोषः। स्वप्रकाशत्वात्तु चैतन्यस्य न प्रमाणवेद्यत्वं स्वीक्रियते। तथा च ***न; अविद्याकल्पितेति*** ग्रन्थ इष्टापत्तिपरतया योजनीयः। शास्त्रस्य शुद्धचैतन्याकारवृत्तिजनन एवोपयोग इति विवरणमतस्य पूर्वोक्तभामतीमतस्य चोभयस्यानुसारीदं वाक्यम्- ***न हि शास्त्रमिदन्तयेति***॥ अत्रेदन्तया विषयभूतं फलव्याप्यं ब्रह्म न शास्त्रं प्रतिपिपादयिषतीति विवरणमतानुसारेण योजनीयम्। भामतीमतेन तु योजनम्-शास्त्रं ब्रह्म इदन्तया निष्कृष्टरूपं न प्रतिपिपादयिषति, यत उपहितमेव शास्त्रेण बोधयितुं शक्यते। यदा हि वृत्तिः, तदा तयोपहितत्वात् कथं शुद्धं वृत्तिविषयोऽपि भवतीति भावः। तर्हि शास्त्राणां किं विषयः? इति शङ्कते- ***किं तर्हीति***॥ किं तर्हि विषय इत्यर्थः। समाधत्ते- ***प्रत्यगात्मत्वेनेति***॥ ब्रह्मणः स्वप्रकाशत्वेन *अविषयतया=केवलवृत्तिविषयत्वेन नतु फलव्याप्यत्वेन। अत्र प्रत्यगात्मत्वेनेति हेतुप्रदर्शनपरम्। वृत्तिविषयतया प्रतिपिपादयिषतीति वस्तुस्थितिः। भामतीमतानुसारेणास्य वाक्यस्य योजनं त्वेवम्-तत्पदार्थं जीवाभेदेन प्रत्यगात्मतया त्वंपदार्थं च तत्पदार्थेनाभेदेनाविषयतयोभयं चैकरूपेणेति यावत्; प्रतिपादयत् सत् शास्त्रमविद्याकल्पितं भेदमपनयतीति। तथा च जीव-ब्रह्मणोर्विशुद्धचिद्रूपत्वमात्रं न शास्त्रेण बोध्यते, शास्त्रेण तु सामान्यतश्चैतन्यस्वरूपमात्रमुपस्थाप्यते। **''न हि शास्त्रमिदन्तये''ति** भाष्यं गृहीत्वैव भामतीकारणां शाब्दापरोक्षतावादनिरासः। सर्वथा तु शुद्धचैतन्यस्य ज्ञानाविषयत्वेऽपि न शास्त्रयोनित्वानुपपत्तिः। ब्रह्मणो न फलव्याप्यत्वमित्यत्र श्रुतिमपि प्रमाणयति- ***तथा च शास्त्रमिति***॥ यस्य ब्रह्म फलव्याप्यं दृश्यमिति मतम्, स ब्रह्म न जानाति, यस्य तु ब्रह्म न दृश्यमिति मतम्, तेन ब्रह्म मनोवृत्तिद्वारा साक्षात्कृतमेव। तदेव प्रकारान्तरेणाह- ***अविज्ञातमिति***॥ भामतीमतरीत्या तूक्तश्रुतेरयमर्थः-य आत्मानमहमिति विषयतया गृह्णाति, तेनात्मा न ज्ञातः, यस्तु अहमित्यात्मानं न मन्यते, किन्तु अविषयतया शास्त्रेण, स विजानातीति। अनेन च शास्त्रेणात्मस्वरूपं न शब्दप्रमाणजन्यवृत्तिभास्यमिति बोध्यते। न हि प्रत्यगात्मतयाऽऽत्मस्वरूपभानावसरे तत्र प्रमातृत्वं वर्तते, इति प्रमाणजन्यवृत्तिभास्यत्वं तत्र विरुद्धमिति भावः। चाक्षुषादिवृत्तिभास्यत्वमात्मनः स्पष्टं श्रुतिर्निषेधतीत्याह- ***न दृष्टेरिति***॥ वृत्तेरपि भासकं चैतन्यं न वृत्तिजनकत्वेनैव शास्त्रस्योपयोगव्यवस्थापनेन न वा ब्रह्म-ज्ञानविधिविषयतयोपासनाविधिविषयतया समर्प्यते, इति व्यवस्थापितम्। सति चैवं प्रमाणपरतन्त्रत्वाद् वृत्तेर्न ब्रह्मणः प्रतिपत्तिविधिविषयत्वमिति फलितम्। तत्र च ज्ञानसाध्यत्वस्य मोक्षेऽङ्गीकारान्मोक्षानित्यत्वं कथमिति शङ्का त्वनवसरेत्याह- ***अत इति***॥ ब्रह्मभावस्यैव

मुक्तित्वाद् अविद्यानिवृत्तौ चाखण्डाकारवृत्त्याऽज्ञानादप्राप्ततयाऽवगता, सैव प्राप्ततयाऽवगम्यत इति नागन्तुकत्वं मुक्तेरिति नानित्यत्वदोष इति भावः। अनित्यत्वापत्तिरियं परमत एवेत्याह- ***यस्येति***॥ एतावता च वृत्तिकारमते मोक्षानित्यत्वापत्तिः उपासनास्वरूपनिष्कर्षः, मोक्षनित्यत्वं च प्रदर्शितम्। साम्प्रतं मोक्षस्य प्राप्यत्वं संस्कार्यत्वं वा न संभवतीति प्रतिपादयति- ***न चाप्यत्वेनेति***॥ अन्यदन्येन प्राप्यते। मोक्षस्तु स्वात्मरूपं कथं प्राप्यतामर्हतीति भावः। *ननु* वृत्तिकारमते निर्विशेषवादेऽपि ब्रह्मव्यतिरिक्त एव जीवः स्वीक्रियत इति पूर्वमेवोक्तम्। तथा च तन्मते कथं न प्राप्यत्वं ब्रह्मणः? इत्याशङ्क्याह- ***स्वरूपेति***॥ मोक्षासंस्कार्यत्वमनुवदति-- ***नापीति***॥ संस्कारो हि त्रिविधो लोके दृश्यते-गुणाधानम्, संस्कार्यगतदोषनिर्हरणम्, अनभिव्यक्तसंस्कार्यस्वरूपाभिव्यक्तिरिति। तत्र ब्रह्मणि त्रिविधोऽपि संस्कारो न भवतीत्याह- ***न तावदित्यादिना***॥ अनभिव्यक्तस्वरूपाभिव्यक्तिः क्रियाश्रयत्वं विना नोपपद्यते। क्रियाश्रयत्वे चानित्यत्वापत्तिरित्याह- ***नेति***। **प्रसज्येतेति***॥ **तच्चानिष्टमिति च***॥ *ननु* अन्याश्रययाऽपि क्रिययाऽन्यः संस्क्रियमाणो दृश्यते, यथा स्थाण्वाहुत्या यूपः; शुचौ देशे स्वीयमालाधारणेन यजमानस्य सन्तोषः, देहाश्रयया स्नानाचमनादिक्रियया देहिन आत्मनः संस्कारश्चेत्यन्याश्रयया क्रिययाऽन्यो न संस्क्रियत इति न नियमः; व्यभिचारादित्यभिप्रायेण शङ्कते- ***नन्विति***॥ **देहाश्रयेति***॥ प्रत्यक्षं चेदं स्नानाचमनादिकं देहनिष्ठमिति; अन्यथा स्नानादेरात्माश्रयत्वे हि देहवदात्मनोऽप्यनित्यत्वापत्तिरिति भावः। *ननु* संस्कारोऽपि मलनिर्हरणादिर्देहादिगत एवेति न व्यभिचार इत्यत आह- ***देहीति***॥ स्नानादिनाऽहं शुद्ध इति हि सर्वेऽप्यनुभवन्ति। नचाहंपदार्थः शरीरम् 'अहं जानामी'ति, प्रतीत्यनुपपत्तेरिति भावः। *ननु* केवलं शरीरं न स्नानादिक्रियाश्रयम्, कर्तैव हि क्रियाश्रयः। न हि शरीरमचेतनं कर्तृतामर्हति। अत आत्मैव स्नानाचमनादेरपि कर्तेति स्वीकर्तव्यम्। स्नानाचमनादीनां शरीरगतत्वप्रत्यक्षेण सत्यं शरीरस्यैव तानि धर्मा इति प्रतीयन्ते; तथाऽपि शरीरसम्बन्धादात्मन्यपि संस्कारो भवितुमर्हति, अन्तःकरणोपहितस्यैवात्मनः शरीरोपहितत्वमप्यध्यासनिबन्धनं वर्तते। तथा च शरीरात्मनोः परस्पराध्यासाद् धर्माणामपि परस्पराध्यासेन-स्नानाचमनादीनां तत्फलस्य संस्कारस्य चाध्यासाद् आत्मधर्मत्वाभिमानोऽपि न दोषाय। अयमत्र निष्कर्षः-स्वाश्रया स्वसबन्ध्याश्रया वा क्रिया स्वं संस्कुरुते; स्वासम्बन्ध्याश्रा तु क्रिया न स्वं संस्कुरुत इत्येव नियमः। ''स्थाणौ स्थाण्वाहुतिं जुहोति''इति विहितस्थाण्वाहुतिरपि स्थाणुपदेन यूपार्थं खण्डितवृक्षावयवस्यैव ग्रहणात् तस्य च यूपसम्बन्धाद् यूपसंस्कारार्था भविष्यति। एतेन शुचौ देशे स्थापिता देवदत्तधारिता मालाऽपि व्याख्याता। सापि हि देवदत्तधारितैवासीदिति देवदत्तसम्बद्धैव। निर्विशेषचैतन्यन्तु निःसंगत्वाद् न केनापि सम्बद्धमिति नान्याश्रयया क्रियया संस्कार्यतामर्हतीति न संस्कार्यत्वं कथमपीत्यभिप्रायेण समाधत्ते- ***नेति***। **देहसंहतस्येति***॥ अध्यासेन देहादितादात्म्यापन्नस्येत्यर्थः। तदेवोपपादयति- ***प्रत्यक्षं हीति***॥ **युक्तमिति च***॥ न केवलमदृष्टार्थक्रियायामेवैवं दृश्यते, किन्तु दृष्टार्थक्रियायामपीत्याह- ***यथा देहाश्रयेति***॥ तदेवमाध्यासिकं क्रियाश्रयत्वमात्मनोऽपि

तत्संस्कार्यत्वस्थले वर्तत इत्यमुं विषयं दार्ष्टान्तिके समन्वयपूर्वकमुपसंहरति- ***एवं स्नानाचमनेति** *।। न देहः कर्ता, किन्तु तत्तदात्म्यापन्नोऽहंप्रत्ययविषय आत्मैव, स एव च भोक्तापि, इति न कुत्राप्यकर्तुस्तदसम्बन्धिनो वा भोक्तृत्वम्। अत्रैव श्रुतिमपि प्रमाणयति- ***तयोरिति** *।। *तयोः* जीव-परमात्मनोः *अन्यः* एकतरो जीवात्मेत्यर्थः। *स्वादु पिप्पलम्* सुखरूपं कर्मफलम्। इदमुपलक्षणं दुःखस्याधर्मफलस्यापि। *अन्यः=एकतरः, परमात्मा प्रत्यगात्मा वा। *अनश्नन्* कर्मफलमभुञ्जानः। *अभिचाकशीति* प्रकाशते। अनेनाहं प्रत्ययविषयो भोक्ता, चैतन्यमात्रं न भोक्तृ, इति प्रतिपादनेन जीवस्य शरीरादिभिः सम्बन्धो भवति, निर्विशेषस्य तु नेति सूच्यते। अत्र निर्विशेषस्याभोक्तृत्वबोधनेऽपि तात्पर्यं तु जीवभोक्तृत्ववर्णन एवेति भाष्यकारा मन्यन्ते। अत एव-तत्फलं च स एवाश्नातीत्येतदुपष्टम्भकतयैवास्य मन्त्रस्य निर्देशः, इति मन्त्रवर्णाद् इति मन्त्रवर्णशब्दप्रयोगश्चोपपद्यते। मन्त्रवर्णशब्दो हि मन्त्रतात्पर्यमादायैव प्रयुज्यते, न तु प्रतीमयमानं सर्वमर्थमादाय। अत एव-देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामी''ति मन्त्रो मन्त्रवर्णान्निर्वापाङ्गमिति व्यवहारः। *ननु*-''तयोरन्यः'' इति वाक्यं न जीवपरम्, किन्तु जीवव्यतिरिक्तपरमात्मस्वरूपनिरूपणपरम्। तथा च जीवभोक्तृत्वादावपि न तात्पर्यमित्याशङ्कायां श्रुत्यन्तरमत्र प्रमाणयति- ***आत्मेन्द्रियेति** *।। **शरीरेन्द्रियमनोयुक्तम्** * अन्तःकरणेन्द्रिय-शरीरतादात्म्यापन्नम्। आत्मानमिति शेषः। भोक्तेत्याहुरिति स्पष्टम्। तथा च भोक्तृत्वं शरीरादितादात्म्यापन्नस्यैव, न तु चैतन्यमात्रस्य, न वा देहमात्रस्येति भावः। निर्विशेषस्य तु न भोक्तृत्वमित्यत्र द्वौ मन्त्रौ प्रमाणयति- ***एको देव इति** *।। ***स पर्यगादिति च** *। *सर्वभूतेष्वेकः=अद्वितीयः। *देवः=स्वयंप्रकाशः। गूढः=अविद्ययाऽऽवृतः। *सर्वव्यापी=व्यापकः। अत एव प्रत्यगभिन्नः। *सर्वभूतान्तरात्मा*।। जीवाभेदोऽयमुपाध्यनुपहितेन रूपेण नोपहितेन रूपेणेति सूचनार्थमाह- ***कर्माध्यक्ष इति** *।। कर्मसाक्षी न तु कर्मकर्तेत्यर्थः। साक्षित्वं चेदं सर्वभूताधिष्ठानत्वेन, न तु स्वयं द्रष्टृत्वेन; दृग्रूपस्य तस्य द्रष्टृत्वाभावादित्याह- ***सर्वभूताधिवास इति** *।। सर्वभूताधिष्ठानरूप इत्यर्थः। तथा च साक्षित्वमपि तस्य कल्पितमिति भावः। तथा च कर्माध्यक्ष इति पदविवरणार्थमेव सर्वभूताधिवासः साक्षीति पदद्वयमिति भावः। साक्षित्वं हि अकर्तुर्द्रष्टुरेव लोके प्रसिद्धमिति सूचयन्नाह- ***चेता निर्गुणश्चेति** *।। ***स पर्यगादिति** *।। *सः=आत्मा। *पर्यगात्=सर्वं व्याप्तः। *शुक्रः=स्वयंप्रकाशः। *अकायः=लिङ्गशून्यः। *अव्रणः=अक्षतः। नपुंसकत्वमार्षम्। *अस्नाविरम्=शिराविधुरः अनिवश्वर इति वा। *शुद्धः=रागादिदोषशून्यः। *अपापविद्धः=अपहतपाप्मा। एतन्मन्त्रद्वयकृत्यमत्रोपयुक्तमाह- *इति चैतौ मन्त्राविति*।। *ननु* ब्रह्मणोऽनाधेयातिशयत्ववर्णनेन मोक्षस्य किमायातमिति? अत आह- ***ब्रह्मभावश्चेति** *। तदेवमुत्पाद्यत्व-विकार्यत्वप्राप्यत्व-संस्कार्यत्वरूपं साध्यत्वं मोक्षस्य न संभवतीति व्यवस्थापितम्। *ननु* तर्हि अन्येन द्वारेण मोक्षस्य नित्यस्यैव क्रियासम्बन्धो भवत्वित्यत आह- **अतोऽन्यदिति** *।। *अतः=उत्पाद्यत्व-विकार्यत्व प्राप्यत्व-संस्कार्यत्वेभ्यः। *अन्यत्

द्वारम्=साध्यत्वरूपमिति शेषः। *ननु*-तर्हि ज्ञानसाध्योऽपि मोक्षो न स्यात्; उक्तानामुत्पाद्यत्वादीनां भवन्मतेऽप्युपपादनासंभवादित्यत आह-***तस्माद् ज्ञानमिति***॥ न वयं ज्ञानं मोक्षसाधनं मन्यामहे, किन्त्वविद्यानिवृत्तिमात्रजननार्थमिति साक्षान्मोक्षोत्पादकत्वादिकं ज्ञानस्य नोरीक्रियते। ज्ञानसाध्यो मोक्ष इति व्यवहारस्तु प्राप्तस्यैव तस्याप्राप्तत्वभ्रमनिवर्तकत्वेन, इति कथंचन विनापि साध्यत्वं द्वारान्तरेण ज्ञानस्य सम्बन्धो भवितुमर्हति मोक्षेण, न तु क्रियायाः। न हि ज्ञानमिव क्रियाऽपि प्राप्तस्यैवाप्राप्तत्वभ्रमनिवर्तनक्षमेति क्रियायामेतद् द्वारमसंभवीति भावः। *ननु* यदि क्रियायामप्राप्तत्वभ्रमनिवर्तकत्वं न संभवति, तर्हि ज्ञानस्यापि तत् कथम्? तस्यापि क्रियात्वाविशेषादित्याशयेन शङ्कते- ***ननु ज्ञानमिति***॥ ज्ञानं मानसंक्रिया खलु इति योजना। ज्ञाने मानसक्रियात्वं प्रसिद्धमित्यर्थः। संकल्पविशेषात्मत्वाद् ज्ञानस्य, ''संकल्पः कर्म मानसमि''ति कोशात् तस्य मानसक्रियात्वं प्रसिद्धम्। अत एव जानातीति तिबाद्युपपत्तिः। अन्यथा जानातेः क्रियावाचित्वाभावेन धातुत्वमेव न स्यादिति भावः। ***क्रियेति***॥ तथा च तत्राप्यतोऽन्यन्मोक्षस्य क्रियानुप्रवेशद्वारं न शक्यं केनचिद् इत्यस्याध्याहारेण वाक्यं पूरणीयम्। सति चैवं क्रियात्वेन साम्यात् साध्यत्वादिद्वारमेव ज्ञानस्यापि मोक्षेणान्वयः स्वीकर्तव्य इति दूषणसाम्यापादनमेवात्र विवक्षितम्। अनेन च ज्ञानम्, विधेयम्, मानसक्रियात्वात्; ध्यानवदित्यनुमानप्रयोगो विवक्ष्यते। *ननु*-क्रिया हि मानसी द्विविधा दृश्यते-एका पुरुषव्यापाराधीना पुरुषतन्त्रा, इतरा तु प्रमाणव्यापाराधीना वस्तुतन्त्रा चेति। तत्र वस्तुतन्त्रायां क्रियायामेव ज्ञानपदप्रयोगः, नेतरस्याम्। तत्र प्रथमा विधेया, न तु द्वितीया। उत्पाद्यत्वादिसाध्यत्वद्वोरण विधेयक्रियायामेव साध्यस्यान्वयः स्वीक्रियते, नाविधेयक्रियायाम्। साध्य-साधनभावो हि विधावेव प्रतीयते, न ज्ञानमात्रे। सति चैवं क्रियात्वेन साम्येऽपि ज्ञानस्योपासनया विधेयत्वाविधेयत्वाभ्यां वैलक्षण्यात्तयोर्वैलक्षण्याद् न क्रियानुप्रवेशद्वारमपि समानं भवितुमर्हति, इति न दूषणसाम्यापादनमत्रावसरतीत्यभिप्रायेण समाधत्ते- ***नेति***॥ नशब्देन ''अतोऽन्यत् साध्यत्वादिच-तुष्टयादपरं द्वारं ज्ञाने न संभवती''त्यस्य निषेधः क्रियते न तु क्रियात्वस्येति भावः। तथा च क्रियात्वेऽपि ज्ञानस्य विधेयत्वाभावाद् नोत्पाद्यत्वादिरूपेणैव साध्यत्वेनान्वयनियमस्यात्रावसर इति फलति। अनेन च ज्ञानम्, न विधेयम्, वस्तुतन्त्रत्वात्, यन्नैवं तन्नैवमिति सत्प्रतिपक्षानुमानं प्रदर्शितम्। तथा च ज्ञानम्, विधेयम्, मानसक्रियात्वादिति पूर्वपक्षिणामनुमानमप्रयोजकमिति भावः। वस्तुतन्त्रहेतुकानुमाने व्यतिरेकव्याप्तिं प्रदर्शयितुमुक्तमेव वैलक्षण्यं विशदयति- ***क्रिया हि नामेति***॥ यत्रपदे प्रथमायां त्रल्प्रत्ययः। इयमत्र योजना-*यत्र=या वस्तुस्वरूपनिरपेक्षैव पुरुषव्यापाराधीना च *सा नाम क्रिया=सैव क्रिया चोद्यते हीति। ध्यानादौ पुरुषतन्त्रत्वादेव विधेयत्वं दृष्टमित्याह- ***यथेति***॥ *ननु* ध्यानमपि न विधेयम्, वस्तुतन्त्रत्वात्; ज्ञानवदित्याशङ्क्याह- ***ध्यानमिति***॥ ***पुरुषतन्त्रत्वादिति***॥ वस्तुतन्त्रत्वरूपहेत्वसिद्ध्या न ध्यानाविधेयत्वसिद्धिरिति भावः। तथा च व्यतिरेकव्याप्तौ ध्यानदृष्टान्तत्वमुपपन्नमिति भावः। ज्ञाने वस्तुतन्त्रत्वमुपपादयति- ***ज्ञानमिति***॥ ***वस्तुतन्त्रमेव तदिति च***॥ अनेन च ज्ञानं न विधेयमिति

सत्प्रतिपक्षानुमानस्यैव हेत्वसिद्ध्यभावेन साधुत्वमिति ज्ञाप्यते। अनुमानसाधुत्वे चानुमितिरप्यप्रतिहतोदेतीत्यभिप्रायेणाह- ***न चोदनातन्त्रमिति***॥ प्रकृतं ज्ञानगतं क्रियावैलक्षण्यमुपसंहरति- ***तस्मादिति। *मानसत्वेऽपि**॥ ज्ञानोपासनयोरिति शेषः। मानसक्रियात्वेऽपि। ***महद्वैलक्षण्यम्***॥ वस्तुतन्त्रत्व-पुरुषतन्त्रत्वादिरूपमित्यर्थः। ज्ञाने वस्तुतन्त्रत्वमुपासनायां पुरुषतन्त्रत्वं च सोदाहरणं प्रदर्शयितुं प्रथममुपासनां पुरुषतन्त्रां प्रदर्शयति- ***यथा चेति।** *केवलचोदनाजन्यत्वात्=वस्तुतन्त्रत्वमनपेक्ष्य विधिबोधितत्वात्। न हि योषायामग्नित्वं विद्यते, इति वस्तुतत्त्वमनपेक्ष्यैवेयं चोदना प्रवर्तत इति भावः। ''क्रियैव से''ति विधेयत्व-पुरुषतन्त्रत्वादिकं ज्ञाप्यते। ज्ञानेऽविधेयत्वं वस्तुतन्त्रत्वं च विधेयत्व-पुरुषतन्त्रत्वनिषेधपुरःसरं प्रतिपादयति- ***यत्त्विति***॥ **न चोदनातन्त्रा***॥ वस्तुतत्त्वमपेक्ष्योत्पन्नत्वादित्यर्थः। *ज्ञानमेव=अविधेयमानसक्रियैव। *तत्=ज्ञानम्। दृष्टान्तसमन्वयानन्तरं दार्ष्टान्तिके ब्रह्मात्मैकत्वविज्ञानेऽपि चोदनाऽतन्त्रत्वादिकमुपपादयति- ***तत्रैवं सतीति***॥ तदेवं ज्ञानमानसक्रियात्वाविशेषप्रश्नसमाधानग्रन्थसन्दर्भः सर्वोऽपि भामतीमतानुसारेण योजितः। अस्मिन् पक्षे स्वरसानि भाष्यवाक्यानीमानि-''**केवलं वस्तुतन्त्रमेव तत्, न चोदनातन्त्रम्। या तु प्रसिद्धेऽग्नावग्निबुद्धिः, न सा चोदनातन्त्रा नापि पुरुषतन्त्रा च**''।

अस्मिन् हि मते-''**क्रिया हि नाम सा, यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते पुरुषव्यापाराधीना च**'', ''**ज्ञानमेव तत्, न क्रिया**'' इति वाक्यद्वयं क्लिष्टयोजनयैव व्याख्येयम्, यतो ज्ञानस्य क्रियात्वनिषेध एव प्रतीयते, न तु चोदनातन्त्रत्वनिषेधः। अतो विवरणानुयायिनः-''**न; वैलक्षण्यादि**''**ति** ग्रन्थसन्दर्भं ज्ञानस्याक्रियात्वपरतया योजयन्ति। तन्मते तु *या=वस्तुस्वरूपनिरपेक्षैव चोद्यते, चोदनातन्त्रा पुरुषव्यापाराधीना च=सा हि नाम क्रिया, यथा ध्यानम्। ध्यानस्यापि मानसत्वादक्रियात्वं तु न युक्तमित्याह- ***तथापि पुरुषेणेति***॥ ज्ञानस्य क्रियात्वनिषेधार्थं पुरुषतन्त्रत्वं चोदनातन्त्रत्वं च निषेधति-**केवलं वस्तुतन्त्रमेव तत्, न चोदनातन्त्रमिति।** तथा च मानसत्वेन साम्येऽपि क्रियात्वेन न साम्यमिति बोधनार्थम्- ***मानसत्वेऽपीति***। ग्रन्थः। ''ज्ञानमेव तत्'' इति त्वग्नावग्निज्ञानं ज्ञानमेव, न तु क्रियेत्युपसंहारः। ''तत्रैवं सती''ति वाक्ये न चोदनातन्त्रमित्युपसंहारः, ''अतो न क्रिये''ति पूरणेन व्याख्येयः, इति प्रकृतं ग्रन्थसन्दर्भं योजनीयं मन्यन्ते। इदं हि क्रियात्वं क्रियात्वेन नैयायिकादिप्रसिद्धानां क्रियानामेव। ज्ञानन्तु गुणत्वेनैव ते मन्यन्ते। धातुसंज्ञा तु पारिभाषिकं वैयाकरणाभिमतं क्रियात्वमादायोपपद्यते।।

अयं हि ग्रन्थसन्दर्भो वृत्तिकारमतनिरासार्थः, इति तन्मते ''श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'' इत्यत्र श्रवणादौ विधेरनङ्गीकारेण दर्शन-श्रवण-मननानां ज्ञानरूपत्वस्य स्वीकारात् तन्मतानुसारेणोत्तरं दातव्यमित्यभिप्रायेण प्रवृत्तः, न तु स्वमतानुसारेणेति वक्तव्यम्। अत एव द्रष्टव्यः श्रोतव्यो मन्तव्य

इत्यादीनामविधित्वसिद्धन्तोऽपि भाष्यकाराणां न श्रवणादिनियमविधित्वपक्षप्रतिरोधी। यतः कृत्वाचिन्तयैवायं भाष्यसन्दर्भः प्रवर्तते, न तु वस्तुगत्या। अत एतद्भाष्यप्राधान्युमपजीव्य श्रवणादावविधित्वपक्षो भामत्यनुयायिनां न भाष्याशयानुसारीति गम्यते। श्रवणादिविधित्वपक्षस्तु सत्यं श्रवणादिक्रियात्वं विना नोपपद्यत इति प्रमाणतन्त्रमपि श्रवणादिज्ञानं क्रियारूपमपीति स्वीकर्तव्यम्। तथा च श्रवणादीनां क्रियात्वमविधेयत्वं चेति विरुद्धमिदमिति,-अक्रियात्वपक्षेणैव भाष्ययोजनं कर्तव्यमिति विवरणमतनिष्कर्षः। तथा च "सहकार्यन्तरविधिरि"ति सूत्रभाष्ये "बाल्यपाण्डित्यादिवद्विधिरेवे"ति भाष्ये पाण्डित्यशब्दशब्दितश्रवणस्य विधेयत्वनिर्देशेन श्रवणादिक्रियात्वपक्षस्य स्वमतरीत्या सूचनेऽपि न हानिः। स्वमते विधेयत्वेऽपि श्रवणादेः, श्रवणादिजन्यज्ञानस्य साक्षात्कारस्य फलरूपस्य प्रमाणतन्त्रत्वाद् उत्पाद्यत्वादिचतुर्विधद्वारातिरेकेणापि ब्रह्मणो मोक्षस्य वा ज्ञानान्वयो न दोषाय। द्रष्टव्य आत्मा श्रोतव्य इति वाक्येन श्रवणादिजन्याखण्डाकारवृत्तिरित्येव विवक्ष्यते, न तु आत्मा श्रोतव्यो मन्तव्य इति च, इति न श्रवणादिविषयतयाऽप्यात्मा विवक्ष्यते। श्रवणं नाम वेदान्तानां तात्पर्यावधारणानुकूलन्यायविचारः, मननं नाम विरोधियुक्तिनिरासानुकूलतर्कात्मकज्ञानजननानुकूलव्यापारः, इति हि विवरणानुसारिणां मतम्। तथा च विरोधिशङ्कानिरासपूर्वकेण निदिध्यासनपूर्वकेण च वेदान्तविचारेणात्मसाक्षात्कारो भवतीत्येवार्थः, इति न साक्षात्कारातिरिक्तक्रियाकर्मत्वमात्मनः कुत्रापि स्वीक्रियते। तथा चाद्वैतमते श्रवणादिवत् साक्षात्कारस्यापि क्रियात्वमभिप्रेत्य- *ननु* ज्ञानं नाम मानसी क्रियेति शङ्कायाम्, श्रवणादीनां क्रियात्वेऽपि साक्षात्कारो न क्रियेति सिद्धान्तेन साधानभाष्यं प्रवृत्तमिति वस्तुस्थित्यनुसारेणापि भाष्ययोजनं संभवति, परन्तु श्रवणाद्यविधिव्यवस्थापनपरभाष्यविरोधी भवतीति कृत्वाचिन्तयोक्तग्रन्थप्रवृत्तिरिति वक्तव्यम्। अतो भामतीकाराः श्रवणादीनां सत्यं क्रियात्वं स्वीकुर्मः, परन्तु न विधेयक्रिया सेति विवरणमेव युक्तमिति मन्यन्ते। एतन्मते आत्मा द्रष्टव्यः, आत्मा श्रोतव्यः, आत्मा मन्तव्यः, आत्मा निदिध्यासितव्य इति सर्वत्रात्मनोऽन्वयः। तथा च ज्ञानकर्मत्वेऽपि ब्रह्मणो नोपासनाकर्मत्वमित्येव प्रकृतभाष्यसन्दर्भो योजनीयः। विवरणमते हि वृत्तिकाराणां शङ्का भाष्यमतमनुसृत्य, समाधानं तु भाष्यकाराणां वृत्तिकारमतमनुसृत्य। भामतीमते तु स्वमतमनुसृत्यैव समाधानमपीति न वैरूप्यम्। श्रवणादिविधिनिरासोऽपि हि स्वमतदृष्ट्येति कल्पनमेव स्वरसं भवति। मतद्वयेऽपि श्रवणादीनां क्रियात्वपक्षमभिमतं गृहीत्वैव भाष्ययोजनमेव तु युक्तमिति प्रतिभाति। *"ननु* ज्ञानं नाम मानसी क्रिये"ति शङ्का हि न साक्षात्कारमादाय, यतो न वृत्तिकारा न वा भाष्यकाराः साक्षात्कारं विधेयं मन्यन्ते। सति चैवं क्रियाया अपि ज्ञानस्याविधेयताबोधनार्थमेवेदं प्रकरणम्, न तु ज्ञानक्रियात्वनिषेधार्थम्। **"तस्माद् ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते"** इति भाष्यं हि ज्ञानं मुक्त्वेति ज्ञानव्यावर्तनेन स्पष्टं ज्ञानक्रियात्वपक्षमेव सूचयति। अत एवोत्तरग्रन्थोऽप्युपपद्यते- ***अतस्तद्विषये लिङादयः श्रूयमाणा अपीति।*** *तद्विषये=श्रवण-ममन-निदिध्यासनविषय इत्यर्थः॥

लिङादय इत्यादिपदेन तव्यप्रत्ययादीनां ग्रहणम्। *अनियोज्यविषयत्वात्=फलकामरूपाधिकारिशून्यत्वात्। फलकामो ह्यधिकारी। कामना हि न सिद्धे भवति, किन्तु साध्य एव। मोक्षस्तु ब्रह्मरूपो न साध्यः, इति तदुद्देशेन दर्शनं न विधेयम्। यद्यपि साक्षात्कारः श्रवणफलम्; तथाऽपि न स पुरुषप्रवृत्तिप्रयोज्यः, किन्तु प्रमाणतन्त्र इति न तत्कामोऽपि नियोज्यः। सति चैवं क्रियात्वेऽपि श्रवणादेः श्रोतव्यो मन्तव्य इति न विधिः। सिद्धार्थपरोऽप्यविधायकस्तव्यप्रत्ययान्तो बहुश एव दरीदृश्यते। यथा-''विष्णुरुपांशु यष्टव्यः, अग्नीषोमावुपांशु यष्टव्यौ, प्रजापतिरुपांशु यष्टव्यः'' इति, मन्त्रलिङ्गेनैव विष्ण्वादिदेवताप्राप्तेर्न देवताविधिपरम्। ''उपांशुयाजमन्तरा यजती''ति वाक्येनैव यागोऽपि प्राप्त इति नाप्ययं यागविधिः। न च विनिगमनाविरहात्-''उपांशुयाजमन्तरा यजती'' त्येवानुवादः, विष्ण्वादिशक्यानि तु विधायकानि; सति ह्येवं यागबहुत्वापत्त्या वाक्यभेदः समापद्येत। इदमेव तु फलितम्-यदविवक्षितार्थस्तव्यप्रत्ययः, इति यागस्तुतिरेव विष्ण्वादिवाक्यफलम्। व्यक्तं चेदमुपांशुयाजाधिकरणे द्वितीयद्वितीये। सति चैवं ''श्रोतव्यो मन्तव्यः'' इत्यादि विधेयाभावेऽनुवादमात्रं भवति। अनुवादप्रयोजनन्त्वनुपदमेव भाष्ये विशदीभविष्यति। सर्वथा तु न क्रियाविधिशेषो ब्रह्म। तदिदमाह- ***कुण्ठीभवन्तीति***॥ विधिशक्तिक्षयात् केवलमनुवदरूपा भवन्तीति भावः। तत्र हेतुमाह- ***अहेयानुपादेयवस्तुविषयत्वादिति***॥ हेयोपादेयवस्तुविषयत्वाभावादित्यर्थः। अनुवादप्रयोजनमाक्षेप-समाधानाभ्यां विवेचयति- ***किमर्थानीति***॥ विधिच्छायापन्नानि=क्षणविधिशक्तिकानि; अनुवादरूपाणीति यावत्। आत्मस्रोतस्तया बहिर्मुखानां प्रवर्तनं विधिसरूपाणामेषां प्रयोजनमित्याह- ***स्वभाविकेति***॥ स्वाभाविका ये प्रवृत्तिविषया वैषयिकसुखादयः, तेभ्यः। तदभिमुखानां विमुखीकरणार्थानीत्यर्थः। विमुखीकरणकर्म तु सङ्ग्रहवाक्येनोल्लिखितमिति तस्यापि योजनेन संग्रहवाक्यं विवृणोति- *यो हीति*॥ अथवा स्वाभाविकः स्वभावत एव प्रवर्तमानः, प्रवृत्तेर्विषयाः प्रवृत्तिविषयाः, प्रवृत्तिविषयेभ्यो विमुखीकरणम्, प्रवृत्तिविषयविमुखीकरणम्। स्वाभाविकस्य प्रवृत्तिविषयविमुखीकरणमिति। विमुखीकरणं चात्मस्रोतस्तया प्रवर्तनपर्यन्तमेव सप्रयोजनमिति विमुखीकरणम्, अर्थः प्रयोजनमित्येव विग्रहो विवक्षित इति सूचयन्नाह- ***विमुखीकृत्यात्मस्रोतस्तया प्रवर्तयन्तीति***॥ आत्मस्रोतस्ता नाम=आत्माभिमुखचित्तवृत्तिप्रवहणम्। स्रोतस्तयेति फले तृतीया। तथा चोक्तविधचित्तवृत्तिप्रवाहो भवत्विति भावेन प्रवर्तनमेव श्रोतव्यादिवाक्यकृत्यमिति भावः। आत्मज्ञानमनुष्ठानानङ्गत्वेऽपुरुषार्थं स्यादिति शङ्कामनूद्य, तस्य तदनङ्गत्वापादनं भूषणमेव, न तु दूषणमित्याह- ***यदपीत्यादिना***॥ ***तथा च श्रुतिरिति***। यथा चानुष्ठानानङ्गत्वं भूषणमेव, तथा श्रुतिरप्याहेत्यर्थः। तदेवं ब्रह्मणः प्रतिपत्तिविधिविषयत्वेऽनुपपत्तिप्रदर्शनेन ब्रह्मणः केवलं ज्ञेयत्व एव वेदान्तानां तात्पर्यमिति विवेचितमुपसंहरति- ***तस्मादिति***। साम्प्रतम्-''**अज्ञातसङ्गतित्वेन शास्त्रत्वेनार्थवत्तया। मननादिप्रतीत्या च कार्यार्थाद् ब्रह्मनिश्चयः**'' इति संग्रहश्लोकोक्तरीत्या

वृत्तिकारापादिताः सिद्धब्रह्मस्वरूपबोधमात्रपर्यन्तत्वे वेदान्तानामनुपपत्तीः स्वमतशुद्ध्यर्थमनूद्य परिहरति- ***यदपीत्यादिना* *।।** तत्र प्रथममज्ञातसङ्गतित्वरूपामनुपपत्तिमनुवदति- ***यदपि केचिदिति* *।।** केचित्=वृत्तिकारादयः। वेदवाक्यं हि प्रमाणमेव नाप्रमाणमिति हि वस्तुस्थितिः। प्रामाण्यं हि लौकिकानां वैदिकानां च प्रवृत्तिविधिविषयत्वेन निवृत्तिविधिविषयत्वेन प्रवृत्ति-निवृत्त्यन्यतरान्वितसिद्धवस्तुबोधकत्वेन वा। सिद्धवस्तु वाक्येन कार्य-तदन्वितान्यतरमात्रबोधकेन बोध्यत इति व्याहतमिदम्। अतस्तत्त्वमसीत्यादीनां वेदवाक्यत्वं वा नास्तीति वक्तव्यम्। अथवा कार्यादिपरत्वमित्यभिप्रायेण वृत्तिकारा अज्ञातसङ्गतित्वेन कार्यार्थाद् ब्रह्मनिश्चय इति मन्यन्ते। तदिदं विशदमनुवदति- ***प्रवृत्तीति* *।।** प्रवृत्तिश्च- निवृत्तिश्च प्रवृत्तिनिवृत्ती, तयोर्विधिः प्रवृत्तिनिवृत्तिविधिः, तस्योक्तविधेः शेषः, साध्यत्व-साधनत्वान्यतररूपेण तदन्वितत्वम्। विधिश्च तच्छेषश्च विधि-तच्छेषौ। तयोर्व्यतिरेकेण=तदभावेन बोधकतासम्बन्धेन तदभावविशिष्टो वेदभागो नास्तीति योजना। वेदभागे तु न नियतप्रामाण्यकवाक्यलेशोऽपि न स्यादित्यर्थः। *ननु* किमनेन विवक्ष्यते-ब्रह्मणः कार्यानन्वये ब्रह्मस्वरूपमेव न सिद्ध्येदिति? अथवा तद्बोधकं वेदवाक्यं केवलमनुवादरूपमप्रवर्तकत्वान्निष्प्रयोजनमिति? तथा चाबोधकत्वमेव वेदान्तानां किं विवक्ष्यते? उत बोधकस्यापि तस्य निष्प्रयोजनत्वादप्रामाण्यमिति। तत्र ब्रह्मस्वरूपमेव न सिद्ध्येदिति वा, वेदान्तवाक्यान्यबोधकानीति न वक्तुं शक्यते। ''पुत्रस्ते जातः, कन्या ते गर्भिणी'' त्यादिवाक्यानामिव सुखपर्यवसायिज्ञानजनकत्वात् सिद्धवस्तुपरमपि वेदान्तवाक्यं नावबोधकम्। यथा च विनापि विधिवाक्यं प्रवृत्ति-तच्छेषव्यतिरेकं वा वेदवाक्यानां प्रामाण्यं वृत्तिकारैरपि वक्तव्यम्, तदनुपदमेव विशदीकरिष्यते भाष्य एव। एतावत्तु साम्प्रतं प्रतिपाद्यते-प्रत्यगभिन्नं ब्रह्म वेदान्तबोध्यमसत्कल्पं वेति न युक्तमित्यभिप्रायेण समाधत्ते- ***तन्नेति* *।।** केवलवस्तुवादी वेदभागो नास्तीति तु नेत्यर्थः। कथं न कर्मवाक्यानामिव ब्रह्मवाक्यानामपि क्रियापरत्वमिति? अत आह- ***औपनिषदस्येति* *।।** वेदान्तप्रमाणकाखण्डाकारसाक्षात्कारविषयस्येति, अथवा वेदान्तद्वारकमानससाक्षात्कारविषयस्येत्यर्थः। एतेन हि साक्षात्कारयोग्यमन्यशेषतयैव प्रतीयत इति न नियमः। यथा चक्षुरादिज्ञाप्यं रूपादीति सूचनद्वारा विवादाध्यासितानि वचनानि, कार्यानन्वितभूतार्थविषयाणि भूतार्थविषयकसाक्षात्कारजनकत्वात्, चक्षुरादिवत्, इत्यनुमानप्रयोगो विवक्षितो ज्ञाप्यते। तथा च कर्मवाक्यविलक्षणत्वाद् वेदान्तवाक्यानां कर्मवाक्यन्यायेन न कार्यत्वार्थनिर्णयः कर्तुं शक्यत इति भावः। तदिदमाह- ***अनन्यशेषत्वादिति* *।।** प्रमाणतन्त्रो हि साक्षात्कारो न पुरुषतन्त्र इति साक्षात्कारजनकतयैव वेदान्तानां प्रवृत्तत्वात् पुरुषव्यापारानुद्देशेनोच्चार्यमाणानां तेषां प्रवृत्तिपरत्वं न प्रामाणिकमिति भावः। प्रत्यगभिन्नत्वाद् ब्रह्मणि साक्षात्कारयोग्यत्वं वर्तते इति सूचयन् ब्रह्मणो जीवाभेदं निरूपयति- ***पुरुषोऽसंसारीति* *।।** अत्रासंसारित्वविशेषणेनाहंप्रत्ययविषयत्वाद् भेदेनौपनिषदस्यात्मनः प्रतिपादयतीत्युपनिषत्स्वेवाधिगत इति

नानुपपन्नं प्रत्यगभिन्नत्वेऽपीति भावः। असंसारित्वादेव तु क्रियाशून्यत्वाच्चतुर्विधसाध्यत्वाभावः। अनेन न चानन्यशेषत्वं विवृतं भवति। यद्धि स्वत एव ज्ञानमात्रेण, पुरुषार्थसाधनम्, न पुरुषार्थोपायमपेक्षते, यथा गोदोहनादि, तदेवान्यशेषः, ब्रह्म तु तथा नेतरप्रकरणावगतक्रियासम्बन्धमपेक्षत इत्याह- ***स्वप्रकरणस्थोऽनन्यशेष इति***॥ अन्यशेषत्वं साध्यत्वेन साधनत्वेन वा नास्तीति तु विशेषणद्वयार्थः। अनन्यशेषेऽप्ययं नास्तीति निषेद्धुं न शक्यमित्यौपनिषदपदेन सूचितमेवार्थमाह- ***ब्रह्मणोऽहेयानुपदेयत्वादिति***॥ अहेयानुपादेयत्वमुपपादयति- *आत्मत्वादेव चेति*॥ नित्यप्राप्तत्वेन न प्राप्यत्वेनोपादेयत्वमिति भावः। उत्पाद्यत्वविकार्यत्वसंस्कार्यत्वाभावेनापि नोपादेयत्वमित्युपसंहरति- ***सर्वं हीत्यादिना***॥ *ननु* ''तं त्वौपनिषदं पुरुषं पृच्छामी''ति पुरुषस्यैवौपनिषदत्वं पृष्टम्। स च जीव एव, न तु सर्वाधिष्ठानं प्रत्यगभिन्नं ब्रह्मेत्यतः पुरुषपदेनापि सर्वाधिष्ठानमेव बोध्यत इति श्रुतिप्रमाणोपष्टम्भेन सूचयन् प्रमाणान्तरावेद्यत्वं ब्रह्मण उपसंहरति- ***तस्मादिति***॥ **उपनिषत्सु प्राधान्येनेति**॥ अनेन प्रमाणान्तराप्राप्तबोधकत्वेनोपनिषदां नानुवादत्वसंभव इति लौकिकसिद्धार्थपरवाक्यवैलक्षण्यं सूच्यते। सति चैवं लौकिको ***अत इति***॥ तदेवं स्वसिद्धान्तेनाज्ञातसङ्गतित्वेन कार्यार्थत्वमेव वेदान्तानामिति वृत्तिकारीयोपपत्तिर्निरस्ता। साम्प्रतं वेदान्तवाक्यानां कार्यार्थत्वेनैव वेदवाक्यानां प्रामाण्यमित्यत्र शबरस्वामिनः सूत्रकारा वा नानुकूलाः, यतस्ते धर्मजिज्ञासामेवाधिकृत्य कार्यार्थत्वं वेदवाक्यानां प्रतिपादयन्ति, न तु ब्रह्मजिज्ञासामधिकृत्य। तद्यदि तेषां वचनमनुसृत्य कार्यविधिपरत्वं तेषां मन्यते, तर्हि तदर्थवादत्वमेव तन्मतरीत्या वक्तव्यम्; नतु निर्गुणोपासनप्रामाण्यम्। न हि शबरस्वामिनो धर्मजिज्ञासां सूत्रयन्तः सूत्रकारा वा ब्रह्मजिज्ञासां नाम जिज्ञासान्तरमपि नियतं मन्यन्ते। असत्कल्पैव हि तन्मते ब्रह्ममीमांसा नाम, यतस्तेऽर्थवादत्वमेवोपनिषदां मन्यन्ते। ततश्च शबरस्वाम्यादयो न कथमपि वृत्तिकाराणामनुकूलाः। अत उभयसंमतमिदं वक्तव्यम्-यत् शबरस्वामिवचनानुसोरण वेदान्तवाक्यानि ब्रह्मसूत्राणि वा न व्याख्येयानीति प्रतिपादयति- ***यदपीति***॥ ***विधिप्रतिषेधशास्त्रेति***॥ ''चोदनालक्षणोऽर्थो धर्मः'' इति प्रतिज्ञायैव तदुक्तेरिति भावः। ***द्रष्टव्यमिति***॥ निर्गुणोपासनाविधिपरैर्वृत्तिकारैरपीति शेषः। वस्तुतस्तु-आम्नायस्य क्रियार्थत्वादिति क्रियार्थत्वं न क्रियारूपाभिधेयत्वम्। क्रियाशेषतया वाक्यभागः सिद्धार्थबोधकः, राजाऽसौ गच्छतीत्यादिः प्रमाणभूतो नास्तीति वक्तुं शक्यते, वैदिकस्तु नास्तीति साहसमात्रमित्याह-सिद्धवस्तुपराणामपि हि वाक्यानां भवताऽपि प्रामाण्यमूरीक्रियते, अत एव ह्युपासनाविधिशेषतया वेदान्तप्रामाण्यं व्यवस्थापितमुपपद्यते; अतः क्रियार्थत्वं क्रियाप्रयोजनत्वमित्येव वक्तव्यम्। सति चैवं सिद्धब्रह्मावबोधकत्वेऽपि वेदान्तानामविद्या-निवृत्तिरूपक्रियाप्रयोजनत्वात् प्रामाण्यमनपोढमेवेति नास्मन्मतेऽपि धर्ममीमांसासूत्रविरोध इति प्रतिपादयति- ***अपिचेत्यादिना क्रियासाधनवस्तूपदेशेनेत्यन्तेन***॥

एकान्तेन नियमेन। अभ्युपगच्छतां वृत्तिकाराणामिति शेषः। ''दध्ना जुहोती'' त्यादिभूतोपदेशानर्थक्यं भूतोपदेशानर्थक्यपदेन विवक्षितम्। इदंप्रतिपत्तिविधिविषयताशास्त्रेण ब्रह्म समर्प्यत इति स्वसिद्धान्तयोगस्याप्युपलक्षणम्। यत उपासनायां ब्रह्मणः करणत्वेनैवान्वयः स्वीकर्तव्यः। ब्रह्मोपासनेन ब्रह्म प्राप्यत इति खलु वक्तव्यम्, न तु केवलेन निर्विषयेणोपासनेन। तत्र च ब्रह्मोपदेशोऽपि कर्तव्य एवेति हृदयम्। *प्रवृत्तिनिवृत्तिविधिव्यतिरेकेण* कार्यातिरेकेण। भूतं दध्यादि द्रव्यम्। तथा च कार्य एव पदानां सङ्गतिग्रह इति नियमस्य दध्यादिपदे व्यभिचारः। अनेकपदबोधितैकप्रयोजनवत्पदार्थबोधकत्वमेकवाक्यत्वम्। अत एव ''आयुर्यज्ञेन कल्पताम्, प्राणो यज्ञेन कल्पतामि''ति भिन्नाविमौ मन्त्रौ। अन्यथैकाभिधेयबोधकत्वेऽपि कुत्रापि नैकवाक्यत्वमिति शाबरभाष्ये वाक्यैक्याधिकरणे व्यक्तम्। तथा च 'दध्ना जुहोती' त्यादीनामेकप्रयोजनकानेकपदार्थबोधकत्वादेव प्रामाण्यमिति क्रियाभिधेयत्वेनैव प्रामाण्यं व्यभिचरितमिति भावः। भव्यार्थत्वेन फलार्थत्वेन। क्रियार्थस्य भूतस्यापि क्रियात्वमित्याशङ्कायामाह- *न हीति*।। उपदिश्यमानं क्रियार्थत्वेनेति शेषः। क्रियार्थत्वमात्रेण क्रियात्वासंभवात्। तदिदमत्र विशदयति शङ्का-समाधानाभ्याम्-अक्रियात्वेऽपीत्यादिना-भवतीत्यन्तेन। प्रकृतं न्यायमतिदिश्य वेदान्तवाक्ये स्वमतरीत्यापि प्रामाण्यं व्यवस्थापयति- *उच्यत इति*।। न केवलं ''दध्ना जुहोती'' त्यादिविधिवाक्यन्यायेन, किन्तु निषेधवाक्यन्यायेनापि न क्रियात्वनियमो वेदान्तवाक्यानामिति वेदान्तानां सिद्धार्थत्वेऽपि प्रामाण्यमुपपादयितुमाह- *अपिचेति*।। कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनत्वं लिङर्थः। ज्योतिष्टोमेनेत्यादेर्लोकसिद्धमनिष्टसाधनत्वमनूद्य कर्तव्यत्वमिष्टसाधनत्वं च लिङा बोध्यते। ''ब्राह्मणो न हन्तव्यः'' इति हनने लोकसिद्धमिष्टसाधनत्वं कर्तव्यत्वं चानूद्य नञोऽनिष्टसाधनत्वमात्रं बोध्यते। तथा च हननमनिष्टसाधनमिति न हन्तव्य इति वाक्यतात्पर्यविषयोऽर्थः। अथवेष्टसाधनत्वमात्रो लिङर्थः। न हन्तव्य इति नञो धात्वर्थेनान्वये हनननिवृत्तिरिष्टसाधनमित्यर्थो भवति। कृतिसाध्यत्वेऽपि निवृत्तेरभावत्वेन क्रियात्वाभावाद् न क्रियार्थत्वं निषेधवाक्यानामेतत्पक्षरीत्या। पूर्वतनपक्षरीत्यापि तु हननानिष्टसाधनतामात्रे वाक्यस्य तात्पर्याद् हननकर्तव्यतायां तात्पर्याद् न कार्यविधिपरत्वं निषेधशास्त्राणाम्। उभयथापि तु कार्यार्थत्वनियमो वेदान्तवाक्यानामसम्भवदुक्तिक एवेति भावमाह- *ब्राह्मणो न हन्तव्य इति*।। *निवृत्तिः=औदासीन्यम्। प्रकृते चौदासीन्यप्रयोजकमदिष्टसाधनत्वम्। उभयथापि क्रियाप्रयोजनकत्वं वेदवाक्यानां न नियतमिति भावः। निवृत्तेर्निपूर्वकवर्ततिधातुवाच्यत्वात्क्रियात्वमेवेत्यत आह- *न च सा क्रियेति*।। अभावरूपत्वादित्यर्थः। अत्राभावोऽपि न क्रियासाधनमपीति तु दध्यादिवाक्याद्विशेषमाह- *नापीति*।। तथा च क्रियार्थत्वमात्रेणौपचारिकं क्रियात्वमादायापि प्रामाण्यरक्षणमत्र न भवतीति सूच्यते। तथा च ''दुष्यतु दुर्जनः'' इति न्यायेन गौणक्रियार्थत्वस्यापि प्रामाण्यमभ्युपगम्य नियमनिरासार्थं निषेधवाक्यानुसरणमिति फलति। प्रकृतं निषेधवाक्ये पूर्वोक्तनियमव्यभिचारं योजयति- *अक्रियार्थानामिति*।। निश्चितसाध्याभावे हेतुसत्त्वेनैव व्यभिचारः।

निषेधावाक्यानि तु वेदान्तवाक्यानीव पक्षकोटिप्रविष्टानीति न दोष इत्याशङ्क्याह- *तच्चानिष्टमिति*।। तत्प्रामाण्यस्योभयसंमतत्वाद्व्यभिचारदोषस्तदवस्थ इति भावः। *ननु* ''नेक्षेतोद्यन्तमादित्यमि'' त्यादिनिषेधवाक्येष्वप्यौदासीन्यप्रयोजनकेषु विना मनोवाग्देहानां विधारकप्रयत्नमकामादौदासीन्यासंभवा-दीक्षणविरोधि संकल्पविधानपर्यन्तं तात्पर्यं मीमांसकैरङ्गीकृतमिति प्रकृतेऽपि तेन न्यायेन हननविरोधिविधारकप्रयत्नविधानमेव युक्तम्। ततश्च निषेधवाक्येष्वपि कार्यार्थत्वात्तेषां न व्यभिचार उक्तनियमस्येत्याशङ्क्याह- *न चेति*।। ''ब्राह्मणो न हन्तव्यः'' इति वाक्यस्य शेषः। नञः स्वभावप्राप्तहन्त्यर्थानुरागेण ''ब्राह्मणो न हन्तव्यः'' इति वाक्यस्य हननक्रियानिवृत्त्यौ-दासीन्यव्यतिरेकेणाप्राप्तक्रियार्थत्वं कल्पयितुं न च शक्यमिति योजना। हन्त्यर्थस्य विधिना यत्र सम्बन्धो हन्तव्य इति, तत्र हन्तव्य इत्यादावेवाप्राप्तहननक्रियापरत्वं संभवति नान्यत्र। अत्र तु स्वाभावप्राप्तस्येष्टसाधनत्वेनानवगतस्य हन्त्यर्थस्य नञा सम्बन्धो दृश्यते न हन्यादिति। अतो हन्त्यर्थेन नञोऽनुरागेण हेतुना हननगतेष्टसाधनत्वाभावबोधद्वारा हननक्रियानिवृत्तिरूपमौदासीन्यमेव ब्राह्मणो न हन्तव्य इति वाक्यतात्पर्यार्थः, न तु तं विहायाप्राप्ता काचन क्रियाऽत्र विधीयत इति कल्पनं संभवतीति विशिष्टवाक्यार्थः। हनननिवृत्तिर्हि न हन्तव्य इति हननमिष्टसाधनत्वावबोधस्य फलमेव। तथा च हननमनिष्टसाधनमित्येवात्र वाक्यार्थः, न तु किमपि कर्तव्यमिति। अनिष्टसाधनत्वे ह्यवगते स्वत एव निवृत्तिर्भविष्यति, न तु तदर्थं विधारकप्रयत्नविधाने निषेधवाक्यस्यापि तात्पर्यं कल्पनीयम्। न हि कर्तव्यं किंचिदुपदेष्टुमेव ''ब्राह्मणो न हन्तव्यः'' इति वाक्यं प्रवृत्तमित्यत्र प्रमाणमस्ति, येन सत्यपि नञो धात्वर्थेन योगे धात्वर्थविरोधिविधिधारकप्रयत्नपर्यन्तं विधेर्विषयः कल्पनीयः स्यात्। अन्यथा निर्मूला हि लक्षणा तत्राङ्गीकरणीया स्यादिति प्रकृतवाक्यार्थनिष्कर्षः। अथवा-हननाभाव इष्टसाधनमिति हननाभावेष्टसाधनताज्ञानफलत्वादौदासीन्यस्य हननक्रियानिवृत्त्यौदासीन्यं विहाय हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेणेत्यस्यार्थः। हननाभावेष्टसाधनत्वरूपार्थव्यतिरेकेणेति यावत्। कथं''न हन्तव्यः'' इत्यत्रायमेवार्थ इति? अत आह- ***नञः स्वभावप्राप्तहन्त्यर्थानुरागेणेति***।। हननाभावस्यैव विध्यर्थविशेषणत्वम्, इति न क्रियाकर्तव्यतायां विवरणतात्पर्यमित्यादिरूपेण योजनाऽवगन्तव्या। *ननु* कथं''न हन्यादि'' त्यत्र हननगतेष्टसाधनत्वाभावे तात्पर्यमिति? अत आह- ***नञश्चैष स्वभाव इति***।। तथा चेष्टसाधनहननाभावो न हन्तव्य इति हननगतेष्टसाधनत्वाभाव एव पर्यवस्यति। नहि हननाभावः श्रुत्या बोधयितुं शक्यते। श्रुतेरिष्टसाधनत्व-तदभावबोधन एव तात्पर्यादिति भावः। *ननु* एवं निषेधवाक्यानां निवर्तकवाक्यत्वेन व्यपदेशः किंनिबन्धनः? यदि निवृत्तिबोधकत्वेन, तर्हि तद्विधारकप्रयत्नबोधकत्वमेव समायातमिति कथं नाप्राप्तक्रियार्थत्वमिति? अत आह- ***अभावबुद्धिरिति***।। औदासीन्यरूपा हि निवृत्तिरिष्टसाधनत्वाभावबुद्धेः फलम्, नतु विधिवाक्यस्यैवार्थः, इति न विधारकप्रयत्नपर्यन्तं विधेर्व्यापार इति भावः। *ननु*-अभावबुद्धेः क्षणिकत्वात् सत्यपि निषेधे प्रवृत्त्यापत्तिः, कारणाभावे कार्याभावस्यैव

नियतत्वेनौदासीन्यप्रच्युतिरूपायाः प्रवृत्तेरप्युज्जीवनापत्तेरिति-चेत्, औदासीन्यं हि प्रसक्तप्रवृत्तिविनाशः, प्रवृत्तिप्रागभावपरिपालनं वा। तत्र नष्टायाः प्रवृत्तेर्नाशकसामग्रीविनाशेऽपि नाशापत्तिः किमुक्तापत्त्या विवक्षिता? उत रक्षितस्य प्रागभावस्य रक्षकसामग्रीं विना विनाशापत्तिः? तत्र रक्षकसामग्रीविनाशाद् रक्षितविनाशो हि कुत्रापि न दृष्टचरः। नाशकसामग्रीप्रयुक्तो हि नाशः, न तु रक्षकसामग्रीविनाशप्रयुक्त इति द्वितीयापत्तेर्नावसर इति मत्वा प्रथमाया आपत्तेरनवसरमाह- ***सा चेति***॥ *दग्धेन्धनादिवत्=इन्धनविनाशानन्तरमग्निर्यथा स्वयं विनश्यति, एवमभावबुद्धिरपि स्वयं क्षणिकत्वाद्विनश्यतीत्यर्थः। तथा चेन्धनविनाशकाग्निविनाशानन्तरं यथेन्धनानां नष्टानां न पुनरुज्जीवनम्, तथात्रापि न प्रवृत्तेर्विनष्टाया उज्जीवनम्। प्रवृत्त्युज्जीवनं हि रागाधीनम्, न प्रवृत्तिनाशकनाशाधीनमिति न दोष इति भावः। तथा च निवृत्तिरूपमौदासीन्यं निषेधशास्त्रस्य फलमेव, न त्वभिधेयम्, निवर्तकत्वव्यवहारस्तु निवृत्तिफलत्वप्रयुक्त एवेति निषेधशास्त्राणां धात्वर्थविरोधिविधारकप्रयत्नविधायकत्वं बाधितमेवेति फलति॥

ननु एवं सति ''नेक्षेतोद्यन्तमादित्यमि'' त्यत्रापि नञो धात्वर्थयोगेन निवृत्तिफलकत्वेनैव निर्वाहे तत्रेक्षणविरोधि संकल्पात्मकविधारकप्रयत्नपरत्वं न पर्युदासाधिकरणे व्यवस्थापितमुपपद्यत इति चेत्, *नायं दोषः*-यतः ''नेक्षेतोद्यन्तमि'' ति प्रजापतिव्रतमिदं कार्याणामनुक्रमेण प्रवृत्तमिति कर्तव्यपरमेवोपक्रमाविरोधार्थं स्वीकर्तव्यम्; अन्यथा कर्तव्यमुपक्रम्याकर्तव्योपदेशोऽसङ्गत एव स्यात्। तथा च सति बाधक एव नञः स्वभावप्राप्तधात्वर्थयोगेन निवृत्तिबोधकत्वम्, नतु सति बोधकेऽपि, ''नेक्षेतोद्यन्तमि'' त्यत्र तु ''तस्य व्रतमि'' त्युपक्रमो निवृत्तिपरतायां बाधकः। *एतेन*-''यजति येयजामहं करोति नानूयाजेषु'' इति वाक्ये, यत्र धात्वर्थो येयजामहकरणरूपो न रागतः प्राप्तः, तत्रापि न निवृत्तिपरत्वमिति-*व्याख्यातम्*; अन्यथा हि शास्त्रप्राप्तस्यैव शास्त्रेण निषेधे विकल्पापत्तिरिति निष्कर्षः। तदिदं सर्वमभिप्रेत्याह- ***तस्मादिति***॥

*तस्मात्=असति बाधके स्वभावप्राप्तधात्वर्थनिवृत्तिपरत्वस्यैव निषेधवाक्यानां स्वीकरणीयत्वादित्यर्थः। ***प्रसक्तेति***॥ रागप्राप्ताया इष्टसाधनत्वेन कर्तव्यत्वेन चावगतायाः क्रियाया निवृत्तिरूपमौदासीन्यमेवेत्यर्थः। इत्यादिष्वित्यादिपदेन ''न कलञ्जं भक्षयेदि'' त्यादीनां रागप्राप्तधात्वर्थनिषेधपराणां ग्रहणम्, न तु ''नानूयाजेष्वि'' त्यादिनिषेधवाक्यानाम्। *प्रतिषेधार्थमिति*॥ निवृत्तिरूपं प्रयोजनं हननादीष्टसाधनत्वाभावबोधप्रयुक्तमित्यर्थः। *अन्यत्र प्रजापतिव्रतादिभ्यः*=''नेक्षेतोद्यन्तमादित्यम्'' ''नानूयाजेषु'' इत्यादिवाक्यानि विहायेत्यर्थः। एतावता च-अक्रियार्थत्वेऽपि वेदवाक्यानां प्रामाण्यमिति निषेधवाक्यदृष्टान्तेन व्यवस्थापितम्। वस्तुतस्तु-''रज्जुरियं नायं सर्पः'' इति सिद्धार्थवाक्यान्यपि क्रियाबोधकत्वाभावेऽपि सप्रयोजनान्येवेति सिद्धार्थवाक्यप्रामाण्यं

लौकिकवाक्येष्वपि दृष्टमिति प्रकृतेऽपि न दोष इति, निरूपयिष्यन् पूर्वोक्तमाक्षेपमनुवदति- ***यदप्युक्तमिति***।। एतावता च **''कार्यबोधे यथा चेष्टा लिङ्गं हर्षादयस्तथा। सिद्धबोधेऽर्थवत्तैवं शास्त्रत्वं हितशासनात्''।। इति कारिकार्थः** सङ्गृहीतो भवति। एतेन हि-''शास्त्रत्वेनार्थवत्तया कार्यार्थाद् ब्रह्मनिश्चयः'' इति वृत्तिकारीयाक्षेपांशोऽपि-परिहृतः। मननादिविध्यन्यथानुपपत्त्या कार्यार्थाद् ब्रह्मनिश्चय इति शङ्कामनुवदति- *नन्विति*।। श्रुतब्रह्मणोऽपि संसारित्वदर्शनादिति*।। तथा च श्रवणमात्रं न सप्रयोजनम्। अत एव मननादिविध्यादीनामुपलक्षणमिदम्। *ननु* श्रुतब्रह्मणोऽपीत्यनेन साङ्गश्रवणानन्तरं ब्रह्मसाक्षात्कारतोऽपीति विवक्ष्यते? उत श्रवणमात्रवतः? आद्ये त्वसंभव इत्याह- ***नावगतात्मभावस्येति***।।

ब्रह्मसाक्षात्कारे सति सकलसंसारनिवृत्तिरेव, न तु संसारित्वं प्रदर्शयितुं शक्यते। *ननु* जीवन्मुक्तानां साक्षात्कृतब्रह्मणामपि भोजनासनादिव्यवहारदर्शनात् कथं साक्षात्कारो भयादिनिवर्तकः? इत्याशङ्क्य, शरीराभिमानप्रयुक्तत्वात् संसारस्य सत्यपि शरीरसम्बन्धे प्रारब्धकर्माधीने तदभिमानस्य संसारनिमित्तस्य तत्रासंभवाद् न दोष इत्याह- ***न हीति***।। न हि शक्यं कल्पयितुमिति सम्बन्धः। *दृष्टमिति*।। दृष्टमिति कृत्वेत्यर्थः। *ननु* जीवन्मुक्तानामपि शरीरदर्शनात् कथं न तदभिमान इति? अत **आह- *वेदप्रमाणजनितब्रह्मात्मावगमे तदभिमाननिवृत्तावपीति***।। पुरुषान्तरदृष्ट्या शरीरदर्शनेऽपि न जीवन्मुक्तस्य तच्छरीरेऽभिमानः। अत एव शूलारोपितस्याप्याणिमाण्डव्यस्य भयकम्पाद्यदर्शनमुपपद्यत इति भावः। शरीराभिमानिनामपि संसारिणां बहुषु विषयेष्वभिमानकाले दुःखं तन्निवृत्तौ निवृत्तिरित्यन्वय-व्यतिरेकसिद्धमिति प्रदर्शयति- ***न हि धनिन इति***।। *न च कुण्डलिन इति च*।। नहि-न चेत्यनयोर्भवतीत्यनेन तत्तद्वाक्यस्थभवतिपदेनान्वयः। जीवन्मुक्तानां शरीराभिमानरहितानां संसाराभावं श्रुतिरप्याहेत्याह- ***तदुक्तमिति***।। अशरीरं वा वसन्तम्, शरीरशून्यं जीवन्तं चेत्यर्थः। जीवतः शरीरराहित्यम्=तस्य तदभिमाननिवृत्तिरूपमेवेति भावः। अनेन पुरुषान्तरदृष्ट्यैव शरीरित्वम्, न तु स्वदृष्ट्या जीवन्मुक्तानामिति ज्ञाप्यते। तथा च मिथ्याज्ञाननिमित्तं हि शरीरित्वम्। मिथ्याज्ञानविनाशे च जीवतो मुक्तत्वमबाधितमिति-''अशरीरं जीवन्तमि'ति च न विरुद्धमिति भावः। तदेतदाशङ्का-समाधानाभ्यां निरूपयति- ***शरीरेतीत्यादिना***।। शरीरविनाशप्रयुक्तमेवाशरीरत्वम्, न तु शरीराभिमाननिवृत्तिमात्रप्रयुक्तं जीवन्मुक्तसाधारणमिति शङ्काहृदयम्। बद्धानां शरीरित्वे मुक्तानामशरीरित्वं च किंनिबन्धनमिति वक्तव्यम्-यदि कर्मनिमित्तं ब्रह्मात्मनः सशरीरत्वम्, तर्हि तु शरीरविनाशेनैवाशरीरत्वम्, नत्वभिमाननिवृत्तिमात्रेण यदि त्वभिमानाख्यमिथ्याज्ञाननिमित्तमेव सशरीरत्वम्, तर्हि सत्यपि शरीरेऽभिमाननिवृत्तावशरीरत्वव्यवहारो भवति, इति जीवतामपि मुक्तानामशरीरत्वं विरुद्धम्। तत्र मिथ्याज्ञाननिमित्तमेव सशरीरत्वम्, न तु कर्मनिमित्तम्; निराकरिष्यमाणत्वात्, इति नोक्तस्याक्षेपस्यावसर

इत्यभिप्रायेण समाधत्ते- *नेति*।। मिथ्याज्ञाननिमित्तादिति*।। *ननु* मिथ्याज्ञाननिमित्तं सशरीरत्वमितिमतेऽपि मिथ्याज्ञानेन मूलाज्ञानस्य, अथवा तत्तज्जीवगतविक्षेपावरणात्मकशक्तिद्वयविशिष्टस्यावरणाज्ञानस्य वैव ग्रहणीयत्वात् सति शरीरेऽभिमानमात्रनिवृत्तावपि पूर्वोक्तमिथ्याज्ञानानपायात् कथं जीवन्मुक्तिः? कथं वा जीवत एवाशरीरत्वं चेत्याशङ्कावारणार्थं मिथ्याज्ञानपदमत्रत्यं स्वयमेव विवृणोति- ***शरीरीत्यभिमानलक्षणं मिथ्याज्ञानमिति***।। आत्मन इत्यस्य सशरीरत्वमित्यनेन सम्बन्धः। तथा च शरीरीत्यभिमानलक्षणं मिथ्याज्ञानं मुक्त्वा, अन्यतः=प्रकारान्तरेण, आत्मनः सशरीरत्वं कल्पयितुं न शक्यमित्यन्वयः। मूलाज्ञानादिप्रयुक्तत्वे हि सशरीरत्वे समाधि-सुषुप्तयोरपि तस्य सद्भावात् शरीरित्वव्यवहारापत्तिः। इष्टापत्तौ तु आणिमाण्डव्यादीनां शूलारोपितानां दुःखप्रसङ्गः। अतोऽभिमानत एव सशरीरत्वम्, न शरीरसद्भावमात्रेणेति भावः। तदेतदाह- ***नित्यमशरीरत्वमिति***।। तथा च श्रुतिः-''अशरीरं शरीरेष्वनवस्थेष्ववस्थितमि''ति। अन्यथा शरीरनाशप्रयुक्तमेवाशरीरत्वमिति स्वीकारे कर्मनिमित्तत्वात् शरीरनाशस्याशरीरत्वमपि कर्मनिमित्तमित्यापद्येत, तच्चायुक्तमिति पूर्वमेवोपपादितमित्याह- ***अकर्मेति।। अवोचामेति च***।। *ननु* सत्यमुक्तं पूर्वमशरीरत्वाख्यो मोक्षो नित्यत्वान्न कर्माधीन इति, परन्तु न वयमशरीरत्वमेव मोक्षं मन्यामह इति तस्य कर्मनिमित्तत्वे न कोऽपि दोष इत्याशयेन शङ्कते- ***धर्माधर्मेति***।। शरीरसम्बन्धाधीनत्वाद्धर्माधर्मानुष्ठानस्य धर्माधर्मानुष्ठाननिबन्धनत्वमेव सशरीरत्वस्यापीति स्वीकारेऽन्योन्याश्रयापत्त्योक्तामाशङ्कां समाधास्यन् प्रथमं धर्माधर्मयोः सशरीरत्वापेक्षत्वं प्रदर्शयति- ***न, शरीरसम्बन्धस्येति च***।। आत्मनो धर्माधर्मादिकर्तृत्वं शरीरसम्बन्धाधीनमिति भावः। भवत्वेवम्, तावता प्रकृताशङ्कायां किमायातमित्यत आह- ***शरीरसम्बन्धस्येति***।। *ननु* एतच्छरीरबन्धः पूर्वतनकर्माधीनः, पूर्वतनं तु कर्म तत्पूर्वतनशरीराधीनमिति स्वीकाराद् नात्रान्योन्याश्रयः, सत्यम्; अनवस्थादोषोऽत्र प्रसरति, परन्तु सापि बीजाङ्कुरादिन्यायेनानादित्वात् शरीरसम्बन्धधर्माधर्मकर्तृत्वयोर्न दोष इत्याशङ्क्याह- ***अन्धपरम्परैषेति***।। एषाऽनादित्वकल्पनाऽन्धपरम्परा, नात्र बीजाङ्कुरन्यायस्य प्रसर इति तु हृदयम्। अयं भावः-अङ्कुरं बीजात्, बीजमङ्कुरादिति कार्य-कारणभावोऽयं लोकसिद्धः; उभयोरपि प्रत्यक्षयोग्यत्वात्, धर्माधर्मयोस्तु न प्रत्यक्षत्वं शरीरस्य प्रत्यक्षत्वेऽपि, इति कार्य-कारणयोः प्रत्यक्षत्वस्थल एव बीजाङ्कुरन्यायो नात्रेति, आत्मनो देहसम्बन्धो न कर्मकृत इति। तथा चात्मनः सशरीरत्वं कर्मकृतमिति नेदं प्रत्यक्षगम्यम्, न वाऽऽगमगम्यम्; ''असङ्गो ह्ययमि'' ति श्रुतिर्हि आत्मनोऽसङ्गत्वमेव प्रतिपादयति। युक्तं चैतद् आत्मनः स्वाभाविकं न कर्तृत्वमिति, तदिदमाह- ***क्रियेति***।। न हि कर्तृत्वं साक्षात् परम्पराया वा क्रियाश्रयत्वं विना संभवति, तत्र साक्षात्क्रियाश्रयत्वमात्मनोऽनित्यत्वापत्त्या न भवतीति पूर्वमेव निरूपितमिति, परम्परयापि क्रियाश्रयत्वाभावाद् न कर्तृत्वमिति निरूपयितुमाह- ***सन्निधानेति***।। निष्क्रियस्यैव राज्ञः कर्तृत्वमित्यभिमानेन प्रश्नः। परन्तु न राजाऽपि निष्क्रिय एव सन् कर्तेति न दोष

इत्याह- *न, धनदानेति*।। *ननु* तर्हि आत्मनोऽपि कश्चन सम्बन्धः कल्प्यतामिति चेत्, *न*; न हि क्लृप्तमभिमानाख्यं सम्बन्धं परित्यज्य सम्बधान्तरकल्पनं युक्तमित्यभिप्रायेणाह- ***मिथ्याभिमानस्त्विति***।। न केवलं प्रत्यक्षम्, किन्तु श्रुतिरपि देहात्मभावाभिमाननिबन्धन एव कर्माधिकार इत्याह- ***एतेनेति***।। **यजमानत्वमिति***।। फलकामस्य तद्धोक्तुर्वा ब्राह्मणादेरेव कर्माधिकारः। आत्मनो ब्राह्मणत्वन्तु शरीरतादात्म्याध्यासं विना नोपपद्यत इति भावः। *ननु* देहादावात्मनोऽहंभावो गौण एव, न तु तादात्म्यध्यासमूलकः। भवति ह्यन्यत्रान्यशब्दप्रयोगो गौणोऽपि; यथा सिंहो देवदत्त इति। सति चैवं मिथ्याभिमानप्रयुक्त एव शरीरिभाव इति रिक्तमिदं वचः। सिंह-माणवकयोरिव शरीरात्मनोरपि भेदः प्रत्यक्ष एवानुभूयते ममेदं शरीरमिति। तथा च भेदाग्रहनिबन्धनत्वादध्यासस्य नात्राध्यासविवक्षा। अस्तु वा भेदाग्रहः, सत्यपि तस्मिन् नाध्यासादिकं कल्पयितुं युक्तम्; अख्यातिवादस्यैव स्वीकारादित्यभिप्रायेण प्राभाकराणां शङ्कामुपक्षिपति- ***अत्राहुरिति***।। प्राभाकरा इति शेषः। ***देहादिव्यतिरिक्तस्येति***।। युष्मदस्मत्प्रत्ययगोचरयोरित्यत्राप्ययमर्थः स्पष्टमाविष्कृतः। अनेन सति भेदज्ञानेऽभेदग्रहस्य गौणाभेदविषयकत्वं सूचितभिति युष्मदस्मदिति परमोपक्रमतात्पर्यार्थः प्रकटीकृतो भवति। तथा चाध्यासाक्षेपभाष्यं गौणात्मवादिनां मतेनेति तन्मतनिरासेन चतुःसूत्रीविवरणव्याजेन शास्त्रार्थपरिपूर्तिं मन्यमानो भाष्यकारोऽध्यासभाष्यसिद्धान्तेनैव समापयतीत्युपक्रमोपसंहारैकवाक्यताऽपि प्रकाशिता भवति। ***आत्मीये देहादाविति***।। शरीरस्यैवाध्यासेनात्मत्वे हि शरीरमात्मैव सर्वदा प्रतीयेत, न तु मम शरीरमित्यात्मीयतयाऽपीति भेदग्रह एवायं विशिष्यानेनोपक्षिप्यते। *अभिमानः=अभेदप्रत्ययः। *गौणः=शरीरात्मनोः सादृश्यनिबन्धन इत्यर्थः। गुणसाम्यप्रयुक्तो गौण इति व्यपदिश्यते। अत्राभिमानपदप्रयोगः परमतमभिप्रेत्य, न तु स्वमतमिति स्फुटयति- ***न मिथ्येति***।। तथा च भ्रमस्यापि सादृश्यनिमित्तकत्वादभिमानो गौण इत्यन्यथाग्रहो वारितो भवति। सत्यं दृग्दृश्यादिलक्षणतो भेदः शरीरात्मनोर्वर्तते, परन्तु न तावताऽभेदभ्रमो वारितो भवति। शुक्तिरजते अपि लक्षणतो भिन्ने एवेति कथं वा तत्रापि मिथ्याप्रत्ययः संभवदुक्तिकः स्यात्? येन रूपेण भेदप्रत्ययः, तेनैव रूपेणाभेदप्रत्यय एव हि गौणः, यथा सिंह-देवदत्तयोः, सिंहशब्दवाच्यत्वेन देवदत्तपदवाच्यत्वेन च भिन्नयोः सिंह-देवदत्तयोस्तेनैव रूपेणाभेदप्रत्ययः। शुक्ति-रजतयोस्तु शुक्तित्वरूपेण रजतत्वरूपेण च भिन्नतया गृह्यमाणयोर्न ताभ्यामेव रूपाभ्यामभेदप्रत्यय इति नायं गौणः। तथा च गृहीतभेदयोरभेदप्रत्ययो गौणः, अगृहीतभेदयोरभेदप्रत्ययो मिथ्येति व्यवस्था समादरणीया। भेदाग्रहमात्रेणैव प्रवृत्तिनिर्वाहेऽपीदंकाराभिमुख-प्रवृत्त्यादिनिर्वाहार्थमभेदप्रतीतिरेवेति हि स्वीकर्तव्यम्। शरीरात्मनोस्तु शरीरत्वात्मत्वाभ्यां भेदप्रतीतिः कुत्रापि न निश्चिता; 'मम शरीरम्'' इति प्रतीतिः स्पष्टायामपि सम्बन्धवाचिन्यां षष्ठ्यां 'राहोः शिरः' इत्यादिवत् षष्ठ्या अभेदाविरोधित्वाद् न भेदप्रतीतिरेवेति निश्चिता। अतो नात्र गौणोऽभेदप्रत्यय इत्यभिप्रायेण समाधत्ते- ***प्रसिद्धवस्तुभेदस्येति***।। विशिष्टेन रूपेण वस्तुनोर्भेदं यो निश्चिनोति, स एवेदं मुख्यमिदं

गौणमिति प्रत्ययं निर्णेतुं पारयति। तथा च सिंहशब्देन मुख्यं सिंह माणवकशब्देन मुख्यं माणवकं च यः परस्परभिन्नं जानाति, स एव गौणो व्यवहारोऽयमिति व्यवस्थापनेऽपि समर्थो भवतीति भावः। यस्तु पुनः-इदं रजतमिति भ्रममनुभवति, स हीदंपदार्थो रजतपदार्थश्च स्वस्वमुख्येनेदन्त्वेन रजतत्वेन च भिन्नाविति कदापि नानुभवति। न हि रजतशब्दवाच्यमिदंशब्दवाच्यं न भवति। सत्यस्थलेऽपि इदं रजतमित्येव हि प्रत्ययः। अतोऽयमनुभवः-इदं रजतमिति न गौणः, किन्तु मिथ्यैवेति दृष्टान्तपुरःसरं विवेचयति- ***अप्रसिद्धेति*।।** येन रूपेणाभेदप्रत्ययः, तेन रूपेण भेदं निश्चिन्वानो हि मिथ्यैवाभेदं प्रत्येति। तत्रोदाहरणद्वयं निर्दिशति- ***मन्दान्धकार इति*।।** अत्र हि दोषवशात् स्थाणुत्वं शुक्तित्वं वा भेदकमभेदप्रतीतिकाले न विज्ञातमिति तेन रूपेण भिन्नतया गृह्यमाणयोरिदन्त्वपुरुषत्वशुक्तित्वरजत्वादिरूपैर्नाभेदप्रत्यय इति विशदम्। दार्ष्टान्तिकेऽपि मिथ्याप्रत्ययत्वं समन्वयीकरोति- ***तद्वदिति*।।** अत्राप्यात्मनोऽधिष्ठानस्य स्वपारमार्थिकाकारेणाज्ञानदशायामेव ब्रह्मभेदभ्रम इत्याह- ***अहमिति*।। *निरुपचारेणेति*।।** सादृश्यरूपमुपचारं विनैवेत्यर्थः। न ह्यत्र सिंह-देवदत्तयोरिवात्म-शरीरयोः पृथक् पृथग् भानमपि वर्तत इति कथमयं सादृश्यनिबन्धनोऽभेदप्रत्यय इति भावः। एतावता च विनैव देहात्मविवेकमहं प्रत्ययो मिथ्येति व्यवस्थापितम्। देहात्मविवेकिनामपि नापरोक्षो विवेकग्रहः, किन्तु परोक्ष एव, स य नाध्यासविरोधीति ''पश्वादिभिश्चाविशेषात्'' इति भाष्योक्तमत्राप्यनुसन्धत्ते- ***आत्मानात्मविवेकिनामपीति*।।** अपिशब्दस्य पण्डितानामित्यनेन सम्बन्धाद् पण्डितानामपीत्यर्थो विवक्ष्यते। तेन च तत्सामान्यदर्शनाद् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तन्मूल इति भाष्येणैकवाक्यता। शब्द-प्रत्ययौ समानाधिकरणपदद्वयसमभिव्याहारः, अभेदप्रत्ययश्चेत्यर्थः। परोक्षविवेकग्रहोऽपरोक्षाध्यासाविरोधीत्य-भिप्रायेणैव- ***इतरेतराविवेकेनात्यन्तविविक्तयोरिति*** भाष्यमप्यध्याससमर्थनपरं प्रवृत्तम्। तथा च नात्र भेदग्रहमात्रेण गौणताकल्पनं युक्तमिति सूचनपूर्वकं शरीरित्वस्य मिथ्याभिमानप्रयुक्तवाद् अशरीरत्वस्य स्वाभाविकत्वात्, अवगतात्मभावानां सर्वेषामपि शरीराभिमानादिनिवृत्तेरेव दृश्यमानत्वाच्च साङ्गं वेदान्तं श्रुतवतां संसारानुवृत्तिरिति साङ्गश्रवणं सिद्धब्रह्ममात्रविषयकं न निष्प्रयोजनमिति निष्कर्षः। तदिदं सर्वमभिप्रेत्योपसंहरति- ***तस्मादिति*।।** तदेवं विदुषां मनन-निदिध्यासनाभ्यां सह वेदान्तं श्रुतवतामितरदृष्ट्या सशरीरिणामपि तदनभिमानित्वान्न संसारबन्धः किन्तु ब्रह्मभावाख्या मुक्तिरेवेति श्रुति-स्मृतिप्रमाणाभ्यां विशदयति- ***तथा च ब्रह्मविद्विषयेति*।।** इयमेव श्रुतिर्जीवन्मुक्तिस्वीकारे प्रमाणम्। तद्यथाऽहिनिर्ल्वयनीति श्रुतेरयमर्थः- *तत्=तस्मिन् देहे विषये, सदृष्टान्तं निरूपणं क्रियत इति शेषः। यथा लोके *अहिनिर्ल्वयनी=सर्पनिर्मोकः सर्पदेहत्वग् बल्मीकादौ प्रक्षिप्ता *शयीत=विना तत्र सर्पस्य स्वात्मनाभिमानं वर्तेत, एवमेव=तथैव, इदं शरीरम्, विदुष इति शेषः, जीवन्मुक्तशरीरमिति यावत्; मुक्तत्वेन स्वात्मतयाऽगृहीतं शेते तिष्ठति। अथ पुनस्तु अयं देहस्थो जीवन्मुक्तः अशरीरः=शरीराभिमानराहित्यात् शरीरशून्य एव। अमृतो मरणधर्मरहितः। प्राणः=जीवन्नपि तेजः स्वयंप्रकाशं ब्रह्मैवेति। तथा च बहिर्दृष्ट्यैव

जीवन्मुक्तानां सशरीरत्वम्, न तु स्वदृष्ट्येति बोधनद्वारा शरीराभिमानवत्त्वमेव सशरीरत्वम्, न तु वस्तुगत्या शरीरसम्बन्धमात्रमिति सूचनाद् देहादावात्मभावो मिथ्यैव न गौण इत्ययमेवार्थो विशदीकृत इति सूचयन् श्रुत्यन्तरमत्रानुसन्धत्ते- ***सचक्षुरिति***॥ न केवलं श्रुतिः, किन्तु स्मृतिरपि भगवद्गीताख्याऽत्र प्रमाणमित्याह- ***स्मृतिरपीति***॥ ·विदुषः सर्वप्रवृत्त्यसम्बन्धमिति। शरीरादिसम्बन्धस्य कल्पितत्वात् तदभिमानपूर्वकप्रवृत्त्यादिरप्याविद्यक एवेति निरभिमाने विदुषि साभिमानत्वव्यवहारो बाधित एवेति स्मृतितात्पर्यादेवमुक्तम्। तथा च जीवन्मुक्तानां यथापूर्वं संसारित्वं न कथमपि वक्तुं शक्यत इति साक्षात्कारमात्रं शब्दजन्यमपि न निष्प्रयोजनमिति विनापि प्रवर्तकत्वमर्थवत्त्वं वेदान्तावाक्यानां वर्तत इति "शास्त्रत्वेनार्थवत्तये" ति वाक्यनिर्दिष्टस्योक्षेपस्य नात्रावसर इति सिद्धेऽपि वस्तुनि वेदान्तानां प्रामाण्यमनपोहमिति ब्रह्मणः शास्त्रयोनित्वं प्रत्यगभिन्नस्यापि प्रतिपत्तिविधिसम्बन्धायोग्यस्यापि नानुपपन्नमिति भावेन प्रकृतमुपसंहरति- ***तस्मादिति***॥ *अवगतब्रह्मात्मभावस्य=निर्विचिकित्स-ब्रह्मसाक्षात्कारवतः। "यथापूर्वमि" त्यनेन विद्यमानोऽपि व्यवहारः प्रारब्धकर्माधीनत्वाद् अविद्यासंस्कारमात्रनिबन्धनत्वाद्वा मिथ्यात्वेनानुसन्धीयमानत्वात् संसारावस्थायामिव दग्धपटन्यायेना-कार्यकारित्वान्न बन्धप्रयोजक इति सूच्यते। तथा च "श्रुतब्रह्मणोऽपि संसारित्वदर्शनादि"ति पूर्वपक्षिणामुपक्षेपो यदि साक्षात्कृतब्रह्मजीवन्मुक्तमभिप्रत्य, तर्हि तु बाधितमिति गूढमेव भावं विशदयन्नाह- ***यस्य त्विति***॥ अनेन च "श्रुतब्रह्मणः" इत्यत्र विना मनन-निदिध्यासने श्रवणमात्रं येन कृतम्, तस्यैव ग्रहणे तस्य संसारित्वदर्शनं न वेदान्तानां निष्प्रयोजनत्वेनाप्रामाण्यव्यवस्थापनायालम्, यतो न वेदान्ताः श्रवणमात्रेण बन्धनिवृत्तिं प्रतिपादयन्तीति सूच्यते। श्रवणं मनननिदिध्यासनसहितमेव साक्षात्कारसाधनमिति वेदान्ताभिमतमिति श्रवणानन्तरं मननादिविधिरपि नास्माकं प्रतिरोधी, किन्त्वनुरोध्येवेति मनसिकृत्य मननादिविध्यन्यथाऽनुपपत्त्या वेदान्तानां विधिपरत्वमिति वृत्तिकारीयं पक्षमनूद्य परिहरति- ***यत्पुनरिति***॥ **अवगत्यर्थत्वान्मनननिदिध्यासनयोरिति***॥ श्रवणेनावगतौ जननीयायामितिकर्तव्यतात्वान्मनननिदिध्यासनयोः श्रवणफलमवगतिरेव मनननिदिध्यासनयोरपि फलमिति मनन-निदिध्यासने अपि अवगत्यर्थे इति भाव इति विवरणानुयायिनां विवरणम्। अस्मिन्पक्षे श्रवणवदवगत्यर्थत्वादित्यनुपदभाष्यस्यायमेवाशयः-यत् अङ्गिफलेनैवाङ्गानां फलवत्त्वात् 'फलवत्सन्निधावफलं तदङ्गमि'ति न्यायेन श्रवणवद् मनन-निदिध्यासनयोरप्यवगत्यर्थत्वमिति। इदमेव भाष्यं मनसि निधाय श्रवणप्राधान्यपक्षः शाब्दापरोक्षवादानुकूलो विवरणानुयायिनां प्रवृत्तः। वाचस्पतिमते तु मननतुल्यत्वेन निदिध्यासनेन सह निर्देशो न स्वरस इति तु हृदयम्। अत्र मनन-निदिध्यासनयोरवगत्यर्थत्ववर्णनेन नैतयोरारादुपकारकत्वं प्रयाजादीनामिवेति सूचनेनान्वय-व्यतिरेकसिद्ध एव कार्यकारणभावः श्रुत्या विवक्ष्यत इति ज्ञापनाद् मननाद्यंशेऽपि न विधिरिति पक्ष एव भाष्यकाराभिमत इति भामत्यनुयायिनो मन्यन्ते। सति चैवं सर्वेषां श्रवण-मनन-निदिध्यासनानां

चित्तैकाग्र्यकोपयोगित्वाद् न शाब्दापरोक्षवादस्यैव सन्दर्भ इति विशदं प्रतीयते। श्रुतब्रह्मणो यथापूर्वं संसारित्वदर्शनेन मननादिविध्यनुपपत्तिशङ्कावारणमेव ह्यत्र प्रस्तुतम्, न त्वङ्गाङ्गिभावप्रदर्शनम्। अन्यथा हि श्रवणार्थत्वान्मनन-निदिध्यासनयोरिति खलु वक्तव्यम्, न त्ववगत्यर्थत्वादिति। तथा च-अवगत्यर्थत्वादिति भाष्यं श्रवणवद् मनन-निदिध्यासनयोरप्यवगत्यर्थत्वस्यान्वय-व्यतिरेकप्रमाणसिद्धत्वादित्येवार्थम्, इति भामत्यनुसारिविवरणम्। तथा च समप्राधान्यवाद एव भाष्यारूढ इति प्रतिभाति। अत एव श्रवणवदगत्यर्थत्वादित्यनुपदोपक्षेप उपपद्यते। निदिध्यासनप्राधान्यवादस्तु नैतद्भाष्यारूढोऽपि भाष्यान्तरारूढ इति सिद्धान्तलेशसंग्रहसूचितमेव यथावसरं विवेचयिष्यते। यद्यपि "मननादिप्रतीत्या चे"ति मननविधिवैयर्थ्यमेकमेव प्रधानतममाक्षेपनिमित्तमिति मननसार्थक्यवर्णनेनैवालम्; तथाऽपि वृत्तिकारैः श्रवण-मननयोर्विध्यनङ्गीकाराद् निदिध्यासन एव विध्यङ्गीकाराच्च श्रुतस्य मतस्य च ध्यानविधानार्थमेव निदिध्यासितव्य इति स्वीकाराद् मननवद् निदिध्यासनेऽपि न विधिः, न वा साक्षात्कारातिरिक्तफलकत्वमिति सूचनार्थं मनन-निदिध्यासनयोरिति निदिध्यासनस्यापि विशदमत्रोल्लेखः। अयमाशयः-विधिशेषत्वं हि सिद्धवस्तुनो ज्ञातस्यैव भवति, नाज्ञातस्य। प्रत्यगभिन्नं च ब्रह्म प्रत्यक्षीकृतमेवोपासनाविधिशेष इति यदि वर्ण्यते, तर्हि श्रोतव्यो मन्तव्य इति श्रवणमननयोरेव साक्षात्कारोपयोगः, न तु निदिध्यासनस्येति वक्तव्यम्। न चेदं संभवति; विना निदिध्यासनं साक्षात्कारासंभवात्। अतः प्रतिपत्तिविधिशेषतया ब्रह्मसमर्पणं यदि वेदान्तवाक्येषु विवक्ष्यते, तर्हि प्रकृते श्रूयमाणनिदिध्यासितव्यपदातिरेकेण ध्यानविध्यन्तरेणान्वयो ब्रह्मणः स्वीकर्तव्यः। तत्र च विध्यन्तरपरमपि किं क्लृप्तं मत्वा विधिशेषत्वं ब्रह्मणो मन्यते? उत कल्पितम्? अन्त्ये तु न प्रमाणम्। अतः प्रथममेव पक्षं मत्वा विधिशेषत्वं ब्रह्मणो वक्तव्यम्। तत्तु वाधितमित्यभिप्रायेणाह- ***यदीति***॥

*अवगतं ब्रह्म=श्रवण-मनन-निदिध्यासनैरवगतं ब्रह्म। *अन्यत्र=क्लृप्तप्रतिपत्तिविध्यन्तरे। *विनियुज्येत=अङ्गत्वेन बोध्येत। ज्ञातानामेव द्रव्याणामङ्गत्वेन विधानं नाज्ञातानाम्। यजेतेति सामान्यतो ज्ञातानामेव देवतानां देवतापदेनापि नियमनं क्रियते। न हि देवतोद्देश्यकद्रव्यत्याग एव याग इतिवद् ब्रह्मसम्बन्ध्येवोपासनमिति संभवदुक्तिकम्। "वाचं धेनुमुपासीते"ति हि विनापि ब्रह्मोपासनविधिर्दृश्यते। ततश्च न ब्रह्मण उपासनविधिशेषत्वं वेदान्तैकसमधिगम्यस्य कथमपि कल्पयितुं शक्यमिति भावः। ***मननेति***॥ व्याख्यातमेतदधस्तात्। ब्रह्मणः स्वतन्त्रं शास्त्रप्रमाणकत्वमेतावता प्रपञ्चेन साधितमुपसंहरति- ***तस्मादिति***॥ ***शास्त्रप्रमाणकमिति***॥ अनेकशाखाभेदभिन्न- साङ्गर्वेदादि-सर्ववेदप्रतिपाद्यं प्रत्यगभिन्नं ब्रह्मस्वरूपम्। तदुक्तम्-*सर्वे वेदा यत्पदमामनन्तीति*॥ *ननु* वेदानां कर्मकाण्डोपासनाकाण्डादिभेदेन विभिन्नानां कथं प्रत्यगभिन्नब्रह्मपरत्वम्, यतः कर्मकाण्डवाक्यानि कर्म-तदङ्गकर्तृभूतजीवादिप्रतिपादनपराणि, उपासनाकाण्डवाक्यानि तु सगुणेश्वरस्वरूपनिरूपणपराणि,

सृष्ट्यादिवाक्यान्यपि कारणत्वेनेश्वरस्वरूपनिरूपणपराणि वर्तन्ते। सति चैवं तत्त्वमसीत्यादीनां केषांचन वाक्यानां प्रत्यगभिन्नब्रह्मस्वरूपप्रतिपादकत्वेऽपि ''सर्वे वेदा यत्पदमामनन्ती''ति कथमुपपद्यतेऽन्यतः स्तुत्यर्थत्वादित्यत आह- ***वेदान्तवाक्यसमन्वयादिति***॥ वेदान्तवाक्यानां ''तत्त्वमसी''त्यादीनामेवोपक्रमोपसंहारादितात्पर्यग्राहकप्रमाणावगततात्पर्यवत्त्वेन प्रधानत्वात् कर्मकाण्डवाक्यानां तदेकदेशत्वंपदार्थोपस्थापनद्वारेणोपासनाकाण्डवाक्यानां तत्पदवाच्योपस्थापनद्वारेण च तदङ्गत्वान्महावाक्यार्थ एव मुख्यो वेदार्थः, न त्ववान्तरवाक्यार्थः। अन्यथा ''दर्श-पूर्णमासाभ्यां स्वर्गकामो यजेते'' त्यवान्तरवाक्यानुसारेण दर्श-पूर्णमासप्रधानयागानुष्ठानमात्रेण स्वर्गोत्पत्त्यापत्त्या सर्वेषामङ्गवाक्यानां वैफल्यम्, अथवा प्रयाजादीनामपि स्वतन्त्रफलकल्पनया प्रधानत्वं स्यादिति महान् विप्लवः समापद्येतेति वेदान्तवाक्यसमन्वयेन शास्त्रप्रमाणकत्वसाधनमुपपन्नमेवेति निष्कर्षः। अनेन च धर्ममीमांसाऽवान्तरवाक्यविचारार्था, ब्रह्ममीमांसा तु महावाक्यविचारार्थेति धर्मब्रह्मजिज्ञासयोर्विषयभेदोऽपि सूच्यते। तथा च धर्ममीमांसा कर्मस्वरूपमात्रं तत्तद्वाक्यगतं निरूपयितुमेव प्रवृत्ता, न तु महावाक्यैकदेशतया कर्मकाण्डवाक्यानामुपयोगप्रकारमपि। ब्रह्ममीमांसा तु कर्माङ्गस्य कर्तुरुपास्यस्य ब्रह्मणश्च व्यावहारिकं स्वरूपमनूद्यैव निष्कृष्टपारमार्थिकस्वरूपनिरूपणेन सर्वेषां वेदवाक्यानां प्रत्यगभिन्ने ब्रह्मणि तात्पर्यं निर्धारयितुं प्रवृत्ता। अत एव व्यावहारिकं जीवेश्वरभेदं तत्र तत्र विद्यमानमादायैव समुणवाक्यानां तात्पर्यनिर्धारणमपि ब्रह्ममीमांसागतमुपपद्यते। न ह्यन्यथा त्वंपदवाच्यार्थस्तत्पदवाच्यार्थश्च निर्धारितः स्यात्। सति चैवं प्रथमाध्यायेन कुत्रचन पूर्वपक्षमुखेन जीवपरत्वम्, कुत्रचनेश्वरपरत्वम्, कुत्रचन निर्गुणचैतन्यमात्रपरत्वमिति प्रतिपाद्य ''वाक्यान्वयादि''ति वाक्यान्वयाधिकरणेन प्रत्यगभिन्नस्वरूपनिर्धारणेनैव शास्त्रार्थसमापनमपि सुतरामुपपद्यते। जीवस्वरूपं हि कर्माङ्गकर्तृरूपं प्रत्यक्षप्रमाणसिद्धत्वाद् नावान्तरवाक्याविधयाऽपि वेदान्तवाक्यावसेयमिति जगत्कारणेश्वरस्वरूपनिरूपणमुखेनैव प्रत्यगभिन्नं ब्रह्मस्वरूपं ब्रह्ममीमांसावधारणीयमिति सगुणेश्वरवाक्यानामेवावान्तराणामपि ब्रह्ममीमांसायां विचारः। अयमत्र निष्कर्षः-तत्तु समन्वयादिति सूत्रे महावाक्यसमन्वयात् शास्त्रप्रमाणकत्वं यदुपक्षिप्तम्, तदेव वाक्यान्वयादित्यत्रोपसंह्रियते। अनेन चात्मनस्तत्र तत्र रूपभेदश्रवणेऽपि परमार्थत एकमेव स्वरूपम्, धर्मभेदमात्रे तात्पर्यम्, न तु धर्मिभेदेऽपि; इति जगत्कारणत्वेन किञ्चित्ज्ञत्वादिना च सत्यपि भेदे परमार्थतो जगत्कारणत्वं विवर्तोपादनत्वरूपमेवेति न वाक्यान्वयविरोध इति निरूपणार्थमेव-''प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादि''ति सूत्रम्। अनेन च वाचारम्भणादिश्रुत्युपस्थापनद्वारा ''वाक्यान्वयादि''ति सूत्रनिर्धारितमात्मस्वरूपं ''तत्त्वमसी''ति महावाक्यप्रतिपादितमेवेति सूच्यत इति समन्वयाध्यायप्रतिपाद्यं प्रत्यगभिन्नं ब्रह्मैव नान्यदिति सिद्धम्। सति चैवं जीवत्वेनेश्वरत्वेन जीवत्वेन शुद्धब्रह्मरूपेणश्वरत्वेन शुद्धब्रह्मरूपेण च सर्वेषां परस्परं भेदस्यैवाद्वैतसम्प्रदायेऽप्यनुस्त्रियमाणत्वात्, केषांचन सगुणवाक्यानामपि तत्पदार्थनिर्धारणार्थमत्र

प्रथमाध्याये विचारणस्यावश्यकत्वाच्च तत्र तत्र ''भेदव्यपदेशादि''ति सूत्रणं नाद्वैतसम्प्रदायं प्रतिरुणद्धि। एतेन-''सार्थादपि तस्करा बहवः'' इति न्यायेन सगुणवाक्यानां बहूनामेवात्र विचारितत्वाद् ब्रह्ममीमांसायाः सगुण एव पर्यवसानमिति कर्मकाण्डवाक्यानामुपासनापराणां च वाक्यानां सर्वेषां सममेव प्राधान्यमिति जीवेश्वरविभागादयः सर्वेऽपि सत्या एव, निर्गुणादिवाक्यं तूपास्यस्यैव ब्रह्मणो हेयगुणराहित्यादिप्रतिपादनार्थमेव प्रवृत्तमिति तत्त्वमस्यादिवाक्यमुपासनाविधेरेवाङ्गमिति शङ्काऽपि निरवसरेति-सूचितम्।।

अयं भावः-अद्वैतसम्प्रदायानुसारिणो मन्यन्ते-यत् सूत्रकारास्तत्त्वमस्यादिवाक्यं महावाक्यम्, कर्मकाण्डवाक्यानि तु तदुपकारकाणीति मन्यन्त इति। अन्ये तु मन्यन्ते-उपासनाकाण्डप्राधान्यमेव युक्तम्, तत्त्वमस्यादिवाक्यन्तु तदङ्गमिति सूत्रकारा मन्यन्त इति। तत्र द्वितीयमतेऽथातो ब्रह्मजिज्ञासेति पृथग्विचारवैयर्थ्यम्; यतोऽथातो धर्मजिज्ञासेत्यनेनैव जिज्ञासान्तरप्रतिज्ञापि गतार्था भवति। न हि तन्मते वेदार्थः सर्वोऽप्येकवाक्यार्थतया मन्यते। वेदार्थशेषरूपब्रह्मजिज्ञासापि वेदार्थसामान्यजिज्ञासयैवार्थतः सिद्ध्यति। अतः प्रथममतमेव सूत्रारूढमित्यभिप्रेत्याह- ***एवं च सतीति***।। तत्त्वमस्यादिमहावाक्येष्वेव महातात्पर्येण सर्वेषां वेदवाक्यानामङ्गतयोपयोगे सिद्धे चेत्यर्थः। ***तद्विषयः***= महावाक्यावसेयप्रत्यगभिन्नब्रह्मविषयक इत्यर्थः। *पृथक्शास्त्रारम्भ इति*।। ''अथातः सिद्धधर्मजिज्ञासे''ति वक्तव्ये ब्रह्मजिज्ञासेति ब्रह्मपदप्रयोगपूर्वकशास्त्रारम्भो हि धर्मवद्विधिसम्बन्धानर्हस्वरूपविषयकत्वं एव समञ्जसो भवति, अन्यथा हि ब्रह्मणोऽपि धर्मत्वे क्रत्वर्थत्वं पुरुषार्थत्वं वैव वक्तव्यम्। तत्र च क्रत्वर्थ-पुरुषार्थविशेषजिज्ञासैव ब्रह्मजिज्ञासेति नावान्तरप्रतिज्ञापि सप्रयोजना, यतः-अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासे'' त्यवान्तरप्रतिज्ञयैव चारितार्थ्यं भवति। सिद्धानां गोदोहनादीनां पुरुषार्थानामपि हि तत्रैव विकारो दृश्यते, इति न सिद्धधर्मविचारोऽपि प्रतिज्ञातव्योऽवशिष्यत इति ब्रह्मजिज्ञासाप्रतिज्ञा शास्त्रान्तरप्रसिद्धैव, न तु पूर्वतनशास्त्रस्यैवावान्तरप्रतिज्ञान्तरमिति हि वस्तुस्थितिः। इयं च ब्रह्मणोऽपि प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकत्वे शास्त्रान्तरप्रतिज्ञावैयर्थ्यापत्त्या नोपपद्यते। न हि ''चोदनालक्षणोऽर्थो धर्मः'' इति सूत्रलक्षितेन धर्मेण सामानाधिकरण्यं संभवतीति भावः। *ननु* सत्यं धर्मजिज्ञासयैव ब्रह्मजिज्ञासाऽपि गतार्था; तथाऽपि तत्राविचारितत्वाद् विशिष्य ब्रह्मरूपस्य धर्मस्य, बादरायणेन धर्मजिज्ञासाया अपौष्कल्यं दृष्ट्वा ब्रह्मजिज्ञासापि प्रारब्धेत्येव पश्यामः। सति चैवमथातो ब्रह्मजिज्ञासेति प्रतिज्ञा न ब्रह्मणोऽपि प्रतिपत्तिविधिविषतया धर्मत्वेऽपि विफलेति शङ्कायामाह- ***आरभ्यमाणं चेति***।। यदि धर्मविचारमपूर्णं दृष्ट्वा तत्परिपूणार्थं परिशिष्टधर्मविचार एवात्र विवक्षितः स्यात्, तर्हि बादरायणेन कथं धर्मपदाननुषङ्गेणैव विचारप्रतिज्ञा क्रियते। अतो ज्ञायते

बादरायणो धर्मत्वमेव ब्रह्मणोऽत्र विचार्यस्य नास्तीति मन्यत इति। अयमाशयः-उपास्यतयैव ब्रह्मसमर्पणे वेदान्तानां तात्पर्ये हि, उपास्यस्य जगत्कारणस्य वाचि धेनुत्वस्येव कल्पितत्त्वेऽपि शास्त्रदृष्टस्य मोक्षाख्यस्य फलस्योपासनासाध्यत्वनिर्वाहाद् ब्रह्मपारमार्थिकत्वमेव न सिद्ध्येयदिति तस्य जगत्कारणस्य प्रधानादिस्वरूपत्वनिरासोऽत्र विफलः स्यात्। उपास्यमपि ब्रह्म पारमार्थिकमेव; फलत्वात्, इति कल्पना तु तदैव स्यात्, यद्युपासनासाध्योऽपि ब्रह्मभावो नित्य इति स्यात्। यथा चैतन्न संभवति, तथाऽधस्ताद् विवेचितमिति ''तत्तु समन्वयादि''ति सूत्रमपि निरर्थकमापद्येत।।

एतेन-श्रीभाष्यकाराणां ब्रह्म, परमार्थिकम्, पुरुषार्थत्वेनान्वितत्वात्; स्वर्गादिवद्, इति ब्रह्मण उपास्यस्यापि नापारमार्थिकत्वमिति विवरणमपि-व्याख्यातम्। न हि स्वर्गादीनामपि फलानां त्रिकालावाध्यत्वरूपं पारमार्थिकत्वं निरसनीयं सर्वपूर्वपक्षसंमतम्। श्रीभाष्यकारा हि-प्रतिपत्तिविधिविषयतयैव ब्रह्मणः शास्त्रप्रमाणकत्वमिति न सङ्गतं वृत्तिकारीयं मतम्, ज्ञानमात्रेण पुरुषार्थसिद्धेर्ज्ञेय एव ब्रह्मणि वेदान्तानां पर्यवसानमित्यद्वैतमतम्, ब्रह्मोपासनमात्रं मोक्षसाधनम्, ब्रह्मपारमार्थिकता तु न विवक्षितेति मतम्, भास्करमतं चात्र पूर्वपक्षत्वेन गृहीत्वैकैकस्य मतस्य मतान्तरेण निरास इति क्रमेण पूर्वपक्षप्रकारान् संगृह्णन्ति। अत्र चाद्वैतमतस्यापि कयाचन प्रणाल्या निरस्यत्वं तदभिमतं न वेति विचारणायामिदं प्रतिभाति-यत् श्रीभाष्यकारा ज्ञानमात्रेण पुरुषार्थपर्यवसानमित्यद्वैतसिद्धान्तमेव स्वभिमतमपीति सूचयन्तोऽपि सगुणस्यैव ब्रह्मणः शास्त्रप्रमाणकत्वं मन्यन्त इति जिज्ञासाधिकरणप्रक्रियानुसन्धानेन तदेकवाक्यतामपि प्रकृते मन्यन्त इति श्रीभाष्यकारनिरस्यमेवाद्वैतमपि प्रकृतसूत्रे। सति चैवं तन्मतरीत्या स्वर्गादीनामप्यपरमार्थत्वात् पुरुषार्थत्वेनान्वयो न पारमार्थिकत्वेन व्याप्त इति नोक्तसूत्रं श्रीभाष्यकाराभिमतं विवरणमर्हति। उभयसम्प्रतिपन्नं हि निदर्शनं नाम। अयमत्र सारांशः-यत्, अद्वैतभाष्यकारा इव श्रीभाष्यकारा अपि मीमांसकमतम्, वृत्तिकारमतम्, भास्करमतं चैवात्र निरस्यं मन्यन्ते। अद्वैतमतनिरासस्तु प्रथमसूत्रार्थपर्यालोचनालभ्य एव प्रकृतेऽपि विवक्ष्यते, न तु प्रकृतसूत्रस्वारस्यमपि विशिष्टं मत्वाऽद्वैतमनिरासं श्रीभाष्यकारा मन्यन्ते। ''शास्त्रारम्भसिद्ध्यर्थेषा चतुःसूत्री मृषावादिमते न सङ्गच्छते'' इति श्रुतप्रकाशिकोक्तिरपि-यद्यद्वैतमते शास्त्रारम्भार्थं न चतुःसूत्र्यपेक्षेति मन्यते, तर्हि संमतमेवैतत्। यतः प्रथममेव सूत्रमद्वैतमत आरम्भसमर्थनपरम्, न तु सूत्रचतुष्टयमपि। यदि तु शास्त्ररम्भानुपपत्तिमात्रमत्र भवता विवक्षितम्, तर्हि तु निरूप्यताम्-कथं वा तदनुपपत्तिरद्वैतमत इति? यथा च प्रत्यगभिन्नं फलाव्याप्यमपि वृत्तिव्याप्यं निर्विशेषचैतन्यमेव विषयः, प्रयोजनमपि तदेव, तथा पूर्वमेव विवेचितमिति न विषय-प्रयोजनासिद्ध्या शास्त्रारम्भानुपपत्तिः। यथा चारम्भणीयत्वेऽपि शास्त्रस्य जिज्ञास्यस्य ब्रह्मणो लक्षण-प्रमाणाभ्यां निरूपणार्थम्, सिद्धस्यापि तस्य वेदान्तरूपशास्त्रवेद्यत्वं न

विरुद्धमिति विवेचनार्थं च सूत्राण्यपराण्यप्यपेक्ष्यन्तेऽद्वैतमते, तथा पूर्वमेव विवेचितम्। वस्तुतस्तु-श्रीभाष्यमत एव पूर्वोक्तप्रकारेण शास्त्रयोनित्वसूत्रस्य वितथत्वाद् न चतु:सूत्रीसार्थक्यम्। तदेवं समन्वयसूत्रादिसार्थक्यार्थं ब्रह्मणो धर्मविलक्षणत्वं विवक्षणीयमिति पृथक् शास्त्ररम्भ:-''अथातो ब्रह्मजिज्ञासे'' ति ब्रह्मण: प्रतिपत्तिविधिशेषत्वाभाव एवोपपद्यत इति व्याख्यातम्।।

तदेतदभिप्रेत्याह- ***ब्रह्मात्मैक्येति***।। प्रत्यगभिन्नस्वरूपचैतन्यमात्रसाक्षात्कारफलकजिज्ञासा त्वित्यर्थ:। ***अप्रतिज्ञातेति***।। अथातो धर्मजिज्ञासेति सूत्रविषय इत्यर्थ:। *तदर्थ:=विनानुष्ठानं फलसाधनब्रह्मसाक्षात्कारमात्रफलक इत्यर्थ:। मतान्तरेषु तु ब्रह्मोपासनमेव मोक्षसाधनतया विवक्षितमिति न पृथक्शास्त्रारम्भ: सप्रयोजन:। ***शास्त्रारम्भोऽथातो ब्रह्मजिज्ञासेति***।। अनेन चतु:सूत्र्या: शास्त्रारम्भार्थत्वमतनिरास: सूच्यते। अन्यथा हि ब्रह्मलक्षणमात्रादि कथनेन जिज्ञासापदाननुषङ्गेण सूत्रत्रयं प्रवर्तमानमसङ्गतं स्यात्। विचारो हि विषय-प्रयोजनसद्भावसमर्थनेनैव समर्थनीय:। तच्च ब्रह्मशब्देनैव संपन्नमिति नेदन्तया ब्रह्मस्वरूपनिर्णयादिकं विचारावश्यकताव्यवस्थापनायोपयुक्तम्। निर्णीतं हि ब्रह्म न पुनर्विचारमर्हति। सन्दिग्धत्वं खलु विचारव्यापकम्, न तु निर्णीतत्वम्। ''जन्माद्यस्य यत:'' इत्यादिकं तु ''तत्तु समन्वयादि'' त्यन्तं ब्रह्मस्वरूपनिर्णायकं कथं वा तत्र सन्देहमुत्पादयेदिति न चतु:सूत्र्या: शास्त्रारम्भार्थत्वम्। तथाहि-श्रीभाष्यमते-ब्रह्मणो जिज्ञास्यस्योपास्यत्वेन फलत्वस्याभिमतत्वाद् उपास्यजिज्ञासाप्रतिज्ञा ''अथातो धर्मजिज्ञासे'' त्येनेनैव गतार्थत्वाद् वितथेति न प्रथमसूत्रमपेक्षितम्। एवं सगुणस्यैव चेतनस्य संसारिव्यतिरिक्तस्य ब्रह्मत्वस्योरीकारात् लाघवानुगृहीतकार्यत्वहेतुकानुमानसाचिव्येनैव सदेवेत्यादिवाक्यार्थनिर्णयसंभवात् तत्तत्कारणवाक्यार्थनिर्णयेन ब्रह्मस्वरूपनिर्णयसंभवाच्च ''जन्माद्यस्य यत:'' इति सूत्रमपि वितथम्। उपसंहारादिन्याया: पूर्वतन्त्रसिद्धा एव तत्तत्कारणवाक्यगतात्मादिशब्दसामानाधिकरण्यस्यापि साधका भविष्यन्तीति शास्त्रैक्यवादिनां मते ब्रह्मपदार्थनिर्णयार्थं पृथक्प्रयत्नमेवानपेक्षितम्। अद्वैतमते तु जिज्ञास्यस्य धर्मवद् विधिशेषत्वाभावात्, अनुष्ठानापेक्षया फलसाधनत्वाभावाच्च न धर्मजिज्ञासा गतार्था। एवं पूर्वोक्तप्रकारेणानुमाना-विषयत्वाज्जिज्ञास्यस्य, अनुमानसाहाय्येन ब्रह्मनिर्णयासंभवात् श्रुत्यापीद्न्तया ब्रह्मबोधनासंभवेन स्थूलारुन्धतीन्यायेन तटस्थलक्षणविधयैव तन्निरूपणस्यावश्यकत्वाद् ''जन्माद्यस्य यत:'' इति सूत्रमप्यावश्यकमेव। शास्त्रयोनित्वसूत्रन्तु महातात्पर्येण सर्वेषां वेदानां प्रत्यगभिन्नस्वरूपनिर्द्धारणार्थत्वबोधनार्थमपेक्षितमेवाद्वैतमते। श्रीभाष्यमते तु-वेदार्थत्वाद् ब्रह्मणो धर्मजिज्ञासाप्रतिज्ञयैव ब्रह्मजिज्ञासाया अपि क्रोडीकरणाद् धर्मवत् शास्त्रयोनित्वमपि ब्रह्मणोऽर्थसिद्धमिति तन्निरपेक्षितमेव। एतेन-''तत्तु समन्वयात्'' इति सूत्रमपि व्याख्यातम्। अनेन हि शास्त्रप्रमाणकत्वमेव समन्वयेन हेतुना व्यवस्थाप्यत इति मतद्वयसम्प्रतिपन्नम्। शास्त्रबोधितं हि बाधितं वाऽबाधितं वेति संशये

बाधसद्भावासद्भावविचार एवावश्यकः। न हि वाचि धेनुत्वमुपास्यं कल्पितमिति ब्रह्मणि सत्यकामत्वादिगुणजातं श्रुत्येकसमधिगम्यं बाधितमिति कल्पनाया अवसरलेशोऽपि। न हि वाचि धेनुत्वमिब सत्यकामत्वादिगुणकं ब्रह्म प्रत्यक्षादिबाधितमिति व्यर्थं ब्रह्मपारमार्थिकतासाधनार्थं ''तत्तु समन्वयादि''ति सूत्रम्। समन्वयशब्दो हि वाक्यतात्पर्यबोधकः कथं वा ब्रह्मगतपुरुषार्थत्वान्वयमुपस्थापयेत्? उपस्थापनेऽपि वा ब्रह्म न पारमार्थिकम्, उपास्यत्वात्, वाग्धेनुत्वादिवत्, इत्यनुमानेऽपुरुषार्थत्वेन सोपाधिकत्वप्रदर्शनार्थं समन्वयाधिकरणमथवा पुरुषार्थत्वहेतुकसत्प्रतिपक्षानुमानप्रदर्शनार्थमिति खलु वक्तव्यम्। इदं च वाग्धेनुत्वादिवद् ब्रह्मणोऽबाधितत्वेन बाधितत्वेन सोपाधिकत्वादेव प्रथमानुमानानवसरादनपेक्षितमेव। वस्तुतस्तु-ब्रह्मणोऽपारमार्थिकत्वेऽपि तदुपासनेन तज्ज्ञानमात्रेण वा मोक्ष इति वादनिरासार्थं खलु समन्वयाधिकरणं श्रीभाष्यमते। तत्र चाप्रयोजनत्वाद्विचारायोगशङ्का तु नास्त्येव। एवं ब्रह्मणोऽपारमार्थिकत्वेऽपि सप्रयोजनत्वस्यैव साधनाद् विषयाभावाद् विचारायोगशङ्कापि नास्तीति कथं वा शास्त्रारम्भापेक्षणस्यैवासंभवे शास्त्रारम्भार्थत्वमस्य सूत्रस्येति समन्वयसूत्रमपि तन्मते व्यर्थम्। अद्वैतमते तु-अवान्तरतात्पर्येण कर्मोपासनादिपरत्वेऽपि महातात्पर्येण ब्रह्मणि सर्वेषां वेदवाक्यानां पर्यवसानसमन्वयार्थमिदमपेक्षितमित्यादि पूर्वमेव विवेचितम् तदिदं सर्वं मनसि निधायोपसंहरति- ***तस्मादिति*** तत्त्वंपदशोधितलक्ष्यप्रत्यगभिन्नब्रह्मनिरूपणार्थत्वस्यैव सर्वेषु शास्त्रेषु स्वीकरणीयत्वादित्यर्थः। *अहं ब्रह्मास्मीत्येतदवसानाः=महातात्पर्येण तत्त्वमसीतिवाक्येन वाक्यैकवाक्यतयाऽन्येनैव निराकाङ्क्षाः। *सर्वे विधयः=कर्मोपासनाविधयः। *एतेन*-स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया। वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते'' इति वाक्यैकवाक्यतालक्षणमपि समन्वितं भवति। *ननु* ब्रह्मसूत्राणां प्रत्यगभिन्नब्रह्मस्वरूपे न तात्पर्यम्, यत उपनिषत्सु तत्पदार्थ इव त्वंपदार्थोऽपि तात्पर्येण कुत्रापि न प्रतिपादितः; प्रत्यक्षसिद्धत्वाज्जीवस्य, इति कथं जीववाक्यानामभावे वाक्यैकवाक्यता? अन्यथा समन्वयाध्याये सिद्धान्तविधया कथं कानिचन जीववाक्यान्यपि न विचारितानीत्याशङ्क्य, न केवलं वेदवाक्यानाम्, किन्तु सर्वेषां प्रमाणानां तत्त्वमसीति-महावाक्येनैकवाक्यतेति निरूपयति- ***सर्वाणि चेतराणीति***॥ शाब्दबोधे हि पदोपस्थापित-मवान्तरवाक्योपस्थापितमिव च प्रमाणान्तरोपस्थापितमपि भासते तात्पर्यानुसारेण। तदुक्तम्-''पश्यतः श्वेतिमारूपं हेषाशब्दं च शृण्वतः। सुरविक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः'' इति। तथा च पदार्थोपस्थापनार्थमेव पदानि, न तु पदेष्वेव वाक्यार्थानुभाविकाऽपि शक्तिरस्तीति नान्विताभिधानवादो युक्तः, किन्त्वभिहितान्वयवाद एवेति भाट्टमत एव स्वस्य विशेषतः समादर इति सूचनद्वारा सति संभवे व्यवहारे भाट्टनयमेव स्वादरणीयं भाष्यकाराः सूचयन्ति। तथा चाभिहितान्वयवादरीत्योपस्थापितत्वं पदार्थे प्रत्यक्षादिप्रमाणसिद्धे तात्पर्यानुसारेण प्रत्यक्षादिप्रमाणैकवाक्यतयापि तत्त्वमसीति महावाक्यं प्रत्यगभिन्नं स्वरूपमुपस्थापयति। जीववाक्यानि समन्वयाध्याये प्रत्यक्षप्रमाणसिद्धत्वाज्जीवस्य, न तत्र सन्देह इति न

विचारितानि; अन्यथा ब्रह्मपरेष्वपि कथमपराणि वाक्यानि समन्वयाध्यायादौ न विचारितानीति शङ्का दुष्परिहरा समापद्येत। तदयं निष्कर्ष:-अध्यारोपापवादन्यायेन सर्वेषां प्रमाणानां प्रत्यगभिन्नस्वरूपपरत्वम्। तत्राध्यारोपमादाय सगुणवाक्यानीश्वरपराणि प्रत्यक्षादीनि च प्रमाणानि जीवपराणि, "तत्त्वमसी"ति महावाक्यन्त्वपवादेन चैतन्यमात्रपरमिति सर्वेषां प्रमाणानां तत्रैव पर्यवसानमिति। अवान्तरवाक्यबोधितत्वेऽपि तु गुणानां न पारमार्थिकत्वम्: अपच्छेदन्यायात्, इति न दोषलेशोऽपीत्याह- ***नह्यहेयानुपादेयेति***॥ *ननु* प्रमाणत्वाविशेषात् कथं प्रत्यक्षादिसिद्धमपि न पारमार्थिकं स्वरूपमित्याशङ्क्याह- ***निर्विषयाणीति-प्रमाणानीति च***॥ प्रमाणं द्विविधम्-व्यावहारिकतत्त्वावेदकं पारमार्थिकतत्त्वावेदकं च। आद्यं घटादिप्रत्यक्षस्य, द्वितीयन्तु ब्रह्मसाक्षात्कारस्य। आद्यं ब्रह्मसाक्षात्कारपर्यन्तमेव। अनन्तरन्तु ब्रह्मव्यतिरिक्तस्य सर्वस्य बाधितत्वान्न प्रमाणमिति व्यवहारकालबाधितविषयकत्वेन प्रत्यक्षादेस्तत्त्वमस्यादिवाक्यानामविशेषेऽपि त्रिकाला-बाधितार्थविषयकत्वेन तत्त्वमसिवाक्यादेर्विशेषाद् न तत्त्वमसिवाक्यदृष्टान्तेन प्रत्यक्षादीनां त्रिकालाबाधितविषयत्वम्, न वा प्रत्यक्षादिदृष्टान्तेन तत्त्वमस्यादिवाक्यानां व्यवहारकालमात्रा-बाधितविषयकत्वमिति न कोऽपि दोष इति भाव:। तमिमं विशेषं निगूढमभिप्रेतमेव पूर्वाचार्यकारिकोपष्टम्भेन विशदयति- ***अपिचाहुरिति***॥ अत्र प्रथमश्लोकेन 'अहं ब्रह्मास्मी 'ति वाक्यजन्यज्ञानेन प्रमाणान्तररस्य बाध: प्रतिपाद्यते, द्वितीयेन तु श्लोकेन बाधितानामपि प्रत्यक्षादीनां व्यावहारिकं प्रामाण्यन्तु वर्तत एवेति प्रतिपाद्यत इत्यनुपदसूचितो विशेष एवात्र विशदीकृत:। आहु:-आचार्यसुन्दरपाण्ड्या इति केचित्। अयं श्लोक आचार्यसुन्दरपाण्ड्यानामिति महामहोपाध्याय-श्रीकुप्पुस्वामिशास्त्रिपादै: सूतसंहिताव्याख्यानुसारेणान्यत्र विवेचितम्। विचारितं चात्र किञ्चिदस्मदीयवेदान्तपरिभाषाव्याख्यायामिति तत एवाधिकमवगन्तव्यम्। श्रीनारायणसरस्वत्यस्तु स्वीये वार्तिके गौडपादाचार्या इति वदन्ति।

ननु मुख्यं सामानाधिकरण्यं त्रिविधम्-विशेषणविशेष्यभावे बाधायामभेदे चेति। यत्र तु त्रिविधमपीदं न भवति, तत्र सादृश्यनिबन्धनं गौणं सामानाधिकरण्यम्। यत्र नात्यन्तिकाभेद:, न वैकतरविशेषज्ञानबाध्यत्वमपरस्य तत्र प्रथमम्, यथा नीलो घट इत्यादौ। न हि नीलज्ञानबाध्यो घटो घटज्ञानबाध्यो वा नील इति न बाधायां सामानाधिकरण्यमधिष्ठानारोप्यतादात्म्यप्रतीतिरूपम्। धर्मतो भेदात्तु नाभेदेऽपि तदिति विशेषणविशेष्यभाव एव सामानाधिकरण्यम्। इदं रजतमित्यत्र तु द्वितीयम्-इदंपदार्थविशेषज्ञानबाध्यत्वाद्रजतस्य। "उद्भिदा यजेत" इत्यत्र त्वभेदे सामानाधिकरण्यम्। त्रितस्यायाप्यस्य सिंहो देवदत्त इत्यत्राभावाद् गौणं सामानाधिकरण्यमिति वस्तुस्थिति:। सति चैवमहं स्थूल: कृश इत्यादौ, 'अहं ब्रह्मस्मी'त्यत्र च कीदृशं सामानाधिकरण्यं विवक्षितमिति वक्तव्यम्। वयन्तु

प्रतीमः-उभयत्रैकरूपमेव सामानाधिकरण्यं गौणम्, न मुख्यम्। मुख्यत्वेऽपि वा शरीरात्मनोरभेदस्य बाधितत्ववद् जीव-ब्रह्मणोरपि तस्य बाधितत्वादुभयत्रापि बाधायामेव सामानाधिकरण्यम्। अत एव भाष्येऽनुपदं सप्रमातृकाणि प्रमाणानि न भवितुमर्हन्तीति प्रमाणानामिव प्रमातुरपि बाधितत्वं प्रतिपादितमुपपद्यत इति कथं तत्त्वमसीति वाक्येन जीवब्रह्मात्यन्तिकाभेदप्रतीतिः? इत्याशङ्कासमाधानपूर्वकमुभयत्रात्र सामानाधिकरण्यं नैकरूपमिति प्रतिपादनपूर्वकं जीवब्रह्माभेद एव महावाक्यार्थ इति निरूपणपरं प्रथमश्लोकं निर्दिशति- ***गौणेति***॥ गौणश्च मिथ्या च गौणमिथ्या, गौणमिथ्या आत्मानो गौणमिथ्यात्मानो तयोर्गौणमिथ्यात्मनोः। रेफलोपस्तु संन्यासिसम्प्रदायगृहीतत्वेनास्याः कारिकाया वेदतुल्यत्वाच्छान्दसः। दृश्यते हि पारायणोपयुज्यमानानां पौरुषेयाणामपि गीतादीनां श्रीमद्रामायणादीनां च वेदतुल्यत्वेन तत्र तत्र छान्दसप्रयोगः। सादृश्यनिबन्धनाभेदव्यवहारविषय आत्मा गौणात्मा, अध्यासनिबन्धनाभेदव्यवहारविषय आत्मा तु मिथ्यात्मा। पुत्रादेरात्माभिमानो गौणः, यतस्तत्र बाह्यत्वान्तरत्वादिना भेदग्रहदशायामेव निरतिशयप्रेमास्पदत्वसादृश्यमात्रेणाभेदव्यवहारः। न हि शरीरमिवान्तःकरणाधारे चैतन्य एव पुत्रादिकमपि कल्पितम्। अत एव नाहं पुत्र इति व्यवहारो दृश्यते। शरीर आत्माभिमानस्तु मिथ्यैव, यतोऽध्यासनिबन्धनमेवेदं सामानाधिकरण्यम्, न तु सादृश्यनिबन्धनम्। न हि कृशो देवदत्तः कदापि नाहं कृश इति भेदेन व्यपदिशति। भेदव्यपदेशायोग्यत्वेऽप्यभेदे सामानाधिकरण्यन्तु बाधितमेवेति बाधायामेवेदं सामानाधिकरण्यम्। बाध्यते हि शरीरादि-निष्कृष्टप्रमातृत्वस्वरूपसाक्षात्कारानन्तरमिति देहादिर्मिथ्यात्मा=पुत्रादिस्तु गौणत्मेति निष्कर्षः। *असत्त्वे, स्वरूपतोऽभावे।* *पुत्रदेहादिबाधनात्=सदृशस्याध्यस्तस्य चोभयस्य ब्रह्मसाक्षात्कारबाध्यत्वात्। *सद्ब्रह्माहमिति बोधे=अहं ब्रह्मास्मीति ब्रह्मसाक्षात्कारे सति। *कार्यं=शरीराद्यभिमानप्रयुक्ताधिकारविशेषादिनिबन्धनानि विधिनिषेधशास्त्राणि। *कथं भवेत्=न भवन्तीत्यर्थः। कथमाक्षेपे। अत्राहं ब्रह्मास्मीति न गौणं बाधायां वा सामानाधिकरण्यम्, किन्त्वभेद इति सत्पदविशेषणेन सूच्यते। सत्यं सत्पदेन ब्रह्ममात्रस्याबाधः सूच्यते, नतु प्रमातुरपि; तथाऽपि पुत्रदेहाद्युपाधिबाधस्यैव पूर्वमुल्लेखात् प्रमातृस्वरूपमप्यबाधितं मत्वैव सद्ब्रह्माऽहमिति ज्ञानोल्लेखोऽत्र विवक्षित इति मन्तव्यम्। सति चैवं ''सप्रमातृकाणी''ति पूर्वतनभाष्ये प्रमातुरपि निषेधस्तदुपाध्यन्तःकरणनिषेधाभिप्राय एवेति फलति। जीवानाभासताभिप्रायेणैवमुक्तम्। यदि तु जीवाभासतावाद आश्रीयते, तर्हि सद्ब्रह्माहमित्यपि बाधायां सामानाधिकरण्यमेव। तत्र च बाध्यमानत्वं न ब्रह्मणः, किन्तु प्रमातुरेवेति बोधनार्थं सदिति ब्रह्मविशेषणम्।

इदमेव तु भाष्यं गृहीत्वा जीवाभासतावादः, जीवोऽपि कूटस्थचैतन्ये कल्पितः, अहं ब्रह्मास्मीति बाधायां सामानाधिकरण्यमिति च सिद्धान्तलेशे संगृहीतम्। अत्र पक्षे पुत्रदेहादीत्यादिपदेन प्रमातुरपि

ग्रहणमिति विवेकः। *ननु* देहादेरिव पुत्रस्यापि बाध्यमानत्ववर्णनात् कथं देहो मिथ्यात्मा, पुत्रस्तु गौणात्मेति चेत्, *अत्रोच्यते*; बाध्यत्वं ह्यविद्या-तत्कार्यान्यतरप्रयुक्तमेव। तच्च पुत्रादेरपि समानम्। गौणमिथ्याव्यवहारस्तु, यत्तादात्म्यं यत्र भासते, तत्र भेदप्रतीतिकालिकतदभावनिबन्धन एवेति, अहं पदार्थदृष्ट्या पुत्रस्य गौणत्वेऽपि शुद्धचैतन्यदृष्ट्या तदध्यस्तत्वस्यैव स्वीकाराद् न कोऽपि दोषः। तथाच दृश्यं द्विविधम्-किंचिदहंपदार्थभिन्नतया प्रतीयमानम्, किंचिच्च तदभिन्नतयैव प्रतीयमानम्, उभयमपि मायिकं मिथ्या चेति निरूपणमन्तरा नाद्वितीयब्रह्मसाक्षात्कारानुवादः संभवतीत्युभयविधस्यापि दृश्यस्य बाधोऽत्र निरूपितः। तथा च "तत्त्वमसी"ति महावाक्यमबाधितब्रह्मस्वरूपविषयकसाक्षात्कारजनकत्वात् पारमार्थिकतत्त्वावेदकं प्रमाणम्। 'अहं कृशः' इत्यादिज्ञानन्तु विधिनिषेधशास्त्राणि च व्यावहारिकतत्त्वावेदप्रमाणानीति विशेषो ज्ञाप्यते। यतः-'अहं ब्रह्मास्मी'ति ज्ञानमबाधितचैतन्यस्वरूपमात्रविषयकम्, अहं कृश इत्यादिकन्तु ब्रह्मसाक्षात्कारानन्तरं बाध्यमानान्तःकरणादिशबलितात्मविषयकम्। तथा चाहं ब्रह्मास्मीति चैतन्यस्वरूपमात्रविषयकत्वादभेदे सामानाधिकरण्यमेव, यतोऽन्तःकरणोपलक्षितस्य मायोपलक्षितस्य च चैतन्यमात्रस्यैवाभेदमात्रं विवक्ष्यते, न तु धर्मतः परस्परभेदोऽपि। *ननु* कथमहमर्थस्य सत्यस्य बाधः? कथं वा चैतन्यमात्रस्याहंपदेनोपस्थितिः? नह्यहमर्थस्य बाधितत्वेऽहं मुक्तः स्यामितीच्छा संभवतीत्याशङ्क्य, चैतन्यमात्रस्याहंपदार्थत्वमात्मसाक्षात्कारपूर्वावस्थायामेव, न तु ततः परमपीति प्रतिपादकं द्वितीयं श्लोकं निर्दिशति- ***अन्वेष्टव्येति***॥ सत्यमहमर्थोऽप्यात्मैव सर्वैरपि मन्यते; तथाऽपि वेदान्तगम्यमात्मतत्त्वं नाहंकारशबलितमेव पारमार्थिकम्। अत एव-"अथातोऽहंकारादेशः" इति प्रतिज्ञाय "अथात आत्मादेशः" इति पृथगात्मोपदेशोपक्रम उपपद्यते। तथा चात्मविचारात् पूर्वमहमर्थ एवात्मेति ज्ञातश्चेदपि विचारेण तत्साक्षात्कारानन्तरमहमर्थः प्रमातैव पाप्मदोषादिवर्जितः परमात्मस्वरूपो भवतीति वाक्यार्थः। अत्र "पाप्मदोषादिवर्जितः" इति विशेषणपदेनापहतपाप्मत्वस्य परमात्मासाधारणगुणत्वात् परमात्मपर्यन्तपरत्वेन जीवस्य परमात्मभाव एव मुक्तौ प्रतिपाद्यते। यथा च मुक्तिदशायामहंकारानुवृत्तावप्यहं मुक्तः स्यामितीच्छोपपत्तिः, तथान्यत्र व्यक्तम्। इदमेव भाष्यं गृहीत्वाऽहमर्थानात्मतावादोऽद्वैतानाम्। अन्येष्टव्यविचारद्वारा साक्षात्कर्तव्यात्मसाक्षात्कारा-दित्यन्वेष्टव्यात्मविज्ञानादिति पदस्यार्थः। *आत्मनः=चैतन्यस्य। प्रमातृत्वम्=अन्तःकरणावच्छिन्नत्वम्। *अन्विष्टः=साक्षात्कृत एव सन्, आत्मेति शेषः। *पाप्मदोषादिवर्जितः=परमात्माभिन्नः स्यादिति योजना। अनेन च प्रमातृत्वमेवात्मनः कल्पितम्, न तु प्रमातैव स्वरूपतः कल्पित इति जीवानाभासतापक्ष एव स्वरसः प्रतीयते। अनेन च श्लोकेनाभेद एवाहं ब्रह्मास्मीति सामानाधिकरण्यम्, न तु बाधायामिति सूच्यते, इति तत्त्वमस्यादिमहावाक्यं पारमार्थिकतत्त्वावेदकमिति ज्ञाप्यते। अथ तृतीयश्लोकमहं कृश इत्यादिज्ञानानां व्यावहारिकतत्त्वावेदकत्वलक्षणमेव प्रामाण्यमिति निरूपणपरं निर्दिशति- ***देहात्मप्रत्यय इति***॥

*लौकिकम्=घटादिज्ञानम्। देहात्मज्ञानं यथा व्यावहारिकतत्त्वावेदकम्, एवं 'सन् घट:' इत्यादिज्ञानमपि व्यावहारिकतत्त्वावेदकमिति भाव:। कुत इत्यत आह- ***आत्मनिश्चयादिति***॥ आत्मसाक्षात्कारपर्यन्तमित्यर्थ:। 'सन् घट:' इत्यपि बाधायां सामानाधिकरण्यमेवेति निष्कर्ष:। यथा चैतन्यमहंप्रतीतिसमय आनन्दरूपेण न ज्ञायते, सच्चिद्रूपेण तु ज्ञायते, एवमेव सन् घट इति प्रतीतिसमयेऽपि। इयान्विशेष:-यद् अहं प्रतीतावधिष्ठानारोप्ययोरुभयोरप्यप्रतीत्या न द्व्यंशविषयकत्वं स्पष्टम्, सन् घट इत्यत्र तु तत् स्पष्टम्। न हि 'सन् घट:' इति प्रतीतिविषयं सत्त्वं नैयायिकसम्मतसमानजातिमत्त्वम्। अभावोऽस्तीत्यभावसाधारण्यात्सत्त्वस्येत्यधिष्ठानरूपसत्तातादात्म्य- मेवात्र प्रतीयत इति भाव:। त्रिभिरेतै: श्लोकै: प्रमाणानां महावाक्यातिरिक्तानां व्यावहारिकतत्त्वावेदकत्वलक्षणं महावाक्यानान्तु पारमार्थिकतत्त्वावेदकत्वलक्षणं प्रामाण्यमिति व्यवस्थापनेन महावाक्यप्रतिपाद्यं नोपासनादिसाध्यतया तत्साधानतया वाऽन्वेतुं योज्यमिति सूच्यते। तेन न धर्मविलक्षणत्वं ब्रह्मण: साध्यते, इति विधिसम्बन्धो धर्मजिज्ञासाविषयत्वं वा न ब्रह्मण इति सिद्ध्यति। तथा च न प्रतिपत्तिविधिविषयतया ब्रह्मणो वेदान्तैर्बोधनम्, किन्तु साक्षात्कारमात्रे निखिलसंसारबन्धनिवर्तनक्षमं ब्रह्मस्वरूपमात्रमेव वेदान्तैर्बोध्यते। तत्रैव महावाक्यानामुपक्रमोप- संहारादिभिस्तात्पर्यमवगम्यते, इति शास्त्रप्रमाणकं ब्रह्मेति सिद्धम्। सति चैवं सर्ववेदतात्पर्यविषयस्तटस्थलक्षणविधया स्थूलारुन्धतीन्यायेन जन्मादिवाक्यावसेयं शुद्धं निर्विशेषं च चैतन्यमात्रमेवावगतिमात्रेण मोक्षपर्यवसायि-"अथातो ब्रह्मजिज्ञासे"ति जिज्ञास्यतया प्रतिज्ञातमिति तस्य प्रत्यगभिन्नस्याप्यहंप्रतीतिविषयात् प्रमातुर्विभिन्नत्वादहंज्ञानमात्रेण मोक्षासिद्ध्युपपत्तेस्यतस्य शरीरादितादात्म्यापन्नस्य संसारिव्यतिरिक्तत्वाव्यतिरिक्तत्वादीनां विचारं विना सन्दिग्धस्वरूपत्वाद् वेदान्तमात्रसमधिगम्यत्वाच्च ब्रह्मविचार: कर्तव्य इति निष्कर्ष:।

इति ब्रह्मसूत्रशाङ्करभाष्यटिप्पणे प्रदीपे समन्वयाधिकरणं समाप्तम्।

भामती

शास्त्रप्रमाणकत्वमुक्तं ब्रह्मण: प्रतिज्ञामात्रेण, तदनेन सूत्रेणोपपादनीयम्, इत्युत्सूत्रं पूर्वपक्षमारचयति भाष्यकार:- ***कथं पुनरिति*।।** किमित्याक्षेपे। शुद्ध-बुद्धोदासीनस्वभावतयोपेक्षणीयं ब्रह्म; भूतमभिदधतां वेदान्तानामपुरुषार्थोपदेशिनामप्रयोजनत्वापत्ते:, भूतार्थत्वे च प्रत्यक्षादिभि: समानविषयतया लौकिक-वाक्यवत् तदर्थानुवादकत्वेनाप्रामाण्यप्रसङ्गात्। न खलु लौकिकानि वाक्यानि प्रमाणान्तरविषय-मर्थमवबोधयन्ति स्वत:प्रमाणम्, एवं वेदान्ता अपि, इत्यनपेक्षत्वलक्षणं प्रामाण्यमेषां व्याहन्येत। न च तैरप्रमाणैर्भवितुं युक्तम्, न चाप्रयोजनै: स्वाध्यायाध्ययनविध्यापादितप्रयोजनवत्त्वनियमात्। तस्मात् तत्तद्विहितकर्मापेक्षितकर्तृ-देवतादिप्रतिपादनपरत्वेनैव क्रियार्थत्वम्। यदि त्वसंनिधानात् तत्परत्वं न रोचयन्ते, तत: संनिहितोपासनादिक्रियापरत्वं वेदान्तानाम्।एवं हि प्रत्यक्षाद्यनधिगतगोचरत्वेनानपेक्षतया प्रामाण्यं च प्रयोजनवत्त्वं च सिध्यतीति तात्पर्यार्थ:। पारमर्षसूत्रोपन्यासस्तु पूर्वपक्षदार्ढ्याय। आनर्थक्यं चाप्रयोजनवत्त्वम्, सापेक्षतया प्रमानुपादकत्वं च; अनुवादकत्वादिति।। ***अत इत्यादि वाऽन्तं** ग्रहणकवाक्यम्*। अस्य विभागभाष्यम्- ***नहि**-इत्यादि उपपन्ना वा इत्यन्तम्*।।

स्यादेतत्-अक्रियार्थत्वेऽपि ब्रह्मस्वरूपविधिपरा वेदान्ता भविष्यन्ति, तथा च ''विधिना त्वेकवाक्यत्वात्''-इति राद्धान्तसूत्रमनुग्रहीष्यते। न खल्वप्रवृत्तप्रवर्तनमेव विधि:; उत्पत्तिविधेरज्ञात-ज्ञापनार्थत्वात्, वेदान्तानां चाज्ञातं ब्रह्म ज्ञापयतां तथाभावादित्यत आह- ***न च परिनिष्ठित इति*।।** अनागतोत्पाद्यभावविषय एव हि सर्वो विधिरुपेय:; अधिकार विनियोग-प्रयोगोत्पत्तिरूपाणां परस्परा-विनाभावात्, सिद्धे च तेषामसंभवात् तद्वाक्यानां त्वैदंपर्यं भिद्यते। यथा ''अग्निहोत्रं जुहुयात्स्वर्गकाम:'' इत्यादिभ्योऽधिकार-विनियोग-प्रयोगाणां प्रतिलम्भाद् ''अग्निहोत्रं जुहोति'' इत्युत्पत्तिमात्रपरं वाक्यम्, नत्वत्र न विनियोगादय: सन्ति; सन्तोऽप्यन्यतो लब्धत्वात् केवलमविवक्षिता:। तस्माद् भावनाविषयो विधिर्न सिद्धे वस्तुनि भवितुमर्हतीति। उपसंहरति- ***तस्मादिति*।।** अत्रारुचिकारणमुक्त्वा पक्षान्तरमुपसंक्रामति- ***अथेति*।।** एवंच सत्युक्तरूपे ब्रह्मणि शब्दस्यातात्पर्यात् प्रमाणान्तरेण यादृशमस्य रूपं व्यवस्थाप्यते, न तच्छब्देन विरुध्यते; तस्योपासनापरत्वात्, समारोपेण चोपासनाया उपपत्तेरिति। प्रकृतमुपसंहरति- ***तस्मान्नेति*।।** सूत्रेण सिद्धान्तयति- *एवं प्राप्त उच्यते-**तत्तु समन्वयात्*।।** तदेतद् व्याचष्टे- ***तुशब्द इति*।।** अदित्युत्तरपक्षप्रतिज्ञां विभजते-**तद् ब्रह्मेति*।।** पूर्वपक्षी कर्कशाशय: पृच्छति- ***कथम्*।।** कुत: प्रकारादित्यर्थ:। सिद्धान्ती स्वपक्षे हेतुं प्रकारभेदमाह- ***समन्वयात्*।।** सम्यगन्वय: समन्वय:, तस्मात्। एतदेव विभजते- ***सर्वेषु हि वेदान्तेष्विति*।।** वेदान्तानामैकान्तिकीं ब्रह्मपरतामाचिख्यासुर्बहूनि वाक्यान्युदाहरति- ***सदेवेति*।।** 'यतो वा इमानि भूतानि' इति तु वाक्यं

पूर्वमुदाहृतं जगदुत्पत्ति-स्थिति-नाशकारणमिति चेह स्मारितमिति न पठितम्। येन हि वाक्यमुपक्रम्यते, येन चोपसंह्रियते, तदेव वाक्यार्थ इति शाब्दाः। यथोपांशुयाजवाक्येऽनूचोः पुरोडाशयोर्जामितादोष-संकीर्तनपूर्वकोपांशुयाजविधाने तत्प्रतिसमाधाने तत्प्रतिसमाधानोपसंहारे चापूर्वोपांशुयाजकर्मविधि-परतैकवाक्यता बलादाश्रिता, एवमत्रापि 'सदेव सौम्येदम्' इति ब्रह्मोपक्रमात् 'तत्त्वमसि' इति च जीवस्य ब्रह्मात्मनोपसंहारात् तत्परतैव वाक्यस्य। एवं वाक्यान्तराणामपि पौर्वापर्यपर्यालोचनया ब्रह्मपरत्वमवगन्तव्यम्। न च तत्परत्वस्य दृष्टस्य सति संभवेऽन्यपरताऽदृष्टा युक्ता कल्पयितुम्; अतिप्रसङ्गात्। न केवलं कर्तृपरता तेषामदृष्टा, अनुपपन्ना चेत्याह– ***न च तेषामिति***॥ सापेक्षत्वेनाप्रामाण्यं पूर्वपक्षबीजं दूषयति– ***परिनिष्ठितवस्तुस्वरूपत्वेऽपीति***॥ *अयमभिसंधिः* पुंवाक्यनिदर्शनेन हि भूतार्थतया वेदान्तानां सापेक्षत्वमाशङ्क्यते। तत्रैवं भवान् पृष्टो व्याचष्टाम्, किं पुंवाक्यानां सापेक्षता भूतार्थत्वेन? आहो पौरुषेयत्वेन? यदि भूतार्थत्वेन, ततः प्रत्यक्षादीनामपि परस्परापेक्षत्वेनाप्रामाण्यप्रसङ्गः। तान्यपि हि भूताथान्येर्वा अथ पुरुषबुद्धिप्र भवतया पुंवाक्यं सापेक्षम्, एवं तर्हि तदपूर्वकाणां वेदान्तानां भूतार्थानामपि। नाप्रामाण्यम्; प्रत्यक्षादीनामिव नियतेन्द्रियलिङ्गादिजन्मनाम्। यद्युच्येत सिद्धे किलापौरुषेयत्वे वेदान्तानामनपेक्षतया प्रामाण्यं सिध्येत्, तदेव तु भूतार्थत्वेन न सिध्यति; भूतार्थस्य शब्दानपेक्षेण पुरुषेण मानान्तरतः शक्यज्ञानत्वाद् बुद्धिपूर्वविरचनोपपत्तेः; वाक्यत्वादिलिङ्गकस्य वेदपौरुषेयत्वानुमान-स्याप्रत्यूहमुत्पत्तेः। तस्मात् पौरुषेयत्वेन सापेक्षत्वं दुर्वारम्, नतु भूतार्थत्वेन। कार्यार्थत्वे तु मानान्तरागोचरतयाऽत्यन्ताननुभूतपूर्वस्य तत्त्वेन समारोपेण वा पुरुषबुद्धावनारोहात् तदर्थानां वेदान्तानामशक्यरचनतया पौरुषेयत्वाभावादनपेक्षं प्रमाणत्वं सिध्यति, इति प्रामाण्याय वेदान्तानां कार्यपरत्वमातिष्ठामहे॥

अत्र ब्रूमः–किं पुनरिदं कार्यमभिमतमायुष्मतः, यदशक्यं पुरुषेण ज्ञातुम्। अपूर्वमिति चेत्, हन्त कुतस्त्यमस्य लिङाद्यर्थत्वम्; तेनालौकिकेन संगतिसंवेदनविरहात्, लोकानुसारतः क्रियाया एव लौकिक्याः कार्याया लिङ्गादेरवगमात्। ''स्वर्गकामो यजेत'' इति साध्यस्वर्गविशिष्टो नियोज्योऽवगम्यते। स च तदेव कार्यमवगच्छति, यत्स्वर्गानुकूलम्। न च क्रिया क्षणभङ्गुराऽऽमुष्मिकाय स्वर्गाय कल्पते, इति पारिशेष्याद् वेदत एवापूर्वे कार्ये लिङादीनां संबन्धग्रह इति चेत्, हन्त चैत्यवन्दनादिवाक्येष्वपि स्वर्गकामादिपदसंबन्धादपूर्वकार्यत्वप्रसङ्गः। तथा च तेषामप्यशक्यरचनत्वेनापौरुषेयत्वापातः। स्वप्नदृष्टेन पौरुषेयत्वेन वा तेषामपूर्वार्थत्वप्रतिषेधे वाक्यत्वादिना लिङ्गेन वेदानामपि पौरुषेयत्वमनुमितमित्यपूर्वार्थता न स्यात्। अन्यतस्तु वाक्यत्वादीनामनुमानाभासत्वोपपादने कृतमपूर्वार्थत्वेनात्र तदुपपादकेन। उपपादितं चापौरुषेयत्वमस्माभिर्न्यायकणिकायाम्, इह तु विस्तरभयान्नोक्तम्। तेन पौरुषेयत्वेऽसिद्धे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघातः। न चानधिगतगन्तृता नास्ति, येन प्रामाण्यं न स्यात्; जीवस्य

ब्रह्मताया अन्यतोऽनधिगमात्। तदिदमुक्तम्– *न च परिनिष्ठितवस्तुस्वरूपत्वेऽपीति *।। द्वितीयं पूर्वपक्षबीजं स्मारयित्वा दूषयति– * **यत्तु हेयोपादेयरहितत्वादिति** *।। विध्यर्थावगमात् खलु पारम्पर्येण पुरुषार्थप्रतिलम्भः। इह तु ''तत्त्वमसि'' इत्यवगतिपर्यन्ताद्वाक्यार्थज्ञानाद् बाह्यानुष्ठानायासानपेक्षात् साक्षादेव पुरुषार्थप्रतिलम्भो 'नायं सर्पो रज्जुरियमि'ति ज्ञानादि वेति। सोऽयमस्य विध्यर्थज्ञानात् प्रकर्षः।।

एतदुक्तं भवति–द्विविधं हीप्सितं पुरुषस्य–किंचिदप्राप्तं ग्रामादि, किंचित्पुनः प्राप्तमपि भ्रमवशाद-प्राप्तमित्यवगतम्, यथा स्वग्रीवावनद्धं ग्रैवेयकम्। एवं जिहासितमपि द्विविधम्–किंचिदत्यक्तं जिहासति यथा बलयितचरणं फणिनम्। किंचित्पुनर्हीनमेव जिहासति; यथा चरणाभरणे नूपुरे फणिनमारोपितम्। तत्राप्राप्तप्राप्तौ चात्यक्तत्यागे च बाह्योपायानुष्ठानसाध्यत्वात् तदुपायतत्त्वज्ञानादस्ति पराचीनानुष्ठानापेक्षा। न जातु ज्ञानमात्रं वस्त्वपनयति। नहि संहस्रमपि रज्जुप्रत्यया वस्तुसन्तं फणिनमन्यथयितुमीशते। समारोपिते तु प्रेप्सित–जिहासिते तत्त्वसाक्षात्कारमात्रेण बाह्यानुष्ठानानपेक्षेण शक्येते प्राप्तुमिव हातुमिव। समारोपितजीविते हि ते। समारोपितं च तत्त्वसाक्षात्कारः समूलघातमुपहन्तीति, तथेहाप्यविद्यासमारोपितजीवभावे ब्रह्मण्यानन्दे वस्तुतः शोक–दुःखादिरहिते समारोपिताविद्यानिबन्धनस्तद्भावः–''तत्त्वमसि'' इति वाक्यार्थतत्त्वज्ञानादवगतिपर्यन्तान्निवर्तते। तन्निवृत्तौ प्राप्तमप्यानन्दरूपमप्राप्तमिव प्राप्तं भवति, त्यक्तमपि शोक–दुःखाद्यत्यक्तमिव त्यक्तं भवति, तदिदमुक्तम्–**ब्रह्मात्मावगमादेव जीवस्य सर्वक्लेशस्य** सवासनस्य विपर्यासस्य। स हि क्लिश्नाति जन्तूनतः क्लेशः, तस्य प्रकर्षेण हानात् पुरुषार्थस्य=दुःखनिवृत्ति–सुखप्राप्तिलक्षणस्य सिद्धेरिति। यत्तु–आत्मेत्येवोपासीत'' ''आत्मानमेव लोकमुपासीत'' इत्युपासनावाक्यगतदेवतादिप्रतिपादनेनोपासनापरत्वं वेदान्तानामुक्तम्, ''तद् दूषयति– ***देवतादिप्रतिपादनस्य** तु आत्मेत्येतावन्मात्रस्य **स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद्विरोधः** *।। यदि न विरोधः, सन्तु तर्हि वेदान्ता देवताप्रतिपादनद्वारेणोपासनाविधिपरा एवेति, अत आह–**नतु तथा** ब्रह्मण इति*।। उपास्योपासकोपासनादिभेदसिद्ध्यधीनोपासना न निरस्तसमस्तभेदप्रपञ्चे वेदान्तवेद्ये **ब्रह्मणि संभवति,** इति नोपासनाविधि वेदान्तानां तद्विरोधित्वादित्यर्थः।।

स्यादेतत्– यदि विधिविरहेऽपि वेदान्तानां । प्रमाण्यम्, हन्त तर्हि ''सोऽरोदीत्'' इत्यादीनामप्यस्तु स्वतन्त्राणामेवोपक्षेणीयार्थानां प्रामाण्यम्। नहि हानोपादानबुद्धी एवं प्रमाणस्य फले; उपेक्षाबुद्धेरपि तत्फलत्वेन प्रामाणिकैरभ्युपेतत्वात्, इति कृतम्–''बर्हिषि रजतं न देयम्'' इत्यादिनिषेधविधिपरत्वेनैतेषामिति, उत आह– ***यद्यपीति** *।। स्वाध्यायविध्यधीनग्रहणतया हि सर्वो वेदराशिः पुरुषार्थतन्त्र इत्यवगतम्। तत्रैकेनापि वर्णेन नापुरुषार्थेन भवितुं युक्तम् किं पुनरियता 'सोऽरोदीत्' इत्यादिना पदप्रबन्धेन।। न च वेदान्तेभ्य इव तदर्थावगममात्रादेव कश्चित्पुरुषार्थ उपलभ्यते। तेनैष पदसन्दर्भः

साकाङ्क्ष एवास्ते पुरुषार्थमुद्वीक्षमाणः। ''बर्हिषि रजतं न देयम्'' इत्ययमपि निषेधविधिः स्वनिषेध्यस्य निन्दामपेक्षते। तेन ह्यन्यथा ततश्चेतनः शक्यो न निवारयितुम्। तद् यदि दूरतोऽपि न निन्दामवाप्स्यत्, ततो निषेधविधिरेव रजतनिषेधे च निन्दायां च दर्विहोमवत् सामर्थ्यद्वयमकल्पयिष्यत्। तदेवमुत्तप्तयोः ''सोऽरोदीत्'' इति च ''बर्हिषि रजतं न देयम्'' इति च पदसन्दर्भयोर्लक्ष्यमाणनिन्दाद्वारेण नष्टाश्वदग्धरथवत् परस्परं समन्वयं, नत्वेवं वेदान्तेषु पुरुषार्थापेक्षा; तदर्थावगमादेवानपेक्षात् परमपुरुषार्थलाभादित्युक्तम्। *ननु* विध्यसंस्पर्शिनो वेदस्यान्यस्य न प्रामाण्यं दृष्टम्, इति कथं वेदान्तानां तदस्पृशां तद्भविष्यतीति? अत आह– ***न चानुमानगम्यमिति***॥ अबाधितानधिगतासंदिग्धबोधजनकत्वं हि प्रमाणत्वं प्रमाणानाम्, तच्च स्वत इत्युपपादितम्। यद्यपि चैषामीदृग्बोधजनकत्वं कार्यार्थापत्तिसमधिगम्यम्; तथाऽपि तद्बोधोपजनने मानान्तरं नापेक्षन्ते, नापीमामेवार्थापत्तिम्; परस्पराश्रयप्रसङ्गादिति स्वत इत्युक्तम्। ईदृग्बोधजनकत्वं च कार्ये इव विधीनां वेदान्तानां ब्रह्मण्यस्ति, इति दृष्टान्तानपेक्षं तेषां ब्रह्मणि प्रामाण्यं सिद्धं भवति; अन्यथा नेन्द्रियान्तराणां रूपप्रकाशनं दृष्टम्, इति चक्षुरपि न रूपं प्रकाशयेदिति। प्रकृतमुपसंहरति– ***तस्मादिति***॥

इति श्रीवाचस्पतिमिश्रकृतौ भामत्यां वेदान्तानां ब्रह्मणि समन्वयनिरूपणं समाप्तम्।

आचार्यदेशीयानां मतमुत्थापयति- ***अत्रापरे प्रत्यवतिष्ठन्त इति***॥ तथाहि-

''अज्ञातसंगतित्वेन शास्त्रत्वेनार्थवत्तया। मननादिप्रतीत्या च कार्यार्थाद्ब्रह्मनिश्चयः॥''

न खलु वेदान्ताः सिद्धब्रह्मरूपपरा भवितुमर्हन्ति; तत्राविदितसंगतित्वात्। यत्र हि शब्दा लोकेन न प्रयुज्यन्ते, तत्र न तेषां संगतिग्रहः। न चाहेयमनुपादेयं रूपमात्रं कश्चिद्विवक्षति प्रेक्षावान्; तस्याबुभुत्सितत्वात्, अबुभुत्सितावबोधने च प्रेक्षावत्ताविघातात्। तस्मात् प्रतिपित्सितं प्रतिपिपादयिषन्नयं लोकः प्रवृत्ति-निवृत्तिहेतुभूतमेवार्थं प्रतिपादयेत्। कार्यं चावगतं तद्धेतुः, इति तदेव बोधयेत्। एवंच वृद्धव्यवहारप्रयोगात् पदानां कार्यपरतामवगच्छति। तत्र किंचित्साक्षात्कार्याभिधायकम्, किञ्चित्तु कार्यार्थस्वार्थाभिधायकम्, नतु भूतार्थपरता पदानाम्। अपिच नरान्तरस्य व्युत्पन्नस्यार्थप्रत्ययमनुमाय तस्य च शब्दभावाभावानुविधानमवगम्य शब्दस्य तद्विषयबोधकत्वं निश्चेतव्यम्। न च भूतार्थरूपमात्रप्रत्यये परनरवर्तिनि किंचिल्लिङ्गमस्ति, कार्यप्रत्यये तु नरान्तरवर्तिनि प्रवृत्ति-निवृत्ती स्तो हेतू, इत्यज्ञातसंगतित्वान्न ब्रह्मरूपपरा वेदान्ताः। अपिच वेदान्तानां वेदत्वाच्छास्त्रत्वप्रसिद्धिरस्ति। प्रवृत्ति-निवृत्तिपराणां च संदर्भाणां शास्त्रत्वम्। यथाहुः-''प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते॥' इति॥ तस्माच्छास्त्रत्वप्रसिद्ध्या व्याहतमेषां स्वरूपपरत्वम्।

अपिच न ब्रह्मस्वरूपप्रतिपादनपराणामेषामर्थवत्त्वं पश्यामः। न च 'रज्जुरियं न भुजङ्गः' इति यथाकथंचिल्लक्षणया वाक्यार्थतत्त्वनिश्चये यथा भय-कम्पादिनिवृत्तिः, एवं 'तत्त्वमसि' इति वाक्यार्थावगमान्निवृत्तिर्भवति सांसारिकाणां धर्माणाम्; श्रुतवाक्यस्यापि पुंसस्तेषां तादवस्थ्यात्॥

अपिच यदि श्रुतब्रह्मणो भवति सांसारिकधर्मनिवृत्तिः, कस्मात् पुनः श्रवणस्योपरि मननादयः श्रूयन्ते? तस्मात्तेषां वैयर्थ्यप्रसङ्गादपि न ब्रह्मस्वरूपपरा वेदान्ताः, किंत्वात्मप्रतिपत्तिविषयकार्यपराः। तच्च कार्यं स्वात्मनि नियोज्यं नियुञ्जानं नियोग इति च मानान्तरापूर्वमिति चाख्यायते।

न च विषयानुष्ठानं विना तत्सिद्धिः, इति स्वसिद्ध्यर्थं तदेव कार्यं स्वविषयस्य करणस्यात्मज्ञानस्यानुष्ठानमाक्षिपति। यथा च कार्यं स्वविषयाधीननिरूपणमिति ज्ञानेन विषयेण निरूप्यते, एवं ज्ञानमपि स्वविषयमात्मानमन्तरेणाशक्यनिरूपणम्, इति तन्निरूपणाय तादृशमात्मानमाक्षिपति, तदेव कार्यम्। यथाहुः-''यत्तु तत्सिद्ध्यर्थमुपादीयते=आक्षिप्यते, तदपि विधेयमिति तन्त्रे व्यवहारः'' इति। विधेयता च नियोगविषयस्य ज्ञानस्य भावार्थतयानुष्ठेयता, तद्विषयस्य त्वात्मनः स्वरूपसत्ताविनिश्चितिः। आरोपिततद्भावस्य त्वन्यस्य निरूपकत्वे तेन तन्निरूपितं न स्यात्। तस्मात्तादृगात्मप्रतिपत्तिविधिपरेभ्यो वेदान्तेभ्यस्तादृगात्मविनिश्चयः।

तदेतत्सर्वमाह- ***यद्यपीति ***।। विधिपरेभ्योऽपि वस्तुतत्त्वविनिश्चय इत्यत्र निदर्शनमुक्तम्- ***यथा यूपेति ***।। ''यूपे पशुं बध्नाति'' इति बन्धनाय विनियुक्ते यूपे, तस्यालौकिकत्वात् कोऽसौ यूपः? इत्यपेक्षिते ''खादिरो यूपो भवति'' ''यूपं तक्षति'' ''यूपमष्टाश्रीकरोति'' इत्यादिभिर्वाक्यैस्तक्षणादिविधिपरैरपि संस्काराविष्टं विशिष्टसंस्थानं दारु यूप इति गम्यते। एवमाहवनीयादयोऽप्यवगन्तव्याः। प्रवृत्ति-निवृत्तिपरस्य शास्त्रत्वम्, न स्वरूपपरस्य, कार्य एव च संबन्धो न स्वरूपे, इति हेतुद्वयं भाष्यवाक्येनोपपादितम्- ***प्रवृत्ति-निवृत्तिप्रयोजनत्वात्*** इत्यादिना ***तत्सामान्याद्वेदान्तानामपि तथैवार्थवत्त्वं स्याद् इत्यन्तेन ***।। न च स्वतन्त्रं कार्यं नियोज्यमधिकारिणमनुष्ठातारमन्तरेणेति नियोज्यभेदमाह- ***सति च विधिपरत्व इति ***।। ''ब्रह्म वेद ब्रह्मैव भवति'' इति सिद्धवदर्थवादादवगतस्यापि ब्रह्मभवनस्य नियोज्यविशेषाकाङ्क्षायां ब्रह्मबुभूषोर्नियोज्यविशेषस्य रात्रिसत्रन्यायेन प्रतिलम्भः। पिण्डपितृयज्ञन्यायेन तु स्वर्गकामस्य नियोज्यस्य कल्पनायामर्थवादस्यासमवेतार्थतयाऽत्यन्तपरोक्षा वृत्तिः स्यादिति। ब्रह्मभावश्चामृतत्वमित्यमृतत्व-कामस्येत्युक्तम्। अमृतत्वं चामृतत्वादेव, न कृतकत्वेन शक्यमनित्यमनुमातुम्; आगमविरोधादिति भावः। उक्तेन धर्म-ब्रह्मज्ञानयोर्वैलक्षण्येन विध्यविषयत्वं चोदयति- ***नन्विति ***।। परिहरति- ***नार्हत्येवमिति ***।। अत्र चात्मदर्शनं न विधेयम्। तद्धि दृशेरुपलब्धिवचनत्वात् श्रावणं वा स्यात्? प्रत्यक्षं वा? प्रत्यक्षमपि लौकिकमहंप्रत्ययो वा? भावनाप्रकर्षपर्यन्तजं वा? *तत्र श्रावणं न विधेयम्; स्वाध्यायविधिनैवास्या प्रापितत्वात्, धर्मश्रावणवत्। *नापि लौकिकं प्रत्यक्षम्* तस्य नैसर्गिकत्वात्। *नचौपनिषदात्मविषयं भावनाधेयवैशद्यं विधेयम्; तस्योपासनाविधानादेव वाजिनवदनुनिष्पादितत्वात्।

तस्मादौपनिषदात्मोपासनाऽमृतत्वकामं नियोज्यं प्रति विनीयते। ''द्रष्टव्यः'' इत्यादयस्तु विधिसरूपा न विधय इति। तदुक्तम्- *तदुपासनाच्चेति*।। ''अर्थवत्तया मननादिप्रतीत्या चे''त्यस्य शेषः प्रपञ्चो निगदव्याख्यातः।

तदेकदेशिमतं दूषयति- ***अत्राभिधीयते-न;** एकदेशिमतम्। कुतः? ***कर्मब्रह्म-विद्याफलयोर्वैलक्षण्यात्।** पुण्यापुण्यकर्मफले सुख-दुःखे। तत्र मनुष्यलोकमारभ्याऽऽब्रह्मलोकात्सुखतारम्यमधिकाधिकोत्कर्षः। एवं मनुष्यलोकमारभ्य दुःखतारतम्यमाचावीचिलोकात्। तच्च सर्वं कार्यं च विनाशि च। आत्यन्तिकं त्वशरीरत्वमनतिशयं स्वभावसिद्धतया नित्यमकार्यमात्मज्ञानस्य फलम्। तद्धि फलमिव फलम्; अविद्यापनयमात्रेणाविर्भावात्। *एतदुक्तं भवति*-त्वयाप्युपासनाविधिपरत्वं वेदान्तानामभ्युपगच्छता नित्य-शुद्ध-बुद्धत्वादिरूपब्रह्मात्मता जीवस्य स्वाभाविकी वेदान्तगम्याऽऽस्थीयते। सा चोपासनाविषयस्य विधेर्न फलम्; नित्यत्वादकार्यत्वात्। नाप्यनाद्यविद्यापिधनापनयः; तस्य स्वविरोधिविद्योदयादेवाविर्भावात्। नापि विद्योदयः; तस्यापि श्रवण-मननपूर्वकोपासनाजनितसंस्कारसचिवादेव चेतसो भावात्। उपासनासंस्कारवदुपासनाऽपूर्वमपि चेतःसहकारीति चेत्, दृष्टं च खलु नैयोगिकं फलमैहिकमपि, यथा चित्रा-कारीर्यादिनियोगानामनियत-नियतफलानाम्, न; गान्धर्वशास्त्रोपासनावासनाया इवानपूर्वानपेक्षायाः षड्जादिसाक्षात्कारे वेदान्तार्थोपासनावासनाया जीव-ब्रह्मभावसाक्षात्कारेऽनपेक्षाया एव सामर्थ्यात्। तथा चामलभावं प्रत्यहेतुत्वादुपासनापूर्वस्य नामृतत्वकामस्तत्कार्यमबोद्धुमर्हति। अन्यदिच्छत्यन्यत्करोतीति हि विप्रतिषिद्धम्। न च-तत्कामः क्रियामेव कार्यमवगमिष्यति नापूर्वमिति-सांप्रतम्; तस्या मानान्तरादेव तत्साधनत्वप्रतीतेर्विधेर्वैयर्थ्यात्। न चावघातादिविधितुल्यता; तत्रापि नियमापूर्वस्यान्यतोऽनवगतेः। न च ब्रह्मभूयादन्यदमृतत्वमार्थवादिकं किंचिदस्ति, येन तत्काम उपासनायामधिक्रियेत। विश्वजिन्न्यायेन तु स्वर्गकल्पनायां तस्य सातिशयत्वं क्षयित्वं चेति न नित्यफलत्वमुपासनायाः। तस्माद्ब्रह्मभूयस्याविद्यापिधानापनयमात्रेणाविर्भावात्, अविद्यापनयस्य च वेदान्तार्थविज्ञानादवगतिपर्यन्तादेव संभवात्, उपासनायाः संस्कारहेतुभावस्य च साक्षात्कारोपजनने मनःसाचिव्यस्य च मानान्तरसिद्धत्वात्, आत्मेत्येवोपासीत' इति न विधिः, अपितु विधिसरूपोऽयम्। यथोपांशुयाजवाक्ये 'विष्णुरुपाशु यष्टव्यः' इत्यादौ विधिसरूपा न विधय इति तात्पर्यार्थः। श्रुति-स्मृति-न्यायसिद्धमित्युक्तम्, तत्र श्रुतिं दर्शयति-*तथाच श्रुतिरिति*।।

न्यायमाह- ***अत एवेति***।। यत्किल स्वाभाविकम्, तन्नित्यम्; यथा चैतन्यम्। स्वाभाविकं चेदम्, तस्मान्नित्यम्। *परे हि द्वयीं नित्यतामाहुः*-कूटस्थनित्यतां परिणामिनित्यतां च। तत्र नित्यमित्युक्ते मा भूदस्य परिणामिनित्यतेत्यत आह- ***तत्र किंचिदिति***।।

परिणामिनित्यता हि न पारमार्थिकी। तथाहि-तत् सर्वात्मना वा परिणमेत? एकदेशेन वा? *सर्वात्मना परिणामे* कथं न तत्त्वव्याहति:? *एकदेशपरिणामे वा* स एकदेशस्ततो भिन्नो वा? अभिन्नो वा? *भिन्नश्चेत्* कथं तस्य परिणाम:? नह्यन्यस्मिन्परिणममानेऽन्य: परिणमते; अतिप्रसङ्गात्। *अभेदे वा* कथं न सर्वात्मना परिणाम:? *भिन्नाभिन्नं तदिति* चेत्, तथाहि-तदेव कारणात्मनाऽभिन्नम्, भिन्नं च कार्यात्मना; कटकादय इवाभिन्ना हाटकात्मना, भिन्नाश्च कटकाद्यात्मना। न च-भेदाभेदयोर्विरोधान्नैकत्र समवाय इति-युक्तम्; विरुद्धमिति न: क्व संप्रत्यय:? यत्प्रमाणविपर्ययेण वर्तते। यत्तु यथा प्रमाणेनावगम्यते, तस्य तथाभाव एव। कुण्डलमिदं सुवर्णमिति सामानाधिकरण्यप्रत्यये व्यक्तं भेदाभेदौ चकास्त:। तत्र ह्यात्यन्तिकेऽभेदेऽन्यतरस्य द्विरवभासप्रसङ्ग:। भेदे वाऽऽत्यन्तिके न सामानाधिकरण्यम्; गवाश्ववत्। आधाराधेयभाव एकाश्रयत्वे वा न सामानाधिकरण्यम्, नहि भवति कुण्डं बदरमिति। नाप्येकासनस्थयोश्चैत्र-मैत्रयोश्चैत्रो मैत्र इति। सोऽयमबाधितोऽसंदिग्ध: सार्वजनीन: सामानाधिकरण्यप्रत्यय एव कार्य-कारणयोर्भेदाभेदौ व्यवस्थापयति। तथा च कार्याणां कारणात्मत्वात्, कारणस्य च सद्रूपस्य सर्वत्रानुगमात्, सद्रूपेणाभेद: कार्यस्य जगत:, भेद: कार्यरूपेण गो-घटादिनेति। *यथाहु:-''कार्यरूपेण नानात्वमभेद: कारणात्मना। हेमात्मना यथाऽभेद: कुण्डलाद्यात्मना भिदा।।'' इति। *अत्रोच्यते*-क: पुनरयं भेदो नाम? य: सहाभेदेनैकत्र भवेत्। परस्पराभाव इति चेत्, किमयं कार्य-कारणयो: कटक-हाटकयोरस्ति? न वा? न चेत्, एकत्वमेवास्ति, न च भेद:। अस्ति चेत्, भेद एव, नाभेद:। न च भावाभावयोरविरोध:; सहासंभवात्। संभवे वा कटक-वर्धमानकयोरपि तत्त्वेनाभेदप्रसङ्ग:; भेदस्याभेदाविरोधात्। *अपिच कटकस्य हाटकादभेदे यथा हाटकात्मना कटक-मुकुट-कुण्डलादयो न भिद्यन्ते, एवं कटकात्मनापि न भिद्येरन्; कटकस्य हाटकादभेदात्। तथा च हाटकमेव वस्तुसन्न कटाकदय:; भेदस्याप्रतिभासनात्। अथ हाटकत्वेनैवाभेदो न कटकत्वेन, तेन तु भेद एव कुण्डलादे:। यदि हाटकादभिन्न: कटक:, कथमयं कुण्डलादिषु नानुवर्तेत? नानुवर्तते चेत् कथं हाटकादभिन्न: कटक:? ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते, ते ततो भिन्ना एव; यथा सूत्रात् कुसुमभेदा:। नानुवर्तन्ते चानुवर्तमानेऽपि हाटके कुण्डलादिषु कटकादय:। तस्मात्तेऽपि हाटकाद्भिन्ना एवेति। सत्तानुवृत्त्या च सर्ववस्त्वनुगमे, इदमिह नेदम्, इदमस्मान्नेदम्, इदमिदानीं नेदम्, इदमेवं नेदम्, इति विभागो न स्यात्; कस्यचित् क्वचित् कदाचित् कथंचिद्विवेकहेतोरभावात्। *अपिच* दूरात्कनकमित्यवगते न तस्य कुण्डलादयो विशेषा जिज्ञास्येरन्; कनकादभेदात्तेषाम्, तस्य च ज्ञातत्वात्।।

*अथ भेदोऽप्यस्ति कनकात् कुण्डलादीनामिति, कनकावगमेऽप्यज्ञातास्ते। *ननु* अभेदोऽप्यस्तीति किं न ज्ञाता:? प्रत्युत ज्ञानमेव तेषां युक्तम्; कारणाभावे हि कार्याभाव औत्सर्गिक:, स च कारणसत्तयाऽपोद्यते। अस्ति चाभेदे कारणसत्ता, इति कनके ज्ञाते ज्ञाता एव कुण्डलादय इति

तज्जिज्ञासाज्ञानानि चानर्थकानि स्युः। तेन यस्मिन् गृह्यमाणे यन्न गृह्यते, तत्ततो भिद्यते-यथा करभे गृह्यमाणेऽगृह्यमाणो रासभः करभात्; गृह्यमाणे च दूरतो हेम्नि न गृह्यन्ते तस्य भेदाः कुण्डलादयः। तस्मात्ते हेम्नो भिद्यन्ते। कथम् तर्हि हेम कुण्डलमिति सामानाधिकरण्यम्? इति चेत्, नह्याधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तम्। अथानुवृत्ति-व्यावृत्तिव्यवस्था च, हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथम्? न खल्वभेद ऐकान्तिकेऽनैकान्तिके भेदे / चैतदुभयमुपपद्यत इत्युक्तम्। तस्माद्भेदाभेदयोरन्यतरस्मिन्नभ्युपेयेऽभेदोपादानैव भेदकल्पना, न भेदोपादानाऽभेदकल्पनेति युक्तम्; भिद्यमानतन्त्रत्वाद्भेदस्य, भिद्यमानानां च प्रत्येकमेकत्वात्, एकत्वाभावे चानाश्रयस्य भेदस्यायोगात्, एकत्वस्य च भेदानधीनत्वात्, नायमयमिति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वात्, एकत्वग्रहस्य चान्यानपेक्षत्वात्, अभेदोपादानैवानिर्वचनीयभेदकल्पनेति सांप्रतम्। तथा च श्रुतिः-''मृत्तिकेत्येव सत्यम्'' इति। तस्मात् कूटस्थनित्यतैव पारमार्थिकी, न परिणामिनित्यतेति सिद्धम्। ***व्योमवत्*** इति च दृष्टान्तः परसिद्धः; अस्मन्मते तस्यापि कार्यत्वेनानित्यत्वात्। अत्र च ***कूटस्थनित्यम्*** इति निर्वर्त्यकर्मतामपाकरोति। ***सर्वव्यापि*** इति प्राप्यकर्मताम्। ***सर्वविक्रियारहितम्*** इति विकार्यकर्मताम्। *निरवयवम्* इति संस्कार्यकर्मताम्। व्रीहीणां खलु प्रोक्षणेन संस्काराख्योंऽशो यथा जन्यते, नैवं ब्रह्मणि कश्चिदंशः क्रियाधेयोऽस्ति; अनवयवत्वात्, अनंशत्वादित्यर्थः। पुरुषार्थतामाह- ***नित्यतृप्तमिति***। तृप्त्या दुःखरहितं सुखमुपलक्षयति। क्षुद्दुःखनिवृत्तिसहितं हि सुखं तृप्तिः। सुखं चाप्रतीयमानं न पुरुषार्थ इत्यत आह- ***स्वयंज्योतिरिति***॥ तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं श्रुत्यादिभिरुपपाद्य क्रियानिष्पाद्यस्य मोक्षस्यानित्यत्वं प्रसञ्जयति- *तद्यदीति*।। न चागमबाधः; आगमस्योक्तेन प्रकारेणोपपत्तेः। *अपिच* ज्ञानजन्यापूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिका इत्याह- ***अपिच ब्रह्म वेदेति***॥ अविद्याद्वयप्रतिबन्धापनयमात्रेण च विद्याया मोक्षसाधनत्वम्, न स्वतोऽपूर्वोत्पादेन चेत्यत्रापि श्रुतीरुदाहरति- ***त्वं हि नः पितेति***॥ न केवलमस्मिन्नर्थे श्रुत्यादयः, अपित्वक्षपादाचार्यसूत्रमपि न्यायमूलमस्तीत्याह- ***तथा चाचार्यप्रणीतमिति***॥ आचार्यश्चोक्तलक्षणः पुराणे*-''आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि। स्वयमाचरते यस्मादाचार्यस्तेन चोच्यते।।'' इति। *तेन हि प्रणीतं सूत्रम्-''दुःख जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः'' इति। पाठापेक्षया कारणमुत्तरम्, कार्यं च पूर्वम्, कारणापाये कार्यापायः; कफापाय इव कफोद्भवस्य ज्वरस्यापायः। जन्मापाये दुःखापायः। प्रवृत्त्यपाये जन्मापायः दोषापाये प्रवृत्त्यपायः। मिथ्याज्ञानापाये दोषापायः। मिथ्याज्ञानं चाविद्या, रागाद्युपजनितक्रमेण दृष्टैनैव संसारस्य परमं निदानम्। सा च तत्त्वज्ञानेन ब्रह्मात्मैकत्वविज्ञानेनावगतिपर्यन्तेन विरोधिता निवर्त्यते। ततोऽविद्यानिवृत्त्या ब्रह्मरूपाविर्भावो मोक्षः, नतु विद्याकार्यस्तज्जनितापूर्वकार्यो वेति सूत्रार्थः। तत्त्वज्ञानान्मिथ्याज्ञानापाय इत्येतावन्मात्रेण सूत्रोपन्यासः, नत्वक्षपादसंमतं तत्त्वज्ञानमिह संमतम्। तदनेनाचार्यान्तरसंवादेनायमर्थो दृढीकृतः। *स्यादेतत्*-नैकत्वविज्ञानं

स्थितवस्तुविषयम्, येन मिथ्याज्ञानं भेदावभासं निवर्तयन्न विधिविषयो भवेत्, अपितु संपदादिरूपम्। तथा च विधेः प्रागप्राप्तं पुरुषेच्छया कर्तव्यं सद् विधिगोचरो भविष्यति। यथा वृत्त्यनन्तत्वेन मनसो विश्वदेवसाम्याद्विश्वान्देवान्मनसि संपाद्य मन आलम्बनमविद्यमानसमं कृत्वा प्राधान्येन संपाद्यानां विश्वेषामेव देवानामनुचिन्तनम्, तेन चानन्तलोकप्राप्तिः; एवं चिद्रूपसाम्याज्जीवस्य ब्रह्मरूपतां संपाद्य जीवमालम्बनमविद्यमानसमं कृत्वा प्राधान्येन ब्रह्मानुचिन्तनम्, तेन चामृतत्वफलप्राप्तिः। अध्यासे त्वालम्बनस्यैव प्राधान्येनारोपिततद्भावस्यानुचिन्तमन्; यथा-''मनो ब्रह्मेत्युपासीत'' ''आदित्यो ब्रह्मेत्यादेशः''। एवं जीवमब्रह्म ''ब्रह्मेत्युपासीत'' इति। क्रियाविशेषयोगाद्वा-यथा ''वायुर्वाव संवर्गः''। बाह्या खलु वायुदेवता वह्न्यादीन् संवृङ्क्ते। स महाप्रलयसमये हि वह्न्यादीन्संवृज्य संहृत्यात्मनि स्थापयति। *यथाह द्रविडाचार्यः*-'संहरणाद्वा संवरणाद्वा सात्मीभावाद्वायुः संवर्गः' इति। अध्यात्मं च प्राणः संवर्ग इति। स हि सर्वाणि वागादीनि संवृङ्क्ते। प्रयाणकाले हि स एव सर्वाणीन्द्रियाणि संगृह्योत्क्रामतीति। सेयं संवर्गदृष्टिर्वायौ प्राणे च दशाशागतं जगद् दर्शयति यथा, एवं जीवात्मनि बृंहणक्रियया ब्रह्मदृष्टिरमृतत्वाय फलाय कल्पत इति। तदेतेषु त्रिष्वपि पक्षेष्वात्मदर्शनोपासनादयः प्रधानकर्माणि; अपूर्वविषयत्वात्, स्तुतशस्त्रवत्।

आत्मा तु द्रव्यं कर्मणि गुण इति संस्कारो वात्मनो दर्शनं विधीयते। यथा दर्श-पूर्णमासप्रकरणे-''पत्न्यवेक्षितमाज्यं भवति'' इति समाम्नातम्, प्रकरणिना च गृहीतमुपांशुयागाङ्गभूताज्यद्रव्यसंस्कारतयावेक्षणं गुणकर्म विधीयते, एवं कर्तृत्वेन क्रत्वङ्गभूत आत्मनि ''आत्मा वा अरे द्रष्टव्यः'' इति दर्शनं गुणकर्म विधीयते। *''यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत* इति न्यायात्, अत आह- ***न चेदं ब्रह्मात्मैकत्वविज्ञानमिति***॥ कुतः? ***संपदादिरूपे हि ब्रह्मात्मैकत्वविज्ञान इति***॥ दर्श-पूर्णमासप्रकरणे हि समाम्नातमाज्यावेक्षणं तदङ्गभूताज्यसंस्कार इति युज्यते। न च ''आत्मा वा अरे द्रष्टव्यः'' इत्यादि कस्यचित्प्रकरणे समाम्नातम्। न चानारभ्याधीतमपि ''यस्य पर्णमयी जुहूर्भवति'' इत्यव्यभिचरितक्रतुसंबन्धजुहूद्वारेण जुहूपदं क्रतुं स्मारयद्वाक्येन यथा पर्णतायाः क्रतुशेषभावमापादयति, एवमात्माऽव्यभिचरितक्रतुसंबन्धः, येन तद्दर्शनं क्रत्वङ्गं सदात्मानं क्रत्वर्थं संस्कुर्यात्। तेन यद्ययं विधिः, तथाऽपि 'सुवर्णं भार्यम्' इतिवद् विनियोगभङ्गेन प्रधानकर्मैव; अपूर्वविषयत्वात्, न गुणकर्म, इति स्थवीयस्तयैतद्दूषणमनभिधाय, सर्वपक्षसाधारणं दूषणमुक्तम्। तदतिरोहितार्थतया न व्याख्यातम्।

किंच ज्ञानक्रियाविषयत्वविधानमस्य बहुश्रुतिविरुद्धमित्याह- ***न च विदिक्रियेति***॥

शङ्कते- ***अविषयत्व इति***॥ ततश्च शान्तिकर्मणि वेतालोदय इति भावः। निराकरोति- ***न***; कुतः

अविद्याकल्पितभेदनिवृत्तिविषयत्वादिति॥ सर्वमेव हि वाक्यं नेदंतया वस्तुभेदं बोधयितुमर्हति। नहीक्षु-क्षीर-गुडादीनां मधुररसभेदः शक्य आख्यातुम्। एवमन्यत्रापि सर्वत्र द्रष्टव्यम्। तेन प्रमाणान्तरसिद्धे लौकिक एवार्थे यदा गतिरीदृशी शब्दस्य, तदा कैव कथा प्रत्यगात्मन्यलौकिके।

अदूरविप्रकर्षेण तु कथंचित्प्रतिपादनमिहापि समानम्। त्वंपदार्थो हि प्रमाता प्रमाणाधीनया प्रमित्या प्रमेयं घटादि व्याप्नोतीत्यविद्याविलसितम्। तदस्या विषयीभूतोदासीनतत्पदार्थप्रत्यगात्मसामानाधिकरण्येन प्रमातृत्वाभावात् तन्निवृत्तौ प्रमाणादयस्तिस्रो विधा निवर्तन्ते। नहि पक्तुरवस्तुत्वे पाच्य-पाक-पचनानि वस्तुसन्ति भवितुमर्हन्तीति। *तथाहि*-

विगलिपराग्वृत्त्यर्थत्वं पदस्य तदस्तदा त्वमिति हि पदेनैकार्थत्वे त्वमित्यपि यत्पदम्।
तदपि च तदा गत्वैकार्थ्यं विशुद्धचिदात्मतां त्यजति सकलान्कर्तृत्वादीन्पदार्थमलान्निजान्॥

इत्यान्तरश्लोकः। अत्रैवार्थे श्रुतीरुदाहरति- ***तथा च शास्त्रम्-यस्यामतमिति***॥ प्रकृतमुपसंहरति- ***अतोऽविद्याकल्पितेति***॥ परपक्षे मोक्षस्यानित्यतामापादयति- ***यस्य त्विति***॥ कार्यम्=पूर्वं यागादिव्यापारजन्यम्, तमपेक्षते मोक्षः स्वोत्पत्ताविति। ***तयोः पक्षयोरति***॥ निर्वर्त्यविकार्ययोः। क्षणिकं ज्ञानमात्मेति बौद्धाः। तथा च विशुद्धविज्ञानोत्पादो मोक्ष इति निर्वर्त्यो मोक्षः, अन्येषां तु संसाररूपावस्थामपहाय या कैवल्यावधिरात्मनः स मोक्ष इति विकार्यो मोक्षः। यथा पयसः पूर्वावस्थापहानेनावस्थान्तरप्राप्तिर्विकारो दधीति। तदेतयोः पक्षयोरनित्यता मोक्षस्य; कार्यत्वात्, दधिघटादिवत्। *''अथ* यदतः परो दिवो ज्योतिर्दीप्यते'' इति श्रुतेर्ब्रह्मणो विकृताविकृतदेशभेदावगमादविकृतदेशब्रह्मप्राप्तिरुपासनादिविधिकार्या भविष्यति, तथा च प्राप्यकर्मता ब्रह्मण इत्यत आह- ***न चाऽऽप्यत्वेनापीति***॥ अन्यदन्येन विकृतदेशपरिहाण्याऽविकृतदेशं प्राप्यते। तद्यथोपवेलं जलधिरतिबहलचपलकल्लोलमालापरस्परास्फालनसमुल्लसत्फेनपुञ्जस्तबकतया विकृतं मध्ये तु प्रशान्तसकलकल्लोलोपसर्गः स्वस्थः स्थिरतयाऽविकृतस्तस्य मध्यमविकृतं पौतिकः पोतेन प्राप्नोति। जीवस्तु ब्रह्मैव, इति किं केन प्राप्यताम्? भेदाश्रयत्वात्प्राप्तेरित्यर्थः। *अथ* जीवो ब्रह्मणो भिन्नः, तथापि न तेन ब्रह्माऽऽप्यते, ब्रह्मणो विभुत्वेन नित्यप्राप्तत्वादित्याह- ***स्वरूपव्यतिरिक्तत्वेऽपीति***॥ संस्कार्यकर्मतामपाकरोति- ***नापि संस्कार्य इति***। द्वयी हि संस्कार्यता-**गुणाधानेन वा**; यथा बीजपूरकुसुमस्य लाक्षारसावसेकः, तेन हि तत्कुसुमं संस्कृतं लाक्षासवर्णं फलं प्रसूते, **दोषापनयेन वा**; यथा मलिनमादर्शतलं निघृष्टमिष्टकाचूर्णेनोद्भासितभास्वरत्वं संस्कृतं भवति। तत्र न तावद् ब्रह्मणि गुणाधानं संभवति; गुणो हि ब्रह्मणः स्वभावो वा? भिन्नो वा? स्वभावश्चेत् कथमाधेयः? तस्य नित्यत्वात्। भिन्नत्वे तु कार्यत्वेन मोक्षस्यानित्यत्वप्रसङ्गः। नच भेदे धर्म-धर्मिभावः; गवाश्ववत्। भेदाभेदश्च व्युदस्तः;

विरोधात्। तदनेनाभिसन्धिनोक्तम्- ***अनाधेयातिशयब्रह्मस्वरूपत्वान्मोक्षस्य***।। द्वितीयं पक्षमुपक्षिपति- ***नापि दोषापनयनेनेति***।। अशुद्धिः सती दर्पणे निवर्तते, नतु ब्रह्मण्यसती निवर्तनीया; नित्यनिवृत्तत्वादित्यर्थः। शङ्कते- ***स्वात्मधर्म एवेति***।। ब्रह्मस्वभाव एव मोक्षोऽनाद्यविद्यामलावृत उपासनादिक्रिययाऽऽत्मनि संस्क्रियमाणेऽभिव्यज्यते, नतु क्रियते। *एतदुक्तं भवति* नित्यशुद्धत्वमात्मनोऽसिद्धम्; संसारावस्थायामविद्यामलिनत्वादिति। शङ्कां निराकरोति- ***न***; **कुतः *क्रियाश्रयत्वानुपपत्तेः***।। नाविद्या ब्रह्माश्रया, किन्तु जीवे, सा त्वनिर्वचनीयेत्युक्तम्, तेन नित्यशुद्धमेव ब्रह्म। अभ्युपेत्य त्वशुद्धिं क्रियासंस्कार्यत्वं दूष्यते। क्रिया हि ब्रह्मसमवेता वा ब्रह्म संस्कुर्यात्? यथा निघर्षणमिष्टकाचूर्णसंयोगविभागप्रचयो निरन्तर आदर्शतलसमवेतः, अन्यसमवेता वा? न तावद् ब्रह्मधर्मः क्रिया; तस्याः स्वाश्रयविकारहेतुत्वेन ब्रह्मणो नित्यत्वव्याघातात्। अन्याश्रया तु कथमन्यस्योपकरोति? अतिप्रसङ्गात्। नहि दर्पणे निघृष्यमाणे मणिर्विशुद्धो दृष्टः। ***तच्चानिष्टमिति***।। तदा बाधनं परामृशति।

अत्र व्यभिचारं चोदयति- ***ननु देहाश्रययेति***।। परिहरति- ***न; देहसंहतस्येति***।। अनाद्यनिर्वचनीयाविद्योपधानमेव ब्रह्मणो जीव इति च क्षेत्रज्ञ इति चाचक्षते। स च स्थूल-सूक्ष्मशरीरेन्द्रियादिसंहतस्तत्संघातमध्यपतितस्तदभेदेनाहमितिप्रत्ययविषयीभूतः, अतः शरीरादिसंस्कारः शरीरादिधर्मोऽप्यात्मनो भवति; तदभेदाध्यवसायात्। यथाङ्गरागधर्मः सुगन्धिता कामिनीनां व्यपदिश्यते। तेनात्रापि यदाश्रिता क्रिया सांव्यवहारिकप्रमाणविषयीकृता, तस्यैव संस्कारो नान्यस्येति न व्यभिचारः। तत्त्वतस्तु न क्रिया न संस्कार इति। सनिदर्शनं तु शेषमध्यासभाष्य एव कृतव्याख्यानमिति नेह व्याख्यातम्। ***तयोरन्यः पिप्पलमिति***।। *अन्यः=जीवात्मा *पिप्पलम्=कर्मफलम्। ***अनश्नन्नन्य इति***।। परमात्मा। संहतस्यैव भोक्तृत्वमाह मन्त्रवर्णः- ***आत्मेन्द्रियेति***।।

अनुपहितशुद्धस्वभावब्रह्मप्रदर्शनपरौ मन्त्रौ पठति- ***एको देव इति***।। *शुक्रम्=दीप्तिमत्। अव्रणम्=दुःखरहितम्। *अस्नाविरम्=अविगलितम्, अविनाशीति यावत्।

उपसंहरति- ***तस्मादिति***।। *ननु* मा भून्निर्वर्त्यादिकर्मताचतुष्टयी, पञ्चमी तु काचिद् विधा भविष्यति, यया मोक्षस्य कर्मता घटिष्यत इत्यत आह- ***अतोऽन्यदिति***।। एभ्यः प्रकारेभ्यो न प्रकारान्तरमन्यदस्ति, यतो मोक्षस्य क्रियानुप्रवेशो भविष्यति।।

एतदुक्तं - भवति-चतसृणां विधानां मध्येऽन्यतमतया क्रियाफलत्वं व्याप्तम्, सा च मोक्षाद् व्यावर्तमाना, व्यापकानुपलब्ध्या मोक्षस्य क्रियाफलत्वं व्यावर्तयतीति तत्किं मोक्षे क्रियैव नास्ति? तथा च तदर्थानि शास्त्राणि तदर्थाश्च प्रवृत्तयोऽनर्थकानीत्यत उपसंहारव्याजेनाह- ***तस्माज्ज्ञानमेकमिति***।। अथ

ज्ञानं क्रिया मानसी कस्मान्न विधिगोचरः? कस्माच्च तस्याः फलं निर्वर्त्यादिष्वन्यतमं न मोक्षः? इति चोदयति- ***ननु ज्ञानमिति***॥ परिहरति- *न*; कुतः? ***वैलक्षण्यात्।** *अयमर्थः-सत्यं ज्ञानं मानसी क्रिया, नत्वियं ब्रह्मणि फलं जनयितुमर्हति; तस्य स्वयंप्रकाशतया विदिक्रियाकर्मभावानुपपत्तेरित्युक्तम्। तदेतस्मिन् वैलक्षण्ये स्थित एव वैलक्षण्यान्तरमाह- ***क्रिया हि नाम सेति*॥ यत्र विषये वस्तुस्वरूपनिरपेक्षैव चोद्यते*॥** यथा देवतासंप्रदानकहविर्ग्रहणे देवतावस्तुस्वरूपानपेक्षा देवताध्यानक्रिया, यथा वा योषित्यग्निवस्त्वनपेक्षाग्निबुद्धिर्या, सा क्रिया हि नामेति योजना। नहि ''यस्यै देवतायै हविर्गृहीतं स्यात् तां ध्यायेद्वषट्करिष्यन्'' इत्यस्माद्विधेः प्राग्देवताध्यानं प्राप्तम्, प्राप्तं त्वधीतवेदान्तस्य विदितपद-तदर्थसंबन्धस्याधिगतशब्द-न्यायतत्वस्य ''सदेव सौम्येदम्'' इत्यादेः ''तत्त्वमसि'' इत्यन्तात्संदर्भाद् ब्रह्मात्मभावज्ञानं शब्दप्रमाणसामर्थ्यात्, इन्द्रियार्थसन्निकर्षसामर्थ्यादिव प्रणिहितमनसः स्फीतालोकमध्यवर्तिकुम्भानुभवः न ह्यसौ स्वसामग्रीबललब्धजन्मा सन् मनुजेच्छयाऽन्यथाकर्तुमकर्तुं वा शक्यः; देवताध्यानवत्, येनार्थवानत्र विधिः स्यात्। न चोपासना वानुभवपर्यन्तता वास्य विधेर्गोचरः; तयोरन्वय-व्यतिरेकावधृतसामर्थ्ययोः साक्षात्कारे वाऽनाद्यविद्यापनये वा विधिमन्तरेण प्राप्तत्वेन पुरुषेच्छयाऽन्यथाकर्तुमकर्तुं वाऽशक्यत्वात्। तस्माद्ब्रह्मज्ञानं मानसी क्रियाऽपि न विधिगोचरः, पुरुषचित्तव्यापाराधीनायाश्च क्रियाया वस्तुस्वरूपनिरपेक्षिता क्वचिदविरोधिनी, यथा देवताध्यानक्रियायाः। नह्यत्र वस्तुस्वरूपेण कश्चिद्विरोधः। क्वचिद्वस्तुस्वरूपविरोधिनी, यथा योषित्पुरुषयोरग्निबुद्धिरित्येतावता भेदेन निदर्शनमिथुनद्वयोपन्यासः। क्रियैवेत्येवकारेण वस्तुतन्त्रत्वमपाकरोति। *ननु* ''आत्मेत्येवोपासीत'' इत्यादयो विधयः श्रूयन्ते। न च ते प्रमत्तगीताः, तुल्यं हि सांप्रदायिकम्, तस्माद्विधेयेनात्र भवितव्यमित्यत आह- ***तद्विषये लिङादय इति***॥ सत्यं श्रूयन्ते लिङादयः, नत्वमी विधिविषयाः, तद्विषयत्वेऽप्रामाण्यप्रसङ्गात्। हेयोपादेयविषयो हि विधिः। स एव च हेय उपादेयो वा, यं पुरुषः कर्तुमकर्तुमन्यथा वा कर्तुं शक्नोति। तत्रैव च समर्थः कर्ताऽधिकृतो नियोज्यो भवति। न चैवंभूतान्यात्मश्रवण-मननोपासन-दर्शनानि, इति विषय-तदनुष्ठात्रोर्विधिव्यापकयोरभावाद्विधेरभावः, इति प्रयुक्ता अपि लिङादयः प्रवर्तनायामसमर्था उपल इव क्षुरतैक्ष्ण्यं कुण्ठमप्रमाणीभवन्तीति। ***अनियोज्यविषयत्वादिति***॥ समर्थो हि कर्ताऽधिकारी नियोज्यः। असमर्थस्य तु न कर्तृता, ततो नाधिकृतः, अतो न नियोज्य इत्यर्थः। यदि विधेरभावान्न विधिवचनानि, किमर्थानि तर्हि वचनान्येतानि विधिच्छायानीति पृच्छति- ***किमर्थानीति***॥ न चानर्थकानि युक्तानि; स्वाध्यायविध्यधीनग्रहणत्वानुपपत्तेरिति भावः। उत्तरम्- ***स्वाभाविकेति***॥ अन्यतः प्राप्ता एव हि श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्ते। न चानुवादोऽप्यप्रयोजनः; प्रवृत्तिविशेषकरत्वात्। *तथाहि*-तत्तदिष्टानिष्टविषयेप्साजिहापहृतहृदयतया बहिर्मुखो न प्रत्यगात्मनि समाधातुमर्हति।

आत्मश्रवणादिविधिसरूपैस्तु वचनैर्मनः समाधातुं विषयस्रोतः खिलीकृत्य प्रत्यगात्मस्रोत उद्घाट्यते, इति प्रवृत्तिविशेषकरताऽनुवादानामस्तीति सप्रयोजनतया स्वाध्यायविध्यधीनग्रहणत्वमुपपद्यत इति। यच्च चोदितमात्मज्ञानमनुष्ठानानङ्गत्वादपुरुषार्थमिति, तदयुक्तम्; स्वतोऽस्य पुरुषार्थत्वे सिद्धे यदनुष्ठानानङ्गत्वम्, तद्भूषणम्, न दूषणमित्याह- ***यदपीति ***। *अनुसंज्वरेत्=शरीरं परितप्यमानमनुतर्ष्येत। सुगममन्यत्। प्रकृतमुपसंहरति- ***तस्मान्न प्रतिपत्तीति ***॥ प्रकृतसिद्ध्यर्थमेकदेशिमतं दूषयितुमनुभाषते- *यदपि केचिदाहुरिति*॥ दूषयति- ***तन्नेति ***॥ इदमत्राकूतम्-कार्यबोधे यथा चेष्टा लिङ्गं हर्षादयस्तथा। सिद्धबोधेऽर्थवत्तैवं शास्त्रत्वं हितशासनात्॥

यदि हि पदानां कार्याभिधाने तदर्थस्वार्थाभिधाने वा नियमेन वृद्धव्यवहारे सामर्थ्यमवधृतं भवेत्, न भवेदहेयोपादेयभूतब्रह्मात्मतापरत्वमुपनिषदाम्; तत्राविदितसामर्थ्यत्वात्पदानां लोके, तत्पूर्वकत्वाच्च वैदिकार्थप्रतीतेः। अथ तु भूतेऽप्यर्थे पदानां लोके शक्यः संगतिग्रहः, तत उपनिषदां तत्परत्वं पौर्वापर्यपर्यालोचनयाऽवगम्यमानमपह्नुत्य न कार्यपरत्वं शक्यं कल्पयितुम्; श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। तत्र तावदेवमकार्येऽर्थे न संगतिग्रहः, यदि तत्परः प्रयोगो न लोके दृश्यते, तत्प्रत्ययो वा व्युत्पन्नस्योन्नेतुं न शक्येत। न तावत्तपरः प्रयोगो न दृश्यते लोके; कुतूहल-भयादिनिवृत्त्यर्थानामकार्यपराणां पदसन्दर्भाणां प्रयोगस्य लोके बहुलमुपलब्धेः। तद्यथा 'आखण्डलादिलोकपालचक्रवालादिवसतिः सिद्धविद्याधरगन्धर्वाप्सरःपरिवारो ब्रह्मलोकावतीर्णमन्दाकिनीपयःप्रवाहपातधौतकलधौतमयशिलातलो नन्दनादिप्रमदावनविहारिमणिमयशकुन्तकमनीयनिनादमनोहरः पर्वतराजः सुमेरुरि'ति 'नैष भुजङ्गो रज्जु'रियमित्यादि। नापि भूतार्थबुद्धिर्व्युत्पन्नपुरुषवर्तिनी न शक्या समुन्नेतुम्; हर्षादेरुन्नयनहेतोः संभवात्। तथाह्यविदितार्थजनभाषार्थो द्रविडो नगरगमनोद्यतो राजमार्गाभ्यर्णं देवदत्तमन्दिरमध्यासीनः प्रतिपन्नजनकानन्दनिबन्धनपुत्रजन्मा वार्ताहारेण सह नगरस्थदेवदत्ताभ्याशमागतः पटवासोपायनार्पणपुरःसरं 'दिष्ट्या वर्धसे पुत्रस्ते जातः' इति वार्ताहारश्रवणसमनन्तरमुपजातरोमाञ्चकञ्चुकं विकसितनयनोत्पलमतिस्मेरमुखमहोत्पलमवलोक्य देवदत्तमुत्पन्नप्रमोदमनुमिमीते, प्रमोदस्य च प्रागभूतस्य तद्व्याहारश्रवणसमनन्तरं भवतस्तद्धेतुकत्वम्। न चायमप्रतिपादयन् हर्षहेतुमर्थं हर्षाय कल्पत इत्यनेन हर्षहेतुरर्थ उक्त इति प्रतिपद्यते। हर्षहेत्वन्तरस्य चाप्रतीतेः पुत्रजन्मनश्च तद्धेतोरवगमात्तदेव वार्ताहारेणाभ्यधायीति निश्चिनोति। एवं भयशोकादयोऽप्युदाहार्याः। तथा च प्रयोजनवत्तया भूतार्थाभिधानस्य प्रेक्षावत्प्रयोगोऽप्युपपन्नः। एवंच ब्रह्मस्वरूपज्ञानस्य परमपुरुषार्थहेतुभावादनुपदिशतामपि पुरुषप्रवृत्ति-निवृत्ती वेदान्तानां पुरुषहितानुशासनाच्छास्त्रत्वं सिद्धं भवति। तत्सिद्धमेतत्, विवादाध्यासितानि वचनानि, भूतार्थविषयाणि, भूतार्थविषयप्रमाजनकत्वात्। यद्यद्विषयप्रमाजनकं तत्तद्विषयम्, यथा रूपादिविषयं चक्षुरादि, तथा चैतानि, तस्मात्तथेति। तस्मात्सुष्ठूक्तम्- ***तन्न; औपनिषदस्य**

पुरुषस्यानन्यशेषत्वादिति *॥ उपनिपूर्वात्सदेर्विशरणार्थात्क्विप्युपनिषत्पदं व्युत्पादितम् उपानीयाद्वयं ब्रह्म सवासनामविद्यां हिनस्तीति ब्रह्मविद्यामाह। तद्धेतुत्वाद्वेदान्ता अप्युपनिषदः। ततो विदिति औपनिषदः पुरुषः। एतदेव विभजते- ***योऽसावुपनिषत्स्वेवेति** *॥ अहंप्रत्ययविषयाद्भिनत्ति- ***असंसारीति** *॥ अत एव क्रियारहितत्वाच्चतुर्विधद्रव्यविलक्षणः। अतश्च **चतुर्विधद्रव्यविलक्षणो यदनन्यशेषः**। अन्यशेषं हि भूतं द्रव्यं चिकीर्षितं सदुत्पत्त्याद्याप्यं संभवति। यथा "यूपं तक्षति" इत्यादि। यत्पुनरनन्यशेषं भूतभाव्युपयोगरहितम्, यथा "सुवर्णं भार्यम्" "सक्तून् जुहोति" इत्यादि, न तस्योत्पत्त्याद्याप्यता कस्मात् पुनरस्यानन्यशेषतेति? अत आह-यत एव ***स्वप्रकरणस्थ** *॥ उपनिषदामात्मानमारभ्याधीतानां पौर्वापर्यपर्यालोचनया पुरुषप्रतिपादनपरत्वेन पुरुषस्यैव प्राधान्येनेदं प्रकरणम्। न च जुह्वादिवदव्यभिचरितक्रतुसंबन्धः पुरुष इत्युपपादितम्। अतः स्वप्रकरणस्थः। सोऽयं तथाविध उपनिषद्भ्यः प्रतीयमानो न नास्तीति शक्यो वक्तुमित्यर्थः। स्यादेतत्-मानान्तरागोचरत्वेनागृहीतसंगतितयाऽपदार्थस्य ब्रह्मणो वाक्यार्थत्वानुपपत्तेः कथमुपनिषदर्थतेति? अत आह- ***स एष नेति नेत्यात्मेत्यात्मशब्दात्** *॥ यद्यपि गवादिवद् मानान्तरगोचरत्वमात्मनो नास्ति, तथाऽपि प्रकाशात्मन एव सतस्तत्तदुपाधिपरिहाण्या शक्यं वाक्यार्थत्वेन निरूपणम्, हाटकस्येव कटक-कुण्डलादिपरिहाण्या। नहि प्रकाशः स्वयंवेदनो न भासते, नापि तदवच्छेदकः कार्य-करणसंघातः। तेन "स एष नेति नेत्यात्मा" इति तत्तदवच्छेदपरिहाण्या बृहत्त्वादापनाच्च स्वयंप्रकाशः शक्यो वाक्याद् ब्रह्मेति चात्मेति न निरूपयितुमित्यर्थः। अथोपाधिनिरासवदुपहितमप्यात्मरूपं कस्मान्न निरस्यत इति? अत आह- ***आत्मनश्च प्रत्याख्यातुमशक्यत्वात्** *॥ प्रकाशो हि सर्वस्यात्मा; तदधिष्ठानत्वाच्च प्रपञ्चविभ्रमस्य। न चाधिष्ठानाभावे विभ्रमो भवितुमर्हति। नहि जातु रज्ज्वभावे रज्ज्वां भुजङ्ग इति वा धारेति वा विभ्रमो दृष्टपूर्वः। अपि चात्मनः प्रकाशस्य भासा प्रपञ्चस्य प्रथा। तथाच श्रुतिः-"तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति। न चात्मनः प्रकाशस्य प्रत्याख्याने प्रपञ्चप्रथा युक्ता। तस्मादात्मनः प्रत्याख्यानायोगाद् वेदान्तेभ्यः प्रमाणान्तरागोचरसर्वोपाधिरहितब्रह्मस्वरूपावगतिसिद्धिरित्यर्थः। ***उपनिषत्स्वेवावगतः** * इत्यवधारणमृष्यमाण आक्षिपति- ***नन्वात्मेति** *॥ सर्वजनीनाहंप्रत्ययविषयो ह्यात्मा कर्ता भोक्ता च संसारी; तत्रैव च लौकिकपरीक्षकाणामात्मपदप्रयोगात्। य एव लौकिकाः शब्दास्त एव वैदिकाः, त एव च तेषामर्था इत्यौपनिषदमप्यात्मपदं तत्रैव प्रवर्तितुमर्हति, नार्थान्तरे तद्विपरीत इत्यर्थः। समाधत्ते- ***न**; अहंप्रत्ययविषय औपनिषदः पुरुषः। कुतः? ***तत्साक्षित्वेन** *॥ अहंप्रत्ययविषयो यः कर्ता कार्यकरणसंघातोपहितो जीवात्मा तत्साक्षित्वेन परमात्मनोऽसंप्रत्ययविषयत्वस्य **प्रत्युक्तत्वात्**। एतदुक्तं भवति-यद्यपि "अनेन जीवेनात्मना" इति जीव-परमात्मनोः पारमार्थिकमैक्यम्; तथाऽपि तस्योपहितं रूपं जीवः, शुद्धं तु रूपं तस्य साक्षि, तच्च मानान्तरानधिगतमुपनिषद्गोचर इति। एतदेव

प्रपञ्चयति- ***नह्यहंप्रत्ययविषयेति***। **विधिशेषत्वं वा नेतुं न शक्यः***। कुतः? आत्मत्वादेव। नह्यात्माऽन्यार्थः, अन्यच्च सर्वमात्मार्थम्। तथा च श्रुतिः-"न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति' इति। अपिचातः सर्वेषामात्मत्वादेव न हेयो नाप्युपादेयः; सर्वस्य हि प्रपञ्चजातस्य ब्रह्मैव तत्त्वमात्मा। न च स्वभावो हेयः; अशक्यहानत्वात्। न चोपादेयः; उपात्तत्वात्। तस्माद्धेयोपादेयविषयौ विधिनिषेधौ न तद्विपरीतमात्मतत्त्वं विषयीकुरुत इति सर्वस्य हि प्रपञ्चजातस्यात्मैव तत्त्वमिति। एतदुपपादयति- ***सर्वं हि विनश्यद्विकारजातं पुरुषान्तं** विनश्यति*॥ अयमर्थः-पुरुषो हि श्रुति-स्मृतीतिहास-पुराण-तदविरुद्धन्यायव्यवस्थापितत्वात्परमार्थसन्, प्रपञ्चस्त्वनाद्यविद्योपदर्शितोऽ-परमार्थसन्; यश्च परमार्थसन्नसौ प्रकृती रज्जुतत्त्वमिव सर्पविभ्रमस्य विकारस्य। अत एवास्यानिर्वाच्यत्वेनादृढस्वभावस्य विनाशः, पुरुषस्तु परमार्थसन्। नासौ कारणसहस्रेणाप्यसन् शक्यः कर्तुम्। नहि सहस्रमपि शिल्पिनो घटं पटयितुमीशत इत्युक्तम्। तस्मादविनाशिपुरुषान्तो विकारविनाशः, शुक्तिरज्जुतत्त्वान्त इव रजतभुजगविनाशः। पुरुष एव हि सर्वस्य प्रपञ्चविकारजातस्य तत्त्वम्। न च पुरुषस्यास्ति विनाशः, यतोऽनन्तो विनाशः स्यादित्यत आह- ***पुरुषो विनाशहेत्वभावादिति***॥ नहि कारणानि सहस्रमप्यन्यदन्यथयितुमीशत इत्युक्तम्। अथ मा भूत् स्वरूपेण पुरुषो हेय उपादेयो वा, तदीयस्तु कश्चिद्धर्मो हास्यते, कश्चिच्चोपादास्यत इत्यत आह- ***विक्रियाहेत्वभावाच्च कूटस्थनित्यः***॥ त्रिविधोऽपि धर्म-लक्षणावस्थापरिणामलक्षणो विकारो नास्तीत्युक्तम्। अपि चात्मनः परमार्थसतो धर्मोऽपि परमार्थसन्निति न तस्यात्मवदन्यथात्वं कारणैः शक्यं कर्तुम्। न च धर्मान्यथात्वादन्यो विकारः, तदिदमुक्तम्- ***विक्रियाहेत्वभावादिति***॥ सुगममन्यत्। यत्पुनरेकदेशिना शास्त्रविद्वचनं साक्षित्वेनानुक्रान्तं तदन्यथोपपादयति- ***यदपि शास्त्रतात्पर्यविदामनुक्रमणमिति***॥ 'दृष्टो हि तस्यार्थः प्रयोजनवदर्थावबोधनम्' इति वक्तव्ये धर्मजिज्ञासायाः प्रकृतत्वाद्धर्मस्य च कर्मत्वात् 'कर्मावबोधनम्' इत्युक्तम्, नतु सिद्धरूपब्रह्मावबोधनं व्यापारं वेदस्य वारयति। नहि सोमशर्मणि प्रकृते तद्गुणाभिधानं परिसंचष्टे विष्णुशर्मणो गुणवत्ताम्। 'विधिशास्त्रं विधीयमानकर्मविषयम्, प्रतिषेधशास्त्रं च प्रतिषिध्यमानकर्मविषयमित्युभयमपि कर्मावबोधनपरम्। अपिच "आम्नायस्य क्रियार्थत्वात्" इति शास्त्रकृद्वचनम्। तत्रार्थग्रहणं यद्यभिधेयवाचि, ततो भूतार्थानां द्रव्य-गुण-कर्मनाम्नामानर्थक्यमनभिधेयत्वं प्रसज्येत, नहि ते क्रियार्था इत्यत आह- ***अपि चाम्नायस्येति***॥ यद्युच्येत नहि क्रियार्थत्वं क्रियाभिधेयत्वम्, अपितु क्रियाप्रयोजनत्वम्; द्रव्य-गुण-शब्दानां च क्रियार्थत्वेनैव भूतद्रव्यगुणाभिधानं न स्वनिष्ठतया। यथाहुः शास्त्रविदः-"चोदना हि भूतं भवन्तम्" इत्यादि। एतदुक्तं भवति-कार्यमर्थमवगमयन्ती चोदना तदर्थं भूतादिकमप्यर्थं गमयतीति, तत्राह- ***प्रवृत्ति-निवृत्तिव्यतिरेकेण भूतं चेदिति***॥ अयमभिसन्धिः-न तावत्कार्यार्थ एव स्वार्थे पदानां संगतिग्रहो

नान्यार्थ इत्युपपादितं भूतेऽप्यर्थे व्युत्पत्तिं दर्शयद्भिः। नापि स्वस्वार्थपरतैव पदानाम्। तथा सति न वाक्यार्थप्रत्ययः स्यात्। नहि प्रत्येकं स्वप्रधानतया गुणप्रधानभावरहितानामेकवाक्यता दृष्टा। तस्मात्पदानां स्वार्थमभिधतामेकप्रयोजनवत्पदार्थपरतयैकवाक्यता। तथा च तत्तदर्थान्तरविशिष्टैकवाक्यार्थप्रत्यय उपपन्नो भवति। यथाहुः शास्त्रविदः–"साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्। वर्णास्तथाऽपि नैतस्मिन्पर्यवस्यन्ति निष्फले।। वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्। पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्।।" इति।। तथा चार्थान्तरसंसर्गपरतामात्रेण वाक्यार्थप्रत्ययोपपत्तौ न कार्यसंसर्गपरत्वनियमः पदानाम्। एवंच सति कूटस्थनित्यब्रह्मरूपपरत्वेऽप्यदोष इति। *भव्यम्=कार्यम्। *ननु* यद्भव्यार्थं भूतमुपदिश्यते, न तद्भूतम्, भव्यसंसर्गिणा रूपेण तस्यापि भव्यत्वादित्यत आह– ***नहि भूतमुपदिश्यमानमिति*।।** न तादात्म्यलक्षणः संसर्गः, किन्तु कार्येण सह प्रयोजन-प्रयोजनिलक्षणोऽन्वयः, तद्विषयेण तु भावार्थेन भूतार्थानां क्रियाकारकलक्षणः, इति न भूतार्थानां क्रियार्थत्वमित्यर्थः। शङ्कते–**अक्रियात्वेऽपीति।।** एवंचाक्रियार्थ-कूटस्थनित्यब्रह्मोपदेशानुपपत्तिरिति भावः। परिहरति– ***नैष दोषः; क्रियार्थत्वेऽपीति*।।** नहि क्रियार्थं भूतमुपदिश्यमानमभूतं भवति, अपितु क्रियानिर्वर्तनयोग्यं भूतमेव तत्। तथा च भूतेऽर्थेऽवधृतशक्तयः शब्दाः क्वचित्स्वनिष्ठभूतविषया दृश्यमाना मृत्वा शीर्त्वा वा न कथञ्चित्क्रियानिष्ठतां गमयितुमुचिताः। नह्युपहितं शतशो दृष्टमप्यनुपहितं क्वचिद्दृष्टमदृष्टं भवति। तथा च वर्तमानापदेशा अस्तिक्रियोपहिता अकार्यार्था अप्यटवीवर्णनादयो लोके बहुलमुपलभ्यन्ते। एवं क्रियाऽनिष्ठा अपि सम्बन्धमात्रपवर्यसायिनः, यथा कस्यैष पुरुषः? इति प्रश्नोत्तरं राज्ञ इति। तथा प्रातिपदिकार्थमात्रनिष्ठाः, यथा कीदृशास्तरव इति प्रश्नोत्तरं फलिन इति। नहि पृच्छता पुरुषस्य वा तरूणां वास्तित्वनास्तित्वे प्रतिपित्सिते, किन्तु पुरुषस्य स्वामिभेदः, तरूणां च प्रकारभेदः। प्रष्टुरपेक्षितं चाचक्षाणः स्वामिभेदमेव प्रकारभेदमेव च प्रतिवक्ति, न पुनरस्तित्वं तस्य; तेनाप्रतिपित्सितत्वात्। उपपादिता च भूतेऽप्यर्थे व्युत्पत्तिः प्रयोजनवती पदानाम्। चोदयति–यदि नामोपदिष्टं भूतम्, किं तवोपदेष्टुः श्रोतुर्वा प्रयोजनं स्यात्? तस्माद्भूतमपि प्रयोजनवदेवोपदेष्टव्यं नाप्रयोजनम्। अप्रयोजनं च ब्रह्म, तस्योदासीनस्य सर्वक्रियारहितत्वेनानुपकारकत्वादिति भावः। परिहरति– *अनवगतात्मोपदेशश्च **तथैव**=प्रयोजनवानेव, भवितुमर्हति। अप्यर्थश्चकारः। एतदुक्तं भवति–यद्यपि ब्रह्मोदासीनम्; तथापि तद्विषयं शाब्दज्ञानमवगतिपर्यन्तं विद्या स्वविरोधिनीं संसारमूलनिदानमविद्यामुच्छिन्दत् प्रयोजनवदित्यर्थः। अपिच योऽपि कार्यपरत्वं सर्वेषां पदानामास्थिषत, तैरपि "ब्राह्मणो न हन्तव्यः" "न सुरा पातव्या" इत्यादीनां न कार्यपरता शक्याऽऽस्थातुम्। कृत्युपहितमर्यादं हि कार्यं कृत्या व्याप्तं तन्निवृत्तौ निवर्तते, शिंशपात्वमिव वृक्षत्वनिवृत्तौ। कृतिर्हि पुरुषप्रयत्नः। स च विषयाधीननिरूपणः। विषयश्चास्य साध्यस्वभावतया भावार्थ एव पूर्वापरीभूतोऽन्योत्पादानुकूलो भवितुमर्हति, न द्रव्य-गुणौ। साक्षात्कृतिव्याप्यो हि कृतेर्विषयः। न च द्रव्यगुणयोः सिद्धयोरस्ति कृतिव्याप्यता। अत एव शास्त्रकृद्वचः–"भावार्थाः कर्मशब्दास्तेभ्यः क्रिया

प्रतीयेत'' इति। द्रव्यगुणशब्दानां नैमित्तिकावस्थायां कार्यावमर्शोऽपि भावस्य स्वतः, द्रव्य-गुणशब्दानां तु भावयोगात्कार्यावमर्श इति भावार्थेभ्य एवापूर्वार्थावगतिः, न द्रव्यगुणशब्देभ्य इति। न च ''दध्ना जुहोति'' ''संततमाघारयति'' इत्यादिषु द्रव्यादीनां कार्थविषयता। तत्रापि हि होमाधारभावार्थविषयमेव कार्यम्। न चैतावता ''सोमे न यजेत'' इतिवद् दधिसंततादिविशिष्टहोमाघारविधानात् ''अग्निहोत्रं जुहोति'' ''आघारमाघारयति'' इति तदनुवादः। तद्यप्यत्रापि भावार्थविषयमेव कार्यम्; तथाऽपि भावार्थाऽनुबन्धतया द्रव्य-गुणावविषयावपि विधीयेते। भावार्थो हि कारकव्यापारमात्रतयाऽविशिष्टः कारकविशेषणद्रव्यादिना विशेष्यत इति द्रव्यादिस्तदनुबन्धः।

तथा च भावार्थे विधीयमाने स एव सानुबन्धो विधीयत इति द्रव्य-गुणावविषयावपि तदनुबन्धतया विहितौ भवतः। एवंच भावार्थप्रणालिकया द्रव्यादिसंक्रान्तो विधिर्गौरवाद् बिभ्यत्स्वविषयस्य चान्यतः प्राप्ततया तदनुवादेन तदनुबन्धीभूतद्रव्यादिपरो भवतीति सर्वत्र भावार्थविषय एव विधिः। *एतेन*-''यदाग्नेयोऽष्टाकपालो भवति'' इत्यत्र संबन्धविषयो विधिरिति- *परास्तम्*।

ननु न भवत्यर्थो विधेयः; सिद्धे भवितरि लब्धरूपस्य भवनं प्रत्यकर्तृत्वात्। न खलु गगनं भवति। नाप्यसिद्धे; असिद्धस्यानियोज्यत्वात्, गगनकुसुमवत्। तस्माद्भवनेन प्रयोज्यव्यापारेणाक्षिप्तः प्रयोजकस्य भावयितुर्व्यापारो विधेयः। स च व्यापारो भावना, कृतिः, प्रयत्न इति। निर्विषयश्चासावशक्यप्रतिपत्तिः, अतो विषयापेक्षायामाग्नेयशब्दोपस्थापितो द्रव्य-देवतासंबन्ध एवास्य विषयः। *ननु* व्यापारविषयः पुरुषप्रयत्नः कथमव्यापाररूपं संबन्धं गोचरयेत्? नहि घटं कुर्वित्यत्रापि साक्षान्नामार्थं घटं पुरुषप्रयत्नो गोचरयति, अपि तु दण्डादि हस्तादिना व्यापारयति। तस्माद् घटार्था कृतिं व्यापारविषयामेव प्रतिपद्यते, नतु रूपतो घटाविषयाम्। उद्देश्यतया त्वस्यामस्ति घटः, नतु विषयतया। विषयतया तु हस्तादिव्यापार एव। अत एवाग्नेय इत्यत्रापि द्रव्य-देवतासंबन्धाक्षिप्तो यजिरेव कार्यविषयो विधेयः। किमुक्तं भवति, आग्नेयो भवतीति, आग्नेयेन यागेन भावयेदिति। अत एव ''य एवं विद्वान् पौर्णमासीं यजते'' ''य एवं विद्वानमावास्यां यजते'' इत्यनुवादो भवति ''यदाग्नेयः'' इत्यादिविहितस्य यागषट्कस्य। अत एव न विहितानूदितस्य तस्यैव ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इत्यधिकारसंबन्धः। तस्मात्सर्वत्र कृतिप्रणालिकया भावार्थविषय एव विधिरित्येकान्तः। तथा च 'न हन्यात्' 'न पिबेत्' इत्यादिषु यदि कार्यमभ्युपेयेत, ततस्तद्व्यापिका कृतिरभ्युपेतव्या। तद्व्यापकश्च भावार्थो विषयः। एवंच प्रजापतिव्रतन्यायेन पर्युदासवृत्त्याऽहननापानसंकल्पलक्षणया तद्विषयो विधिः स्यात्। तथा च प्रसज्यप्रतिषेधो दत्तजलाञ्जलिः प्रसज्येत। न च सति संभवे लक्षणा न्याय्या। ''नेक्षेतोद्यन्तम्'' इत्यादौ तु ''तस्य व्रतम्'' इत्यधिकारात्प्रसज्यप्रतिषेधासंभवेन पर्युदासवृत्त्याऽनीक्षणसंकल्पलक्षणा युक्ता। तस्माद् ''न हन्यात्'' ''न

पिबेत्'' इत्यादिषु प्रसज्यप्रतिषेधेषु भावार्थाभावात्तद्व्याप्ताया: कृतेरभाव:, तदभावे च तद्व्याप्तस्य कार्यस्याभाव इति न कार्यपरत्वनियम: सर्वत्र वाक्य इत्याह- ***ब्राह्मणो न हन्तव्य इत्येवमाद्या इति**।। *ननु* कस्मान्निवृत्तिरेव कार्यं न भवति, तत्साधनं वेत्यत आह- ***न च सा क्रियेति** *।। क्रियाशब्द: कार्यवचन:। एतदेव विभजते- ***अक्रियार्थानामिति** *।। स्यादेतत्-विधिविभक्तिश्रवणात्कार्यं तावदत्र प्रतीयते। तच्च न भावार्थमन्तरेण। न च रागत: प्रवृत्तस्य हनन-पानादावकस्मादौदासीन्यमुपपद्यते विना विधारकप्रयत्नम्। तस्मात्स एव प्रवृत्त्युन्मुखानां मनोवाग्देहानां विधारक: प्रयत्नो निषेधविधिगोचर: क्रियेति नाक्रियापरमस्ति वाक्यं किंचिदपीत्याह- ***न च हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण नञ:** *।।

अयमर्थ:-हनन-पानपरो हि विधिप्रत्यय: प्रतीयमानस्ते एव विधत्त इत्युत्सर्ग:। न चैते शक्ये विधातुम्; रागत: प्राप्तत्वात्। न च नञ: प्रसज्यप्रतिषेधो विधेय:; तस्याप्यौदासीन्यरूपस्य सिद्धतया प्राप्तत्वात्। न च विधारक: प्रयत्न:; तस्याश्रुतत्वेन लक्ष्यमाणत्वात्, सति संभवे च लक्षणाया अन्याय्यत्वात्, विधिविभक्तेश्च रागत: प्राप्तप्रवृत्त्यनुवादकत्वेन विधिविषयत्वायोगात्। तस्माद् यत्पिबेत् यद् हन्याद्वेत्यनूद्य तन्नेति निषिध्यते, तदभावो ज्ञाप्यते, नतु नञर्थो विधीयते। अभावश्च स्वविरोधिभावनिरूपणतया भावच्छायानुपाती, इति सिद्धे सिद्धवत्, साध्ये च साध्यवद्भासते, इति साध्यविषयो नञर्थ: साध्यवद्भासत इति नञर्थ: कार्य इति भ्रम:। तदिदमाह- ***नञश्चैष स्वभाव इति** *।। *ननु* बोधयतु संबन्धिनोऽभावं नञ्, प्रवृत्त्युन्मुखानां तु मनो-वाग्देहानां कुतोऽकस्मान्निवृत्तिरिति? अत आह- ***अभावबुद्धिश्चौदासीन्यपालनकारणम्** *।। *अयमभिप्राय:*-'ज्वरित: पथ्यमश्नीयात्' 'न सर्पायाङ्गुलिं दद्यात्' इत्यादिवचनश्रवणसमनन्तरं प्रयोज्यवृद्धस्य पथ्याशने प्रवृत्तिं भुजङ्गाङ्गुलिदानोन्मुखस्य च ततो निवृत्तिमुपलभ्य बालो व्युत्पित्सु: प्रयोज्यवृद्धस्य प्रवृत्ति-निवृत्तिहेतू इच्छाद्वेषावनुमिमीते। तथाहि-इच्छाद्वेषहेतुके, वृद्धस्य प्रवृत्ति-निवृत्ती, स्वतन्त्रप्रवृत्ति-निवृत्तित्वात्; मदीयस्वतन्त्रप्रवृत्तिनिवृत्तिवत्। कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनभावावगमपूर्वकौ च, अस्येच्छाद्वेषौ; प्रवृत्ति-निवृत्तिहेतुभूतेच्छाद्वेषत्वात्, मत्प्रवृत्तिहेतुभूतेच्छाद्वेषवत्। न जातु मम शब्दतद्व्यापारपुरुषाशयत्रैकाल्यानवच्छिन्नभावनापूर्वप्रत्ययपूर्वाविच्छाद्वेषावभूताम्, अपितु भूयोभूय: स्वगतमालोचयत उक्तकारणपूर्वाविव प्रत्यवभासेते। तस्माद् वृद्धस्य स्वतन्त्रप्रवृत्ति-निवृत्ति इच्छाद्वेषभेदौ च कर्तव्यतैकार्थसमवेतेष्टानिष्टसाधनाभावावगमपूर्वावित्यानुपूर्व्या सिद्ध: कार्य-कारणभाव इतीष्टानिष्टसाधनतावगमात्प्रयोज्यवृद्धप्रवृत्तिनिवृत्ती इति सिद्धम् स चावगम: प्रागभूत: शब्दश्रवणानन्तरमुपजायमान: शब्दश्रवणहेतुक:, इति प्रवर्तकेषु वाक्येषु ''यजेत'' इत्यादिषु शब्द एव कर्तव्यमिष्टसाधनं व्यापारमवगमयंस्तस्येष्टसाधनतां कर्त्तव्यतां चावगमयति; अनन्यलभ्यत्वादुभयो:, अनन्यलभ्यस्य च शब्दार्थत्वात्। तत्र तु कर्तव्यतान्यत एव लभ्यते, यथा '' न हन्यात्'' ''न पिबेत्'' इत्यादिषु हनन-पानप्रवृत्त्यो रागत: प्रतिलम्भात्, तत्र तदनुवादेन

नञ्समभिव्याहृता लिङादिविभक्तिरन्यतोऽप्राप्तमनयोरनर्थहेतुभावमात्रमवगमयति। प्रत्यक्षं हि तयोरिष्टसाधनभावोऽवगम्यते; अन्यथा रागविषयत्वायोगात्। तस्माद्रागादिप्राप्तकर्तव्यतानुवादेनानर्थ-साधनताज्ञानपरं ''न हन्यात्'' ''न पिबेत्'' इत्यादिवाक्यम्, नतु कर्तव्यतापरमिति सुष्ठूक्तमकार्यनिष्ठत्वं निषेधानाम्। निषेध्यानां चानर्थसाधनताबुद्धिरेव निषेध्याभावबुद्धिः तया खल्वयं चेतन आपाततो रमणीयतां पश्यन्नप्यायतिमालोच्य प्रवृत्त्यभावं निवृत्तिमवबुध्य निवर्तते। औदासीन्यमात्मनोऽवस्थापयतीति यावत्। *स्यादेतत्*-अभावबुद्धिश्चेदौदासीन्यस्थापनकारणम्, यावदौदासीन्यमनुवर्तेत, न चानुवर्तते; नुह्यदासीनोऽपि विषयान्तरव्यासक्तचितस्तदभावबुद्धिमान्। न चावस्थापककारणाभावे कार्यावस्थानं दृष्टम्। नहि स्तम्भावपाते प्रासादोऽवतिष्ठते, अत आह- ***सा च दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति***॥ तावदेव खल्वयं प्रवृत्त्युन्मुखः, न यावदस्यानर्थहेतुभावमधिगच्छति। अनर्थहेतुत्वाधिगमोऽस्य समूलोद्धारं प्रवृत्तिमुद्धृत्य दग्धेन्धनाग्निवत्स्वयमेवोपशाम्यति। *एतदुक्तं भवति*-यथा प्रासादावस्थानकारणं स्तम्भौ, नैवमौदासीन्यावस्थानकारणमभावबुद्धिः, अपित्वागन्तुकामाद्विनाशहेतोस्त्राणेनावस्थानकारणम्। यथा कमठपृष्ठनिष्ठुरः कवचः शस्त्रप्रहारत्राणेन राजन्यजीवावस्थानहेतुः। न च कवचापगमे चासति च शस्त्रप्रहारे राजन्यजीवनाश इति। उपसंहरति- ***तस्मात्प्रसक्तक्रियानिवृत्त्यौदासीन्यमेवेति***॥ औदासीन्यम- जानतोऽप्यस्तीति प्रसक्तक्रियानिवृत्त्योपलक्ष्य विशिनष्टि। ''तत्किमक्रियार्थत्वेनानर्थक्यमाशङ्क्य क्रियार्थत्वोपवर्णनं जैमिनीयमसमञ्जसमेव? इत्युपसंहारव्याजेन परिहरति- ***तस्मात्पुरुषार्थेति***॥ पुरुषार्थानुपयोग्युपाख्यानादिविषयावक्रियार्थतया क्रियार्थतया च पूर्वोत्तरपक्षौ, नतूपनिषद्विषयौ; उपनिषदां स्वयंपुरुषार्थब्रह्मरूपावगमपर्यवसानादित्यर्थः। यदप्यौपनिषदात्मज्ञानमपुरुषार्थं मन्यमानेनोक्तम्- ***कर्तव्यविध्यनुप्रवेशमन्तरेणेति***॥ अत्र निगूढाभिसन्धिः पूर्वोक्तं परिहारं स्मारयति- ***तत्परिहृतमिति***॥

अत्राक्षेप्ता स्वोक्तमर्थं स्मारयति- ***ननु श्रुतब्रह्मणोऽपीति***॥ निगूढमभिसन्धिं समाधातोद्घाटयति- ***अत्रोच्यते-नावगतब्रह्मात्मभावस्येति***॥ सत्यम्, न ब्रह्मज्ञानमात्रं सांसारिकधर्मनिवृत्तिकारणम्, अपि तु साक्षात्कारपर्यन्तम्। ब्रह्मसाक्षात्कारश्चान्तःकरणवृत्तिभेदः श्रवण-मननादिजनितसंस्कारसचिवमनोजन्मा षड्जादिभेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्यास-संस्कृतमनोयोनिः। स च निखिलप्रपञ्चमहेन्द्रजालसाक्षात्कारं समूलमुन्मूलयन्नात्मानमपि प्रपञ्चत्वाविशेषादुन्मूलयतीत्युपपादितमधस्तात्। तस्माद्रज्जुस्वरूप- कथनतुल्यतैवात्रेति सिद्धम्। अत्र च वेदप्रमाणमूलतया वेदप्रमाणजनितेत्युक्तम्। अत्रैव सुख-दुःखानुत्पादभेदेन निदर्शनद्वयमाह- ***नहि धनिन इति***॥ श्रुतिमत्रोदाहरति- ***तदुक्तमिति***॥ चोदयति- ***शरीरे पतित इति***॥ परिहरति- *न;

सशरीरत्वस्येति *॥ यदि वास्तवं सशरीरत्वं भवेत्, न जीवतस्तन्निवर्तेत। मिथ्याज्ञाननिमित्तं तु तत्। तच्चोत्पन्नतत्त्वज्ञानेन जीवतापि शक्यं निवर्तयितुम्। यत्पुनरशरीरत्वं तदस्य स्वभाव इति न शक्यं निवर्तयितुम्; स्वभावहानेन भावविनाशप्रसङ्गादित्याह- ***नित्यमशरीरत्वमिति** *॥ स्यादेतत् *-न मिथ्याज्ञाननिमित्तं सशरीरत्वम्, अपि तु धर्माधर्मनिमित्तम्, तच्च स्वकारणधर्माधर्मनिवृत्तिमन्तरेण न निवर्तते, तन्निवृत्तौ च प्रयाणमेवेति न जीवतोऽशरीरत्वमिति शङ्कते- *तत्कृतेति *॥ तदित्यात्मानं परामृशति। निराकरोति- ***न शरीरसंबन्धस्येति** *॥ न तावदात्मा साक्षाद्धर्माधर्मौ कर्तुमर्हति; वाग्बुद्धिशरीरारभजनितौ हि तौ नासति शरीरसंबन्धे भवतः, ताभ्यां तु शरीरसंबन्धं रोचयमानो व्यक्तं परस्पराश्रयं दोषमावहति। तदिदमाह- ***शरीरसंबन्धस्येति** *॥ यद्युच्येत सत्यमस्ति परस्पराश्रयः, नत्वेष दोषः, अनादित्वात्, बीजाङ्कुरवदित्यत आह- ***अन्धपरम्परैषाऽनादित्वकल्पना** *॥ यस्तु मन्यते नेयमन्धपरम्परातुल्यानादिता। नहि यतो धर्माधर्मभेदादात्मशरीरसंबन्धभेदजन्मनः, एष त्वात्मशरीरसंबन्धभेदः, तत एव स धर्माधर्मभेदः, किन्त्वेष पूर्वस्माद्दात्मशरीरसम्बन्धात् पूर्वधर्माधर्मभेदजन्मतः, एष त्वऽस्माद्धर्माधर्मभेदादिति, तं प्रत्याह- ***क्रियासमवायाभावादिति** *॥ शङ्कते- ***संनिधानमात्रेणेति** *॥ परिहरति- ***नेति** *। *उपार्जनम्=स्वीकरणम्। न त्वियं विधात्मनीत्याह- ***नत्वात्मन इति** *॥ ये तु देहादावात्माभिमानो न मिथ्या, अपितु गौणः, माणवकादाविव सिंहाभिमान इति मन्यन्ते, तन्मतमुपन्यस्य दूषयति- ***अत्राहुरिति** *॥ प्रसिद्धो वस्तुभेदो यस्य पुरुषस्य स तथोक्तः। उपपादितं चैतदस्माभिरध्यासभाष्य इति नेहोपपाद्यते। यथा मन्दान्धकारे स्थाणुरयमित्यगृह्यमाणविशेषे वस्तुनि पुरुषात् सांशयिकौ पुरुषशब्द-प्रत्ययौ स्थाणुविषयौ, तत्र हि पुरुषत्वमनियतमपि समारोपितमेव। एवं संशये समारोपितमनिश्चितमुदाहृत्य विपर्ययज्ञाने निश्चितमुदाहरति- ***यथावा शुक्तिकायामिति** *॥ शुक्लभास्वरस्य द्रव्यस्य पुरःस्थितस्य सति शुक्तिकारजतसाधारण्ये यावदत्र रजतविनिश्चयो भवति, तावत्कस्माच्छुक्तिविनिश्चय एव न भवति? संशयो वा द्वेधा युक्तः; समानधर्मधर्मिणोर्दर्शनात्, उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषद्वयस्मृतेश्च। संस्कारोन्मेषहेतोः सादृश्यस्य द्विष्ठत्वेनोभयत्र तुल्यमेतदित्यत उक्तम्- ***अकस्मादिति** *॥ अनेन दृष्टस्य हेतोः समानत्वेऽप्यदृष्टं हेतुरुक्तः। तच्च कार्यदर्शनोन्नेयत्वेनासाधारणमिति भावः। ***आत्मानात्मविवेकिनामिति** * ॥ श्रवण-मननकुशलतामात्रेण पण्डितानाम्; अनुत्पन्नतत्त्वसाक्षात्कारणामिति यावत्। तदुक्तम्-''पश्वादिभिश्चाविशेषात्'' इति। शेषमतिरोहितार्थम्। जीवतो विदुषोऽशरीरत्वे च श्रुति-स्मृती उदाहरति- ***तथाचेति** *। सुबोधम्। प्रकृतमुपसंहरति- ***तस्मान्नावगतब्रह्मात्मभावस्येति** *॥ *ननु* उक्तं यदि जीवस्य ब्रह्मात्मत्वावगतिरेव सांसारिकधर्मनिवृत्तिहेतुः, हन्त मननादिविधानानर्थक्यम्, तस्मात्प्रतिपत्तिविधिपरा वेदान्ता इति, तदनुभाष्य दूषयति- ***यत्पुनरुक्तं श्रवणात्पराचीनयोरिति** *॥ मनन-निदिध्यासनयोरपि न विधिः, तयोरन्वय-व्यतिरेकसिद्धसाक्षात्कारफलयोर्विधिसरूपैर्वचनैरनुवादात्।

तदिदमुक्तम्- ***अवगत्यर्थत्वादिति***॥ ब्रह्मसाक्षात्कारोऽवगतिः, तदर्थत्वं मनन-निदिध्यासनयोरन्वय-व्यतिरेकसिद्धमित्यर्थः। अथ कस्माद् मननादिविधिरेव न भवतीति? अत आह ***यदि ह्यवगतमिति***॥ न तावन्मनन-निदिध्यासने प्रधानकर्मणी अपूर्वविषये अमृतत्वफले इत्युक्तमधस्तात्। अतो गुणकर्मत्वमनयोरवघातप्रोक्षणादिवत्परिशिष्यते, तदप्ययुक्तम्; अन्यत्रोपयुक्तोपयोक्ष्यमाणत्वाभावादात्मनः, विशेषतस्त्वौपनिषदस्य कर्मानुष्ठानविरोधादित्यर्थः। प्रकृतमुपसंहरति- ***तस्मादिति***॥ एवं सिद्धरूपब्रह्मपरत्वमुपनिषदाम्। ब्रह्मणः शास्त्रार्थस्य धर्मादन्यत्वाद्भिन्नविषयत्वेन शास्त्रभेदाद् 'अथातो ब्रह्मजिज्ञासा' इत्यस्य शास्त्रारम्भत्वमुपपद्यत इत्याह- ***एवंच सतीति***॥ इतरथा तु धर्मजिसैवेति न शास्त्रान्तरमिति न शास्त्रारम्भत्वं स्यादित्यत आह- ***प्रतिपत्तिविधिपरत्व इति***॥ न केवलं सिद्धरूपत्वाद् ब्रह्मात्मैक्यस्य धर्मादन्यत्वम्, अपितु तद्विरोधादपीत्युपसंहारव्याजेनाह- ***तस्मादहं ब्रह्मास्मीति***॥ इतिकरणेन ज्ञानं परामृशति। विधयो हि धर्मे प्रमाणम्। ते च साध्य-साधनेतिकर्तव्यताभेदाधिष्ठाना धर्मोत्पादिनश्च तदधिष्ठाना न ब्रह्मात्मैक्ये सति प्रभवन्ति; विरोधादित्यर्थः। न केवलं धर्मप्रमाणस्य शास्त्रस्येयं गतिः, अपितु सर्वेषां प्रमाणानामित्याह- ***सर्वाणि चेतराणि प्रमाणानीति***॥ कुतः? ***नहि***॥ अद्वैते हि विषयविषयिभावो नास्ति। न च कर्तृत्वम्; कार्याभावात्। न च करणत्वम् एव। तदिदमुक्तम्- ***अप्रमातृकाणि च***॥

अत्रैव ब्रह्मविदां गाथामुदाहरति- ***अपिचाहुरिति***॥ पुत्र-दारादिष्वात्माभिमानो गौणः। यथा दुःखेन दुःखी यथा च स्वसुखेन सुखी तथा पुत्रादिगतेनापीति सोऽयं गुणः। नत्वेकत्वाभिमानः; भेदस्यानुभवसिद्धत्वात्। तस्माद् गौर्वाहीक इतिवद् गौणः। देहेन्द्रियादिषु त्वभेदानुभवान्न गौण आत्माभिमानः, किन्तु शुक्तौ रजतज्ञानवन्मिथ्या। तदेवं द्विविधोऽयमात्माभिमानो लोकयात्रां वहति। तदसत्त्वे तु न लोकयात्रा, नापि ब्रह्मात्मैकत्वानुभवः; तदुपायस्य श्रवण-मननादेरभावात्। तदिदमाह- ***पुत्रदेहादिबाधनात्***॥ गौणात्मनोऽसत्त्वे पुत्रकलत्रादिबाधनम्। ममकाराभाव इति यावत्। मिथ्यात्मनोऽसत्त्वे देहेन्द्रियादिबाधनं श्रवणादिबाधनं च। ततश्च न केवलं लोकयात्रासमुच्छेदः, सद्ब्रह्माहमित्येवंबोधशीलं यत्कार्यम्; अद्वैतसाक्षात्कार इति यावत्, तदपि कथं भवेत्? कुतस्तदसंभव इति? अत आह- ***अन्वेष्टव्यात्मविज्ञानात्प्राक्प्रमातृत्वमात्मनः***॥ उपलक्षणं चैतत्। प्रमा-प्रमेयप्रमाणविभाग इत्यपि द्रष्टव्यम्। एतदुक्तं भवति-एष हि विभागोऽद्वैतसाक्षात्कारकारणम्; ततो नियमेन प्रागभावात्। तेन तदभावे कार्यं नोत्पद्यत इति। न च प्रमातुरात्मनोऽन्वेष्टव्य आत्माऽन्य इत्याह- ***अन्विष्टः स्यात्प्रमातैव पाप्मदोषादिवर्जितः***॥ उक्तं ग्रीवास्थग्रैवेयकनिदर्शनम्। स्यादेतत्-अप्रमाणात्कथं पारमार्थिका-द्वैतानुभवोत्पत्तिरिति? अत आह- ***देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः***॥

***लौकिकं तद्वदेवेदं प्रमाणं तु*॥** अस्यावधिमाह-**आऽऽत्मनिश्चयात्।** आ ब्रह्मस्वरूपसाक्षात्कारादित्यर्थः। एतदुक्तं भवति-पारमार्थिकप्रपञ्चवादिभिरपि देहादिष्वात्माभिमानो मिथ्येति वक्तव्यम्; प्रमाणबाधितत्वात्। तस्य च समस्तप्रमाणकारणत्वं भाविकलोकयात्रावाहित्वं चाभ्युपेयम्। सेयमस्माकमप्यद्वैतसाक्षात्कारे विधा भविष्यति। न चायमद्वैतसाक्षात्कारोऽप्यन्तःकरणवृत्तिभेद एकान्ततः परमार्थः। यस्तु साक्षात्कारो भाविकः, नासौ कार्यः; तस्य ब्रह्मस्वरूपत्वात्। अविद्या तु यद्यविद्यामुच्छिन्द्याज्जनयेद्वा, तत्र काचिदनुपपत्तिः। तथाच श्रुतिः-'विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।' इति। तस्मात् सर्वमवदातम्।।४।। समन्वयाधिकरणम्।

इति श्रीवाचस्पतिमिश्रकृतौ भामत्यां समन्वयाधिकरणं समाप्तम्।

ऋजुप्रकाशिका

शास्त्रेति।। ब्रह्मण: शास्त्रप्रमाणकत्वं प्रतिज्ञामात्रेणोक्तम्, न प्रतिपादितमित्यर्थ:। प्रतिपाद्यतां तर्हि ब्रह्मण: शास्त्रप्रमाणकत्वम्, तत्राह– *तदनेनेति*।। *तत्=शास्त्रप्रमाणकत्वम्।। *अनेन सूत्रेण=समन्वयसूत्रेण। *उपपादनीयमिति*।। सिद्धान्तत्वेनोपपादनीयमित्यर्थ:। उत्सूत्रं=सूत्रं विना। भाष्ये–"**कथं पुनरि**" त्यत्र किंशब्दो न प्रश्नार्थ:; किंत्वाक्षेपार्थ इत्याह– * किमित्याक्षेप इति*।। ब्रह्म न वेदान्तशास्त्रप्रमाणकमित्याक्षेप: कुत:? इत्याशङ्क्य, वेदान्तप्रमाणै: सिद्धब्रह्मप्रतिपादने प्रयोजनाभावादिति हेतुमाह– *शुद्धेत्यादिना*।। न केवलं वेदान्तानां सिद्धब्रह्मप्रतिपादनेऽप्रयोजनत्वम्, किंत्वप्रामाण्यप्रसङ्गश्चेत्याह– *भूतार्थत्वे चेति*।। भूतार्थकत्वे चेत्यर्थ:। वेदान्तानामिति शेष:। *प्रत्यक्षादिभिरिति*।। भूतार्थस्य प्रत्यक्षादिविषयत्वनियमादिति भाव:। *तदर्थानुवादकत्वेन= प्रत्यक्षादिसिद्धार्थानुवादकत्वेन। *अप्रामाण्यप्रसङ्गादिति*।। मानान्तरसापेक्षत्वात् सापेक्षत्वलक्षणा-प्रामाण्यप्रसङ्गादित्यर्थ:। "न खल्वि"त्यत: प्राक् चकारोऽध्याहर्तव्य:। अप्रामाण्यप्रसङ्गमेव द्रढयति– *न खल्विति*।। एषाम्=वेदान्तानाम्। अप्रामाण्यप्रसङ्गेऽप्रयोजनत्वापत्तौ चेष्टापत्तिमाशङ्क्याह– *न चैतैरिति*।। *एतै:=वेदान्तै:। "अप्रयोजनैरि"त्यत्र भवितुं युक्तमित्यनुषङ्ग:। कुतो न युक्तमिति? अत आह– *स्वाध्यायेति*।। अध्ययनविध्युपात्तनिखिलस्वाध्यायमध्येऽक्षरमात्रस्याप्यानर्थक्यायोगाद-प्रामाण्यायोगाच्चेति भाव:। किं तर्हि वेदान्तानामप्रामाण्यमेव? नेत्युपसंहरति–तस्मादिति*।। *क्रियार्थत्वमिति*।। तथा च विहितक्रियाशेषत्वेनैव वेदान्तानां प्रामाण्यम्, नतु सिद्धब्रह्मप्रतिपादकत्वेनेति भाव:। *ननु*–ब्रह्मकाण्डपठितानां वेदान्तानां कथमसन्निहितकर्मकाण्डपठितक्रियाशेषत्वेन प्रामाण्यमुच्यत इति? अत आह– *यदि त्वसन्निधानादिति*।। क्रिया तच्छब्दार्थ:। *एवं हीति*।। सन्निहितोपासनाक्रियापरत्वे हीत्यर्थ:। किमर्थं तर्हि "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति पारमर्षसूत्रोपन्यास:? क्रियापरत्वेन वेदान्तानामर्थवत्ताया उक्तत्वादिति, अत आह– *पारमर्षेति*।। *आम्नायस्य=वेदराशे:, *क्रियार्थत्वात्=कार्यार्थत्वात्, *अतदर्थानाम्=अकार्यार्थानामित्यर्थे धृत्वा सूत्रस्थस्यानर्थक्य-शब्दस्यार्थमाह– *आनर्थक्यं चेति*। तस्यैव प्रकारान्तरेणार्थमाह– *सापेक्षतयेति*।। तत्र हेतुमाह– *अनुवादकत्वादिति*।।

ग्रहणकवाक्यमिति।। सङ्ग्रहवाक्यमित्यर्थ:। *विभागभाष्यम्=अस्यैव विवरणभाष्यमित्यर्थ:। *ननु* किमिति वेदान्तानामर्थवादवद् विधिपदैकवाक्यतोच्यते? मन्त्रवत् पार्थक्यार्थ्यमेवोच्यतामित्याशङ्क्य, तर्हि तद्वद् विधिभिर्वाक्यैकवाक्यता स्यादित्याह– *भाष्ये–मन्त्राणां चेति*।।

''इषे त्वे''त्यत्र ''छिनत्ती'' त्यध्याहाराच्छाखाभेद: क्रिया भाति, क्वचिच्च ''अग्निर्मूर्धे'' त्यादौ तत्साधनं देवता विभातीति। मन्त्रा: श्रुत्यादिभि: क्रतौ विनियुक्ता:। ते किमुच्चारणमात्रेणादृष्टं कुर्वन्त: क्रतावुपकुर्वन्ति? उत दृष्टेनैवार्थप्रकाशेन? इति सन्देहे, तत्र न तावद् दृष्टार्थत्वमेव मन्त्राणां शक्यं वक्तुम्; उपायान्तरेणापि मन्त्रार्थस्य स्वाध्यायकालावगतस्य चिन्तादिना प्रयोगसमये स्मृतिसंभवात्, तावन्मात्रार्थत्वे च मन्त्राणां नित्यवदाम्नानवैयर्थ्यात्। अथ मन्त्रैरेवार्थप्रत्यायननियमाददृष्टं कल्प्येत, तदुच्चारणादेव कल्प्यताम्; तस्य पुंव्यापारगोचरत्वात्, स्वव्यापारे च पुरुषस्य नियोगात् तत्र फलाकाङ्क्षणात्, इति पूर्वपक्षं प्रापय्य, प्रमाणलक्षणे सिद्धान्तितम्–

''यस्य दृष्टं न लभ्येत तस्यादृष्टप्रकल्पना।
लभ्यतेऽर्थस्मृतिर्दृष्टा मन्त्रोच्चारणतस्त्विह॥
अर्थस्मृति: प्रयोगार्था प्रयोगाच्च फलोदय:।
इति दृष्टार्थसंपत्तौ नादृष्टमिह कल्प्यते॥''

यस्तु मन्त्रैरेव स्मर्तव्य इति नियम:, तस्य किंचिददृष्टमस्तीत्यदृष्टं कल्प्यते। तस्माद् दृष्टार्था मन्त्रा इति। यद्यपि ''सोऽरोदीत्'' इत्यादिवाक्यानामानर्थक्यपरिहाराय स्तावकत्वेन विध्येकवाक्यतयाऽर्थवत्त्ववद् वेदान्तानामप्युपासनाविध्यपेक्षितकर्त्रादिस्तावकत्वेन विध्येकवाक्यतयाऽर्थवत्त्वमुक्तमेव; तथाऽप्य-क्रियार्थानामपि वेदान्तानां ब्रह्मणि विधिपरत्वमेवास्त्विति शङ्कते– *स्यादेतदिति*।। एवंचापरमप्यनुकूलं भवतीत्याह– *तथा चेति*।। *ननु*–अप्रवृत्तप्रवर्तनं विधि:, तच्च कार्य एव; तथाच सिद्धे ब्रह्मणि कथं विधिरिति? अत आह– *न खल्विति*।। किं त्वज्ञातज्ञापनमपीति शेष:। कुत इति? अत आह– *उत्पत्तिविधेरिति*।। तथा च प्रयोगविधेरेवाप्रवृत्तप्रवर्तकत्वेन कर्ममात्रबोधकोत्पत्तिविधेर-प्रवृत्तप्रवर्तकत्वाभावेन विधित्वं न स्यादिति भाव:। एवंचाज्ञातज्ञापनमाय विधिरिति वाच्यम्, इति वेदान्तानामपि तथात्वाद् विधिपरत्वमेवेत्याह–वेदान्तानां चेति*।। तथाभावात्=विधिपरत्वसद्भावादित्यर्थ:। क्वचित्तदभावादिति पाठ:। तस्याविधिपरत्वाभावादित्यर्थ:। अधिकार-विनियोग प्रयोगोत्पत्तिविधीनां परस्परमविनाभूतत्वात् सिद्धे विध्ययोग:, किन्तु कार्य एवेत्याह– *उत आहेति*।। सर्वस्यापि विधेरनागतोत्पाद्यविषयत्वे हेतुमाह– *अधिकारेति*।। तथा च प्रयोगविधे: कार्यविषयत्व इतरेषामपि विधीनां तथात्वमावश्यकमिति न सिद्धे विधिसंभव इति भाव:। अत एवाह–सिद्धे चेति*।। तेषाम्=उक्तानां चतुर्णां विधीनाम्। तर्ह्यन्यतरेणैवोपपत्तावन्यतरवैयर्थ्यम्, तत्राह– *तद्वाक्यानां त्विति*।। अधिकार-विनियोग-प्रयोगोत्पत्तिविधिवाक्यानां त्वित्यर्थ:। ''अग्निहोत्रं जुहोति'' इत्युत्पत्तिविधिवाक्यमुत्पत्तिमात्रपरमित्यर्थ:। एवमधिकारविधिवाक्यमधिकारिण: कर्मसम्बन्धमात्रपरम्। एवं विनियोगविधिवाक्यमङ्गानां

प्रधानसम्बन्धमात्रपरम्। एवं प्रयोगविधिवाक्यं साङ्गकर्मानुष्ठापनमात्रपरमिति द्रष्टव्यम्। तथा चैकतात्पर्यकत्वे न ह्यन्यतरवैयर्थ्यशङ्काऽपि। अत्र तात्पर्यभेदाद् नान्यतरवैयर्थ्यमिति भावः। अन्यतरवैयर्थ्याभावमेबाह– *नत्वत्र न विनियोगादयः सन्तीति*।। 'द्वौ नञौ प्रकृतमर्थं गमयतः' इति न्यायात् सन्त्येवेत्यर्थः। सन्तोऽपी तेऽन्यतः स्वतात्पर्यविषयत एक लब्धार्थत्वात् स्वतात्पर्याविषयेऽविवक्षिता इत्याह– *सन्तोऽपीति*।। क्वचित्–''नत्वत्र विनियोगादयः सन्ति, सन्तोऽप्यन्यतो लब्धत्वात् केवलमविवक्षिताः'' इति पाठः। तत्रेत्थं योजना–किं कार्य इव ब्रह्मण्यपि विनियोगादयश्चत्वारो विधयः सन्ति? उत न सन्ति? इति विकल्प्य, अन्त्यमङ्गीकारेण परिहरति– *नत्वत्र विनियोगादयः सन्तीति*।। तथा च ब्रह्मणि विध्यभावे विधिपरा एव वेदान्ता इति शङ्का व्याहतेति भावः। आद्यं दूषयति– *सन्तोऽपीति*। अपिशब्दस्वारस्याद् न सन्त्येव, सन्तोऽप्यन्यथा प्रकारान्तरेण लब्धत्वात्मकत्वान्न ब्रह्मणि विधयो विवक्षिता इत्यर्थः। उपसंहरति– *तस्मादिति*।। उक्तरूपे ब्रह्मणि=सिद्धे ब्रह्मणि। *शब्दस्यातात्पर्यादिति*।। शब्दस्याकार्यब्रह्मपरत्व आनर्थक्यादिति भावः। *ननु*–वेदान्तानामुपासनाविधिशेषत्वे ''तत्त्वमसि'' इत्यादिशब्दान्तरप्रमाणेन जीवब्रह्मैक्यप्रतिपादनविरोध इति, अतः आह– *प्रमाणान्तरेणेति*।। यादृशं जीवब्रह्मैक्यलक्षणं स्वरूपं व्यवस्थाप्यते, तत्स्वरूपं शब्देनोपासनाविधिपरेण शब्देन न विरुध्यत इत्यर्थः। कुतो न विरुध्यत इति? अत आह–तस्येति*।। ''तत्त्वमसि'' इत्यादिवाक्यस्येत्यर्थः। त्वन्मते जीव-ब्रह्मैक्याभावात् कथं तदैक्योपासना तवेति? अत आह– *समारोपेणेति*।। **''तस्मान्न ब्रह्मणः शास्त्रयोनित्वमि'' ति भाष्ये** '' शास्त्रयोनित्वमि'' त्यस्य शास्त्रप्रमाणकत्वमित्यर्थः। सूत्रेण= समन्वयसूत्रेण। *तत्तु समन्वयात् तदेतदिति*।। ''तत्तु समन्वयात्'' इत्येतदित्यर्थः। भाष्ये- *तुशब्दः पक्षव्यावृत्त्यर्थ इति*।। ब्रह्म शास्त्रप्रमाणकं नेति यः पूर्वपक्षः, तद्व्यावृत्त्यर्थ इत्यर्थः। *तदित्युत्तरपक्षप्रतिज्ञां विभजत इति*।। भाष्यकारः। तदित्यादिनोत्तरपक्षप्रतिज्ञाम्= *उत्तरे=समाधाने सिद्धान्ते कर्तव्ये सति*पक्षे प्रतिज्ञां पक्षविभागपूर्वकं प्रतिज्ञां विभजते=पक्ष साध्ये निर्दिशतीति फलितार्थः। *भाष्ये '' तद् ब्रह्म सर्वज्ञं **सर्वशक्ति जगदुत्पत्ति स्थिति-लयकारणमि''ति** पक्षनिर्देशः। *''वेदान्तशास्त्रादवगम्यते'' इति साध्यनिर्देशः। वेदान्तशास्त्रादवगम्यत इत्यस्य वेदान्तशास्त्रप्रमाणकमित्यर्थः। सिद्धान्ते पक्ष–साध्ये निर्दिश्य हेतुं निर्देष्टुं पूर्वपक्षिमुखेन हेत्वाकाङ्क्षामवतारयतीत्याह– *पूर्वपक्षीति*।। *तदेवेति=सम्यगन्वया- दित्येतदेवेत्यर्थः। तात्पर्यं सम्यगुक्तम्। भाष्ये– *एतस्यार्थस्य=ब्रह्मस्वरूपार्थस्य। अत एव भामत्यामुच्यते– *वेदान्तानामैकान्तिकीं ब्रह्मपरतामिति*।। *ननु*– ''सदेव'' इत्यनिष्फलानि वाक्यान्युदाहरता ''यतो वा इमानि'' इत्यादिवाक्यं किमिति नोदाहृतमिति? अत आह– * यतो वा इमानीति तु वाक्यमिति*।। *न पठितमिति*।। ''तद् ब्रह्म सर्वज्ञम्'' इत्यादिभाष्ये '' यतो वा'' इत्यादिवाक्यस्य कीर्तनात् तत्प्रमाणं बुद्धिस्थं भवतीति नोदाहृतमित्यर्थः। वेदान्तानां ब्रह्मात्मैकत्व उपक्रमोपसंहारैक्यं तात्पर्यलिङ्गम्।। तच्च सदृष्टान्तमाह– *येनेति*।। भेदलक्षणे चिन्तितम्। '' पौर्णमासीवदुपांशुयाजः स्यात्''।।

"जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वायाग्नीषोमावुपांशु यष्टव्योऽजामित्वाय" इति श्रूयते। तत्र "उपाशुं याजमन्तरा यजति" इत्येतद् विष्णु-प्रजापत्यग्नीषोमदेवतानामुक्तानामुपांशुयागानां समुदायानुवादकम्? किं बाऽपूर्बयागविधि:? इति संशये, यथाऽऽग्नेयादीनां षण्णां यागानां "य एवं विद्वान् पौर्णमासीं यजते" "य एवं विद्वानमावास्यां यजते" इति च समुदायानुवाद:, एवम्- उपांशु याजमन्तरा यजति" इत्येतदपि विष्ण्वादिवाक्यविहितानां निरुक्तानां त्रयाणां यागानामनुवाद:, नापूर्वयागविधि:, अन्तरावाक्ये द्रव्य-देवताख्ययागस्वरूपस्याश्रवणात्, विष्णवादिवाक्येषु च विष्ण्वादिदेवता: श्रूयन्ते। न च-द्रव्यं न श्रूयत इति- वाच्यम्; "सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायाऽऽमाज्यम्" इत्याज्यद्रव्यस्य सिद्धे:, तव्यप्रत्ययाश्च विधायका: श्रूयन्ते। अतस्तत्र विष्ण्वादिवाक्यैर्विधि: संभवति। अन्तरावाक्ये विधायकवचनं न नास्ति। अतो न विधि:। न च-यजतीति वचनं तत्र विधायकमिति-वाच्यम्; तस्य वर्तमानापदेशत्वेनाविधायकत्वात्। तदुक्तम्-

"यागान् विष्ण्वादिसंयुक्तान् विहितान् रूपवत्तया। अरूपमन्तरावाक्यमगत्यैवावलम्बते।।"

इति पूर्व: पक्ष:। एतदधिकरणसिद्धान्तमाह- *अनूचोरिति*।। निरन्तरयोराग्नेयाग्नीषोमीययो: पुरोडाशयो: करण आलस्यं स्यात्, इति : 'जामि वे'त्यादिना दोषं सङ्कीर्त्य तदपनयार्थम्- "उपांशुयाजमन्तरा यजति"इत्युपांशुयाजमाज्यद्रव्यकं विधाय, अनन्तरम् "अजामित्वाये"ति तद्विधानलब्धं जामितादोषसमाधानमुपसंहरति। *अत: सार्थवादोपक्रमोपसंहारैकरूप्यादेकमिदं वाक्यम्। एकवाक्यता चोपांशुयाजविधौ लभ्यते। नेतरत्रानेकयागविधविति*।। *ननु* "विष्णुरुपांशु यष्टव्य:" इत्यादितव्यप्रत्ययविहितयागानां समुदायानुवादोऽयमित्युक्तम् तत्राह- *अपूर्वेति*। तथाहि-" यष्टव्य:"इति कर्मप्राधान्यं विष्ण्वादिवाक्यै: प्रतीयते। यागस्तूपसर्जनम्, तत्र कर्मत्वमप्रधानीकृत्य यागप्राधान्यं लक्षणीयम्। कर्मतया च देवतात्वम्, अतो गुरुतरा कल्पना, अन्तरावाक्ये तु श्रुंत यागप्राधान्यम्, विधिश्च पञ्चमलकाररूप:। यत्तु "रूपाभाव:" इति, तन्न; ध्रौवाज्यलाभात्। आग्नेयादीन् यागान् क्रमेणाम्नाय-मन्त्रकाण्डे तत्क्रमेणैव याज्यानुवाक्या आम्नाता:। तत्रोपांशुयाजस्थाने वैष्णव-प्राजापत्याग्नीषोमीयास्तिस्रो वर्तन्ते; ताभिस्तुल्यार्थत्वेन विकल्प्यमानाभिर्विष्ण्वादिदेवतानां समर्पितत्वात्। तस्माद् द्रव्य-देवताख्ययागस्वरूपलाभाद् अपूर्व उपांशुयाजो विधेय:। विष्ण्वादिवाक्यानि त्वर्थवादा:-इत्थं महीयान् उपांशुयाज इति, तत्परतैवोक्तैकवाक्यताबलाद् आश्रितेति। दार्ष्टान्तिकमाह- *एवमत्रापीति*।। *एवं वाक्यान्तराणामपीति*।। ऐतेरेये-"आत्मा वा इदमेक एव "इत्युपक्रम्य, "एतमेव पुरुषं ब्रह्म ततमपश्यत्" इति तमेव ब्रह्मात्मानमभिप्रायसमाप्तौ च "प्रज्ञानं ब्रह्म" इत्युपसंहृतम्, वाजसनेयकेऽपि-"अहं ब्रह्मास्मि" इत्युपक्रम्य, "अयमात्मा ब्रह्म" इत्युपसंहृतम्। आथर्वणेऽपि-"कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं

भवती''ति सर्वात्मकं ब्रह्मेत्युपक्रम्य, ''ब्रह्मैवेदममृतं पुरस्तात्'' इति तदेवोपसंहृतम्। तथा च वाक्यान्तरेष्वप्येवमेवोपक्रमोपसंहारैकवाक्यताबलाद् ब्रह्मपरत्वमवगन्तव्यमित्यर्थः। एवमुक्तविधया तत्परत्वं दृष्टं परित्यज्यादृष्टमन्यतरत्वं कल्पयितुमयुक्तमित्याह– *न चेत्यादिना*।। दृष्टपरित्यागेनादृष्टकल्पने दोषमाह– *अतिप्रसङ्गादिति*।। *तेषाम्=वेदान्तानाम्।। *ननु* तावता वेदान्ताः भूतार्थकत्वेन प्रत्यक्षविषयविषयकतया सापेक्षाः; वाक्यत्वात्; पुंवाक्यवदिति पूर्ववादिना सूचितानुमानस्य किं दूषणमुक्तम्? इत्याशङ्क्य, वाक्यत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकेन पक्षे साधनाव्यापकेन पौरुषेयत्वेनोपाधिना सोपाधिकमिदमनुमानमिति दूषणमुक्तं भवतीत्यभिप्रेत्याह– *अयमभिसन्धिरिति*।। वाक्यत्वरूपसाधनपक्षधर्मतावच्छिन्नं सापेक्षत्वरूपं पौरुषेयत्वोपाधिप्रयुक्तमेव; न भूतार्थकत्वप्रयुक्तमिति स्पष्टयितुं विकल्पयति– *किं पुंवाक्यानामिति*।। आद्यं दूषयति– *यदीति*।। अनुमानमादिशब्दार्थः। अनुमानं प्रत्यक्षमपेक्षते क्वचित्तव मते। अनुमानोपनीतप्रत्यक्षमप्यनुमानमपेक्षते। एवं परस्परसापेक्षत्वेन सापेक्षत्वलक्षणाप्रामाण्यप्रसङ्गः इत्यर्थः त्वदुक्तं सापेक्षत्वप्रयोजकं भूतार्थकत्वं तत्रास्तीत्याह– *तान्यपि हीति*।। प्रत्यक्षादीन्यपि हीत्यर्थः। द्वितीयं शङ्कते– *अथेति*।। दूषयति– *एवं तर्हीति*।। *अतत्पूर्वकाणाम्=अबुद्धिपूर्वकाणाम्। एवं चार्थबुद्धिपूर्वकविरचितत्वलक्षणपौरुषेयत्वस्य व्यापकस्य वेदान्तेष्वभावात् सापेक्षत्वलक्षणव्याप्यस्याभावः, इति न सापेक्षत्वलक्षणमप्रामाण्यं वेदान्तानामित्यर्थः। अप्रामाण्याभावे दृष्टान्तमाह– * प्रत्यक्षादीनामिवेति*।। तथा च पौरुषेयत्वोपाधिप्रयुक्तमेव सापेक्षत्वमिति भावः।। *ननु* वेदान्तानामपौरुषेयत्वे सिद्धे खलु सापेक्षत्वादप्रामाण्यं सिध्येत्, अपौरुषेयत्वमेव भूतार्थकत्वे न सिध्यतीति शङ्कते– *यद्युच्येतेति*।। तदेव=अपौरुषेयत्वमेव। *ननु*– भूतार्थस्य मानान्तरेण ज्ञाने तत्प्रतिपादकवचनस्य बुद्धिपूर्वकं विरचनसंभवेन पौरुषेयत्वम् तदेव नेत्यत आह– भूतार्थस्येति*।। एवं च वेदः पौरुषेय एव। न च मानाभावः; वाक्यत्वलिङ्गकस्यानुमानप्रमाणस्य सत्त्वादित्याह– *वाक्यत्वादिलिङ्गकस्येति*। वेदवाक्यानि, पौरुषेयाणि वाक्यत्वात्; कालिदासवाक्यवत्, इति वेदपौरुषेयताऽनुमानस्याप्रत्यूहं व्युत्पत्तेरित्यर्थः। एवंच पौरुषेयतया सापेक्षत्वं दुरुद्धरमित्युपसंहरति– *तस्मादिति*।। वेदान्तानां पौरुषेय त्वप्रयुक्तमेव सापेक्षत्वम्, न भूतार्थत्वप्रयुक्तम्, पौरुषेयत्वं तु भूतार्थकत्वप्रयुक्तमित्यभिप्रेत्याह– *नत्विति*।। तथा च पूर्वोक्तानुमाने न पौरुषेयत्वमुपाधिः; पक्षे साधनव्यापकत्वादिति .भावः। वेदान्तानां कार्यार्थकत्वे तु पौरुषेयत्वप्रयुक्तसापेक्षत्वलक्षणा-प्रामाण्यप्रसङ्गदोषो नेत्याह– * कार्यार्थत्वे त्विति*।। तत्त्वेन= अनारोपितरूपत्वेन। तदर्थानाम्=कार्यार्थानाम्। *अशक्यरचनतयेति*। कार्यस्य मानान्तरादनुपलम्भेन तत्प्रतिपादकत्वपक्षे वेदान्तानां कार्यबुद्धिपूर्वकं रचयितुमशक्यतयेत्यर्थः। इतीति हेतौ । यतः कार्यार्थकत्वे वेदान्तानामनपेक्षत्वलक्षणं प्रामाण्यं सिध्यति, अत इत्यर्थः। एवं शङ्कायां समाधत्ते– *अत्र ब्रूम इति*।। प्रामाण्याय वेदान्तानां कार्यपरत्वमुक्तम्, तत्र किं कार्यम्? यद् मानान्तरेण पुरुषेण न ज्ञातुं शक्यमित्युक्तम्, किं वा अलौकिकमपूर्वम्? इति दूषयितुं

विकल्पयति–किं पुनरिदं कार्यमिति*।। किं कृतियोग्यं कार्यम्? किं वा अलौकिकमपूर्वम्? इति दूषयितुं विकल्पयति– * किं पुनरिदं कार्यमिति*।। किंशब्द उक्तविकल्पार्थः। नाद्यः; भावार्थस्य कर्मणोऽपि कृतियोग्यत्वेन मानान्तरयोग्यत्वेन मानान्तरेण ज्ञातुमशक्यमित्ययुक्तमिति भावः। द्वितीयं शङ्कते– *अपूर्वमिति*।। तर्हि मानान्तरायोग्ये तस्मिन् लिङादेः सङ्गतिग्रहाभावात्। लिङ्गादेस्तदबोधकत्वापात् इति दूषयति– *हन्तेति*।। अस्य= अपूर्वस्य। तेन=अपूर्वेण ''लोकानुसारः'' इत्यतः प्राग् लिङ्गादेरिति शेषः। *ननु*–''यजेत'' इति श्रुतेः कार्यता भाति , अतोऽपूर्वसिद्धिरिति, तत्राह– * लोकानुसारत इति*।। तथा च नापूर्वसिद्धिरिति भावः। स्वर्गकामपदसमभिव्याहारसंज्ञकतर्कानुगृहीतवेदादेव क्रियाविलक्षणापूर्वे लिङ्गादेः सङ्गतिग्रह इति शङ्कते- *स्वर्गकाम इति*।। नियोज्य उपगम्यताम्, ततः किमिति? अत आह– *न च क्रियालक्षणभङ्गुरेति*।। एवं चापूर्वस्यैव पारिशेष्यात् स्वर्गानुकूलत्वात् तत्रैव लिङ्गादेर्वेदतः सङ्गतिग्रह इत्याह- *पारिशेष्यादिति*।। सम्बन्धग्रहः स्वर्गकामपदसमभिव्याहारसंज्ञकतर्कस्य '' चैत्यं वन्देत'' इत्यादिवाक्येऽपि सत्त्वादपूर्वकार्यत्वप्रसंग इति दूषयति– * हन्त चैत्येति*।। अस्तु ततः किम्? तत्राह- *तथा चेति*।। तेषामपि=चैत्यवन्दनादिवाक्यानामपि। *अशक्यरचनत्वेन*=अपूर्वकार्यकत्वेऽपूर्वस्य मानान्तरागम्यतया तद्बुद्धिपुरस्सरं विरचयितुमशक्यत्वेनेत्यर्थः। *तेषाम्= चैत्यवन्दनादिवाक्यानाम्। *अपूर्वार्थत्वप्रतिषेध इति*।। चैत्यवन्दनादिवाक्यानि, नापूर्वकार्यकाणि, स्मर्यमाणकर्तृकत्वेन स्पष्टदृष्टपौरुषेयत्वात्, इत्येवमपूर्वार्थत्वप्रतिषेध इत्यर्थः। *वाक्यत्वादिनेति*।। वेदवाक्यानि, पौरुषेयाणि, वाक्यत्वात्, कालिदासवाक्यवदिति वेदानामपि पौरुषेयत्वमनुमितम्, इति तेषामप्यपूर्वकार्यार्थता न स्यादित्यर्थः। *ननु* वेदवाक्यानि, अपौरुषेयाणि,अस्मर्यमाणकर्तृकत्वादित्यादितः पौरुषेयत्वसाधकवाक्यत्वादिलिङ्गानामाभासत्वं शङ्कते–अन्यत इति*। तर्हि वेदान्तानामप्यस्मर्यमाण-कर्तृकत्वेनापौरुषेयत्वसिद्धावपौरुषेयत्वम्; अत एव चानपेक्षत्वलक्षणप्रामाण्यसिद्धौ तेषां प्रामाण्यायापूर्वकार्यार्थत्वमुक्तं व्यर्थमित्याह– *कृतमपूर्वार्थत्वेनेति*।। *तदुपपादकेन= प्रामाण्योपपादकत्वेनोक्तेन। क्वचित् '' तदनुपपादकेने'' ति पाठः । तस्यायमर्थः– उक्तविधया वेदान्तानामपौरुषेयत्वे तत एवानपेक्षत्वलक्षणप्रामाण्यसिद्धौ प्रामाण्यानुपपादकेनापूर्वार्थत्वेन। *कृतम्=अलमित्यर्थ इति। *न्यायकणिकायामिति*।। अर्थज्ञानपूर्वकं विरचितत्वं पौरुषेयत्वम्।।

तच्च लौकिकवाक्येषु संभवति, न वैदिकेषु। न च– वेदवाक्यान्यपि सर्वाण्यर्थज्ञानपूर्वकमेव परमेश्वरो विरचितवानिति-वाच्यम्; तथा सति ''निःश्वसितमेतद्यदृग्वेदः'' इति श्रुतिव्याकोपापत्तेः। अतो बुद्धि-पूर्वकमेव विरचितत्वं वेदानाम्, इति बुद्धिपूर्वकविरचितत्वान्यत्वलक्षणमपौरुषेयत्वमिति न्यायकणिकायामुपपादितमित्यर्थः। ततः किमिति? अत आह– *तेनेति*।। *ननु* अपौरुषेयतयाऽनपेक्षत्वेऽपि ''अग्निर्हिमस्य भेषजम्'' इतिवद् मानान्तरगृहीतग्राहित्वाद्

वेदान्तानामप्रामाण्यमित्याशङ्क्य, * ''तत्त्वमसि'' इति '' ब्रह्मात्मभावस्ये'' ति* भाष्यशेषेण परिहृतमित्याह– *न चाधिगतेत्यादिना*।। अस्मिन्नर्थे भाष्यं संवादयति– * तदिदमिति*।।

भाष्ये– *हेयेति*।। हेयोपादेयरहितत्वाद् ब्रह्मणस्तदुपदेशानर्थक्यम्; तत्प्रतिपादने पुरुषार्था-भावादित्यर्थः। पुरुषार्थाभावोऽसिद्ध इत्याह– *विध्यर्थाधिगमात् खल्वित्यादिना*।। * ''सर्वक्लेश-प्रहाणादि'' ति*।। भाष्यस्थप्रशब्दार्थमाह– *सोऽयमिति*।। *ननु* वेदान्तानां न कार्यपरत्वम्, किंतु ब्रह्मपरत्वमेवेत्युक्तम्, वेदान्तजन्याद् ब्रह्मज्ञानात् सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धिरित्यप्युक्तम्, एतावताऽनिष्टपरिहार एव फलमुक्तं भवति, किमत्रेष्टप्राप्तिलक्षणः पुरुषार्थो नास्ति? इत्याशङ्क्य, उभयविधः पुरुषार्थोऽत्रास्तीति सनिदर्शनमाह– *'' एतदुक्तं भवती'' त्यादिना–'' यत्त्वात्मेत्येवे'' त्यतः प्राक्तनेन ग्रन्थेन।। *ग्रैवेयकम्=कण्ठभूषणम्। अत्यक्तं जिहासतीति*।। त्यक्तुमिच्छतीत्यर्थः। *हीनमेव=त्यक्तमेव। *ननु* ज्ञानमात्रादेवाप्राप्तप्राप्तिः, अत्यक्तत्यागोऽपि भवतु, किं तदुपायानुष्ठानापेक्षयेति? अत आह-*न जात्विति।। वस्त्विति*।। अनारोपितं वस्त्वित्यर्थः। तदेवाह–नहीति*।। आरोपिते तु तत्त्वसाक्षात्काररूपं ज्ञानमेवालम्, नोपायानुष्ठानापेक्षेत्याह– *समारोपितं त्वित्यादिना–हातुमिवेत्यन्तेन*।। समारोपस्याधिष्ठानतत्त्वसाक्षात्कारनिवर्त्यताया बहुशो दर्शनादिति भावः। *समारोपितजीविते हि ते इति*।। ते=प्राप्त- त्यक्ते समारोपेणाप्राप्तात्यक्ते इव तिष्ठत इत्यर्थः। समारोपश्च तत्त्वसाक्षात्कारमात्रनिवर्त्यः, नोपायानुष्ठानपेक्षः; इत्युक्तमर्थं द्रढयति– *समारोपं चेति*।। सामान्यतः प्रतिपाद्य, प्रकृते योजयति– *तथेहापीति समारोपितेति*।। समारोपिता अविद्या, तन्निबन्धनः=तत्कारणकः। *तद्भावः=जीवभावः।। *तन्निवृत्तौ अविद्यानिवृत्तिपूर्वकजीवभावनिवृत्तौ। संमतिमाह– * तदिदमुक्तमिति*।। क्लेशशब्दार्थं व्युत्पत्तितो दर्शयति– *स हि क्लिश्नाति जन्तून्, अतः क्लेश इति*।। तस्येति*।। सवासनविपर्यासस्य जीवभावस्य, क्लेशस्य चेत्यर्थः। *आत्मानमेव लोकम्=चैतन्यम्। देवता=सगुणब्रह्म। आदिशब्दात् प्रामाण्यादि गृह्यते। *ननु* विरोधाभावात्तर्हि वेदान्ता उपासनाविधिपरा एवं ब्रह्मपराः, इत्यभिप्रेत्य शङ्कते–यदीति*।। हेयोपादेयशून्ये ब्रह्मण्युपासनाविध्यसंभवाद् नोपासनाविधिपरत्वं वेदान्तानामित्याह– *अत आहेति*।। वेदान्तमध्यपठितानां कतिपयानां वाक्यानां देवतादिप्रतिपादनद्वारेणोपासनाविधिपरत्वे विरोधाभावेऽपि न ब्रह्मप्रतिपादकानां कृत्स्नवेदान्तानामुपासनाविधिशेषत्वम्; अद्वितीयब्रह्मण्युपास्योपासकादिभेदसिद्ध्यधीनोपासनाया अयोगादिति भावः। *वेदान्तानां तद्विरोधित्वादिति*।। उपक्रमोपसंहारादिभिरद्वितीयब्रह्मपरत्वेनावगतानां वेदान्तानामुपास्योपासकादिभेदगर्भोपासनाविरोधित्वादित्यर्थ इत्यर्थः। यदवादि पूर्ववादिना– *''न क्वचिदपि वेदवाक्यानां विधिमन्तरेणार्थवत्ते'' ति*।। तत्र वक्तव्यम्–यदि वेदान्ता विधिमन्तरेण न प्रमाणम्, तर्ह्यर्थवादा अपि तथा स्युरिति किं प्रतिबन्द्यभिमता? किं वा वेदवाक्यस्य सिद्धपरस्यान्यत्रादर्शनाद्व्याप्त्यभावेन न

वेदान्तानां सिद्धपरत्वमिति? तत्राद्यमर्थवादाधिकरणपूर्वपक्षं संगृह्णन् शङ्कते- *स्यादेतदिति*।। ''साऽरोदीद् इत्येवमादीनाम्'' इत्यनन्तरं निन्दार्थवादानामिति शेषः। *ननु*-कथमेषां निन्दार्थवादत्वमिति चेत्*उच्यते*; रुदतो यदश्रु अवशीर्यत, तद्रजतमभवत्, रजतमदक्षिण्यमभवत्, इति निन्दा। *तस्माद्='' बर्हिषि रजतं न देयम्'' इति निषेधात्। *ननु*- यत्फलीभूतप्रमाकरणम्, तदेव प्रमाणम्; फलीभूतप्रमा च हानोपादानप्रमैव, नोपेक्षणीयप्रमा, तथा चोपेक्षणीयप्रमाजनकानां '' सोऽरोदीत्'' इत्यादीनां न प्रमाणत्वमिति, अत आह- *नहीत्यादिना*।। *कृतम्=अलम्। *एतेषाम्=''सोऽरोदीत्' इत्यादीनाम्। प्रामाण्यमित्यनुषङ्गः। माऽस्तु तेषां विधिपरत्वेनैव प्रामाण्यम्, किन्तु स्वतन्त्रतयैव तदस्त्वित्यर्थः। निषेधविधेर्निन्दार्थवादसापेक्षत्वाद् निन्दार्थवादस्य च निषेधविधिसापेक्षत्वाद् निषेधविधिपरत्वेनैव तेषां प्रामाण्यमावश्यकमित्यभिप्रेत्याह-*अत आहेति*।। तदेतद्विशदयति- *स्वाध्यायाध्ययनेत्यादिना पुरुषार्थयन्त्र इत्यवगतमिति*।। अध्ययनविध्युपात्तनिखिलस्वाध्यायमध्येऽक्षरमात्रस्याप्यानर्थक्यायोगादिति भावः। तदेतदाह- * तत्र केनापीति*।। *प्रबन्धेनेति*।। ईदृशेन बहुलपदसन्दर्भेण प्रबन्धेनापुरुषार्थेन भवितुं न युक्तमित्यत्र किमु वक्तव्यमित्यर्थः। तथाच '' सोऽरोदीत्'' इत्यादेर्नोपेक्षणीयार्थकत्वमिति भावः। एवंच सति निन्दाद्यर्थवादानां वेदान्तानां चावश्यं विधिसापेक्षत्व-तदनपेक्षत्वाभ्यां स्वार्थबोधजननद्वारा मोक्षलक्षणपरमपुरुषार्थाप्रयोजकत्व- तत्प्रयोजकत्वाभ्याम् अन्यतश्च महतो भेदस्य विद्यमानत्वान्न प्रतिबन्दीत्यभिप्रेत्याह-*न च वेदान्तेभ्य इवेति*।। *पुरुषार्थः* इत्यनन्तरं परम इति शेषः। *एष पदसन्दर्भः* '' सोऽरोदीत्'' इत्यादिनिन्दाद्यर्थवादपदसन्दर्भः। *पुरुर्षार्थम्=अर्थावबोधलक्षणं जघन्यम्। उद्वीक्षमाणः=साकाङ्क्षः। निषेध-विधिसाकाङ्क्ष आस्ते इत्यन्वयः। निषेधविधिश्च निन्दासाकाङ्क्ष आस्ते इत्याह- *बर्हिषीति*। निषेधविधेर्निन्दानपेक्षत्वे बाधकमाह- *तेन ह्यन्यथेति*।। अन्यथा=निषेध्यनिन्दाभावे*, तेन=निषेधविधिना, *ततः=निषेध्यात्, चेतनो निवारयितुं न शक्य इति योजना*।। *ननु*- निषेध एव निषेध्यस्यानर्थहेतुत्वान्यथानुपपत्त्या निन्दां कल्पयिष्यति, नेत्याह- *तद्यदीति*।। अन्यथानुपपत्तित एव निन्दालाभे निषेधकस्य निशेषे निन्दायां च तात्पर्यकल्पनमङ्गीकृतं भज्येतेत्यर्थः। फलितमाह- *तत इति*।। *ननु* ''सोऽरोदीत्'' इति वाक्ये निन्दा न भाति, किंतु भूतार्थानुवाद इत्याशङ्क्य मुख्यार्थे प्रयोजनाभावाद् निन्दा लक्ष्यत इत्याह- *लक्ष्यमाणेति*। *नष्टाश्वदग्धरथवदिति*।। युद्धे कस्यचिद् रथिकस्य रथः स्थितः, अश्वा विनष्टाः; कस्यचिद्रथिकस्य त्वश्वाः स्थिताः, रथो दग्धः; एवं सति तयोर्युद्धकरणासामर्थ्ये प्राप्ते परस्परसापेक्षत्वेन विद्यमानरथेन विद्यमानानश्वान् संयोज्य परस्परान्वयेन रथारूढयोस्तयोर्युद्धकरणसामर्थ्यं दृष्टम्, तद्वत्'' सोऽरोदीत्'' इति, ''' बर्हिषि रजतं न देयम्'' इति च पदसन्दर्भयोर्लक्ष्यमाणनिन्दाद्वारेण परस्परापेक्षतया परस्परान्वयात् कार्यकारित्वमित्यर्थः। वेदान्तेषु तु नैवमित्याह- *नत्वेवं वेदान्तेष्विति*।। कुत इति? अत आह- *पुरुषार्थापेक्षेति*।। *अनपेक्षादिति*। इतरानपेक्षादित्यर्थः। तथा च न विधिपरत्वं वेदान्तानामिति

भाव:। द्वितीयमाशङ्क्य निराकरोति– नन्वित्यादिना– अत आहेत्यन्तेन– ।। तच्च स्वत इत्युपपादितमिति*।। न्यायकणिकायामिति शेष:। *ननु*–प्रमया कार्येण प्रमाणानां तज्जनकत्वमनुमेयम्, तथा च कथं नानुमानगम्यमिति भाष्यम्? इत्याशङ्कते– *यद्यपीति*।। *एषाम्=वेदान्तानाम्। कार्यलिङ्गकानुमानं कार्यार्थापत्तिशब्दार्थ:। समाधत्ते– *तथापीति*।। *नापेक्षन्ते*।। वेदान्ता:, इति शेष:। *तेषाम्=बोधकानामित्यर्थ:।।

इति भामतीव्याख्यायामृजुप्रकाशिकायां वेदान्तानां ब्रह्मणि समन्वयनिरूपणं संपूर्णम्।

अथ नवमं वर्णकम्

ननु भूतार्थपरतेति।। नतु भूतार्थमात्रपरतेत्यर्थ:। तथा च न सिद्धार्थब्रह्ममात्रपरा वेदान्ता इति भाव:। किंच-इतोऽपि न सिद्धब्रह्ममात्रपरा वेदान्ता इत्याह- *अपिचेति*।। अव्युत्पन्नस्य शब्दादर्थप्रत्ययाजननादाह- *व्युत्पन्नस्येति*।। *तस्य=अर्थप्रत्ययस्य। *शब्देति*।। शब्दान्वय- व्यतिरेकाभ्यां शब्दजन्यत्वमवगम्येत्यर्थ:। *तद्विषयेति* ।। प्रत्ययविषयेत्यर्थ:। सङ्गतिर्वाचकत्वशब्दार्थ:। निश्चेतव्यं व्युत्पित्सुना तटस्थेनेति शेष:। प्रयोजकवृद्धोदितवाक्यश्रवणानन्तरं तटस्थ: प्रयोज्यवृद्धो व्यवहारमाकलयन् तद्व्यवहारेण तदीयं ज्ञानमनुमाय तज्ज्ञानस्य शब्दान्वय-व्यतिरेकाभ्यां शब्दजन्यत्वमवगत्य तस्य तज्ज्ञानविषयेऽर्थे शक्तिं गृह्णातीत्यस्य सकललोकसिद्धत्वादिति भाव:। एवं सति तत्र परकीयप्रत्ययेऽनुमेये सति तत्र वक्तव्यम्-किं नरान्तरवर्तितप्रत्ययस्सिद्धार्थमात्रप्रत्ययरूप:? किं वा कार्यप्रत्ययरूप:? आद्ये तदनुमापकलिङ्गमेव नास्तीति न तदनुमानमित्यभिप्रेत्याह- *न चेति*।। द्वितीये तु लिङ्गसद्भावात् कार्य एव शब्दस्य सङ्गतिग्रह आयात:, इति न सिद्धब्रह्ममात्रपरा वेदान्ता:, इत्यभिप्रेत्याह-कार्यप्रत्यये त्विति*।। लिङ्ग हेतुशब्दार्थ:।।

कारिकायाम्-''अज्ञातसङ्गतित्वेने''ति व्याख्याय शास्त्रत्वेनेत्येतद् व्याचष्टे- *अपिच वेदान्तानामिति*।। अस्तु वेदान्तानां शास्त्रत्वप्रसिद्धि:, तत: किमिति? अत आह- *प्रवृत्ति-निवृत्तिपराणां चेति*।। तत्र संमतिमाह- *यथाहुरिति*।। *एषाम्=वेदान्तानाम्। तथा च वेदान्तानां सिद्धब्रह्ममात्रपरत्वे शास्त्रत्वप्रसिद्धिव्याहते: कार्यपरत्वं वाच्यमिति भाव:। कारिकायाम्-''अर्थवत्तया'' इत्येतद् व्याकरोति- *अपिच न ब्रह्मस्वरूपेति*।। *एषाम्=वेदान्तानाम्। सिद्धब्रह्ममात्रपरत्वे वेदान्तानां कुतो नार्थवत्तेत्याशङ्क्य, निराकरोति- *न चेति*।। 'रज्युरियं न भुजङ्ग:' इति शब्दाद् रज्जुत्वभुजङ्गाभावत्वविशिष्टयोरैक्यवाक्यार्थतत्त्वनिश्चयाभावात् सिद्धान्तिमते रज्जुद्रव्यस्यारोपित-भुजङ्गभावस्वरूपरूपत्वेऽपि तदभावत्वानधिकरणत्वात्। अतो लक्षणयेत्युक्तम्। यद्यपि रज्जुरियमिति शब्दजन्यप्रतीत्यैव भयकम्पादिनिवृत्तिर्वक्तुं युक्ता; तथाऽपि रज्ज्वारोपितभुजङ्गभ्रमजन्यभय-

कम्पादेर्भुजङ्गाभावाभेदनिश्चयसाध्यत्वं वक्तव्यमिति तथोक्तम्। एवं ''तत्त्वमसि'' इति लक्षणाजन्यवाक्यार्थावगमाद् निवृत्तिर्न च भवति सांसारिकधर्माणामिति योजना। कुतो निवृत्तिर्न भवतीत्यत आह- *श्रुतवाक्यस्यापीति*।। *तेषाम्=सांसारिकधर्माणाम्। तस्माद्वेदान्तानां कार्यपरत्वेनैवार्थवत्तया केवलब्रह्मपरत्व उक्तविधयाऽर्थवत्त्वाभावाद् न केवलब्रह्मपरा वेदान्ताः। कारिकायां मननादिप्रतीत्या चेत्येतद् व्याचष्टे- *अपिच यदीति*।। वेदान्तश्रवणजन्यब्रह्मज्ञानवतोऽपि सांसारिकधर्मनिवृत्तिः, ततश्चार्थवत्तेत्युच्येत। तथा श्रवणानन्तरं मननादिविधिवैयर्थ्यं स्यात्। तस्मात् कार्यपरत्व एवार्थवत्त्वसंभवाद्विधेयप्रतिपत्तिविषयात्मलाभाय मननादिसंभवाच्चात्मप्रतिपत्तिविषयकार्यपरा एव वेदान्ताः, न केवलब्रह्मपरा इत्यर्थः। *ननु* कार्यपरत्वमुक्तं वेदान्तानाम्, किं तत्कार्यम्? तत्राह- *तच्च कार्यमित्यादिना- अपूर्वमिति चाख्यायत इत्यन्तेन*।।

ननु- प्रतिपत्तिविषयकं कार्यं चेत्, तदेवानुष्ठेयं स्यात् किमर्थं तर्हि प्रतिपत्त्यनुष्ठानम्? प्रतिपत्तेर्विधेयतया तदनुष्ठानं स्यादित्याशङ्क्य, स्वविषयप्रतिपत्तेरनुष्ठानं विना कार्यमेव न सिध्यतीति कार्यं स्वसिध्यर्थं स्वविषयप्रतिपत्त्यनुष्ठानमाक्षिपतीत्याह- *न चेति*।। कार्यं स्वशब्दार्थः। *ननु*- एतावताऽनुष्ठेयत्वेन ज्ञानसिद्धावपि वेदान्तानामात्मब्रह्मपरत्वाभावे कथमात्मसिद्धिरित्याशङ्क्याह- *यथा च कार्यमिति*।। *तन्निरूपणाय=ज्ञाननिरूपणाय। तादृशज्ञानविषयत्वसिध्यर्थं यदाक्षिप्यते, तद्विषयमेव कार्यमित्यत्र संमतिं वक्तुं तदेव कार्यमित्याह- *तदेव कार्यमिति*।। संमतिमाह- *यथाहुरित्यादिना*।। उपादीयत इत्यस्य विवरणम्- *आक्षिप्यत इति*।। *ननु*- कार्यं नियोगः, तद्विषयस्य ज्ञानस्य विधेयत्वमुक्तम्, ज्ञानद्वारा तद्विषयस्यात्मनो विधेयत्वमुक्तप्रायम्, तत्र ज्ञानस्य का नाम विधेयता? इत्यत आह- *विधेयता चेति*।। अत्र ज्ञानस्योपासनारूपत्वेन भावार्थतया कर्मतयाऽनुष्ठेयत्वमस्तीति भावः। तद्विषयस्यात्मनः का नाम विधेयतेति? अत आह- *तद्विषयस्यात्मनः स्वरूपसत्ताविनिश्चितिरिति*।। विधेयतेत्यनुषङ्गः। अज्ञातज्ञप्तिर्विधेयतेत्यङ्गीकारादिति भावः। *ननु* वाग्धेनूपास्त्यादाविवारोप्यस्य विधेयविशेषणत्वं किं न स्यादिति? अत आह- *आरोपितेति*।। 'ब्रह्माहमस्मी'ति ज्ञाने यादृगर्थो भाति, तद्भाव आरोपितो यस्य स तथोक्तः। *तस्य=अन्यस्य। निरूपकत्वे *तेन=प्रतिभासमानार्थेन। *तत्=ज्ञानं निरूपितं न स्यात्; अनारोपिततद्भावस्यैव तन्निरूपकत्वे संभवत्यारोपिततद्भावस्य तन्निरूपकत्वकल्पनायोगादिति भावः। उपसंहरति- *तस्मादिति*।।

स्वोक्तमर्थं भाष्यारूढं करोति- *तदेतत् सर्वमाहेति*।। *तस्येति=यूपस्येत्यर्थः। ''तक्षणादी'' त्यत्र अष्टाश्रीकरणमादिशब्दार्थः। एवमाहवनीयादयोऽपि ''यदाहवनीये जुहोति'' इति विहिते क आहवनीय इति वीक्षायां ''वसन्ते ब्राह्मणोऽग्नीनादधीत'' इत्यादिश्रुतिभिः संस्कारविशिष्टाग्निराहवनीय इति गम्यत इत्येवं

रूपेणाहवनीयादयोऽवगन्तव्या इत्यर्थः। कारिकोक्तं शास्त्रत्वेनार्थवत्तयेति हेतुद्वयं भाष्येण सङ्गमयति- *प्रवृत्ति-निवृत्तिपरस्येत्यादिना*।। *कार्य एवेति*।। अत एवार्थवत्त्वमित्यर्थः। ''तद्भूतानामि''ति भाष्यस्थसूत्रोदाहरणेन कार्यान्वितेऽर्थशब्दस्य सङ्गतिः, न सिद्ध इत्युक्तम्। भाष्ये-''आम्नायस्य'' इत्येतद्विहायेतरवाक्यैः प्रवृत्तिनिवृत्त्यादिपरस्य शास्त्रत्वमुक्तम्, तेन च सिद्धपरस्य न शास्त्रत्वमित्युक्तम्। भाष्ये ''दृष्टो हि तस्यार्थः कर्मावबोधनम्'' इत्यस्यार्थः- *तस्य=वेदस्य, *कर्मावबोधनम्=नियोगज्ञानम्, दृष्टोऽर्थः=दृष्टं प्रयोजनमिति। ''चोदनालक्षणोऽर्थो धर्मः'' दृति सन्निहितसूत्रस्थचोदनाशब्दार्थमाह- *भाष्ये चोदनेति क्रियाया इति*।। तथा च प्रवर्तकवचनैकवाक्यत्वमेव सर्ववाक्यस्येति भावः। भाष्ये- *तद्भूतानां क्रियार्थेन समाम्नाय इति*।। अस्यार्थः- *तत्=तेषु पदार्थेषु भूतानां वर्तमानानां पदानां क्रिया=कार्य तदर्थत्वेन समाम्नायः=उच्चारणमिति। भाष्ये-''तस्य ज्ञानमुपदेशः'' इत्यत्र कार्यं तच्छब्दार्थः। एवं च कार्यपरत्वं वेदान्तानां स्थितम्, कार्यपरत्वं विधिपरत्वमित्यनर्थान्तरम्, कार्यं च नियोज्यमधिकारिणमनुष्ठातारमन्तरेण न स्वतन्त्रतया भवतीति नियोज्यभेदमाहेत्याह- *न च स्वतन्त्रं कार्यमिति*।। नियोगस्य स्वकीयत्वेन बोद्धा नियोज्यः कर्मणि स्वामी अधिकारी तत्रैव कर्ता अनुष्ठाता इति भेदः। ''स्वर्गकामो यजेत'' इत्यादिवद् ''अमृतत्वकामो जानीयात्'' इत्यश्रवणान्नियोज्यासिद्धिमाशङ्क्याह- *ब्रह्म वेदेति, रात्रिसत्रेति*।। चतुर्थे चिन्तितम्-''क्रतौ फलार्थवादमङ्गवत् कार्ष्णाजनिः''। ''प्रतितिष्ठन्ति ह वा एता रात्रीरुपयन्ति'' इति श्रूयते। तत्र रात्रिशब्देन ''आयुर्जुहोति'' इत्यादिवाक्यविहिताः सोमयागविशेषा उच्यन्ते। किमत्र स्वर्ग एवाधिकारिविशेषणम्? उत प्रतिष्ठेति संशयः। तत्र प्रतिष्ठाकाम इति कामपदसमभिव्याहारेणाश्रवणाद् विधिशक्तिलभ्यः स्वर्ग एवाधिकारिविशेषणम्, न च ''प्रतितिष्ठन्ती''ति वाक्यशेषबलात् प्रतिष्ठैवाधिकारिविशेषणं लभ्यत इति वाच्यम्; ''सन्देहे हि वाक्यशेषस्वीकारः, न निश्चये'' इत्यभ्युपगमात्। निश्चितश्चात्र सर्वाभिलषितस्वर्गोऽधिकारिविशेषणत्वेन; विधिसामर्थ्यात्। न चैवं ''प्रतितिष्ठन्ती''ति प्रतिष्ठाविषयश्रुतेर्व्याकोप इति वाच्यम्; तस्या अपि लक्षणया स्वर्गपरत्वकल्पनौचित्यात्। न च-रात्रिसत्रक्रतोः प्रधानत्वेनाङ्गत्वाभावात् सूत्रे कथं क्रतौ फलार्थवादमङ्गवदित्यङ्गफलार्थ-वादोदाहरणमिति-वाच्यम्; अङ्ग आर्थवादिकफलवदिहाप्यार्थवादिकं प्रतिष्ठाफलं न विवक्षितमित्येतावन्मात्र उदाहरणत्वान्न दोषः। एवं प्राप्ते अभिधीयते-''फलमात्रे यो निर्देशादश्रुतौ ह्यनुमानं स्यात्'' ''प्रतितिष्ठन्ती''ति प्रतिष्ठाफलस्य निर्देशात् प्रतिष्ठाफलमेवाधिकारिविशेषणम्, यत्तु-विधिशक्त्या स्वर्ग एवाधिकारिविशेषणमित्यनुमीयते-इति, तत्र; मुख्यार्थस्तुतिपदानुगुण्येन विधिशक्तौ पर्यवसितायामानुमानिकस्वर्गकल्पनायोगात्। तस्माद्वाक्यशेषस्थमेव प्रतिष्ठालक्षणं फलमित्येवंरूपेण रात्रिसत्रन्यायेन प्रकृतेऽपि ''ब्रह्मविदाप्नोति परम्'' इत्यार्थवादिकं ब्रह्मभवनलक्षणममृतत्वं

फलमित्यमृतत्वकामस्य नियोज्यस्य सिद्धिः। *ननु*-पिण्डपितृयज्ञन्यायेन स्वर्गकामस्येव नियोज्यस्यात्र कल्पनया प्रतिलम्भो भवत्वित्यत आह-*पिण्डपितृयज्ञन्यायेन त्विति*।। यद्यपि विश्वजिन्नायेनापि स्वर्गकामस्य नियोज्यस्य कल्पयितुं शक्यत्वाद् विश्वजिन्न्यायेनेत्येव वक्तुं युक्तम्, न पिण्डपितृयज्ञन्यायेनेति; तथापि विश्वजिति नैमित्तिकाधिकारे फलकल्पना कृत्वाचिन्तयेति पिण्डपितृयज्ञः स्थिरोदाहरणत्वेनोदाहृत इति द्रष्टव्यम्। *अर्थवादस्यासमवेतार्थतयेति*।। "ब्रह्म वेद ब्रह्मैव भवति" इत्यर्थवादस्याश्रूयमाणस्वर्गार्थकतया ब्रह्मभवनशब्देन श्रुतब्रह्मभवनपरित्यागेनाश्रुतस्वर्गे लक्षणायां वक्तव्यायामत्यन्तपरोक्षवृत्तिता स्यादित्यर्थः। एवं च श्रुतब्रह्मभावश्चामृतत्वमेवेत्यमृतत्वकामस्येत्युक्तं भाष्यकृतेत्याह-*इति ब्रह्मभावश्चेति*।। मोक्षोऽमृतत्वशब्दार्थः। तथा च पिण्डपितृयज्ञन्यायो नात्र प्रसरतीति भावः।

पिण्डपितृयज्ञन्यायश्चतुर्थे चिन्तितः-"पितृयज्ञः स्वकालत्वादनङ्गः स्यात्"। "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति" इत्यत्रानारभ्याधीतवाक्ये श्रुतः पिण्डपितृयज्ञः क्रत्वर्थः? पुरुषार्थो वा? इति संशये कर्मवाच्यामावास्याशब्दोऽपराह्णशब्दसमानाधिकृत इह कालपर एव। न च साधारण्यम्; काले रूढत्वात्, कर्मणि च तत्संबद्धे लाक्षणिकत्वात्। तस्मात् कर्मसमभिव्याहाराभावाद् विश्वजिन्न्यायेन स्वर्गकामनियोज्यकल्पनया स्वर्गफलं पिण्डपितृयज्ञ इति। ब्रह्मभवनस्यामृतत्वमुक्तम्, तत्रामृतत्वं कुत इति? अत आह-*अमृतत्वमिति*।। नित्यत्वमित्यर्थः। न च-कृतकत्वेनानित्यत्वमनुमातुं शक्यमिति-वाच्यम्; "सत्यं ज्ञानमानन्दं ब्रह्म" इति ब्रह्मणो नित्यत्वप्रत्यायकश्रुतिबाधेनानित्यत्वानुमानानवतारात्, कृतकत्वस्यासिद्धत्वाच्च। न च-मुक्तेः साध्यत्वात् कृतकत्वं न सिद्धमिति-वाच्यम्; ब्रह्मणोऽप्राप्तत्वभ्रमनिवृत्तिमात्रसाध्यत्वेनाप्युपपत्तेरिति भावः। *विध्यविषयत्वमिति*।। ब्रह्मज्ञानस्य तद्द्वारा ब्रह्मणश्चेति शेषः *भाष्ये* विलक्षणं ब्रह्मज्ञानं फलमिति। तथाचानुष्ठानापेक्षाद्विलक्षणत्वेऽनुष्ठानानपेक्षत्वमायातम्? इति न विधेयत्वमित्यर्थः। अङ्गीकारेण परिहरतीत्याह-*परिहरतीति*।। ज्ञानस्याविधेयत्वाङ्गीकारं स्फोरयति-*अत्र चात्मदर्शनं न विधेयमिति*।। यदि विधेयं तदाह-*तद्धीति*।। दृशेर्धातोरुपलब्धिवचनत्वाद् दर्शनम् उपलब्धिः। ज्ञानं तच्छ्रावणं वा प्रत्यक्षं वेति विकल्पार्थः। प्रत्यक्षमित्यत्रापि विकल्पयति-*प्रत्यक्षमपति*।। *अहमिति*।। अहंप्रत्ययरूपं लौकिकप्रत्यक्षं वेत्यर्थः। तत्र श्रावणमिति पक्षमाद्यं निरस्यति-*तत्र श्रावणं न विधेयमिति*।। कुत इति? अत आह-*स्वाध्यायेति*।। "स्वाध्यायोऽध्येतव्यः" इत्यध्ययनविधिनाऽधीतस्वाध्यायस्य विदित-पदपदार्थसङ्गतिकस्य शब्दश्रवणादात्मदर्शनस्य प्राप्तत्वेन प्राप्ते विध्ययोगादित्यर्थः। तत्र दृष्टान्तमाह-*धर्मश्रावणवदिति*।। श्रूयमाणधर्मप्रतिपादकशब्दजन्यज्ञानवदित्यर्थः।। प्रत्यक्षमिति* पक्षमाद्यं

निरस्यति- *नापीति नैसर्गिकत्वादिति*।। स्वभावसिद्धत्वादित्यर्थः। सिद्धे विध्ययोगादिति भावः। प्रत्यक्षमिति पक्षे द्वितीयं निरस्यति- *न चौपनिषदेति*।।

भावनयाऽऽधेयं जन्यं वैशद्यं यस्य प्रत्यक्षज्ञानस्य, तत्तथोक्तम्। *वाजिनवदिति*।। यथा आमिक्षार्थविहितदध्यानयनाद् वाजिनमप्रयोजकमानुषङ्गिकतया जायते, एवमदृष्टरूपामृतत्वाय विहितादुपासनात् साक्षात्कारो नान्तरीयकतया जायत इति दर्शनं न विधेयमित्यर्थः। चतुर्थे चिन्तितम्-''एकनिष्पत्तेः सर्वं समं स्यात्।।'' ''तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्'' इति श्रूयते। तत्र संशयः-किमामिक्षैव दध्यानयनं प्रयुञ्जीत? उत वाजिनमपीति? तत्र एकस्माद् दध्यानयनात् पयसः सकाशाद्वाऽऽमिक्षावाजिनयोर्निष्पत्तेरामिक्षादि सर्वं दध्यानयनप्रयोजकम्, नामिक्षामात्रमिति प्राप्ते राद्धान्तः- *संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात्*। तत्र दधिसंसृष्टपय एव देवतासंबन्धि निर्दिश्यते। तथा चाऽऽनयनसंस्कार्या दधिसंसृष्टपयोलक्षणाऽऽमिक्षैव दध्यानयनप्रयोजिका, न वाजिनमपि तत्प्रयोजकं स्वीकार्यम्। *ननु*-यदि दधिसंसृष्टं पय एव दधि-पयसो रूपभेदेऽमिक्षाभूत्वादध्यानयनं प्रयुञ्जीत, तर्हि वाजिनमपि दधिसंयुक्तं पय एवेति तदपि दध्यानयनं प्रयुञ्जीतेति चेत्, न; संसर्गरसनिष्पत्तेः=दधिसंसृष्टस्य पयसो यो रसः, तस्यामिक्षायामुपलम्भाद् रूपभेदेऽप्यामिक्षायां दधिसंसृष्टं पयोऽस्तीत्यनुमीयते; दधिसंसृष्टस्य पयसो यादृशो रसः स वाजिने नोपलभ्यते; वाजिनस्य कटुतिक्तरसत्वात्। तथा चात्र न तदनुमानम्, इत्यामिक्षैव दध्यानयनप्रयोजिका, न वाजिनमिति। *ननु*-उक्तविधया ज्ञानविधिनिषेधे कथं भाष्ये-''अत्रापरे प्रत्यवतिष्ठन्ते'' इत्यादिना प्रतिपत्तिविधिपरं वेदान्तशास्त्रमिति द्योतितम्? इत्याशङ्क्य प्रतिपत्तिशब्देनोपासनैव विवक्षितेत्यभिप्रेत्योपसंहरति- *तस्मादिति*।। *ननु*-आत्मोपासनाया एव विधेयत्वे कथं तर्हि ''द्रष्टव्यः'' इत्याद्या ज्ञानविधय इति? अत आह- *द्रष्टव्य इत्यादयस्त्विति*।। उपासनैव विधेया, इत्येतद् भाष्यकारेण कण्ठरवेणोक्तमित्याह- *तदुक्तं तदुपासनाच्चेतीति*।। आत्मा तच्छब्दार्थः। तदुपासनात्। विधीयमानादिति शेषः। हेतुद्वयविवरणेन पूर्वकृतेनोत्तरग्रन्थस्य व्याख्याततत्वमाह- *अर्थवत्तयेति*।।

तदेकदेशिमतमिति*।। ''अत्रापरे प्रत्यवतिष्ठन्ते'' इत्यादिना यदाऽऽचार्यैकदेशिमतमुपपादितं तदित्यर्थः। भाष्ये तद् व्याचष्टे- *नैकदेशिमतमिति*। एकदेशिमतं न युक्तमित्यर्थः। तत्र हेत्वाकाङ्क्षामुद्भावयति- *कुत इति*।। भाष्योक्तं हेतुमाह- *कर्म ब्रह्मविद्याफलयोर्वैलक्षण्यादिति*।। ''शारीरं वाचिकं मानसं चे'' त्यारभ्य ''तथा च श्रुतिरित्ये'' तदन्तस्य भाष्यस्य तात्पर्यार्थमाह- *पुण्याऽपुण्यकर्मणोरित्यादिना तात्पर्यार्थ इत्यन्तेन*।। सुखदुःखे इत्येतद्यथाक्रममन्वेति-पुण्यकर्मफलं सुखम्, अपुण्यकर्मफलं दुःखमित्यर्थः। आमनुष्यादाब्रह्मलोकात् सुख-तारतम्यमुक्तं भाष्यकृता, तत्र सुखतारतम्यशब्दार्थमाह- *सुखतारतम्यमधिकाधिकोत्कर्ष इति*।। ''दुःखतारतम्यदर्शनादि'' त्युक्तं भाष्ये, तत्र दुःखतारतम्यमपि

मनुष्यलोकमारभ्यावीचिलोकादधिकाधिकोत्कर्ष एवेत्यभिप्रेत्याह- *एवमिति*।। अस्तु, एतावता किमिति? अत आह- *तच्चेति*।। उक्तविधर्वा तारतम्येन विद्यमानं सुखं दु:खं च सर्वमित्यर्थ:। कर्मविद्याफलं निरुक्तं. सुखदु:खं सर्वं कार्यमनित्यं चेत्युक्त्वा ततो विलक्षणं ब्रह्मविद्याफलमित्याह- *आत्यन्तिकं त्वित्यादिना*।। आत्मैव ब्रह्मेत्यात्मज्ञानस्य फलम्; ब्रह्मज्ञानस्य फलमित्यर्थ:। *ननु*-अशरीरत्वस्य ब्रह्मभावलक्षणस्यासाध्यत्वात् कथं ब्रह्मज्ञानफलत्वम्? तत्राह- *तद्धि फलमिव फलमिति*।। तत्र हेतुमाह- *अविद्येति*।। ब्रह्मज्ञानसाध्याविद्यापनयमात्रेणेत्यर्थ:।

ननु- *वेदान्तानामुपासनाविधिपरत्वनिराकरणे प्रकृते सति, अप्रकृतमन्यदेवेयता ग्रन्थेन कथमुक्तमिति? अत आह-एतदुक्तं भवतीत्यादिना*।। वेदान्तगम्या आस्थीयताम्, तावता किमित्यत आह- *सा चेति*।। नित्य-शुद्ध-बुद्ध-ब्रह्मात्मस्वरूपतेत्यर्थ:। तथा च फलाभावान्नोपासनाविधिपरत्वं वेदान्तानामिति भाव:। *ननु*-उपासनाविधे: कथं फलाभाव:? अन्यदेव फलं भविष्यतीति चेत्, तत्र वक्तव्यम्-किमनाद्यविद्यापिधानापनय: फलम्? किं वा विद्योदय:? अथवा विश्वजिन्यायात् स्वर्ग: फलम्? आद्यं दूषयति- *नापीति*।। तस्य=अविद्यापिधानपनयस्य। *स्वाविरोधीति*।। अविद्याविरोधीत्यर्थ:। *आविर्भावादिति=जननादित्यर्थ:। तथा च नोपासनाविधिफलत्वमविद्यापिधानापनयस्येति भाव:।। द्वितीयं निरस्यति- *नापि विद्योदय इति*।। *तस्यापि=विद्योदयस्यापि। निदिध्यासनमुपासनाशब्दार्थ:। शङ्कते--उपासनासंस्कारवदुपासनापूर्वमपीति* ।। *तथाचोपासनाविधिरिति* शङ्काभिप्राय:। *ननु* चित्तस्यापूर्वसहकारिकत्वे कथं विद्योदयलक्षणदृष्टफलकर्त्वामिति? अत आह-- *दृष्टं च खल्विति*।। ऐहिकमपि दृष्टमपि नैयोगिकमपूर्वजं फलं दृष्टं खल्वित्यन्वय:। क्व दृष्टमित्याशङ्क्य, तदुदाहरति- *यथा चित्रेति*।। पशुसस्यसंजीवनयोर्दृष्टयोश्चित्रा-कारीरीविनियोगफलत्वादित्यभिप्राय:। समाधत्ते- *न गान्धर्वेति*।। यथा षड्जादिसाक्षात्कारेऽपूर्वानपेक्षाया गान्धर्वशास्त्रोपासनाया: सामर्थ्यम्, तथा ब्रह्मभावसाक्षात्कारेऽपूर्वानपेक्षाया एव वेदान्तार्थोपासनाया: सामर्थ्यान्नोपासनाविधिरिति भाव:। एवं च सति फलितमाह- *तथा चेति*।। *अमलभावं प्रति=अमृतत्वं प्रति; मोक्षं प्रतीति यावत्* । तत्कार्यम्=उपासनाकार्यम्, उपासनानियोगम्; अपूर्वमिति यावत्। तत्कर्तव्यत्वमवबोद्धुं नार्हतीत्यर्थ:। इतीति हेतौ। यतो नावबोद्धुमर्हति, अत उपासनासंस्काराहितचित्तजन्यात्मसाक्षात्कारपूर्वकममृतत्वमिच्छन् विधित उपासनापूर्वकं करोतीति विप्रतिषिद्धं व्याहतमित्यर्थ:। तथा च विध्ययोगाद् अपूर्वं न साक्षात्कारोपयोगीति भाव:। अपूर्वं चेद् न साक्षात्कारोपयोगि, तर्ह्युपासनाक्रियैव तदर्थं विधीयताम् नेत्याह- *न च तत्काम इति*।। अमृतत्वं तच्छब्दार्थ:। *क्रियामेव=उपासनाक्रियामेव। तस्या:=उपासनाक्रियाया:*। मानान्तरादेव=अन्वय-व्यतिरेकसध्रीचीनप्रत्यक्षादेवेत्यर्थ:। *तत्साधनत्वप्रतीते:*।। गान्धर्वशास्त्रोपासनाक्रियाया अन्वय-व्यतिरेकाभ्यां षड्जादिसाक्षात्कारसाधनत्वस्य दृष्टत्वाद् वेदान्तशास्त्रार्थोपासनाया अपि तथात्वात् साक्षात्कारहेतुत्वाद् अन्वय-व्यतिरेकसिद्धे विध्ययोगादात्मोपासनाविधिवैयर्थ्यमित्यर्थ:। *ननु*-

अवघातस्यान्वय-व्यतिरेकाभ्यां तुषविमोकसाधनत्वेऽप्यवघाते विधिर्दृश्यते-''व्रीहीनवहन्यात्'' इति, तद्वद् अत्रास्त्वित्यत आह- *न चावघातेति*।। *अन्यतोऽनवगतेरिति*।। तथा च तत्र विधिर्युक्त इति भावः। *ननु*-अवघातवद् उपास्तावप्यस्तु नियमापूर्वम्, नेत्याह- *न च ब्रह्म भूयादिति*।। यथा-अवघातादिस्थले नियमापूर्वसाध्यं परमापूर्वमस्ति, तथा नेहनियमापूर्वसाध्यं परमापूर्वमस्ति; अतो नात्र विधिसंभव इत्यर्थः। तृतीयं दूषयति- *विश्वजिन्न्यायेनेति*।। ''विश्वजिता यजेत'' इति श्रूयते-तत्रैवंविधकामोऽधिकारीति न श्रूयत इत्यधिकार्याकाङ्क्षा। न च-सामर्थ्यलिङ्गाद् प्रकरणाद्वा तत्राधिकारिकल्पनमिति-वाच्यम्; निषेध एव प्रवृत्तक्रियस्य सामर्थ्यादधिकारित्वकल्पनात्, यथा ''न सुरां पिबेत्'' इत्यत्र प्रवृत्तसुरापानक्रियस्य सामर्थ्यादधिकारित्वकल्पनम्, अङ्गेष्वेव प्रकरणादधिकारित्वकल्पनम्; यथा ''समिधो यजति'' इत्यादौ दर्श-पूर्णमासप्रकरणात् स्वर्गकामस्याधिकारित्वकल्पनम्। न चात्र प्रकरणात् सामर्थ्याद्वाऽधिकारिकल्पनम्, इत्याधिकार्याकाङ्क्षायां संशयः-अधिकार्यध्याह्रियताम्? नवा? इति। तत्र लोके 'द्वारमि' त्यादौ क्रियया विना द्वारमिति कर्मकारकाभिधानापर्यवसानात् 'पिधेही'ति क्रियाध्याहारो युक्तः, इह तु यजिक्रियादिविषयेण यागेन कार्यस्यान्विताभिधानपर्यवसानाद् यागः कार्यः कृतिविषय इत्यन्विताभिधानपर्यवसानात्, अनध्याहारे प्राप्ते-उच्यते अत्राप्यभिधेयापर्यवसानद्वारा कार्यस्यान्विताभिधानापर्यवसानमेव। तथाहि-कार्यं हि साध्यत्वेन कृतिनिरूप्यम्, कृतिश्च नरव्यापाररूपा। सा च कृतिर्यथा स्वसाध्यधात्वर्थनिरूप्या, एवं स्वाश्रयनरनिरूप्या च भवति। एवंच कृतेः कर्ताऽपि कार्ये कृतिद्वारा सम्बन्धत्वेन निरूपकः, इति नरमन्तर्भाव्यैव नियोगधीः न चासावबुध्वात्मनः कार्येण सम्बन्धं स्वतस्तेन सम्बध्यते। स्वसम्बन्धिकार्यबोद्धा च नियोज्यः, इति सोऽध्याहार्य इति स्थिते, चिन्ता-किं सर्वेषामध्याहारः? उतैकस्येति? तत्राविशेषात् सर्वेषामध्याहारे प्राप्ते, उच्यते-एकेनैवाऽऽकाङ्क्षाशान्तेरेकस्यैवाध्याहार इति। एवं स्थिते, पुनर्विचारः-किं यस्य कस्यचिद् नियोज्यस्याध्याहारः? उत स्वर्गकामस्येति? तत्राविशेषादनियमः, इति प्राप्ते, उच्यते-''सः स्वर्गः स्यात् सर्वान् प्रत्यवशिष्टत्वात्।।'' स्वर्गकाम एवाध्याहार्यः। स्वर्गकामाध्याहार एवोचितश्च; पुरुषाणां सुखाभिलाषित्वात्, दुःखनिवृत्तेरपि तत्रैवान्तर्भावात्। दुःखनिवृत्तिस्तु न सुखाविनाभूता; सुषुप्तावस्थां सत्यामपि सुखजन्मादर्शनात्, अनवच्छिन्नस्य च सुखस्य स्वर्गत्वात्, तस्य च सर्वसुखविशेषान् प्रत्यवशिष्टतवात्, विशेषे च मानाभावात् स्वर्ग एव नियोज्यविशेषणं स्यादिति। कृत्वाचिन्तेयम्। ''यः सत्रायाऽवगुरते स विश्वजिता यजेत'' इति श्रूयते। न च तत्राधिकारिविरहः; सत्रप्रवृत्तस्यावगोरणोपरमे निमित्ते प्रायश्चित्ततया विहितत्वेन साधिकारित्वात्। अधिकारी चोक्तविधया स्वर्गकाम एवेति। सोऽयं विश्वजिन्न्यायः। न चानेन न्यायेन स्वर्गफलकल्पनमत्र युक्तम्; स्वर्गस्य सातिशयत्वेन क्षयिष्णुत्वेन चात्मोपासनाफलत्वायोगात्, आत्मोपासनावादिनाप्युपासनाया ब्रह्मभावलक्षणमोक्षफलकत्वस्य वक्तव्यत्वात्। न च ब्रह्मभावस्तस्याः फलं संभवति; नित्यत्वादकार्यत्वाच्चेत्युक्तम्, तथा च

फलाभावान्नोपासनाविधिसंभवः। तदेतदुपसंहरति- *तस्मादिति*।। अनुमानं न्यायशब्दार्थः। विमतं मोक्षाख्यमशरीरत्वम्, नित्यम्, अनुष्ठेयफलविलक्षणत्वात्; संप्रतिपन्नवदित्यर्थः। अथवा विमतमशरीरत्वम्, नित्यम्, स्वाभाविकत्वात्। तत्र व्याप्तिप्रदर्शनपूर्वकमुदाहरणमाह- *यत्किल स्वाभाविकं तन्नित्यम्, यथा चैतन्यमिति*।। उपनयप्रदर्शनपूर्वक्रं निगमनमाह- *स्वाभाविकं चेदमिति*।। अर्थान्तरवारणं दर्शयति- *तत्र नित्यमित्युक्ते मा भूदस्य परिणामिनित्यतेत्याहेत्यनेन*।। *ननु* -परिणामिनित्यता किमर्थं व्यवच्छेद्या? सैव नित्यताऽस्यास्त्वित्यत आह- *परिणामिनित्यता हीति*।। अशरीरस्य ब्रह्मणो निरवयवत्वाद् निर्विकारत्वाच्च न परिणामितेति, नास्य परिणामिनित्यता पारमार्थिकीत्यर्थः। भङ्ग्यन्तरेणाप्यपारमार्थिकत्वमुपपादयति- *तथाहीति*।। परमतेऽशरीरस्य ब्रह्मणः परिणामिनित्यतां वदता ब्रह्म प्रपञ्चरूपेण परिणमत इति वाक्यम्; तत्र किं तद् ब्रह्म सर्वात्मना परिणमते? एकदेशेन वा? इति विकल्पयति- *तत्सर्वात्मनेत्यादिना*।। आद्ये दूषणमाह- *सर्वात्मना परिणाम इति*।। ब्रह्मस्वरूपत्वं तत्त्वशब्दार्थः। क्षीरस्य सर्वात्मना दध्याकारेण परिणामे क्षीरत्वव्याहतिवदित्यर्थः; परिणामस्य पूर्वरूपपरित्यागेन रूपान्तरावाप्तिरूपत्वादिति भावः। द्वितीयं दूषयति- *एकदेशेति*।। स इति*।। परिणममान एकदेश इत्यर्थः। तत एकदेशान्तरायेत्यर्थः। *तस्येति*।। एकदेशान्तरस्येत्यर्थः। तदेव द्रढयति- *नहीति*।। न च-एकदेशान्तरे ब्रह्मणोऽपरिणाम एवास्त्विति-वाच्यम्; त्वदुक्तपरिणामिनित्यताव्याहतिप्रसङ्गादिति भावः। अभेदपक्षं दूषयति- *अभेदे वेति*।। एकदेशान्तरस्य परिणममानभिन्नत्वे तस्यापि परिणममानस्वरूपत्वात् कथं न सर्वात्मना परिणाम इत्यर्थः। तर्हि भिन्नाभिन्नमस्त्विति शङ्कते- *भिन्नाभिन्नमिति*।। प्रपञ्चरूपेण परिणममानभिन्नत्वात् परिणामिनित्यताभिन्नत्वाच्च न तत्त्वव्याहतिरिति शङ्काभिप्रायः। कार्यप्रपञ्चरूपेण परिणममानाभिन्नत्वं चेत्युक्त्वा कार्यप्रपञ्चात् परिणममानब्रह्मणो भिन्नत्वमभिन्नत्वं चोक्तप्रायम्। तदेव स्पष्टयितुं प्रतिपादयति- *तथाहीत्यादिना-अत्रोच्यत इत्यन्तेन*।। *तदेव=प्रपञ्चात्मकं कार्यमेव, *कारणात्मना=कारणीभूतब्रह्मात्मना, अभिन्नम्। कार्यगो-घटादिविविधप्रपञ्चात्मना तु भिन्नमित्याह- *भिन्नं च कार्यात्मनेति*।। तत्र दृष्टान्तमाह- *कटकादय इवेत्यादिना-भिन्नाश्च कटकाद्यात्मनेत्यन्तेन*।। परस्परविरुद्धयोर्भेदाभेदयोरेकत्रावस्थानमयुक्तम्, इत्याशङ्क्य निराकरोति- *न चेति*।। विरोध एवासिद्ध इति तन्निराकरणमाह- *विरुद्धमिति*।। *नः क्व संप्रत्यय इति*।। यदिति*।। यद्विरोधाख्यं वस्तु प्रमाणविपर्ययेण वर्तते, अप्रामाणिकत्वेन तिष्ठतीत्यर्थः। तथा च भेदाभेदयोर्विरोधस्याप्रामाणिकत्वाद् न विरोधोऽस्तीति भावः। तयोर्विरोधो न प्रामाणिकः, प्रत्युत भेदाभेदयोरविरोध एव प्रामाणिक इत्याह- *यत्त्विति*।। यद्वस्तु त्वित्यर्थः। *तस्य=तद्वस्तुनः। अस्त्वेवम्, भेदाभेदविरोधस्य प्रमाणसिद्धत्वे किमायातमिति? अत आह- *कुण्डलं सुवर्णमिति*।। तदेवाह- *तत्र हीति*।। किं कुण्डलसुवर्णयोरात्यन्तिकाभेदः? आत्यन्तिकभेदो वा? आद्य आह- *आत्यन्तिकेऽभेद इति*।।

कुण्डल-सुवर्णयोरत्यन्ताभेदे कुण्डलं कुण्डलमिति सुवर्णं सुवर्णमिति च कुण्डलं सुवर्णमितिवत् सामानाधिकरण्यप्रत्ययस्य द्विरवभासत्वप्रसङ्ग इत्यर्थः। तथा च तयोरत्यन्ताभेदे यथा कुण्डलं कुण्डलमिति सुवर्णं सुवर्णमिति च प्रत्ययो नास्ति, तथा कुण्डलं सुवर्णमिति सामानाधिकरण्यप्रत्ययः सकलजनसिद्धो न स्यादिति तात्पर्यार्थः। द्वितीयं दूषयति- भेदे वाऽऽत्यन्तिक इति*।। अत्यन्तभेदे सामानाधिकरण्यप्रत्ययाभावे दृष्टान्तमाह- *गवाश्ववदिति*।। नहि गौरश्व इति सामानाधिकरण्यप्रत्ययोऽस्तीति भावः। *ननु*-भेदपक्षे कुण्डल-सुवर्णयोराधाराधेयभावं वैयाधिकरणकत्वं वा पुरस्कृत्य सामानाधिकरण्यप्रत्ययोऽस्त्वित्यत आह- *आधारेत्यादिना*।। आधाराधेयभाव एकाधिकरणकत्वे वा सामानाधिकरण्यप्रत्ययाभावमेव दर्शयति- *नहि भवतीत्यादिना-सोऽयमित्यतः प्राक्तनेन ग्रन्थेन*।। तथा चात्यन्ताभेदेऽत्यन्तभेदे वा सामानाधिकरण्यप्रत्ययायोगाद् विद्यमानोऽसंन्दिग्धोऽबाधितः 'कुण्डलं सुवर्णमि'ति सामानाधिकरण्यप्रत्ययः कुण्डल-सुवर्णयोर्भेदाभेदौ व्यवस्थापयतीत्याह- *सोऽयमिति*।। अस्त्वन्यत्र भेदाभेदौ, प्रपञ्च-ब्रह्मणोर्भेदाभेदप्रतिपादने किमायातमिति? अत आह- *तथा चेति*।। सद्रूपस्येत्यनन्तरं ब्रह्मण इति शेषः। *सर्वत्रानुगमादिति*।। *सद्घोघटादि सामानाधिकरण्यप्रत्ययादिति भावः*।। सद्रूपकारणरूपेणाभेदममिधाय कार्यरूपेण भेदमाह- *भेदः कार्यरूपेणेति*।। अत्र संमतिमाह- *यथाहुरिति*।। *कार्यरूपेण=गो-घटादिविविधप्रपञ्चकार्यरूपेण। *कारणात्मना=सद्रूपेण। तत्र दृष्टान्तमाह- *हेमात्मना यथा भेद इत्यादिना*।। सिद्धान्ती परकीयं भेदाभेदपक्षं प्रतिपाद्य दूषयितुमुपक्रमते- *अत्रोच्यत इति*।। यद्यपि स्वपक्षेऽपि भेदाभेदौ स्त एव; तथाऽपि स्वपक्षेऽभेदः पारमार्थिकः, भेदोऽपारमार्थिकः; परपक्षे तु भेदाभेदावुभावपि पारमार्थिकौ, अतस्तन्निराकरणमुच्यत इत्यर्थः। भेदे शङ्कते- *परस्परेति*।। दूषयितुं विकल्पयति- *किमयमिति*।। *अयम्=परस्पराभावलक्षणो भेदः। द्वितीयमनूद्य दूषयति- *न चेदित्यादिना-न भेद इत्यन्तेन*।। तथा च कटक-हाटकयोर्भेदव्यवहारो लोकसिद्धो न स्यादिति भावः। आद्यमनूद्य दूषयति- *अस्ति चेदित्यादिना-नाभेद इत्यन्तेन*।। समानसत्ताकयोर्भेदाभेदयोरेकत्र विरोधादिति भावः। अभेदो भावः, भेदोऽभावः, तयोरविरोधमाशङ्क्य निराकरोति- *न चेति*।। *सहासंभवादिति*।। समानसत्ताकयोर्भेदाभेदयोरेकत्र विरोधादित्येतद् न विस्मर्तव्यमिति भावः। समानसत्ताकयोरपि भेदाभेदयोरेकत्राविरोधेन संभवमाशङ्क्याह- *संभवे वेति*।। कटक-वर्धमानकयोर्भेदाभेदसंभवे वेत्यर्थः। आभरणविशेषो वर्धमानकशब्दार्थः। *तत्त्वेन=कटक-वर्धमानकत्वेन; कटकाभिन्नहाटकाभिन्नत्वाद् वर्धमानकस्येति भावः। अभेदप्रसङ्गे स्वयं हेतुमाह- *भेदस्येति*।। कटक-वर्धमानकयोर्भेदेऽप्यभेदस्य तदविरोधवादिना त्वया वक्तुं शक्यत्वादित्यर्थः। इतोऽपि कटक-हाटकयोर्न समानसत्ताकौ भेदाभेदावित्याह- *अपिचेति*।। न भिद्येरन्निति*।। हाटकाभिन्नमुकुट-कुण्डलादय इत्यर्थः। हेतुमाह- *कटकस्येति*।। फलितमाह- *तथा चेति*।। वस्तुसदित्यनन्तरं स्यादिति शेषः। तत्र हेतुमाह- *अभेदस्येति*।। अभेदप्रतीतिमति विरोधेन

भेदस्याप्रतिभासनादित्यर्थः। अविरोधे कटकत्वेन मुकुट-कुण्डलादेरभेदप्रसङ्ग इत्युक्तदोष इति भावः। मुकुटकुण्डलादेः कटकत्वेन भेदं शङ्कते-*अथेति*।। *तेन तु=कटकत्वेन तु। उक्तशङ्कामपनयति-*यदीति*।। *अयम्=कटकः। ''नानुवर्तेते'' त्यतः प्राग् हाटकवदिति शेषः। कथं नानुवर्तेत?=अनुवर्तेतैवेत्यर्थः। यदि नानुवर्तेत तदाह-*नानुवर्तते चेदित्यादिना*।। *अभिन्न इति*।। कटक इति शेषः। *ये हीति*।। *ये हि=कटकादयः, *यस्मिन्=हाटके, कुण्डलादिष्वनुवर्तमाने सत्येव व्यावर्तन्ते ते=कटकादयः। ततः=हाटकात्, भिन्ना एवेत्यर्थः। अभेदे हाटकवत् कुण्डलादिषु तेषामवर्तमानता स्यात्। तथा च भिन्न एवेति भावः। दृष्टान्तमाह-*यथेति*।। सूत्रे कुसुमेष्वनुवर्तमानेऽपि कुसुमप्रभेदाः कुसुमेषु नानुवर्तन्ते, अतः सूत्राद् भिन्नाः कुसुमप्रभेदा यथा, यथेत्यर्थः। दृष्टान्तमभिधाय स्वयं दार्ष्टान्तिकमाह-*नानुवर्तन्ते चानुवर्तमानेऽपि हाटके कुण्डलादिषु कटकादय इति*।। यद्वा-योजयति दार्ष्टान्तिकं-*ये हीत्यादिना*।। पूर्वं सामान्यतो व्याप्तिपूर्वमभिहितमिदानीं विशेषतोऽभिधीयत इति न पौनरुक्त्यमिति द्रष्टव्यम्। उपसंहरति-*तस्मादिति*।। *तेऽपि=कटकादयोऽपि, मुकुट-कुण्डलादिषु हाटकानुवृत्त्या सह भिन्नकटकानुगमेन तदभेदस्वीकारे तद्वदेव सर्वत्र सत्तानुगमात् सत्तावदयःकनका भिद्यन्ते; अभेदे बाधकसद्भावात्। अभेदे बाधकमेवाह-* अपिचेत्यादिना*।। तस्य कनकस्य विशेषाः कुण्डलादयो न जिज्ञास्येरन्, इत्यन्वयः। तत्र हेतुमाह-*कनकादिति*।। अभेदे किमिति? अत आह-*तेषामिति*।। कनकाभेदे दूरात् कनके ज्ञाते *तस्य=कनकस्य, *तेषाम्=तदभिन्नकुण्डलादीनां च ज्ञातत्वात्, ज्ञाते जिज्ञासाभावाद् इत्यर्थः। कुण्डलादीनां कनकाद् भेदस्यापि सत्त्वात् तमादायाज्ञातत्वं जिज्ञास्यत्वं चेति शङ्कते-*अथेति*।। तर्हि तत्पक्षे कुण्डलादीनां कनकाभेदस्यापि सत्त्वात्तमादाय ज्ञातत्वमजिज्ञास्यत्वं च स्यादिति समाधत्ते-*नन्वभेदोऽपीति*।। प्रत्युत कुण्डलादीनां कनकाभेदे तेषां ज्ञानमेव युक्तम्, नापोद्यमित्याह-*प्रत्युतेति*।। कथं युक्तमित्याशङ्क्य, कारणसद्भावादिति वक्तुं कारणाभावात् कार्याभावमाह-*कारणाभाव इति*।। *औत्सर्गिक इति*।। बाधकाभावसिद्ध इत्यर्थः। प्रकृते च कार्याभावः कारणसत्तया बाधकेनापोद्यत इत्याह-*स चेति*।। ज्ञानलक्षणकार्याभाव इत्यर्थः। कारणसत्तामेवाह-*अस्तीति*।। अभेदे कारणसत्तामुपपाद्य ज्ञानलक्षणकार्यसत्तामाह-*कनके ज्ञात इति*।। ततः किमिति? अत आह-*इति तज्जिज्ञासेति*।। यद् ज्ञानम्, न तज्जिज्ञास्यं न पुनर्ज्ञातव्यं च; प्रयोजनाभावादित्यर्थः। तस्मात् कनके गृह्यमाणेऽपि कुण्डलादयो न गृह्यन्त इत्येव वक्तव्यमिति भावः। फलितमाह-*तेन यस्मिन्निति*।। करभादित्यनन्तरं भिद्यत इत्यनुषङ्गः। प्रकृतमाह-*गृह्यमाणे चेति*।। *तस्य=हेम्नः। *ननु* कुण्डलादीनां हेम्नो भेदे पूर्वोक्तसामानाधिकरण्यप्रतीत्यनुपपत्तिः; अत्यन्तभेदे सामानाधिकरण्यप्रतीत्ययोगादित्यभिप्रेत्य शङ्कते-*कथं तर्हीति*।। आधाराधेयभावं वा समानाश्रयत्वं वाऽऽदाय तत्प्रतीत्युपपत्तिमाशङ्क्य पूर्वोक्तं तन्निराकरणं स्मारयति-*नहीति*।। तथाचात्यन्तभेदोऽनुपपन्न इति शङ्काभिप्रायः। कुण्डलादिषु हेम्नोऽनुवृत्तादपि कुण्डलादीनां व्यावृत्तेः कुण्डलादीनां हेम्नः साकाशाद्

भेद् एव, अभेदे हेम्नि ज्ञाते कुण्डलादीनामपि ज्ञातत्वात् कुण्डलादीनां तद्विशेषाणां जिज्ञासा न स्यादिति पूर्वोक्तं समाधानं स्मारयति- *अथेत्यादिना-इत्युक्तम् इत्यन्तेन*।। *कथमिति*। अभेदपक्षे कथम्? न कथंचिदित्यर्थः। *''कथं तर्ह्युपपत्तिरि''ति पूर्ववादिना पृष्टे भेदाभेदयोः समानसत्ताकत्वे पूर्वोक्तविधया विरोधाभेदः पारमार्थिकः, भेदस्तु कल्पित इति स्वीकार्यमित्यभिप्रेत्य सिद्धान्त्युपसंहारव्याजेनाह- *तस्मादिति*।। अन्यतरस्मिन् अभ्युपेय इति*।। उक्तविरोधपरिहारायान्यतरस्मिन् कल्पितत्वेनाभ्युपेये सतीत्यर्थः। अभेदोपादाना भेदकल्पनेत्यत्र हेतुमाह- *भिद्यमानेति*।। तावता कथमभेदोपादानत्वं भेदकल्पनाया इति? अत आह-भिद्यमानानां चेति।। *प्रत्येकमेकत्वादिति*।। प्रत्येकमभेदत्वादित्यर्थः। न भिद्यत इत्यभेदः। अस्तु, एतावताऽपि कथं तदिति? अत आह- *एकत्वाभावे चेति*।। *ननु*-ऐक्यं विना भेदासिद्धौ भेदं विनाऽपि नैकत्वसिद्धिः इत्यन्योन्याश्रयमाशङ्कमानं भ्रान्तं प्रत्याह- *एकत्वस्येति*।। भेदग्रहस्यैकत्वप्रतियोगिग्रहाधीनत्वम्, एकत्वग्रहस्य च भेदग्रहाधीनत्वमित्यन्योन्याश्रयाभावायैवाह- *नायमित्यादिना*।। उपसंहरति- *तस्मादिति*।। एवंच भेदस्य भिद्यमानतन्त्रत्वात्, भिद्यमानानां च प्रत्येकमेकत्वात्, प्रत्येकमेकत्वस्य च कल्पितत्वात्, एकत्वस्याभेदरूपत्वात्, केवलाभेदतन्त्रत्वं भेदस्यायातमित्यभिप्रेत्याभेदस्य पारमार्थिकत्वम्, भेदस्य च कल्पितत्वम्। न च भेदस्यापि सत्यत्वम्; उभयोः सत्यत्वे समानसत्ताकयोस्तयोर्विरोधात्। अतो भेदस्यैव कल्पित्वमित्यभिसन्धिः। भेदस्याभेदकारणतन्त्रत्वेनाभेदकारणस्यैव सत्यत्वमुक्तम्, तत्र कारणसत्यतायां श्रुतिमाह- *तथा च श्रुतिरिति*।। ''यथा सोम्यैकेन मृत्पिण्डेन सर्वमिदं मृण्मयं विज्ञातं स्याद्वाचारम्भण-विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' इति श्रुतिः कारणसत्यतामाहेत्यर्थः। परमप्रकृतमुपसंहरति- *तस्मादिति*।। *ननु*-''कूटस्थनित्यमि''त्यत्र भाष्ये व्योमवदिति दृष्टान्त उक्तः, स चानुपपन्नः; अस्मन्मते व्योम्नः कार्यत्वेनानित्यत्वादित्याशङ्क्य, इमामेवानुपपत्तिं स्फोरयन् पररीत्याऽयं दृष्टान्त इत्याह- *व्योमवदितिचेत्यादिना-अनित्यत्वादित्यन्तेन*।। भाष्ये-**कूटस्थनित्यं सर्वविक्रियारहित नित्यतृप्तं निरवयवं स्वयंज्योतिःस्वभावमिति विशेषणानि दत्तानि।** तेषां विशेषणानां क्रमेण प्रयोजनमाह- *अत्र च कूटस्थनित्यमित्यादिना* तदेवमित्यतः प्राक्तनग्रन्थेन*।। ''प्राप्यकर्मतामि'' त्यनन्तरम्-'अपाकरोति' त्यनुषङ्गः। 'विकार्यकर्मतामि' त्यत्राप्यपाकरोतीत्यनुषङ्गः। एवं 'संस्कार्यकर्मतामि' त्यत्राप्यनुषङ्गो द्रष्टव्यः। संस्कार्यकर्मतापाकरणप्रकारमेवाह-- *व्रीहीणां खल्वित्यादिना*।। क्रियाधेयो नास्तीत्युक्तम्, तत्र हेतुमाह- *अनवयवत्वादिति*।। एतद् व्याचष्टे-- *अनंशत्वादित्यर्थ इति*।। *ननु* नित्यतृप्तमित्युक्ते कथं पुरुषार्थोक्तिः? दुःखरहितसुखस्यैव पुरुषार्थत्वादित्यत आह- *नित्यतृप्तमिति*।। दुःखरहिते सुखे लक्षणया तृप्तिपदप्रयोगे दृष्टान्तमाह- *यथेति*।। भाष्ये-''अनित्य एव त्वन्मते विमोक्षः स्यादि'' त्युक्तम्, तत् कथम्? मोक्षस्य नित्यत्वप्रतिपादकागमविरोधादित्याशङ्क्य निराकरोति- *न चागमविरोध इति*।। निराकरणमेवाह- *आगमस्येति*।। अक्रियानिष्पाद्यमोक्षाभिप्रायेणा-

गमस्योपपत्तेरित्यर्थः। इतोऽपि न नैयोगिको मोक्ष इत्याह- *अपिचेति*।। *ननु* तर्हि त्वन्मतेऽपि तत्त्वविद्यासाध्यत्वान्मोक्षस्यानित्यत्वप्रसङ्ग इत्याशङ्क्य, विद्याया दुःखात्माविद्याद्वयप्रतिबन्धमात्रनिरास एवोपयोगः, न स्वतो मोक्षासाधनत्वम्, नवाऽपूर्वोत्पादनद्वारा मोक्षसाधनत्वम्, न चात्र प्रमाणाभावः; श्रुतीनामेवात्र प्रमाणत्वादित्यभिप्रत्याह- *अविद्याद्वयेत्यादिना*।। *मोक्षसाधनत्वम्=मोक्षसाधनत्वव्यपदेशः। विद्यया प्रतिबन्धनिरासे चापरिच्छिन्नानन्दस्वभावस्य ब्रह्मण आविर्भावाद् मोक्ष इति भावः। *अस्मिन्नर्थे=प्रतिबन्धदुःखनिरासे विद्याया उपयोग इत्यर्थे। आचार्यस्वरूपमेवाह- *आचार्यस्तूक्तलक्षणः पुराण इत्यादिना*। *तेन हीति*।। उक्ताचार्यलक्षणलक्षितेनाक्षपादेन हीत्यर्थः। तथा च तद्वचनं प्रमाणमिति हृदयम्। तेन प्रणीतं सूत्रमेव पठति- *दुःखेति*।। *पाठापेक्षया कारणमुत्तरमिति*।। पाठापेक्षयोत्तरोत्तरं कारणं पूर्वपूर्व कार्यमित्यर्थः। न्यायसूत्रे दोषः=रागादिः, प्रवृत्तिः=कर्म। दार्ष्टान्तिकं वक्तुं दृष्टान्तमाह- *कफापाय इवेति*।। दार्ष्टान्तिकमाह- *जन्मापाय इत्यादिना*।। मिथ्याज्ञानस्वरूपमाह- *मिथ्याज्ञानं चेति*।। *सा चेति*। संसारनिदानभूताऽविद्या चेत्यर्थः। *नतु विद्याकार्य इति*।। मोक्ष इत्यनुषङ्गः। विद्या तच्छब्दार्थः। विद्याजनितापूर्वकार्यो वा मोक्षो न भवतीत्यर्थः। तथा च मोक्षस्य नानित्यत्वप्रसङ्ग इति भावः। *ननु* तत्त्वज्ञानाद् मिथ्याज्ञानापायमात्रस्य प्रकृतत्वात् तावतोऽक्षपादसूत्रस्योपन्यासो व्यर्थः, अक्षपादसंमतं च षोडशपदार्थतत्त्वज्ञानं नेह सम्मतम्; एतन्मते निर्विचिकित्सब्रह्मात्मैकत्वज्ञानस्यैव तत्त्वज्ञानत्वात्, अतोऽसङ्गतमेतदित्यत आह- *तत्त्वज्ञानादित्यादिना दृढीकृत इत्यन्तेन*।। अयमर्थ इति*।। तत्त्वज्ञानान्मिथ्याज्ञानापाय इत्यर्थः। तत्त्वज्ञानं चात्र ब्रह्मात्मैकत्वविज्ञानम्। तत्र शङ्कते- *स्यादेतदिति*।। यथास्थितवस्तुविषयं न भवति चेत्, किंरूपं तर्हि तदिति? अत आह- *अपित्विति*।। संपदादिरूपत्वे किमायातं तावता? इत्याशङ्क्य विधेयत्वमायातमित्याह- *तथा चेति*।। दृष्टान्तमाह- *यथेति*।। *विश्वदेवसाम्यादिति*।। विश्वेषां देवानामप्यनन्तत्वाद् मनसोऽप्यनन्तवृत्तिं मत्वा तदनन्तत्वेन विश्वदेवसाम्यं मनस इत्यर्थः। मनसो विश्वदेवसाम्यात् किमिति? अत आह- *मनसीति।। अनुचिन्तनमिति*।। *तच्च=संपद्रूपं विधेयमित्यर्थः। तेन किमिति? अत आह- *तेनेति*।। दृष्टान्तमुपपाद्य दार्ष्टान्तिकं स्पष्टमाचष्टे- *एवं चिद्रूपसाम्यादिति*।। जीवस्य चिद्रूपत्वाद् ब्रह्मणोऽपि चिद्रूपत्वात् चिद्रूपत्वेन जीवस्य ब्रह्मसाम्यमित्यर्थः। ततः किमिति? अत आह-ब्रह्मानुचिन्तनमिति*।। तत्=संपद्रूपं विधेयगोचर इत्यर्थः। तेन किमिति? अत आह- *तेन चेति*।। आरोप्यप्रधाना संपद् नालम्बनलक्षणाधिष्ठानप्रधाना। अध्यासस्त्वधिष्ठानलक्षणालम्बनप्रधानः, नारोप्यप्रधानः, इति संपदध्यासयोर्भेदो द्रष्टव्यः। तमिमं भेदमाह- *अध्यासे त्विति*।। आरोपिततद्भावस्येति*।। आरोपितस्तद्भावो यस्य, स तथोक्तः। तस्य जीवस्यानुचिन्तनम्, अध्यासरूपं विधेयमित्यर्थः। दृष्टान्तमाह- *यथेति*।। दृष्टान्तमभिधाय दार्ष्टान्तिकं पुनः स्पष्टयति- *एवमिति*।। संपद्रूपमध्यासरूपं च विधेयमभिधाय प्रकारान्तरमप्याह- *क्रियाविशेषयोगाद्वेति*।। संवर्गदर्शनं विधेयं किंचिदस्तीति शेषः। उदाहरति- *यथेति*।। "वायुर्वाव

संवर्गः'' इत्युक्तम्, तत् स्पष्टयति- *बाह्या खल्विति*।। बाह्यदेवतात्मको वायुः कथं संवर्ग इति? अत आह- *स हीति*।। वायुर्हीत्यर्थः। ''वह्न्यादीनि'' त्यत्रादिशब्दात् सूर्यचन्द्रापो गृह्यन्ते, ''संहृत्ये'' तस्य विवरणम् ''सवृज्ये''ति।। ''संवृज्ये'' त्यन्तरं वाशब्दो वाऽध्याहर्तव्यः। संवृज्य वेत्यर्थः। *आत्मनि स्थापयतीति*।। अतो वायुः संवर्ग इत्युच्यत इत्यर्थः। तत्र सम्मतिमाह- *यथा हीति*।। ''प्राणो वाव संवर्गः'' इत्युक्तम्, तत् स्पष्टयति- *अध्यात्मं च प्राणः संवर्ग इति*।। कथं संवर्ग इति? अत आह- *स हीति*।। प्राणो हीत्यर्थः। ''वागादीनी'' त्यत्रादिशब्देन चक्षुःश्रोत्रमनांसि गृह्यन्ते; अग्न्यादेरुपलक्षणत्वात्। सर्वाश्रयत्वं वायु-प्राणयोरुपास्यमित्याह- *सेयमिति*।। *दशाशागतम्=दशदिग्गतम्। संवर्गदृष्टान्तं निगमयति- *यथेति*।। दार्ष्टान्तिकमाह- *एवमिति*।। *बृंहणक्रियया=देहादिपरिणमनक्रियया। *त्रिष्वपि पक्षेषु=संपदध्यास-संवर्गदृष्टिपक्षेषु*त्रिष्वपीत्यर्थः। *आत्मदर्शनोपासनादय इति*।। *दर्शनम्=प्रमितिः। एतच्च प्रमाणज्ञानं विधेयमिति मतमवलम्ब्योक्तम्। आदिशब्दो दृष्टान्तभूतमनआद्युपास्त्यर्थः। *स्तुतशस्त्रवदिति*।। भेदलक्षणे स्थितम्-''स्तुतशस्त्रयोस्तु संस्कारोयाज्यावद्देवताभिधानत्वात्''। ''आज्यैः स्तुवते'' ''प्रउगं शंसति'' इति स्तुत-शस्त्रे समाम्नाते। आज्य प्रउगशब्दौ स्तोत्र-शस्त्रविशेषनाम्नी प्रगीतमन्त्रसाध्यं देवतादि् ्णसम्बन्धाभिधानं स्तोत्रम्, अप्रगीतमन्त्रसाध्यं शस्त्रम्। ते किं देवताप्रकाशनाख्यसंस्कारार्थत्वेन गुणकर्मणी? उतापूर्वार्थत्वेन प्रधानकर्मणी? इति संन्देहे-गुणसम्बन्धाभिधानाद् गुणिन्या देवताया अभिधानेन याज्यावत्क्रतूपयोगिदेवतास्मरणस्य दर्शनाद् गुणकर्मत्वे प्राप्ते-सिद्धान्तः; ''अपि वा श्रुतिसंयोगात् प्रकरणे स्तौति-शंसती क्रियोत्पत्तिं विदध्याताम्''। स्तुतिरिह विहिता श्रूयते-स्तौति-शंसती इति। स्तुतिश्च गुणाभिधानम्, न स्वरूपप्रकाशनम्, यथा-'विशालवक्षाः क्षत्रिययुवे'ति। यत्राभिधानविवक्षा, न तत्र स्तुतिं प्रतीमः; यथा यो 'विशालवक्षाः, तमानये'ति। तस्मात् स्तौति शंसती श्रौतार्थलाभाय प्रकरणेऽपूर्वोत्पत्तिं प्रति स्तोत्र-शस्त्रे विदध्याताम्, इति स्तोत्र-शस्त्रे अपूर्वार्थत्वात् प्रधानकर्मणी, एवमिहात्मोपासनं प्रधानकर्म, आत्मा तु भूतो भव्यशेष इति। आत्मोपासनं प्रधानकर्मेत्युक्तम्, संप्रति संस्कारार्थत्वेन क्रत्वर्थत्वेन वाऽऽत्मदर्शनं गुणकर्म वा भवितुमर्हतीत्याह- *संस्कारो वेति*।। तत्र दृष्टान्तमाह- *यथेति*।। दार्ष्टान्तिकमाह- *एवं कर्तृत्वेनेति*।। द्रव्यसंस्कारकस्य गुणकर्मत्वे जैमिनीयसूत्रमुदाहरति- *यैस्त्विति*।। *यैः=अवघातादिभिः, *द्रव्यं चिकीर्ष्यते=संस्कर्तुमिष्यते, * गुणस्तत्र प्रतीयेत=तत्र द्रव्ये गुणभूतं कर्म प्रतीयेतेत्यर्थः। ''स्यादेतदि'' त्यादिनेयता प्रबन्धेन या शङ्कोक्ता, तामपाकरोति- *अत आहेति*।। उक्तशङ्कापकरणं कुतः? इत्याकाङ्क्षामुद्भावयति- *कुत इति*।। भाष्योक्तेनोत्तरमाह- *सम्पदादिरूपे हि ब्रह्मात्मैकत्वविज्ञान इतीति*।। ''सम्पदादी'' त्यत्राध्यास आदिशब्दार्थः। संवर्गः संपच्छब्दार्थः; सम्पदध्यासानामारोपरूपत्वात् ''तत्त्वमसि'', ''अहं ब्रह्मास्मि'' इत्येवमादिवाक्यानां ब्रह्मणि समन्वयेन तज्जन्यब्रह्मात्मैकत्व-ज्ञानस्यानारोपरूपत्वाद् ब्रह्मण्यारोपरूपत्वे, ''भिद्यते हृदयग्रन्थिरि'' त्यादिना ब्रह्मज्ञानस्य

श्रूयमाणाविद्यानिवृत्तिफलकत्वस्यायोगाद् वस्तुतो जीवचिन्मात्रस्वरूपस्य ब्रह्मस्वरूपरूपत्वेन जीवचिन्मात्रे ब्रह्मभावस्यानारोप्यत्वाद् न संपदादिरूपं ब्रह्मात्मैकत्वविज्ञानमिति भावः। यत्तूक्तम्-''पत्न्यवेक्षितमाज्यं भवति'' इत्याज्यावेक्षणवदात्मदर्शनं गुणकर्मतया विधीयत इति, तद् विघटयति- *दर्शपूर्णमासप्रकरणे हीति*।। *तदङ्गभूतेति*।। दर्श-पूर्णमासाङ्गभूतेत्यर्थः। संस्कारकर्म संस्कारशब्दार्थः। *न कस्यचिदिति*।। न कस्यचित् क्रतोः प्रकरणे समाम्नातमित्यर्थः। अतः क्रत्वङ्गभूत आत्मन्यात्मदर्शनं गुणकर्मतया विधीयत इति यदुक्तम्, तदयुक्तमिति भावः। *ननु* ''आत्मा वा अरे द्रष्टव्यः'' इत्यादेः क्रतुप्रकरणानाम्नातत्वाद् मा भूत् प्रकरणबलात् क्रत्वङ्गभूतमात्मयाथात्म्यदर्शनं गुणकर्म, वाक्यबलाद् गुणकर्म स्यादित्याशङ्क्य, निराकरोति- *न चानारभ्येति*।। अनारभ्याधीतवाक्यमप्यत्र नेत्यर्थः। न च-''आत्मा वा अरे द्रष्टव्यः'' इति वाक्यमेवानारभ्याधीतवाक्यमिति-वाच्यम्; तस्यात्मप्रकरणपठितत्वेनानारभ्याधीतत्वाभावादिति भावः। अनारभ्याधीतवाक्यस्थले तु क्रतुशेषत्वमस्तीति दृष्टान्ततयोपपादयति- *यस्येति*।। दृष्टान्तमुपपाद्य दार्ष्टान्तिके तद्वैषम्यमाह- *एवमात्मेति*।। अत्र ''न चे'' त्यनुषज्यते।। तथाचात्मा। *एवम्=अव्यभिचरितक्रतुसम्बन्धेनेत्यर्थः। क्रतुसंबन्धशून्यस्य कस्यचिद्देवदत्तात्मनः संभवादिति भावः। *ननु* ''द्रष्टव्यः'' इति विधिः श्रूयते, अतो विधानादात्मदर्शनं गुणकर्मेत्याशयवानाशङ्क्य निराकरोति- *यद्यपीत्यादिना- *न गुणकर्मेत्यन्तेन*।। ''सुवर्णं हिरण्यं धार्यम्'' *इतिवदिति*।।

शेषलक्षणे स्थितम्-''अद्रव्यत्वात् क्रतुशेषः स्यात्।'' ''तस्मात् सुवर्णं हिरण्य धार्यं सुवर्णोऽस्य भ्रातृव्यो भवति'' इत्यनारभ्याधीते संशयः-किं शोभनवर्णहिरण्यधारणं क्रत्वङ्गम्? उत पुरुषकर्मतया प्रधानकर्मेति?

प्रधानकर्मत्वे फलस्य वक्तव्यत्वात्, तस्य च कल्पनीयत्वात्, अङ्गकर्मणः फलनैयत्याभावात् क्रत्वङ्गमेव। न च ''दुर्वर्णोऽस्य भ्रातृव्यो भवति'' इति वाक्यं भ्रातृव्यदौर्वर्ण्यं फलं श्रावयतीति फलसद्भावात् प्रधानकर्मैवेति-वाच्यम्; तद्वचनस्य ''एवं कामः'' इति कामवचनाश्रवणेन फलपरत्वाभावात्। न च-''प्रतिष्ठाकामो रात्रिसत्रं कुर्यात्'' इतिवत् भ्रातृव्यदौर्वर्ण्यकामः सुवर्णं हिरण्यं बिभृयात्'' इति विपरिणामो भविष्यति, अतः प्रधानकर्मैवेति-वाच्यम्; क्रत्वङ्गत्वेन गतिसंभवे विपरिणामत्वकल्पनायोगात्। रात्रिसत्रस्थले तु गत्यन्तराभावाद् विपरिणामकल्पनम्। तस्मादुक्तहिरण्यधारणं क्रत्वङ्गमिति प्राप्तम्। *अद्रव्यत्वात्=द्रव्य-देवतासम्बन्धराहित्याद् न स्वतन्त्रं कर्म, किंतु क्रतुशेष इति सूत्रार्थः।।

सिद्धान्तस्तु-''अप्रकरणे तु तद्धर्मस्ततो विशेषात्''।। तद्धर्मः=''तस्मात् सुवर्णं हिरण्यं भार्यम्'' इत्येवंजातीयं यतोऽप्रकरणे समाम्नातम्, अतो हिरण्यधारणं पुरुषधर्मः। *ननु* प्रकरणाधीतोऽपि

तद्धर्मोऽस्तीति चेत्, अस्तु यथा, अयं तु पुरुषधर्मः प्रकरणाधीतात् तद्धर्माद्विशिष्यते। अत एवोक्तं सूत्रे-''ततो विशेषादि''ति। तथा च प्रधानकर्मैव हिरण्यधारणम्, न क्रत्वङ्गम्, तथाऽपि यदि क्रत्वङ्गमित्युच्यते, तदा वक्तव्यम्-किम् ''आहवनीये जुहोति'' इति होमानुवादेनाहवनीयविधानवत् क्रत्वनुवादेन हिरण्यधारणं क्रत्वङ्गमित्युच्यते? किं वाऽव्यभिचरितक्रतुसंबन्धिहिरण्यधारणप्रतिपादकवाक्याद्धिरण्यधारणं क्रत्वङ्गमित्युच्यते? नाद्यः; क्रत्वनुवादेन हिरण्यधारणाविधानात्, न द्वितीयः; क्रत्वसंबन्धिहिरण्यधारणस्यापि लोके दर्शनादव्यभिचरितक्रतुसम्बन्धाभावात्, ''यस्य पर्णमयी जुहूर्भवति'' इत्यत्र त्वव्यभिचरितक्रतुसम्बन्धिजुहूद्वारा पर्णतायाः क्रतुसम्बन्धस्तद्वाक्यादस्ति। तस्मात् क्रतौ विनियोगभङ्गेन हिरण्यधारणं न क्रत्वङ्गम्, इति ''दुर्वर्णोऽस्य भ्रातृव्यो भवति'' इति वाक्यशेषावगतभ्रातृव्यदौर्वर्ण्यफलाय विधीयमानं हिरण्यधारणं पुरुषधर्मः=प्रधानकर्मैव; एवमिहाप्यमृतत्वफलाय विधीयमानमात्मदर्शनं प्रधानकर्मैवेति।।

अपूर्वविषयकत्वादिति।। अपूर्वं विषयो जन्यमस्येत्यपूर्वविषयकम्, तस्य भावस्तत्त्वम्; तस्मादित्यर्थः। प्रधानकर्मैवेत्युक्तम्, तत्रैवकारव्यवच्छेद्यं दर्शयति-*न गुणकर्मेति*।। *ननु*-एतद् दूषणमनभिधाय कथं भाष्यकृताऽन्यदेवोक्तमिति? अत आह-*स्थवीयस्तयेति*।। तर्हि व्याख्यायतां तदित्यत आह-*तदिति*।। आत्मविषयकदर्शनविधानमङ्गीकृत्य तद्दर्शनस्य गुणकर्मत्वं निराकृतम्, वस्तुतस्त्वात्मदर्शनम्=आत्मज्ञानं न विधेयमेव। यदि विधेयम्, तर्ह्यात्मनोऽपि ज्ञानक्रियाविषयत्वं विहितप्रायम्। अस्त्विति चेत्, ब्रह्माभिन्नस्यात्मनो ज्ञानक्रियाविषयत्वविधानं श्रुतिविरोधादनुपपन्नमित्यभिप्रेत्याहेत्याह-*किंचेति*।।''नन्वि'' त्यादिशङ्कासूचकपदाभावादशङ्कात्वभ्रमं निरस्यति-*शङ्कत इति*।। भाष्ये-*शास्त्रयोनित्वानुपपत्तिरिति*।। शास्त्रप्रमाणकत्वानुपपत्तिः; शास्त्रप्रमाणजन्यज्ञानविषयत्वानुपपत्तिरित्यर्थः। *ननु* शास्त्रस्य शब्दरूपस्य कथमविद्याकल्पितभेदनिवृत्तिबोधकत्वम्? सर्वस्य वाक्यस्य तत्तदर्थबोधकत्वदर्शनादित्यत आह-*सर्वमेव हीति*।। यद्यपि सर्वं वाक्यं तत्तदर्थं बोधयति? एवंच किमु वक्तव्यं वाचामगोचरे ब्रह्मणि शास्त्रं भेदनिवृत्तिं बोधयतीत्यत्रेत्यर्थः। तथा च ब्रह्मणोऽविषयत्वस्य सिद्धत्वाद् न शान्तिकर्मणि वेतालोदय इति भावः। लौकिक इक्षु-क्षीर-गुडादिरसभेद एवाभिधातुमशक्यः, किमु वक्तव्यम्-अलौकिकमानन्दैकरसं ब्रह्मानभिधेयमित्यत्र। अतो न शास्त्रं ब्रह्म मुखतः प्रतिपादयति, किंत्वतव्द्यावृत्तिमेव। तथा चाविषयत्वं ब्रह्मणो न व्याहतमिति। अमुमेवाभिप्रायं मनसि निधायाह-*नहीक्षुक्षीरेत्यादिना-तेनेत्यतः प्राक्तनग्रन्थेन*।। *अन्यत्रापि सर्वत्रेति*।। ब्रह्मणि तदितरत्र च। एवमाख्यातुमशक्तमित्यर्थः। अभिप्रायं स्पष्टयति-*तेनेत्यादिना-अलौकिक इत्यन्तेन*।। *ननु* साक्षादप्रतिपादनेऽप्यदूरविप्रकर्षेण प्रतिपादनमितरत्र दृष्टमित्यत आह-*अदूरविप्रकर्षेणेति*।। साक्षादप्रतिपादनादस्ति विप्रकर्षः। वचसोऽदूरः; कुतः वस्तुगतधर्मपरामर्शद्वारा वस्तुशेषस्य लक्षणया प्रतिपादनात्, तादृशप्रतिपादनमिहापि ब्रह्मणि समानमित्यर्थः।

''प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदि''ति भाष्यं व्याचक्षाणो वेदान्तानामदूरविप्रकर्षेण वस्तुबोधकत्वमुपपादयति- *त्वंपदार्थ इति*।। *प्रमेयं घटादि व्याप्नोतीति*।। घटादि प्रमेयं प्रमिमीत इत्यर्थः। *इत्यविद्याविलसितमिति*।। प्रमेयं घटादि व्याप्नोतीत्येतद् अविद्याविलसितमित्यर्थः। *तत्=तस्मात् कारणात्; यदविद्याविलसितत्वेन कल्पितत्वम्, तस्मात् कारणादित्यर्थः। अविषयीभूतोदासीनतत्पदार्थस्य प्रत्यगात्मनस्त्वंपदार्थस्य च ''तत्त्वमसि'' इति सामानाधिकरण्येन। *अस्य=त्वंपदार्थस्य वस्तुतः प्रमातृत्वाभावात् तन्निवृत्तौ प्रमित्या प्रमेयं घटादि व्याप्नोतीत्येवंभावस्य निवृत्तौ प्रमातृ-प्रमाण-प्रमेयविधास्तिस्रो निवर्तन्त इत्यर्थः। एवं वक्तृत्वस्याप्यविद्याविलसित्वे वाच्य-वाचक-वचनान्यपि न वस्तुतः सन्तीत्याह- *नहीति*।। *विगलितेति*।। विगलिता पराक्त्वेन वृत्तिः=वर्तनं यस्य, सः=विगलितपराग्वृत्तिः, तादृशः प्रत्यक्त्वमापन्नोऽर्थो यस्य, तद् विगलितपराग्वृत्त्यर्थम्, तस्य भावस्तत्त्वम्, तत्पदस्य तदा काले भवति, कदेत्यत आह- *त्वमिति हीति*।। त्वमितिपदेन सहैकार्थत्वे सति भवतीत्यर्थः। त्वमित्यपि यत्पदं वर्तते, तदपि च तदा तत्पदेनैकार्थ्यम्। एकार्थत्वं गत्वा=प्राप्य। ऐकार्थ्यं विशिनष्टि- *विशुद्धेति*।। विशुद्धचिदात्मार्थकत्वलक्षणमैकार्थ्यं प्राप्येत्यर्थः। प्राप्य किं करोतीति? अत आह- *त्यजतीति*।। कान् त्यजति? इति वीक्षायामाह- *पदार्थमलानिति*।। पदार्थमलानित्यस्य विशेषणम्- *निजान् सकलान् कर्तृत्वादीनिति*।। इत्यान्तरश्लोकः=इति मध्ये श्लोकः। *अत्रैवार्थे=ब्रह्मणोऽविषयत्वमित्यस्मिन्नेवार्थे। ''यस्यामतम्'' इति भाष्यश्रुतेरयमर्थः:-यस्य ब्रह्माऽमतम्=अविषय इति निश्चयः, तस्य तद्ब्रह्म मतं सम्यग् ज्ञातम्, तदन्तःकरणेऽखण्डसच्चिदानन्दरूपेण प्रतिफलितमित्यर्थः। यस्य पुनर्मतम्=विषयतया ब्रह्मनिश्चयः, स न वेदेति। ''अविज्ञातं विजानताम्'' इति श्रुतेरपि प्रकृतोपयोगितया यथायोग्यमर्थ ऊहनीयः। स्वपक्षे मोक्षनित्यतामुपपाद्य परपक्षे मोक्षस्यानित्यतामापदयतीत्याह- *परपक्ष इति*।। उत्पाद्यपक्षे मोक्षः कार्यमपेक्षत इत्युक्तं भाष्ये, तद्व्याचष्टे- *कार्यमपूर्वम् इत्यादिना- *''सोत्पत्तावि'' त्यन्तेन*।। तयोः पक्षयोरित्युक्तं भाष्ये, तद्व्याचष्टे- *तयोरिति*।। निर्वर्त्य-विकार्ययोरिति*।। उत्पाद्य-विकार्यपक्षयोरित्यर्थः। निर्वर्त्य उत्पाद्य इत्यनर्थान्तरम्। निर्वर्त्यो मोक्ष इति पक्षमुपपादयति- *क्षणिकमिति*।। विकार्यो मोक्ष इति पक्षमुपपादयति- *अन्येषां त्विति*।। मोक्षापेक्षया स इति पुंलिङ्गनिर्देशः। आद्यपक्ष उत्पाद्यत्वे पटो दृष्टान्तः, विकार्यो मोक्ष इति पक्षे विकार्यतत्वे दृष्टान्तमाह- *यथा पयस इत्यादि-दधीत्यन्तेन*।। एवं स्थिते सति पक्षद्वयेऽपि मोक्षस्यानित्यतासाधकमनुमानं दर्शयति- *तदेतयोरित्यादिना*।। *ननु* सिद्धान्तेऽपि श्रुतिबलादविकृतदेशब्रह्मप्राप्तेरेव मोक्षत्वात् तस्याश्चोपासनाविधिकार्यत्वाद् मोक्षस्यानित्यत्वापत्तिः समानेत्यभिप्रेत्य शङ्कते- *अथ यदतः पर इति*।। *भाष्ये कर्मता=प्राप्यत्वेन कर्मशेषता विधिशेषतेति यावत्। पूर्वमप्राप्तं ब्रह्म प्राप्तं चेत्, तथात्वम्, ब्रह्मणो नित्यप्राप्तत्वात् तस्य विकृताविकृतदेशाभावाच्च न तथेत्याह- *अत आहेति*।। क्वचिद्विकृतदेशपरिहारेणाविकृतदेशप्राप्तिरस्ति, तदुपपादयति- *अन्यदन्येनेति*।। तदुदाहृत्य दर्शयति- *तद्यथेति*।। *उपवेलम्=वेलायाः समीपे। जलधिर्विकृत इत्यन्वयः। विकृतौ

हेतुमाह- *अतिबहलेत्यादिना*।। मध्ये तु जलधिरविकृत इत्यन्वयः। तत्र हेतुमाह- *प्रशान्तेत्यादिना*।। तस्य=जलधेः। अविकृतं मध्यम्=मध्यमभागम्। पौतिकः पोतेन प्राप्नोति, प्रकृते तु विकृताविकृतदेशाभावाद्विकृतदेशपरिहारेणाविकृतदेशप्राप्तिरित्येतन्नास्तीत्याह- *जीवस्त्विति*।। *किं केनेति*।। किञ्चित् केनचिन्न प्राप्यत इत्यर्थः। तत्र हेतुमाह- *भेदाश्रयत्वादिति*।। प्रकृते च भेदाभावादिति* भावः। न च-श्रुत्या ब्रह्मणो विकृताविकृतदेशभेदावगम इति-वाच्यम्; श्रुतेरखण्डसच्चिदानन्दस्वरूपस्य स्वयंप्रकाशस्य ब्रह्मणोऽविद्यानिवृत्तेः पूर्वमविद्यावृततयाऽभासमानस्य तन्निवृत्त्यनन्तरं स्वयंभासमानतायां तात्पर्यात्। अभेदतात्पर्याभावाद् भेदं शङ्कते- *अथेत्यादिना-तथापीत्यतः प्राक्तनेन ग्रन्थेन*।। तथा चाऽऽप्यत्वमस्तीति शङ्काभिप्रायः। कल्पितभेदेऽपि वास्तवभेदो नास्तीति समाधाने सत्येव समाधानान्तरमाहेत्याह- *तथापीति*।। प्रधानकर्मत्व-गुणकर्मत्वे पूर्वमेव निराकृते, अनन्तरं प्राप्यकर्मत्वं निराकृतम्; संप्रति संस्कार्यकर्मत्वमपाकरोतीत्याह- *संस्कार्येति*।। यद्यपि गुणकर्मत्वमेव संस्कार्यकर्मत्वम्; तथाऽप्यत्र ब्रह्मलक्षणो मोक्षः संस्कार्यो नेति निराक्रियत इत्यर्थः। सिद्धान्तिमते मोक्ष उत्पाद्यो न, विकार्योऽपि न, आप्योऽपि नेत्युक्तम्, एवं संस्कार्योऽपि नेति भाष्यार्थः। ब्रह्मलक्षणस्य मोक्षस्य संस्कार्यत्वं निराकर्तुं संस्कार्यताद्वैविध्यं दर्शयति- *द्वयीति*।। आद्यसंस्कार्यतामाह- *गुणाधानेन वेति*।। गुणाधानेन संस्कार्यतामुदाहरति- *यथेति*।। बीजपूरकुसुमस्य लाक्षारसासेके किं भवतीति शेषः। ततः किमिति? अत आह- *लाक्षारससवर्णमिति*।। द्वितीयसंस्कार्यतामाह- *दोषापनयेन वेति*।। दोषापनयेन संस्कार्यतामुदाहरति- *यथेति*।। *यथा मलिनमादर्शतलमिति*।। *संस्कृतं भवतीति*।। ततश्च स्वच्छतया प्रतिबिम्बग्राहि भवतीति भावः। एवं द्वैविध्यमुपपाद्य ब्रह्मणि गुणाधानेन संस्कार्यता नेत्याह- *तत्र न तावद्ब्रह्मणीति*।। गुणाधानेन संस्कार्यत्वाभावं वक्तुमेव विकल्पयति- *गुणो हीति*।। आधायक इति शेषः। ब्रह्मणः स्वभावः=ब्रह्मरूप इत्यर्थः। *भिन्नो वेति*।। ब्रह्मभिन्नो वेत्यर्थः। आद्यमनूद्य दूषयति- *स्वभावश्चेदित्यादिना*।। कथमाधेयः=न कथमप्याधेय इत्यर्थः। तत्र हेतुमाह- *तस्येति*।। ब्रह्मस्वरूपस्य गुणस्येत्यर्थः। तथा च तेन गुणेन स्वाभिन्ने नित्यब्रह्मलक्षणो मोक्षो नाधातुं शक्य इति भावः। द्वितीये दूषणमाह- *भिन्नत्वे त्विति*।। ब्रह्मलक्षणो मोक्षो ब्रह्मभिन्नेन गुणेनाधेयश्चेत् तर्हि मोक्षस्य कार्यतयाऽनित्यत्वप्रसङ्ग इत्यर्थः। तथा चानित्यत्वप्रसङ्गादेव न गुणाधानलक्षणसंस्कार्यतेति भावः। किंच किं भेदपक्षेऽत्यन्तभेदः? भेदोभेदा वा? आद्ये धर्म-धर्मिभावानुपपत्तिरिति दूषयति- *न च भेद इति*।। तत्र दृष्टान्तमाह- *गवाश्ववदिति*।। द्वितीयपक्षो निरस्त एवेत्याह- *भेदाभेदश्चेति*।। कुतो दूषणाद् व्युदस्त इति वीक्षायां समानसत्ताकयोरेकत्र विरोधाद् दूषणं निरस्तम्, इत्याह- *विरोधादिति*।। स्वोक्तमर्थं भाष्यारूढं करोति- *तदनेनाभिसन्धिनेति*।। द्वितीयमिति*।। दोषापनयेन संस्कार्यतापक्षं द्वितीयमित्यर्थः। *अशुद्धिरिति*।। मालिन्यलक्षणाऽशुद्धिर्दर्पणे, सा विद्यमाना इष्टकाचूर्णनिघर्षणेन निवर्तते, नित्यशुद्धे ब्रह्मण्यशुद्धिर्न सती, ततो नाशुद्धिलक्षणदोषो निवर्तनीयोऽस्ति; नित्यनिवृत्तस्वरूपत्वादित्यर्थः। भाष्ये-नन्वित्यादिशङ्कासूचकपदाभावात् शङ्केति न प्रतीयते, अत आह- *शङ्कत इति*।। *ननु* मोक्षस्य

स्वात्मधर्मत्वमुक्तम्; भाष्ये, तदयुक्तम्; मोक्षस्य ब्रह्मात्मत्वस्वरूपत्वात्; निर्द्धर्मकत्वाद्ब्रह्मणः, आत्मसंस्कारक्रिया च न ज्ञायत इत्यतोऽर्थमाह- *ब्रह्मस्वभाव एवेति*।। दृष्टान्तस्त्वभिव्यक्त्यंशे। *नतु क्रियत इति*।। अतो मोक्षस्य नानित्यत्वप्रसङ्ग इति भावः। *ननु* ब्रह्मभिन्नस्यात्मनो नित्यशुद्धत्वाद् गुणाधानेन वा दोषापनयेन वा न संस्कार्यत्वमित्युक्तम्; तत्राह-*एतदुक्तं भवतीति*।। शङ्कामभिधाय तां निराकरोतीत्याह-*शङ्कामिति*।। हेत्वाकाङ्क्षामुद्भावयति- *कुत इति*।। भाष्योक्तं हेतुमाह- *क्रियेति*।। यत्तूक्तं संसारदशायामविद्यया मलिनत्वाद् ब्रह्मात्मनो नित्युशुद्धत्वमसिद्धमिति, तत्राह- *नाविद्येति*।। अविद्या वस्तुतो ब्रह्माश्रया न, किंतु ब्रह्मण्यध्यस्तेत्यर्थः; एतदेवाह- *सा त्वनिर्वचनीयेति*।। *तेन नित्यशुद्धमेवेति*।। अविद्याया अवास्तवत्वेनाविद्याकृतमालिन्यस्य वास्तवस्याभावादित्यर्थः। *ननु* तर्हि ब्रह्मण आशङ्कितमशुद्धत्वमदूषयित्वा ''क्रियाश्रयत्वानुपपत्तेरात्मनः'' इत्यादिना क्रियासंस्कार्यत्वमात्रं भाष्ये कथं दूष्यत इति? अत आह- *अभ्युपेत्यत्वशुद्धिमिति*।। *ननु* क्रिययाऽऽत्माभिन्नं ब्रह्म संस्क्रियते चेत्, तत्र वक्तव्यम्-किं ब्रह्माश्रिता क्रिया ब्रह्म संस्कुर्यात्? अन्याश्रिता वेति विकल्पयति- *क्रिया हीत्यादिना*-अन्यसमवेता वेत्यन्तेन*। आद्यविकल्पे दृष्टान्तमाह- *यथा निघर्षणमित्यादिना-आदर्शतलसमवेत इत्यन्तेन*।। आदर्शतलसमवेत इत्यनन्तरम्-'आदर्शतलं संस्कुर्यादि'ति शेषः। एवं विकल्प्य, तत्राद्यं निरस्यति- *न तावदिति*।। कुतो न ब्रह्मधर्म इति? अत आह- *तस्या इति*।। क्रियाया इत्यर्थः। नित्यत्वव्याघातादिति छेदः। द्वितीयं निरस्यति- *अन्याश्रया त्विति*।। अतिप्रसङ्गमेव व्यतिरेकमुखेनाह- *नहीति*।। अन्यथा दर्पणे निघृष्यमाणे मणिरपि विशुद्धः स्यात्, इत्यतिप्रसङ्ग इत्यर्थः। *बाधनमिति*। ''तच्चानिष्टमि'' त्यत्र तदा तच्छब्देन ''अविकार्योऽयमुच्यते'' इत्यादिवाक्यबाधनं परामृश्यत इत्यर्थः। *अत्रेति*।। यमाश्रिता या क्रिया तमेव संस्करोति, नान्यमिति व्याप्तौ व्यभिचारं शङ्कत इत्यर्थः। भाष्यस्थपरिहारवाक्यतात्पर्यं व्यनक्ति- *अनाद्यनिर्वचनीयेत्यादिना-न व्यभिचार इत्यन्तेन*।। अनाद्यनिर्वचनीयाविद्योपहितं ब्रह्म जीव इति क्षेत्रज्ञ इति चाचक्षत इत्यर्थः। *स चेति*। जीवत्वेन च क्षेत्रज्ञत्वेन चोच्यमान इत्यर्थः। *स्थूलेति*।। स्थूलसूक्ष्म-शरीरेन्द्रियादिविशिष्ट इत्यर्थः। तत्संघातमध्यपतितः=स्थूल-सूक्ष्मशरीरेन्द्रियादिसंघातमध्यनिविष्टः। *तदभेदेन=तत्तादात्म्याध्यासापन्नत्वेन। फलितमाह-*अत इति*।। यतः शरीरेन्द्रियादितादात्म्याध्यासापन्नत्वमात्मनः, अत इत्यर्थः। तदेतदाह- *तदाभेदाध्यवसायादिति*।। तत्तादात्म्याध्यासादित्यर्थः। अन्यधर्मस्यान्यधर्मत्वेनावभासमानत्वेनान्यधर्मत्वव्यपदेशे दृष्टान्तमाह- *यथेति*।। *नान्यस्येति*।। तथा च देहाश्रयया स्नानाचमनादिक्रियया देहतादात्म्यापन्नः संस्क्रियते चेत्, देह एव संस्क्रियत इत्यायातमिति, यमाश्रिता क्रिया, सा तमेव संस्करोतीति व्याप्तेर्न व्यभिचार इत्यर्थः। *तत्त्वतस्त्विति*।। आत्मनि पारमार्थिकक्रिया पारमार्थिकसंस्कारो वा नास्त्येवेत्यर्थः। *सनिदर्शनम्=सदृष्टान्तम्*। *शेषमिति*।। ''तयोरन्यः पिप्पलम्'' इत्यतः प्राक्तनं भाष्यमित्यर्थः। *कृतव्याख्यानमिति*।। व्याख्यातप्रायमित्यर्थः। ''तयोरन्यः, अनश्नन्नन्यः''

इत्यन्यशब्दद्वयं वर्तते। तत्राद्यस्यान्यशब्दस्यार्थमाह- *जीवात्मेति *।। द्वितीयस्यार्थमाह- *अनश्नन्नन्य इति परमात्मेति *।। *संहतस्येति *।। संहतस्य भोक्तृत्वम्, असंहतस्याभोक्तुः सतः प्रकाशमानत्वं चाहायं मन्त्र इत्यर्थः। संहतस्यैव भोक्तृत्वप्रतिपादकं वचनान्तरमुदाहृतं भाष्यकृतेति, तदुदाहृतमादत्ते- *आत्मेन्द्रियेतीति *।।

पञ्चमीं कर्मतां शङ्कते- *नन्विति *।। *निर्वर्त्यादिकर्मताचतुष्टयीति *।। निर्वर्त्यकर्मता, विकार्यकर्मता, प्राप्यकर्मता, संस्कार्यकर्मता चेत्येवंविधकर्मताचतुष्टयं मा भूदित्यर्थः। तान्त्रिकविरुद्धत्वात् पञ्चमी विधा नेत्याह- *अत आहेति *।। निर्वर्त्यादिकर्मताचतुष्टयाभावेऽप्यन्यस्य भावेन क्रियाफलत्वं मोक्षस्याशङ्कमानं प्रत्याह- *एतदुक्तं भवतीति *।। चतुर्णां फलानां मध्य इति *।। निर्वर्त्य-विकार्य-प्राप्य-संस्कार्यफलानां चतुर्णां मध्य इत्यर्थः। *अन्यतमया=निर्वर्त्यकर्मतया वा, विकार्यकर्मतया वा, प्राप्यकर्मतया वा, संस्कार्यकर्मतया वान्यतमया व्याप्ता क्रियाफलतेत्यर्थः। ततः किमिति? अत आह- *सा चेति *।। निरुक्तकर्मताचतुष्टयी चेत्यर्थः। *व्यावर्तयतीति *।। व्यापकाभावे व्याप्याभावस्यावश्यकत्वादिति भावः। शङ्कते- *तत्किमिति *।। क्रिया नास्ति चेत्, किमिति? अत आह- *तथा चेति *।। *तदर्थानि शास्त्राणि चेति *।। अमृतत्वाय विधीयमानोपासनाक्रियापराणि शास्त्राणीत्यर्थः। *तदर्थाश्च=उपासनार्थश्च प्रवृत्तयः, अमृतत्वस्य=मोक्षस्य ज्ञानाभिव्यङ्ग्यत्वेनोपासनाक्रियासाध्यत्वाभावात्- ''ब्रह्म वेद ब्रह्मैव भवति'', ''ब्रह्मविदाप्नोति परम्'' ''तरति शोकमात्मवित्'', ''नान्यः पन्था विद्यतेऽयनाय'' इति श्रुतेरिति भावः। *तस्या इति *।। विधीयमानमानसिकज्ञानक्रियाया मोक्षलक्षणं फलं निर्वर्त्य-विकार्य-प्राप्य-संस्कार्य-फलेष्वन्यतमं कस्मान्न भवतीत्यर्थः। एवं चोद्ये स्थिते ''न; वैलक्षण्यादि''ति भाष्यकृता परिहार उक्तः, तस्य निर्वत्यादिफलकक्रियावैलक्षण्यादित्यर्थः। तद्वैलक्षण्यं पूर्वोक्तं स्फोरयति- *अयमर्थ इत्यादिना *।। इयम्=ज्ञानक्रिया *। *तस्य=ब्रह्मणः। *विदिक्रियेति *।। वस्तुतो विदिक्रियाकर्मभावानुपपत्तेरित्यर्थः। एवं च निर्वर्त्यफलाभावाद् ज्ञानस्य क्रियात्वाङ्गीकारेऽपि न विधिगोचरत्वमिति भावः। यत्र विषये या वस्त्वपेक्षा चोद्यते, चोदनाविषयीक्रियते, सा क्रियेति यच्छब्दाध्याहारेण योजयितुं यत्रशब्दार्थमाह- *यत्र विषय इति *।। *चोद्यते=चोदनाविषयीक्रियते। *वस्तुस्वरूपनिरपेक्षैव चोद्यत इत्यत्र दृष्टान्तमाह- *यथेति *।। देवतासंप्रदानकहविर्ग्रहणे=देवतायै हविर्ग्रहणे।

दृष्टान्तान्तरमाह- *यथा वेति *।। अग्निबुद्धिः=अग्निध्यानक्रिया या, *सा क्रिया नामेति योजनेति *। देवतायै हविर्ग्रहणे देवताध्यानक्रियावद् योषिदग्निध्यानक्रिया वस्तुनिरपेक्षैव चोद्यते, सा क्रिया नामेति योजनेत्यर्थः। ध्यानस्य वस्त्वनपेक्षामुक्त्वा पुरुषेच्छाधीनत्वमुपपादयति- *नहि यस्या इति *।। वषट्करिष्यन्। प्रागिति=विध्यर्थानुष्ठानात् प्राक्। प्रमाणदशायां ध्यानं न प्राप्तमित्यर्थः। अतो ध्यानं पुरुषेच्छावशवर्ति। ततश्च कर्तुमकर्तुमन्यथा वा कर्तुं शक्यमिति विधिगोचर इति भावः। एवं च सति ब्रह्मज्ञाने तद्वैलक्षण्यमाह- *प्राप्तं त्वित्यादिना *।। शब्दप्रमाणसामर्थ्याद् ब्रह्मात्मभावज्ञानं प्राप्तमित्युक्तम्, तत्र

दृष्टान्तमाह- *इन्द्रियेत्यादिना*- *नह्यसावित्यतः प्राक्तनेन ग्रन्थेन*।। प्रमाणाद् ज्ञानमित्येतावन्मात्रे दृष्टान्तः। ततः किमिति? अत आह- *नह्यसाविति*।। *असौ=ब्रह्मज्ञानलक्षणोऽर्थः। *अत्र=ब्रह्मज्ञाने। *ननु* उपासना नाम शाब्दज्ञानाभ्यासो वा तस्यैव साक्षात्कारपर्यन्तता वा? उभयत्र पुरुषेच्छादिरस्तीत्याशङ्क्य निराकरोति- *न चेति*।। अस्याः=उपासनायाः। *अनुभवपर्यन्तता वेति* योजना। निराकरणमेवाह- *तयोरिति*।। उपासना-तदनुभवपर्यन्ततयोरित्यर्थः। *प्राप्तत्वेनेति*।। उपासनायाः साक्षात्कारे, अनुभवपर्यन्तताशब्दोक्तसाक्षात्कारस्याविद्यापनये वा प्राप्तत्वेनेत्यर्थः। उपसंहरति- *तस्मादिति*।। *न विधिगोचर इति*।। उक्तविधया विधेयक्रियावैलक्षण्यादिति भावः। *ननु* देवताध्यान-सन्ध्याध्याननिदर्शनमिथुनमुक्तमेव, पुनः-''पुरुषो वाव गौतमाग्निः, योषा वाव गौतमाग्निः'' इति योषित्पुरुषयोरग्निबुद्धिनिदर्शनमिथुनं भाष्यकृतोच्यते, तत्किमर्थम्? ध्यानक्रियाग्निबुद्धिक्रिययोः पुरुषचित्तव्यापारत्वाविशेषेण वस्तुतन्त्रत्वाभावाविशेषेण च निदर्शनमिथुनद्वन्द्वोपन्यासप्रयोजनाभावादित्याशङ्क्य, तेन रूपेणाविशेषेऽपि वस्तुस्वरूपाविरोधित्व-तद्विरोधित्वाभ्यां विशेषं पुरस्कृत्य पृथग् निदर्शनमिथुनद्वन्द्वोपन्यास इत्याह- *पुरुषचित्तव्यापाराधीनायाश्चेत्यादिना-निदर्शनमिथुनद्वन्द्वोपन्यास इत्यन्तेन*।। ''देवताध्यानक्रियायामि'' त्यनन्तरं सन्ध्याध्यानक्रियायां चेति शेषः। क्रियैवेत्येवकारेण क्रियात्वमात्रमपाकरोतीति भाति, तदर्थमाह- *क्रियैवेत्येवकारणेति*।। वस्तुतन्त्रत्वमप्यपाकरोतीत्यर्थः। वस्तुतन्त्रज्ञाने क्रियावैलक्षण्याय क्रियायां वस्तुतन्त्रत्वाभावस्य वक्तव्यत्वादिति भावः। अग्नावग्निज्ञानवद्यथा भूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रमिति भाष्ये उक्तम्, तत्र शङ्कते- *नन्विति*।। *न च त इति*। ते=विधयः, प्रमत्तगीता न भवन्तीत्यर्थः।

कुत इति? अत आह- *तुल्यं हि सांप्रदायिकमिति*।। अन्यत्र विधिस्थले यः संप्रदायः, स तत्रापि तुल्य इत्यर्थः। परिहरति- *अत आहेति*।। *तद्विषया लिङादय इति*। ब्रह्मात्मज्ञानविषये लिङादय इत्यर्थः। श्रूयन्ते चेद्विधेयमङ्गीकर्तव्यम्, नेत्याह- *नत्वमी इति*।। ब्रह्मात्मज्ञाने श्रूयमाणा लिङादयः। तद्विषयत्वे=अनुष्ठेयवस्तुविषयत्वे हि विधीनां प्रामाण्यम्, ब्रह्मात्मज्ञानस्याननुष्ठेयत्वेन तद्विषयत्वेऽप्रामाण्यप्रसङ्ग इत्यर्थः। विधिरनुष्ठेयवस्तुविषय इत्येतदेवाह- *हेयोपादेयेति*।। अस्तु हेयोपादेयविषयत्वं विधेः, अनुष्ठेयविषयत्वे किमायातमिति? अत आह- *स एव हेय उपादेयो वेति*।। क इति? आह- *यमिति*।। तथा च कर्तुमकर्तुमन्यथा वा कर्तु शक्यस्यैव हेयोपादेयत्वेन तद्विषयत्वे विधेरनुष्ठेयविषयत्वमायातमिति भावः। *तत्रैव=अनुष्ठेयवस्तुन्येव। यः समर्थः=शक्तः, स कर्ता, यः कर्ता स कर्मण्यधिकृतः, स नियोगं स्वीयत्वेन बुध्यमानो नियोज्यः, स च तत्रैव वर्णितरूपे विषयो भवति, तस्मिन्नसति न भवतीत्यर्थः। श्रवण-मनन-निदिध्यासनरूपोपासनादर्शनानां ज्ञानस्वरूपत्वमभिप्रेत्यैतदुक्तम्, ततः किमिति? अत आह- *इति विषय-तदनुष्ठात्रोरिति*।। कर्तुमकर्तुमन्यथा वा कर्तु शक्यं विषयशब्दार्थः।

विधेरभाव इति।। व्यापकाभावे व्याप्याभावस्यावश्यकत्वादित्यर्थः। ततोऽपि किम्? तत्राह- *इति प्रयुक्ता अपीति*।।

कुण्ठीभवने हेतुमाह- *अनियोज्यविषयत्वादिति*।। अनियोज्यविषयत्वं च नियोज्याभावात्। नियोज्याभावमेवाह- *समर्थो हीत्यादिना-न नियोज्य इत्यन्तेन*।। *किमर्थानीति*। किं प्रयोजनमुद्दिश्य प्रवृत्तानीति प्रश्नार्थः। यदि प्रयोजनं नास्तीति ब्रूषे, तर्हि व्यर्थानि तानीति भावः। वैयर्थ्यमिष्टमित्याशङ्क्य निराकरोति- *न चानर्थकानि युक्तानीति*। यद्यनर्थकानि, तदा बाधकमाह- *स्वाध्यायेति*।। ''उच्यते'' इत्याद्युत्तरसूचकपदाभावाच्छङ्कावाक्यैकवाक्यत्वभ्रमः स्यात्, तं वारयति- *उत्तरमिति*।। *ननु* प्रवर्तकवचनानि कथं प्रवृत्तिविषयविमुखार्थानि, तथात्वे व्यर्थान्यायातानीत्याशङ्क्य, अन्यतः प्राप्तानुवादार्थत्वान्न व्यर्थानीत्यभिप्रेत्याह- *अन्यतः प्राप्ता एवेति*।। दर्शनार्थ कर्तव्यत्वेनान्वयव्यतिरेकप्राप्ताः श्रवणादयो विधिसरूपैर्वाक्यैरनूद्यन्त इत्यर्थः। अनुवादस्यापि वैयर्थ्यमाशङ्क्य निराकरोति- *न चेति*।। निराकरणमेवाह- *प्रवृत्तीति*।।

प्रवृत्तिविशेषकत्वमेवानुवादानामुपपादयति- *तथाहीति*।। इष्टविषयेषु लिप्सा, अनिष्टविषयेषु जिहासा च, ताभ्यामहतहृदयतया बहिर्मुखः सन् जनः प्रत्यगात्मनि मनः समाधातुं नार्हतीत्यर्थः। अस्त्वेवम्, तावता विधिसरूपैर्वचनैः किं क्रियत इति? अत आह- *विधिसरूपैस्त्विति*।। तावतापि किम्? तत्राह- *इति प्रवृत्तिविशेषकरतेति*।। इतीति हेतौ। यतो विधिसरूपैरनुवादैर्मनसः प्रत्यगात्मस्रोत उद्घाट्यते, अत इत्यर्थः। इत्थं चाध्ययनविध्यधीनग्रहणत्वानुपपत्तिरिति यदुक्तं दूषणम्, तदपि नेत्याह- *इति सप्रयोजनतयेति*।। ''आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'' इत्यादिवचनानि विधिसरूपाणि प्राशस्त्यलक्षणयाऽऽत्मविषयकदर्शन-श्रवणादिषु रुचिमुत्पाद्यानात्मचिन्तायामरुचिं कुर्वन्ति, संप्रति प्रवृत्तिविशेषं घटयन्ति, अतोऽर्थवत्वादध्ययनविध्यधीनग्रहणमुपपद्यत इत्यर्थः। *स्वत इति*।। अविद्यानिवर्तकत्वेन, अस्य=ज्ञानस्य स्वतः पुरुषार्थत्वे सिद्ध इत्यर्थः। एकदेशिमतदूषणग्रन्थस्याभिप्रायं विशदयति- *इदमत्राकूतमिति*।। परवर्तिशब्दार्थबोधलिङ्गस्य प्रवृत्तेः सिद्धवस्तुन्यभावात् सिद्धे न व्युत्पत्तिग्रह इत्युक्तं पूर्वम्- ''अज्ञातसङ्गतित्वेने''-त्यनेन, तत्राह- *कार्यबोध इति*।। यथा चेष्टा कार्यबोधे लिङ्गम्, चेष्टापदं प्रवृत्तेरप्युपलक्षणम्, यथा सिद्धबोधे हर्षादयो लिङ्गमिति योजना। एवं च सिद्धेऽपि व्युत्पत्तिग्रहसंभव इति भावः। यदुक्तम्- ''अर्थवत्तये''ति, तत्सिद्धस्थलेऽप्यस्ति; सिद्धपुत्रजन्मादिबोधेऽपि हर्षादिप्रयोजनलाभात्, अतः शब्दानां कार्यपरत्वं न नियच्छतीत्यभिप्रेत्याह- *अर्थवत्तैवमिति*।। यदुक्तम्- ''शास्त्रत्वेने''ति, तदपि सिद्धस्थलेऽस्तीत्याह- *शास्त्रत्वं हितशासनादिति*।। एवं च सिद्धे सङ्गतिग्रहाभावात् सिद्धवस्तुबोधने प्रयोजनाभावात् सिद्धबोधकस्य शास्त्रत्वाभावाच्च कार्यपरत्वमेव वक्तव्यमिति यदुक्तं पूर्वम्; तदसङ्गतमेव; सिद्धेऽप्युक्तविधया सङ्गतिग्रहसंभवात्, प्रयोजनलाभात्,

सिद्धबोधकस्य शास्त्रत्वसंभवाच्चेति भावः। तस्मात् सिद्धब्रह्मपरत्वं वेदान्तानां युज्यते। अथापि यदि न युज्यत इत्युच्येत, तदा वक्तव्यम्-किं वृद्धव्यवहारानुरोधाद् लोके कार्ये कार्यान्वितस्वार्थे च शक्तिग्रहो न सिद्धे? सिद्धेऽपि वा? आद्य आह-*यदि हि पदानामिति*।। शक्तिः सामर्थ्यशब्दार्थः। भवेदित्यतः प्राक् तदेति शेषः। शब्दो भूतशब्दार्थः। उपनिषदां सिद्धपरत्वाभावे हेतुमाह-*तत्रेति*।। सिद्धे ब्रह्मणीत्यर्थः। सामर्थ्याग्रहेऽपि वेदान्तेभ्यः सिद्धब्रह्मप्रतीतिमाशङ्क्याह-*तत्पूर्वकत्वाच्चेति*।। सामर्थ्याग्रहपूर्वकत्वाच्चेत्यर्थः। द्वितीय उपनिषदां ब्रह्मपरत्वमायातमित्याह-*अथत्विति*।। *तत्परत्वम्=ब्रह्मपरत्वम्। सिद्धे सङ्गतिग्रहस्तूक्त एवेति भावः। यद्यप्ययमर्थः पूर्वमुक्त एव; तथाऽपि विकल्पपुरस्सरं पुनर्दृढीकृत इति ध्येयम्। सिद्धप्रयोगानुरोधात् सिद्धे सङ्गतिग्रहं द्रढयितुमाह-*तत्र तावदेवमिति*।। तत्परः=अकार्यपरः; सिद्धपर इति यावत्। सिद्धपरप्रयोगो न दृश्यत इत्युक्ताविष्टापत्तिमाशङ्क्याह-*न तावत्तत्पर इति*।। *तत्परः=सिद्धपरः। कुत इति? अत आह-*लोके कुतूहलेति*।। कुतूहलार्थानां भयादिवृत्त्यर्थानां चेत्यर्थः। अकार्यपराणां सिद्धपराणां बहुलमुपलब्धेरित्युक्तम्, तदेतदुदाहरति-*तद्यथेत्यादिना-नैष भुजगो रज्जुरित्यादीत्यन्तेन*।। सुमेरुं विशिनष्टि-*आखण्डलेति*।। आखण्डलादीनामिन्द्रादीनां लोकपालानां चक्रवालं समूहः, तस्याधिवसतिः। सुमेरुरित्यस्य विशेषान्तरमाह-*सिद्धेत्यादिना-परिवार इत्यन्तेन*। पुनर्विशेषणान्तरमाह-*ब्रह्मलोकेति*।। ब्रह्मलोकावतीर्णमन्दाकिनीपयःप्रवाहपातेन धौतानि शोधितानि कालधौतसौवर्णानि शिलातलानि यस्य, स तथोक्तः। पुनरपि विशेषणान्तरमाह-*नन्दनादिप्रमदावनेति*।। प्रमदाभिः सह तत्रत्यादीनां क्रीडावनानि प्रमदावनानि, नन्दनानि च तानि प्रमदावनानि च, तेषु विहारिणाम्=संचरणशीलानां *मणिमयशकुन्तानाम्=रत्नमयपक्षिणां निनादः=शब्दः, तेन मनोहरः। एतादृशपूर्वोक्तविशेषणविशिष्टः पर्वतराजः सुमेरुरिति*।। "आखण्डले" त्यारभ्य "सुमेरुरि" त्येतदन्ताः सिद्धपराः पदसन्दर्भाः कुतूहलार्थाः। "नैष भुजगो रज्जुरि" त्यादिसिद्धपराः पदसन्दर्भास्तु भयादिनिवृत्त्यर्थाः। *अत एव सिद्धपरपदसन्दर्भाणां प्रयोगो दृश्यत इति*।। दृश्यत इत्युक्तौ नेष्टापत्तिरिति भावः। सिद्धप्रत्ययोऽपि कार्येणोन्नेतुं न शक्येतेत्यत्रापि नेष्टापत्तिरित्याह-*नापि भूतार्थेति*।। अत्र व्युत्पित्सुनेति शेषः। तत्र हेतुमाह-*हर्षादेरिति*।। तदेतदुपपादयति-*तथाहीति*।। *अभ्यर्णम्=निकटम्। प्रतिपन्नं जनकस्य पितुरानन्दे निबन्धनं पुत्रजन्म येन स तथोक्तः, सिन्दूररञ्जितपुत्रपादाङ्कितपटः पटवासः, स एवोपायनम्=उपहारः, तस्यार्पणपूर्वकम्। वचनं व्यवहारशब्दार्थः। महोत्पलं पद्मम्। देवदत्तोत्पन्नप्रमोदमनुमिमीत इति*।। अयं देवदत्तः, प्रमोदवान्, समुदञ्चितरोमाञ्चकञ्चुकत्वविकसितनयनारविन्दत्वादतिस्मेरमुखारविन्दत्वात्, मद्वदित्यनुमिमीते वार्ताहारेण सहागतो द्रविड इत्यर्थः। अस्तु, तावता प्रकृते किमिति? अत आह-*प्रमोदस्य चेति*।। *प्रागभूतस्य=वार्ताहारवचनात् प्रागभूतस्य। तद्व्यवहारश्रवणसमनन्तरम्= वार्ताहारवचनश्रवण-समनन्तरम्। *तद्धेतुकत्वम्=शब्दहेतुकताम्। अनुमिमीत इत्यनुषङ्गः। अनुमानप्रकारस्त्वित्थम्-अयं

देवदत्तप्रमोदः, वार्ताहारवचनहेतुकः, तस्मिन् सति भावात् तदभावे चाभावादिति। अत्र हेतुशब्दः प्रयोजकवचनः; वार्ताहारवचनस्य प्रमोदजनकप्रतीतिजनकत्वादिति ध्येयम्। तथा च हर्षहेत्वर्थकं वचनं वार्ताहारोऽयमुक्तवानिति व्युत्पित्सुर्द्रविडो निश्चिनोतीत्यर्थः। तदेतदाह- *न चायमिति *।। *अयम्=वार्ताहारः। *अनेन=वार्ताहारेण। हर्षः=प्रमोद इत्यनर्थान्तरम्। ''प्रतिपद्यते व्युत्पित्सुरिति शेषः। अनन्तरमनेन हर्षहेतुरर्थः क उक्त इति हृदि समालोच्य हर्षहेत्वन्तरस्याप्रतीतेः सिन्दूररञ्जितपुत्रपादाङ्कितपटप्रदर्शनपूर्वकं वार्ताहारेण यद्वचनमुक्तम्, तद्वचनश्रवणसमनन्तरमेव हर्षसूचकरोमाञ्चकञ्चुकनयनविकासमुखप्रसादादिदर्शनेन पुत्रजन्मरूपार्थस्य हर्षहेतोः प्रतिपत्तेः स एवानेनोक्त इति निश्चिनोतीत्यर्थः। तथा चोक्तरीत्या सिद्धेऽपि पदानां लोके सङ्गतिग्रहात् तदनुरोधेन वेदान्तानामपि सिद्धपरत्वमेव न कार्यपरत्वमित्यभिप्रायः। एवमियता प्रबन्धेन-''कार्यबोधे यथा लिङ्गं चेष्टा हर्षादयस्तथा। सिद्धबोधे'' इत्येनं श्लोकभागं व्याचष्टे- *तथा चेति।। ''शास्त्रत्वं हितशासनादि'ति श्लोकभागं व्याचष्टे- *एवं चेति*।। पुरुषप्रवृत्ति-निवृत्ती अनुपदिशतां वेदान्तानामित्यन्वयः। प्रवृत्ति-निवृत्त्याश्रयणं हि शास्त्रं पुरुषार्थाय भवति। तं तु पुरुषार्थं वेदान्ता अन्तरेणाप्यायासं ज्ञानादेव नयन्तीति सुतरामशास्त्रत्वं तेषामित्यर्थः। एवं सति सूचितमनुमानं दर्शयति- *तत्सिद्धमेतदित्यादिना*।। वचनादित्यस्य वेदान्तवचनादित्यर्थः। भूतार्थविषयाणि=न कार्यविषयाणीत्यर्थः। उक्तमर्थ भाष्यारूढं कुर्वन्नुपसंहरति- *तस्मादिति*।। उपनिषत्पदव्युत्पत्तिप्रदर्शनपूर्वकमुपनिषदः पुरुषशब्दार्थ वक्तुमाह- *उपनिपूर्वादिति*।। उपनिषत्पदं व्युत्पादितमित्युक्तम्। उपनिषत्पदव्युत्पत्तिमेव दर्शयति- *उपनिपूर्वात् सदेरिति*।। उपोपसर्गः समीपेत्यर्थः। निरयं निश्चतार्थः। पदेरर्थमाह- *सं वासनामिति*।। *ब्रह्मविद्यामाहेति*।। उपनिषत्पदमुक्तव्युत्पत्त्या ब्रह्मविद्यामाहेत्यर्थः कथं तर्हि वेदान्ता उपनिषदः इत्युच्यन्त इति? अत आह- *तद्धेतुत्वादिति*।। ब्रह्मविद्याहेतुत्वादित्यर्थः। एवं स्थित औपनिषदपुरुषशब्दार्थमाह- *ततो विदित इति*।। उपनिषद्भ्यो विदित इत्यर्थः। यद्यपि ''अन्यदेतद्विदितात्'' इति श्रुत्या ब्रह्मणो विदितत्वनिषेध एवावगम्यते; तथाऽप्युपनिषद्भ्योऽतद्व्यावृत्तिर्विदितेति हृदयम्। *एतदेवेति*।। औपनिषदस्य पुरुषस्यानन्यशेषत्वमुक्तं भाष्ये तदेतदेवेत्यर्थः। *यद्वा*-यदौपनिषदं तदसंसारि ब्रह्म चतुर्विधद्रव्यविलक्षणं न कार्यमित्याद्येतदेवेत्यर्थः। अन्यशेषत्वं क्रियाशेषत्वम्, तदभावोऽनन्यशेषत्वम्; अक्रियाशेषत्वमिति यावत्। भाष्यस्थान्यसंसारीत्यादिविशेषणानि व्याचष्टे- *अहंप्रत्ययेत्यादिना*।। भाष्ये=असंसारित्वपदलक्ष्यनिर्देशः*ब्रह्मेति*।। चतुर्विधद्रव्यलक्षण इत्युक्तं भाष्ये, तत्र हेतुमाह- *अत एवेति*।। अत एवेत्यस्य विवरणं क्रियारहितत्वादिति। हेत्वन्तरमाह- *अतश्चेति*।। इति हेतोश्चतुर्विधद्रव्यविलक्षण इत्यर्थः। तमेव हेतुमाह- *यदनन्यशेष इति*।। अनन्यशेषत्वाच्च उत्पाद्य विकार्य-प्राप्य-संस्कार्यलक्षणचतुर्विधद्रव्यविलक्षण इत्यर्थः। यद्यप्यनन्यशेषत्वमौपनिषदपुरुषत्वेन हेतुना साध्यम्; तथाऽपि तेन साधितमनन्यशेषत्वं चतुर्विधद्रव्यविलक्षणत्वसाध्ये हेतूक्रियत इत्यर्थः। अन्यशेषभूतं

तूत्पत्तिविकाराप्तिसंस्कारान्यतममवदेवेत्याह- *अन्येति*।। तत्र दृष्टान्तमाह- *यथेति*।। यथा यूपद्रव्यं यागक्रियाशेषभूतं सत् तक्षणादिसंस्कारवत्, तथेत्यर्थः। यदनन्यशेषभूतं तदुत्पत्त्यादिमच्चतुर्विधद्रव्यविलक्षणमिति पुनर्दृढीकरणाय सदृष्टान्तमाह- *यत्पुनरिति*।। दृष्टान्तमाह- *यथेति*।। सुवर्णधारणं न क्रत्वङ्गम्, किन्तु पुरुषधर्मः प्रधानमेवेत्युक्तम्। अतोऽनन्यशेषभूतं तत्=उत्पत्त्याप्ति-विकृति संस्कारान्यतमवद् न भवति यथा, तथेत्यर्थः। दृष्टान्तान्तरमाह- *सक्तूनिति*।। सक्तूनां याग एव नियुक्तत्वाद् होमेन भस्मीभूततयोत्तरत्र विनियोगाभावाद् विनियुक्तसंस्कारो वा विनियोक्ष्यमाणसंस्कारो वा नेति सक्तुहोमः प्रधानकर्मैवेत्यनन्यशेषभूतं सत्कर्मोत्पत्त्यादिमच्छून्यं यथा, तथेत्यर्थः। तस्योत्पत्त्यादिशून्यत्वमेवाह- *न तस्येति*।। यद्यपि ब्रह्मण औपनिषदत्वेनैवानन्यशेष्त्वं साधितम्; तथाऽप्यनन्यशेषत्वे हेत्वन्तरोपन्यासाय हेत्वाकाङ्क्षामुद्भावयति- *कस्मात् पुनरिति*। भाष्योक्तं हेत्वन्तरं सङ्घटयति- *अत आह यत एव स्वप्रकरणस्थ इति*।। स्वप्रकरणस्थत्वादप्यनन्यशेष इत्यर्थः। एतस्यासंसारिपुरुषप्रकरणत्वे तस्य प्रकरणस्थत्वम्, तदेव कथमित्याशङ्क्य, एतस्य तत्प्रकरणत्वं दर्शयति- *उपनिषदामात्मानमारभ्याधीतानामिति*।। क्रतुप्रकरणमेवेदमस्त्वित्याशङ्क्य, जुह्वादिवदव्यभिचरितक्रतुसंबन्धाभावात् पुरुषस्य न क्रतुप्रकरणशङ्कापीत्याह- *न चेति*।। उपसंहरति- *अत इति*।। सोऽयमिति*।। अनन्यशेषः, असंसारी, स्वप्रकरणस्थो वेदान्तस्वरूपोपनिषद्भिः प्रतिपाद्यमानो नास्तीति वक्तुं न शक्य इत्यर्थः। शङ्कते- *स्यादेतदिति*।। ज्ञात एव पदानां सङ्गतिग्रहात् मानान्तरागोचरस्य ब्रह्मणोऽज्ञाततया सङ्गतिग्रहाभावेनापदार्थत्वात् पदशक्तिग्रहविषयस्य पदशक्यस्यैव पदार्थत्वात् पदार्थसंसर्गस्य वाक्यार्थपक्षे संसृष्टपदार्थस्यैव वाक्यार्थत्वपर्यवसानाद् अखण्डवाक्यार्थत्वपक्षेऽपि पदार्थस्यैव वाक्यार्थत्वाद् ब्रह्मण उक्तविधया सङ्गतिग्रहाभावेन पदार्थत्वाभावात् कथमुपनिषद्वाक्यार्थतेति शङ्कार्थः। परिहरति- *अत आहेति*।। यद्यपि पुत्रजन्मादौ सिद्धे सङ्गतिग्रहेऽपि मानान्तरागोचरे सिद्धे ब्रह्मणि न सङ्गतिग्रहः, अतो ब्रह्म न पदार्थः; तथाऽपि स्वयंप्रकाशत्वेन स्फुरत्यात्मनि समारोपितदृश्यनिषेधेन लक्षणयोपनिषद्वाक्यार्थत्वेन निरूपयितुं शक्यत इति, परिहारभाष्याभिप्रायमाह- *यद्यपीत्यादिना हाटकस्येवेति*।। हाटकं कुण्डलमित्यादिवाक्य इत्यर्थः। *स्वयंवेदनः=स्वप्रकाशः ।। *आत्मा न भासत इति=न भासत एवेत्यर्थः। तदवच्छेदकः कार्यकारणसङ्घातोऽपि न भासत इति न भासत एव; तत्प्रत्यायकमानस्य सत्त्वादिति भावः। ततः किमिति? अत आह- *तेनेति*।। आत्मनः प्रत्याख्यानाशक्यत्वमेवाह- *प्रकाशो हीत्यादिना*।। "सर्वस्य दृश्यप्रपञ्चमात्रस्य प्रकाशो ह्यात्मा, आत्मैवास्य ज्योतिः" इति श्रुतेरित्यर्थः। अस्त्वेतावता, कथं प्रत्याख्यानस्याशक्यत्वमात्मन इत्यत आह- *तदधिष्ठानत्वाच्चेति*।। आत्माधिष्ठानकत्वात् प्रपञ्चविभ्रमस्येत्यर्थः। ततोऽपि कथं प्रत्याख्यानाशक्यत्वम्? तत्राह- *न चेति*।। तदेव विशदयति- *न जात्विति*।। इतोऽप्यात्मनः प्रत्याख्यानस्याशक्यत्वमित्याह- *अपिचेत्यादिना*।। उपसंहरति- *तस्मादिति*।। सर्वोपाधिरहितेत्यनन्तर-

मात्माभिन्नेति शेषः। *तत्रैव=अहंप्रत्ययविषय एव।। *ननु* लौकिकपरीक्षकाणामहंप्रत्ययविषय आत्मपदप्रयोगेऽपि वैदिकानां न तत्र प्रयोग इत्यत आह- *य एवेति।। त एव चेति*।। त एव लौकिकपदार्था एव। *तेषाम्=वैदिकपदानामर्था इत्यर्थः। एवंच सति फलितमाह- *इत्यौपनिषदमप्यात्मपदमिति*।। उपनिषत्सु पठ्यमानमाप्यात्मपदमित्यर्थः। तत्रैव=अहंप्रत्ययविषय एव। एवं च उपनिषत्स्वेवावगत इत्ययुक्तम्; अहंप्रत्ययेन प्रत्यक्षेणाप्यवगमादिति शङ्काभिप्रायः। भाष्योक्तं समाधानप्रकारमेव विशदयति- *नाहंप्रत्ययेति*।। औपनिषदः पुरुषः अहंप्रत्ययविषय आत्मा नेत्यन्वयः। तत्र हेत्वाकाङ्क्षामुद्भावयति- *कुत इति*।। भाष्योक्तं हेतुमाह- *तत्साक्षित्वेनेति*।। भाष्योक्तहेतुं व्याचष्टे- *अहंप्रत्ययविषय इत्यादिना*।। *जीवात्मेति*।। परैर्जीवात्मत्वेन व्यवह्रियमाणः सिद्धान्तिमतेऽहङ्कार इत्यर्थः। तत्साक्षित्वेन *तदहङ्कारसाक्षित्वेन=नन्वहंकारः अन्तःकरणावच्छिन्नचैतन्यम्, तच्चैतन्यमेव जीवः, एवं च जीवपरमात्मनोर्वस्तुत ऐक्याद् जीवस्याहंप्रत्ययविषयत्वे परमात्मनोऽप्यहंप्रत्ययविषयत्वमायातमेवेति कथं परमात्मनोऽहंप्रत्ययविषयत्वस्य प्रयुक्तत्वम्? तत्राह- *एतदुक्तं भवतीत्यादिना*।। *उपहितं रूपमिति*।। कार्यकरणसङ्घातोपहितमन्तःकरणविशिष्टं रूपं जीव इत्यर्थः। स चाहंप्रत्ययविषयः, शुद्धं तु तत्साक्षिभूतं न तद्विषयः, किंतु उपनिषन्मात्रगोचर इत्याह- *शुद्धं त्विति*।। तच्च शुद्धचैतन्यं च। विधिशेषत्व वा नेतुमिति भाष्यमध्याहारेण योजयति- *विधीति*।। तत्र हेत्वाकाङ्क्षोद्भावनापूर्वकं हेतुमाह- *कुत आत्मत्वादेवेति*।। न केवलमात्मत्वं विधिशेषत्वाभावमात्रे हेतुः किंतु अन्यार्थत्वाभावेऽपि। तथा च विमतो नान्यार्थः, आत्मत्वादिति। तदेतदाह- *नह्यात्माऽन्यार्थ इति*।। किं तर्हि अन्यत् सर्वमात्मार्थम् आत्मार्थमेवेत्याह- *अन्यच्च सर्वमिति*।। तत्र श्रुतिं प्रमाणयति- *तथा च श्रुतिरिति*।। किंच न केवलं विधिशेषत्वाभावे, अन्यार्थत्वाभावमात्रे चात्मत्वं हेतुः, किंतु आत्मानः पूर्वोक्तहेयोपादेयभिन्नत्वेऽपि हेतुरित्याह- *अपिचेति*।। सर्वेषामात्मत्वमेव ब्रह्मात्मनो दर्शयति-सर्वस्य हीति*।। "आत्मैवेदं सर्वम्" इति श्रुत्या सर्वात्मात्मप्रतीतेरित्यर्थः। अस्तु सर्वस्यात्मा ब्रह्म, तावता कथमहेयत्वम्? अनुपादेयत्वं चेति? अत आह- *न च स्वभाव इति*।। स्वभावः=स्वात्मा न हेय इत्यर्थः। अत्र हेतुः- *अशक्यहानत्वादिति*।। नहि स्वात्मा केनचित् त्यक्तुं शक्यत इति भावः। उपादेयत्वाभावे हेतुः- *उपात्तत्वादिति*।। नहि स्वात्मा नित्योपात्तः केनचित् पुनरुपादातुं शक्यत इति भावः। पूर्वप्रकृतमुपसंहरति-तस्मादिति*।। सर्वस्य प्रपञ्चजातस्य ब्रह्मैवात्मा ब्रह्मात्मैव सर्वप्रपञ्चजातस्य तत्त्वमित्युक्तम्, तदेव विशेषतः प्रतिपादयति भाष्यकार इत्याह- *सर्वस्य हि प्रपञ्चजातस्येति*।। *अयमर्थ इत्यारभ्य रजतभुजगविनाश इत्यन्तो ग्रन्थः स्पष्टार्थः*।। एवं पुरुषाधिष्ठानकभ्रमरूपस्य सकलप्रपञ्चजातस्य विकारस्य पुरुषान्तो नाश इत्युक्त्वा पुरुषस्याविनाशं द्रढयितुं पुरुषस्य विकारभूतसकलप्रपञ्चाधिष्ठानत्वं द्रढयति- *पुरुष एव हीति*।। परमपुरुषः परमात्मा ब्रह्म पुरुषशब्दार्थः। सकलप्रपञ्चविकाराध्यासाधिष्ठानत्वाद् ब्रह्मैव सर्वस्य विकारस्य तत्त्वमित्यर्थः। *अयं भावः-आरोपितस्य

ब्रह्मैव तत्त्वम्; ब्रह्मसत्तैवारोपितस्य विकारस्य सत्ता, नाऽन्या सत्ताऽस्ति; अधिष्ठानसत्ताव्यतिरेकेणारोपितस्य पृथक्सत्ताया अभावादिति। तदुक्तम्-"दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते। ब्रह्मशब्देन तद् ब्रह्म प्रकाशात्मस्वरूपकम्" इति। तदनेन ब्रह्मणोऽधिष्ठानत्वं दृढीकृतम्; एवंचाधिष्ठानस्वरूपस्य तस्य नाशोऽस्तीत्याह-*नहि पुरुषस्यास्ति विनाश इत्यादिना*।। *ननु*-कारणवशाद् ब्रह्मण एव विकारप्रपञ्चरूपेणान्यथाभावात् कुतो न विनाशः? इत्याशङ्क्य, अतत्त्वतोऽन्यथाभावेऽपि सहस्रकारणेभ्योऽपि तत्त्वतोऽन्यथाभावो नास्ति, येन विनाशः स्यात्, इत्युक्तमित्याह-*नहि कारणानि सहस्रमपि तत्त्वतोऽन्यथयितुमीशते* इत्युक्तमित्यर्थः।। अन्यथाभावस्य मिथ्यात्वादिति भावः। *ननु* उक्तम्-ब्रह्म अहेयमनुपादेयमिति, अस्त्वेवं ब्रह्मस्वरूपेण, तदीयो विकारो धर्मः कश्चिद्धेयः कश्चिदुपादेयश्च किं न स्यादित्याशङ्कते-*अथेति*।। कूटस्थमचलमित्यादिवाक्यात् कूटस्थत्वेन निर्विकारत्वश्रवणाद् विकारहेत्वभावाद्विकारो धर्मो वास्तवो नेति न तथात्वमित्याह-*अत आहेति*।। विकारहेत्वभावात् त्रिविधो विकारो नास्तीति पूर्वोक्तं स्मारयति-*त्रिविधोऽपीति*।। धर्मपरिणामः, लक्षणपरिणामः, अवस्थापरिणाम इति परिणामलक्षणो विकारस्त्रिविधोऽपि नास्तीत्युक्तमित्यर्थः। आत्मनि धर्ममङ्गीकृत्याप्याह-*अपिचेति*।। किमात्मनि स्वीक्रियमाणो धर्मः कारणैरन्यथा क्रियते? उत न? आद्यमङ्गीकरोति-*आत्मनः परमार्थसत इति*।। *तस्य=धर्मस्य*।। आत्मवदिति आत्माऽन्यथाकर्तुं न शक्यते; परमार्थत्वात्, एवं धर्मस्याप्यन्यथात्वं कारणैः कर्तुं न शक्यमित्यर्थः। आद्येऽपि किं धर्मान्यथात्वाद् आत्मनोऽन्यो विकारोऽस्तीति? उत न? अन्त्ये इष्टापत्तिरित्यभिप्रेत्य, आद्यं दूषयति-*न च धर्मान्यथात्वादन्यौ विकार इति*।। विक्रियाहेत्वभावादित्यर्थः। तदेतद् भाष्यारूढं करोति-*तदिदमुक्तमिति*।। वस्तुतस्तु निर्धर्मकमेव ब्रह्म तत्रैव तात्पर्यम्। *अन्यदिति*।। यदपि शास्त्रतात्पर्यविदामनुक्रमणमित्यतः प्राक्तनं भाष्यमित्यर्थः। साक्षित्वेनानुक्रान्तमित्यर्थः। *ननु* "दृष्टो हि तस्यार्थः प्रयोजनवदर्थावबोधनमिति" कथमुक्तमिति वक्तव्ये "दृष्टो हि तस्यार्थः कर्मावबोधनम्" इति कथमुक्तमित्याशङ्क्य तत्र धर्मजिज्ञासायाः प्रक्रान्तत्वाद् धर्मस्य च कर्मत्वात्तथोक्तमित्याह-*दृष्टो हीति*।। कर्मावबोधनमित्युक्ते ब्रह्मावबोधनं व्यावर्त्यत इत्येतदभिप्रायेण नोक्तमित्याह-*नत्विति*।। अन्यस्य कथनमन्यव्यावर्तनाय नेत्येतदेवाह-*नहीति*।। सोमशर्मणि प्रकृते तद्गुणाभिधानं विष्णुशर्मगुणवत्तां नहि निवारयतीत्यर्थः। तथा च धर्मजिज्ञासाप्रक्रमानुसारेण निषेधशास्त्रस्य कर्मावबोधः प्रयोजनमित्युक्तमात्रेण सिद्धब्रह्मपरवेदान्तशास्त्रस्य ब्रह्मावबोधप्रयोजनकता न व्यावर्त्यत इति दृढमिति द्रष्टव्यम्। *ननु*-विधिशास्त्रस्य कर्मावबोधनपरत्वेऽपि निषेधशास्त्रस्य कथं कर्मावबोधनपरत्वम्? तत्राह-*विधिशास्त्रमिति*।। किंच-"आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति शास्त्रस्य वचनानुरोधादाम्नायस्य वेदराशेः क्रियार्थत्वादतदर्थानाम् अक्रियार्थानां वेदान्तानामानर्थक्यमिति वदता वक्तव्यम्-किमाम्नायस्य क्रियार्थत्वात् क्रियाभिधायित्वाद् अतदर्थानाम् अक्रियाभिधायिनामानर्थक्यमित्यर्थो

विवक्षित:? उत क्रियाप्रयोजनत्वात्? तत्राद्यमनूद्य दूषयति- *अपि चेत्यादिना यद्युच्येते'' त्यत: प्राक्तनग्रथेन*।। अर्थग्रहणम्=अर्थशब्द:। आनर्थक्यमित्यस्य विवरणम्-''अनभिधेयत्वमि''ति। ते=द्रव्यगुणकर्मादय:। क्रियार्था:=क्रियारूपार्था:। तथाऽक्रियात्वात्तेषा- मनभिधेयत्वं स्यात्, न चेष्टापत्ति:; द्रव्यगुणकर्मादीनामपि विधिशास्त्रेऽभिधानदर्शनादिति भाव:। द्वितीयं शङ्कते- *यद्युच्येतेत्यादिना*।। क्रियार्थत्वेनैव=क्रियाप्रयोजनकत्वेनैव। नस्वनिष्ठतया=न स्ववाच्यार्थप्रतीतिप्रयोजकत्वेन शङ्कानिष्कृष्टार्थमाह- *एतदुक्तं भवतीति*।। तदर्थम्=क्रियार्थम्; कार्यार्थमिति यावत्। परिहरति *तत्राहेति*।। परिहारभाष्यतात्पर्यस्य स्पष्टमप्रतीते: स्पष्टतया तात्पर्यं स्पष्टयन्नाह- *अयमभिसन्धिरिति*।। किं पदानां कार्यान्वितस्वार्थे शक्ति:? स्वार्थ एव वा? कार्याकार्यसाधारण्येनेतरान्वितस्वार्थे वा? तत्राद्यस्तु निरस्त इत्याह- *न तावदित्यादिना-व्युत्पत्तिं दर्शयद्भिरित्यन्तेन*।। एवकारव्यवच्छेद्यं दर्शयति- *नान्यार्थ इति*।। द्वितीयं दूषयति- *नापीति*।। स्वस्वार्थपरतैव=स्वार्थमात्रपरतेत्यर्थ:। दूषणमाह- *तथा सतीति*।। स्वस्वार्थमात्रपराणामपि पदानामेकवाक्यतया वाक्यार्थप्रत्यायकत्वमाशङ्क्याह- *न हीति*।। एकवाक्यतेत्यत: प्राक् पदानामिति शेष:। *एकेति*।। स्वस्वार्थमात्रप्रतीतिजनन एवोपक्षीणतयैकवाक्यतां प्राप्य वाक्यार्थप्रतीतिजनकता न दृष्टेत्यर्थ:। तृतीयं परिशेषयन्नुपसंहरति- *तस्मादिति*।। स्वार्थमभिदधताम्=इतरान्वितस्वस्वार्थमभिदधताम्। एकप्रयोजनवत्पदार्थपरतया=अन्वितपदार्था एकप्रयोजवत्पदार्थस्य तत्परतया एकवाक्यतयेत्यर्थ:। एकप्रयोजनवत्त्वं च पदार्थानामेकसंसर्गज्ञानविषयप्रतियोगित्वम्, तथा चोक्तविधयैकवाक्यत्वे वाक्यार्थबोध: सुकर इत्याह- *तथाचेति*।। पदानि साक्षात्तत्पदार्थप्रतिपादनं कुर्वन्ति सन्ति तत्रैव न पर्यवस्यन्ति, किन्तूक्तविधर्थकवाक्यतापन्नानि सन्ति वाक्यार्थप्रत्ययं जनयन्तीत्ययमर्थो लब्ध:। अस्मिन्नर्थे संमतिमाह- *यथाहुरित्यादिना*।। फलितमाह- *तथा चेति*।। अर्थान्तरपरतामात्रेण= अन्वितस्वार्थपरतामात्रेण। न कार्यसंसर्गपरत्वनियम:=कार्यान्वितस्वार्थपरत्वनियम:; वाक्यार्थबोध- स्यान्वितस्वार्थपरत्वमात्रेणाप्युपपत्तेरुक्तत्वादित्यर्थ:। एवं च संसर्गप्रतियोगिपदार्थान्तरसत्त्वे तदन्वितस्वार्थपरत्वम्, तदभावे च स्वार्थमात्रपरत्वपर्यवसानाद् वाक्यार्थप्रत्ययाभावापादकस्य निरस्तत्वाद् वेदान्तानां कूटस्थनित्यब्रह्मपरत्वेऽप्यदोष इत्याह- *एवंच सतीति*।। वस्तुतस्तूक्तसिद्धशक्तिग्रहानुरोधात् तत्त्वमस्यादिवाक्येषु तत्त्वमादिपदैर्विशिष्टतत्तत्पदार्थप्रतीतिपूर्वकं शाब्दसामानाधिकरण्यप्रयुक्त- तत्तत्पदार्थैक्यप्रतीतौ जातायां तत्प्रतीतिविषयविशिष्टपदार्थैक्यस्य बाधितत्वेन जहदजहल्लक्षणया विशेषणांशपरित्यागेन शुद्धाखण्डब्रह्मैक्यप्रतीतिरिति सिद्धं वेदान्तानां ब्रह्मपरत्वम्। भव्यार्थत्वेनेत्युक्तं भाष्ये, तत्र भव्यशब्दार्थमाह- *भव्यं कार्यमिति*।। भव्यार्थत्वेनोपदिश्यमानं भूतमपि भव्यमेवेत्याशङ्कते- *नन्विति*।। परिहरति *अत आहेति*।। भव्यसंसर्गिकरूपेण भूतस्य भव्यत्वमुक्तम्। तत्र वक्तव्यम्-को नाम भव्यसंसर्ग:? तादात्म्यलक्षण: संसर्गो वा? भव्येन क्रियाभिधानकार्येण सहप्रयोजनम्-

प्रयोजनलक्षण: संसर्गो वा? तत्राद्यं दूषयति- *न तादात्म्यलक्षण इति*।। भूत-भव्ययोस्तादात्म्यायोगादिति भाव:। द्वितीयं परिशेषयति-*किन्तु कार्येण सहेत्यादिना*।। प्रयोजन-प्रयोजनित्वलक्षणसंसर्गोऽपि क्रिया-कारकभावलक्षणसंसर्गतया पर्यवस्यतीत्याह-*तद्विषयेणेति*।। कृतिविषयेणेत्यर्थ:। भावार्थेन कर्मरूपेण कार्येण। तत: किमिति? अत आह-*इति न भूतार्थानामिति*।। *क्रियात्मत्वम्=भव्यात्मत्वम्। अतो नोक्तशङ्कावकाश इति भाव:। अथेत्यादिशङ्कासूचकपदाभावादाह-*शङ्कत इति*।। *तदिति*।। भूतमित्यर्थ:। अस्तु क्रियानिर्वर्तनयोग्यं भूतमेव भूतम्, तावता किमिति? अत आह-*तथा चेति*। *भूतेऽर्थे-इतरान्विते भूतेऽर्थे। *स्वनिष्ठभूतविषया *इति*।। कार्यान्वितभूतविषया इत्यर्थ:। केवलमितरान्वितभूते गृहीतशक्तय: शब्दा: क्वचित्कार्यान्वितभूतविषया दृश्यन्त इत्येतावता तदमृतत्वं नीत्वा वा कथंचित्कार्यनिष्ठताङ्गमयितुं नोचिता इत्यर्थ:। *ननु*-क्वचिद्दर्शनेन तथात्वेऽपि बहुश: कार्यान्वितभूतविषयत्वेन दृष्टा: शब्दा: कथं कार्यनिष्ठतां गमयितुं नोचिता इत्याशङ्क्य, कार्यान्वितस्य भूतवस्तूपाधित्वेन तत्तद्विशेषणत्वाभावाद् उपाधिभूतस्य शब्दार्थकोटिनिविष्टत्वाभावादनुपहितं केवलं भूतवस्तु शब्दार्थत्वेन क्वचिद् दृष्टमपि तदेतददृष्टं नादृष्टम्। एवंच न कार्यनिष्ठा: शब्दा इत्यभिप्रेत्याह-*नह्युपहितमिति*।। विचार्यमाणे अनुपहितकेवलभूतवस्तुविषया अपि शब्दा लोके बहुलमुपलभ्यन्त इत्याह-*तथा चेति*।। चशब्द: सम्पातायात:। *एवं क्रियानिष्ठा अपीति*।। अनिष्ठा अपीति छेद:। एवमक्रियानिष्ठा अपीत्यर्थ:। सम्बन्धमात्रपर्यवसायिन इत्यनन्तरं बहुलमुपलभ्यन्त इत्यनुषङ्ग:। अक्रियानिष्ठान् सम्बन्धमात्रपर्यवसितान् शब्दानुदाहरति-*यथेत्यादिना*।। स्वाभिभेद:। "प्रकारभेद:" इत्यत्र प्रतिपित्सित इत्यानुषङ्ग:। यन्मात्रं पृच्छता प्रतिपित्सितं तन्मात्रविषयमेवोत्तरमपि प्रवर्तत इत्याह-*प्रष्टुरपेक्षितं चेति*।। *तस्य* पुरुषस्य तयोर्वेत्यर्थ:। तस्येत्यनन्तरं प्रतिपत्तीत्यनुषङ्ग:।*तेन पृच्छता एवंचोक्तविधया भूतार्थप्रयोगानुरोधाद् भूतार्थेऽपि व्युत्पत्तिरस्तीति भाव:। उपपादिता चेयमित्याह-*उपपादिता चेति*।। एवं च वेदान्तानां सिद्धब्रह्मपरत्वं युक्तमेवेति भाव:। *ननु* ब्रह्मण उदासीनस्य सर्वक्रियारहितत्वेनानुपकारत्वमुक्तम्, तत्राह-*एतदुक्तं भवतीति*।। अवगतिपर्यन्तम्=साक्षात्कारपर्यन्तम् *तद्विषयम् ब्रह्मविषयकं शाब्दज्ञानं विद्येत्युच्यते। विद्यारूपं च तत् स्वविरोधिनीं संसारनिदानभूतामविद्यामुच्छिन्दत् प्रयोजनवदित्यर्थ:। इदानीं निषेधवाक्यवद्वेदान्ता न कार्यपरा:। किन्तु सिद्धपरा इत्यभिप्रेत्याह-*अपिचेति*।। *तन्निवृत्ताविति*।। कृतिनिवृत्तावित्यर्थ:। *निवर्तत इति*।। कार्यं निवर्तत इत्यर्थ:। निषेधस्थल इति शेष:। व्यापकनिवृत्त्या याप्यनिवृत्तेरिति भाव:। तत्र दृष्टान्तमाह-*शिंशुपात्वमिवेति*।। वृक्षत्वस्य शिंशुपात्वव्यापकत्वात्तन्निवृत्तौ तन्निवर्तते यथा, तथेत्यर्थ:। कर्म भावार्थशब्दार्थ:। पूर्वापरभूत: पूर्वभाविस्वकारणक इत्यर्थ:। न केवलं साध्य:, साधनभूतश्चेत्याह-*अन्येति*।। कृतिविषयो भावार्थ एवेत्युक्तम्, तत्रैवकारव्यवच्छेद्यं दर्शयति-*न द्रव्यगुणाविति*।। द्रव्य-गुणौ कुतो न कृतिविषयौ? तत्राह-*साक्षादिति*।। "कृतिव्याप्यते" त्यत्र साक्षादिति

शेष:। भावार्थस्यैव कृतिविषयत्वसूचकमभियुक्तवचनमाह- *अत एवेति*।। अनेन भावार्थस्य कृतिविषयत्वं सूचितम्। अत्रावमर्शेऽपीत्यन्त: पूर्वपक्ष:। *अयमर्थ:*-पदस्मारितानन्वितार्थेषु निमित्तेषु भावान्वितावस्था नैमित्तिकी। तस्यामस्ति सिद्धयोरपि द्रव्यगुणयो: क्रियान्वयेन साध्यता कार्यता। अतो द्रव्यगुणभावार्थवाचकशब्दानामविशेषेण साध्यार्थकत्वात् साध्यार्थविषयत्वाच्च नियोगस्याविशेषेऽपि नियोगविषयसमर्पकत्वमिति सिद्धान्तमाह- *भावस्येति*।। भावशब्दस्येत्यर्थ:। कार्यपरामर्श इत्यनुषङ्ग:। भावार्थको हि शब्द: स्वत एव साध्यरूपां क्रियां परामृशति, द्रव्यादिशब्दास्तु क्रियायोगद्वारा द्रव्यार्थिसाध्यतया परामृशन्ति। तत: किमिति? अत आह- *भावार्थेभ्य इति*।। नियोगो हि साक्षात्कृतेरविषय: सन् तद्विषयत्वाय स्वावच्छेदकत्वेन साक्षात्साध्यस्वभावं भावार्थमाकाङ्क्षति। तल्लाभेन च क्रियायोगद्वारा साध्यस्य द्रव्यादेस्तद्विषयता युक्तार्थ अतो भावार्थेभ्य एव यजेतेत्यादिभ्य एव विषयविशिष्टापूर्वाधिगतिरिति, भावनावाचिभ्योऽपि भावो भावनेत्यादिभ्यो नापूर्वाधिगतिरिति कर्मशब्दा इत्युक्तम्। धात्ववाचिभ्योऽपि कर्मशब्देभ्यो याग इत्येवमादिभ्यो नैवापूर्वाधिगतिरिति भावार्था इत्युक्तम्। अतो धात्वर्थोपरक्तभावना येषु भवति यजेतेत्यादिषु, तेभ्योऽपूर्वं प्रतीयेत। एष हि भावनासाध्योऽपूर्वलक्षणोऽर्थो विधीयते, इति ''भावार्था: कर्मशब्दा:, तेभ्य: क्रिया प्रतीयेतैष ह्यर्थो विधीयते'' इति सूत्रस्यार्थ:। *द्रव्यगुणेति*।। तथा च ''द्रव्यगुणयो: सिद्धयो: कृत्यविषयत्वान्न द्रव्य-गुणौ विधीयेते इति भाव:। *ननु*-द्रव्यगुणौ दधिसातत्यलक्षणौ विधीयेते; तत्र तयोरेव कार्यावच्छेदकत्वात्, इत्याशङ्क्य निराकरोति-*न च दध्नेति*।। *आघार:=क्षारणम्। सातत्यम्=अविच्छिन्नत्वम्। निराकरणमाह-*तत्रापीति*।। ''दध्ना जुहोति'', ''सन्ततमाघारयति'' इत्यत्रापीत्यर्थ:। तथा च तत्रापि भावार्थ एव विधेयो न द्रव्यगुणादिरिति भाव:। *ननु*-यदि ''दध्ना जुहोति, सन्ततमाघारयति'' इत्यत्रापि भावार्थो विधीयेत, तर्हि दधिसातत्यादिविशिष्टहोमाघारभावार्थ एव विधेय:। तथा सति ''अग्निहोत्रं जुहोति'' ''आघारमाघारयति'' इत्येतदनुवादकं स्यात्, न चेष्टापत्ति:; अधिकरणान्तरविरोधादित्याशङ्क्य निराकरोति- *न चैतावतेति*।। ज्योतिष्टोमे श्रूयते-''सोमेन यजेत'' इति, तथा ''ऐन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णाति आश्विनं गृह्णाति'' इति च श्रूयते। तत्र संशय:-किं ऐन्द्रवायवादिवाक्यविहितानां सोमरसानां यागानां च यथाक्रमं ''सोमेन यजेते''ति सोमयागशब्दावनूदितारौ? उत द्रव्ययुक्तस्य कर्मणो विधायकौ? ऐन्द्रवायवादिवाक्येषु द्रव्य-देवताख्यरूपप्रतीतेर्यागानुमानात्, इतरत्र रूपाप्रतीते: समुदायानुवाद इति प्राप्ते, द्वितीये सिद्धान्तितम्-''नानुवादत्वमप्रत्यभिज्ञानात्''। लतावचनो हि सोमशब्दो न रसवचन:, ऐन्द्रवायवादिशब्दास्तु रसानभिदधतीति न तदनुवादी सोमशब्द:। न च यजेतेति प्रत्यक्षे यागे तदनुमानं युक्तम्; तत: प्राप्त्यभावान्न यजिरप्यनुवाद:। तस्मात् सोमवाक्ये यागाविधि:, इतरत्र रसानामिन्द्रादिदेवताभ्यो ग्रहणान्युपकल्पनानि विधीयन्त इति। एवं यथा ''सोमेन यजेत'' इत्यादिवाक्यं सोमद्रव्यविशिष्टयागविधायकम्, एवं ''दध्ना जुहोति'' ''सन्ततमाघारयति'' इत्यादिवाक्यान्यपि दधिसातत्यादिविशिष्टहोमाघारादिविधायीनीति वक्तव्यम्। यदि दधिद्रव्य-सातत्यगुणविशिष्टहोमाघार-

विधायीनि-तर्हि "अग्निहोत्रं जुहोति" "आघारमाघारयति" इति वाक्यद्वयं "दध्ना जुहोति" "सन्ततमाघारयति" इति वाक्यद्वयविहितदधिसातत्यविशिष्ट- होमाघारसमुदायानुवादकं स्यात्। न चेष्टापत्तिः; अधिकरणान्तरविरोधादिति शङ्कार्थः। येनाधिकरणान्तरेण विरोधः, तदत्रोच्यते। तथाहि-तृतीये स्थितम्-"आघाराग्निहोत्रमरूपत्वात्।।" "आघारमाघारयति, ऊर्ध्वमाघारयति, सन्ततमाघारयति", तथा "अग्निहोत्रं जुहोति, दध्ना जुहोति, पयसा जुहोति", इति श्रूयते। तत्र संशयः-किं सन्तत-दध्यादिवाक्यविहिताघारहोमानामाघाराग्निहोत्रवाक्ये द्वे समुदायानुवादिनी? उतापूर्वयोराघारहोमयोः विधातृणी? इति। तत्र आघाराग्निहोत्रवाक्ये सन्तत-दध्यादिवाक्यविहिताघारहोमानुवादिनी, तद्विधातृणी; द्रव्य-देवताख्ययागस्वरूपरहित्वात्। नह्यत्र दधि सातत्यादिवाक्यविहितहोमाघारेभ्यो विशिष्टं रूपं द्रव्यदेवताख्यमुपलभ्यमानमस्ति, होमाघारमात्रं तु प्रकृतमुपलभ्येत; अतोऽनुवादकत्वे प्राप्ते, राद्धान्तः-विधी इमे स्याताम्; आघारयति जुहोतिशब्दाभ्यामनुष्टेयार्थप्रतीतेः, तत्सन्निधौ श्रुतस्य सातत्यदध्यादिवाक्यस्य यथाक्रमं सातत्यदधिविशिष्टविधिपरत्वे गौरवप्रसङ्गेन "आघारमाघारयति, अग्निहोत्रं जुहोति", इतिवाक्यविहिताघारहोमानुवादेन सातत्यदधिलक्षणगुणविधानार्थत्वात् सातत्यदध्यादिवाक्यस्य न सातत्यदधिविशिष्टभावार्थविधिपरत्वमिति। अनेनाधिकरणेन विरुध्यते; सातत्यदध्यादिवाक्ये सातत्यदध्यादिविशिष्टभावार्थविषयं कार्यम्, आघाराग्निहोत्रवाक्यमनुवादकमित्यभ्युपगमश्च। अतो दधिसातत्यवाक्ये विशिष्टकर्मविधिः, अग्निहोत्राघारवाक्यमनुवादकमिति शङ्का न युक्तेत्यर्थः। तत्र हेतुमाह- *यद्यपीति*।। सातत्य-दध्यादिवाक्ये साक्षात्कृतिविषयत्वाद् भावार्थस्य, तदवच्छिन्नमेव कार्यं यद्यपि प्रतीयते, न तु कार्यं प्रति साक्षादविषयत्वात् तदनवच्छेदकौ गुणौ, तथा च न दधिसातत्यलक्षणद्रव्यगुणविशिष्टधर्मविधिः; तथाऽपि भावार्थं प्रत्यनुबन्धतया अवच्छेदकतया विधीयेते द्रव्यगुणौ। तत्र हेतुमाह- *भावार्थ इति*।। द्रव्यादिश्च विधेयः, तर्हि वाक्यभेदः, तत्राह- *तथाचेति*।। तर्हि सन्ततदध्यादिवाक्यानि विशिष्टविधायीनि स्युः, स्याच्चाग्निहोत्रादिवाक्यमनुवादकम्, तत्राह- *एवं चेति*।। विधिविषयस्येत्यर्थकं स्वविषयस्येति; भावार्थस्येति यावत्। *अन्यतः=आघाराग्निहोत्रादिवाक्यात्। यद्यप्यत्र विशिष्टविषयो विधिः प्रतीयते तथाऽपि भावार्थद्वारा द्रव्यादिकमपि विषयीकरोति। तत्र संक्रान्तो विधिर्यदि भावार्थमन्यतो विहितमनुवादाय न लभेत, तर्हि गौरवमप्युररीकृत्य विशिष्टं विदधीत। अथाग्निहोत्राघारवाक्यतो विहितं भावार्थमनुवादाय लभेत, तत उपपदाकृष्टशक्तिरन्यतो विहितभावार्थानुवादेन दधिद्रव्यसातत्यादिलक्षणगुणविधिपरो भवति। यथाहुः-

"सर्वत्राख्यातसम्बन्धे श्रूयमाणे पदान्तरे।

विधिशक्त्युपसंक्रान्तेः स्याद्धातोरनुवादता।।"

इति। तदिहाग्निहोत्रादिवाक्यत एव भावार्थलाभात् तद्विहितभावार्थानुवादेन सातत्यदध्यादिवाक्यं सातत्यदधिलक्षणगुणविधिपरम्, आघारयतीति यत् तत्सातत्येन जुहोतीति, यद् जुहोति, तद् दध्नेति। यद्यपि दधिसातत्यादि गुणतयाऽपि न विधातुं शक्यम्; सिद्धत्वात्, तथाऽपि भावार्थानुबन्धितया कथंचिद्विधानं संभवतीति भावः। मीमांसकैकदेशिनः ''यदाग्नेयोऽष्टाकपालो भवति'' इत्यादौ द्रव्यदेवतासम्बन्धो विधीयत इत्याहुः। तत्रापि सिद्धस्य न विधेयत्वमित्युक्तमतिदिशति- *एतेनेति*।। सिद्धस्याविधेयत्वेनेत्यर्थः। सिद्धस्यापि संबन्धस्य भावनावच्छेदकत्वेन विधेयत्वमेकदेशी शङ्कते- *नन्वित्यादिना*।। *ननु* यथाश्रुति भवत्यर्थ एव विधीयताम्, किं सम्बन्धविधिना? इत्याकाङ्क्षायाम्- *भवत्यर्थकर्ता किं

इत ऊर्ध्व मातृका नोपलब्धा

पञ्चपादिका

***कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते? यावताऽऽम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति क्रियापरत्वं शास्त्रस्य प्रदर्शितम्। अतो वेदान्तानामानर्थक्यमक्रियार्थत्वात्*।।**

यद्यपि प्रदर्शितानि वाक्यानि सर्वज्ञत्वादिगुणकं ब्रह्म जगत्कारणं प्रतिपादयन्ति; तथाऽपि तत्र परिनिष्ठिते वस्तुनि प्रत्यक्षादीनामपि प्रवृत्तिसम्भवात् तैरसंवादे न प्रामाण्यं प्रतिलभन्ते।।

ननु अपौरुषेयत्वात् तज्जन्यं स्वार्थपरिच्छेदेऽनपेक्षं कथमप्रमाणम्? सत्यम्; तथाऽपि यथा चाक्षुषं स्पर्शनगोचरचित्रनिम्नोन्नतज्ञानं तेनासंवादादप्रमाणम्, तथेहापि स्यात्। किंच पुरुषार्थशून्यत्वादप्यप्रामाण्यम्। पुरुषार्थो हि नाम सुखावाप्तिदुःखपरिहारश्च। तौ च सिद्धत्वाद् हानोपादानविषयौ न सिद्धवस्तुन्यक्रियाशेषे सम्भवतः। ततो न **क्वचिद् वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वा*।।** किंच प्रत्यक्षाद्यविषये न शब्दमात्रस्य प्रामाण्यम्। शास्त्रस्यैष स्वभावो यदनवगतार्थावबोधकत्वम्। शब्दमात्रस्य पुनः प्रमाणान्तरगृहीतार्थप्रकाशन एव सामर्थ्यं दृष्टम्, नानवगतार्थप्रकाशने। तस्मादनर्थका वेदान्ताः; न तेषां ब्रह्मणि प्रामाण्यमिति। अत एव 'वेदोपरा वेदान्ताः'' इति केषांचिदुद्गारः।।

यत्पुनर्भाष्यकारेण कर्तृ-देवतास्वरूपप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानां प्रकरणान्तरभयादनभ्युपगम्य स्ववाक्यगतोपासनाकर्मपरत्वमुक्तम्, तदयुक्तम्; उपासनाविधिशेषत्वेऽपि संवादाभावाद् जगत्कारणे न सर्वज्ञत्वादिसिद्धिः। *सत्यम्*; अनुमानतोऽनिर्दिष्टविशेषे तस्मिन्नवगते समारोपितैर्धर्मैरूपासनानियोगः सेत्स्यति। एवं चाध्ययनविधिग्राहितानां वेदान्तानामेकान्ततो नानर्थक्यं भविष्यतीत्यभिप्रायः। फलं च तत्र कल्प्यमार्थवादिकम्।

तत्तु समन्वयात् तत्=ब्रह्म सर्वज्ञत्वादिगुणकं वेदान्तशास्त्रात्प्रतीयत इति प्रतिजानीते। हेतुं चाचष्टे- ***समन्वयादिति*।।** तत्र तात्पर्येण वेदान्तवाक्यानां समन्वयादित्यर्थः।।

सम्यगन्वयः समन्वयः। अथ केयं सम्यक्ताऽन्वयस्य? पदानां परस्परानवच्छिन्नार्थानामनन्याकाङ्क्षाणामव्यतिरिक्तैकरसप्रातिपदिकार्थमात्रान्वयः;

''सोऽयमि'' त्यादिवाक्यस्थपदानामिव।

प्रकृष्ट-प्रकाशशब्दयोरिव चन्द्रपदाभिधेयार्थकथनेन। तथा च व्यक्तिविशेषः कश्चिच्चन्द्रप्रातिपदिकाभिधेयः केनचित् पृष्टः- 'अस्मिन् ज्योतिर्मण्डले कश्चन्द्रो नाम? इति तस्य

प्रतिवचनम्–' प्रकृष्टप्रकाशश्चन्द्रः। इति तदेवं प्रतिवचनं भवति–यदि यथा चन्द्रपदेनोक्तम्, तथाऽऽभ्यामपि पदाभ्यामुच्येत। एवं च सति नीलोत्पलवदयुतसिद्धपरस्परावच्छिन्नविशेषण-विशेष्यभावेनाप्यन्वयो दुर्लभः। कुतः पृथक्सिद्धः क्रिया-कारकलक्षणः सम्बन्धः? तथाविधान्युदाहरति–सदेव **सौम्येदमग्र इत्यादीनि *॥**

ननु जन्मादिसूत्रोदाहरणेष्वेव प्रामाण्यं दर्शनीयम्, किमुदाहरणान्तरेण? *बाढम्*; अस्त्यत्राभिप्रायो भाष्यकारस्य। तत्र ब्रह्मणो लक्षणं वक्तव्यमिति तटस्थस्यैव ब्रह्मणो निरूपकाणि वाक्यान्युदाहृतानि, इह तु 'तत्त्वमसी''ति जीवस्य ब्रह्मात्मतावगतिपर्यन्तानि वेदान्तवाक्यानि न तटस्थमेव जगत्कारणं प्रतिपाद्य पर्यवस्यन्ति, इत्यतस्तथाभूतान्येव वाक्यान्युदाहृतानि–'' सदेव सौम्येदमग्र आसीदि''त्येवमादीनि। यत्पुनः सिद्धे वस्तुनि प्रत्यक्षादिसम्भवात् तदभावे मिथ्यात्वाशङ्कायामप्रामाण्यमिति, तद् रूपाद्यभावाद् नेन्द्रियगोचर इति प्रत्युक्तम्॥

ननु इन्द्रियागोचरत्वादेव प्रत्यक्षाद्यविषयत्वान्न शब्दमात्रस्य तत्र प्रामाण्यमित्युक्तम्, *उच्यते*; यद्यपि शब्दमात्रस्य प्रत्यक्षादिविषय एव प्रयोगो दृष्टः व्युत्पत्ता तु कथं व्युत्पद्यते? इति वाच्यम्। श्रोतृव्यवहारो हि मूलं बालानां व्युत्पत्तेः। स च श्रोतुर्ज्ञानान्तरानिमित्ततापरिशुद्धः शब्दसामर्थ्यावगमहेतुः।

अतो न प्रतिपत्तुर्ज्ञानान्तरासिद्धार्थावबोधकत्वं सामर्थ्यावगमकालेऽवगतम्।

तेनानवगम्यैव तद्विषयं ज्ञानं सामर्थ्यावगमः यथाऽवगमं च विज्ञानोत्पत्तिः।

यदा पुनर्व्युत्पन्नः स स्वयं प्रयुयुक्षते परप्रतिपत्तये, तदा ज्ञानान्तरसन्निधापितं स्वसाक्षिकं विवक्षन् सामर्थ्यावगमकालेऽपि तयोः सत्तां प्रतिपद्यते केवलम्, न ज्ञानोत्पत्तौ तयोरुपयोगम्। तस्मान्न शब्दस्य प्रमाणान्तरगृहीतार्थप्रकाशने सामर्थ्यं व्युत्पत्तिकालेऽवगतम्, किन्तु चक्षुरादिवदन्यनिरपेक्षो यथावगतसामर्थ्यञ्च शब्दो विज्ञानं जनयति। तस्मान्न प्रमेयस्य प्रत्यक्षादिविषयत्वं शब्दस्य विज्ञानजनन उपयुज्यते॥ अपि चापौरुषेये शब्दे चक्षुषीव विज्ञानोत्पत्तावनपेक्षे कथमप्रामाण्यमाशङ्क्येत? *ननु* उक्तमाशङ्काकारणं स्पर्शनगोचरचित्रनिम्नोन्नतविषयस्य चाक्षुषस्य प्रत्ययस्य तत्संवादा- भावादप्रमाणत्वम्, *न तत्साधूक्तम्*; अदुष्टकरणत्वादस्य, तस्य च तदभावात्। तथाहि–शब्द- स्तावदपौरुषेयत्वाददुष्टः। प्रमेयस्य पुनर्ज्ञानहेतुत्वे न प्रमाणमस्ति; शब्दस्यैव तदेकनिष्ठत्वेन तन्नियमात्, चित्रस्य तु चाक्षुषज्ञाने सामग्र्यन्तःपातिनः श्यामादिरेखासन्निवेशविशेषो दोषः; तदभावे तिमिराभाव इव सम्यग्दर्शनोत्पत्तेः। अतः प्रवर्तमानमपि प्रमाणं संवादकमेव, इति नाप्रामाण्यमावहति। न च संवादलक्षणं प्रामाण्यम्; अपि तु बोधलक्षणमिति प्रमाणविदां स्थितिः। अतो यथैव विधिवाक्यानां स्वार्थमात्रे प्रामाण्यम्, एवं स्वरूपवाक्यानामपि; अनवगतार्थपरिच्छेदसामान्यात्॥

ननु विधिवाक्यानामेव प्रामाण्यं-युक्तम्; क्रियार्थत्वादाम्नायस्य, *न*; इतरेतराश्रयत्वात्। विधिवाक्यानामेव हि प्रामाण्ये सिद्धे क्रियार्थत्वमाम्नायस्य सिध्येत्, *न*; इतरेतराश्रयत्वात्। विधिवाक्यानामेव हि प्रामाण्ये सिद्धे क्रियार्थत्वमाम्नायस्य सिध्येत्, क्रियार्थत्वे च सिद्धे तेषामेव प्रामाण्यमितीतरेतराश्रयत्वं स्यात्, न ह्येकमप्यन्यतः सिद्धम्; अतो यदवगमयत्याम्नायस्तदर्थः सः। तस्माद् यथाकार्यमवगमयंस्तदर्थः, एवमैकात्म्यमप्यवगमयंस्तदर्थो भवितुमर्हति। प्रतीतिकृतत्वात्प्रामाण्यस्य, प्रतीतिस्तु कार्यैकात्म्ययोस्तुल्या। प्रत्यक्षादिष्वप्येतदेव प्रमाणवृत्तम्, यदनवगतमवगम्यते।।

आह–युक्तं प्रत्यक्षादीनां तावत् प्रामाण्यम्; अपेक्षान्तराभावात्, आम्नायस्य त्वध्ययनविधिनोपादापितस्य न पुनः पुरुषार्थमप्राप्यपर्यवसानं लभ्यते; विधानानर्थक्यप्रसङ्गात्। तस्मादैकात्म्यवाक्यानां स्वार्थमात्रनिष्ठता न युक्ता; *उच्यते*;–पुरुषो ह्येतावदपेक्षते– इष्टं मे स्यादनिष्टं मे मा भूदिति, न त्वित्थमन्यथा वेति। न चास्य स्वयमीष्टे। द्विविधं चेष्टं प्रेप्सति–किञ्चित्प्राप्यम्; यथा ग्रामादि। किञ्चित्प्राप्तमपि; यथा भ्रान्त्या हस्तगतमेव विस्मृतसुवर्णादि। अनिष्टमपि द्विविधं परिजिहीर्षति किञ्चित्परिहृतमपि; यथा भ्रान्त्या रज्ज्वादि सर्पादिबुद्धिगृहीतम्। तत्र प्राप्यपरिहार्ययोः साधनज्ञानायत्तत्वात्पुरुषार्थसय विधि-प्रतिषेधावर्थवन्तौ। इतरयोस्तावद् भ्रान्तिमात्रव्यवहितत्वान्न तदपनयादन्यत् पुरुषार्थमनुमन्यत एव पुरुषः, सुतरां चाभिनन्दति। साधनायत्तो ह्यायासाल्लभ्येत, ज्ञानाय त्वायासोऽपि परिह्रियते। तेनानेकानर्थकलुषितमिवात्मानं मन्यमानस्य भ्रान्तस्य सर्वानर्थशून्यात्मतत्त्वप्रतिपादनादेव पुरुषार्थसिद्धेरैकात्म्यवाक्यानां स्वार्थमात्रनिष्ठत्वेऽपि न विध्यानर्थक्यप्रसङ्गः। तस्मात् सिद्धं ब्रह्मणः शास्त्रप्रमाणत्वम्।।

इति परमहंसपरिव्राजकादि- श्रीशङ्करभगवत्पादन्तेवासिवर- श्रीपद्मपादाचार्य- कृतौ पञ्चपादिकायां वेदान्तानां ब्रह्मणि समन्वयनिरूपणं नामाष्टमं वर्णकं समाप्तम्।।

अत्रापरे प्रत्यवतिष्ठन्ते-यद्यपि शास्त्रेण प्रमीयते ब्रह्म; तथाऽपि विधिसंस्पर्शिना, न तद्रहितेन। कस्मादेवम्? अन्यथा शब्दप्रयोगानुपपत्तेः।

पुरुषेच्छासमुत्थापितो हि शब्दप्रयोगः। सा चेष्टानिष्टप्राप्तिपरिहारविषया। न च पारम्पर्येणापि सुख-दुःखे विहायेष्टानिष्टे सम्भवतः। न च विस्मृतसुवर्णारोपितसर्परशनाप्रतिपत्ताविव तदनन्तरं शास्त्रादपि ब्रह्मात्मप्रतिपत्तौ सुखावाप्तिर्दुःखपरिहारश्च दृश्यते; पूर्ववत् संसारित्वोपलब्धेः, प्रतीत्युत्तरकालं च ध्यानोपदेशात्। तस्मात् सन्तु नाम लोके विधिरहितान्यपि पुरुषार्थपर्यन्तानि वाक्यानि, वेदे तु न तद्रहितानां तत्पर्यन्तता।

तस्माद् यद्यपि जिज्ञास्यवैलक्षण्यं धर्म-ब्रह्मजिज्ञासयोः सिद्ध-साध्यविषयत्वेन; तथाऽपि "सोऽन्वेष्टव्यः" "स विजिज्ञासितव्यः" इत्यादि विधिषु कोऽसावात्मेत्याकाङ्क्षायां सर्व एव

ब्रह्मस्वरूपपर: पदसमन्वयस्तत्समर्पकत्वेनोपयुक्त:, न स्वतन्त्रमेव ब्रह्म प्रतिपादयितुमलम्। अतो विधीयमानज्ञानकर्मकारकत्वेनैव ब्रह्म प्रतिपाद्यत इति।। य: पुन: ''तस्मात् प्रतिपत्तिविधिविषयतयेव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमि''ति भाष्ये पूर्वपक्षोपसंहार:, प्रमाणात्मक इतरो वा ब्रह्मसंस्पर्शित्वेन विधेय: कैश्चित् कथञ्चित् कल्पित:, तस्य सर्वस्य संग्रहार्थो द्रष्टव्य:।।

अत्रोच्यते-किमिदं ज्ञानं ब्रह्मकर्मकं विधीयते? न तावच्छब्दजन्यम्; स्वाध्यायपाठादेव तत्सिद्धे:, अथ शब्दजन्यस्यैव ज्ञानस्याभ्यासो विधीयत इति, न तस्य प्रयोजनं पश्याम:।।

ननु इष्टविषयस्य ज्ञानसन्तानस्य सुखसन्तानहेतुत्वं दृश्यते, *यद्येवम्* तद्वदेव विध्यानर्थक्यम्। *अथ* पुन: साक्षात्करणाय ज्ञानसन्तानविधिरुच्यते, *नैतद्युक्तम्*; न हि दृष्टाधिकारो विधिरसम्भावितदृष्टफलो भवति। न हि लैङ्गिकोऽर्थो लिङ्गजन्मनैव ज्ञानेन सहस्रशोऽप्यभ्यस्यमानेन साक्षात्क्रियते। *मा* भूत् शाब्दज्ञानादेवाभ्यस्यमानात्साक्षाद्भाव:, तज्जन्मनो ज्ञानान्तराद्भविष्यति, *नेत्थम्भावे प्रमाणमस्ति*।।

अस्तु तर्हि शब्दात् प्रतिपन्नस्य यथाप्रतिपत्ति ध्यानं नाम मनोव्यापारो विधीयत इति, *किमर्थं तस्य विधानम्*? ध्येयसाक्षात्काराय चेत्, न तस्य सम्भव:। न हि परोक्षं ध्यायमानं साक्षाद्भावमापद्यमानं दृष्टम्। *ननु* दृष्टं परोक्षमपि ध्यायमानं साक्षाद्भावमापन्नं कामाद्युपप्लवे, *मैवम्*; न तद् ध्यायमानम्, अपित्वविद्यात्मकम्, अन्यथा बाधो न भवेत्।।

ननु''द्रष्टव्य:''इति दर्शनमनूद्य''निदिध्यासितव्य:''इति ध्यानं दर्शनफलं विधीयते, *उक्तमेतद्* न दृष्टाधिकारो विधिरसम्भावितदृष्टफलो भवतीति। न हि ध्यानं ध्येयसाक्षाद्भावहेतु: क्वचिद् दृष्टम्। अथापि भवतु नाम ध्यानाद् ध्येयसाक्षाद्भावो ध्येयस्य, तथात्वे किं प्रमाणम्? शब्दस्तावत्साक्षात्करणोपायोपासनविधाने पर्यवसितो न तत्सद्भावे, सत्यम्; तथाऽपि तत्त्वं सिध्यति वक्ष्यमाणेन देवताविग्रहवत्त्वन्यायेन। *विषम उपन्यास:*, तत्र हि न तथात्वे साधकं बाधकं वेति प्रतीतिशरणैस्तथाऽभ्युपेयते; न तथेह सर्वस्यात्मत्वे; प्रत्यक्षादिविरोधात्, आरोपितरूपेणापि ध्यानोपपत्ते:। पूर्वोक्तेष्वपि ज्ञानविधिपक्षेष्वनयैव दिशा वस्तुतथात्वसिद्धिर्निराकार्या।।

यत्पुन: कैश्चिदुच्यते-शाब्दज्ञानादन्यदेव ज्ञानान्तरमलौकिकं वेदान्तेषु कर्तव्यत्वेन विधीयत इति, *तत्र वदाम:*-तत्पुन: किंसाधनं किंकर्म चेति वक्तव्यम्। न ह्यनवगतकर्मकारकं ज्ञानं विधातुं शक्यम्; अवगते च तस्मिन् विधानानर्थक्यम्। साधनमपि न विहितम्; तेन विना साकाङ्क्षं वचनमनर्थकं भवेत्। ''तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'' त्यादिना वचनेन साधनं वेदानुवचनादि विहितमेवेति चेत्, प्रमाणान्तरस्य तर्हि प्रमाणं शब्दो नात्मतत्त्वस्य, *नैतदुपपद्यते*; कार्यगम्यं हि प्रामाण्यं न विधिगम्यम्।

तदुक्तम्-"गुणाद्वाऽप्यभिधानं स्यात्सम्बन्धस्याशास्त्रहेतुत्वादि"ति। तदेवमयुक्तमेतत्-विधिसमन्वये शास्त्रप्रमाणत्वं ब्रह्मण:।।

अथापि-"अथ यदत: परो दिवो ज्योतिरि"ति प्रपञ्चातिरिक्तब्रह्माभ्युपगमे देवताविग्रहवत्त्वन्यायसंभवाद् मोक्षकामस्य ब्रह्मोपासनं विधीयते, तथा च श्रुति:-"विद्यया तदारोहन्ती"ति, न च साध्यत्वेऽप्यन्तवत्त्वम्; शब्दगम्यत्वादनावृत्ते:-"न च पुनरावर्तते" इति। न ह्येष तर्कगम्य:, येन तर्केणास्य तत्त्वं व्यवस्थाप्येत, शब्दगम्यस्य तु शब्दादेव तत्त्वव्यवस्थेति मन्वानस्योत्तरमाह भाष्यकार:- ***न कर्मब्रह्मविद्याफलयोर्वैलक्षण्यादिति*।।** वस्तुसंग्रहवाक्यमेतत्। **अस्यैव प्रपञ्च:- *अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्त इत्येतदन्तं** भाष्यम्*।। अस्यायमर्थ:-संक्षेपत: श्रुतितो न्यायतश्च मोक्षस्य नित्यसिद्धत्वप्रतीतेर्न क्रियासाध्यो मोक्ष इति। कथम्? यदि सन्ध्योपासनवन्मानसं ब्रह्मकर्मकमुपासनं नाम धर्मो मोक्षफल: स्वर्गादिफलयागवद्विधीयते, तथा सति शरीरवतैव तत्फलं भोक्तव्यम्, इति-"अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत:" इत्यशरीरमोक्षानुवादो योग्यप्रियाप्रियस्पर्शनाभावानुवादश्च निरालम्बनौ स्याताम्। न चाशरीरत्वमेव धर्मकार्यम्; स्वाभाविकत्वात्तस्य। तेनानुष्ठेयविलक्षणं मोक्षाख्यमशरीरत्वं स्वभावसिद्धं नित्यमिति सिद्धम्।।

तथापि कथंचित्परिणामि नित्यं स्यात्, स्यादपि कदाचिद्धर्मकार्यम्। इदन्तु कूटस्थनित्यं ब्रह्म जिज्ञास्यत्वेन प्रक्रान्तम्, यत्स्वरूपावगमो जीवस्य मोक्षोऽभिप्रेयते। तत्र यदि हस्तगतविस्मृतसुवर्णादिवद् भ्रान्तिमात्रव्यवहितं मोक्षं प्रत्याख्याय, ब्रह्मविषयध्यानक्रियातो देवताविषययागादिवत्प्रतिविशेषो भोग्यो मोक्ष: कल्प्येत, ततस्तेष्वेव तारतम्यावस्थितेषु यागफलेष्वयमपि तथाभूत: स्यात्। तत:-"तद्यथेह कर्मचितो लोक: क्षीयते, एवमेवामुत्र पुण्यचितो लोक: क्षीयते" इति लिङ्गदर्शनोपबृंहितन्यायागतनित्यत्वो मोक्ष: प्रसज्येत। न च तथाभ्युपगमो मोक्षवादिनाम्। ***अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्त इत्युपसंहार:*।।**

यत्पुन:-"न च पुनरावर्तते" इति शास्त्रावगतं नित्यत्वं न तर्केणापनेतुं युक्तमिति, तदयुक्तम्; वर्तमानापदेशत्वेन तथाभावे प्रमाणापेक्षणात्। न च कार्यस्य नित्यत्वे प्रमाणमस्ति; परमाणूनां पाकजो गुणो नित्यत्वे नोदाहरणम्; प्रक्रियामात्रसिद्धत्वात्। किंच तेषामिह न पुनरावृत्ति:; "इमं मानवमावर्तं नावर्तन्ते" इति श्रुतिरिहेममिति विशेषणादस्मिन् कल्पेऽनावृत्तिं दर्शयति, नानवधिकामनावृत्तिम्। *अपिच* अभ्युपेत्य ब्रह्मण: क्रियानुप्रवेशं मोक्षस्यानित्यत्वदोष उक्त:, नतु क्रियानुप्रवेशं क्षमते वेदान्तवाक्यगत: पदसमन्वय:। तथा च "ब्रह्म वेद ब्रह्मैव भवती" त्याद्या: श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति; वेदन-ब्रह्मभवनयोरेककालत्वनिर्देशात्। अतो न विदितस्य क्रियायां विनियोग:।

तथा **"तद्धैतत्पश्यनृषिर्वामदेव: प्रतिपेदे" इति ब्रह्मदर्शन-सर्वात्मभावयोरेक**कालत्वनिर्देशाद्

मध्ये क्रियान्तरं वारयति पश्यन्निति शतृप्रत्ययः; ''लक्षण-हेत्वोः क्रियायाः'' इति क्रियाहेतुभूताद्धातोः शतृप्रत्ययस्मरणात्, क्रियायाश्चाव्यव्यवहिते हेतुमति हेतुत्वात्।

यथा ''तिष्ठन् गायती''ति तिष्ठति-गायत्योर्मध्ये क्रियान्तराभावः प्रतीयते, तद्वत्। अत्र न स्थितिक्रियासामर्थ्यादेव गीतिक्रियानिर्वृत्तिः, अपि तु प्रयत्नान्तरात्। शब्दतो न तयोर्मध्ये क्रियान्तरप्रतीतिरित्येतावतोदाहरणम्। इह पुनर्न सर्वात्मभावस्य ब्रह्मदर्शनातिरेकेण प्रयत्नान्तरापेक्षा विद्यते।।

किंच-''तस्मै मृदितकषायाय तमसः पारं दर्शयती'' त्याद्याः श्रुतयस्तमसो मिथ्याज्ञानस्य मोक्षव्यवधायिनोऽपनयनमात्रं दर्शयन्ति, न मोक्षं क्रियासाध्यम्।

इतश्चैतदेवम्, अन्येऽपि न्यायविदो मिथ्याज्ञानापाये तदनन्तरं दुःखाभावं निर्वाणं दर्शयन्ति। **मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति,** न क्रियातः। कथं गम्यते? ''इन्द्रो मायाभिः पुरुरूप ईयते'' इति मिथ्यैव भेदावभासः, तस्य प्रतिपक्षादभेदावभासादपनय इति गम्यते।।

अथापि स्यान्नैकत्वविज्ञानं यथावस्थितवस्तुविषयम्, येन मिथ्यारूपं भेदावभासं निवर्तयेत्, अपितु संपदादिरूपम्; विधितः पुरुषेच्छया कर्तव्यमिति। संपन्नाभाल्पमपि वस्त्वालम्बनीकृत्य केनचित्सामान्येन दर्शनमात्रान्महद्वस्तुसम्पादनम्। ततश्च तत्फलावाप्तिः, फलस्यैव वा संपादनम्; यथा-मनसो वृत्त्यनन्तत्वसामान्येनानन्तविश्वदेवसंपादनं कृत्वाऽनन्तलोकजयः। एवं जीवस्य चिद्रूपसामान्येन ब्रह्मरूपसंपादनं कृत्वा ब्रह्मफलमवाप्यत इति। अध्यासस्त्वब्रह्मणि मन-आदित्यादौ ब्रह्मदृष्ट्योपासनम्, जीवस्यापि ब्रह्मदृष्ट्योपासनम्। संपदि-आलम्बनमविद्यमानसमं कृत्वा संपाद्यमानस्यैव प्राधान्येन मनसाऽनुचिन्तनम्, अध्यासे त्वालम्बनस्यैव प्राधान्येनानुचिन्तनम्, क्रियायोगो वायोरग्न्यादीनां संहरणात्संवर्गगुणत्वेनोपासनम्। एवं जीवस्य स्वगतेन बृंहत्यर्थयोगेन ब्रह्मेत्युपासनम्। कार्यान्तरेण गुणभूतस्य ब्रह्मदृष्टिः संस्कार आज्यस्येवावेक्षणम्।। अत्रोत्तरम्- ***संपदादिरूपे हीत्यादिना***।। तथा सति तत्त्वमस्यादिवाक्यानां निरुपचरितब्रह्मात्मैकत्वावागमपरः पदसमन्वयो विना कारणेन स्वेच्छामात्रेण संपदादिपरः परिकल्प्येत। तदवगमनिमित्तं च मिथ्याज्ञानापायपूर्विका विस्मृतहस्तगतसुवर्णावाप्तिवद्ब्रह्मावाप्तिः फलमनुभवारूढमपह्नूयेत। ''नेह नानास्ति किंचने''ति च भेदाभावश्रुतिरुपरुद्ध्येत। तस्मान्न संपदादिवत्पुरुषव्यापारपरतन्त्रा ब्रह्मविद्या, किन्तु प्रत्यक्षादिजनितज्ञानवदपरामृष्टहानोपादानवस्तुस्वरूपमात्रनिष्ठेत्यभ्युपगन्तव्यम्।।

तत्रैवं सति कथं ब्रह्म प्रतिपत्युत्तरकालं कर्मकारकतां नीयेत? तत्तज्ज्ञानं वा तदधिगमफलपर्यन्तं सद् विधिविषयो भवेत्? अतो मिथ्यैव भेदावभासः। तस्य प्रतिपक्षादभेदावभासादपनयः। तस्माद् मिथ्याज्ञान-निवृत्तिमात्रं मोक्ष इति श्रुति-न्यायाभ्यां सिद्धम्।।

ननु विदिक्रियाकर्म तावद्भवति ब्रह्म, ततः क्रियासम्बन्धे संभाविते भवति विधेरवसर इत्याशङ्क्याह- ***नच विदिक्रियाकर्मत्वेनेत्यादि ***॥

आह-सोऽयं शान्तिकर्मणि वेतालोदयः-ब्रह्मणः क्रियानुप्रवेशं निराकर्तुं ज्ञानक्रियाया अपि विषयत्वं निराकुर्वता तत एव शास्त्रयोनित्वमपि निराकृतमेव, तदाह- ***अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेदिति ***॥ अत्रोत्तरम्- ***नाविद्याकल्पितेत्यादि ***॥ शास्त्रं हि सोऽयमित्यादिलौकिकवाक्यवद् ब्रह्मणि प्रमाणम्। तथाहि-सोऽयमिति देश-कालभेदोपाधिप्रविलयेनाभेदोऽवगम्यते। तथा त्वंपदार्थोऽप्यात्मानमहंरूपं मन्यमानस्तत्त्व-मसिवाक्यात्तत्पदार्थैकतामुपगच्छन् सोऽयमितिवदहमात्मकेदमंशोपाधिकृतवेद्य- वेदितृ-वेदनात्मक-प्रपञ्चेनार्थात्प्रलीयमानेनावच्छिद्य विच्छिद्यमानानिदंप्रकाशः प्रमाणफलं दर्शितः। तदप्यवच्छेदकविनाशे तदैव विजहन्निर्विशेषतामापद्यते। तेन प्रमाणादिचतुष्टयस्य युगपत्प्रलयेऽपि तदवच्छेदानुभवफलं वाक्यनिबन्धनम्। अतो वेदैकगोचरो निर्वाणमिति वेदविदः प्रतिपेदिरे। तथाचैवंविधस्य प्रमाणव्यापारस्य प्रकाशका मन्त्रब्राह्मणवादा भाष्ये दर्शिताः एवंच नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः। ***यस्य तूत्पाद्यो मोक्ष इत्यादिना*-तस्माद् ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते** इत्यन्तेन भाष्येणाविद्यानिवर्तनेन नित्यमुक्तात्मस्वरूपसमर्पणं मोक्षं विहाय क्रियानुप्रवेशं कल्पयतोऽपि न तस्य तत्र संभव इति दर्शितम्। कथम्? यदि तावदुत्पाद्यो विकार्यो वा मोक्षः? तदा यद्यपि क्रियानुप्रवेशो युक्तः; तथापि मोक्षस्य ध्रुवमनित्यत्वमित्युक्तम् ''**न कर्मब्रह्मविद्याफलयोर्वैलक्षण्यादि**'' त्यादिभाष्येण। अथानित्यत्वपरिहाराय स्थितस्यैवाऽऽप्यत्वमुच्यते, तदपि न; आत्मस्वरूपस्य क्रियापूर्वकाप्यत्वानुपपत्तेः।

व्यतिरेकेऽपि सर्वगतत्वेन नित्यप्राप्तत्वादाकाशेनेव न क्रियापेक्षा प्राप्तिः। अथ विकारवर्तिनोऽपि-''अथ यदतः परो दिवो ज्योतिर्दीप्यते'' इति श्रूयमाणस्य प्राप्तये क्रियापेक्षेति, न; विकारदेशेऽपि ब्रह्मणो विकारसंस्पर्शाभावादविशेषात्। अथ विकारवर्त्येव ब्रह्म न विकारदेशेऽस्ति, तेन तत्प्राप्तये क्रियापेक्षेति, सा तर्हि तत्प्राप्तिरात्मनस्तादात्म्यापत्तिः? उत स्वेनैव रूपेण तत्रावस्थानम्? यदि पूर्वकल्पः, तदा स्वरूपनाशः।

अथ द्वितीयः, संयोगस्य विप्रयोगावसानत्वात् पुनरावृत्तिः। न चापुनरावृत्तिश्रुतिर्वर्तमानापदेशिनी; तथाभावे प्रमाणान्तरमपेक्षमाणा स्वयं प्रमाणीभवति।

संस्कार्यत्वमपि न सम्भवति; गुण-दोषयोराधेयापनेययोस्तत्रासम्भवात्। अथ विद्यमानस्याभिव्यक्तिरादर्शस्येव निघर्षणेन, तच्च न; आत्मनः क्रियारहितत्वात्। अन्याश्रयायास्तु न विषयः; प्रत्यग्रूपत्वात्।

ननु ईश्वराभिध्यानान्मलापगमो भविष्यति दीपप्रभयेव घटावगुण्ठनेन तमोऽपनयः, *उच्यते*-किमसौ मलः परमार्थः सन्? उताविद्यात्मकः। यदि परमार्थः सन्, न तर्हि स्वाश्रयविकारमन्तरेणापसारयितुं शक्यः। न हि विकार आत्मनः संभवति; अविकारित्वश्रुतेः। अथाविद्यात्मकः, न तर्ह्यविद्यावद्वतेन सम्यग्ज्ञानेन विना तस्यापनयः; लोके तथा दृष्टत्वात्, अन्यथा चादृष्टत्वात्। न च स्नानादिक्रिययेव संकार्यत्वसंभवः; अहंकर्तुरिदमंशस्यैव तत्र संस्कार्यत्वात्।

***तस्मान्न संस्कार्योऽपि मोक्षः** * इत्युपसंहरति। अथापि त्वन्यदपि क्रियाफलमस्ति, तद्द्वारेण मोक्षस्य क्रियानुप्रवेशः स्यादित्याशङ्क्याह- ***अतोऽन्यन्मोक्षं प्रतीत्यादि** *॥

न हि दृष्टमदृष्टं वा क्रियाफलमुत्पत्त्यादिचतुष्टयातिरिक्तं शक्यं केनचिद् दर्शयितुम्। तस्माज्ज्ञानस्यैव मोक्षो गोचरः, न क्रियायाः॥

ननु च ज्ञानस्यापि न गोचरो ब्रह्मेत्युक्तम्-''न विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मणः'' इति वदता, सत्यं कर्मत्वं ज्ञानं प्रति निषिद्धम्*; न पुनरनुपयोग एवैकान्ततो ज्ञानस्याभिहितः। तथा च तत्रैवोपयोगप्रकारो दर्शितः-'' ***अविद्यापरिकल्पितभेदनिवृत्तिपरत्वादि**'' त्यादिना भाष्येण। मा तर्हि वोचः-क्रियाया गन्धमात्रस्यानुप्रवेश इह नोपपद्यत इति, ***ननु*** **ज्ञानं मानसी क्रिया**, ***न वैलक्षण्यादित्युत्तरम्***। कथं वैलक्षण्यम्? अजन्यफलत्वात्, उक्तमजन्यफलत्वमहङ्कारटीकायाम्। इदमपरं वैलक्षण्यम्-ज्ञानं न चोदनाजन्यम्, वस्तुजन्यं हि तत्। वस्तु च ज्ञानात्प्रागेव स्वरूपे व्यवस्थितम्। अतस्तत्तन्त्रं ज्ञानम्। न तद् ज्ञानेनान्यथा कर्तुं शक्यम्। अथापि स्यात्-भवेत्प्रत्यक्षं वस्तुजन्यम्, अनुमानादिषु कथम्? तत्रापि लिङ्गादिपरतन्त्रम्, न चोदनायास्तत्रानुप्रवेशः। किंच न चोदनाजन्यं ज्ञानमेकान्ततो वस्तुपरिच्छेदकम्; योषादिष्वग्न्यादिदृष्टिविधानदर्शनात्। अतो वस्तुविषयस्य ज्ञानस्य क्रियात्वेऽपि न चोदनाजन्यत्वम्, न वा पुरुषतन्त्रत्वम्, अपितु प्रमाणवस्तुपरतन्त्रत्वम्, एवं सम्यग्ज्ञानत्वोपपत्तेरग्नाविवाग्निज्ञानस्य। एवं सति ब्रह्मात्मैकत्वविज्ञानस्यापि यथाभूतवस्तुविषयत्वान्न चोदनाजन्यत्वम्। अतो न विधेरत्रावकाशः॥

अतः **श्रूयमाणा** अपि **विधयः** केवलप्रमाणवस्तुपरतन्त्रे ज्ञानेऽकिंचित्करत्वात् **कुण्ठीभवन्ति।** अतोऽर्थवादतयैवाऽऽत्मज्ञानस्तावकत्वेन तदुन्मुखीकरणात् सामर्थ्यसिद्धबहिर्मुखतानिरोधाच्च विधिकार्यलेशस्य विद्यमानत्वाद्विधय इव लक्ष्यन्ते॥

तथा च श्रवणं नाम=आत्मावगतये वेदान्तवाक्यविचारः, शारीरश्रवणं च। मननम्-वस्तुनिष्ठवाक्यापेक्षितदुन्दुभ्यादिदृष्टान्तजन्मस्थितिलयवाचारम्भणत्वादियुक्तार्थवादानुसन्धानम्, वाक्यार्थाविरोध्यनुमानानुसन्धानं च। निदिध्यासनम्-मननोपबृंहितवाक्यार्थविषये स्थिरीभावः,

विधेयस्योपासनापर्यायस्य निष्फलत्वात्। दर्शनम्-अतो वाक्यार्थे स्थैर्यान्निरस्त-समस्तप्रपञ्चावभासविज्ञानधनैकतानुभवः।

कः पुनरत्रार्थवादः? इदमत्र प्रस्तुतम्-क्रियाकारकफलात्मकात् संसाराद्विरक्तायै मैत्रेय्यै मुमुक्षवे मोक्षसाधनमात्मज्ञानं प्रतिपिपादयिषन् ''न वा अरे पत्युः कामाय पतिः प्रियो भवती'' ति पत्यादेरीप्सितत्वं प्रतिषिध्यात्मन ईप्सिततमत्वमाह। *ननु* नैवात्मन ईप्सिततमत्वमुच्यते, किन्तु पत्यादीनामेवात्मार्थतयेप्सितत्वमुच्यते-''आत्मनस्तु कामाय पतिः प्रियो भवती''ति, मैवम्; न हि तस्मिन्ननिष्टे तदर्थमिष्टं भवति। तस्मादनेनोपायेनात्मन एवेप्सितत्वमुक्तम्। ईप्सितश्चेत्, ''द्रष्टव्यः श्रोतव्यः'' इत्येषोऽर्थवादः। एतच्च सर्वं प्रथमसूत्रेणैव सूत्रितम्, विवृतं च भाष्ये॥

अपिच नैवायं विधौ कृत्यः, किं तर्हि? ''अर्हे कृत्यतृचश्चे'' त्यर्हे कृत्यः। *एतेन* -''आत्मेत्येवोपासीत'' ''आत्मानमेव लोकमुपासीते'' त्येवमादीनि विधिच्छायानि वाक्यानि व्याख्यातानि-*वेदितव्यानि*॥ अतो हानोपादानशून्यात्मावगमादेव कृतकृत्यता प्रतीयते; श्रुति-स्मृति-वादानां च तथा प्रस्थितत्वात्।

***तस्मान्न प्रतिपत्तिविधिविषयतया ब्रह्मणः समर्पणमित्युपसंहरति*॥** *तस्यायमर्थः*-न प्रमाणात्मकेनेतरेण वा ज्ञानव्यापारेण विधीयमानत्वेन कल्पितेन संस्पर्शो ब्रह्मण इति। *यदपि केचिदाहुरित्यादि*॥

अस्यायमर्थः-यदि स्वरूपमात्रनिष्ठोऽपि वेदभागोऽस्ति, तत इदं पूर्वोक्तं प्रतिष्ठां लभते; अन्यथा क्रियानुप्रवेशातिरिक्तमवेदार्थ एव स्यादिति, अस्योत्तरम्-*तन्न; **औपनिषदस्य पुरुषस्यानन्यशेषत्वादिति*** वस्तुसंग्रहवाक्यम्।

अस्यैव प्रपञ्चः-*योऽसावुपनिषत्स्वेवाधिगत इत्यादिः*॥ *अस्यायमर्थः*-योऽयमहंप्रत्ययविषयात् क्रियासम्बन्ध्यात्मनोऽतिरिक्तः सम एकः सर्वभूतेष्वहंकर्तुरपि साक्षिभूतः, न स केनचित्प्रमाणेन सिद्धः, येन क्रियाशेषतां नीयेत। न हि प्रमाणान्तरसिद्धः क्रियासम्बन्धितयोपदेष्टुं शक्यः। न च स प्रतीयत इति युक्तं वक्तुम्; तत्प्रतिपादकोपनिषत्पदसमन्वयस्य दर्शितत्वात्। अत एवौपनिषदत्वविशेषणम्; अनन्यविषयत्वात्। तच्च वेदान्तानां तत्परत्वेऽवकल्पते।

नैष प्रतीयमानोऽपि शुक्तिरजतवन्मिथ्येति शक्यं वक्तुम्; बाधाभावात्॥ इतश्च न शक्यते मिथ्येति विदितुं तस्मिन्नौपनिषदे पुरुषे ''स एषः'' ''नेतिनेत्या'' त्मशब्दप्रयोगात्। आत्मनश्चानिराकार्यत्वात्, ***य एव निराकर्ता तस्यैवात्मत्वप्रसङ्गात्*॥**

न च तस्य कदाचिदभावः सम्भवति; अभावहेतूनामविषयत्वात्। न च निर्हेतुको विनाशः; चितेरेकरूपावभासेन क्षणभङ्गनिराकरणात्। अतोऽवच्छेदत्रयशून्ये तस्मिन् स्वयंप्रकाशमाने सर्वस्य पुरुषावधिर्विनाशस्य। ***सा काष्ठा सा परा गतिः***॥ तदेवमसंसार्यात्मनि प्रमाणान्तरागोचरे वेदान्तवाक्यसमन्वयात् प्रतीयमाने कथं तत्परो वेदभागो न भवेत्? कथं वा प्रतीयमानो निराक्रियेत?

ननु ''आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामि'' त्यक्रियार्थानां पदानामर्थशून्यत्वं शास्त्रतात्पर्यविद आहुः। तस्मात्प्रवृत्ति-निवृत्तिव्यतिरिक्तार्थवादिनां निरालम्बनत्वाद् न ततो वस्त्ववगमः सामान्यतोदृष्टनिबन्धनो भ्रमः। तेन प्रवृत्ति-निवृत्त्यनुपयोगि वस्तु न शब्दादवगम्यते, अत एव तन्मिथ्येति शक्यते वक्तुम्; प्रमाणान्तरस्यापि तद्विषयस्यासम्भवात्। कथं पुनः प्रवृत्ति-निवृत्त्यनुपयोगि वस्तु न शब्दादवगम्यते? शब्दस्य तत्र सामर्थ्याग्रहणत्। न चागृहीतसामर्थ्य एव शब्दश्चक्षुरादिवद्विज्ञानं जनयति। सामर्थ्यग्रहणं च ज्ञानकार्योन्नेयम्। ज्ञानं च विशिष्टार्थविषयं तद्विषयप्रवृत्त्याऽवगम्यते। तदभावे कुतः सामर्थ्यकल्पना स्यात्? अक्लृप्तसामर्थ्यश्च शब्दोऽक्रियाशेषेऽर्थे कथं विज्ञानं जनयेत्? उच्यते। नैव सूत्रकार-भाष्यकारयोरभिप्रायो लौकिको वा न्यायः सम्यगवगतो भवता। पश्यतु भवान्-देवदत्त! 'गामभ्याज' 'शुक्लां दण्डेने'ति प्रवर्तकाभ्याजेतिपदातिरेकिणां देवदत्तादिभूतार्थवादिनामप्रवर्तकानामपि प्रवर्तकादेव वाक्याद्भूतवस्तुविषयमपि सामर्थ्यं प्रतीयते? न वेति? प्रतीयते चेत्, निष्प्रयोजनत्वमानर्थक्यम्, न निरालम्बनत्वम्। तदाह भाष्यकारः- *अपिच आम्नायस्य क्रियार्थत्वादित्यादिना भाष्येण*। प्रयोजनं चानन्तरं पारम्पर्येण वा सुखावाप्तिर्दुःखपरिहारो वा स्यात्। अतस्तदर्थक्रियानुपयोग्यर्थवाचिनां ''सोऽरोदीदि'' त्यादिपदानां भवत्वानर्थक्यम्, ब्रह्मात्मत्वावगतिसमन्वितानां तु परमपुरुषार्थफलानां कथं निष्प्रयोजनत्वम्। स्यादेतत्-यद्यपि प्रवर्तकादेव वाक्याद्भूतार्थविषयमपि सामर्थ्यं प्रतीयते; तथाऽपि नाप्रतिपन्नभूतार्थावगतेः संभवः। क्रियार्थतयैव संसर्गावगमात्। न हि गोपदात्तदर्थः सास्नादिमत्पिण्डधर्मत्वेनावगतो व्युत्पत्तिकाले पुनः प्रयोगान्तरेष्वप्रतिष्ठितः केसरादिमत्पिण्डधर्मत्वेन वा प्रतीयते।

विषम उपन्यासः; गोपदस्याभिधेयसम्बन्धेन नानाविधसामर्थ्यमुपलब्धम्। अतो युक्तैकरूपैव प्रतीतिः। शब्दान्तरार्थान्वये पुनः प्रतिविभक्ति प्रतिपदार्थान्तरं च प्रयोगभेदादन्यथा च सम्बन्धग्रहणकाल एवाऽऽवापोद्वापनिबन्धनः समन्वयो दृश्यते। तेन द्रव्य-गुण-क्रियाभिधायिभिः पदैः सम्बन्धयोग्यताभिधायिविभक्तिसंयुक्तैः प्रयोगैदम्पर्यवशादनियतः सम्बन्धो व्युत्पत्तिकाले निरूपितः। तथा च ''वषट्कर्तुः प्रथमभक्षः'' ''तस्मात्पूषा प्रपिष्टभागः'' इत्येवमादौ क्रियाशून्यानां समन्वयो दृश्यते। यस्तु कर्तव्य इति क्रियासम्बन्धः स समन्वयनिमित्तो न तन्निमित्तः समन्वयः। यत्तु तद्भूतानां क्रियार्थेन समाम्नाय इति सूचयामास जैमिनिः, तदपि सिद्धेषु रूपादिष्वर्थेषु वर्तमानानां सामानाधिकरण्याद्यर्थत्वेन समाम्नायः समुच्चारणमिति यतो दर्शितः समन्वयो विशेषण-विशेष्यत्वेनापि क्रियार्थेनेति तु

धर्मजिज्ञासोपक्रमात्प्रकृतोपयोगितया सूचितम्। तथा च भाष्यकारोऽपि "दृष्टो हि तस्यार्थः कर्मावबोधनमि" त्यर्थसद्भावमात्रे कथनीये कर्मावबोधनमिति प्रकृतोपयोगित्वेनैवोक्तवान्। तदेतदाह भाष्यकारः-यदपि शास्त्रतात्पर्यविदामनुक्रमणमित्यादिभाष्येण। अत एव पूर्वेण तन्त्रेणागतार्थत्वाच्छारीरकारम्भः। तत्र हि वेदस्य विवक्षितार्थत्वं स्वतःप्रामाण्यं च विज्ञानोत्पत्तौ शब्दस्य सामर्थ्यमित्येतत्सर्वमवगतम्। क्रियार्थेन समाम्नाय इति तु धर्मजिज्ञासाप्रतिज्ञानुसारेण सूत्रितम्। इह पुन "स्तत्तु समन्वयादि"ति विशेषण-विशेष्यात्मकमपि गौणमपि सामानाधिकरण्यं विहायैकस्मिन्निरंशे "तत्त्वमसी"ति समन्वयो मुख्यः प्रदर्शितः। तथा च भगवान् पाणिनिरव्यतिरिक्ते प्रातिपदिकार्थमात्रे प्रथमां स्मरति, नाऽस्तिक्रियाकर्तर्येवातिरिक्तेऽर्थे। तेन च कात्यायनस्य "अस्तिर्भवन्तीपरः" इति मतं नानुमन्यते। दृश्यते च 'फलिता अमी द्रुमाः' 'राज्ञोऽयं पुरुषः' इत्यस्तिक्रियाशून्यः समन्वयः। नात्रापि ये फलिता द्रुमास्ते सन्ति, यो राज्ञः पुरुषः सोऽस्तीति विवक्षितम्; अपित्वेते द्रुमाः फलिताः, अयं पुरुषो राज्ञ इति सम्बन्धमात्रावसितं वाक्यम्। एवं सामान्यतः सिद्धस्य जगत्कारणस्य सर्वज्ञत्वादिस्वभावत्वे त्वंपदार्थस्य च ब्रह्मात्मतायां समन्वयो वेदान्तवाक्यानां सिद्धः, न तत्रास्तिक्रियाया वस्तुस्वरूपान्तर्वर्तिन्या अप्यनुप्रवेशो दूरत एव बाह्यायाः॥

किञ्च "ब्राह्मणो न हन्तव्यः" इतिप्रतिषेधवाक्यसमन्वये न क्रिया क्रियार्थो वाऽवगम्यते, किन्तु क्रियानिवृत्तिरेव नियमेन प्रतीयते। व्रतशब्दसमन्वयात्तु प्रजापतिव्रतादिषु "नेक्षेतोद्यन्तमादित्यमि" त्यादिष्वनीक्षणं मानसी संकल्पक्रिया प्रतीयते-'अनीक्षणं कुर्यात्,-नेक्षेऽहमिति संकल्पयेदिति, न नञः समन्वयमात्रात्; तस्य समन्वीयमानार्थाभावकरत्वात्। *"न च स्वभावप्राप्तहन्त्यर्थानुरागेणे" त्यादिभाष्यसमन्वयमात्रात्; तस्य समन्वीयमानार्थाभावकरत्वात्। न च स्वभावप्राप्तहन्त्यर्थानुरागेणे त्यस्यायमर्थः*-स्वभावत एव रागादिनिमित्ताच्छास्त्रमन्तरेणैव हननक्रिया प्राप्ता यदि नञाऽनुरज्यते, विशेष्यते, तदा भवत्यहननमिति। ततश्चाहननं कुर्यादिति वाक्यार्थः स्यात्, न 'हननं न कुर्यादि'ति हननक्रियानिवृत्त्यौदासीन्यम्। अतो न हन्यामिति मानसी संकल्पक्रियाऽपूर्वाऽभिहिता स्यात्। न चैतद्युक्तम्; नञः सम्बन्ध्युपमर्दरूपत्वात्। अनीक्षणे तु व्रतशब्दबलात्तथा समन्वयः, न नञः सामर्थ्यादित्युक्तम्॥

ननु नञर्थे नियोगः प्रतिषेधेषु, तेन यागाद्यनुष्ठानादिव नञर्थानुष्ठानान्नियोगः साध्यः, किमुच्यते क्रियानिवृत्त्यौदासीन्यं प्रतीयत इति? वार्तमेतत्। नञर्थो हि नाम न क्रिया, नापि साधनम्, अपि तु येन संसृज्यते तस्याभावो न तत्सिद्धिहेतुः। एवं प्रतिषेधस्य विधेरन्यत्वं सिध्यति। अन्यथा विधिरेव सर्वं स्यात्। तस्माद् न संसृज्यमानाभावमात्रे प्रतिषेधवाक्यं पर्यवस्यति। तत्र न विधिगन्धोऽपि विद्यते। तच्च संसृज्यमानं विधि-निमन्त्रणामन्त्रणाधीष्ट-संप्रश्नाभ्यनुज्ञानानामभावात्प्रतिपाद्यधर्मः प्रतिषिध्यमानक्रियाफलं प्रार्थना प्रतिषेधवाक्ये लिङाद्यर्थः। तेन तदभावः प्रतिषेधार्थः, स च प्रागभावः स्वभावसिद्धः।

तस्मात्संस्कारोद्बोधनिमित्तसन्निधावपि तत्प्रतिबन्धे प्रयत्न आस्थेयः। स च यद्यपि साध्यः; तथाऽप्यन्वय-व्यतिरेकगम्यो न शब्दार्थः; तत्प्रतिपादकपदाभावाच्च, एकवाक्ये संसृष्टपदार्थव्यतिरेकेणान्यत्र वाक्यार्थत्वाभावाच्च। अतो यश्चार्थादर्थो न स चोदनार्थः। वाक्यन्तु क्रियाशून्यमेवावसितम्। न साध्यं किञ्चित्तेन विषयीकृतम्; औदासीन्यमात्रावसितत्वात्तस्य।।

अथ पुनर्नञर्थविषयो नियोग एव प्रतिषेधेऽपि वाक्यार्थ इत्यभिनिवेशः, भवतु; तथाऽपि प्रतिषिध्यमानक्रियानिवृत्त्या स सिध्यति, क्रियोपादाने च तत्फलप्रार्थनैव हेतुरिति तत्कारणप्रतिबन्धे प्रयत्नास्थानान्नियोगासिद्धिः। तच्चान्वयव्यतिरेकावसेयमिति पूर्वोक्तान्मार्गान्न विशिष्यते। तदेवं वृद्धव्यवहारानुसारेणैव समन्वयानुसरणे सति तद्गम्यं ब्रह्म न धर्मवच्चोदनागम्यम्। दर्शितानि च वेदान्तवाक्यानि कारणसामान्ये सिद्धे तद्विशेषावगमाय समन्वितानि-''यतो वा इमानि भूतानि जायन्ते'' इत्यादीनि तत्त्वमसीत्यादीनि च।

यत् पुनरुक्तम-प्रतिपन्नब्रह्मात्मभावस्यापि पूर्ववत्संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमस्य, ततो न तन्मात्रे तस्य पर्यवसानमिति, अत्रोत्तरम्- ***नावगतब्रह्मात्मभावस्येत्यादि ***।। अस्यायमर्थः-न कर्मनिमित्तस्तावच्छरीरसम्बन्धः; इतरेतराश्रयदोषात्क्रियादिरहितत्वाच्च चैतन्यस्य। अनादित्वेऽप्यन्ध-परम्परावदप्रतिष्ठत्वात्। तन्निमित्तत्वे च पुत्रादिशरीरेष्विव गौणत्वप्रसङ्गात्, तथानुभवाभावात् प्रसिद्धगौणत्वप्रकारासम्भवात्, पुत्रादिशरीरेणेव स्वशरीरेणापि प्रमातृत्वाभावप्रसङ्गात्। पारिशेष्याद-विद्यानिमित्तः शरीरसम्बन्धः। तस्यां च निवृत्तायां तत्सम्बन्धनिवृत्तौ कथं पूर्ववत्त्वनिमित्तः सुखदुःखानुभवः?

तथा च श्रुति-स्मृतिवादा **ब्रह्मविदः** सर्वसंसारप्रवृत्त्यभावं दर्शयन्त उदाहृता भाष्ये। तस्मान्न ब्रह्मात्माभिमानिनः पूर्ववत्संसारित्वम्; तदभिमानविरोधात्। वैषयिकस्तु साक्षादनुभवाभिमानः संसार-विषय आरब्धकर्मशेषनिमित्तः, तिमिरनिमित्तद्विचन्द्रवत्। मनन-निदिध्यासनयोर्न ब्रह्मावगत्युत्तरकालीनता, किन्तु श्रवणवदवगत्युपायतया पूर्वकालतैवेत्युक्तम्।।

तदेवं सिद्धस्य वस्तुनः स्वरूपसत्तामात्रेणाप्रतिपन्नस्य प्रमाणविषयतया प्रमेयत्वाद्विधीयमानक्रियाकर्मत्वे तु कारकत्वस्य प्रमाणान्तरसिद्ध्यपेक्षत्वात्ततः सिद्ध्यनुपपत्तेर्वाक्यभेदप्रसङ्गात्प्रत्यक्षादिविरोधे देवताधिकरणन्यायासिद्धेर्वाक्यान्तरसिद्धस्य कर्मकारकत्वे चतुर्विधस्यापि कर्मकार्यस्य तत्रासम्भवात्, तत्कर्मकोपासनाद्देवताकर्मयागादिवत्स्वर्गोपमो मोक्षः फलं कल्प्येत; तस्य तद्वदेवानित्यत्वप्रसङ्गात्, ''ब्रह्म वेद ब्रह्मैव भवती'' त्यादिभ्यो ब्रह्मवेदन-मोक्षफलयोर्निरन्तरत्वप्रतिपादकेभ्यो वाक्येभ्योऽर्थादन्तराले क्रियानुप्रवेशनिराकरणात्, ''तरति शोकमात्मविदि'' त्यादिश्रुतिभ्यो मोक्षप्रतिबन्धनिवृत्तिमात्रस्यैवात्मज्ञान-फलस्य दर्शितत्वात्, साध्यान्तराभावे क्रियानुपपत्तेर्ब्रह्मात्मावगमस्य च मुख्यैक्याधिकरणस्य

संपदादिविद्विकल्पनानुपपत्तेः, प्रमाणजन्याया अपि विदिक्रियायाः कर्मत्वनिषेधाद्विधीयमानोपास्ति-क्रियाविषयत्वस्य दूरनिरस्तत्वाद् विदिक्रियाविषयत्वेऽपि समारोपितनिवर्तनमुखेन नित्यसिद्धचैतन्यस्य ब्रह्मस्वरूपतासमर्पणाद् वाक्यविषयत्वोपपत्तेः, सत्यपि वा विदिक्रियाकर्मत्वे तस्य च विध्यनायत्तत्वाद्विधिच्छायानां संस्तावकत्वेनाहार्यत्वात् संसारनिवृत्तेश्च ज्ञानफलस्य दृष्टत्वात्। अतो विधिनिरपेक्षं स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम्; वेदान्तवाक्यसमन्वयादिति सिद्धम्।।

एवंच सति पदानां परस्परसमन्वयजनितविज्ञानातिरेकेण चक्षुरादिवत्प्रवर्तकत्वस्याभावात् तद्विषयः शास्त्रारम्भः पृथगुपपद्यते; अन्यथाऽत्रापि बोधकत्वातिरेकेण प्रवर्तकत्वमपि चेत्, ''अथातो धर्मजिज्ञासे'' त्येवारब्धत्वान्न पृथगारभ्येत। अथाप्यबहिःसाधनत्वात्ततः परिशेषितमिति, तथाप्यथातः परिशिष्टधर्मजिज्ञासेति प्रतिज्ञा स्यात्; प्रवर्तकविशेषजिज्ञासनात्। तदेवं ब्रह्मावगमात् प्रागेव विधिविधेय-प्रमाण-प्रमेयव्यवहारः। परतस्तु प्रमातुर्विधिविषयस्य चाभावान्न तत्सद्भाव इति।

अपिचाहुरिति।। प्रसिद्धमेतद् ब्रह्मविदामिति पूर्वोक्तं न्यायं संक्षेपतः श्लोकैः संगृह्णाति ***गौणमिथ्यात्मन इति***।। गौणोऽहंमानो ममत्वेन सम्बन्धात्पुत्रदारादौ। अतः स गौण आत्मा। मिथ्यादेहादेरारभ्याहङ्कर्तुरिदमंशपर्यन्तोऽहंमानो नात्मन्यात्माभिमानात्; अतः स मिथ्यात्मा। तस्योभयस्याप्यात्मनो मुख्यपरमार्थब्रह्मात्मावगमेन तदाधारपुत्रदेहादिबाधनादसत्त्वं तन्निमित्तं शास्त्रीयं नियोज्यत्वं शारीरं च भोक्तृत्वं निमित्ताभावान्न कथंचिदुद्भवेदित्यर्थः। तदेतद् द्रढयन्नाह- ***अन्वेष्टव्यात्मेति***।। ''सोऽन्वेष्टव्यः'' इत्याद्युपक्रमेणोपदिष्टापास्ताशेषसंसाररूप-ब्रह्मात्मावगमात्प्रागेव प्रमातृत्वाभिमानः प्रत्यक्चितेर्यदा पुनस्तद्रूपं विस्मृतसुवर्णवदवाप्तम्, तदा स एव प्रमातृत्वाभिमतो निरस्तसंसारदोषः सम्पन्नः। कुतस्तस्य

यद्ययमहमुल्लेखप्रमुखप्रमातृत्वादिव्यवहारः कल्पितः, कथमिदानीमस्य प्रामाण्यम्? इत्याशङ्क्याह- *देहात्मप्रत्यय इति*।। यथा देहे विशिष्टजातीये तद्व्यतिरिक्तस्याहङ्कर्तुरहंमानसम्बन्धः कल्पितोऽपि स्वनिबन्धने लोकशास्त्रव्यवहारे यथाऽवगतितत्त्वहेतुः, तथाऽयं कल्पितोऽप्यलौकिकात्म-स्वरूपप्रतिपत्तेः प्राक् प्रमाणम्; निश्चितप्रत्ययोत्पादनाद्बाधानुपलब्धेश्चेति।।

इति परमहंसपरिव्राजकादि-श्रीशङ्करभगवत्पादान्तेवासिवर-श्रीपद्मपादाचार्यकृतौ पञ्चपादिकायां वेदान्तानां ब्रह्मणि समन्वयनिरूपणं नाम नवमं वर्णकं समाप्तम्।।

श्रीकण्ठभाष्ये

प्रथमाधिकरणे जिज्ञास्यतया प्रतिपादितंस्य परब्रह्मणश्शिवस्य परिज्ञाने लक्षणापेक्षायां द्वितीयाधिकरणेन लक्षणं जगज्जन्मादिरूपमभिहितम्। तस्मिन् किं प्रमाणमित्याकाङ्क्षायां तृतीयाधिकरणेन वेदान्तशास्त्रस्य तद्विषये प्रामाण्यं तन्मूलत्वं च निरूपितम्। येन यदव्यभिचारेण सिद्ध्यति तद्धि तस्य प्रमाणमुच्यते। वेदान्तवाक्यानां कथं वा ब्रह्मसाधकत्वमित्याकाङ्क्षायां चतुर्थाधिकरणमवतार्यते-

॥ सू०॥ तत्तु समन्वयात्॥ 4॥

तच्छब्देन प्रकृतं ब्रह्म परामृश्यते। तुशब्देन सर्वाणि वेदान्तवाक्यानि समाह्रियन्ते। समन्वयशब्देन तात्पर्येण संबन्ध उच्यते। तत् ब्रह्म वेदान्तवाक्यानि तात्पर्यलिङ्गसम्बन्धात् बोधयन्तीति सूत्रार्थः। अस्य सर्वाणि वेदान्तवाक्यानि विषयः। वेदान्तवाक्यानां ब्रह्मबोधकत्वं युक्तं न वेति संशयः। सर्वत्र सम्बन्धग्रहणसापेक्षं शब्दस्यार्थावबोधकत्वम्। शब्दार्थयोस्सम्बन्धज्ञानमन्तरेण हि पुरुषस्य शब्दार्थप्रत्ययो न भवति। सम्बन्धज्ञानं च वृद्धव्यवहारसापेक्षम्। व्यवहारश्च कार्यैकगोचरः। तथा हि-'गामानय' 'गां बधाने' ति वृद्धवाक्यश्रवणसमनन्तंर प्रवर्तमानं प्रयोज्यवृद्धमवगम्य पार्श्वस्थो व्युत्पित्सुरेवमवधारयति सर्वथाऽयं कार्यावगतिसमनन्तरमेव प्रवर्तते। सा च कार्यावगतिरेतस्मादेव वाक्यात्समुत्पन्ना। अन्यथा कथमस्यैतद्वाक्यश्रवणसमनन्तरं प्रवृत्तिरिति। पुनर्गवानयनबन्धनदर्शनात् कार्यविशेषं निश्चिनोति। तदेवं कार्यार्थत्वाव्द्युत्पत्तेर्न सिद्धे ब्रह्मणि शब्दस्य प्रामाण्यम्। किं च कार्यविशेषत्वाज्जगतः कर्तृविशेषस्य ब्रह्मणोऽनुमानादपि सिद्धेः कथमस्मिन्नप्राप्तविषयाणां वेदान्तवाक्यानां प्रामाण्यम्। अथवा विधिपराण्येव वेदान्तवाक्यानि न ब्रह्मपराणि। उभयपरत्वे वाक्यभेदः स्यात्। अतो वेदान्तवाक्यानां न ब्रह्मबोधकत्वं युक्तमिति पूर्वः पक्षः। युक्तमिति सिद्धान्तः। वेदान्तवाक्यानां तात्पर्यलिङ्गसमन्वयेन ब्रह्मबोधनसमर्थत्वात्। यदुक्तं 'कार्यार्थत्वाद्व्युत्पत्तेर्न सिद्धे ब्रह्मणि शब्दस्य प्रामाण्य' मिति तदसत्। 'पुत्रस्तेजात' इत्यादिषु सिद्धार्थेष्वपि वाक्येषु सम्बन्धग्रहणदर्शनात्। वृद्धव्यवहारेऽपि व्युत्पित्सुः स्वस्य प्रवृत्तिहेतुभूतायाः कार्यावगतेः पदार्थज्ञानपूर्वकत्वावगमात् प्रयोज्यवृद्धस्य प्रयोजकवाक्यं पदार्थज्ञानमुत्पादयतीति निश्चिनोति। ततस्सिद्धार्थेष्वपि शब्दस्याभिधाननिश्चयः। अथवा किमिह वृद्धव्यवहारेण। व्युत्पत्तेः प्रकारान्तरेणापि सिद्धत्वात्। तथा हि-बाला मात्रादिभिश्शिशुपशुप्रभृतीनर्थानङ्गुल्यादिना निर्दिश्य तत्तच्छब्दांस्तेषु तेष्वर्थेषु प्रयुञ्जानैर्बहुशश्शिक्षितास्तेषु तेष्वर्थेषु व्युत्पद्यन्ते। काव्यनाटकानभिज्ञाः पुरुषास्तदभिज्ञपुरुषसमीपमेत्य पदविच्छेदं कृत्वा अस्य शब्दस्यायमर्थ इति सर्वशब्दानामर्थमवगच्छन्ति। अतः सिद्धार्थेऽपि व्युत्पत्तिसम्भवात् तत्र शब्दस्य प्रामाण्यमस्ति। ततो वेदान्तवाक्यानां ब्रह्मणि। प्रामाण्यम्। यदुक्तं 'जगतः कार्यविशेषत्वात् कर्तृविशेषस्य ब्रह्मणोऽनुमानादपि सिद्धि' रिति तन्न सम्भवति। विचित्ररचनस्य रथप्रासादादेरनेककर्तृकत्वदर्शनादनुमानेनास्य जगत एककर्तृकत्वसाधनायोगात्। व्याप्तिबलात्

कर्मवश्यत्वादीनां कर्तरि प्राप्तेश्च पूर्वमुक्तत्वात्। अतो नानुमानगम्यं ब्रह्म भवति। किं च श्रुत्यानुगुण्यादनुमानमपि ब्रह्मणि प्रमाणं भवतु नाम। यत्र वाक्यानां तात्पर्यं तत्र हि तेषां प्रामाण्यं न प्रत्यक्षादीनामिव सर्वत्र। वेदान्तवाक्यानां ब्रह्मणि तात्पर्यनिर्णायकानि कानि लिङ्गानीति चेत् उपक्रमादीनि। तथा पठन्ति-'उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णय' इति तदिह उपक्रमादिभिर्लिङ्गैर्वेदान्तवाक्यानां ब्रह्मणि तात्पर्यं निश्चीयते। य उपक्रमादिभिस्तात्पर्यनिर्णयस्तदेव वेदान्तवाक्यानां श्रवणमित्युच्यते। तथा ह्युच्यते- 'अज्ञानप्रभवं दुःखं ज्ञानं तस्य निवर्तकम्। सर्ववेदान्तवाक्यानां श्रवणं तत्प्रवर्तकम्। श्रवणं नाम वाक्यानां वैदिकानां परात्परे। उपक्रमादिभिर्लिङ्गैश्शिवे तात्पर्यनिर्णयः।' इति। उपक्रमोपसंहारावेकं लिङ्गं वेदान्तशब्दानां ब्रह्मणि शिवे तात्पर्यनिर्णये। तत्र तात्पर्यं नाम तत्स्वरूपोपासनाविषयत्वम्। उपक्रमोपसंहारौ 'सदेव सोम्येदमग्र आसी' दित्युपक्रमः। 'तत्वमसी' त्युपसंहारः। 'धातुः प्रसादान्महिमानमीश' मित्युपक्रमः। 'यः परः स महेश्वर' इत्युपसंहारः। एवमन्यत्रापि द्रष्टव्यम्। 'तत्त्वमसि' 'सर्वो वै रुद्रः' 'अम्बिकापतय उमापतये' 'यो वै रुद्रस्स भगवान्भूर्भुवस्सुव' रित्यभ्यासः। अपूर्वता वेदेतरप्रमाणाप्राप्तता। फलं ब्रह्मज्ञानम्। अर्थवादो जगत्सृष्टिस्थितिप्रध्वंसादयः। उपपत्तिर्विरोधाभावस्सर्वज्ञतादिसम्पत्तिर्वा। एतैर्लिङ्गैर्ब्रह्मणि तात्पर्यमवगन्तव्यं वेदान्तवाक्यानाम्। न केवलं ब्रह्मपरा वेदान्ताः किं तु 'आत्मा वा अरे द्रष्टव्य' इत्यादिषु तद्ज्ञानविधिपरा अपि ज्ञायन्ते। उभयपरत्वे वाक्यभेदप्रसङ्ग इति यदुक्तं तन्न। रूपप्रत्यायकेन चक्षुषा यथा द्रव्यस्यापि सिद्धिस्तथा विधिपरैरपि वेदान्तैर्ब्रह्मसिद्धिरिति नोभयपरत्वविरोधः। शाब्दं हि ब्रह्मज्ञानम्। तद्ब्रह्मवाचिशब्दादेव प्राप्तम्। तद्विधिना किं प्रयोजनमिति चेत् प्राप्तावपि मन्त्रादिष्विव विधेरविरोधः। यथा द्रव्यदेवतादिप्रकाशकेषु मन्त्रेष्वधीयमानेषु द्रव्यादिज्ञाने जातेऽपि पुनरनुष्ठानकाले 'मन्त्रैरनुस्मर्तव्य' मिति प्रयोगविधिर्ज्ञानान्तरमनुष्ठापयति तथात्रापि। न चोत्पत्तिविनियोगाधिकारविधीनामभावात्प्रयोगविध्यसम्भव इति शङ्कनीयम्। उत्पत्तिविधेरध्याहारेण सिद्धौ प्रकरणवशाच्छमादिकं विनियोजयन् 'आत्मानं पश्ये' दिति विनियोगविधिरुपपद्यते। ततश्च रात्रिसत्रन्यायेन 'ज्ञात्वा देवं मुच्यते सर्वपाशै' रित्याद्यर्थवादावगतमोक्षकामोऽधिकारी कल्पनीयो भवति। अतो मोक्षकामश्शमादियुक्तो ब्रह्मज्ञानं सम्पादयेदिति प्रयोगविधिलाभः। ननु, ब्रह्मज्ञानस्य विधेयत्वमनुपपन्नम्। 'आत्मा वा अरे द्रष्टव्य' इत्यादौ नित्ये त्ये ब्रह्मणि निर्विकारे विशुद्धे चात्मनि न कर्मकारकभावो युज्यते। येन विधिसम्भवः। उत्पत्तिप्राप्तिविकारसंस्काराणामत्रासम्भवात्। न च स्वतन्त्रफलाय सक्तुन्यायेन कर्मकारकतां परित्यज्य करणत्वविपरिणामेन आत्मना पश्येदिति विधातुं शक्यम्। वैषम्यात्। तथा हि-क्रियाकृतातिशयस्य भस्मीभावलक्षणस्य सक्तुषु सम्भवात्तेषु शब्दतः करणत्वेऽप्यर्थतः कर्मत्वमस्ति। न तस्यात्मनि सम्भवः। अतो वेदान्तानां न ब्रह्मज्ञानविधिपरत्वमिति चेन्न। आत्मनि कर्मत्वप्रयुक्तोत्पत्त्याद्यभावेऽपि कर्तृस्थमोक्षफलाय विध्युपपत्तेः। प्राप्ते कथं विधिरिति चेत्। प्राप्तिः पाक्षिकी नित्या वा। उभयथापि नियमादिविधिस्सम्भवति। ननु, तथा सति वेदान्तानां विधिपरत्वेन ब्रह्मपरत्वमनुपपन्नम्। यदुक्तं 'रूपप्रत्यायकेन चक्षुषा द्रव्यसिद्धिवद्विधिपरैरपि वेदान्तैर्ब्रह्मसिद्धि' रिति। तदयुक्तम्। चक्षुर्हि सम्प्रयोगे

सति निरपेक्षमेव प्रतिवस्तु प्रमापकम्। न तथा शब्दः। किं तु यत्र तात्पर्यं तत्र प्रमाणम्। तस्माद्वेदान्तानां ब्रह्मप्रमापकत्वं ब्रह्मज्ञानविधायकत्वं च न सम्भवतीति चेन्न। 'समिधो यजती' त्यादीनां वाक्यानाँ पञ्चप्रयाजविधायकत्वं तदनुष्ठानक्रमविधायकत्वं चेत्युभयपरत्वदर्शनात्। वेदान्तवाक्यानामपि ब्रह्मप्रमापकत्वं ब्रह्मज्ञानं मोक्षोपकारकं प्रति विधायकत्वं च युक्तमेव। ननु, ब्रह्मणि वेदवाक्यादेव ज्ञाते तज्ज्ञानविधिरप्रयोजनः तत्प्रयोजनस्य पूर्वज्ञानादेव सम्भवादिति चेन्न। वाक्येन परोक्षत्वेन ज्ञाते ब्रह्मणि तत्साक्षात्काराय ज्ञानविधेरुपपत्तेः। कथं भेद इति चेत् यच्छब्दजन्यं न तत्साक्षात्कारहेतुः। किं तु उपासनारूपं ज्ञानमेव। तथा च श्रूयते। 'ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात्' 'ज्ञाननिर्मथनादेव पाशं दहति पण्डितः' इत्यादिषु 'ज्ञात्वा देवं मुच्यते सर्वपाशैः' 'ईशं तं ज्ञात्वा अमृता भवन्ती' त्यादिषु च। तथाहि–'श्रोतव्यश्श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः। ज्ञात्वा च सततं ध्येय एते दर्शनहेतवः' इत्यत्र श्रवणमननसम्पन्नज्ञानाविनाभूतं निदिध्यासनं ब्रह्मणस्साक्षात्कारे निमित्तमिति स्मर्यते। अत उपनासनारूपज्ञानं मोक्षफलं विधीयते। 'आत्मन्येवात्मानं पश्येत्' 'शम्भुराकाशमध्ये ध्येयः' 'तज्जलानिति शान्त उपासीते' ति। 'प्राचीनयोग्योपास्वे' त्यादिषु च। तथा 'ब्रह्मविदाप्नोति पर' मित्यादिषु ब्रह्मस्वरूपोपासनातत्फलादिकमुपदिश्यते। अन्यथा सत्यत्वादिविशिष्टब्रह्मणा सह कथं सकलकामावाप्तिः फलं तादृशब्रह्मसाक्षात्करणं च सिद्ध्यति। तस्मात् 'सत्यं ज्ञानमनन्तं ब्रह्म' 'आनन्दो ब्रह्म' 'आकाशशरीरं ब्रह्म' 'सत्यात्म प्राणारामं मनआनन्दम्। शान्तिसमृद्धममृतम्' 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्ष' मिति सत्यज्ञानानन्तरूपं स्वात्मारामुपशान्तसकलोपद्रवकलङ्कं सकलमङ्गल परमशक्त्यविनाभूततया शबल रूपत्वेन कृष्णपिङ्गलं विरूपाक्षं त्रिलोचनं ब्रह्म उपक्रमादितात्पर्यलिङ्गैर्निरूप्यते। 'यो वेद निहितं गुहायाम्' 'इति प्राचीनयोग्योपास्वे' ति ज्ञानाविनाभूतं तदुपासनं च विधीयते। 'सर्वान्कामा' नित्यादिषु सकलकामावाप्तिर्ब्रह्मणा सहोपासकानामवगम्यते। अतो निष्कामनिजधर्मोपेतो निषिद्धकाम्यकर्मरहितो यथाश्रुतिस्मृतिचोदितकर्मानुष्ठानसम्पन्न-चित्तशुद्धश्शमाद्यनुगृहीतपरमशिवभक्तिभावित एव मुमुक्षुश्श्रुतिसारे भयशिवाभिधेयं परं ब्रह्म विदित्वा तदुपासीतेति ज्ञानोपासनाविधिरुपपन्नः। अत्र शिवोपपदग्रहणं विरूपाक्षस्य ब्रह्मणः परमविशुद्धिमङ्गलभाजनत्वान्मुमुक्षूणामुपासैनकविषयत्वद्योतनार्थम्। तथाऽथर्वशिखायां 'शिव एको ध्येयश्शिवङ्करस्सर्वमन्यत्परित्यज्ये' ति श्रूयते शिवशब्दवाच्यस्य वस्तुन एव ध्येयत्वमिति। अन्यथा कथं संसारनिवृत्तिः। निरस्तसमस्तदोषकलङ्कनिरतिशयमङ्गलाधारत्वं हि शिवत्वम्। यद्विज्ञानान्मोक्षरूपं फलमुच्यते। 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति।' इति। 'शिव एको ध्येयश्शिवङ्करस्सर्वमन्यत्परित्यज्ये' ति शिवव्यतिरिक्तस्य मुमुक्षूणां ध्येयत्वं परिसङ्ख्यायते। अतश्शिव एव परं ब्रह्म मोक्षकामैर्ध्यातव्यो ज्ञातव्यश्चेति। अतस्तात्पर्यलिङ्गसमन्वयेन ब्रह्मपरा वेदान्तास्तदुपासनापराश्चेत्यविरोधः।। इति समन्वयाधिकरणम्।।4।।

श्री शिवार्कमणि दीपिका

प्रथमाधिकरणे शास्त्रानारम्भहेतुशङ्कानिरासेन तदारम्भमुपपाद्य जन्मादिसूत्रप्रभृति शास्त्रं प्रवर्तितम्। समन्वयाधिकरणे पुनः सिद्धरूपे ब्रह्मणि वेदान्तानां प्रामाण्यं न सम्भवतीति शङ्काहेतुनिरासेन तत्र तेषां प्रामाण्यमुपपाद्यते। अतः शास्त्रारम्भोपपादकतया जन्माद्यधिकरणात्प्रागेव समन्वयाधिकरणं निवेशमर्हति। वेदान्तानां ब्रह्मणि प्रामाण्ये हि तन्निर्णयफलकवेदान्तविचारोपयोगिन्यायग्रथनात्मकं शास्त्रमारम्भणीयं भवेत्। न तु तेषां तस्मिन्नप्रामाण्ये। तथा च समन्वयाधिकरणस्य शास्त्रयोनित्वाधिकरणानन्तर्यं न युक्तमित्याशङ्क्य सङ्गतिविशेषप्राप्तं तदानन्तर्यमिति वृत्तसङ्कीर्तनेनोपपादयति-**प्रथमाधिकरण इति।** प्रथमाधिकरणे ब्रह्म विचार्यं प्रतिज्ञातम्। तेनापरिच्छेद्यत्वात् ब्रह्म न विचार्यमिति शङ्कानिरासार्थम् इदमित्थमिति परिच्छेत्तुमशक्यत्वेऽपि लक्षणमुखेनेतरव्यावृत्ततया परिच्छेत्तुं शक्यं तदिति सूचितम्। ततस्तत्किं लक्षणं येन तत्तथा परिच्छेत्तुं शक्यमित्याकाङ्क्षायां जगज्जन्मादि तल्लक्षणमिति प्रदर्श्य तस्य तल्लक्षणत्वं तदनुपपत्तिशङ्कानिरासेनोपपादितम्। ततो जगज्जन्मादिकारणे ब्रह्मणि किं प्रमाणमित्याकाङ्क्षायां शास्त्रं प्रमाणमिति प्रदर्श्य अनुमानगम्ये ब्रह्मणि शास्त्रस्य प्रामाण्यं न सम्भवतीति शङ्कानिरासेन तस्य तत्र प्रामाण्यमुपपादितम्। तथापि शब्दानां कार्य एव व्युत्पत्तेस्सिद्धार्थबोधकत्वासम्भवात्तस्य तत्र प्रामाण्यं न सम्भवतीति शङ्का तदनन्तरमेवावतरति। न हि ततः पूर्वं ब्रह्मणि शास्त्रस्य प्रामाण्यं प्रसक्तम्। येनैतच्छङ्कानिरासार्थं समन्वयाधिकरणं ततः पूर्वं निवेशनीयं भवेत्। तस्मात्समन्वयाधिकरणनिरसनीयशङ्कोत्थानहेतुपर्यालोचनया तस्य शास्त्रयोनित्वाधिकरणानन्तर्यं प्राप्तमित्यर्थः। ननूक्तशङ्कानिरासार्थं समन्वयाधिकरणं चेत्तदेवानारम्भणीयम्। सर्वविधशास्त्रानारम्भहेतुशङ्कानिरासेन तदारम्भोपपादनार्थं प्रवृत्ते प्रथमाधिकरण एव साऽपि निरसनीया। शास्त्रानारम्भहेतुशङ्कात्वाविशेषादित्याशङ्कानिरासो 'जिज्ञास्यतया प्रतिपादितस्य ब्रह्मण' इत्युक्तया सूचितः। तत्रायमाशयः। 'अथातो ब्रह्मजिज्ञासे' ति(ब्र॰-1-1-1) सूत्रसामर्थ्येन यासामनारम्भहेतुशङ्कानां निरसनस्य सूचनं लभ्यते तावन्निरसनेन शास्त्रारम्भोपपादनं प्रथमाधिकरणार्थः। तथा च यथा तत्राथातःशब्दसामर्थ्येन सम्बन्धाधिकार्यसम्भवशङ्कानिराससूचनं लभ्यते, यथा च 'ब्रह्मजिज्ञासे' ति समासान्तर्गतषष्ठीसामर्थ्येन ब्रह्मणो विषयत्वप्रयोजनत्वासम्भवशङ्कानिरसनसूचनं लभ्यते न तथा वेदान्तानां सिद्धरूपे ब्रह्मणि प्रामाण्यं न सम्भवतीति शङ्कानिरसनसूचनं तत्रत्यकिञ्चित्पदसामर्थ्येन लभ्यते। ब्रह्मविचारकर्तव्यता हि तस्य सूत्रस्यार्थः। न तु ब्रह्मज्ञानाय वेदान्तविचारकर्तव्यता। येन तच्छङ्कानिरसनसूचनमपि लभ्येत। 'इहौपनिषदी मीमांसे' ति प्रथमाधिकरणावतारिकाभाष्यमारभ्य प्राग्भाष्ये तत्र तत्रास्य शास्त्रस्य वेदान्तविचारशास्त्रत्वव्यवहारस्तु विचार्यत्वेन प्रतिज्ञाते ब्रह्मणि वेदान्तानां प्रामाण्यं शास्त्रयोनित्वाधिकरणेन समन्वयाधिकरणेन च समर्थयिष्यत इति तत्सामर्थ्यसिद्धमर्थं पर्यालोच्य। न च सूत्रसामर्थ्यलभ्यत्वाभावेऽपि सम्भावित-

सर्वविधानारम्भहेतुशङ्कानिरसनं शास्त्रारम्भसमर्थनार्थे तदुपोद्घाताधिकरण एव यथाकथञ्चिन्निवेशनीयमिति नियमः। पूर्वमीमांसायां बहुभिः प्रथमाध्यायाधिकरणैर्निवर्तनीयानां वेदाप्रामाण्यशङ्काविशेषाणां शास्त्रानारम्भहेतुत्वेन तेषां सर्वेषामपि तदारम्भसमर्थनार्थे तदीयप्रथमाधिकरणे निवेशनापत्तेः। तस्माद्यथा तत्र धर्मे चोदनायाः प्रामाण्ये प्रतिज्ञात एव तदप्रामाण्यशङ्कास्समुत्तिष्ठन्ति तन्निरसनार्थानामधिकरणानां चोदनासूत्रानन्तरमारम्भः। एवमिहापि ब्रह्मणि वेदान्तानां प्रामाण्ये प्रतिज्ञात एव तदप्रामाण्यशङ्कास्समुत्तिष्ठन्तीति शास्त्रयोनित्वसूत्रानन्तरं समन्वयाधिकरणारम्भो युक्तः इति। **तन्मूलत्वं चेति।** शास्त्रस्य ब्रह्मकर्तृकत्वं चेत्यर्थः। इदं तृतीयाधिकरणानुषक्तवर्णकान्तरप्रमेयत्वेन वस्तुतः पूर्ववृत्तान्तर्गतमिति पूर्ववृत्तमध्ये सङ्कीर्तितं न तु समन्वयाधिकरणसङ्गत्यपेक्षितत्वेन। एवं समन्वयाधिकरणस्य प्राङ्निवेश्यत्वशङ्कां निरस्य तस्य शास्त्रयोनित्वाधिकरणानन्तर्यमुपपादयितुं तेनाक्षेपिकीं सङ्गतिं **दर्शयति-येनेत्यादिना।** ननु 'येन यदव्यभिचारेण सिध्यति तद्धि तस्य प्रमाणमुच्यत' इति भाष्येण किं प्रदर्श्यत इति पूर्वाधिकरणसमर्थितवेदान्तानां ब्रह्मणि प्रामाण्यं न सम्भवतीत्याक्षेपोपयोगितया तार्किकाभिमतं 'प्रमाकरणं प्रमाण' मिति प्रमाणलक्षणं प्रदर्श्यत इति चेत्कथमनेन वाक्येन तत्प्रदर्श्यते। अतिशयितं कारणं हि करणम्। अतिशयस्त्वत्रेन्द्रियलिङ्गशब्दादीनां प्रमाकरणानां प्रमाव्याप्तत्वरूपो विवक्षित इत्यव्यभिचारशब्देन ख्यापनात्तत्प्रदर्श्यत इति चेन्न। सकलसहकारिसमवधाने प्रमाव्याप्तत्वस्य सर्वप्रमाकरणसाधारण्येनाव्यावर्तकत्वात् तदसमवधाने इन्द्रियादीनामपि तदसम्भवात्। अथोच्येत अव्यभिचारशब्देनेन्द्रियादिगतः प्रमितव्यभिचारो न विवक्षितः किन्तु प्रत्यक्षानुमित्यादिप्रमारूपकार्यगत इन्द्रियलिङ्गाद्यव्यभिचारः। ततश्च प्रत्यक्षानुमित्वादिगतेन्द्रियलिङ्गादि- निरूपितकार्यतावच्छेद-कानामनुभवत्वव्याप्यत्वेन क्रोडीकारादनुभवत्वव्याप्यधर्मावच्छिन्नकार्यता- प्रतियोगिककारणताश्रयत्वे सति प्रमाकरणं प्रमाणमिति लक्षणमिह विवक्षितं पर्यवस्यतीति चेन्न। चाक्षुषज्ञानादिवृत्त्यनुभवत्वव्याप्यधर्मविशेषावच्छिन्नकार्यताप्रतियोगिककारणताश्रयेषु आलोकादिष्वति-व्याप्तेः। 'अनुभवत्वव्याप्यधर्मे' त्यनेन अनुभवत्वसाक्षाद्व्याप्यजातिविवक्षायामनुभवत्वसाक्षाद्व्याप्यायाः। प्रत्यक्षत्वजातेर्नित्यज्ञानसाधारण्यात् नेन्द्रियादिनिरूपितकार्यतावच्छेदकत्वं किंतु जन्यप्रत्यक्षत्वस्येति तार्किकाणामभ्युपगमेन लक्षणस्येन्द्रियेष्वव्याप्तेः। ननु, जन्यत्वातिरिक्तविशेषणघटितानुभवत्व-साक्षाद्व्याप्यजात्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं विवक्षितमिति चेन्न। ईश्वरज्ञानव्यावृत्त्यर्थमिन्द्रिय-निरूपितज्ञाननिष्ठकार्यतावच्छेदकशरीरे विनाशित्वस्यापि निवेशयितुं शक्यत्वेनेन्द्रियेषु तेन विशेषणेनाव्याप्तिनिरासालाभात्। ननु, नित्यमात्रव्यावृत्तिप्रयोजकातिरिक्तविशेषणाघटितत्वं विवक्षितम्। यद्यपि जन्यत्वं विनाशित्वं वा नित्यमात्रव्यावृत्तं न भवति। अनित्यनित्याभ्यां प्रागभावध्वंसाभ्यामपि व्यावृत्तत्वात्। तथापि प्रकृतकार्यतावच्छेदके तद्विशेषणमीश्वरज्ञानव्यावर्तनैकप्रयोजनमिति नोक्तदोषानुवृत्तिः। मात्रपददानान्नित्यानित्योभयव्यावृत्तिप्रयोजनकलौकिकत्वविशेषणघटितप्रत्यक्षत्वा-

वच्छिन्नकार्यतानिरूपित- कारणताश्रये विषये नातिव्याप्तिरिति चेन्न। एवमपि शाब्दत्वरूपोक्तविशेषणविशिष्टजात्यवच्छिन्न- कार्यतानिरूपितकारणताश्रयेष्वाकाङ्क्षज्ञानादिष्वतिव्याप्तेः। ननु, व्यापारवत्त्वमपि विशेषणं विवक्षितम्। न च पदज्ञानानां पदार्थस्मृतिवदाकाङ्क्षाज्ञानादीनां कश्चिद्व्यापारोऽस्तीति चेन्न। तथा सत्यनुमानप्रमाणत्वेनाभिमतस्य लिङ्गपरामर्शस्य व्यापाराभावेन तत्राव्याप्तेः। ननु, 'यद्ययं निर्वह्निस्स्यान्निर्धूमस्स्या'दिति विषयपरिशोधकस्तर्कः तद्व्यापारः तस्य धूमाभावापादनरूपस्य स्वारसिकधूमवत्त्वज्ञानापेक्षत्वेन परामर्शजन्यत्वादिति चेन्न। विरोधिशङ्कानिवर्तनद्वारानुमित्युपयोगिनस्तस्य शङ्काया असार्वत्रिकत्वेनानावश्यकत्वात्। न च परामर्शद्वारा व्याप्तिज्ञानं कारणं तद्द्वारा लिङ्गज्ञानस्यापि कारणत्वसम्भवेन विनिगमनाविरहात् लिङ्गविशेष्यकपरामर्शस्थले लिङ्गज्ञानस्येव व्याप्तिविशेष्यकपरामर्शस्थले विशकलितव्यभिचाराभावसहचारज्ञानजन्यपरामर्शस्थले च व्याप्तिज्ञानस्याभावेनासार्वत्रिकस्योभयत्रापि तुल्यत्वात्। ननु, तर्हि व्याप्तिव्यभिचाराभावसहचारलिङ्गज्ञानानि सर्वाण्यपि करणानि सन्तु। न च, क्वचित् किञ्चित्सम्भवति न सर्वं सर्वत्रेत्यनुगमः। परामर्शजनकज्ञानत्वेनानुगतेन रूपेण कारणत्वाभ्युपगमात्। न च स्मृतिरूपपरामर्शस्थले अनुमित्यजनकसंस्कारव्यवहितस्य पूर्वानुभवरूपपरामर्शजनकज्ञानस्यानुमिति-जनकत्वासम्भवः। व्यापारेणेव व्यापारजनकेन व्यवधानस्यापि कार्यकारणभावाविरोधित्वात् स्वर्गजनकावान्तरापूर्वव्यवहितस्यापि यागस्य स्वर्गजनकत्वाभ्युपगमादिति चेन्न। प्रत्यक्षपरामर्शस्थले व्याप्तिज्ञानलिङ्गज्ञानेश्वरज्ञानानाम् अनुमितिरूपपरामर्शस्थले परामर्शतज्जनकज्ञानानां शब्दपरामर्शस्थले पदपदार्थाकाङ्क्षादिज्ञानानां च बहूनां परामर्शजनकज्ञानानां मेलने कस्यचिदेव प्रमाणत्वमित्यत्र विनिगमनाविरहेणैकानुमित्युत्पत्तावनेकानुमितिकरणरूपानुमानप्रमाणाभ्युपगमावश्यम्भावे लाघवान्मनः कालेश्वरादिसाधारणेन परामर्शजनकत्वेनैव तत्कारणताभ्युपगमौचित्यात् परामर्शाव्यवहितपूर्वक्षणोत्पत्तिकं तत्कारणं ज्ञानमनुमानमभ्युपगम्यत इति चेन्न। स्मृतिरूपपरामर्शस्थले तदभावात्। अस्तु तर्हि सर्वं परामर्शकारणमनुमानमिति चेत् तथा सति प्रत्यक्षादिप्रमोत्पत्तावप्यनेकप्रमाणाभ्युपगतौ नास्ति कश्चिद्दोष इति। येन यत्सिद्ध्यति तत्प्रमाणमित्येतावत एव लक्षणत्वसम्भवाद्व्यर्थमव्यभिचारेणेति विशेषणम्। एतेनानुभवत्वसाक्षाद्व्याप्यैकजात्याश्रययावज्जन्यवृत्तितदन्यावृत्तिधर्मावच्छिन्नकार्यतानिरूपितकारणता-श्रयत्वविशेषितं प्रमाकरणत्वं प्रमाणलक्षणमित्यपास्तम्। असम्भवश्चात्राधिकः। प्रत्यक्षादिप्रमाण-जन्याश्चतुर्विधा अपि ह्यनुभवा अनुभवत्वसाक्षाद्व्याप्यैकजात्याश्रयाः। न ह्येतेषां मध्ये कश्चिदप्यनुभवोऽनुभवत्वसाक्षाद्व्याप्यजातिद्वयस्याश्रयः। तथा च चतुर्विधप्रमाणजन्यसकलानुभववृत्ति-कार्यतानिरूपितकारणताश्रयत्वमिन्द्रियलिङ्गादिषु क्वचिदपि नास्तीति स्पष्टमेव। नन्वनुभवत्वसाक्षाद्व्याप्या एकजातिश्चतुर्विधेष्वनुभवेषु नानुवर्तत इति चेन्मानुवर्तिष्ट। तथापि प्रत्यक्षादिष्वनुभवत्वसाक्षाद्व्यप्यजातित्वमिव प्रत्येकमेकत्वमपि तावदस्ति। तथा च

यथानुभवत्वसाक्षाद्व्याप्यजातीनां भेदेऽपि सर्वेप्यनुभवा अनुभवत्वसाक्षाद्व्याप्यजात्याश्रया:। एवमेकत्वविशेषिततज्जात्याश्रया अपि भवन्तः केन वारयितुं शक्यन्ते। नन्वेकजातीत्यत्रैकशब्दः एकत्वाधिकरणत्वप्रतीत्यर्थो न भवति। सर्वासामपि जातीनां प्रत्येकमेकत्वेनाव्यावर्तकत्वात्। किं त्वनुभवत्वसाक्षाद्व्याप्यजातीनां मध्ये कस्याश्चिदेव ग्रहणार्थः। 'तदन्यावृत्ती'त्यस्य चोक्तरूपजात्याश्रययावज्जन्यवृत्त्यनित्यज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयशरीराद्यतिव्याप्तिवारणार्थमुपात्तस्यानुभवत्वसाक्षाव्द्याप्यजात्यन्तराश्रयावृत्तित्वमर्थः। न त्वनुभवत्वसाक्षाद्व्याप्यजात्याश्रयान्यावृत्तित्वमर्थः। अतोऽपि हेतोरेकशब्दोऽनुभवत्वसाक्षाद्व्याप्यजातीनां मध्ये कस्याश्चिदेव ग्रहणार्थ इति नासम्भवशङ्कावकाश इति चेत्। किमयमेकशब्दःउक्तरूपजातीनां मध्ये व्यवस्थितकिंचिज्जात्याश्रयग्रहणार्थः उत यदा यत्र प्रमाणे लक्षणमुपसंह्रियते तदा तत्प्रमाणजन्यज्ञानवृत्तिजातिग्रहणार्थः। आद्ये व्यवस्थितरूपा द्वितीयेऽननुगमरूपा चाव्याप्तिः। ननु, प्रमाया अननुगतत्वादननुगते लक्ष्ये लक्षणाननुगमो न दोषायेति तार्किका वदन्तीति चेत् सत्यम्। एकमेव ज्ञानं विषयविशेषेण प्रमा चाप्रमा चेति विषयविशेषेण प्रमात्वस्याननुगतत्वात्तद्वति तत्प्रकारकज्ञानं प्रमेत्यादिलक्षणेषु तत्तत्प्रमाविषयपरामर्शे सर्वनामार्थाननुगमो न दोषयेति ते वदन्ति। नैवमेकमेव ज्ञानं नानाकरणजन्यत्वेन तत्तत्करणांशे प्रत्यक्षमनुमितिश्चेत्यादिरूपेण प्रमात्वाप्रमात्वसङ्करवत् प्रत्यक्षत्वानुमितित्वादिसङ्करोऽपि तैरिष्यते। येनायमप्यननुगमो न दोषः स्यात्। तस्मादिहाव्यभिचारेणेति विशेषणं प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणप्रत्यायनार्थं प्रमाकरणगतप्रमाव्याप्तिपरं प्रमागतकरणविशेषव्याप्तिपरं वेत्येतदयुक्तम्। ननु, तर्हि प्रमासाधनं प्रमाणमित्येवंरूपस्यैव प्रमाणसामान्यलक्षणस्य प्रत्यायनार्थं सिद्ध्यतिशब्दोक्तस्य ज्ञानस्य भ्रमव्यावृत्तत्वलाभायाव्यभिचारेणेतिपद 'मिन्द्रियार्थसन्निकर्षोत्पन्नमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्ष'मिति न्यायसूत्रगतमव्यभिचारिपदमर्थाव्यभिचारपरमस्तु। नैतदपि युक्तं, सिद्ध्यतिपदेनैव तल्लाभात्। भ्रमकरणेन दुष्टचक्षुरादिना तत्तदर्थज्ञानस्येव तत्तदर्थसिद्धेर्व्यवहाराभावेन सिद्ध्यतेरर्थाव्यभिचारिज्ञानपरत्वात्। तस्मात्किमपि वक्तव्यं यदुदाहृतेन भाष्येण प्रदर्श्यत इति। उच्यते। अनेन भाष्येण न्यायमतसिद्धं मतान्तरसिद्धं वा प्रमाणसामान्यलक्षणं न प्रदर्श्यते। किं तु 'अप्राप्ते शास्त्रमर्थवत्' 'यश्चार्थादर्थो न स चोदनार्थ' इति मीमांसकमर्यादाप्रसिद्धं शास्त्रप्रामाण्यप्रयोजकं प्रदर्श्यते। वेदान्तानां ब्रह्मणि प्रामाण्यस्य पूर्वसूत्रोक्तस्याक्षेपे समनन्तरवाक्येन करिष्यमाणे तत्प्रदर्शनस्योपयोगित्वात्। तथा च यच्छास्त्रार्थत्वाभिमतं वस्तु येन शास्त्रेणाव्यभिचारेण तच्छास्त्रावतारमात्रेण सिध्द्यति न तु तच्छास्त्रावतारानन्तरमपि तदर्थसामर्थ्यस्य तदुपजीविवाक्यान्तरस्य वावतारमपेक्षते तच्छास्त्रं तत्र प्रमाणमिति न्यायविद्भिरुच्यत इत्यर्थः। यद्धि यच्छास्त्राधीनसिद्धिकमपि तदर्थसामर्थ्येन तदर्थोपजीविवाक्यान्तरेण वा लभ्यं तत्रोभयत्रापि न तच्छास्त्रं प्रमाणम्। तत्र सामर्थ्यवाक्यान्तररूपप्रमाणान्तरसद्भावात्। किं तु साक्षात्स्वप्रमेयार्थे प्रमाणं तत्र प्रमाणान्तराभावात् तत्प्रमितिं

विना सामर्थ्यवाक्यान्तरप्रमाणयोरनुन्मेषाच्च। तत्र सामर्थ्यलभ्यं यथा–'दर्शपूर्ण-मासयोरितिहायेडोबर्हिः प्रतिसमानयेते जुह्वामौपभृत'–मिति शास्त्रस्य जुह्वौपभृदाज्यसमानयनकालविधिरर्थः। तत्सामर्थ्यात् जौहवमाज्यमादिमप्रयाजत्रयार्थमौपभृतमाज्यार्थं बर्हिरादिप्रयाजद्वयार्थमिति व्यवस्था लभ्यते। एतच्छास्त्रार्थसामर्थ्यापरामर्शे हि 'यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत् यदुपभृति प्रयाजानूयाजेभ्यस्त'दिति जौहवाज्यस्यौपभृताज्यार्थस्य चाविशेषेण प्रयाजार्थत्वश्रवणात् उभयमपि विकल्पेन सर्वप्रयाजार्थं भवेत्। वाक्यान्तरलभ्यं यथा–'तं द्विरात्रेणे'ति शास्त्रस्य अग्नेर्द्विरात्राङ्गत्वविधिरर्थः। तेनाग्नेर्द्विरात्रेत्यौपदेशिकाङ्गत्वे सिद्धे औपदेशिकाङ्गत्वसिद्धिमुपजीव्य प्रकृताविव द्विरात्रेऽपि प्रवृत्तेन 'श्येनचितं चिन्वीत स्वर्गकाम'इत्यादिवाक्येन तत्र श्येनाकृत्यादिकाम्यगुणप्राप्तिर्लभ्यते। एवमन्यलभ्ययोरन्ययोरुदाहृतशास्त्रद्वयाधीनसिद्धिकत्वेऽपि न तयोरिदं शास्त्रद्वयं प्रमाणमिति व्यवच्छेदार्थमव्यभिचारेणेति विशेषणं तदर्थसामर्थ्यादिरूपप्रमाणान्तरावतारानपेक्षत्वार्थकमुपात्तम्। एवं शास्त्रप्रामाण्यप्रयोजकं प्रदर्श्य तदभावाद्वेदान्तानां ब्रह्मणि प्रामाण्यं न सम्भवतीत्याक्षेपं दर्शयति–**वेदान्तवाक्यानामिति।** करिष्यमाणाक्षेपाभिप्रायः कथंशब्दः। यदि वेदान्तैस्साक्षादेव ब्रह्म सिद्ध्यतीति मतं तन्न सङ्गच्छते। वक्ष्यमाणरीत्या सर्वशब्दानां कार्यपरत्वात्। अथ मतं कार्यपरत्ववादे तेषां रात्रिसत्रन्यायप्राप्तब्रह्मानन्दानुभवतत्सादृश्यप्राप्तिफलकोपासनाविधिरूपकार्यपरत्वं वक्तव्यमिति तत्समर्थ्यान्निरतिशयानन्दशालिसत्यसङ्कल्पत्वादिगुणकं ब्रह्म सिद्ध्यति तदभावे तदानन्दानुभवतत्सादृश्य-प्राप्त्यसम्भवादिति। तदपि न युक्तम्। तावता वेदान्तानां ब्रह्मणि प्रामाण्यानिर्वाहात्। ब्रह्मणो वेदान्ताधीनसिद्धिकत्वेऽपि तस्य तैरव्यभिचारेण सिद्ध्यभावादित्याक्षेपणीयस्य वेदान्तानां ब्रह्मणि प्रामाण्यसमर्थनस्य द्वैविध्यसूचनार्थो वाकारः। एवं द्विविधप्रामाण्यसमर्थनप्रकाराक्षेपोपयोगितयैव शास्त्रप्रामाण्यप्रयोजकमुपन्यस्तम्॥ **।तत्तु समन्वयात्॥४॥** सूत्रे तदिति पदं प्रकृतब्रह्मपरामर्शिद्वितीयान्तम्। तुरवधारणार्थः। तस्य वेदान्ताः साधयन्तीत्यध्याहृतेन सम्बन्धः। ततश्च साधकत्वलक्षणविशेषण-सङ्गतस्यावधारणस्यायोगव्यवच्छेदरूपतापर्यवसानात् 'कुमुदं श्वेतमेवे'ति वाक्ये विशेषणसङ्गतावधारणबलात् सर्वेषु कुमुदेषु श्वैत्यमिव सर्वेषु वेदान्तेषु ब्रह्मसाधकत्वं लक्ष्यते। न च नीलं सरोजं भवत्येवेत्यत्रेव क्रियासङ्गतत्वादवधारणस्यात्यन्तायोगव्यवच्छेदतापर्यवसानात् केषुचिदेव वेदान्तेषु ब्रह्मसाधकत्वं लभ्येतेति शङ्कनीयम्। पृथक्पदोपात्तविशेषणान्वयापादकक्रियासङ्गता-वधारणस्यैवात्यन्तायोगव्यवच्छेदरूपत्वादिह क्रियाया एव विशेषणसमर्पकतयावधारणस्य विशेषणसङ्गतत्वेनायोगव्यवच्छेदरूपतौचित्यात्। सम्यगन्वयः समन्वयः उपक्रमादिलिङ्गावगमित-तात्पर्यसम्बन्धः। पञ्चमी हेत्वर्था। तथा च सर्वे वेदान्ताः ब्रह्म साधयन्ति उपक्रमादिलिङ्गावगमितब्रह्मतात्पर्यकत्वादिति सूत्रार्थः। न च धूमोऽस्तीत्यादिवाक्यानां वह्न्यादितात्पर्यस्येव वेदान्तानां बह्मणि तात्पर्यस्य तदुपजीविमानान्तरव्यवधानेन निर्वाहः। बाधकाभावेनौत्सर्गिकस्य

साक्षात्साधकस्य सिद्धेः। उपक्रमादिलिङ्गानां साक्षच्छब्दविषयेष्विव शब्दोपजीविमानान्तरेष्वसम्भवाच्च। ब्रह्मणो वेदान्ताप्रतिपाद्यत्वे तत्साधनसमर्थस्य तदुपजीविमानान्तरस्यासम्भवाच्चेत्यभिप्रेत्य सूत्रं व्याचष्टे-**तुशब्देनेति**। एवं सूत्रार्थं प्रदर्श्य सूत्रार्थसूचितमधिकरणशरीरं दर्शयितुमुपक्रमते-**अस्येति**। यद्यपि पूर्वाधिकरणे जगत्कारणस्वरूपसाधकस्य वेदान्तभागस्य ब्रह्मणि प्रामाण्यं समर्थितमिति तत्प्रामाण्याक्षेपमात्रेणास्य पूर्वाधिकरणेनाक्षेपिकी सङ्गतिर्लभ्यते। तथापि तदाक्षेपहेतुसाधारण्यात्सर्वेषां वेदान्तानां ब्रह्मणि प्रामाण्यमाक्षिप्तं भवतीत्यभिप्रेत्याह-**सर्वाणि वेदान्तवाक्यानीति**। व्युत्पत्तिग्रहस्य सिद्धार्थसाधारण्यकार्यविषयत्वाभ्यां संशयं दर्शयति-**वेदान्तवाक्यानामिति**। व्युत्पत्तिग्रहस्य कार्यविषयत्वमुपपादयन्पूर्वपक्षयति-**सर्वत्रेति**। ननु, शब्दादर्थप्रत्ययस्य शब्दार्थसम्बन्ध-रूपव्युत्पत्तिग्रहापेक्षानियमेऽपि व्युत्पत्तिग्रहस्य न कार्यविषयत्वनियमः व्याख्यानवाक्यशेषप्रसिद्धपद-सामानाधिकरण्यव्याकरणकोशाप्तोपदेशैः सिद्धार्थेऽपि तद्ग्रहसम्भवादित्याशङ्क्याह-**सम्बन्धज्ञानं चेति**। आद्यव्युत्पत्तिग्रहाधीनव्याख्यानादिभिः शब्दार्थसम्बन्धविशेषग्रहणमाद्यव्युत्पत्तिग्रहः उत्तममध्यम-वृद्धव्यवहारसापेक्षः तद्व्यवहारः कार्यैकविषय इत्याद्यव्युत्पत्तिग्रहस्य कार्यविषयत्वात्तदधीनस्सर्वोऽपि व्युत्पत्तिग्रहः तद्विषयस्सिद्ध्यतीत्यर्थः। उक्तमर्थमुपपादयितुमुपक्रमते-**तथा हीति**। ननु, 'गामानये' त्याद्युत्तमवृद्धवाक्यश्रवणसमनन्तरभाविन्यां प्रयोज्यवृद्धप्रवृत्तौ बालः स्वप्रवृत्ताविव कार्यताज्ञानजन्यत्वमनुमाय तत्र कार्यताज्ञानस्य उत्तमवृद्धवाक्यश्रवणसमनन्तरभावित्वेन तज्जन्यत्वं निश्चिनोतीति तद्वाक्यस्य कार्यसामान्यज्ञानजनने शक्तिः सिद्ध्यतु नाम। तथापि कथमानयनबन्धनादिकार्यविशेषे तत्तत्पदविशेषशक्तिसिद्धिरित्याकाङ्क्षायामाह-**पुनरिति**। 'गामानय' 'गां बधाने' त्यादिना वाक्यश्रवणानन्तरं तत्तत्कार्यविशेषे प्रवृत्तिमवलोक्य व्यावृत्तस्य पदस्य व्यावृत्तकार्यविशेषोऽर्थः अनुवर्तमानस्य पदस्यानुवर्तमानकार्यविशेषोऽर्थ इति निश्चिनोतीत्येवमावापोद्वापाभ्यां तत्तत्पदविशेषस्य तत्तत्कार्यविशेषे शक्तिः सिद्ध्यतीत्यर्थः। एवं च व्युत्पत्तिग्रहस्य कार्यैकविषयत्वात्तदनुरोधेन कार्यपदरहितानामपि वेदान्तवाक्यानां तदध्याहारादिना कार्यार्थ एव प्रामाण्यस्य समर्थनीयत्वात् सिद्धरूपे ब्रह्मणि तेषां प्रामाण्यं न सम्भवतीत्याह-**तदेवमिति**। स्यादेतत्। उक्तक्रमेण, 'नय बधाने' त्यादिपदानामेव कार्ये शक्तिः सिद्धा। न तु घटादिपदानामपि। ततश्च यथैव 'गामानय' 'गां बधाने' त्यादिव्यवहारेषु क्रियापदानां तत्र तत्र कार्यविशेषे शक्तिस्सिद्ध्यति तथा 'घटमानय' 'पटमानये' त्यादिव्यवहारेषु घटादिपदानामप्यावापोद्वापाभ्यां तत्र तत्र सिद्धार्थविशेषे शक्तिः सिद्ध्यतीत्याद्यव्युत्पत्तिग्रहस्य विरोधादग्रे सिद्धार्थपदमात्रसमभिव्याहारादपि वाक्यार्थप्रतीतिर्भवन्ती न निवारयितुं शक्यते। अतः कार्यपदरहितेषु वेदान्तेषु न तदध्याहारादिप्रसक्तिः। ननु, आद्यव्युत्पत्तिग्रहस्य प्रयोज्यवृद्धप्रवृत्त्यनुमितकार्यविषयत्वात्तदनुरोधेन घटादिपदानामावापोद्वापाभ्यां भवन्नपि शक्तिग्रहस्तद्विषयस्स्यात्। न च सर्वेषामपि क्रियाकारकपदानां कार्यमात्रे शक्तिरित्यभ्युपगमे पर्यायत्वापत्तिः।

कार्यान्वितस्वार्थे शक्तिरित्यभ्युपगमे कार्यवाचिपदानां कार्यान्वितस्वार्थाभावात्तदसम्भवः। सर्वेषामपि पदानां कार्ये शक्तिरित्येव नियमाभ्युपगमात् तस्य नियमस्य कार्यवाचिपदानां तन्मात्रशक्त्या तदितरपदानां तदन्वितस्वस्वार्थशक्त्या च निर्वाहादिति चेत्। एवमपि कार्यवाचिपदरहितेषु वेदान्तेषु तदध्याहारादिकं न प्रसज्यते। कार्यान्वितस्वार्थवाचिनां तत्रत्यसिद्धार्थवाचिपदानां विशेषणीभूतकार्यसमर्पकतयैव तेषां कार्यविषयत्वनिर्वाहात्। ननु, प्रयोज्यप्रवृत्तिहेतुकार्यताज्ञानजननसामर्थ्यं शब्दस्याद्यव्युत्पत्तिग्रहकालेऽवधारितं तद्यतो भवति तदपेक्षा सर्वेष्वपि शब्देष्ववश्यंभाविनी। न च सिद्धार्थविशेषणकार्यसामान्यज्ञानेन क्वचित्प्रवृत्तिर्भवति। किं तु लिङादियुक्तक्रियापदात्कार्यविशेषज्ञानेनैव। अतस्तदर्थं क्रियापदाध्याहारादिकमपेक्षितमिति चेत् तर्हि सर्वेषां पदानां कार्यजनकशक्तिनियमो न सिद्ध्येत्। प्रवर्तकज्ञानजनकत्वनिर्वाहाय हि तत्कल्पनम्। तन्निर्वाहश्चेत्सिद्धार्थवाचिशब्दानां तद्विशेषणकार्यशक्त्या न सम्भवति। किं तु लिङादियुक्तक्रियापदशक्त्यैव। तदा किं तत्कल्पनया। किं चाद्यव्युत्पत्तिग्रहसमये 'गामानये' ति वृद्धवाक्यस्य ततः प्राक्सामान्यतोऽप्यर्थज्ञानजनकत्वेनाज्ञातस्य जृम्भितहसितादिसाधार्ण्येन तदीयमुखशब्दमात्रतया श्रुतस्य तदनन्तरप्रभवप्रयोज्यप्रवृत्तिहेतुज्ञानजनकत्वमनाकलितपदविभाग-स्यैवावधार्यत इति तस्मिन्समये 'गामानये' त्यस्य समुदायस्यैव गवानयनकार्यताज्ञानजननसामर्थ्यं गृह्यते। न तु तदनन्तर्गतपदानां स्वार्थमात्रेऽपि शक्तिः न तरां कार्यान्वितस्वार्थे। किं त्वावापोद्वापयुक्तप्रयोगान्तरेषु क्रियाकारकपदानां प्रत्येकशक्तिर्गृह्यते। तथा च कार्यवाचिपदसमभिव्याहारादेव कार्यताज्ञानजनकत्वं सम्भवतीत्यन्यलभ्यत्वप्रतिसन्धानान्न गवादिपदानां कार्यान्वितस्वार्थशक्तिकल्पनाप्रसक्तिः। अनुपपत्त्यभावात्। नन्वाद्यव्यवहारदर्शनसमये यद्यप्यनाकलितपदविभागस्य 'गामानये' ति समुदायरूपस्य शब्दस्य कार्यताज्ञानजननसामर्थ्यं गृह्यते। तथापि तद्गामानयेति शब्दविशेषत्वोपाधिना न गृह्यते। किं तु शब्दत्वसामान्योपाधिना। तथा च सत्यावापोद्वापयुक्तप्रयोगान्तरेषु गवादिपदरूपशब्दत्व-सामान्यालिङ्गितावयवशक्तिग्रहोऽपि कार्यत्वापरित्यागेन कार्यान्विते तत्तदर्थे पर्यवस्येदिति चेत् किमाद्यव्यवहारदर्शनसमये शब्दसामान्यस्य प्रवृत्त्युपयोगिकार्यताज्ञाने सामर्थ्यं गृहीतम् उत कार्यताज्ञानमात्रे। आद्ये गवादिपदानां कार्यसामान्यशक्त्या न प्रवृत्त्युपयोगिकार्यताज्ञानलाभ इति व्यर्थं तेषां कार्यान्वितस्वार्थे शक्तिकल्पनम्। द्वितीये कार्यपदरहितेषु वाक्येषु सिद्धार्थविशेषणकार्यसामान्योपस्थित्यैवाद्यव्यवहारा-नुरोधसिद्धेस्तेषु प्रवर्तकज्ञानजननसमर्थक्रियापदाध्याहारो न सिद्ध्येत्। अथात्र प्रथमपक्ष एवाश्रीयते। तस्मिन्पक्षे गवादिपदानां कार्यान्वितस्वार्थे शक्तिर्न सिद्ध्यतीति चेन्मा सैत्सीत्। क्रियापदरहितेषु वाक्येष्वाद्यव्यवहारानुरोधेन प्रवर्तकज्ञानजननसमर्थकार्यवाचिपदाध्याहारः सिद्ध्येदेव। तावदेव वेदान्तानां सिद्धरूपे ब्रह्मणि प्रामाण्यं न सम्भवतीत्याक्षेप उपयुज्यत इति चेदियमपि दुराशैव। 'गामानये'ति वाक्यश्रवणानन्तरं प्रयोज्यस्य गवानयने प्रवृत्त्या हि गवानयनकार्यताज्ञानमनुमितं बालेन न कार्यताज्ञानमात्रम्। प्रवृत्तिविशेषे तस्यानुपयोगात्। आवापोद्वापयुक्तप्रयोगान्तरेषु गवादिपदशक्तिग्रहेऽनुपयोगाच्च।

गवानयनकार्यताज्ञाने च 'गामानये'ति शब्दविशेषस्यैव कारणत्वग्रहणं स्यात्। न शब्दसामान्यस्य। न च निरर्थकवर्णसमुदायसाधारणस्य शब्दत्वसामान्यस्य कार्यताज्ञानमात्रेऽपि कारणत्वग्रहो युक्तः। न वा तद्व्यावृत्तस्य पदसमुदायरूपवाक्यत्वस्याद्यव्यवहारसमयेऽवधारणमस्ति। तस्माद्यद्यपि प्रवृत्तिसामान्यानुमितकार्यताज्ञानसामान्ये कार्यताज्ञानत्वपुरस्कारेणापि गामानयेतिशब्दस्य कारणत्वं गृह्येत तथापि प्रत्यक्षेण कारणताग्रहे तत्सहकार्यन्वयव्यतिरेकपरिचायकतया कारणतावच्छेदक-ग्रहापेक्षावत्प्रमाणान्तरेण कारणताग्रहे तदपेक्षाया अभावात्कार्यताज्ञानत्वसामानाधिकरण्येन गामानयेति शब्दगतयत्किञ्चिद्धर्मसामानाधिकरण्येन च कार्यकारणभावग्रहो भवेत्। (न तु तत्तदवच्छिन्नकार्य-कारणभावग्रहः।) न ह्यागमेन स्वर्गे स्वर्गत्वपुरस्कारेण ज्योतिष्टोमकार्यत्वग्रहस्तदवच्छिन्नकार्यत्वविषयः। दानादिजन्यस्वर्गे व्यभिचारेण स्वर्गत्वस्य ज्योतिष्टोमकार्यतानवच्छेदकत्वात्। किं तु तत्समानाधिकारणकार्यत्वविषयः। एवं चावापोद्वापयुक्तप्रयोगान्तरेष्वा 'नय बधाने'त्यादिपदानां कार्ये शक्तिग्रहे सति शब्दानां कार्यताज्ञानजनकत्वस्य गवादिज्ञानजनकत्वस्येवतद्वाचकपद-समभिव्याहारप्रयुक्तत्वावसायात् केवलसिद्धार्थपरवाक्यप्रयोगदर्शनाच्च कार्यवाचिपदसमभिव्याहृतवाक्यत्वं प्रवृत्त्युपयोगिकार्यताज्ञानजनकतावच्छेदकमवधार्यत इति न कथञ्चिदपि सिद्धार्थपरवाक्येषु कार्यवाचिपदाध्याहारप्रसक्तिः। तस्माद्व्युत्पत्तिग्रहस्य कार्यविषयत्वासिद्धेर्वेदान्तानां ब्रह्मणि प्रामाण्यस्य न काचित्क्षतिरित्यस्वरसादाह-**किंचेति।** ननु, पूर्वाधिकरणे जगत्कर्तुरनुमानतः प्राप्तिर्निराकृता। सत्यम् अयुक्तं तन्निराकरणम्। 'अन्नेन सोम्य शुङ्गेने'त्यादिवेदान्तवाक्यप्रदर्शितानुमानप्रामाण्यस्य वेदान्तप्रामाण्यवादिभिरप्यवश्यं समर्थनीयत्वात्। न च यथाकथंचिद्युक्त्युपन्यासात्मकं तद्वाक्यमिति वाच्यम्। शास्त्रदर्शितयुक्तेराभासत्वे शास्त्रस्यैवाप्रामाण्यप्रसङ्गात्। ईश्वरमनङ्गीकुर्वन्तं साङ्ख्यं प्रति 'रचनानुपपत्तेश्च नानुमान' (ब्र० २-२-१ सू.) मित्यधिकरणे तस्मिन्ननुमानं प्रमाणमुपन्यस्यतः सूत्रकारस्यानाप्तत्वप्रसङ्गाच्च। न चेश्वरानुमानस्य सद्युक्तित्वेऽपि वेदान्ततात्पर्यग्राहकषड्विधलिङ्गान्तर्गतत्वादीश्वरस्य तद्विषयत्वेन वेदान्तानां तत्र प्रामाण्यं न हीयत इति शङ्कनीयम्। येन केनाप्यन्येन प्राप्तेऽर्थे शास्त्रप्रामाण्यायोगात्। अन्यथा 'अग्निर्हिमस्य भेषज' मित्यादिश्रुत्यर्थविषयं प्रत्यक्षं तत्तात्पर्यग्राहकमिति प्रत्यक्षविषयेऽप्यर्थे शास्त्रप्रामाण्यप्रसङ्गादिति पूर्वपक्षी मन्यते। ननु, तर्कमार्गेणासद्युक्तेरपि युक्तित्वेनोपन्यासः श्रुतितात्पर्यनिर्णयार्थमुपपत्तिरूपलिङ्गं भवत्येव। यथा शास्त्रान्तरदृष्ट्या दोषस्य 'ब्रह्मवादिनो वदन्ति स त्वं यजेत यो यज्ञस्यार्त्या वसीयान्त्स्या'दिति। 'आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः। तस्मात्प्रयत्नतः कुर्यात्स्नानमुष्णेन वारिणा।।' इत्याद्यर्थवादेषु गुणत्वेन कीर्तनं विधेयप्रशंसार्थं गुणकथनं भवति। दृश्यते चाप्यन्यत्राप्ययुक्तेर्युक्तित्वेनोपन्यासः। 'तद्यद्यस्मिन्सर्पिर्वोदकं वा सिञ्चति वर्त्मन्येव गच्छती'ति। अत्र हि 'य एषोऽक्षिणि पुरुषो दृश्यत' इत्यक्षिणि परमेश्वरस्य स्थितिमुक्त्वा अक्ष्णः परमेश्वरस्थानत्वादेव तस्यापि परमेश्वरवत् निर्लेपत्वं दृश्यत इति परमेश्वरस्थानत्वे निर्लेपत्वं युक्तितयोच्यते। न च काचपटलादिभिः

सलेपेऽक्ष्णि सर्पिरुदकानवस्थानमात्रेण सर्वथा निर्लेपत्वं सिद्ध्यति। किं त्वयुक्तेर्युक्तितयोपन्यासादक्षिण परमेश्वरावस्थानप्रतिपादने श्रुतेस्तात्पर्यातिशयमात्रं तेन सिद्ध्यति। एवं 'तस्मात्त्वेवोद्गातैतस्य हि गाता तद्य इमे वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः' इत्यादीन्यत्र भूयांस्युदाहरणानि। एवं श्रुतावयुक्तेर्युक्तित्वोपन्यासदर्शनेन श्रुतिशैलीविदो महर्षयोऽपि तत्र तत्र तात्पर्याविष्करणार्थमयुक्तिमेव युक्तित्वेनोपन्यस्यन्ति। यथा तावदापस्तम्बः स्वसूत्रे-'अथाप्यस्य प्रजातिममृतमाम्नाय आह प्रजामनुप्रजायसे तदु ते मर्त्यामृत'मिति (आप० ध० प्र० २-ख-२४सू० १) पुत्रोत्पादनविधिशेषं पितुः पुत्रपौत्रादिसन्तानरूपेणानुवृत्तिरेव नित्यत्वमित्यर्थवादं पितुः पुत्रादिभिरभेदरूपमसिद्धहेतुमवलम्ब्य प्रवृत्तं हेतूपपादनेन परिष्कर्तुमयुक्तिमेव युक्तित्वेनोदाजहार। 'अथापि स एवायं निरूढः पृथक् प्रत्यक्षेणोपलभ्यते। दृश्यते चापि सारूप्यं देहत्वमेवान्य' (आप० ध० प्र० २-ख-२४सू० २) दिति। इयांस्तु विशेषः। उदाहृता युक्तयस्सर्वथा युक्त्याभासा एव। 'सन्मूलमन्विच्छे'ति प्रकृतयुक्तिस्तु केवलतर्कमार्गेण दोषप्रसक्तिमत्यपि स्वानुग्राह्यप्रमाणभूतवेदान्तशरणत्वात् वनप्रविष्टसिंहन्यायेन बलवती न तद्दोषस्पृष्टा भवति। अनुमानेन जगत्कर्तृवत्तदनेकत्वादयोऽपि सिद्ध्येयुरिति हि दोषाः ते श्रुतिविरोधान्न प्रवर्तयिष्यन्ते। एवं च श्रुत्यनुग्राहकस्यानुमानस्य निर्दोषत्वात्तद्विषयं साङ्ख्याधिकरणे जगत्कर्तर्यनुमानप्रदर्शनम्। अतस्स्वतन्त्रानुमानस्य प्रामाण्याभावान्न तत्प्राप्तविषयतया वेदान्तानामप्रामाण्यं प्रसज्यते। न च कर्तृत्वानुकूलज्ञानचिकीर्षादिवत्सर्वेषां परमेश्वरगुणानामनुमानतः प्राप्तिरपि सम्भाव्यते येन तत्प्राप्तविषयतया सर्वेषां वेदान्तानां तस्मिन्नप्रामाण्यं प्रसज्यत इत्यस्वरसादाह--अथवेति। सर्वाणि वेदान्तवाक्यान्युपासनाविधिपराणि। न तेषां मध्ये किञ्चिदपि स्वरूपपरं वाक्यमस्ति येषु वेदान्तवाक्येषु ब्रह्मगुणकीर्तनमात्रमस्ति नोपासनाविधिश्रवणं तेषामपि योग्योपासनाविधित्वस्य सम्भृत्यधिकरणे(ब्र० ३-३-२३)वक्ष्यमाणत्वात्। अतः कस्यापि वेदान्तवाक्यस्य ब्रह्मणि तात्पर्यं न सम्भवति। उभयपरत्वे वाक्यभेदप्रसंगादित्यर्थः। ननु, परस्परापेक्षस्वतन्त्रार्थद्वयपरत्व एव वाक्यभेदः। इह तूपासनाविधीनामुपास्यत्वेन फलत्वेन चास्ति ब्रह्मस्वरूपसिद्ध्यपेक्षा। अतस्स्तावकतया यागविधिपरेणाप्यर्थवादेन तदपेक्षितस्वर्गस्येवोपासनाविध्येकवाक्यतापन्नेनाऽपि ब्रह्मस्वरूप-समर्पकावान्तरवाक्यजातेन तत्सिद्धिः स्यादित्याशङ्क्याह-**अत इति।** न तावदुपासनाविधीनामुपास्यत्वेन ब्रह्मस्वरूपसिद्ध्यपेक्षा। आरोपितविषयेणाप्युपासनोपपत्तेः। नापि फलत्वेन। ततो निरतिशयानन्दरूपमात्रेण तत्सिद्धावपि स्वरूपतो गुणतो विभूतितश्च परिच्छेदराहित्यात्मना ब्रह्मत्वेन ब्रह्मलक्षणत्वाभिमतजगज्जन्मादिकारणत्वादिरूपेण च फलत्वाप्रयोजकेन तत्सिद्ध्ययसम्भवात्। एतेन यावद्गुणविभूत्यादिकं मुक्तानामुपासनाफलत्वेनोपासनाविध्यन्वितैर्वाक्यैस्सिद्ध्यति तावता तेन युक्तं ब्रह्म 'निरञ्जनः परमं साम्यमुपैती'ति श्रुत्यन्यथानुपपत्त्या सिद्ध्यति। तथाभूतब्रह्मभावे प्रजापतिविद्यायां मुक्तिफलत्वेनोक्तस्य सत्यसङ्कल्पत्वादेर्ब्रह्मसादृश्यरूपत्वानुपपत्तेरित्यपि शङ्का निरस्ता। एवमपि

मुक्तेष्वसम्भावितेन जगद्व्यापारादिना रूपेण तत्सिद्ध्युपायालाभात् यत्किञ्चिच्छ्रुतिमूलार्थापत्तिसिद्धेऽर्थे कस्यापि श्रुतिवाक्यस्य प्रामाण्यासम्भवेन मुक्तगतसादृश्यप्रतियोगितोपयुक्तरूपविशिष्टेऽपि ब्रह्मणि वेदान्तानां प्रामाण्यासिद्धेश्च। न च फलभूतसादृश्यप्रतियोगित्वानुपयुक्ते रूपजाते ध्यानविध्यनपेक्षितत्वेना-वान्तरतात्पर्यानास्पदेऽपि देवताधिकरणन्यायेन मानान्तरप्राप्तिविरोधराहित्याद्वेदान्ताः प्रमाणं भवेयुरिति वाच्यम्। 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्'। 'न सन्न चासच्छिव एव केवल'इत्यादिवाक्यानां 'नारायणपरं ब्रह्म' 'एको ह वै नारायण आसी' दित्यादिवाक्यान्तरविरोधसत्त्वेन विरोधराहित्यासिद्धेः। द्विविधवाक्यविरोधे सति तद्बलाबलावधारणस्य तात्पर्यलिङ्गाधीनत्वेन तात्पर्यराहित्ये तदवधारणासम्भवादिति भावः। सिद्धान्तप्रतिज्ञायां सौत्रहेतुं प्रदर्श्य प्रथमपूर्वपक्षमाद्यव्युत्पत्तिग्रहस्य कार्यवाचिपदयुक्तकार्य श्रवणाधीनत्वनियमासिद्ध्या दूषयति-**यदुक्तमित्यादिना**। पुत्र इति। दृष्टचैत्रजन्मा बालः तथाभूतेन वार्ताहारेण सह चैत्रसमीपं गतः 'चैत्र पुत्रस्ते जात' इति वाक्यमाकर्णितवतः चैत्रस्य मुखविकासेन हर्षमनुमाय हर्षकारणं पुत्रजन्मज्ञानं कल्पयित्वा तज्जननसामर्थ्यं वाक्यस्य कल्पयतीत्येवं सिद्धार्थेऽपि प्रथमव्युत्पत्तिग्रहो दृश्यते। प्रियान्तरज्ञानस्यापि हर्षकारणत्वसम्भवात्पुत्रजन्मज्ञानमेव तत्कारणमिति निश्चेतुमशक्यमिति चेन्न। स्वोपलब्धपुत्रजन्मन इव प्रियान्तरस्यानुपस्थिततत्वात्। सुखप्रसवसुलग्नजन्मादेः प्रियान्तरस्योपस्थितिसम्भवेऽपि तस्य पुत्रजन्मघटितशरीरतया लाघवेन पुत्रजन्मज्ञानस्यैव हर्षकारणत्वेन कल्पनौचित्यात्। तथापि हर्षमात्रं व्यभिचारि पुत्रजन्मज्ञानानुमितौ न लिङ्गमिति चेन्न। अनुपस्थितस्य गुरुशरीरस्य चात्र मुखविकासानुमितेश्च हर्षे व्यभिचारकारणत्वकल्पनायोगात्। प्रियान्तर-ज्ञानाजन्यत्वनिश्चयसम्भवेन तद्विशेषितस्य हर्षस्याव्यभिचारित्वात् लिङ्गाभासजन्यज्ञानस्यापि विषयाबाधेन प्रमात्वसम्भवाच्च। सूत्रसञ्चाराधिष्ठितदारुपुत्रकस्य 'घटमानये' ति सूत्रधारवाक्यप्रयोगानन्तरं घटानयनक्रियादर्शने सति या क्रिया कृतिजन्या सा कृतिज्ञानसाध्या तज्ज्ञानं वाक्यजन्यमित्यनुमितिप्रवाहस्य भ्रमत्वेऽपि तद्धेतुकशक्तिग्रहस्य विषयाबाधेन प्रमात्वदर्शनादिति भावः। स्यादेतत्। यथा कार्यव्युत्पत्तिपक्षे बालस्य स्तन्यपानादिप्रवृत्तौ कार्यताज्ञानं कारणमवगच्छन्प्रयोज्यप्रवृत्त्या तस्य कार्यताज्ञानं कल्पयति तथा पुत्रजन्मज्ञानं हर्षकारणमिति जातः शिशुश्चैत्रस्य पुत्र इत्यपि प्रागवगच्छन् चैत्रस्य हर्षेण पुत्रजन्मज्ञानं कल्पयति उत यथा प्रयोज्यप्रवृत्त्यनुमितकार्याताज्ञाने 'गामानये' तिवृद्धवाक्यस्य कारणत्वं प्रागनवगच्छन्नपि तस्य तत्कारणत्वं कल्पयति एवं पूर्वं तथानुपगच्छन्नपि मुखविकासानुमिते हर्षे पुत्रजन्मज्ञानस्य कारणत्वं कल्पयति। नाद्यः। स्तनन्धयस्य स्तनपानादिषु हर्षकारणत्वावगतिसम्भवेऽपि पुत्रजन्महर्षकारणमिदानीं जातः शिशुश्चैत्रस्य पुत्र इति कस्यचिदुपदेशमन्तरेण स्वयमेव तथावगतेरसम्भवात्। उपदेशेन तथावगतिसमर्थने 'पुत्रस्ते जात' इत्यत्र व्युत्पत्तिग्रहस्य प्राथमिकत्वासिद्धेः। न द्वितीयः। कार्यताज्ञाने गामानयेत्युत्तमवृद्धवाक्यस्येव हर्षे पुत्रजन्मज्ञानस्यान्वयव्यतिरेकवत्त्वानुपलम्भात् बालगतपुत्रजन्मज्ञानस्य चैत्रहर्षाकारणत्वात् चैत्रपुत्रजन्मज्ञानस्य प्रागक्लृप्तत्वात्। न च बालः स्वस्य मनस्यनुवर्तमानमेव

शिशुजन्मज्ञानं चैत्रेऽपि हर्षकारणत्वेन कल्पयतीति वाच्यम्। शिशुजन्मज्ञानचैत्रहर्षानुमानयोर्मध्ये बालस्य वस्त्वन्तरविषयज्ञानानामपि सत्त्वेन तस्यैव तत्कारणत्वेन कल्पने विशेषहेत्वभावात् चैत्रे क्लृप्तस्य 'पुत्रस्ते जात' इति वर्णावलिविषयज्ञानस्य वार्ताहारदर्शनस्य च हर्षकारणत्वसम्भवे तत्कारणत्वेन ज्ञानान्तरकल्पनानवकाशाच्च। बालः स्वस्य ताभ्यां हर्षो न जात इति चैत्रे हि तयोस्तत्कारणत्वं न कल्पयतीति चेत्तर्हि बालस्य शिशुजन्मज्ञानेनापि हर्षो न जात इति तदपि तत्कारणत्वेन न कल्पयेत्। शिशुजन्मज्ञाने चैत्रस्य हर्षहेतुसम्बन्धविशेषकल्पने क्लृप्तयोस्तयोरेव तत्कल्प्यताम्। 'धार्मिकल्पनातो वरं धर्मकल्पने' ति न्यायात्। न च शिशुपदाङ्कितं पटं गृहीत्वागच्छत् वार्ताहारस्तज्जननज्ञापनाय गच्छतीत्यवगमात् शिशुजन्मज्ञानं भविष्यत्त्वेन प्रागेव क्लृप्तमिति वाच्यम्। शिशुपदाङ्कितपटनयनं शिशुजन्मज्ञापननार्थमिति प्राचीनमाप्तोपदेशमन्तरेणावगन्तुमशक्यतया प्राचीनतदुपदेशापेक्षावश्यम्भावेन 'पुत्रस्ते जात' इत्यत्र व्युत्पत्तिग्रहस्य प्राथमिकत्वासिद्धेः। तस्मादाद्यव्युत्पत्तिग्रहस्य वृद्धव्यवहारैकायत्तत्वात् तदपेक्षितप्रवृत्तिकैरुपदेशैः पुत्रजन्म हर्षकारणमिदानीं जातशिशुश्चैत्रस्य पुत्रः तत्पदाङ्कितपटनयनं तज्जन्मज्ञापनार्थमित्यवगच्छन्नेव 'पुत्रस्ते जात'इति वाक्यस्य स्वानभ्यस्तभाषान्तररूपस्य पुत्रजन्मज्ञाने सामर्थ्यं कल्पयति न तु प्राचीनैरुपदेशैस्तावदवगन्तुमसमर्थोऽत्यन्तबाल इति। कार्याविषयाद्यव्युत्पत्त्यनुरोधात्। तत्रापि पुत्रजन्मनिमित्तस्नानाभ्युदयजातकर्मादिकार्यतावाचिपदान्तराध्याहारो युक्तः। तद्वाक्यश्रवणसमनन्तरभाविस्नानादिप्रवृत्तिसंवादाच्चेति चेत् अत्राप्युक्तमेवोत्तरं लिङ्गाभासजन्यस्यापि ज्ञानस्य विषयाबाधेन प्रमात्वं सम्भवतीति। तथा हि-धर्मिकल्पनागौरवमनालोच्यैव कश्चिद्बालो वार्ताहारदर्शनतद्धस्तपदाङ्कितपटालोकनततदीयवर्णावलीश्रवणेभ्योऽन्यदेव किञ्चिज्ज्ञानं कारणमिति मन्यमानस्तदन्विच्छन्दैवात्स्वदृष्टशिशुजन्मज्ञानमेव तत्कारणं कल्पयित्वा वाक्यस्य तज्जननसामर्थ्यं कल्पयेत्। एवं कल्पनायां च काकतालीयसंवादेन ततस्सिद्धार्थे शब्दसामर्थ्यकल्पनारूपस्य ज्ञानस्य प्रमात्वमनिवार्यम्। ननु, 'चैत्र पुत्रस्ते जात' इति वाक्यस्य न विशिष्य चैत्रपुत्रजन्मज्ञानजनने सामर्थ्यम्। न च बालेन चैत्रस्य स्वदृष्टजन्मनः शिशोश्च प्रागनवगतजन्यजनकभावसम्बन्धेन चैत्रे विशिष्य तत्पुत्रत्वाकारेण तज्जन्यज्ञानं कल्पयितुं शक्यम्। येन वाक्येन तज्जननसामर्थ्यं कल्प्यत इति सा कल्पना प्रमा स्यात्। किं तु बालेन चैत्रपुत्रस्य यद्धर्मप्रकारेण गृहीतस्य जन्म दृष्टं तद्धर्मावच्छिन्नतज्जन्यज्ञानमेव कल्पयितुं शक्यम्। तथाभूतज्ञानजनने शब्दसामर्थ्यकल्पना त्वप्रमैव स्यादिति चेन्न। प्रकारविशेषौदासीन्येन यस्य जन्म मया दृष्टं तज्जन्मज्ञानं चैत्रस्य हर्षकारणमासीदिति कल्पयित्वा वाक्ये तज्जननसामर्थ्यकल्पनायाः प्रमात्वसम्भवात्। यद्वा एतदस्वरसादाह-**वृद्धेति**। यथा प्रवृत्तिः कार्यावगतिपूर्विका तथा कार्यावगतिरपि प्रवृत्तिविषयशुद्धपदार्थगोचरज्ञानपूर्विकेति नियमस्य दृष्टत्वात्प्रयोज्यस्य प्रवृत्त्या कार्यावगतेरिव कार्यावगत्या तदन्वितशुद्धपदार्थज्ञानस्याप्यनुमितिरनिवार्या। ततश्च तत्रोत्तमवृद्धवाक्यादृते नान्यत्कारणमस्तीत्या-द्यव्युत्पत्तिग्रहसमय एव शुद्धे गवादिपदार्थे शब्दसामर्थ्यग्रहणसिद्धिः। ननु, प्रवृत्त्यनुमितकार्यताज्ञान एव

शब्दस्य सामर्थ्यं कल्पयितुं शक्यम्। अर्थापत्तेस्साक्षादुपपादकविषयत्वादिति चेत्तर्ह्युक्तहेतुना प्रयोज्यचेष्टानुमितप्रवृत्तिजनन एव तस्य सामर्थ्यं कल्प्येत। ननु, कार्यताज्ञानरूपक्लृप्तकारणाभावे प्रवृत्तिर्न सम्भवतीति प्रवृत्त्यनुमितकार्यताज्ञानजनने तस्य सामर्थ्यं कल्प्यमिति चेत्तर्हि कार्यताज्ञानमपि शुद्ध-पदार्थगोचरज्ञानरूपक्लृप्तकारणाभावे न संभवतीति तस्य शुद्धपदार्थगोचरज्ञानजननसामर्थ्यकल्पनमपि भवन्न निवारयितुं शक्यम्। किं च यदि साक्षात्प्रवृत्तिजनकज्ञाने शब्दस्य सामर्थ्यं कल्पनीयं तर्हि ममेदं कार्यमिति ज्ञान एव तस्य सामर्थ्यं कल्प्येत। तस्यैव 'गामानये'ति वाक्यजन्यमिदमं-शरहितगवानयनकार्यतामात्रविषयज्ञानानन्तरभाविनः साक्षात्प्रवर्तकत्वात्। तस्माद्यद्यपि प्रथमं बालस्य कार्य एव व्युत्पत्तिग्रहो भवेत् तथापि पश्चादावापोद्वापाभ्यां पदविशेषाणां शक्तिग्रहसमये कार्यस्य तद्वाचिपदलभ्यत्वाप्रतिसन्धानात् कार्यांशपरित्यागेन गवादिपदानां स्वस्वार्थमात्रे शक्तिनिष्कर्षो भवेत्। प्रथमप्रवृत्तस्यापि शब्दानां कार्ये व्युत्पत्तिरिति ज्ञानस्य कार्यमन्यलभ्यमिति प्रतिसन्धानाभावेन जातस्य तत्प्रतिसन्धानानन्तरं बाधोपपत्तेः। न चोपजीव्यबाधो दोषः। 'गामानये'ति समुदायस्य गवानयनकार्यताज्ञाने सामर्थ्यग्रहणस्य पश्चादावापोद्वापकृतगवादिपदशक्तिग्रहोपजीव्यत्वेऽपि सर्वशब्दानां कार्यताज्ञाने सामर्थ्यमिति ग्रहणसस्य तदनुपजीव्यत्वात्। यथाकथञ्चित्स्वरूपेण तस्य तदुपजीव्यत्वेऽपि (तत्वज्ञानेन) तदनुपजीव्यस्य तत्प्रामाण्यस्य तेनोपमर्दनसम्भवाच्च। देहात्मभ्रमस्य रागादिदोषसम्पादनेन सकलकर्मानुष्ठानहेतोरदृष्टशरीराद्यार्जनद्वारा तत्वज्ञानोपजीव्यत्वेऽपि तत्वज्ञानेन तदनुपजीव्यस्य तत्प्रामाण्यस्योपमर्ददर्शनात्। एवं यदा प्रथमं सर्वशब्दानां कार्ये व्युत्पत्तिग्रहेऽपि पश्चादन्यलभ्यत्वप्रतिसन्धानेन कार्यांशपरित्यागात्सिद्धार्थेऽपि शब्दानां व्युत्पत्तिसिद्धिः। तदा किमु वक्तव्यं प्रथममेव सिद्धार्थेऽपि व्युत्पत्तिग्रहे सतीत्याशयः। इत्थं द्विविधवक्तृश्रोतृव्यवहारपर्यालोचनया व्युत्पत्तिग्रहस्य सिद्धार्थविषयत्वमुपपादितम्। इदानीं मातापित्रादिकर्तृकशब्दार्थसम्बन्धव्युत्पादनपर्यालोचनया तस्य तद्विषयत्वमुपपादयितुमुपक्रमते-अथवेति। अन्यार्थप्रवृत्ताद्वक्तृश्रोतृव्यवहाराद्व्युत्पित्सोर्व्युत्पत्ति-ग्रहणमानुषङ्गिकं जायते। आनुषङ्गिकतया भवत्फलं नियमेन नात्यन्तं यथावद्भवतीति ततः कदाचित्कश्चिच्छब्दार्थसम्बन्धं कार्यविषयं सिद्धार्थसाधारणं वा प्रतिपद्यमानो विपर्यस्यतीत्यपि वक्तुं शक्यम्। मातापित्रादिकर्तृकाद्व्युत्पादनादनादिपरंपराप्रसिद्धाद्व्युत्पत्तिग्रहणं तदर्थादेव जायते। ततो भवत्फलं कदापि न यथावद्भवति। ततो व्युत्पाद्यमानो विपर्यस्यतीति वक्तुमशक्यमित्यनन्यथासिद्धेन व्युत्पादनेन सिद्धार्थे व्युत्पत्तिस्सुदृढा भवतीत्यभिप्रेत्य किमिह वृद्धव्यवहारेणे'ति वृद्धव्यवहारेऽनादरणमाविष्कृतम्। मातापित्रादिकर्तृकव्युत्पादनप्रकारं दर्शयति-**तथा हीति।** मातापित्रादयो हि बालान् शब्दार्थसम्बन्धं जिग्राहयिषवः शिशुपशुप्रभृतीनर्थानङ्गुल्यादिभिर्निर्दिश्य तत्तद्वाचकशब्दान्प्रयुञ्जते। ते बालास्तदर्थाभिमुखाङ्गुलिनिर्देशसहितैर्वाचकशब्दप्रयोगैर्बहुशश्शिक्षिताश्शब्दार्थसम्बन्धं निश्चिन्वन्तीत्येवं प्रायः सिद्धार्थ एव व्युत्पत्तिग्रहः सर्वेषामनुभवसिद्ध इत्यर्थः अत्रेदं विचार्यते।

अङ्गुलिनिर्देशसहितवाचकशब्दप्रयोगदर्शनमात्रेण कथं बालोऽस्य शब्दस्यायमर्थ इति निश्चिनुयात्। न ह्यर्थविशेषाभिमुखाङ्गुलिनिर्देशसहितशब्दविशेषप्रयोगस्तयोर्वाच्यवाचकभावप्रत्यायनार्थ इति बालस्य प्राग्व्युत्पत्तिग्रहोऽस्ति। न वा तथा नियमोऽस्ति। बहुजनसमाजे विशिष्य चैत्रमनवबुध्यमानं तमन्विच्छन्तं प्रति तदभिमुखाङ्गुलिनिर्देशसहितचैत्रशब्दप्रयोगस्य वाच्यवाचकभावप्रत्यायनार्थत्वाभावात्। स्यादेतत्। तत्तदर्थानङ्गुल्या निर्दिश्य तत्तद्वाचकशब्देषु बहुशः प्रयुक्तेषु बालानां तत्तदर्थाभिमुखाङ्गुलिनिर्देशशब्दविशेषप्रयोगसाहचर्यदर्शनजनितवासनाबाहुल्यात् तत्तच्छब्दश्रवणानन्तरं तत्तदर्थविषयस्वबुद्ध्युदयेन तत्र तत्रार्थे तस्य तस्य शब्दस्य वाचकत्वरूपसम्बन्धनिश्चयो भवेत्। सम्बन्धं विना शब्दार्थबोधासम्भवात् सम्बन्धान्तराभावाच्च। भाष्यमप्युक्तार्थपरम्। 'तदर्थं बहुशश्शिक्षिता' इत्यादिभाष्यमित्थं योजनीयम्। बहुशो यावदङ्गुलिनिर्देशशब्दप्रयोगसाहचर्यजनितवासनाभूयस्त्वात् शब्दश्रवणमात्रेणार्थं स्मर्तुं बालः क्षमो भवेत् तावत्पर्यन्तमङ्गुलिनिर्देशसहितशब्दप्रयोगावर्तनेन शिक्षितास्तैस्तैः शब्दैरुत्पादिततत्तदर्थज्ञानास्सन्तः तेषु तष्वर्थेषु व्युत्पद्यन्ते। शब्दैरर्थबोधस्य सम्बन्धमूलत्वात् सम्बन्धान्तराभावाच्च अर्थेषु शब्दानां वाचकत्वमेव सम्बन्ध इति निश्चयं लभन्त इति। नैतद्युक्तम्। यदि तत्तदर्थविषयाङ्गुलिनिर्देशशब्दप्रयोगसाहचर्यरूपसम्बन्धान्तराधीनो बालस्य शब्दार्थप्रत्ययः। किमर्थं वाचकत्वरूपसम्बन्धान्तरकल्पना। न हि चैत्रमैत्रादिषु साहचर्यसम्बन्धादन्यतरदर्शनेनान्यतरस्मरणं जायमानं स्वोपपादकतया सम्बन्धान्तरकल्पनामपेक्षत इति। अत्रायं भाष्यकारस्याभिप्रायः। दृश्यते तावन्मात्रादिकृतार्थविशेषाभिमुखाङ्गुलिनिर्देशसहितशब्दविशेषप्रयोगभूयोदर्शनवन्तो बालाः तयोर्वाच्यवाचकभावं प्रतिपद्य शब्दश्रवणे तदर्थं स्मृत्वा तदनुसारेण चेष्टन्ते। अर्थदर्शने तद्वाचकशब्दं स्मृत्वा प्रयुञ्जते चेति। तेन तद्दर्शनादित्थमवधारणं जायते। शब्दार्थसम्बन्धानभिज्ञान्प्रत्यङ्गुलिनिर्देशादिचेष्टाविशेषसहितशब्दप्रयोगो वाच्यवाचकभावसम्बन्ध-प्रत्यायनार्थः। अत एव तेन बालाः प्रतिलब्धवाच्यवाचकभावज्ञानास्तदनुकूलं व्यवहरन्तीत्येवमवधारणवन्त एव जन्मान्तरे शैशवं प्रतिपद्य मात्रादिभिर्व्युत्पाद्यन्त इति तेषां पूर्वजन्मसंस्कारानुवृत्त्या मात्रादिकर्तृकार्थविशेषाभिमुखशब्दविशेषप्रयोगस्य शब्दार्थसम्बन्धप्रत्यायनार्थत्वस्मरणं भवति। ततो वाच्यवाचकभावरूपतत्सम्बन्धनिश्चयः। तदनन्तरमेव शब्दश्रवणादर्थप्रत्ययो न तु ततः पूर्वम्। जन्मान्तरसंस्काराणां स्तन्यपानप्रवृत्तेरन्यत्राप्यनेकत्रोपकारकत्वं देवताधिकरणे 'हिंस्राहिंस्रे मृदुक्रूरे' इत्यादिवचनोदाहरणेन स्फुटीकरिष्यते। एवं जन्मान्तरसंस्कारबलमभिप्रेत्यैवार्थविषयचेष्टाविशेषसहितशब्दप्रयोगस्य संज्ञासंज्ञिभावप्रत्यायकत्वमुक्तं महाभाष्ये। 'अगोज्ञाय कश्चिद्गां सक्थिनि कर्णे वा गृहीत्वोपदिशत्ययं गौरिति। न चास्मायाचष्टे गौरितीयमस्य संज्ञेति भवति चास्य सम्प्रत्यय इति। एवं च भाष्यस्यायमर्थः। बहुशः शिक्षिताः शिक्षां

वाच्यवाचकभावसम्बन्धज्ञानरूपविद्योपादानं पौन:पुन्येन प्रापितास्तेषु तेष्वर्थेषु व्युत्पद्यन्ते व्युत्पत्तिं शब्दानां वाचकत्वनिश्चयं दृढसंस्काराधानेन शब्दश्रवणे सत्यर्थस्मरणस्य अर्थदर्शने सति शब्दस्मरणस्य चोपकारकं लभन्ते। यथा बहुभिरुपदेशैः शास्त्रार्थज्ञानपौन:पुन्यं प्रापिताः शास्त्रार्थनिश्चिताः शास्त्रार्थनिश्चयं दृढसंस्काराधानेन कालान्तरव्यवहारोपयोगिनं लभन्त इति। एवं क्रियाकारकपदानां मात्रादिकृतव्युत्पादनप्रक्रिययाऽर्थनिश्चये सति बालाः परप्रयुक्तैर्वाक्यैर्वाक्यार्थमवगच्छन्ति। स्वयं च क्रमेण परप्रत्यायनार्थं वाक्यं प्रयुञ्जते। एवं चानया प्रक्रियया व्युत्पत्तिग्रहणे पदार्थप्रतिपत्तिपूर्विका वाक्यार्थप्रतिपत्तिः। न तु वृद्धव्यवहाराद्व्युत्पत्तिग्रहण इव वाक्यार्थप्रतिपत्तिपूर्विका पदार्थप्रतिपत्तिः। अत्रेयं शङ्कोन्मिषति। अनया प्रक्रियया व्युत्पत्तिग्रहकाले शब्दानां पदार्थमात्रे सामर्थ्यग्रहणे सत्यन्वयांशे तेषां सामर्थ्यस्यागृहीतत्वाद्वाक्यान्तर्गतसर्वपदशक्तिग्रहेऽपि पदार्थानां परस्परान्वयविषयिणी वाक्यार्थप्रतिपत्तिर्न स्यात्। वाक्यस्यान्वये सामर्थ्यग्रहणेऽपि तत्प्रतिपादकत्वेन पदान्यप्यगृहीतपदार्थसामर्थ्यान्येव पदार्थान्प्रतिपादयेयुरितीमामाशङ्कामुदाहरणमुखेनापाकरोति–**काव्येति।** अयं भावः। कतिपयकाव्यश्लोकपाठेन क्रियाकारकतद्विशेषणपदयोजनाप्रकाराभिज्ञाः कङ्कटिकमुञ्जकेशाद्यप्रसिद्धपदप्रायाणां काव्यश्लोकानामर्थमजानानास्तदभिज्ञपुरुषोपदेशेन पदच्छेदपूर्वकं पदार्थनवगच्छन्ति। ततः स्वयमेव वाक्यार्थमवगच्छन्ति । न तत्र तेषां काव्यश्लोकानां तदन्तर्गतपदार्थान्वयरूपे वाक्यार्थे सामर्थ्यग्रहणमस्ति। वृद्धव्यवहाराधीनकार्यान्वितव्युत्पत्तिग्रहणाभ्युपगमेऽप्यन्वयसामान्य एव सामर्थ्यग्रहणं लभ्यते। नान्वयविशेषे। वृद्धव्यवहारात्कार्यान्विते गवादिपदानां शक्तिग्रहणेनान्वयसामान्ये शब्दसामर्थ्यग्रहणलाभे सत्याकाङ्क्षादिसहकृताद्वाक्याद्विशेषो लभ्यत इति चेत्। एवं तर्हि शब्दानां पदार्थमात्रे सामर्थ्यग्रहणे सत्युक्तसहकारिविशिष्टाद्वाक्यात्तदन्तर्गतपदार्थान्वयो लभ्यत इत्येवास्तु। कृतं वृद्धव्यवहाराधीनेनान्वयसामान्ये शक्तिग्रहणेनेति। एवं सिद्धार्थे व्युत्पत्तिग्रहव्युत्पादनेन सिद्धं प्रथमपूर्वपक्षनिराकरणमुपसंहरति–**अत इत्यादिना।** द्वितीयपूर्वपक्षमनूद्य पूर्वाधिकरणोक्तजगत्कर्त्रनुमान-दूषणोद्धाटनेन निराकरोति–**यदुक्तमित्यादिना।** तर्हि पूर्वाधिकरण एव निराकृतस्य जगत्कर्त्रनुमानस्यात्रापि तेनैव दूषणेन निराक्रियमाणस्य पुनरुत्थाने किं बीजमित्याकाङ्क्षायां साङ्ख्याधिकरणपर्यालोचनया तदनुमानप्रामाण्यं सिद्धान्तेऽप्यवश्यमुपगन्तव्यमित्येतद्बीजमिति सूचयन्नेव तत्प्रामाण्याभ्युपगमस्तस्य वेदान्तानुगुण्यकृतः न स्वातन्त्र्यकृतः वेदान्तानुगुण्यकृततत्प्रामाण्याभ्युपगमश्च न वेदान्तप्रामाण्यविघातक इत्यभिप्रेत्याह–**किं चेति।** अथोपासनाविधिपराणं वेदान्तानां ब्रह्मण्यपि तात्पर्ये वाक्यभेदप्रसङ्ग इति तृतीयपूर्वपक्षो निराकरणार्थमुद्भावनीयः। तदुद्भावनोपयोगितया तेषामुभयत्रापि तात्पर्यं व्यवस्थापयति–**यत्र वाक्यानामित्यादिना 'तज्ज्ञानविधिपरा अपि ज्ञायन्त'** इत्यन्तेन। अत्रेयं शङ्का समुन्मिषति। नैवं पूर्वपक्षं उपपद्यते। वेदान्तानां वाक्यभेदप्रसङ्गेनोभयत्र तात्पर्यासम्भवेऽपि चक्षुषो वस्तुद्वयसन्निकर्षवन्मयूखवत्त्वेन तदुभयविषयप्रत्यक्षप्रमाजनकत्ववत् परामर्शस्य साध्यद्वयव्याप्यलिङ्गद्वयविषयत्वेन तदुभयानुमिति-

प्रमाजनकत्ववच्च वेदान्तवाक्यानां ब्रह्मतदुपासनाविधिशक्तपदद्वयवत्त्वेन तदुभयविषयशब्द-प्रमाजनकत्वस्योपपन्नतया तेषां ब्रह्मण्यपि प्रामाण्यसम्भवात्। यदि तात्पर्याभावेऽप्युभयविषय-प्रमाजनकत्वमात्रेण वाक्यभेदः स्यात् तदा शब्दशक्तिप्रयुक्तस्योभयविषयप्रमाजनकत्व-स्यानिवार्यत्वाद्वाक्यभेदो दोष एव न भवेत्। सम्भवति ह्येकवाक्यत्वे तस्य दोषतेति। तत्र यथा प्रत्यक्षादिप्रामाण्यं यावत्सन्निकृष्टादिविषयं न तथा शब्दप्रामाण्यं यावद्व्यक्तिगोचरविषयम्। किं तु तात्पर्यनियन्त्रितं सत्तद्गोचरे व्यवस्थितम्। अत एव नानार्थशब्दप्रयोगे यत्र तात्पर्यं तत्रैव प्रमा जायते। श्लेषकाव्यादिष्वनेकत्र तात्पर्ये तावत्यर्थे प्रमा जायते। तथा चोपासनाविधिपराणां वेदान्तानां ब्रह्मणि तात्पर्याभावाभ्युपगमे तत्र प्रामाण्यं न प्रसज्यत इत्यवाक्यभेदोपपत्तौ वाक्यभेदावहमुभयत्र तात्पर्यं नाभ्युपगन्तव्यमिति परिहारप्रदर्शनेन पूर्वपक्षोपपादनार्थं सर्वत्रेत्यन्तम्। यद्यपि 'श्वेतो धावती'त्यादिलौकिकवाक्यात् तात्पर्याविषयेऽपि तात्पर्यज्ञानस्याकारणत्वात्तात्पर्यभ्रमाद्वाक्यज्ञानं जायते। तज्ज्ञानं क्वचिद्विषयाबाधेन संवादेन च प्रमापि भवतीत्यनुभवसिद्धम्। तथापि लोके तात्पर्याधीनं प्रामाण्यमिति प्रायिकोऽर्थः। वेदे तु नियम एव। वेदवाक्यादनेकविधार्थप्रतीतावर्थान्तरे बाधकन्यायोपन्यासपुरस्सरं खलु क्वचिदर्थे तात्पर्यं सर्वत्र व्यवस्थाप्यते। तथा च वेदवाक्यान्यायपरामर्शदोषेण जातं ज्ञानं भ्रमरूपमेव पर्यवस्यति। मन्त्रेषु त्वनेकत्र विनियुक्तेषु विनियोजकप्रमाणावगतमनेकत्र तात्पर्यमस्तीति। तत्र क्वचिदप्यर्थे ज्ञानं भ्रमरूपं न भवति। मन्त्रप्रकाश्येषु द्रव्यदेवतादिषु यानि विशेषणानि बलवद्बाधकबलात् यत्र न समवयन्ति तत्र तेषामभिधानमदृष्टार्थमिति विशेषः। एवमुद्भावनीयपूर्वपक्षसम्भवं प्रदर्श्य तदुद्भावनाय वेदान्तानां ब्रह्मणि तात्पर्यं तत्प्रमाणप्रश्नमुखेनोपपादयितुमुपक्रमते-**वेदान्तवाक्यानामिति।** ननूपक्रमादिभिस्तात्पर्यनिर्णयो नास्मिन्नधिकरणे क्रियमाणो दृश्यते उपक्रमादिलिङ्गावगमिततात्पर्येणान्वयस्य सिद्धवद्धेतूकरणादित्याशङ्क्याह-**तदिहेति।** यस्मादस्मिन्नधिकरणे समन्वयस्य सिद्धवद्धेतूकरणं तत्प्रसाधनं विनानुपपन्नम्। तस्मादिह शास्त्रे ईक्षत्यधिकरणमारभ्य प्रत्यधिकरणं स्थालीपुलाकन्यायतः कस्यचिद्वाक्यस्योदाहरणे सर्वेषां वेदान्तानामुपक्रमादिलिङ्गैर्ब्रह्मणि तात्पर्यं निर्णीयत इत्यर्थः। प्रसङ्गादयमेव तात्पर्यनिर्णयः श्रवणं नाम यस्य रागतः प्राप्तिः प्राक्प्रसाधितेत्याह-य इति। **तत्प्रवर्तकमिति।** तस्य ज्ञानस्य जनकमित्यर्थः। ननूपक्रमादयः सम्मतिश्लोके सप्त परिगणिताः कथं षड्विधं तात्पर्यलिङ्गमिति प्रसिद्धिः तत्राह **उपक्रमेति।** उपक्रमोपसंहारावेकरूपावेकं तात्पर्यलिङ्गम्। एकार्थपर्यवसायिन्यनेकावान्तरवाक्यघटिते महावाक्ये तद्विषयौ प्रथमचरमावान्तरवाक्यभागावुपक्रमोपसंहारौ। तयोरेकेन प्रकारेण तत्प्रतिपादकत्वमैकरूप्यम्। यत्र नैवंविधमैकरूप्यं तत्रासञ्जातविरोधित्वेनोपक्रमो बलीयानुपसंहारादिति यथोपक्रममुपसंहारो नेतव्यः। किं तत्तात्पर्यं यस्योपक्रमादिभिर्निर्णयः कार्य इत्याकाङ्क्षायामाह-**तात्पर्यमिति।** परशब्द इष्टवाची महाभाष्ये 'विप्रतिषेधे परं कार्य' मिति(पा० १-८-२-सू.)सूत्र तस्य तद्वाचित्वोक्तेः 'ततस्तदालोकनतत्पराणा' मित्यादिप्रयोगदर्शनाच्च तदर्थरूपं वस्तु

परमिष्टमस्येति तत्परं वाक्यम्। वाक्यस्येच्छाभावेऽपि तद्वक्तुरर्थविवक्षारूपेच्छा तदीयत्वेनोपचर्यते। यद्यपि वेदे स्वतन्त्रवक्तुरिच्छा न सम्भवति। तथापि कल्पादौ सकलवेदप्रवर्तकस्य शब्दब्रह्माधिष्ठातुः परमेश्वरस्य प्रत्येकमृग्वेदाद्यभिमानिनां देवताविशेषाणां वेदव्याख्यातृणां मीमांसकयाज्ञिकानां च तत्तदर्थविवक्षारूपेच्छा वेदेऽपि प्रवाहानादिन्यायसम्प्रदायसिद्धार्थविषयिणी सम्भवत्येव। यथोक्तं ग्रहैकत्वाधिकरणवार्तिके–'शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते। तदप्यधिष्ठितं सर्वमेकेन परमात्मना। तथर्ग्वेदादयो वेदाः प्रोक्ता येऽपि पृथक्पृथक्। भोग्यत्वेनात्मनां तेऽपि चैतन्यानुगतास्सदा। तेषामन्तर्गतेच्छानां वाक्यार्थप्रतिपादने। विवक्षा चाविवक्षा च ज्ञायते शब्दशक्तितः। विधिशक्तया गृहीतं यत्तत्तत्सर्वं विवक्षितम्। तयैव तु परित्यक्तं व्याख्येयमविवक्षितम्।' इति। 'न्यायेन सम्प्रदायाद्वा ये मीमांसकयाज्ञिकाः। वेदं व्याचक्षते तेषामभिप्रयोऽयमुच्यते। तत्र यश्शक्त्युपारूढस्स तैर्व्याख्यातुमिष्यते। यस्तु शक्त्या परित्यक्तो नैव व्याख्यायते स तैः। तेन व्याख्यातुमिष्टार्थो यस्तेषां स विवक्षितः। अनिष्टो यस्त्वशक्तत्वादविवक्षित एव सः।' इति। एवं च यद्वाक्यं वक्त्रा यदर्थविवक्षया प्रणीतं तद्वाक्यं तत्परमिति पर्यवस्यति। यद्वा परशब्देनेष्टवाचिना शेषी लक्ष्यते। यागादिविशेषे हि स्वर्गादिः यागादिना साधयितुमिष्टो भवति। उत्कृष्टवाची वा परशब्दोऽत्र प्रधाने शेषिणि पर्यवस्यति। प्रसिद्धं च वाक्यं प्रति वाक्यार्थस्य शेषित्वम्। 'ऐन्द्र्या गार्हपत्यमुपतिष्ठत' इत्यादिश्रुतिषु शेषित्वं वाक्यार्थस्य वाक्योद्देश्यप्रतीतिविषयता। इदं वाक्यमेतत्प्रतीत्युद्देश्यकमित्येतल्लोके वक्तृविवक्षयावगम्यते। वेदे न्यायेन। एवं च यद्वाक्यं यत्प्रतीत्युद्देशेन प्रवर्तते तद्वाक्यं तत्परमिति पर्यवस्यतीति वक्त्रभिप्रायविष्यतया न्यायविषयतया वा यत्प्रतीतिर्वाक्यस्योद्देश्या न भवति तस्य कदाचिद्वाक्यजन्यप्रतीतिविषयत्वेऽपि न तत्र तस्य तात्पर्यप्रसङ्गः। एवं द्विविधं तात्पर्यपदार्थनिर्वचनं मनसि निधाय प्रकृते तदुभयं योजयति–**तत्स्वरूपोपासनाविषयत्वमिति।** तस्य ब्रह्मणः स्वरूपं चोपासना च तत्स्वरूपोपासने ते विषयावेषामिति तत्स्वरूपोपासनाविषया वेदान्ताः तेषां भावस्तत्त्वम्। अनन्यत्रभावोऽत्र विषयशब्दार्थः। एवं च वेदान्तानां ब्रह्मस्वरूपे तदुपासनाविधाने च विश्रान्तिः। तयोरेव वक्तृविविक्षागोचरत्वात्तत्प्रतीत्योरेव वेदान्तोद्देश्यत्वाच्चेति प्रदर्शिते तात्पर्यशब्दार्थनिर्वचनद्वयेऽस्य भाष्यस्य पर्यवसानं लभ्यते। यद्यपि वेदान्तानां ब्रह्मण्येव तात्पर्यमुपक्रमादिनिर्णयवत्त्वेनात्र प्रस्तुतं तथापि तदुपासनाविधानेऽपि तेषां तात्पर्यमग्रे प्रदर्शयिष्यत इति तदभिप्रायेणोपासनाग्रहणम्। परिगणितेषु तात्पर्यलिङ्गेष्वाद्येन तात्पर्यनिर्णयस्थलमुदाहरति–**उपक्रमेति। सदेवेति।** नन्वत्र ब्रह्मणस्सामान्येन सर्वप्रपञ्चात्मकतयोपक्रमः विशिष्य श्वेतकेत्वात्मतयोपसंहार इति तयोर्नैकरूप्यमिति चेन्न। सामान्येनोपक्रम्य विषयविशेषप्रदर्शनेनोपसंहारस्य स्थालीपुलाकन्यायने सामान्यप्रतिज्ञादृढीकरणार्थतया तत्रैव पर्यवसानात्। दृश्यते ह्येतत्। ग्रामस्थास्सर्व एवात्यन्तं शिष्टा इति सामान्यतः प्रतिज्ञाय चैत्रस्तावदयमतिशिष्ट इति विशिष्य कस्यचित्प्रदर्शनस्य 'लोकोत्तरं चरितमर्पयति प्रतिष्ठां पुंसां कुलं न हि निमित्तमुदात्ततायाः। वातापितापनमुनेः कलशात्प्रसूतिः लीलायितं पुनरमुष्य समुद्रपान' मित्याद्यर्थान्तरन्यासोदाहरणश्लोकेषु सामान्यप्रतिज्ञापूर्वकविशेषोपन्यासस्य सामान्यप्रतिज्ञादृढीकरणार्थतया

तदर्थे पर्यवसानम्। ननु, 'तत्त्वमसी'त्यत: प्रा' गैतदात्म्यमिदं सर्व'मिति सामान्येनोपसंहारो दृश्यते।स किमर्थं नोदाहृत:। तदुदाहरणे ह्यत्यन्तमाञ्जस्यं लभ्यते। सत्यम्। तत्रैतत्प्रकृतं 'सदात्मा सोस्ये'त्येतावद्विवक्षायां तद्धितवैयर्थ्यप्रसङ्गादेतदात्मनि भवं विवक्षितमित्याद्यर्थान्तरशङ्काग्रस्तत्वेनास्फुटत्वात्तन्नोदाहृतम्। अत एव 'स्तब्धोऽस्युत तमादेशमप्राक्ष्य:' इत्यादिसर्वविज्ञानप्रतिज्ञाविषय: परमोपक्रमोऽत्र नोदाहृत:। सर्वविज्ञानप्रतिज्ञानप्रतिज्ञाया' स्सदेव सोम्येद-मिति समानाधिकरणनिर्देशस्यैव सर्वात्मविषयताया अस्फुटत्वात्। नन्वनेन ब्रह्मप्रपञ्चसामानाधिकरण्यनिर्देशात्मकब्रह्मसार्वात्म्यप्रतिपादकवाक्य-प्रमाणवत्त्वरूपेणोपक्रमोपसंहारैकरूप्येण कस्य प्रपञ्चात्मनि ब्रह्मणि तात्पर्यं निर्णीयते। उच्यते। उपक्रमोपसंहारगतवाक्यप्रमाणयोरेव तावत्तत्र तात्पर्यमविचलं तेन निर्णीयते 'येनोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थ'इति न्यायात्। 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं यद्द्वादशकपालो जगत्यैवास्मिन्पशून्दधाति यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवती'ति वाक्यसन्दर्भस्य द्वादशकपालेष्टिरिवश्वेतकेतुसम्बोधकोद्दालककृतब्रह्मोपदेशरूपस्यास्य वाक्यसन्दर्भस्य सकलप्रपञ्चात्मभूतं ब्रह्मार्थ इत्यवगमात्तदुपक्रमोपसंहारमध्यवर्तिनि ब्रह्मसार्वात्म्ये विरोधिधर्मप्रतिपादकत्वेन प्रतीयमानान्यवान्तरवाक्यान्यष्टाकपालादिवाक्यानि द्वादशकपालेष्टिविधानपरतयेव सर्वप्रपञ्चात्मभूतब्रह्मपरतया नेतव्यानीति तेषामपि तत्र तात्पर्यं निर्णीयते। तथाहि-तत्र नवखण्डीमध्ये प्रथमखण्डे शकुनिबन्धनयोर्द्वितीयखण्डे नानावृक्षरसमधुनो: तृतीयखण्डे नदीसमुद्रयो: पञ्चमखण्डे वटतद्बीजयो: षष्ठखण्डे जललवणयो: सप्तमखण्डे पुरुषगन्धारदेशयोर्नवमखण्डे स्तेनापहार्ययोश्च शरीरात्मभावापन्नयोर्दृष्टान्तीकरणलिङ्गात् दार्ष्टान्तिकयो: प्रपञ्चब्रह्मणोस्तदभावोऽवसीयते। चतुर्थखण्डे दृष्टान्तीकृतयोर्महावृक्षबीजयोश्शरीरात्मभावसत्त्वेऽपि बहुलिङ्गविरुद्धमेकलिङ्गमसाधकम्। स्यादेतत्। उपक्रमोपसंहारैकरूप्यशरणीकरणे बहुविरुद्धमेकमसाधकमित्येतत्तुल्यम्। तेनापि हि वैश्वानराधिकरणन्यायतौल्यात् सद्विद्यावाक्यसन्दर्भ: कृत्स्नोऽपि प्रपञ्चात्मनि ब्रह्मणि प्रमाणमेकं प्रकरणं वेति वाक्यप्रकरणयोरन्यतरदेकमेव प्रमाणमुत्थापनीयम्। न च वैश्वानरवाक्ये उपक्रमोपसंहारैकरूप्यावधृतेनैकेन वाक्यप्रमाणेन बहून्यष्टाकपालादिवाक्यानि जातेष्ट्याश्रितगुणफल-विध्यर्थत्वेन प्रतीयमानानि बाधितानि दृष्टानीति वाच्यम्। अष्टाकपालादिवाक्येषु विध्यश्रवणाद्विधियोग्यपुरुषव्यापारमात्रस्याप्यश्रवणात् यच्छब्दोपबन्धेनानुवादकत्वस्यैव प्रत्यायनात्। अष्टाकपालदिभवनपवनादिकयोरेककालत्वनिर्देशेन फलफलिभावाप्रतीते' र्यस्मिञ्जात'इति वाक्ये पूतत्वादीनां समुच्चयश्रवणेन तेषां व्यवस्थिताष्टाकपालादिफलत्वायोगाच्च तेषु गुणफलविधयस्त्यक्ता:। न त्वेकेनैव केनचित्प्रमाणेन बाधितत्वात्। अथापि स्यात्। 'जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ

पुरोडाशावुपांशुयाजमन्तरा यजति' 'विष्णुरुपांशु यष्टव्योऽजामित्वाय' 'प्रजापतिरुपांशु यष्टव्योऽजामित्वाय' 'अग्नीषोमावुपांशु यष्टव्यावजामित्वाये'त्यत्र पुरोडाशद्वयनैरन्तर्यप्रयुक्त-जामितादोषोपक्रमतन्निर्हरणोपसंहारावधृतान्तरालसंयुक्तकिञ्चित्कर्मविधितात्पर्यैकवाक्यत्वानुरोधात् मध्ये श्रूयमाण एव विष्णुरुपांशु यष्टव्य इत्यादिविधयस्त्यक्ता इति। सत्यं त्यक्ताः। न त्वेकवाक्यत्वानुरोधात्। किं तु जामितापरिहारायावश्यमन्तरावाक्ये विधावभ्युपगन्तव्ये तत्रैव शाखाभेदेनाग्नेयाग्नीषोमीय-याज्यानुवाक्यायुगलमध्ये पठितानां वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानां क्रमप्रमाणेनान्वये सति तत्तन्मन्त्रोदितानां विष्ण्वादीनां तत्र यागे विकल्पेन देवतात्वस्य प्राप्तत्वाद्विष्ण्वादिवाक्यस्थयजिना सन्निहिततद्यागानुवादकत्वस्वारस्याच्च। विधेयाभावेन विष्ण्वादिवाक्यानां मन्त्रवर्णेन प्राप्तविष्ण्वादिदेवतावत्तया तद्यागस्तावकप्रतीतेः। एतेन 'सदेव सोम्येदमग्र आसीत्तत्त्वमसी'त्युपक्रमोपसंहारगतवाक्यद्वयेन ब्रह्मसार्वात्म्यप्रतिपादकेन तद्विरोधिनामुदाहृतलिङ्गानां बाध इत्यपि शङ्का निरस्ता। अल्पेनाधिकबाधस्य वाक्येन लिङ्गबाधस्य चायुक्तत्वादिति चेत् उक्तप्रायमत्रोत्तरम्। श्रुत्यादिषूत्तरमप्यल्पमपि तात्पर्यलिङ्गवत्प्रबलं पूर्वमप्यधिकमपि तात्पर्यलिङ्गरहितं दुर्बलम्। तात्पर्याधीनत्वाद्वेदप्रामाण्यस्य। तदिहोपक्रमोपसंहारगतमुदाहृतवाक्यद्वयं सर्वात्मभूतब्रह्मप्रमाणभूततयावधृतं कृत्स्नमिदं प्रकरणं चोपक्रमोपसंहारैकरूप्यावधृतसर्वात्मभूतब्रह्मतात्पर्यशालितया बलवत्त्वात्तैरतथाभूतानामुदाहृतलिङ्गानां बाधो युक्तः। शकुनिबन्धनादयो हि प्रपञ्चब्रह्मणोर्न शरीरात्मभावराहित्ये दृष्टान्तीकृताः। येन ते तत्तात्पर्या भवेयुः। किंत्वाश्रिताश्रयभावादिषु अन्यत्र दृष्टान्तीकृता अपि वस्तुतः शरीरात्मभावरहिता इत्येतावता प्रपञ्चब्रह्मणोरपि तदभावं गमयन्तीति वक्तव्यम्। नैतदुपपद्यते तात्पर्यवद्वाक्यविरोधादिति। 'एवमैतदात्म्यमिदं सर्व'मित्यत्राप्येतदात्मेति वक्तव्ये चातुर्वर्ण्यादिवत्स्वार्थे तद्धित इति योजनीयम्। एवमन्यदपि तत्र तत्र विरुद्धत्वेन प्रतीयमानं सर्वमनया दिशोपपादनीयम्। उपक्रमोपसंहारलिङ्गेन तात्पर्यनिर्णयस्योदाहरणं तैत्तिरीयाणा'मणोरणीया'नित्यनुवाके वक्तव्यम्। सर्वं शारीराधिकरणे प्रपञ्चयिष्यते **एवमन्यत्रापीति**। तत्र आनन्दमयाधिकरणादिषूदाहरिष्यमाणे विषयवाक्य इत्यर्थः। 'तत्त्वमसीति नवकृत्वश्चिदात्मत्वाभ्यासः 'सर्वो वै रुद्रः' पुरुषो वै रुद्रः' 'सन्महस्सर्वो ह्येष रुद्र'इति सर्वा' त्मत्वाभ्यासः। 'अम्बिकापतय उमापतय' इति चिच्छक्तिशबलत्वाभ्यासः। 'यो वै रुद्रस्स भगवान्यश्च ब्रह्मे'त्यादिषु ब्रह्मविष्णुमहेश्वरादिपर्यायेषु प्रतिपर्यायं भगवच्छब्दोक्तकल्याणगुणवत्त्वाभ्यासः। 'वेदेतरे'ति वेदग्रहणं तदुपजीविनां स्मृतिपुराणादीनामप्युपलक्षणम्। अपूर्वता ब्रह्मप्रमाणभूतसर्ववेदान्तानुगतेति विशिष्योदाहरणं न दर्शितम्। **फलं ब्रह्मज्ञानमिति**। निरतिशयानन्दरूपब्रह्मसाक्षात्कार इत्यर्थः। अत्र 'धातुः प्रसादान्महिमानमीश'मित्युपक्रमोदाहरणमेवोदाहरणं भविष्यतीति पृथगुदाहरणं दर्शितम्। 'अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः। तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीश'मिति मन्त्रस्य ह्ययमर्थः। अणोरणुत्वेन प्रसिद्धात्

परमाण्वादेरप्यणीयान् अणुत्तरः। अव्यक्तत्वादतिसूक्ष्मत्वव्यपदेशः। महतो गगनादेरपि महीयान् महत्तरः। सर्वव्यापकत्वात्। यद्वा। अणोरल्पशरीरावच्छिन्नस्य जन्तोरणीयान् तदीयहृदयगुहावच्छिन्नत्वेन महाशरीरहृदयगुहावच्छिन्नात्स्वस्मादणुतरः। महतः महाशरीरावच्छिन्नस्य जन्तोः। महीयान् अल्पशरीरहृदयगुहावच्छन्नात्स्वस्मान्महत्तरः। प्रतियोग्यनिर्देशेऽपि बौद्धप्रतियोग्यपेक्षायामप्यतिशायनिक इत्यणीयान्महीयानितीयसुन्प्रत्ययः। एवम्भूतः परमात्मा अस्य जन्तोः प्राणिवर्गस्य हृदयगुहायां निहितः सन्निहितः। तं परमात्मानम्।अक्रतुं सकलकर्मास्पृष्टम्। महिमानं महिमवन्तम्। महाविभूतियुक्तमीशं सर्वस्य नियन्तारम्। धातुर्जगतां धारकस्य तस्यैव प्रसादाद्वीतशोकः विगलितसांसारिकसकलक्लेशस्सन्। पश्यति निरतिशयानन्दरूपमनुभवतीति। अत्र शोकनिवृत्त्यनन्तरं वर्ण्यमानं दर्शनं फलरूपमेव विवक्षितमिति ज्ञायते। **जगत्सृष्टीति।** सृष्ट्यादीनां सङ्क्षेपेण जन्माद्यधिकरणे प्रपञ्चेनेक्षत्यधिकरणादिषु चोदाहरणाद्विरोधाभावस्य सर्ववेदान्तव्यापकत्वात् जगत्कारणत्वोपपत्तिरूपसर्वज्ञतादिसम्पत्तेर्जन्माधिष्वपि तेषां तात्पर्यमावश्यकमित्याह–**न केवलमिति। तज्ज्ञानविधिपरा अपि ज्ञायन्त इति।** अन्यथोपासनानुष्ठानासम्भवेन ब्रह्मप्राप्तिफलानिष्पत्तिप्रसङ्गादिति भावः। एवमुभयत्र तात्पर्ये प्रसाधिते लब्धावकाशं तृतीयपूर्वपक्षमनुवदति–उभयपरत्व इति। यद्यप्युभयत्रापि तात्पर्यस्यावश्यम्भावे सति वाक्यभेद आपतति चेत्स न दोष इत्येव प्राप्नोति। तथापि वाक्यभेदाप्रसङ्गेन परिहर्तुमनुवादः। एकदेशमतेन तावत्परिहर्तुमुपक्रमते–**तन्नेति।** यथा रूपप्रत्यायकं चक्षुस्तत्समवायि द्रव्यमपि तत्संसृष्टतया प्रत्याययति। तथा ज्ञानविधिपरा वेदान्तास्तज्ज्ञेयं ब्रह्मापि तत्संसृष्टतया प्रत्याययेयुः। न चोभयपरत्वे वाक्यभेदो दोषः। स्वतन्त्रोभयपरत्वानङ्गीकारादित्याह **रूपेति।** ननु, तर्हि यथा रूपज्ञानजनकेन चक्षुषा तदाश्रयद्रव्यज्ञानस्यापि सहजनितत्वात्तदाश्रयद्रव्यज्ञाने यत्नान्तरापेक्षा नास्ति। एवं ब्रह्मज्ञानविधिगोचरज्ञानजनकैर्वेदान्तैर्ब्रह्मज्ञानस्यापि जनितत्वान्न ब्रह्मज्ञाने विध्यपेक्षास्तीति शङ्कते–**शाब्दं हीति।** साङ्गाध्ययनबलाद्वेदान्तेभ्यः स्वतः प्राप्तं ब्रह्मज्ञानं विध्यनुष्ठाप्यं नाभ्युपगम्ये। किं तु मन्त्रादिष्विवान्यदेव ज्ञानमतो न विधिवैयर्थ्यमिति परिहरति–**प्राप्तावपीति।** 'मन्त्रादिष्विवेति 'दृष्टान्तं विशदयति **यथेति।** यथा 'बर्हिर्देवसदनं दामि 'अग्निर्मूर्धा दिवः ककु 'दित्यादिमन्त्रैः साङ्गाध्ययनानन्तरं द्रव्यदेवतादिज्ञाने जातेऽपि क्रतुप्रयोगमध्ये तत्तदनुष्ठानोपयोगि मन्त्रकरणकं तज्ज्ञानान्तरं प्रयोगविधिरनुष्ठापयति तथात्रापीत्यर्थः। ननु, मन्त्राः क्रतुषु व्रीह्यादिवदङ्गभावेन 'सूक्तवाकेन 'प्रस्तरं प्रहरती 'त्यादिवाक्यगततृतीयाश्रुत्यादिभिर्नियुक्ताः केन द्वारेणोपकुर्वन्तीत्यपेक्षायां दृष्टे सम्भवत्यदृष्टकल्पनानुपपत्तेः मन्त्रैर्जातस्य ज्ञानस्य क्रतुप्रयोगमध्यपात्यनुष्ठानोपयोगित्वासम्भवात् साङ्ग क्रतुमनुष्ठापयन्प्रयोगविधिस्तदानीं मन्त्रैर्मन्त्रार्थज्ञानमप्यनुष्ठापयतीति युक्तम्। इह तु नास्ति। वेदान्तैर्ब्रह्मज्ञानस्य पुनरनुष्ठापकः प्रयोगविधिः। न च वाच्यं ज्योतिष्टोमादिष्वपि कल्प्यः प्रयोगविधिः तद्वदिहापि कल्प्यतामिति। तत्र कल्पकानामुत्पत्तिविनियोगाधिकारविधीनां सत्त्वात्। 'ज्योतिष्टोमे महासोमेन यजेते 'ति सोमद्रव्यरूपकरणविशिष्टयागस्वरूपविधिरुत्पत्तिविधिः। 'ज्योतिष्टोमेन स्वर्गकामो यजेते 'ति

फलसम्बन्धबोधको विधिरधिकारविधिः। तत्प्रकरणे दीक्षणीयाद्याम्नानकल्पितो 'दीक्षणीयादिभिर्ज्योतिष्टोमस्योपकुर्या'दिति विधिर्नियोगविधिः। ततश्च दीक्षणीयादिभिरुपकृत्य 'ज्योतिष्टोमेन स्वर्गकामो यजेते'ति प्रयोगविधिकल्पनं युक्तम्। नेह तथा। वेदान्तैर्ब्रह्म ज्ञातव्यमित्यादिरूपेणोत्पत्तिविध्यादयः श्रूयन्त इत्याशङ्क्य निराकरोति-**न चेति।** 'आत्मा वा अरे द्रष्टव्य' इत्यात्मदर्शने विधिः श्रूयते। तत्र दृशिधातुना चाक्षुषज्ञानवाचिना करतलामलकालोकनादिवदसन्दिग्धाविपर्यस्तमात्मज्ञानं विवक्षणीयम्। आत्मनि चाक्षुषज्ञानासम्भवादिति। न स्ताद्ब्रह्मज्ञानस्योत्पत्तिविधिः। तत्र करणाकाङ्क्षायां वेदान्ताः करणत्वेनाध्याहार्या इत्येवमपेक्षितांशाध्याहारेण वेदान्तकरणविशिष्टब्रह्मज्ञानोत्पत्तिविधिसिद्धावित्यर्थः। ननु, वेदान्तानामेव करणत्वेनाध्याहारो नान्यस्य कस्यचिदित्यत्र किं प्रमाणमित्याकाङ्क्षायामाह-**प्रकरणवशादिति।** श्रोतव्य इत्यनन्तरवाक्ये तात्पर्यावधारणरूपश्रवणसङ्कीर्तनयोग्यतया वेदान्ततात्पर्यविषयं पर्यवस्यति। तत्र वेदान्तानां सन्निहितत्वलाभे सति सन्निधिलक्षणप्रकरणवशात्तेषामेव करणत्वेनाध्याहारस्सिद्ध्यतीति भावः। यद्यप्यत्रापि योग्यतयैव वेदान्तानां करणत्वेनाध्याहारस्सिद्ध्यति। तथापि सन्निधिरप्यस्तीति दर्शयितुं प्रकरणवशादित्युक्तम्। **शमादिकमिति।** 'शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वात्मन्येवात्मानं पश्ये'दिति विधिः श्रुत्युपात्तकर्त्रैक्यवशात्फलसाधनमात्मज्ञानं प्रति शमादीन्यङ्गत्वेन विनियोजयन्विनियोगविधिस्सम्पद्यत इत्यर्थः। यद्यपि 'शान्तो दान्त'इति वाक्यस्य शाखान्तरत्वात्तत्रापि शमादिविशिष्टस्यात्मदर्शनस्य विधानमङ्गीकर्तुं शक्यमिति तदुत्पत्तिविधिरेव पर्यवस्यति। एवं प्राप्तकर्मानुवादेन शमाद्यनेकगुणविधानाभावाद्वाक्यभेदोऽपि न प्रसज्यते। तथापि शमादीनामङ्गत्वेन विधानाद्विनियोगविधित्वमप्युपपद्यत इत्यभिप्रायेण तथोक्तम्। एवमेव 'ज्ञात्वा देव'मित्यत्रार्थवादप्रतीतमोक्षकामाधिकारिकज्ञानविधेरधिकारविधित्वमपि। एवं च 'पाशमोक्षकामशश मादियुक्तो वेदान्तैर्ब्रह्म जानीया-दिति प्रयोगविधिकल्पनोपपत्तेः। तेन प्रयोगविधिना प्राग्वेदान्तैर्ब्रह्मज्ञाने स्वतो जातेऽपि पुनरपि वेदान्तकरणकं ब्रह्मज्ञानान्तरं फलायानुष्ठाप्यत इति युक्तमित्याह-**अत इति।** ज्ञाने विध्यसम्भवात् तत्र चतुर्विधविध्युपन्यासो न सङ्गच्छत इत्याशङ्कते-**नन्विति।** स्वतन्त्रफलाय धात्वर्थे कर्मरूपज्ञानविधिरभ्युपगम्यते उत कर्मकारकगतफलाय गुणकर्मरूपज्ञानविधिरिति विकल्पं मनसि निधायाद्यं विधायकत्वाभिमतवाक्योदाहरणेन निरस्यति-आत्मेति। 'आत्मा द्रष्टव्यः' 'आत्मानं पश्ये'दित्यादिवाक्येषु ज्ञानविधिमभ्युपगच्छता कर्माभिधायिप्रत्ययानुसारेण कर्मोपसर्जनक्रियाविधान-मभ्युपगन्तव्यम्। न स्वतन्त्रक्रियाविधानमिति भावः। द्वितीयं निरस्यति-नित्य इति। कर्मोपसर्जनक्रियाविधानमपि नाभ्युपगन्तुं शक्यम्। आत्मन्युत्पत्त्यादीनां क्रियाजन्यफलानामसम्भवेन तस्य विधेयक्रियाकर्मत्वासम्भवादिति भावः। 'वेदिं करोती'त्यत्र वेद्या इवोत्पत्त्यसम्भवे हेतुर्नित्य' इति विशेषणम्। 'पयो दोग्धी' त्यत्र पयस इव प्राप्यत्वासम्भवे हेतुर्ब्रह्मणी'ति। बृहत्त्वाद्व्यापकत्वेन नित्यप्राप्तत्वात् प्राप्यत्वं न सम्भवतीति भावः। 'बर्हिर्लुनाती'त्यत्र बर्हिष एव विकार्यत्वासम्भवे 'व्रीहीन्प्रोक्षती'त्यत्र व्रीहीणामिव

गुणाधानलक्षणसंस्कारासम्भवे च हेतु 'निर्विकार' इति। 'गृहं संमार्ष्टी'त्यत्रेव शुद्ध्याधानलक्षणसंस्कारासम्भवे हेतु'विशुद्ध'इति। यद्येवं सक्तुन्यायेन विपरीतो गुणप्रधानभावोऽस्तु। 'सक्तूञ्जुहोती'त्यत्र हि होमेन भस्मीकृतानां सक्तूनां भाव्युपयोगासम्भवात् भूतोपयोगाभावाच्च अघटमानं गुणकर्मत्वं परित्यज्य सक्तुभिरिति तृतीयाश्रयणेन क्रियाप्राधान्यमुपादायार्थकर्मत्वमाश्रितम्। एवमिहाप्यस्त्वित्याशङ्क्याह-**न चेति**। होमकरणतया विवक्षितानामपि सक्तूनां प्रक्षेप्यत्वेनार्थिककर्मत्वापरित्यागात् अस्ति जुहोतेस्सकर्मकत्वनिर्वाहः। तथात्र न निर्वाहोऽस्ति। आत्मनि कर्मत्वनिर्वाहकानामुत्पत्त्यादीनामसम्भवादित्या-**वैषम्यादिति**। होमेन सक्तूनां प्रक्षेप्यत्वेनेव ज्ञानेनात्मनोऽवभास्यत्वेन व्यवहार्यत्वेन चार्थतः कर्मत्वमिहापि सम्भवतीति स्मृतिविनोयोगादर्शनात् सक्तुहोमवदात्मज्ञानस्याव्यर्थकर्मत्वकल्पनं सम्भवतीति समाधत्ते-**नेति**। यद्यपि ज्ञानेन प्रसादितस्य परमेश्वरस्य मोक्षप्रदानेऽस्त्युपयोग इति सिद्धान्तदृष्ट्या गुणकर्मत्वमपि निर्वोढुं शक्यं तथाप्येकदेशिमतं यावदुक्तमिहानूदितम्। ननु, वेदान्तैरात्मज्ञानं कुर्यादिति विधिर्न सम्भवति। अधीतवेदान्तस्य पठितमीमांसाशास्त्रस्य वेदान्तानुसन्धानेन तदर्थज्ञानस्य स्वयमेव प्राप्तेरिति शङ्कते-**प्राप्त इति**। लौकिकी खल्वियमिह प्राप्तिः सा तु पाक्षिकी ऋतुगमन इव। तथा च 'ऋतावुपेयादेवे' तिवद्वेदान्तैरात्मज्ञानं कुर्यादेवेत्यस्ति नियमविधेरवकाशः। यदि ब्रह्मोज्झतापरिहाराय सदा वेदाभ्यासावश्यम्भावात् विचारितवेदान्तस्य वेदान्तैरात्मज्ञानप्राप्तिर्नित्येत्युच्यते तथापि वेदान्तानुसन्धानप्रयुक्तात्मज्ञानस्य लोकव्यवहारप्रयुक्तानात्मज्ञानस्य च समुच्चित्य प्राप्तावनावश्यकानात्मज्ञाननिवृत्त्यर्थस्य परिसङ्ख्याविधेरवकाशोऽस्ति। 'आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तये'ति स्मृत्यानुगुण्यादित्यभिप्रेत्य परिहरति-**प्राप्तिरिति**। एवमेकदेशिमतमुपन्यस्तम्। तत्रानभिमतांशं तदुपमर्दकशङ्कासमाधानमुखेन निराकृत्य स्वमतेन वेदान्तानां विधौ ब्रह्मणि च तात्पर्यमुपपादयत्यग्रिमग्रन्थसन्दर्भेण। तत्र वेदान्तानां ब्रह्मणि विधौ च प्रामाण्यसम्भवे रूपतदाश्रयप्रमाणभूतचक्षुर्दृष्टान्तप्रदर्शनमयुक्तमित्याशङ्कते-**नन्विति**। चक्षुर्हि येन येन योग्येन सन्निकृष्टं तत्र सर्वत्रापि प्रमां जनयतीति युक्तं तस्योभयत्र प्रामाण्यम्। न तथा शब्दो यत्र यत्र शक्तिरस्ति तत्र सर्वत्र प्रमां जनयति। किं तु यत्र तात्पर्यं तत्रैव। तथा चोभयतात्पर्यवत्त्वेनोभयत्र प्रमाजनकशब्द एवात्र दृष्टान्तीकर्तव्यो न चक्षुरिति भावः। तथैव स्वयं दृष्टान्तमुदाहरन्समाधत्ते-**नेति**। ननु, समिदादिवाक्यानि केवलं **प्रयाजानां** विधायकानि न तदनुष्ठानक्रमेऽपि तात्पर्यवन्ति। किं तु तेषां पाठक्रमेण तदर्थानुष्ठानक्रम इति नैकस्योभयपरतायामिदमुदाहरणमिति चेन्न। यथा समिदादिवाक्यानि परमेश्वरेणाध्येतृणां तदर्थप्रतीतिर्भवत्वितीच्छयोच्चरितानि तथा तत्पाठक्रमेण तदर्थानुष्ठानक्रमप्रतीतिर्भवत्वित्यपीच्छया क्रमविशेषे तान्युच्चरितानीति तेषां तत्रापि तात्पर्यानिवारणात्। तत्प्रमितिशेषत्वं तात्पर्यमित्यभ्युपगमेऽपि क्रमविशेषेण पठितानां विधिवाक्यानां तत्तदर्थानुष्ठानक्रमप्रमितिशेषत्वस्यापि सत्त्वेन तत्र तात्पर्यानिवारणात्। अत एव शिवं पूजयता गन्धा लेपनीयाः धूपो दातव्यः पुष्पाण्यवकिरितव्यानीति वदन्तं प्रति, नायं क्रमः किं तु गन्धो

लेपनीयः पुष्पाण्यवकिरितव्यानि धूपो दातव्य इति प्रत्युक्तिर्दृश्यते। यदि क्रमेणोच्चरितानां विधिवाक्यानां तदर्थानुष्ठानक्रमे तात्पर्यं न स्यात् तदा तदभिमतक्रमनिषेधपूर्वकं क्रमान्तरोपदेशविषयतयैवं प्रत्युक्तिर्न सङ्गच्छते। ननु, विधिवाक्यसन्दर्भे विधेयपदार्था एव शब्दप्रमाणकाः न तु तेषां क्रमः। तस्यापदार्थत्वादवाक्यार्थत्वाच्च। किं त्वेकेन कर्त्रा बहूनां पदार्थानां युगपदनुष्ठातुमशक्यत्वात्क्रमाकाङ्क्षायां पाठक्रमसन्निधापितस्तत्क्रमो गृह्यत इत्येवमुपस्थितिलाघवसहकृतार्थापत्तिर्गम्यत इति चेन्न। क्रमस्य प्रत्येकविधिवाक्यार्थत्वाभावेऽपि क्रमपठितानेकवाक्यार्थत्वोपपत्तेः। पाठक्रमेण सन्निधापितः पदार्थक्रमो गृह्यत इति वदतापि पाठक्रमेण सन्निधानस्य क्रमपठितानेकवाक्यजन्यज्ञानविषयत्वादन्यस्य वक्तुमशक्यत्वात्। अन्यथा पाठक्रमस्य स्वातन्त्र्येण क्रमप्रमितिजनकत्वे तस्य प्रमाणान्तरतापत्तेः तस्मिन्नपि पक्षे वाक्यविशेषाणां पाठक्रमस्यैव तदर्थानुष्ठानक्रमप्रमितिजनकत्वेन विशेषणतया तेषामपि तज्जनकत्वावश्यंभावाच्च। क्रमस्य श्रुतिमूलार्थापत्तिगम्यत्वपक्षेऽपि धूमवह्न्युभयबोधनाय प्रवृत्तस्य 'पर्वते धूम'इति वाक्यस्य धूमवह्न्योरिवानुष्ठेयपदार्थतत्क्रमबोधनाय प्रवृत्तानां शब्दतन्मूलप्रमाणान्तरगम्ययोरनुष्ठेयपदार्थजाततत्क्रमयोस्तात्पर्यानिवारणाच्चेति भावः। एवं वेदान्तानां ब्रह्मणि विधौ च तात्पर्यसम्भावनायामेकदेश्युक्तं दृष्टान्तं निरस्य स्वाभिमतो दृष्टान्तः समर्थितः। अथ तेषां वेदान्तकरणकज्ञानविधौ तात्पर्यमिति तन्मतं निरस्य तन्मूलकोपासनाविधौ तात्पर्यमिति स्वमतं समर्थयितुं तन्मतेऽनुपपत्तिमाशङ्कते-**नन्विति**। यदि वेदान्तकरणकं शाब्दं ब्रह्मज्ञानं मोक्षजनकं तदा तेभ्यः स्वतः प्राप्तस्यैव तस्य मोक्षजनकत्वोपपत्तेर्व्यर्थं तत्र विधिकल्पनम्। न हि स्वतोऽसमर्थं विधिसंस्पर्शेन सामर्थ्यं लभते। न च विहितं शमादिकमितिकर्तव्यतायोगात् मोक्षजनने समर्थं भवेत् नान्यदिति वाच्यम्। शमादिकं हि ज्ञानाङ्गभावं भजच्चित्तैकाग्रयसम्पादनद्वारा ज्ञानस्वरूपनिष्पादकतया सन्निपत्योपकारकतां भजेत्। तच्चेज्ज्ञानं शमादिकं विनाप्युत्पद्यते किं तदभावेन तस्य वैकल्यमापद्यते। तस्माच्छाब्दज्ञानमूलकं यज्ज्ञानमत्यन्तचित्तैकाग्रयसम्पादनयत्नसाध्यं तदेव ज्ञानं मोक्षार्थं विधेयमभ्युपगन्तव्यम्। न तु शाब्दज्ञानमिति भावः। स्वयं तथाभूतज्ञानान्तरं विधेयं प्रदर्शयन् समाधत्ते-**वाक्येनेति**। किं तच्छाब्दज्ञानाद्विलक्षणं ज्ञानं यत्साक्षात्कारं जनयितुं शक्नुयादिति पृच्छति-**कथमिति**। ध्यानोपासनादिशब्दवाच्यं निरन्तरस्मृतिसन्तानरूपं ज्ञानं तदित्याह-**यदिति**। उपासनारूपमेव ज्ञानं वेदान्तेषु फलाय विधेयमित्युपासनावाचिपदविशेषघटितवाक्योदाहरणेन दर्शयति- **तथा च श्रूयत इति**। 'इत्यादि'ष्वित्यनेन ध्यानोपासनादिपदघटितानि फलयुक्तवाक्यानि गृह्यन्ते। एवं च फलयुक्तवाक्येषु श्रुतानां ज्ञानसामान्यवाचिपदानां छागपशुन्यायेनोपासनारूपज्ञाने पर्यवसानमित्यभिप्रेत्य तथाभूतानि वाक्यानि पृथगुदाहरति-**ज्ञात्वेति**। ननूदाहृतेषु वाक्येषु विधेयज्ञानस्य मोक्षजनकत्वमेव प्रतीयते न तु मोक्षजनकसाक्षात्कारजनकत्वमित्याशङ्क्योदाहृतश्रुतीनामुपबृंहणानुसारेण साक्षात्कारद्वारा मोक्षजनकत्वे तात्पर्यं न तु साक्षादिति दर्शयितुमुपबृंहणमुदाहरति-**तथा हीति**। **श्रवणेति**। श्रवणेन

जातमुपपत्त्यनुचिन्तनरूपेण मननेन स्थिरीकृतं च ज्ञानं श्रवणमननसम्पन्नज्ञानं तेन कारणभूतेनाविनाभूतं निदिध्यासनं ध्यानम्। स्वार्थे सन्प्रत्ययः। **अत इति।** मोक्षजनकसाक्षात्कारसाधनत्वादेव उपासनारूपं ज्ञानं मोक्षफलं विधीयते न तु साक्षान्मोक्षसाधनत्वादिति भावः। पूर्वं फलयुक्तान्युपासनावाक्यान्युदाहृतानि। इदानीं गुणयुक्त- वाक्यान्युदाहरति-**आत्मनीति।** शरीरे हृदयाकाशमध्य इत्यर्थः। तद्विवरणार्थं द्वितीयोदाहरणम्। 'शान्त उपासीते'ति शमगुणयुक्तोपासनाविधिः।' इति प्राचीनयोग्योपास्वे'ति व्याहृतिशरीरकत्वादि- गुणयुक्तोपासनाविधिः। तत्र 'प्राचीनयोग्ये'ति शिष्यसम्बोधनम्। इतिशब्दः प्रागुक्तप्रकारपरामर्शी। चकारः पूर्वोदाहृतश्रुतिभिः समुच्चयार्थः। ब्रह्मस्वरूपं तदुपासनाप्रकारं तत्फलविशेषं च विवेचयन्तीं श्रुतिमुदाहरति-**तथेति।** 'ब्रह्मविदाप्नोति पर'मित्युपक्रम्य किं तद्ब्रह्म कथं तद्वेदनीयं तद्वेदनेन प्राप्यं फलं कीदृशमित्याकाङ्क्षायां तत्त्रितयविवेचनार्थमृक्सद्भावं 'तदेषाभ्युक्ते'ति प्रतिज्ञाय सा ऋगुदाहृता। 'सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान्कामान्सह। ब्रह्मणा विपश्चितेति'। अत्र प्रथमपादेन ब्रह्मस्वरूपमुक्तम्। द्वितीयपादेनोपासनाप्रकारः। तृतीयपादेन निरतिशयब्रह्मानन्दरूपं फलमुक्तम्। मानुषादिहिरण्यगर्भान्तेषु यावन्तो भोगास्तेषां सर्वेषां सहत्वे यावानानन्दस्तावान्निरतिशयब्रह्मानन्दो हि तेन लक्षणया प्रकाश्यते। चतुर्थपादेन ब्रह्मविद्यया तत्साम्यप्राप्तिरुच्यते। तत्र 'ब्रह्मणा सहे'त्यनेन ब्रह्म यावन्तं स्वात्मानन्दमनुभवति तावन्तं तदीयमानन्दं मुक्तोऽप्यनुभवतीति मुक्तस्य ब्रह्मणा परमसाम्यं प्रकाश्यते। ननु, वेदान्तेषूपासनाविधयस्तत्र तत्र प्रतीयन्तां नाम तथापि तेषां तात्पर्यलिङ्गसद्भावात् ब्रह्मण्येव प्रामाण्यं नोपासनाविधिष्वित्याशङ्क्य तेष्वपि तात्पर्यलिङ्गसद्भावं दर्शयति-**अन्यथेति।** यद्युपासना विधीयेरन् तदोक्तफलावाप्तिस्तदुपयोगिब्रह्मसाक्षात्कारोदयश्च न स्यात्। तदभावे सर्वैर्वेदान्तैर्महातात्पर्येण ब्रह्मणः प्रतिपादनमपि विफलं स्यात्। तत्प्राप्त्युपायोपदेशेनैव तत्साफल्यस्योपपादनीयत्वात्। तस्मात्स्वाध्यायविध्यापादितं ब्रह्मपरवाक्यानां पुरुषार्थपर्यवसायित्वं तत्प्राप्त्युपायविधानं विना न सम्भवतीत्युपपत्तिरूपं तात्पर्यलिङ्गमुपासनाविधिष्वप्यस्तीति भावः। एवं च वेदान्तानां ब्रह्मणि विधौ च तात्पर्यसत्त्वादुभयत्रापि प्रामाण्यं सिद्धमित्युपसंहरन् ब्रह्मपरवाक्यान्युपासनापरवाक्यानि च विविच्योदाहरति-**तस्मात्सत्यं ज्ञानमित्यादिना।** उदाहृतेषु ब्रह्मपरवाक्येषु कैश्चित्पदैस्सिद्धं रूपं सङ्गृह्णाति-**सत्यज्ञानेत्यादिना।** इदं पदान्तरोपात्तधर्मविशेषणानामप्युपलक्षणम्। **उपक्रमेति।** उपक्रमादीनि तात्पर्यलिङ्गानि येषां तथाभूतैर्वेदान्तैर्वेदान्तवाक्यैर्निरूप्यते उक्तरूपं ब्रह्म प्रतिपाद्यत इत्यर्थः। **ज्ञानाविनाभूतमिति।** श्रवणमननसम्पन्नज्ञानाविनाभूतमित्यर्थः। 'सर्वान्कामा'नित्यादिना वेदान्तानामुदाहृतेषूपासनाविधिषु तात्पर्यलिङ्गसद्भावं पूर्वोक्तदृढीकरणाय स्मारयित्वा तात्पर्यलिङ्गसद्भावात् ब्रह्मपरेषु वेदान्तेषु उपासनाविधिरप्युपपन्न इत्युपसंहरन् उपासनाविधौ यावदुक्तविशेषणविशिष्टमधिकारिणं दर्शयति-**अत इत्यादिना।** ज्ञानोपासनाविधिरित्यस्य पूर्ववज्ज्ञानाविनाभूतोपासनाविधिरित्यर्थः।

सर्वत्रोपासनस्य श्रवणमननसम्पन्नज्ञानाविनाभावोक्तिरुपासनाविध्यपेक्षितज्ञानोत्पत्त्यर्थे श्रवणे मनने च स्वत:प्राप्तिसम्भवेन तस्य विध्यनपेक्षासूचनार्था। 'शिवाभिधेयं परं ब्रह्मे'ति भाष्यकृता शिवोपपदग्रहणं कृतम्। एवमेव प्राय: पूर्वोत्तरग्रन्थेष्वपि क्रियते। तस्य तात्पर्यं 'स्वपदानि च वर्ण्यन्त' इति भाष्यलक्षणानुसारेण स्वयमेव दर्शयति-**अत्रेति।** संसारमूलमलोच्छेदरूपा परमविशुद्धि: सत्यसङ्कल्पत्वादिमङ्गल्यगुणवत्त्वं च मुमुक्षुणा प्रेप्सितं तदुभयमपि शिवशब्दार्थ इति प्राग्वायुसंहितावचनोदाहरणेन दर्शितम्। अतस्तत्क्रतुन्यायेन मुमुक्षोश्शिव एवोपास्य इति द्योतनार्थं सर्वत्र शिवोपपदग्रहणं क्रियत इत्यर्थ:। मुमुक्षोस्सकलेतरदेवतापरित्यागेन शिव एवोपास्य इत्यत्र श्रुतिमुदाहरति-**तथेति।** तथाभूतस्य शिवस्योपासनां विना मुक्तिर्न सम्भवतीत्याह-**अन्यथेति।** अत्र श्रुतिमुदाहरति-**यदेति।** यदित्यर्थ:। अत: शिवोपासनां विना मुक्त्यसम्भवात् अन्यत्र मुमुक्षुप्रेप्सितस्य शिवत्वस्य नित्यसिद्धस्याभावाच्च सकलेतरपरित्यागेन मुमुक्षुभिश्शिव एव ध्येय इति प्रतिपादयन्त्यथर्वशिखाश्रुतिरुपपन्नार्थेत्याह-**शिव एक इति।** अतो मोक्षकामै: शिव एव ध्यातव्य: साक्षात्कर्तव्यश्चेति युक्तमित्याह-अतश्शिव एवेति। परमप्रकृतमुपसंहरति-**अत इति।**

।।इति समन्वयाधिकरणम्।।४।।

जन्म — ६-११-१९३७

जन्मस्थानम् — ग्रामः — रोहटः, मण्डलम् सोनीपतः (हरियाणा)।

शिक्षा — शास्त्री १९५३, पञ्जाबविश्वविद्यालये सर्वप्रथमः, एम.ए १९६३ दिल्ली विश्वविद्यालयः, पी.एच.डी. १९७० दिल्ली विश्वविद्यालयः।

अध्ययनक्षेत्रम् — साहित्यशास्त्रम्, व्याकरणम् च।

प्रकाशितानि शोधपत्राणि — दिल्ली विश्वविद्यालयदक्षिणपरिसरे समवेतानां परिचर्चानां पुस्तकाकारेषु प्रकाशनेषु बहवो लेखाः।

प्रकाशितो ग्रन्थः — अभिधाविमर्शः, दिल्ली १९८० आचार्यो दण्डी (राष्ट्रियसंस्कृतसंस्थानेन प्रकाशितः)

कार्यक्षेत्रम् — दिल्ली विश्वविद्यालयस्थे, हिन्दूमहाविद्यालये,

प्राध्यापकः — १९६९-१९८६

प्रवाचकः — १९८७-१९८८

गुरुकुलकांगड़ी विश्वविद्यालये प्राचार्यो विभागाध्यक्षश्च — १९८८-१९८९

वर्तमाने हिन्दूमहाविद्यालये प्रवाचकः।

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Agni Mahapurana
664 pp 450.00
Bhagavata Mahapurana-
4vols 2304 pp set 1500.00
Bhavishya Mahapurana
3vols 1400 pp set 1200.00
Brahma Mahapurana
728 pp 450.00
Devi Bhagavata Mahapurana
1154 pp 800.00
Ganesha Purana
832 pp 1993 450.00
Garuda Mahapurana
668 pp 400.00
Harivansha Purana
1802 pp 2vols set 900.00
Kurma Mahapurans
298 pp 300.00
Linga Mahapurana
774 pp 400.00
Markandeya Mahapurana
828 pp 450.00
Narada Mahapurana
932 pp 600.00
Padma Mahapurana
2381pp 4vols set 1600.00
Shiva Mahapurana-
1504 pp 2vols set 900.00
Shiva Mahapurana (Small Type)
412 pp 400.00
Skanda Mahapurana
5600 pp 8 vols set 4000.00
Skanda Mahapurana-3vols
(small Type) 1500.00
Vamana Mahapurana
472 pp 400.00
Vayu Mahapurana
540 pp 400.00
Vishnudharmottara Mahapurana
1246 pp 900.00
Vishnu Mahapurana-with two commentaries
680 pp 500.00
Maha Bhagavat Devipurana
Press
Kalki Purana
316pp 120.00
Vasuki Purana
260 pp 100.00
Saura Purana
290 pp 100.00
Narsimha Purana
380 pp 100.00
Ekamara Purana
490 pp 150.00
Ashtadasha purana Darpana
Contents of 18 Puranas
432 pp 180.00

PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

Vishnu Purana–*H.H. Wilson*
1065 pp 2 vols Set 500.00
Matsya Purana–*N.S. singh*
1252 pp 2 vols 500.00
Narasimha Purana —*Dr.S.Jena*
1100 pp 400.00
Kalika Purana
Prof. Biswanarayan Shastri
(Shloka & Name Index)
1770 pp 3vols set 900.00